गङ्गेशनिबद्धः

# तत्त्वचिन्तामणिः

(उपाध्यादिबाधान्तः)

वाचकगुणरत्नविनिर्मिता

## सुखबोधिका टिप्पनिका

तया सहितः



GANGEŚA'S

# TATTVACINTĀMAṆI

[Beginning with Upādhi and ending with Bādha]

WITH A COMMENTARY

**SUKHABODHIKĀ ṬIPPANIKĀ**

BY VĀCAKA GUNARATNA

सम्पादकः

नगीन जी. शाह

Vācaka Guṇaratna's (c. 1600 A.D.) *Sukhabodhikā Ṭippanikā,* both a commentary on Gaṅgeśa's *Tattvacintāmaṇi* (Anumānakhaṇḍa) and also a subcommentary on a commentary of the *Tattvacintāmaṇi,* which is hitherto unpublished is here published for the first time. The *Tattvacintāmaṇi* is one of the most famous and difficult works of Indian philosophy. The present commentary on it greatly contributes to the understanding of this very important work. Though it is called *Ṭippana,* it is not merely an annotation-type commentary. In fact, it is a good expository commentary, lucidly explaining the knotty points. It evinces deep study and understanding of Navya-Nyāya and its methodology. It expounds subtle points, draws fine line of distinction between the cognate or closely related concepts and terms, discusses readings, refers to or quotes from authors and authoritative texts, and ably explains some grammatical points. It raises doubts and then answers them lucidly and convincingly. Thus, the *Sukhabodhikā Ṭippanikā* represents a positive and distinctive contribution to the vast commentarial literature on the *Tattvacintāmaṇi.*

गङ्गेशनिबद्धः

# तत्त्वचिन्तामणिः

(उपाध्यादिबाधान्तः)

वाचकगुणरत्नविनिर्मिता

## सुखबोधिका टिप्पनिका

तया सहितः

GAṄGEŚA'S

# TATTVACINTĀMAṆI

[Beginning with Upādhi and ending with Bādha]

WITH A COMMENTARY

## SUKHABODHIKĀ ṬIPPANIKĀ

BY VĀCAKA GUṆARATNA

B.L. Series No. 17

GAṄGEŚA'S

# TATTVACINTĀMAṆI

[Beginning with Upādhi and ending with Bādha]

WITH A COMMENTARY

## SUKHABODHIKĀ ṬIPPANIKĀ

BY VĀCAKA GUṆARATNA

Edited by
NAGIN J. SHAH

BHOGILAL LEHERCHAND INSTITUTE OF INDOLOGY • DELHI
&
MOTILAL BANARSIDASS PUBLISHERS PRIVATE LIMITED • DELHI

बी०एल० सीरीज क्र० 17

गङ्गेशनिबद्धः

# तत्त्वचिन्तामणिः

(उपाध्यादिबाधान्तः)

वाचकगुणरत्नविनिर्मिता

# सुखबोधिका टिप्पनिका

तया सहितः

*सम्पादकः*

नगीन जी. शाह

भोगीलाल लहेरचन्द भारतीय संस्कृति संस्थान • दिल्ली

एवं

मोतीलाल बनारसीदास पब्लिशर्स प्राईवेट लिमिटेड • दिल्ली

*First Edition: Delhi, 2005*

©BHOGILAL LEHERCHAND INSTITUTE OF INDOLOGY
All Rights Reserved

ISBN: 81-208-2030-4

*Distributed by*

MOTILAL BANARSIDASS
41 U.A. Bungalow Road, Jawahar Nagar, Delhi 110 007
8 Mahalaxmi Chamber, 22 Bhulabhai Desai Road, Mumbai 400 026
236, 9th Main III Block, Jayanagar, Bangalore 560 011
120 Royapettah High Road, Mylapore, Chennai 600 004
Sanas Plaza, 1302 Baji Rao Road, Pune 411 002
8 Camac Street, Kolkata 700 017
Ashok Rajpath, Patna 800 004
Chowk, Varanasi 221 001

*Printed in India*
BY JAINENDRA PRAKASH JAIN AT SHRI JAINENDRA PRESS,
A-45 NARAINA, PHASE-I, NEW DELHI-110 028

COMPUTER TYPE SETTING BY K. BHIKHALAL BHAVSAR, MANIBHADRA PRINTERS
3, VIJAY HOUSE, NAVA VADAJ, AHMEDABAD-380013 (GUJARAT)

AND PUBLISHED BY BHOGILAL LEHERCHAND INSTITUTE OF INDOLOGY,
20KM, G.T. KARNAL ROAD, DELHI-110 036

# विषयानुक्रमः


| विषयः | पृष्ठम् |
|---|---|
| १. उपाधिवादः | १-९७ |
| २. पक्षतानिरूपणम् | ९८-१०३ |
| ३. परामर्शनिरूपणम् | १०४-१४९ |
| ४. केवलान्वय्यनुमाननिरूपणम् | १५०-१६२ |
| ५. केवलव्यतिरेक्यनुमाननिरूपणम् | १६३-२७५ |
| ६. अर्थापत्तिनिरूपणम् | २७६-३१३ |
| ७. अवयवनिरूपणम् | ३१४-४०० |
| (१) न्यायलक्षणनिरूपणम् | ३१४-३२३ |
| (२) अवयवप्रकरणे प्रतिज्ञानिरूपणम् | ३२३-३४१ |
| (३) अवयवप्रकरणे हेतुनिरूपणम् | ३४२-३६४ |
| (४) अवयवप्रकरणे उदाहरणनिरूपणम् | ३६५-३८२ |
| (५) अवयवप्रकरणे उपनयनिरूपणम् | ३८३-३८६ |
| (६) अवयवप्रकरणे निगमननिरूपणम् | ३८७-४०० |
| ८. हेत्वाभासनिरूपणम् | ४०१-५९८ |
| (१) हेत्वाभाससामान्यनिरुक्तिः | ४०१-४२६ |
| (२) हेत्वाभासप्रकरणे सव्यभिचारः | ४२७-५११ |
| (३) हेत्वाभासप्रकरणे विरुद्धः | ५१२-५३५ |
| (४) हेत्वाभासप्रकरणे सत्प्रतिपक्षः | ५३६-५६६ |
| (५) हेत्वाभासप्रकरणे असिद्धिः | ५६७-५७९ |
| (६) हेत्वाभासप्रकरणे बाधः | ५८०-५९८ |
| सुखबोधिकागतानां ग्रन्थ-ग्रन्थकारादिनाम्नां सूचिः | ५९९ |

# Foreword

The central aims of our Institute are to preserve ancient manuscripts, editing and publishing unpublished works, and disseminating knowledge on ancient and medieval India. Pursuant to these aims, we are happy to publish the *Sukhbodhikā Ṭippaṇikā* written by a late medieval Jaina scholar, Vācaka Guṇaratna. This work deals with the subjects like *upādhi* and *bādha*. Guṇaratna's work embodies the criticism on those subjects that were discussed in the famous work, the *Tattvacintāmaṇi* of Gaṅgeśa Upādhyāya, a versatile exponent of *'Navya-nyāya.'* As a result, he was also known as 'Tārkika Śiromaṇi.' The 'Navya-nyāya' reached the scholars in this sphere in the whole of India within a short span of time because of its extremely subtle and direct style and content. The *'Navya-nyāya'* dates from *c.* the 12 cent. A. D. The prevalence of logic in those centuries was so wide that this new approach and *nyāya* methodology influenced the field of *darśana*. The study of this important school of logic, in that period, became an essential part of learning. And massive critical literature grew around the *Tattvacintāmaṇi*. The Jaina mendicant-scholars, too, got interested in the study of this new school of Indian logic. They also composed some works after studying the *Navya-nyāya*. Vācaka Guṇaratna, was one of them. The work in question, until this date, had remained unpublished. The erudite scholar of Jaina Vidyā, Pt. Dalsukhbhai Malvaniya, had recommended to edit the aforenoted work while discussing the future study and publication programme of our Institute. The only single available manuscript of this work is in the holdings of the L. D. Institute of Indology. We next planned to publish this work in book form, approached Prof. Nagin J. Shah, and requested him to edit this work. To our delight, he agreed this rare work. We are grateful to Dr. Shah for diligently editing this work. We are likewise thankful to the Institute's Management and its members for making the manuscript available. We express our thanks to Kanubhai Bhavsar for the elegant printing of this work.

We hope that, this book will be useful to those who are interested in Indian philosophy and Navya-nyāya system of logic.

**Jitendra B. Shah**

# INTRODUCTION

## Manuscript Description

The manuscript, which we utilised, of Guṇaratna's *Sukhabodhikā Ṭippanikā* on *Tattvacintāmaṇi* belongs to the L.D. Institute of Indology, Ahmedabad, well-known for its collection of manuscripts and antiquities. It is a paper manuscript which is in good condition. It bears No ख५१२७. Its size is : 27.5 x 12 cms. It has 304 folios. Folios Nos 1, 45-47 are missing. And No. 104 is given to two folios. Similarly, No. 227 is also given to two folios. Each side of a folio has 17 or 18 lines, and each line has 50 to 52 letters.

No other manuscript of the work is available.

## Title and Structure

It is unfortunate that the first folio of the manuscript is missing. But the last folio, at the end, contains :

[1]वा० गुणरत्नेनातीव प्रयासेन सुखबोधिका निर्मिता ।
अतिप्रयासेन मया विनिर्मिता सु[ख]बोधिका टिप्पनिका मुदैषा ।

Guṇaratna calls his commentary *Ṭippanikā*. This suggests that his commentary is of the nature of annotations. But this seems to be misleading. It is more than mere annotations. This will be clear from our evaluation of the commentary. It is only out of modesty that Guṇaratna calls it *Ṭippanikā*. He gives an adjective *'sukhabodhikā'* to his *Ṭippanikā*; the adjective is apt because the commentary *(Ṭippanikā)* lucidly explains the knotty points of the texts it deals with. Thus *Sukhabodhikā Ṭippanikā* is the title of the work. Here we should note that at the end of the section on *parāmarśa* there occurs : इति परामर्शे प्रकाशिका । And again at the end of the section on *kevalānvayigrantha* we have : इति केवलान्वयिग्रन्थ-प्रकाशिका । Is it that *Prakāśikā* was the tentative title while *Sukhabodhikā Ṭippanikā* was the title finalised on the completion of the commentary ?

It is noteworthy that Guṇaratna explains the famous *Tattvacintāmaṇi* of Gaṅgeśa (c. 1300 - 1350 A.D.) from the beginning of *Upādhi* to the end of

1. वा० = वाचक

*Bādha*, as also a commentary thereon. Thus it is both a commentary on *Tattvacintāmaṇi* and a subcommentary on a commentary of *Tattvacintāmaṇi* (of course covering the concerned portion). We can definitely say that the commentary Guṇaratna comments on is not the one either by Mathurānātha or by Raghunātha Śiromaṇi. It is because many *pratīkas* are not from them. But we are not able to identify positively that commentary which Guṇaratna comments on.

*Pratīkas* from *Tattvacintāmaṇi* are clearly indicated by *'iti mūlam'* and those from the commentary by *'iti ṭīkā'*. Sometimes we find *pratīkas* without such indications. Moreover, in the first half of the *Sukhabodhikā* it is not clearly stated that 'now the *Sukhabodhikā* on the *mūla* (i.e. *Tattvacintāmaṇi*) starts (*atha mūlam*)', whenever the *Sukhabodhikā* on the *mūla* begins, or that 'now the *Sukhabodhikā* on the *ṭīkā* starts *(atha ṭīkā)*' whenever the *Sukhabodhikā* on the *ṭīkā* begins. But in the second half of the *Sukhabodhikā* we do find such clear statements and hence there is no possibility of confusion there in the second half of the *Sukhabodhikā*. And it is note-worthy that Guṇaratna stops commenting on the commentary from 'निबन्धे तु हेत्वाभासानां फलद्वारकं लक्षणम्' in *Tattvacintāmaṇi* (p. 561).

## Authorship

There flourished many authors having the same name Guṇaratna. But we know only two Guṇaratnas who have written works dealing with Navya-Nyāya - one the author of *Tarkataraṅgiṇī*[1], a sub-commentary on Govardhana's *Tarkaprakāśikā*, which is itself a commentary on Keśava Miśra's *Tarkabhāṣā*, and the other the author of *Nyāyasiddhāntadīpaṭippana* (=NSDT)[2].

Our author (i.e. the author of *Sukhabodhikā Ṭippanikā*) is not identical with the author of NSDT for several reasons which we shall discuss afterwards under the heading of 'Guṇaratna's (*Sukhabodhikā*-author's) other works.' But he seems to be identical with the author of *Tarkataraṅgiṇī* for the following reasons :

1. Edited by Prof. Vasanta G. Parikh in L.D. Series, No. 124, L.D. Institute of Indology, Ahmedabad, 2001.

2. Edited by Bimal Krishna Matilal in L.D. Series, No. 56, L.D. Institute of Indology, Ahmedabad, 1976.

(1) The practice of respectfully acknowledging the help the author received from his Maithila pandit teachers is common to both *Tarkataraṅgiṇī* and *Sukhabodhikā*. In *Tarkataraṅgiṇī* we have : श्रीमन्नारायणात्मजपुष्करमिश्र-मुखादधिगम्य वाचकगुणरत्नगणिना व्याख्यातं [प्रमाणम्] (p. 166). In *Sukhabodhikā* we have : अतिप्रयासेन मया विनिर्मिता सुखबोधिका टिप्पनिका मुदैषा । चिन्तामणौ ग्रन्थमणौ निशम्य श्रीरामकृष्णमुखारविन्दात् ॥

(2) Both refer to Gaṅgeśa and post-Gaṅgeśa Navya-Nyāya authors.

(3) Both bear the title *'Vācaka'*

(4) Style and explanation of the same topics, of both the works, point to the same authorship.

Thus we establish the identity of the author of *Sukhabodhikā Ṭippanikā* with the author of *Tarkataraṅgiṇī*. This being the case, whatever the author of *Tarkataraṅgiṇī* says about his lineage applies in toto to the author of *Sukhabodhikā*. He says : इति श्रीमत्खरतरगच्छाधीश्वर-युगप्रधान-श्रीजिनचन्द्रसूरिविजयिनि [राज्ये] श्रीजिनमाणिक्यसूरिशिष्यश्रीविनयसमुद्रगणीनां शिष्येण वाचकगुणरत्नगणिना... ।

श्रीमत्खरतरगच्छे श्रीजिनमाणिक्यसूरयोऽभुवन् ।
तेषां शिष्या गणयो विनयसमुद्राभिधाजयिनः ॥
तेषां शिष्यैस्तद्विद्वद्गुणरत्नवाचनाचार्यैः ।
निजवचनैकहेतौऽपरं श्रुतदेवताभक्त्यै ॥
इति प्रशस्ति ॥

The gist is as follows : In the Kharatara Gaccha when there was the spiritual reign of Yugapradhāna Śrī Jinacandrasūri there flourished Jinamāṇikyasūri who had a disciple Vinayasamudragaṇi; and this Vinayasamudragaṇi had a disciple Vācaka Guṇaratnagaṇi.

We know that this Jinacandrasūri was a contemporary of Hīravijayasūri on whom Mogul Emperor Akbar conferred the title *'Jagadgura'* in V.S. 1641 (1585 A.D.). And, as we shall see below, this Guṇaratna had completed his commentary on *Kāvyaprakāśa* in V.S. 1610 (1553 A.D.).

In his *Sukhabodhikā Ṭippanikā* at the end of the section on *avayava* Guṇaratna writes : अवयवग्रन्थः समाप्तः। सम्पूर्णा टीका। कृष्णदुर्गे लिखिता। This means that he completed the commentary on the section called *avayavagrantha* in Kṛṣṇadurga (= किशनगढ). As has been already noted, he learned Navya-Nyāya from Maithila pandits whom he respectfully remembers in his works on Navya-Nyāya.

## Guṇaratna's (Sukhabodhikā-author's) Other Works

(1) *Tarkataraṅgiṇī* : We have already established the identity of Guṇaratna, the author of *Sukhabodhikā* with Guṇaratna, the author of *Tarkataraṅgiṇī*. As stated earlier, *Tarkataraṅgiṇī* is a sub-commentary on Govardhana's *Tarkaprakāśikā,* which is itself a commentary on Keśava Miśra's *Tarkabhāṣā*. *Tarkataraṅgiṇī* employs the technique and terminology of Navya-Nyāya while discussing important problems of Nyāya-Vaiśeṣika logic and metaphysics. Yet its language is simple and explanation lucid as it is mainly written for the use of students, especially for Guṇaratna's favourite monk-student Ratnaviśāla. In *Tarkataraṅgiṇī* Guṇaratna quotes from or refers to Vātsyāyana, Udayana, Bhavānanda, Pakṣadhara Miśra, Sanātanī Paṇḍita, Ratnakoṣakāra, Haridāsa and Kṛṣṇadāsa. This evinces his mastery over Navya-Nyāya. At the end of the exposition of *Asamavāyikāraṇa* he calls himself "वादे(दि)चक्रचूडामणिः". (p. 64)

(2) *Sāradīpikā (Kāvyaprakāśaṭīkā)* : Guṇaratna, a pupil of Jinamāṇikyasūri of Kharatara Gaccha, completed a voluminous commentary called *Sāradīpikā*, of 10,500 *śloka* measure, on *Kāvyaprakāśa* on the seventh day of the black half of the month of Jyeṣṭha in V.S. 1610 (= 1553 A.D.). Like *Tarkataraṅgiṇī*, this commentary too was composed by Guṇaratna for his monk-pupil Ratnaviśāla. This information is available in the manuscript of the work, preserved in the Bhandarkar Oriental Research Institute, Pune[1]. Therein the following verse occurs :

विलोक्य विविधाः टीका अधीत्य च गुरोर्मुखात् ।
काव्यप्रकाशटीकेयं रच्यते सारदीपिका ॥

(3) *Śiromaṇi-Ṭippaṇa* : In *Tarkataraṅgiṇī* at two different places[2] readers are asked by its author Guṇaratna to consult *Śiromaṇi-ṭippaṇa*. This led Prof.

1. लाक्षणिक साहित्य, जैन साहित्य का बृहद् इतिहास, भाग ५, वाराणसी, पृ. १२५
2. Tarkataraṅgiṇī, Ed. V. G. Parikh, p. 81 and p. 90.

Parikh, the editor of *Tarkataraṅgiṇī*, to write as follows : "From *Tarkataraṅgiṇī* it can be assumed that perhaps he (i.e. the author of *Tarkataraṅgiṇī*) might have written one more *Ṭippaṇa* (i.e. in addition to *Nyāyasiddhāntadīpa-Ṭippana*) on the work of Raghunātha Śiromaṇi." This is the reason why, when we found the manuscript of Guṇaratna's *Sukhabodhikā Ṭippanikā*, we thought it must be *Śiromaṇi-Ṭippaṇa*. But our examination of the manuscript failed to justify our hope. So, the question as to whether or not Guṇaratna wrote *Śiromaṇi-Ṭippaṇa* remains open.

(4) *Padārthakhaṇḍana* : While discussing the question as to whether *abhāva* is identical with or different from its *adhikaraṇa* and *pratiyogī*, Guṇaratna says : *śeṣayuktiḥ Padārthakhaṇḍane* (p. 514). Does this mean that Guṇaratna has written a work having the title *'Padārthakhaṇḍana'* ? Or does he refer to Śiromaṇi's work having this title ?

(5) *Nyāyasiddhāntadīpa-Ṭippana* : *The Nyāyasiddhāntadīpa* is a Navya-Nyāya text written by Śaśadharācārya. And Guṇaratnagaṇi has written a commentary, called *Ṭippana*, on *Nyāyasiddhāntadīpa*. Prof. Parikh considers this Guṇaratnagaṇi to be identical with Guṇaratnagaṇi, the author of *Tarkataraṅgiṇī*. But Prof. B. K. Matilal considers them to be two different persons. In support of his view he gives the following reasons :

(a) "The *Tarkataraṅgiṇī* of Guṇaratna abounds in references to almost all the important late (i.e. post-Gaṅgeśa) Navya-Naiyāyikas such as Jayadeva Pakṣadhara, Raghunātha, Bhavānanda, Haridāsa, Kṛṣṇadāsa and Yajñapati. Almost in every page some important post-Gaṅgeśa author was quoted. But I have been unable to locate a single reference to Śaśadhara or his *Nyāyasiddhāntadīpa*. It is, on the face of it, improbable that if the same author had written another important commentary on a Navya-Nyāya text like the *Nyāyasiddhāntadīpa*, he should be silent about it altogether in his apparently larger work."[1]

(b) "Our Guṇaratna's commentary (*Ṭippana*) on the *Nyāyasiddhāntadīpa*, on the other hand, does not contain any reference to any post-Gaṅgeśa Navya-Nyāya author. In fact, it does not contain a single reference to even Gaṅgeśa. The only other Navya-Nyāya author, besides Udayana, mentioned in Guṇaratna's *Nyāyasiddhāntadīpa-ṭippana*, was Sundala

1. Nyāyasiddhāntadīpa with Guṇaratna's Ṭippana, Ed. B. K. Matilal, Introduction, p. 23

(Sondaḍa) Upādhyāya. Sundala or Sondaḍa, as we all know, was an important pre-Gaṅgeśa author whose view was contested by Gaṅgeśa in his *Tattvacintāmaṇi*. It would thus be odd again to assume that a Navya-Nyāya author of the 17th century would be silent about Gaṅgeśa while he wrote a Navya-Nyāya commentary."[1]

(c) "Besides, I have examined myself the *Anyathākhyātivāda* section of *Tarkataraṅgiṇī* along with Guṇaratna's NSDT on the *Anyathākhyātivāda* chapter, and from this comparative study I am forced to conclude that these two sections on the same topic could not have been written by the same author."[2]

And, in addition, we draw the attention of the readers to the fact that Guṇaratna, the author of *Tarkataraṅgiṇī*, respectfully remembers his Maithila pandit from whom he learned Navya-Nyāya but Guṇaratna, the author of *Nyāyasiddhāntadīpa-Ṭippana*, does not follow this practice.

As the author of *Tarkataraṅgiṇī* and that of *Sukhabodhikā Ṭippanikā* are identical according to us, we conclude that *Nyāyasiddhāntadīpa-Ṭippana* is not the work of Guṇaratna, the author of *Sukhabodikā Ṭippanikā*.

So, we have to find out an answer to the question as to who this Guṇaratna, the author of *Nyāyasiddhāntadīpa-Ṭippana*, is. He should be a learned Jaina monk belonging to 14th century A.D. Therefore, Matilal identifies him with Guṇaratna (c. 1343-1418 A.D.), the author of *Tarka-rahasya-dīpikā*, a commentary on *Ṣaḍdarśanasamuccaya* of Āc. Haribhadra. But we reject Matilal's view because Guṇaratna, the author of NSDT calls himself '*vācanācārya*' and '*gaṇi*', while Guṇaratna, the author of *Ṣaḍdarśanasamuccayaṭīkā* calls himself '*sūri*'. To escape from this difficulty one may say that Guṇaratna, the author of *Ṣaḍdarśanasamuccayaṭīkā* composed NSDT prior to his earning the title '*sūri*'. But in that case Matilal's view that Guṇaratna, the author of *Ṣaḍdarśanasamuccayaṭīkā*, studied Śaśadhara and commented upon only four chapters of NSD after he had finished his *Ṣaḍdarśanasamuccayaṭīkā* gets shattered to pieces. In support of our view we point out that Guṇaratna in neither of the two lists of Nyāya-Vaiśesikā authors, supplied by him in his *Ṣaḍdarśanasamuccayaṭīkā*, men-

---

1. Ibid, p. 23. 2. Ibid, p. 23.

tioned Śaśadhara and Gaṅgeśa; moreover, it is controversial that he possessed good knowledge of Navya-Nyāya; again, nowhere in the Jaina literature it is said that Guṇaratna, the author of *Ṣaḍdarśanasamuccayaṭīkā*, has written *Ṭippana* on NSD. So, we are inclined to keep the question of the identity of Guṇaratnagaṇi, the author of *Nyāya-siddhāntadīpa-Ṭippana*, open.

## Evaluation of Sukhabodhikā Ṭippanikā

*Sukhabodhikā Ṭippanikā* is not merely an annotation-type commentary, as its title suggests. It is a good expository commentary. It explains the texts it comments on with lucidity and authenticity. It evinces deep study and understanding of Navya-Nyāya. It expounds subtle points of Navya-Nyāya. At times, it draws fine line of distinction between cognate or closely related concepts or terms. At several places it discusses readings too. As an instance in point we quote : *atra mūlapāṭhe niragnitvād iti pāṭho 'śuddha iva lakṣyate* (p. 531). Sometimes it clearly points out as to who are intended by such terms as *ācāryāḥ*, *prācām*, etc. It clarifies that there *prācām* stands for Vācaspatimiśrāṇām. It refers to and quotes from authoritative texts and authors like Vātsyāyana, Vācaspati Miśra, Udayana, *Kusumāñjaliprakāśa*, *Līlāvatī*, Gaṅgeśa, Yajñapati Upādhyāya, Pakṣadhara Miśra, Bhāskara, etc. It ably discusses some grammatical points and there in support of his exposition quotes Pāṇini, Mahābhāṣyakāra Patañjali and Nyāsakāra. This very well testifies to Guṇaratna's erudition and scholarship. The commentary raises doubts and then answers them lucidly and convincingly. This is its main feature. It recapitulates or summarises elaborate discussions or expositions. These recapitulations and summaries are marked by the phrases like *ayam āśayaḥ, ayam arthaḥ, niṣkarṣas tu, iti bhāvaḥ, iti praghaṭṭakārthaḥ.*

## Jaina Navya-Nyāya Scholars

Jaina tradition has very few Navya-Nyāya scholars to its credit. First we have Guṇaratnagaṇi of 14th century A.D., who wrote *Ṭippana* on Śaśadhara's *Nyāya-siddhāntadīpa*. Then comes Bhuvanasundarasūri (c. 1390-1450 A.D.) who was a learned Jaina scholar of Navya-Nyāya. His very good commentary on Vādīndra's *Mahāvidyā-viḍambana* called *Mahāvidyā-viḍambana-ṭīkā*[1] bespeaks of his excel-

1. Edited by M. R. Telang, Gaekwad Oriental Series, No. 12, 1920, Baroda.

lent knowledge and understanding of the Navya-Nyāya techniques and methodology. He was a pupil of Guṇaratnasūri, the author of *Ṣaḍdarśanasamuccayaṭīkā*. Then we have Gūṇaratnagaṇi, the author of *Tarkataraṅgiṇī* and *Sukhabodhikā Ṭippanikā* on *Tattvacintāmaṇi*, who belongs to the sixteenth century A.D. And at last in the chronological order comes the famous Upādhyāya Yaśovijaya. He, an eighteenth century philosopher-monk of the Jaina tradition, was a great scholar of Navya-Nyāya. His works like *Nyāyakhaṇḍakhādya* and *Nyāyāloka* which are written in Navya-Nyāya style display very high level of scholarship.

We conclude that by writing *Tarkataraṅgiṇī* and *Sukhabodhikā Ṭippanikā* our author Guṇaratnagaṇi has secured an important place among the learned Navya-Nyāya authors in general and the Jaina Navya-Nyāya authors in particular.

It is my pleasant duty to express my sincere gratefulness to the management of the B.L. Institute of Indology for providing me an opportunity to edit Guṇaratnagaṇi's *Sukhabodhikā Ṭippanikā* on Gaṅgeśa's *Tattvacintāmaṇi*.

23, Valkeshvar Society,
Ambawadi,
Ahmedabad-380015.

**Nagin J. Shah**

तत्त्वचिन्तामणिटिप्पनिका

# सुखबोधिका

# तत्त्वचिन्तामणिः
# 'सुखबोधिका' टिप्पनिकासहितः

## । तत्त्वचिन्तामणिः ।

## । उपाधिवादः ।

**उपाधिज्ञानाद् व्यभिचारज्ञाने सति न व्याप्तिनिश्चय इत्युपाधिर्निरूप्यते। तत्रोपाधिः साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः। अनौपाधिकत्वज्ञानं च न व्याप्तिज्ञाने हेतुः। अतो व्यापकत्वादिज्ञाने नान्योन्याश्रयः। यद्वा व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम्, तत्प्रतियोगित्वं चाव्यापकत्वम्, प्रतियोगित्वं च तदधिकरणानधिकरणत्वमिति वदन्ति। तन्न। साधन-पक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः। न च तयोरनुपाधित्वम्, दूषकताबीजसाम्यात्।**

## । सुखबोधिका ।

## । उपाधिवादः ।

[1][2A]न्योन्याभावस्य घटः प्रतियोगी न स्यात्, यतो घटान्योन्याभावस्याधिकरणं कपालं तत्र घटो वर्तत एवेत्यव्याप्तिः। पुनरपि दूषणान्तरमाह-**एवं चेति**। यदि प्रतियोगित्वं तदधिकरणानधिकरणत्वमुच्यते तदा आर्द्रेन्धनमप्युपाधिर्न स्यात्, साधनाव्यापकत्वाभावात्। तदेव दर्शयति - **वह्न्यादीति**। साधनवन्निष्ठात्यन्ताभावाधिकरणानधिकरणत्वं नास्ति। साधनवन्महानसः, तन्निष्ठो योऽत्यन्ताभावः आकाशस्य, तस्याधिकरणं महानसः, स असाधनम्, वह्निः तत्समानाधिकरणोऽत्यन्ताभाव आकाशस्य, तस्याधिकरणं महानसः, स अधिकरणमेव भवति आर्द्रेन्धनस्य, तदनधिकरणत्वरूपं प्रतियोगित्वं नास्तीत्यार्द्रेन्धनेऽव्याप्तिरित्यर्थः।

**साधनेति** मूलम्। एकः साधनावच्छिन्नसाध्यव्यापक उपाधिः, अपरः पक्षधर्मावच्छिन्नसाध्यव्यापकश्च। तत्रोभयत्राव्याप्तिः। आद्यो यथा - मित्रातनयः श्यामः मित्रातनयत्वात् इत्यत्र शाकपाकजत्वमुपाधिः शुद्धसाध्यव्यापको नास्तीति साधनावच्छिन्नसाध्यव्यापकः, तथा च मित्रातनयत्वावच्छिन्नं यत्र श्यामत्वं तत्र शाकपाकजत्वम् एवं साधनावच्छिन्नसाध्यव्यापको वर्तते। द्वितीयो यथा - वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र उद्भूतरूपवत्त्व-

1. प्रथमं पत्रं नोपलभ्यते।

मुपाधिः शुद्धसाध्यव्यापको न भवति यतः प्रत्यक्षत्वमात्मनि वर्तते उद्भूतरूपे च वर्तते तत्रोद्भूतरूपवत्त्वं नास्तीति साध्यव्यापकता नास्ति। अतः पक्षधर्मो यो बहिर्द्रव्यत्वं तदवच्छिन्नं यत् साध्यं प्रत्यक्षत्वं तस्य व्यापकमुद्भूतरूपवत्त्वमस्त्येवेत्यर्थः। तथा च [साधन-पक्षधर्मावच्छिन्न]साध्यव्यापकत्वमुपाधेर्लक्षणं कैश्चित् कृतं तद् दूषितम् – **न चेति** मूलम्। पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्न[साध्यव्यापकः] एतयोरनुपाधित्वमित्याशङ्कार्थः। दूषकताबीजं व्यभिचारोन्नायकमेतयोरप्यस्ति, अतो दूषकत्वमेतयोरित्यर्थः।

**मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य प्रत्यक्षस्पर्शाश्रयत्वेन वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च शास्त्रे प्रयोजकत्वेनोपाधित्वस्वीकाराच्च पक्षेतरेऽतिव्याप्तेश्च।**

दूषणान्तरमप्याह - **शास्त्रे** इति। प्रयोजन(क)त्वेनैवैतयोरप्युपाधित्वं स्वीकृतमस्ति। तथाहि - श्यामत्वे शाकपाकजत्वं प्रयोजकं व्या(प्रा)प्तम्, प्रत्यक्षे उद्भूतरूपवत्त्वं प्रयोजकं भवति यथा यदुद्भूतरूपवत् तत् प्रत्यक्षं भवत्येव, इति द्वयोरपि शास्त्रे उपाधित्वेन व्यवहार इत्यर्थः। ननु साधनस्यापि पक्षधर्मत्वात् कथमेतयोर्भेदमुच्यते ? अत्र **मिश्राः** ज्ञानगतिमादाय द्वैविध्यम्। तथाहि - यदा साधनं पक्षधर्मत्वेन ज्ञायते तदा साधनं पक्षधर्मो भवति। यदा पक्षधर्मः साधनत्वेन ज्ञायते तदा [पक्षधर्मः] साधनं [भवति]। वस्तुगत्या भेदो नास्तीति **पक्षधरमिश्रा** ऊचुः। अन्ये तु साधनावच्छिन्नपक्षधर्मावच्छिन्नयोर्भेद एव। तथाहि - घटः प्रत्यक्षः विभुत्वात् इत्यत्र विभुत्वं यत् साधनं तदवच्छिन्नप्रत्यक्षत्वव्यापकमात्मत्वमुपाधिः। अयं साधनावच्छिन्नसाध्यव्यापकः। वायुः प्रत्यक्षः वायुत्वात् इत्यत्र बहिर्द्रव्यत्वावच्छिन्नं यत् प्रत्यक्षत्वं तस्य व्यापकम् उद्भूतरूपवत्त्वमुपाधिः। अत्र द्वयोर्भेदः, यतः प्रथमे साधनं विभुत्वं पक्षस्य घटस्य धर्मो न भवति, द्वितीये पक्षधर्मो बहिर्द्रव्यत्वं तत् साधनं न भवति यतस्तत्र वायुत्वमेव साधनं कृतमिति भेदः। **उद्भूतपदमि**ति टीका - उद्भूतपदं प्रत्यक्षपरं कर्तव्यम्। तथा च प्रत्यक्षरूपवत्त्वमित्यर्थो यथाश्रुते यत्र बहिर्द्रव्यत्वावच्छिन्नं प्रत्यक्षं तत्र रूपवत्त्वमस्त्येवोद्भूतपदं व्यर्थं स्यात् इत्यर्थः। तत्रोच्यते - उद्भूतपदं समव्याप्त एवोपाधिर्भवति, विषमव्याप्तस्तु उपाधिर्न भवतीत्यभिप्रायेण। तथा च रूपवत्त्वस्य [2B] समा व्याप्तिर्नास्ति। कथम् ? यत्र रूपवत्त्वं तत्र बहिर्द्रव्यत्वावच्छिन्नं प्रत्यक्षत्वमिति नास्ति। कथम् ? रूपवत्त्वं वर्तते परमाणौ, तत्र बहिर्द्रव्यत्वावच्छिन्नं प्रत्यक्षत्वं नास्ति, इति कृत्वा समव्याप्तिः रूपवत्त्वस्य नास्ति, तत उद्भूतरूपपदम्। ननु तथाप्युद्भूतरूपस्यापि समव्याप्तिर्नास्ति, उद्भूतरूपं वर्तते परमाणौ, तत्र बहिर्द्रव्यत्वावच्छिन्नं प्रत्यक्षत्वं नास्तीति कृत्वा समव्याप्तिर्नास्तीति उद्भूतपदं प्रत्यक्षपरम्। तथा यत्र प्रत्यक्षरूपवत्त्वं तत्र बहिर्द्रव्यत्वावच्छिन्नं प्रत्यक्षत्वमिति व्याप्तिस्तिष्ठत्येवेत्यभिप्रायेण समव्याप्त एवोपाधिः, न तु विषमव्याप्त आर्द्रेन्धनादिः उपाधिः। **यद्वे**ति उद्भूतपदं साधनव्यापकत्वशङ्कापरिहारवारकम्। तथाहि - यदि केवलं

रूपवत्त्वमुपाधिरुच्यते तदा रूपवत्त्वोपाधेः साधनव्यापकत्वशङ्का स्यात् । कथम् ? प्रत्यक्षस्पर्शाश्रयत्वं वायौ वर्तते तत्रोद्भूतरूपं भविष्यतीति शङ्का न भवति यतस्तत्र वायौ उद्भूतरूपसत्त्वे समानाधिकरणोद्भूतरूपस्य प्रत्यक्षतापत्तेरित्युद्भूतपदे दत्ते साधनव्यापकत्वशङ्का न भवतीत्यर्थः । उद्भूतत्वं जातिविशेषो रूपादिनिष्ठो ज्ञेयः ।

**न च व्यतिरेके पर्वतेतरान्यत्वादित्यत्र इतरान्यत्वस्यासिद्धिवारणार्थं पर्वतपदं विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वान्न स उपाधिः, बाधोन्नीतस्याप्यनुपाधितापत्तेः । न चेष्टापत्तिः, इतरान्यत्वस्याप्रसिद्ध्या विशेषणं विना व्याप्त्यग्रहेण तत्सार्थकत्वात् । वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत्, अस्तु तथा, तथापि पक्षातिरिक्ते साध्यव्यापकताग्रहादुपाधेर्दूषकत्वम्, तच्च तत्राप्यस्ति, अन्यथा पक्षे साध्यसन्देहादनुपाधित्वे उपाधिमात्रमुच्छिद्येत ।**

**बाधानुन्नीतेति** । यथाश्रुते **नैयायिकमते** बाधोन्नीतपक्षेतर उपाधिर्भवत्येवेतीष्टापत्तिः स्यादित्यर्थः । बाधोन्नीतपक्षेतरो यथा वह्निरुष्णः कृतकत्वात् इत्यत्र वह्नीतरत्वमुपाधिरेव भवति, तत्रोपाधौ इष्टापत्तिर्**नैयायिकेन** कर्तव्येत्यन्यथा व्याख्यातं बाधानुन्नीतेति। ननु पक्षेतर इति प्रयोगो न सङ्गच्छते यतः सर्वनामत्वात् स्मिन्नादेशोऽयुक्तः इत्यत आह - पक्षमितरयतीति इति व्युत्पत्त्या पर्वतेतरत्वं यो धर्मस्तत्रातिव्याप्तिः तत्र स्मिन्नादेशो न भवतीत्यर्थः । **पक्षातिरिक्ते**ति टीका । ननु पर्वतेतरत्वस्य साध्यव्यापकत्वाभावात् कथमुपाधिलक्षणातिव्याप्तिः ?, यत्र साध्यं वर्तते तत्र पर्वतेतरत्वं नास्ति इत्यतिव्याप्तिर्न भवतीत्यत आह - **पक्षातिरिक्त** इति । उपाधेः साध्यव्यापकता पक्षातिरिक्तस्थले ग्राह्या, तेन एतस्यापि पर्वतेतरत्वस्यापि पक्षातिरिक्ते महानसादौ साध्यव्यापकत्वं ग्राह्यम्, तत्तु पक्षेतरत्वे प्रसिद्धमस्तीत्यर्थः । **त्वन्मत** इति **नैयायिक**मते इत्यर्थः । मम मते पक्षेतर उपाधिरेवेत्यर्थः ।

**न च व्यतिरेक** इति मूलम्। यत्र पर्वतेतरत्वव्यतिरेकेण साध्याभावः साधनीयस्तत्र पर्वतेतरत्वाभावादित्यनेन हेतुना तत्रैवेतरान्यत्वादित्युक्ते असिद्धिर्भवति । कथम् ? इतरत्वं केवलान्वयिधर्मः, तस्याभावः कुत्रापि नास्तीत्यसिद्धिः स्यादिति। तद्वारणार्थं पर्वतपदं देयम्, तथा चासिद्धिवारकं विशेषणं व्यर्थम् । अयं **नैयायिकानां** सिद्धान्तः, यतो व्यभिचारव्यतिरेकमेव विशेषणं सार्थकमिति कृत्वा व्यतिरेके व्यर्थविशेषणराहित्यं नास्तीत्ययं नोपाधिर्यतो व्यतिरेकसाधने व्यर्थविशेषणते(तै)वेत्यर्थः । **बाधोन्नीते**ति मूलम् । वह्निरनुष्णः कृतकत्वात् इत्यत्र वह्नीतरत्वमुपाधिर्भवति, स न स्यात्, तस्यापि व्यतिरेके व्यर्थविशेषणत्वसत्त्वादित्यर्थः । **न चे**ति मूलम् । बाधोन्नीतोऽप्युपाधिर्मा भवतु इति इष्टापत्तिरित्यर्थः । **इतरे**ति मूलम् । इतरान्यत्वमप्रसिद्धमिति कृत्वा वह्निपदं व्याप्तिग्राहकत्वेन सार्थकं भवति । ततो बाधोन्नीतपक्षेतर उपाधिः, तद्वत् पर्वतेतरत्वमप्युपाधिः स्यात् । [3A]

पर्वतपदं व्याप्तिग्राहकं भवति। इतरान्यत्वस्याप्रसिद्धत्वात् व्याप्तिर्ग्रहीतुं न शक्यते इति। पर्वतपदेन व्याप्तिर्ग्रहीतुं शक्यते। तथा च बाधानुन्नीतपक्षेतरेऽपि व्यर्थविशेषणराहित्यासत्त्वात् उक्तोपाधिलक्षणातिव्याप्तिस्तदवस्थेति मूलार्थः।

**वस्तुगत्येतीति**। वस्तुगत्या यः साध्यव्यापकः पक्षेतरः स उपाधिः। बाधानुन्नीतस्तु वस्तुगत्या साध्यव्यापक एव न भवति यतः साध्यं पर्वते वर्तते तत्र पक्षेतरत्वं नास्तीति न स उपाधिरित्याशङ्कार्थः।

**तथापीति** मूलम्। येन रूपेण ज्ञातस्योपाधेर्दूषकता, प्रकृते पक्षातिरिक्ते साध्यव्यापकत्वेन ज्ञातस्योपाधेर्दूषकता इति कृत्वा पक्षातिरिक्तसाध्यव्यापकत्वे सति साधनाव्यापकतेति लक्षणमुपाधेः। **तच्चेति** मूलम्। पक्षातिरिक्तेत्यादि तल्लक्षणं बाधानुन्नीतपक्षेतरेऽप्यस्तीत्यर्थः। **अन्यथेति** मूलम्। यदि पक्षातिरिक्ते साध्यव्यापकता नोच्यते किन्तु केवलसाध्यव्यापकतोच्यते तदोपाधिमात्रमुच्छिद्येत। तत्र हेतुमाह - **पक्षे** इति मूलम्। पक्षे साध्यं वर्तते न वेति सन्देहेन उपाधिर्नास्तीति कृत्वा नोपाधित्वं तदोपाधिमात्रमुच्छिद्येत, सर्वस्योपाधेः पक्षे साध्यसन्देहेन साध्यव्यापकत्वसंशयादित्यर्थः।

**विपक्षाव्यावर्तकविशेषणशून्यत्वं विशेषणं तेन बाधोन्नीतपक्षेतरस्य परिग्रहः, तत्र पक्षस्यैव विपक्षत्वात्, न तु पर्वतेतरत्वादेरिति चेत्। न। न हि वस्तु विपक्षाव्यावर्तक-विशेषणशून्यम्, सर्वत्र प्रमेयत्वादेः सत्त्वात्। तत्रोपात्तेति विशेषणे सिद्ध्यसिद्धि-व्याघातः। तथापि च साध्यव्यापकत्व-साधनाव्यापकत्वे तत्र स्त इति तद्व्यावृत्त्या पक्षे साध्यव्यावृत्तिरतो हेतोर्व्यभिचार एव व्यभिचारे चावश्यमुपाधिरिति पक्षेतर एव तत्रोपाधिः स्यात् तावन्मात्रस्यैव दूषकत्वाच्च व्यर्थं विशेषणम्।**

शङ्कते - **विपक्ष** इति मूलम्। विपक्षाव्यावर्तकविशेषणशून्यत्वे सति साध्यव्यापकत्वे सति साधन(ना)व्यापकत्वम्, तथा च बाधोन्नीतपक्षेतरस्य सङ्ग्रहो भवति। तथाहि - वह्निरनुष्णः कृतकत्वात् इत्यत्रा-नुष्णत्वस्य विपक्षो भवति वह्निः, तस्माद् व्यावर्तकं विशेषणं तच्चास्ति वह्निपदम्, यत इतरत्वस्य केवलान्वयित्वात्। इतरत्वं वह्नावप्यस्ति वह्नीतरत्वं नास्तीत्यतो वह्निपदं विपक्षव्यावर्तकविशे[षणं] भवति। विपक्षो वह्निरनुष्णत्वस्य, तस्माद् व्यावर्तकं विशेषणं वह्निरूपं वर्तते इति कृत्वा विपक्षव्यावर्तकविशेषणयुक्तत्वं वर्तत एवेति मूलार्थः।

**निर्विशेषणेति** टीका। ननु विपक्षाव्यावर्तकविशेषणशून्यत्वमित्यत्र नञ्द्वयान्तर्भावः किमर्थं क्रियते ? विपक्षव्यावर्तकविशेषणवत्त्वमित्येवोचितमित्यत आह - **निर्विशेषणेति**। निर्विशेषणं यद् गोत्वरूपमुपाधिस्तत्रा-व्याप्तिवारणाय। यथाऽयं सास्नावान् अश्वत्वात् इत्यत्र गोत्वमुपाधिर्वर्तते, स न स्यात्। कथम् ? विपक्षो घटादिः,

तदव्यावर्तकं विशेषणं गोत्वोपाधौ किमपि नास्ति [इति] कृत्वा नञ्द्वयान्तर्भावस्तत्रापि विपक्षाव्यावर्तक-विशेषणशून्यत्वमितिरूपो वर्तते । कथम् ? निर्विशेषणत्वादेव विशेष्याभावादेव विशिष्टाभावः । अत्र विशेष्यं विशेषणपदं तदभावादेव विशिष्टाभावोऽस्त्येवेत्यर्थः ।

**न त्विति** मूलम् । पर्वतेतरत्वरूपोपाधौ विपक्षो भवति हृदः । तस्मादव्यावर्तकमेव विशेषणं पर्वतरूपं वर्तते । तथा च हृदे इतरत्वमपि वर्तते पर्वतेतरत्वमप्यस्ति इति नातो व्यावृत्तं पर्वतपदम् । ततः पर्वतेतरत्वं नोपाधिरिति मूलार्थः । **न हीति** मूलम् । वस्तुगत्या विपक्षाव्यावर्तकविशेषणशून्यत्वमुच्यते उत तत्रोपात्तविपक्षाव्यावर्तक-[विशेषण]शून्यत्वं वा इति विकल्पद्वये प्रथमे आह - विपक्षाव्यावर्तक[विशेषण]शून्यं किमपि वस्तु नास्ति । कथम् ? विपक्षस्याव्यावर्तकं विशेषणं प्रमेयत्वम्, तत् सर्वत्र इति तच्छून्यत्वाप्रसिद्धेः । द्वितीये प्राह - **तत्रोपात्तेति** । तत्र तस्मिन्नुपाधौ उपात्तं यद् विपक्षाव्यावर्तकं विशेषणं तच्छून्यत्वम् । तदाह - **सिद्ध्यसिद्धि-व्याघातः** । तत्रोपात्तं विशेषणं प्रसिद्धं वा अप्रसिद्धं वा ? यदि प्रसिद्धम्, तदा तच्छून्यत्वं न सम्भवति । यदि अप्रसिद्धम्, तथापि तच्छून्यत्वं न सम्भवति, प्रतियोग्यप्रसिद्धेरभावाप्रसिद्धेरिति मूलार्थः ।

(3B) **परेति** टीका । **नैयायिक**सिद्धान्तानुसारेण **नैयायिको**क्तमुपाधिलक्षणम् । साध्यव्यापकत्वे सति साधनाव्यापकत्वरूपं यदुपाधिलक्षणं तस्य पक्षेतरेऽतिव्याप्तिर्दत्ता **चार्वाकेण** । स एव **चार्वाक**स्तस्य पक्षेतरस्योपाधित्वं स्थापयतीत्याह - **तथापि चेति** मूलम् । यद्यपि पक्षेतरे विपक्षाव्यावर्तकविशेषणशून्यत्वं नास्ति तथापि केवलं साध्यव्यापकत्वसाधनाव्यापकत्वं पक्षेतरेऽस्ति । ततः तद्व्यावृत्त्या पक्षेतरव्यावृत्त्या पक्षेतरत्वं पर्वते नास्ति इति कृत्वा साध्यो यो वह्निस्तस्यापि निवृत्तिः, यतो व्यापकनिवृत्तिर्व्याप्यनिवृत्तिर्भवत्येव । साध्याभावे धूमरूपहेतुसत्त्वे व्यभिचार एवेत्यर्थः । **पक्षेतरत्वादेरिति** टीका । पक्षेतरत्वस्योपाधेः पक्षनिष्ठं यत् साध्यं पर्वतीयवह्निरूपं तद्व्यापकता नास्त्येव, किन्तु महानसीयवह्निव्यापकता पक्षेतरत्वस्य वर्तते इति कृत्वा महानसीय[व]ह्न्यभावसाधनं कृतम्, तावता कथं व्यभिचारः ?, यतः साध्यतावच्छेदकं वह्नित्वं तदवच्छिन्न-प्रतियोगि[ता]को योऽत्यन्ताभावस्तेन समं सामानाधिकरण्यमेव व्यभिचारः । प्रकृते च साध्यतासामानाधिकरण्यं धूमस्य नास्ति, यतः पक्षातिरिक्ते साध्यव्यापकतोपाधेर्वर्तते । अतः पक्षातिरिक्तसाध्यस्याभावः साधितः । तेन न व्यभिचार इत्यर्थः ।

**तावदिति** मूलम् । साध्यव्यापकत्वसाधनाव्यापकत्वमात्रस्य दूषकत्वा[त्] व्यर्थः(र्थं) [विशेषणम्], विपक्षाव्यावर्तकविशेषणशून्यत्वं व्यर्थमित्यर्थः ।

**अत एवानुमानमात्रोच्छेदकतया जातित्वान्न पक्षेतर उपाधिरित्यपास्तं दूषण-समर्थत्वेन जातित्वाभावात् । एतेन पक्षेतरव्यावृत्त्यर्थं प्रकारान्तरमपि निरस्तम् उपाधि-**

**त्वाभावेऽपि दूषणसमर्थत्वात् । अथोपाधिः स्वव्यतिरेकेण सत्प्रतिपक्षतया दूषणं पक्षेतरत्वव्यतिरेकश्च न साध्याभावसाधकोऽसाधारणत्वात्, न तु(? च) व्यभिचारोन्नायकतया दूषणं यथाहि साध्यव्यापकोपाध्यव्याप्यतया हेतोः साध्याव्याप्यत्वं तथा साध्यव्याप्यहेत्वव्यापकतयोपाधेर्न साध्यव्यापकत्वमपि सिध्येत् व्याप्तिग्राहकस्योभयत्रापि साम्येन विनिगमकविरहात् ।**

**अत एवे**ति । यतः केवलं साध्यव्यापकत्वसाधनाव्यापकत्वे तत्र स्त इति अत एवेति निरस्तम् । केचिद् वदन्ति — पक्षेतर उपाधिर्न भवति । अनुमानमात्रोच्छेदकतया जातित्वात् असदुत्तरत्वात् । तथा च पक्षेतरो यत्र दीयते तत्रोपाध्यभावेन साध्याभावः साधनीयस्तत्रापि पक्षेतरत्वं भवतीति असदुत्तरं पक्षेतरस्येति पक्षेतरो नोपाधिरिति परास्तम् । **दूषणे**ति मूलम् । दूषणासमर्थम् उत्तरं जातिरिति लक्षणं जातेः । पक्षेतरे तु साध्यव्यापकसाधनाव्यापकरूपं यद् दूषणं तत्र समर्थं यद् रूपं तद्वत्त्वं वर्तते पक्षेतरे इति कृत्वा दूषणसमर्थमेव तत् इति मूलार्थः ।

**यद्यपी**ति टीका । येनोपाधिना यत्र व्यभिचारोन्नयनं कर्तव्यं तत्रापि पक्षेतरस्योपाधित्वं सम्भवति तथापि हि वह्निर्धूमव्यभिचारी आर्द्रेन्धनव्यभिचारित्वात् इत्यत्रापि पक्षेतरत्वं भवत्येवेति नास्य दूषणसमर्थत्वम् । **तथाप्यापातत** इति । वस्तुगत्या दूषणं नास्ति परमुद्भाव्योक्तमित्यर्थः । **तदन्यत्वे** इति । बाधानुन्नीतपक्षेतरान्यत्वे सति साध्यव्यापकत्वे [सति] साधनाव्यापकत्वम् । अत्र हेतुमाह मूले - **उपाधी**ति । लक्षणसत्त्वे उपाधित्वं वर्तते एवेति कृत्वा उपाधित्वाभाव इति न लगतीति कृत्वोक्तं टीकाकारेणोपाधित्वाभावानङ्गीकारेऽपीत्यर्थः ।

**उपाधिरिति** मूलम् । दूषकताबीजं सत्प्रतिपक्षोत्थापनम्, तत् बाधानुन्नीतपक्षेतरे नास्ति । तथाहि पर्वतो वह्न्यभाववान् पर्वतेतरत्वाभावात् । एवंप्रकारेण सत्प्रतिपक्षोन्नयने कर्तव्ये असाधारण्यं भवति हेतुः(तोः) । सकलसाध्यवान् वह्न्यभाववान् भवति ह्रदादिस्तत्र पर्वतेतरत्वाभावो नास्ति इति कृत्वा असाधारण्यं भवति । ततः पक्षेतरो नोपाधिरित्यर्थः । **न चे**ति मूले । व्यभिचारोन्नायकतयाऽपि उपाधिर्दूषणं न भवतीति दर्शयति - **त(य)थाही**ति । यदा व्यभिचारोन्नयनं क्रियते यथाऽयं हेतुः साध्यव्यभिचारी साध्यव्यापकोपाधिव्यभिचारित्वात् इति हेतोः साध्यव्यभिचारित्वं साधनीयं [4A] तथा मयोपाधेरपि साध्याव्यापकत्वं साधनीयं यथा उपाधिः साध्याव्यापकः साध्यव्याप्यहेतु(त्व)व्यापकत्वात् । यो यद्व्याप्याव्यापकः स तदव्यापकः यथा द्रव्यत्वव्याप्यपृथिवीत्वाव्यापकजलत्वं तत् द्रव्यत्वस्याव्यापकं भवति । अयमर्थः । त्वया हेतोर्यथा साध्यव्यभिचारित्वं साध्याव्याप्यत्वं वा साधनीयं तथा मयोपाधेः साध्याव्यापकत्वमपि साधनीयम् । ततो व्यभिचारोन्नयनमुपाधिना कर्तुं न शक्यत इत्यर्थः ।

**तस्माद् यथा साध्यव्याप्येन हेतुना साध्यं साधनीयं तथा साध्यव्यापकोपाधिव्यावृत्त्या साध्याभावोऽपि साधनीयो व्याप्तिग्रहतौल्यादिति दूषकताबीजम्। सोऽयं सत्प्रतिपक्ष एवेति चेत्। मैवम्। एवं हि सत्प्रतिपक्षे उपाध्युद्भावनं न स्यात् सत्प्रतिपक्षान्तरवत्।**

**तस्मादिति** मूलम्। सत्प्रतिपक्षोत्थापकत्वमेव दूषकताबीजं समर्थयति - **यथेति**। यथा त्वया साध्यव्याप्येन हेतुना साध्यं साधनीयं तथा मया साध्यव्यापको य उपाधिस्तस्य व्यावृत्त्या तदभावेन पक्षे साध्याभावोऽपि साधनीयः। हेतुमाह - **व्याप्तीति**। यथा हेतौ साध्यनिरूपिता व्याप्तिर्वर्तते यथा यत्र धूमस्तत्र वह्निरिति तथा साध्येऽप्युपाधिनिरूपिता व्याप्तिर्वर्तते यथा यत्र धूमस्तत्रार्द्रेन्धनमिति। व्याप्तिग्राहकं व्यभिचारज्ञानाभावसहकृतं सहचारदर्शनं वर्तत एवेति व्याप्तिविरहोन्नायकतया चेत्यपि द्रष्टव्यमिति। ननु व्यभिचारोन्नायकता दूषकताबीजं न भवतीति उक्तम्, व्याप्तिविरहोन्नायकत्वं दूष्यते, तत्तु व्याप्तिपूर्वं दूषयितुमुपक्रान्तमेव नास्तीति मनसि सन्धाय दूषितम्। व्यभिचारोन्नायकत्वं दूषयितुमुपक्रान्तमपि न दूषितमिति टीकाकारेण पूर्यते इत्यर्थः। साध्यव्यभिचारित्वं चेत्यपि द्रष्टव्यमित्यनेन पूरितं मूलम्। एतेन व्यभिचारोन्नायकत्वं दूषितं व्याप्तिविरहोन्नायकत्वमपि दूषितम्। तथा च सत्प्रतिपक्षोत्थापकतया एव दूषकत्वम्। तत्तु पक्षेतरे नास्ति व्यतिरेकेऽसाधारण्यादिति **नैयायिकेन** समाधानं कृतम्। तद् दूषयति - **मैवमिति** मूलम्। **एवं हीति**। यदि सत्प्रतिपक्षोत्थापकतयैव दूषकत्वं तदा सत्प्रतिपक्षे उपाध्युद्भावनं न स्यात्। कुतः ? यत उपाधिनाऽपि सत्प्रतिपक्ष एवोद्भावनीयः, सत्प्रतिपक्षेणानेन वह्निरेव साधनीयः, स च स्थापनानुमानेनैव सिद्ध इति व्यर्थः उपाधिरित्यर्थः। **सत्प्रतिपक्षान्तरवदिति**। यथा सत्प्रतिपक्षो नोद्भाव्यते। यथा वह्निसाधकानुमानेनै(ने)व, वह्न्यभावसाधकानुमानं यथाऽयं वह्न्यभाववान् पाषाणवत्त्वात् इत्यत्र यदि सत्प्रतिपक्षः क्रियते, अनेनापि वह्निसाधनं भवति। तत्तु पूर्वानुमानेनैव सिद्धमित्यर्थः।

**पक्षवृत्तिश्चेव**(ति) टीका। पक्षवृत्तिर्यथा पर्वतो धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनं पक्षवृत्तिर्भवति, स उपाधिर्न स्यात्। कुतः ? यतस्तद्व्यतिरेकेण पक्षे साध्यभावोन्नयनं कर्तुं न शक्यते यथा पर्वतो धूमवान् आर्द्रेन्धनाभावात् इति, आर्द्रेन्धनाभावः पर्वते नास्ति आर्द्रेन्धनस्य पर्वते सत्त्वात्। यदि सत्प्रतिपक्षोन्नायकतया दूषकत्वं तदा अस्योपाधिता न स्यात् इत्यर्थः। इष्टापत्तिरिति त्वयोक्तम्। सत्प्रतिपक्षे उपाध्युद्भावनं न स्यादेव न भवत्येव इतीष्टापत्तिरित्यर्थः। एवं च पक्षवृत्तिरप्युपाधिर्न भवत्येव। यतस्तद्व्यतिरेकेण साध्याभावसाधनं कर्तुं न शक्यते। स्वरूपासिद्धत्वादित्यपि ज्ञेयम्।

**किञ्चैवं बाधोन्नीतोऽपि पक्षेतरो नोपाधिः स्यात् व्यतिरेकेऽसाधारण्यात्। ननु बाधे नोपाधिनियमः धूमेन ह्रदे वह्निसाधने तदभावात् न तु हेतुमति पक्षे बाधे पक्षेतरोपाधिनियमः**

**प्रत्यक्षे वह्नौ कृतकत्वेन अनुष्णत्वे साध्येऽतेजस्त्वादेरुपाधित्वसम्भवादिति चेत्। न। तेजोमात्रपक्षत्वेऽतेजस्त्वं विना अन्यस्य उपाधेरभावात्। किञ्च पर्वतावयववृत्त्यन्यत्वं पर्वतेतरद्रव्यत्वं ह्रद-पर्वतसंयोगानाधारत्वं ह्रद-पर्वतान्यत्वादिकमुपाधिः स्यादेव व्यतिरेकेऽसाधारण्याभावात् व्यतिरेकिणा सत्प्रतिपक्षसम्भवाच्च।**

**बाधोन्नीतोऽपीति** मूलम्। वह्निरनुष्णः पदार्थत्वात् इत्यत्र वह्नीतरत्वमुपाधिर्भवति। न स्यात्, तत्रापि व्यतिरेकेऽसाधारण्यात्। यथाऽयमुष्णः वह्नीतरत्वाभावः, सकलोष्णत्ववन्ति सौरालोकादीनि, [4B] तत्र वह्नीतरत्वाभावो नास्तीति सकलसपक्षव्यावृत्तोऽसाधारण इत्यर्थः।

**यद्यपीति** टीका। यतोऽत्रोष्णत्ववान् वह्निरेव तत्र वह्नीतरत्वाभावो वर्तते एवेति पक्षस्यैव पक्षत्वेन तद्व्यावृत्तिर्नास्ति। **तथापीति**। असाधारणः पक्षमात्रवृत्तिरेवेति मतं तदभिप्रायेणेदमुक्तम्। अत्र वह्नीतरत्वाभावो वह्निमात्रवृत्तिर्भवति। तेनासाधारणोऽयमिति टीकार्थः। **अत्रेति**। तटस्थ इष्टापत्तिं शङ्कते - बाधोन्नीतपक्षेतरोऽपि उपाधिर्मा भवतु। इतीष्टापत्तिस्तटस्थस्य। **नैयायिकेन**ेयमाशङ्का न भवति यतस्तेन बाधे उपाधिनियम उच्यते एवेति कृत्वा तटस्थस्याशङ्केयमित्यर्थः।

**धूमेनेति**। यथा ह्रदो वह्निमान् धूमात् इत्यत्रोपाधिः कोऽपि नास्ति, बाध एवास्तीत्यर्थः।

**न पक्षमात्रवृत्त्येति** टीका। यतोऽग्रेऽनेनैवोच्यते। यत्र प्रत्यक्षे वह्नौ कृतकत्वेनानुष्णत्वं साध्यते तत्रा-तेजस्त्वादेरुपाधिता संभवति इत्युच्यते। अत्रोक्तं बाधे न उपाधिनियम इति विरोधवारणायान्यथा व्याचष्टे। **न पक्षेति**। बाधे पक्षमात्रवृत्तिव्यतिरेक[प्रति]योग्युपाधिनियमो नास्ति। अयमर्थः। यस्योपाधेर्व्यतिरेकः पक्षमात्र-वृत्तिस्तादृशोपाधिनियमो नास्ति इति व्याख्यातम्। तथा च वह्नीतरत्वमुपाधिर्न भवति। वह्नीतरत्वव्यतिरेकः पक्षमात्रवृत्तिर्भवति। इति कृत्वाऽयमुपाधिर्न भवतीतीष्टापत्तिरिति भावः।

**न च(? तु)** इति मूलम्। यत्र पक्षे हेतुर्वर्तते तत्र चेत् बाधः तदा तत्र पक्षमात्रवृत्तिव्यतिरेकप्रतियोग्युपाधिः तिष्ठत्येवेत्याशङ्कार्थः। **प्रत्यक्ष** इति। यत्र प्रत्यक्षो वह्निस्तत्रानुष्णत्वं साधितं तदाऽतेजस्त्वमुपाधिर्भवति। अनुमानं यथा वह्निरनुष्णः कृतकत्वात् इत्यत्र अतेजस्त्वमुपाधिर्भवति। यत्र कृतकत्वं तत्रातेजस्त्वं नास्ति। साधनाव्यापकत्वं वह्नौ, साध्यव्यापकत्वं तु जलादौ। अत्र हेतुमात्रपक्षो भवति वह्निः। तत्र बाधोऽपि वर्तते। अत्र पक्षेतरत्वमेवोपाधिरेव तत्रेति नियमो नास्ति। यतोऽतेजस्त्वमप्युपाधिर्भवति। तद्व्यतिरेकश्च पक्षमात्रवृत्तिर्न भवति। प्रदीपादावपि अतेजस्त्वव्यतिरेकोऽस्तीति पक्षमात्रवृत्तिरेतस्य व्यतिरेको नास्ति, दीपादावपि सत्त्वादिति भावः।

**अतेजस्त्वमितीति** टीका। ननु त्वयोक्तं स्थलविशेषे यत्र तेजोमात्रपक्षः अनुष्णत्वं साध्यं तत्रातेजस्त्वमेवो-पाधिर्भवतीति तन्न लगति। यतस्तत्र वह्नीतरत्वमप्युपाधिर्भवति। तत्र हेतुमाह - **उपाधेरिति**। यथा

सत्प्रतिपक्षोऽनित्यदोषो यदा तस्य स्फ(स्फू)र्तिस्तदैव स दोषः एवमुपाधिः, न यत्रोपाधिस्तत्रावन(त्रोद्भावन)मुपाधिर्भवत्येवेत्यर्थः। **न चेति**। वह्नीतरत्वव्यतिरेकः पक्षतेजोमात्रे भागासिद्धः। तथाहि - यथा तेजोऽनुष्णत्वाभाववत् वह्नीतरत्वाभावात् इत्यत्र वह्नीतरत्वाभावो वह्निमात्रे वर्तते तेजोऽन्तरे नास्तीति भागासिद्धिरिति नोपाधिरित्याशङ्कार्थः।

**अतेजस्त्वेति**। तेजोऽनुष्णमित्यत्र तेजस्त्वसमनियतमतेजस्त्वप्रकारकप्रमाविषयत्वादिकं तत्र सम्भवति। **तथेति**। **अतेजस्त्वं विना** इत्यस्यायमर्थः कर्तव्यः - यस्य व्यतिरेकः पक्षमात्रे वर्तते एतादृशोपाधिं विना पक्षमात्रवृत्तिव्यतिरेकप्रतियोग्युपाधिं विनाऽन्य उपाधिर्न सम्भवति। इति तदपि शुद्धसाध्यव्यापकोपाधिर्न सम्भवतीत्यभिप्रायेण।

**अन्यथेति** टीका। तेजोमात्रमनुष्णं कृतकत्वात् इत्यत्र तेजो घटश्च एतद्द्वयान्यतरत्वाव[5A]च्छिन्नं यत्रानुष्णत्वं तत्र घटत्वम् एवंप्रकारेण साध्यव्यापकत्वं साधनाव्यापकत्वं वह्नौ एव तत्र घटत्वाभावात्। अन्यस्योपाधेरसम्भवादिति यदुक्तं तदसम्भवि स्यादित्यर्थः। **नन्विति** टीका। ननु त्वयोक्तं वह्नीतरत्वाभावोऽसाधारणो भवतीति वह्नीतरत्वमुपाधिर्न स्यात्। तत्रोच्यते सपक्षाद् व्यावृत्तोऽसाधारणः, वह्नीतरत्वाभावस्तु सपक्षाद् वह्नेरेव व्यावृत्तो न भवति, ततो नासाधारणः। असाधारण्यं पक्षमात्रवृत्तित्वं नोच्यते। तत्र हेतुमाह - **केवलेति**। केवलव्यतिरेकिणि सपक्षो नास्ति, पक्षमात्रवृत्तिर्भवतीति सोऽप्यसाधारणः स्यात्। **तथा चेति**। वह्निरनुष्णः कृतकत्वात् इत्यत्र वह्नीतरत्वाभावो वह्निमात्रवृत्तिर्भवति। तथापि सपक्षो वह्निरेव। यत्र वह्नीतरत्वाभावेनोष्णत्वं साध्यते तत्र सपक्षो वह्निरेव, अ(त)तो व्यावृत्तो वह्नीतरत्वाभावो न भवतीति कृत्वा वह्नीतरत्वाभावोऽसाधारणो न स्यादित्यपरितोषादाह - **किञ्चेतीति**। **पर्वतेति**। यदि साध्यव्यापकत्वे सति साधनाव्यापकमात्रमुपाधिलक्षणं तदा पक्षेतरेऽतिव्याप्तिर्दत्ता। अतः परमुच्यते पर्वतो वह्निमान् धूमात् इत्यत्र साध्यो वह्निस्तद्व्यापकं पर्वतावयववृत्त्यन्यत्वम्। यत्र वह्निस्तत्र पर्वतावयववृत्त्यन्यत्वं वर्तते, यथा महानसे। साधनाव्यापकत्वं तु पर्वत एव यतस्तत्र धूमो वर्तते पर्वतावयववृत्त्यन्यत्वं नास्ति [इति प्रथमः]। एवं पर्वतेतरद्रव्यत्वं महानसादौ वर्तते, वह्निरप्यस्ति महानसे, तत्र पर्वतेतरद्रव्यत्वमप्यस्ति इति साध्यव्यापकत्वं, साधनाव्यापकत्वं पर्वते एवेति द्वितीयः। एवं ह्रद-पर्वतसंयोगानाधारत्वं महानसेऽस्ति। वह्निरपि तत्र वर्तते। साधनाव्यापकत्वं तु पर्वत एवेति तृतीयः। एवं ह्रदपर्वतान्यत्वं वह्निव्याप्तं महानसे। साधनाव्यापकत्वं तु पर्वत एवेति [चतुर्थः]। **'आदि'**शब्दान्मूले पर्वतावयववृत्त्यन्यत्वप्रकारकप्रमाविषयमपि तथेति मूलार्थः। **पर्वतो यत्रेति** टीका। यथाश्रुते पर्वत-ह्रदसंयोगो प्रसिद्धो वर्तते इत्यन्यथा व्याचष्टे। यत्र पर्वतेन सह ह्रदस्य संयोगो वर्तते तदनाधारत्वम् एतच्च प्रसिद्धमित्यर्थः।

**व्यतिरेकेति** मूलम्। पर्वतो वह्न्यभाववान् पर्वतावयववृत्त्यन्यत्वाभावात् इत्यत्र नासाधारण्यम्, यतः सकलसपक्षमध्ये पर्वतरूपमपि वह्न्यभाववदस्ति। ततः पर्वतावयववृत्त्यन्यत्वाभावो व्यावृत्तो न भवति, रूपादौ

पर्वतावयववृत्त्यन्यत्वाभावो वर्तते एवेति नासाधारण्यमित्यर्थः। पूर्वमुक्तं पर्वते[त]रत्वेऽसाधारण्यं वर्तते इति कृत्वा पर्वतेतरत्वं नोपाधिरिति आह। **व्यतिरेकिणे**ति मूलम्। पर्वतो वह्न्यभाववान् पर्वतेतरत्वाभावात् इत्यत्र व्यतिरेके व्याप्तिरस्ति यथा यत्र वह्निस्तत्र पर्वतेतरत्वम्। एवं व्याप्तिपुरस्कारेण वह्निसाधकानुमाने सत्प्रतिपक्षः सम्भवति। तथा चोपाधेर्दूषकताबीजं सत्प्रतिपक्षोन्नायकत्वं सम्भवत्येवेति पक्षेतरोऽप्युपाधिः स्यादित्यर्थः।

**न चासाधारण्यम्, तस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वात्। तस्मादुभयोरपि व्याप्तिग्राहकसाम्ये विरोधान्न व्याप्तिनिश्चयः, किन्तूभयत्र व्यभिचारसंशयः, तथा च व्यभिचारसंशयाधायकत्वेनोपाधेर्दूषकत्वम्, तच्च पक्षेतरेऽप्यस्ति, तदुक्तम् उपाधेरेव व्यभिचारशङ्केति। भवतु वा उक्तन्यायेन सकलानुमानभङ्गभिया पक्षेतरोऽनुपाधिः, तथापि लक्षणमतिव्यापकम्।**

**न चासाधारण(ण्य)**मिति मूलम्। पर्वतो वह्न्यभाववान् पर्वतेतरत्वाभावात् इत्यत्र पर्वतेतरत्वाभावोऽसाधारणः, यतः सपक्षाद् ह्रदादेरपि व्यावृत्तोऽस्तीति। न च वाच्यमित्यन्वयः। **तस्यापी**ति मूलम्। असाधारणस्यापि सत्प्रतिपक्षोन्नायकत्वेनैव दूषकत्वम्। तथाहि पर्वतो वह्न्यभावाभाववान् पर्वतेतरत्वाभावाभावात् इत्येवं सत्प्रतिपक्षोन्नयनं कर्तव्यम्। तत्तु व्यर्थम्। पूर्वानुमानादेव साध्यसिद्धेरित्यर्थः। अत्र सपक्षा वह्न्यभाववन्तो ह्रदादयः, ततो व्यावृत्तो भवति पर्वतेतरत्वाभावः। अथ च विपक्षा भवन्ति महानसादयः, तेभ्योऽपि [5B] व्यावृत्तो भवति पर्वतेतरत्वाभावः। इत्यसाधारण एव। तथा च यथा पर्वतेतरत्वाभावः साध्यते तथा वह्निरपि साधनीयः यथा पर्वतो वह्निमान् पर्वतेतरत्वाभावात्। एवंप्रकारेण(णा)साधारणेनापि सत्प्रतिपक्षोन्नयनमेव कर्तव्यम्। तत्तु व्यर्थम्। वह्निस्तु मूलानुमानेनैव सिद्ध इति भावः।

**तथा चे**ति टीका। यथा सत्प्रतिपक्षे सत्प्रतिपक्षान्तरं नोद्भाव्यते। पूर्वानुमानेनैव साध्यसिद्धिः। **तत्रे**ति सत्प्रतिपक्षे इत्यर्थः। सत्प्रतिपक्षेऽसाधारण्यं यथा नो दोषो यतोऽसाधारणेनापि सत्प्रतिपक्षोन्नयनमेव कर्तव्यम्। तत्तु व्यर्थं, पूर्वानुमानेनैव वह्निसिद्धेः। **शतमपी**ति टीका। वह्निसाधकानि बहूनि अनुमानानि सन्ति इति द्योतयितुं सत्प्रतिपक्षे असाधारण्योद्भावनं कर्तव्यम्। तथा च(चा)साधारणेन वह्निरेव साधनीयः। ततो वह्निसाधकानुमान-बाहुल्यमिति सिद्धं स्यादित्यत आह - **शत**मिति। यदि अन्धाः शतम् एकः चाक्षुषः तदा तेन शतान्धानामपि प्रतिबन्धः क्रियते एव, शतान्धैस्तु न किमपीति। तथा प्रकृते वह्निसाधकानि बहून्यनुमानानि, तथाप्येकेन वह्न्यभावसाधकसत्प्रतिपक्षेण दृढेन बहूनां वह्निसाधकानां प्रतिबन्धः कर्तव्य इत्यर्थः। **नन्वि**ति। यद्युपाधेर्व्याप्ति-विरहोन्नायकतया दूषकत्वमिति पक्षो दूषितस्तदाऽतः परमुपाधेः दूषकतैव न स्यात्। व्यभिचारोन्नायकतया दूषकत्वं मया प्रागेव [दूषितम्] इति। यथा साध्यव्यापकोपाधिव्यभिचारत्वेन हेतोः साध्यव्यभिचारि[त्वं] साधनीयं

तथा साध्यहेत्वव्यापकतयोपाधेः साध्यव्यापकत्वमपि साधनीयमित्याद्युक्तप्रकारेणेत्यर्थः । **उभयोरि**ति । यथा हेतौ साध्यनिरूपितव्याप्तिग्राहकं व्यभिचाराभावसहकृतसहचारदर्शनादिकं वर्तते, तथा साध्ये उपाधिनिरूपित-व्याप्तिग्राहकमेव वर्तते यथा यत्र साध्यं तत्रोपाधिरिति । एवं व्याप्तिग्राहकसाम्यमुभयत्रापि व्याप्तिग्राहकं वर्तते । एकत्रैव व्याप्तिनिश्चयो नास्ति । इदमेवोपाधेर्दूषकताबीजं यत् साध्यसाधनयोर्व्याप्तिनिश्चये विघटनं क्रियते इति ।

**उभयत्रे**ति मूलम् । हेतौ साध्ये चेत्यर्थः । हेतौ साध्यव्यभिचारित्वसंशयः । साध्ये उपाधिव्यभिचारित्वसंशयः । एवं व्यभिचारसंशयाधायकत्वेन दूषकत्वं सिद्धम् । **तच्चे**ति । एवं व्यभिचारसंशयाधायकत्वं पक्षेतरेऽप्यस्ति । तथाहि यत्र वह्निस्तत्र पर्वतेतरत्वं वर्तते, यथा महानसे । एवमुपाधिनिरूपितव्याप्तिग्राहकं साध्ये वर्तते । तथा हेतावपि धूमादावपि वह्निनिरूपितव्याप्तिग्राहकं वर्तते । यथा यत्र धूमस्तत्र वह्निरिति व्याप्तिनिश्चयो न भवति, किन्तु व्यभिचारसंशय एवेति ।

**तथा चे**ति टीका । पक्षेतरव्यावृत्त्यर्थं यद्विशेषणोपादानं क्रियते यथा विपक्षाव्यावर्तकविशेषणशून्यत्वे सति साध्यव्यापकत्वसाधनाव्यापकत्वमिति । यतो दूषणबीजसत्त्वे उपाधित्वमङ्गीकरणीयमित्यर्थः ।

**उपाधेरेवे**ति मूलम् । उपाधेरेव शङ्का स्यात् व्यभिचारशङ्का जायते । इदमनुपपन्नम् । कथम् ? व्यभिचारित्वशङ्का तु अप्रयोजकत्वशङ्कादितोऽपि भवति इति कृत्वा उपाधेः व्यभिचारशङ्का इति अशुद्धम् । तत एवकारः भिन्नक्रमः कार्यः । उपाधेः व्यभिचारशङ्कैवेति अर्थः । तथा च उपाधिव्यभिचारशङ्काद्वारे[ण] दूषकत्वम् । अन्यथा दूषकत्वं नास्तीत्यर्थः । **पक्षेतरे**ति **चार्वाको** वदति । पक्षेतरोपा[6A]धिना यदा असाधकत्वानुमानं कर्तव्यम् यथाऽयम-साधकः सोपाधित्वात् इति तत्रापि पक्षेतर उपाधिर्भविष्यति इति । सकलानुमानोच्छेदभयात् पक्षेतर उपाधिर्न भवति इति **चार्वाकेणा**ङ्गीकृतम् । पक्षेतर उपाधिर्न भवति ।

**परश्चार्वाकः** । **लक्षणमते(ति)व्यापकमि**ति दूषणं दत्तमित्यर्थः । **आचार्ये**ति **उदयनाचार्यः** ।

**नापि साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वमुपाधित्वम्, दूषकताबीजस्य व्यभिचारोन्नयनस्य सत्प्रतिपक्षस्य वा साम्येन विषमव्याप्तस्याप्युपाधित्वात् तथा दूषकतायां साध्यव्याप्यत्वस्याप्रयोजकत्वाच्च । अथ साध्यप्रयोजको धर्म उपाधिः प्रयोजकत्वं च न न्यूनाधिकदेशवृत्तेः तस्मिन् सत्यभवतस्तेन विनापि भवतस्तद-प्रयोजकत्वात्, अन्यथा पक्षेतरस्याप्युपाधित्वप्रसङ्ग इति चेत् । न । दूषणौपयिकं हि प्रयोजकत्वमिह विवक्षितम्, तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेवेति, तदेव प्रयोजकं न तु अधिकं व्यर्थत्वात् ।**

**नापी**ति मूलम्। साध्येन समं समव्याप्तः। तथा यत्र साध्यं तत्रोपाधि[र्यत्रोपाधि]स्तत्र साध्यमिति समव्याप्तः। पक्षेतरस्तु साध्येन सह समव्याप्तो नास्ति। यत्र वह्निस्तत्र पर्वतेतरत्वमिति यद्यपि महानसादावस्ति, परं यत्र पर्वतेतरत्वं तत्र वह्निरिति नास्ति ह्रदेऽभावात्। तथा च विषमव्याप्तत्वात् पक्षेतरो नोपाधिः। दूषयति - **दूषकते**ति मूलम्। उपाधेर्दूषकताबीजं व्यभिचारोन्नायकत्वम्, अथवा सत्प्रतिपक्षोन्नायकत्वम्। एतदुभयमपि विषमव्याप्ते आर्द्रेन्धनादा[व]प्यस्ति इति कृत्वा स उपाधिर्भवति। तत्र त्वदीयं समव्याप्तत्वगर्भं लषणमव्याप्तं जातम्। दूषणान्तरमाह - **तथे**ति मूलम्। व्यभिचारोन्नायकत्वेन दूषकतायां साध्यव्याप्यत्वं प्रयोजकं न किन्तु साध्यव्यापकत्वमेव प्रयोजकम्, यतः उपाधिः साध्यव्यापको यदि जातस्तदा हेतोः व्यापकव्यभिचारेण व्याप्यस्य व्यभिचार आयात्येव। अथवोपाधिर्यदि साध्यव्याप्यस्तदा न किञ्चित् प्रयोजनं(कं) यतः साध्यव्याप्यव्यभिचारित्वेन हेतोः साध्या(ध्य)व्यभिचारित्वं नायाति इति कृत्वा साध्यव्याप्यत्वं प्रयोजकं न भवति। **आचार्येण** समव्याप्तत्वाङ्गीकारे साध्यव्याप्यत्वमप्यङ्गीकृतमस्तीति तदप्रयोजकम्। **साधनावच्छिन्ने**ति। आत्मा प्रत्यक्षो बहिर्द्रव्यत्वात् इत्यत्र उद्भूतरूपवत्त्वं बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकं भवति समव्याप्तस्तु नास्ति, यथा यत्रोद्भूतरूपवत्त्वं तत्र प्रत्यक्षत्वमेवं नास्ति। परमाणौ व्यभिचारात् इत्यर्थः। समव्याप्तस्योपाधेः **आचार्य**मते उपपादकं शङ्कते इत्यर्थः। **साध्यप्रयोजके**ति मूलम्। प्रयोजकत्वं विचारयति। **प्रयोजकत्वमि**ति। न्यूनेऽधिके व(वा) वर्तते तन्न्यूनाधिकवृत्ति। उपाधिश्च एतादृशो न भवति। यत उपाधिः साध्यसमव्याप्तो यथाऽऽर्द्रेन्धनप्रभववह्नित्वमुपाधिरेव, न तु आर्द्रेन्धनं तस्य विषमव्याप्तत्वात्। यदि च न्यूनाधिकवृत्तित्वं साध्येन सहोपाधेस्तदा दूषणम्, यथा पक्षेतरत्वमप्युपाधिः स्यात्। यद्यपि यत्र वह्निर्महानसादौ तत्र पक्षेतरत्वं वर्तते तथापि पक्षे एव व्यभिचारात् न न्यूनवृत्तेरुपाधित्वम्, [यत्र वह्निस्तत्र पक्षेतरत्वं नास्तीति पक्षेतरत्वं वह्नेर्न्यूनवृत्ति अतस्तन्नोपाधिः। एवं च नाधिकवृत्तेरुपाधित्वं] यथा पक्षेतरत्वस्यैव। कथम्? यत्र पक्षेतरत्वं तत्र वह्निर्नास्ति हृदे व्यभिचारात् इति पक्षेतरत्वं वह्नेरधिकवृत्तीति नोपाधिः। अथ न्यूनाधिकवृत्ति प्रयोजकं कुतो न भवतीति दूषणमाह - **तस्मिन्नि**ति मूलम्। तस्मिन् सति यथा पक्षेतरत्वादौ सत्यपि हृदादौ धूमस्याभावः, तेन पक्षेतरत्वेन विना पर्वते धूमस्य सत्त्वमिति अन्वयव्यतिरेकव्यभिचारात् पक्षेतरत्वस्य प्रयोजकत्वाभावादनुपाधित्वम्। आर्द्रेन्धनप्रभववह्निमत्त्वस्य तु उपाधित्वम्, यथा यत्रार्द्रेन्धनप्रभववह्निमत्त्वं तत्र धूमः यत्र च धूमस्तत्रार्द्रेन्धनप्रभववह्निरिति समव्याप्तिरस्त्येव प्रयोज्यप्रयोजकभावोऽपि यथा आर्द्रेन्धनप्रभववह्नेर्धूमं प्रति प्रयोजकत्वात्।

**अभवत** इति टीका। यथाश्रुते अनुपपत्तिर्यथा - अभवत इत्यस्यार्थो यदि अनुत्पादस्तदा दूषणम्, यथा पृथिवी गन्धवती द्र[6B]व्यत्वादिति व्यभिचारिणि सद्धेतुतापत्तेः। अत्रोपाधिः पाकजरूपवत्त्वम्, परस्परं [व्याप्य]व्यापकभावो वर्तते साध्योपाध्योः, परं प्रयोज्यप्रयोजकभावो नास्ति। न हि गन्धेन पाकजं रूपं जन्यते, न वा पाकजरूपेण गन्धो जन्यते इति। अन्यथा व्याचष्टे - **अविद्यमानस्ये**ति। तथा च विद्यमानता वर्तते। कथम्?

यत्र गन्धः तत्र पाकजं रूपं [यत्र च पाकजं रूपं] तत्र गन्ध इति । साध्ये सति उपाधेः सत्त्वं साध्यासत्त्वे उपाधेरसत्त्वमित्यस्त्येवेति अर्थः ।

**अन्यथे**ति मूलम् । यदि समव्याप्तोऽप्युपाधिस्तदा पक्षेतरोऽप्युपाधिः [इति] शब्दार्थः ।

**यद्यपी**ति टीका । पक्षेतरे साध्यव्यापकता नास्ति । कथम् ? यत्र वह्निस्तत्र पक्षेतरत्वमिति पक्षे एव व्यभिचारात् । तथा च साध्यव्यापकता एव नास्ति **तस्ये**ति पक्षेतरत्वस्यापीति । **तथापी**ति । पक्षेतरत्वस्यापि पक्षातिरिक्ते साध्यव्यापकता नास्तीति मते मूलाभिप्रायम् इत्यर्थः । **एवं प्रती**ति । यदि पक्षातिरिक्तसाध्य-व्यापकता पक्षेतरत्वस्य तदा पक्षेतरवृत्तिवह्निसामग्र्यादेरप्युपाधिता स्यात् । कथम् ? यत्र पक्षातिरिक्ते वह्निस्तत्र पक्षेतरवृत्तिवह्निसामग्री वर्तते इति प्रयोज्यप्रयोज्य(जक)भावोऽपि वर्तते व्याप्तिरपि वर्तते । न चेष्टापत्तिरनुमान-मात्रोच्छेदापत्तेरित्यर्थः । **न त्वधिकमि**ति । साध्यव्याप्यत्वमित्यर्थः । तथा च साध्यव्यापकत्वे साध्यव्याप्यत्वं साध्यसमव्याप्तत्वम् । अत्र साध्यव्याप्यत्वमित्यधिकं प्रथमदले व्यर्थत्वात् दूषणे अनौपयिकत्वात् ।

**ननु उपाधिः स उच्यते यद्धर्मोऽन्यत्र प्रतिबिम्बते यथा जपाकुसुमं स्फटिकलौहित्य उपाधिः, तथा चोपाधिवृत्तिव्याप्यत्वं हेतुत्वाभिमते चकास्ति तेनासावुपाधिः । न च व्याप्यत्वमात्रेण दूषकत्वमिति, साध्यव्यापकताऽपीष्यते, तथा च समव्याप्त एवोपाधिरिति चेत्, तत् किं विषमव्याप्तस्य दूषकताबीजाभावान्नोपाधिशब्दवाच्यत्वं तथात्वेऽप्युपाधि-पदप्रवृत्तिनिमित्ताभावाद्वा, नाद्यः तस्यापि व्यभिचाराद्युन्नायकत्वात्, नापरः न हि लोके समव्याप्त एवान्यत्र स्वधर्मप्रतिबिम्बजनक एवोपाधिपदप्रयोगः, लाभाद्युपाधिना कृत-मित्यादौ लाभादावप्युपाधिपदप्रयोगात् । किञ्च न शास्त्रे लौकिकव्यवहारार्थमुपाधि-पदव्युत्पादनं किन्त्वनुमानदूषणार्थम्, तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमात्र-मिति शास्त्रे तथैव उपाधिपदप्रयोगः ।**

पुनः समव्याप्तोपाधिवादी शङ्कते - **नन्विति** । पूर्वमुपाधिपदरूढिर्व्याख्याता, इदानीं योगं व्याख्याति । **उपाधिरिति** मूलम् । उप समीपे आगत्य स्वीयं रूपमादधात्यन्यत्र संक्रामयति स उपाधिरिति । प्रकृते आनयति । **तथा चे**ति मूलम् । यथा जपाकुसुमं स्वधर्मं लौहित्यं स्फटिके उपदधाति, तथा अत्र आर्द्रेन्धनप्रभववह्निमत्त्वं स्वव्याप्यधूमे व्याप्तिरूपं धर्ममुपसंक्रामयति इति तस्योपाधिता ।

**स्ववृत्तीति** टीका। साध्यव्याप्यत्वं तु साध्यनिष्ठव्याप्त्युपसंक्रामकत्वम्, इदमुपाधिपदप्रवृत्तिनि[मि]त्तम्। दूषकताबीजं च साध्यव्यापकत्वमिष्यते। तेन साध्यसमव्याप्त उपाधेः(धिः)।

**तदिति** मूलम्। विषमव्याप्तस्यार्द्रेन्धनादेः त्वया अनुपाधित्वमुच्यते, तस्य किं दूषकताबीजाभा[वा]त् उपाधिपदप्रवृत्तिनिमित्ताभावाद् वा ? **नाद्यः** इत्याह। यत्र धूमस्तत्रार्द्रेन्धनमिति विषमव्याप्तस्याप्युपाधित्वं व्यभिचारोन्नायकम्, यथा वह्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धनव्यभिचारित्वादिति व्यभिचारोन्नयनम्।

**नन्विति** टीका। **आचार्यमते**ऽपि विषमव्याप्तस्याऽऽर्द्रेन्धनादेरुपाधित्वं कथं न स्यादित्यन्वयः। यत्किञ्चिद्धर्मोप-संक्रामकत्वज्ञानात् उपाधिज्ञानं दूषकताबीजसत्त्वाच्च इत्याशङ्कार्थः। तथा च विषमव्याप्तस्य साध्यव्याप्यत्वज्ञानं भ्रमरूपं भवत्येव। ततोऽपि साध्यव्याप्य[त्व]ज्ञानं तस्य वर्तते एव।

**न चेति**। व्याप्ति[संक्रामकत्वरूपं] उपाधिपदप्रवृत्तिनिमित्तं तस्य नास्तीति न स उपाधिरित्याशङ्कार्थः। **नापरं** इति। उपाधिपदप्रवृत्तिनिमित्तत्वाभावपक्षे इत्यर्थः। **न हीति**। लोके समव्याप्त एवोपाधिपदप्रयोग इति न हि। तत्र हेतुमाह - **लाभादीति**। यथा लाभादौ उपाधिपदप्रयोगस्तथा विषमव्याप्ते आर्द्रेन्धनादावुपाधिपदप्रयोगो भवतु इत्यर्थः। **नन्विति** तत्र हेतुमाह - **लाभादीति**। यथा लाभादौ उपाधिसङ्केत उपाधिसंज्ञा लोकव्यवहारादस्ति तथाऽत्रापि विषमव्याप्तेऽपि [7A] उपाधिपदप्रयोगो लोकव्यवहारार्थं भवतु इत्यशेषोऽर्थः।

**परीक्षकेति** टीका। परीक्षकाणामुपाधिव्यवहारो विषमव्याप्तेऽपि भवत्यनुमानदूषणार्थमिति भावः।

**तच्चेति**। अनुमानदूषणौपयिकमित्यर्थः।

**अन्ये तु यदभावो व्यभिचारविरोधी स उपाधिः। न च विषमव्याप्तस्याभावो व्यभिचारं विरुणद्धि, तस्याभावेऽपि व्यभिचारात्। अस्ति हि अनित्यत्वव्यापकं प्रमेयत्वं तद्व्याप्यं च गुणत्वम्। न चानित्यत्व-गुणत्वयोः व्याप्तिरस्ति, समव्याप्तिकस्य च व्यतिरेकस्तथा, न हि साध्यव्यापकव्याप्यीभूतस्य व्याप्यं यत् तत् साध्यं व्यभिचरति, व्यभिचारे चान्ततः साध्यमेवोपाधिः, अभेदेऽपि व्याप्यव्यापकत्वात् साधनाव्यापक-त्वाच्चेति स्वीचक्रुः।**

**न चेति** मूलम्। पक्षेतरत्वस्यार्द्रेन्धनस्य वा अभावो न व्यभिचारं विरुणद्धि। कथम् ? तत्राह - **तस्या-भावेऽपीति** मूलम्। यथा वह्निमान् धूमात् इत्यत्र पक्षेतंस्वं(क्षेतरत्वं) दीयते। अत्र व्यभिचाराभावादेव पक्षेतरत्वाभावस्य व्यभिचारविरोधकत्वं न स्यादित्यर्थः। किञ्चिदत्र न्यूनमस्ति। **अन्ये त्विति** मूलम्। यस्याभावो व्यभिचारविरोधी स उपाधिरित्यर्थः। ननु यथाश्रुतमनुपपन्नम्। कथम् ? यतः समव्याप्तोपाधिमतेनैवं लक्षणम्।

तथा चार्द्रेन्धनप्रभववह्निरेवोपाधिः, न तु आर्द्रेन्धनम् । तथा चार्द्रेन्धनप्रभववह्न्यभावो वह्नौ एवास्ति । वह्नौ वह्नेरभावात् तत्र च वह्न्यव्यभिचारस्यापि सद्भावात् । तथा हि यत्र यत्र वह्निस्तत्र धूम इति नास्ति । अयोगोलके व्यभिचारः । ततो नार्द्रेन्धनप्रभववह्न्यभावस्य व्यभिचारविरोधित्वमुपाधिर्भवति । परं तदभावो न व्यभिचार-विरोधीत्यन्यथा व्याचष्टे ।

**यस्ये**ति टीका । **यस्य साध्यव्यापकतया** [इति] त्व(? कृ)त्वा योऽभावऽकोऽर्थः साधनव्यापकत्वम्, तद् यस्योपाधेः व्यभिचारविरोधिः(धि) स उपाधिः । ननु तथाप्यार्द्रेन्धनप्रभववह्नेः साधनव्यापकं(पकत्वं) व्यभिचारिणि वह्निव्यापकत्वमप्रसिद्धम्, **यत्र वह्निस्तत्रार्द्रेन्धनप्रभववह्निरि**ति नास्ति । अयोगोलके वह्निसत्त्वे आर्द्रेन्धनप्रभववह्निमत्त्वाभावात् इत्यत आह - **तदपीति टीका । साधनव्यापकत्वमपी**त्यर्थः । वस्तुगत्या यद्यपि आर्द्रेन्धनप्रभववह्नेः साधनव्यापकत्वमप्रसिद्धं तथापि साधनव्यापकत्वं प्रसञ्जितं बोद्धव्यम् । तथाहि - साधनं वह्निर्यद्यार्द्रेन्धनप्रभववह्निव्याप्यः स्यात् तर्हि धूमव्याप्यः स्यात् इत्यापादनं कर्तुं शक्यते । **अन्यथे**ति । यदि साधनव्यापकत्वं प्रसञ्जितं नोच्यते, तदा असम्भव(म्) एव । असम्भवमेवाह - **उपाधेरि**ति टीका । उपाधिः साधनस्य व्यापक एव भवतीति कृत्वा कथनम् । तस्य साध्यव्यापकत्वमेवं लक्षणस्य पर्यवसन्नम् । अर्थमाह - **एवं चे**ति । यदि येनोपाधिसम्बन्धिना प्रसञ्जितेन साधनव्यापकत्वेन हेतुसाध्ययोरव्यभिचार आपादयितुं शक्यते स साधनव्यापकरूपहेतावुपाधिः । अस्यार्थः । धूमवान् वह्नेः इत्यत्रार्द्रेन्धनप्रभववह्नौ उपाधौ इदं लक्षणं गच्छति । कथम् ? आर्द्रेन्धनप्रभववह्निसम्बधिना साधनव्यापकत्वेन वह्निधूमयोरव्यभिचार आपा-दयितुं शक्यते । कथम् ? वह्निर्यदि आर्द्रेन्धनप्रभववह्नेर्व्याप्यो भवति, अभेदेऽपि व्याप्यव्यापकभावो वर्तते इत्यग्रे वक्तव्यम् । **तादृशश्चे**ति टीका । यदि येन साधनव्यापकत्वेन हेतुसाध्यसो(यो)र(र्)व्यभिचाराभाव आपादयितुं शक्यते । कथम् ? वह्निहेतुर्यदि आर्द्रेन्धनव्याप्यः स्यात् तर्हि धूमव्याप्यः स्यात् इत्यापाद[ने] क्रियमाणे व्याप्तिर्नास्ति । कथम् ? यो यः आर्द्रेन्धनव्याप्यः स स धूमव्याप्य इति नियमो नास्ति । यतः आर्द्रेन्धनव्याप्यमार्द्रे-न्धनमेवाभेदसम्बन्धेन भवति, तच्चार्द्रेन्धनं धूमव्याप्यं न भवति । ह्रदे आर्द्रेन्धनं वर्तते, तत्र धूमो नास्तीति व्यभिचारः । आर्द्रेन्धनप्रभववह्नेर्व्याप्यस्तु धूमः, आर्द्रेन्धनप्रभववह्निर्वाऽवश्यं धूमव्याप्य एवेति । **तस्ये**ति । समव्याप्तस्य साध्यव्याप्यतया समव्याप्तो य उपाधिस्तद्व्याप्यं चेत् साधनं तदा अवश्यं साध्यस्या[पि] व्याप्यं भवत्येव । हेतुमाह - **व्याप्यव्याप्यस्ये**ति । साध्यस्य धूमस्य यो व्याप्य [7B] आर्द्रेन्धनप्रभववह्निः तस्य यद् व्याप्यं तद् अवश्यं साध्यस्यापि व्याप्यं भवत्येव । तथा चावगतं समव्याप्त एवार्द्रेन्धनप्रभववह्निमत्त्वमेवोपाधिः, न त्वार्द्रेन्धनादिर्विषमव्याप्त उपाधिर्भवति । एवं पक्षेतरत्वमपि विषमव्याप्तत्वादुपाधिर्न भवतीति प्रघट्टकार्थः । अथ शङ्कते - **नन्विति** । त्वदीयं लक्षणं विषमव्याप्तोपाधीति व्यापकमिति रूपयति । ध्वंसो विनाशी जन्यत्वात् । अत्र भावत्वमुपाधिर्विषमव्याप्तो भवति । यथा यत्र यत्र भावत्वं तत्र तत्र विनाशित्वं नास्ति, आकाशादौ व्यभिचारात् । यत्र जन्यत्वावच्छिन्नं विनाशित्वं तत्र भावत्वमस्त्येवेति कृत्वाऽयं विषमव्याप्तोपाधिः । अत्रातिव्याप्तिः । कथम् ?

एतदेव दर्शयति - **जन्यत्वमि**ति। जन्यत्वं साधनं यदि भावत्वस्योपाधेर्व्याप्यं स्यात् तदा विनाशित्वस्य व्याप्यं स्यात्। यो जन्यो भावः सोऽवश्यं विनाश्येवेयं व्याप्तिर्वर्तते। जन्यभावत्वं नाश्यतावच्छेदकम्। अयं विषमव्याप्तो भवति। अस्य साधनव्यापकत्वेन हेतुसाध्ययोरव्यभिचार आपादयितुं शक्यते। वस्तुगत्या विषमव्याप्तो भवत्ययम्। उपाधिस्तु तन्मते न भवतीत्यतिव्याप्तिरित्याशङ्कार्थः। समाधत्ते - **यद्व्याप्यत्वमि**ति। तथा च भावत्वमुपाधिर्न भवति। तन्निरासाय विवक्षापूर्वं लक्षणं करोति। यद्व्याप्यत्वं(त्वमिति) यस्योपाधेर्व्याप्यत्वं सर्वत्र साधने सर्वस्मिन् हेतौ व्यभिचार(रा)भावमापादयति स उपाधिः, भावत्वं च नोपाधिः यतो भावत्वव्याप्यत्वं सर्वत्र साधने व्यभिचारविरोधि न भवति। भावत्वव्याप्यत्वं वर्तते आकाशत्वे(? शे), तत्र विनाशित्वव्याप्यत्वं नास्ति इति व्यभिचारात् सर्वत्र साधने व्यभिचारविरोधि न भवति। **प्रमेयत्वादावि**ति। प्रमेयत्वं यदि भावत्वव्याप्यं स्यात् तदा विनाशित्वव्याप्यं स्यात् इत्यापादनं न सम्भवति। तेन प्रतिवादिना वक्तव्यम् - प्रमेयत्वं भावत्वस्य व्याप्यमपि भविष्यति विनाशित्वव्यभिचार्यपि भविष्यति इति कृत्वा तत्रापादनं न सम्भवति, तथा च भावत्वं नोपाधिः। यद्यपि जन्यत्वादौ भावत्वव्याप्यत्वं व्यभिचारविरोधि भवति तेन कृत्वाऽऽपादनं सम्भवति तथापि ध्वंसो विनाशी प्रमेयत्वात् इत्यादौ आपादनं न सम्भवति इति न स उपाधिः।

**न च विषमे**ति मूलम्। विषमव्याप्तस्य प्रमेयत्वस्याभावो व्यभिचारविरोधी नास्ति। हेतुमाह - **तस्य** विषमव्याप्तस्य **अभावेऽपी**ति। कोऽर्थः ? साधनव्यापकत्वेऽपीत्यर्थः। कथमित्यत आह - **अस्ती**ति मूलम्। शब्दोऽनित्यः गुणत्वात् रूपवत्। अत्र प्रमेयत्वमुपाधिर्न भवति, विषमव्याप्तत्वात्। यद्यपि यत्रानित्यत्वं तत्र प्रमेयत्वमिति विद्यते, तथापि यत्र प्रमेयत्वं तत्रानित्यत्वमेवं नास्ति। प्रमेयत्वमाकाशे, तत्र चानित्यत्वमेव नास्ति, इति विषमव्याप्तः। तस्य प्रमेयत्वस्य साधनव्यापकत्वं व्यभिचारविरोधि न भवति। गुणत्वं यदि प्रमेयत्वव्याप्यं स्यात् तदा अनित्यत्वव्याप्यं स्यादित्यापादनं न सम्भवति। कथम् ? प्रमेयत्वव्याप्यत्वं वर्तते गुणत्वे, तत्रानित्यत्वव्याप्यत्वं नास्ति। तथा च यत्र यत्र गुणत्वं तत्र तत्रानित्यत्वमिति चा(ना)स्ति। गुणत्वे(त्वं) वर्तते जलपरमाणुरूपे तत्रानित्यत्वं नास्ति। व्यभिचारात् गुणत्वं नानित्यत्वस्य व्याप्यमिति कृत्वाऽऽपादनं तेन न सम्भवतीत्यर्थः। अथ समव्याप्तोपाधौ लक्षणयति। **समव्याप्तिकस्ये**ति मूलम्। आर्द्रेन्धनप्रभववह्न्यादेस्त्वभावो व्यभिचारविरोधी भवत्येव। एतदेवाह - **न ही**ति। साध्यस्य धूमस्य [8A] व्याप्यम् अथ च व्यापकमेतादृशं यदा आर्द्रेन्धनप्रभववह्न्यादिकं यद्व्याप्यं यत् तत् साध्यं धूमं न व्यभिचरति। यथा धूमवान् वह्नेः इत्यत्रार्द्रेन्धनप्रभववह्निरुपाधिः, तस्य उपाधेर्यद्व्याप्यमार्द्रेन्धनप्रभववह्निरेव। अभेदेऽपीति न्यायेन स धूमस्य व्याप्यं भवत्येवेत्यर्थः।

**नन्वि**ति टीका। सर्वत्र व्यभिचारिणि समव्याप्तोपाधिर्न सम्भवति, विषमव्याप्तस्योपाधिर्भवता नोच्यते। तथा च व्यभिचारे वाऽवश्यमुपाधिरिति नियमो भग्न इत्याशङ्कार्थः।

**व्यभिचार** इति मूलम्। यत्र त्वयोक्तं समव्याप्तः कोऽप्युपाधिर्न संभवति विषमव्याप्तस्योपाधित्वं ये(च) नोच्यते तत्र व्यभिचारेऽवश्यमुपाधिरिति नियमो भग्नः, तत्रोच्यते यद्यपि साध्यातिरिक्तः समव्याप्तः कोऽप्युपाधिर्न

सम्भवति तथापि साध्यमेव साध्येन सह समव्याप्तोपाधिर्भवति। ननु साध्यं कथमुपाधिः ?, साध्यं स्वस्य व्यापकं न भवति यतो भेदे व्याप्यव्यापकभाव इत्यत आह - **अभेदेऽपीति**। तथा च साध्यमपि साध्यस्य व्यापकं भवति। यत्र साध्यं तत्र साध्यम्। एवं साध्यं साधनाव्यापकमपि भवति, साधनस्य साध्येन समं व्यभिचरितत्वात्, साध्याभाववत्यपि साधनसत्त्वादिति। तत्र साध्यस्योपाधित्वम्।

**वस्तुत** इति टीका। साध्यमेव तत्र किमर्थमुपाधिरुच्यते ? साध्यसमव्याप्तं यदा, नक(नु) साध्यवत्त्व-प्रकार[क]प्रमाविशेषत्वं धर्मस्तत्रोपाधिर्भवत्येव। यत्र साध्यं तत्र साध्यवत्त्वप्रकारकप्रमाविशेषत्वं धर्मस्तत्रो-पाधिर्भवत्येव। यत्र साध्यं तत्र साध्यवत्त्वप्रकारकप्रमाविशेषत्वं वर्तते। अयं साधनस्याव्यापको भवति, यतः साध्यवत्त्वप्रकारकप्रमा-विशेषत्वाभाववत्त्व(त्त्वेऽ)पि साधनस्य वृत्तेरित्यर्थः। **यदभावेत्यादिना** समव्याप्तस्यै-वोपाधित्वमुक्तम्। तद् दूषयति।

**तन्न। तवापि ह्यव्यभिचारे साध्यव्याप्यव्याप्यत्वं तन्त्रमावश्यकत्वात् लाघवाच्च न [तु] साध्यव्यापकव्याप्यत्वमपि, भवतैव व्यभिचारस्य दर्शितत्वात्। न च साध्यव्याप्य-व्याप्यत्वमेवानौपाधिकत्वम्, साध्यव्याप्यमित्यत्रापि ह्यनौपाधिकत्वं तदेव वाच्यं तथा चानवस्थेति, अनौपाधिकत्वे च व्याप्तिलक्षणे यावदिति पदं साध्यव्यापकत्वे विशेषणं दत्तमेव। किञ्च यस्मिन् सति अनुमितिर्न भवति तदेव तत्र दूषणं न तु यद्व्यतिरेके भवत्ये-वेत्येतद्गर्भं विरुद्धत्वादेरप्यदोषत्वापत्तेः।**

**तन्नेति**। पूर्वकृते मते तव समव्याप्तोपाधिः साध्यव्यापकः साध्यव्याप्योऽपि, तत्रोच्यते - उपाधेः साध्यव्यापकत्वं व्यर्थम्। तत्र हेतुमाह - अव्यभिचारे किं तन्त्रम्। साध्यव्यापकव्याप्यत्वं साध्यव्याप्यव्याप्यत्वं वा ? तत्र प्रथमं न, त्वयैव व्यभिचारदर्शितत्वात्। यथा रूपमनित्यं गुणत्वात् इत्यत्र अनित्यत्वस्य व्यापकं प्रमेयत्वम्, तद्व्याप्यं भवति गुणत्वं यथा यत्र गुणत्वं तत्र प्रमेयत्वमिति। तथाप्यव्यभिचारो नास्ति जलपरमाणा(ण्वा)दौ व्यभिचारात्। तस्मात् अव्यभिचारे द्वितीयमेव तन्त्रं वक्तव्यं साध्यव्याप्यव्याप्यत्वम्। तथा च साध्यस्य वह्न्यादेर्व्याप्य वह्निसामग्र्यादिकम्, तस्य च धूमो व्याप्यस्तदा वह्नेरप्यवश्यं व्याप्य एव भवति, व्याप्यव्याप्यस्य सुतरां व्याप्यत्वात्। तथा च साध्यव्यापकत्वस्य प्रयोजनं नास्ति। साध्यव्यापकत्वमव्यभिचारे प्रागेव दूषितमेव। एवं च साध्यव्यापकत्वमव्यभिचारे तन्त्रं न भवति। तथा च साध्यव्याप्य एवोपाधिरिति सम्पन्नम्। यद्यप्युपाधे-र्व्यापकत्वं गतं तदा समव्याप्त उपाधिरिति भग्नमित्यर्थः। एवं च यत्रोपाधिस्तत्र साध्यमिति साध्य-व्याप्यमेवोपाधिरित्यभिप्रायार्थः खण्डयितुर्ज्ञेयः। **आवश्यकत्वादिति** मूलम्। व्याप्यव्याप्यत्वस्य सुतरां व्याप्यत्वमिति न्यायेन(ना)व्यभिचारो नियतो भवतीत्यर्थः। **लाघवादिति**। साध्यव्याप्यः साध्यव्यापकश्च,

तदपेक्षया साध्यव्याप्यव्याप्यत्वं ल[घु], तत्र साध्यव्यापकव्याप्य एतस्याधिकस्य प्रवेशात् गौरवमित्यर्थः । **न त्विति** मूलम् । साध्यव्यापकव्याप्यत्वमव्यभिचारे तन्त्रं न भवति । रूपमनित्यं गुणत्वात् इत्यादौ व्यभिचारस्य दर्शितत्वात् इत्यर्थः । अथेष्टापत्तिमाह - यथा व्यापकत्वं व्यर्थं भवतु । मया साध्यव्याप्यव्याप्यत्वमेवानो(नौ)पाधिकत्वे तन्त्रं वक्तव्यम् । उपाधिश्च साध्या(ध्य)व्याप्यत्वं [8B] साधनाव्यापकत्वमेवोच्यते इष्टापत्तिरित्यर्थः । इष्टापत्तिं दूषयति - **साध्यव्याप्यमित्यत्रापि हीति** । त्वयोक्तं साध्यव्याप्यव्याप्यत्वमेवानौपाधिकत्वे तन्त्रमिति तत्र मयोच्यते अत्रापि साध्यव्याप्यमित्यत्रापि अनौपाधिकत्वं प्रविष्टम्, व्याप्यपदेन व्याप्तेः प्रवेशात्, तत्रापि अनौपाधिकत्वं साध्यव्याप्यव्याप्यत्वमिदमेव वक्तव्यम्, तत्रापि व्याप्यत्वं प्रविष्टमित्यनवस्था स्यादित्यर्थः । **तथा चेति** । अनवस्थामुपपादयति । साध्यव्याप्यत्वनिश्चयो यः सोऽनौपाधिकत्वज्ञानाधीनः, तत्राप्यनौपाधिकत्वं साध्यव्याप्यव्याप्यत्वमेवेत्यनवस्था । ननु पूर्वमेवोक्तम् अनौपाधिकत्वज्ञानं व्याप्तिज्ञाने कारणं न भवतीति, साम्प्रतमनौपाधिकत्वज्ञानं व्याप्तिज्ञाने कारणमिति कथमनवस्थेत्यत आह - **एतच्चेति** । एतद् अनवस्थारूपदूषणमित्यर्थः । एतावता तव किमभिप्रेतम् ? साध्यव्यापकव्याप्यत्वमेवानौपाधिकत्वमभिप्रेतम् । साध्यव्याप्यव्यापकव्याप्यत्वं[१] त्वयैव निराकृतम्, व्याप्यत्वांशस्य व्यर्थत्वात् । तथा च शब्दोऽनित्यो गुणत्वात् इत्यत्र व्यभिचारिणि गुणत्वेऽतिव्याप्तिः । कथम् ? साध्यमनित्यत्वम्, तस्य व्यापकं प्रमेयत्वम्, तस्य व्याप्यं गुणत्वं भवत्येव, इति गुणत्वे तवाभिप्रेतानौपाधिकत्वलक्षणमतिव्याप्तमित्याह - **तत् किमिति** । तदनौपाधिकत्वं साध्यव्यापकव्याप्यत्वरूपं व्याप्तिलक्षणं न स्यात् । गुणत्वे व्यभिचारिण्यपि गतत्वादित्याहेत्यर्थः ।

**अनौपाधिकत्वे चेतीति** टीका । तथा चानौपाधिकत्वरूपं यत् व्याप्तिलक्षणं तत्र यावत्पदं साध्यव्यापके दत्तमेव । तथा चायमर्थः - न केवलं साध्यव्यापकव्याप्यत्वमेवानौपाधिकत्वं ब्रूमः येनोक्तगुणत्वेऽतिव्याप्तिः स्यात् किन्तु यावत्साध्यव्यापकव्याप्यत्वम् । यावन्ति साध्यस्य वह्न्यादेर्व्यापकानि द्रव्यत्वप्रमेयत्वादीनि तावतां हेतुर्व्याप्यः, यत्र हेतुस्तत्र तावतीति, तथा च गुणत्वे नातिव्याप्तिः । यावन्ति अनित्यत्वस्य साध्यस्य व्यापकानि अनित्यत्वप्रकारकप्रमाविशेष्य(?ष)त्वादीनि, तावतां गुणत्वं व्याप्यं न भवति, जलपरमाणुरूपे व्यभिचारात् । तत्र गुणत्वमस्ति, अनित्यत्वप्रकारकप्रमाविशेष्य(?ष)त्वं नास्ति, तस्य नित्यत्वात् । **किञ्चेति** मूलम् । यदभावो व्यभिचारविरोधीत्यत्र दूषणान्तरमाह - **यस्मिन्निति** । यस्मिन् सति अनुमितिर्न भवति तदेव तत्र हेतौ दूषणम् । यद्व्यतिरेकेऽनुमितिर्न भवत्येवेति तत्र तद्दूषणमिति । **एतद्गर्भा(र्भं) विरुद्धत्वादेरिति** मूलम् । विरुद्धत्वं नाम साध्याभावव्याप्यत्वम्, हेतोस्तद् दूषणं न स्यात् यतः विरुद्धत्व(त्वं) व्यतिरेके । **अ(त)देवेतीति** टीका । यस्मिन् सति अनुमितिर्न भवति तत् तत्र दूषणमिति चेत् जातं ततो विषमव्याप्तस्य आर्द्रेन्धनादेरप्युपाधित्वमागतम् ।

---

१. साध्यव्यापकव्याप्यत्वम् इति शुद्धं प्रतिभाति ।

तत्सद्भावेऽनुमितिर्न भवत्येवोपाधिसद्भावादित्यर्थः । **न त्विति** । समव्याप्तोपाधिवादिमते समव्याप्तोपाधि-व्यतिरेकेऽनुमितिनियमो नास्ति। कथमिति तदेवाह - **जलेति**। जलहृदो वह्निमान् [धूमात्] इत्यत्र समव्याप्तोपाधिः कोऽपि नास्तीति। तद्व्यतिरेकोऽस्ति परमनुमितिनियमो नास्ति। स्वरूपासिद्धानुमितिबन्धात्। स्वरूपासिद्धिरित्युप-लक्षणम्। बाधो द्रष्टव्यः। स्वरूपासिद्धिस्तु [9A] पक्षे हेतुस्वरूपस्यासिद्धेरित्याशङ्कार्थः। **पक्षवृत्तित्व** इति। तथा च पक्षवृत्तित्वे सति बाधप्रतिरोधाभावे च सति यद्व्यतिरेके हि लिङ्गस्य हेतोः समीचीनत्वनियमस्तत्तु अत्र दूषणम् । अत्र पङ्क्तिद्वयं लिख्यते । तथा च जलहृदो [वह्निमान्] धूमादित्यत्र समव्याप्तोपाधिव्यतिरेको यद्यपि वर्तते तथापि धूमस्य हेतोः पक्षवृत्तित्वमेव नास्ति। पक्षवृत्तित्वाभावादेव तत्र नोक्तदोषः। **व्यभिचारादिपरिग्रह** इति । तथा च व्यभिचारस्य दूषकता न स्यात्। व्यभिचाराभावे जलहृदो वह्निमान् धूमात् इत्यादौ व्यभिचाराभावेऽपि अनुमितेरभावादित्यर्थः। एतदेवाह - **अन्यतरेति**। व्यभिचारिणि विरुद्धत्वव्यतिरेके लिङ्गस्य समीचीनत्वनियमो नास्ति। अथ च व्यभिचारस्य व्यतिरेके अत्र पङ्क्तिचतुष्टयं विलोक्यते। शङ्कते - **यद्यपीति**। यथाश्रुते यद्व्यतिरेके इति मूलस्यास्यायमर्थः । यद्व्यतिरेके भवत्येव व्यभिचाराभावः तदेव तत्र दूषणम् इत्युच्यते चेत्, तदा पक्ष-वृत्तित्वे इत्यादिविशेषणत्यागेनाप्युप[प]त्तिर्भवति । कथम् ? जलहृदो वह्निमान् धूमात् इत्यत्रानुमाननियमो यद्यपि नास्ति तथापि समव्याप्तोपाधिव्यतिरेके व्यभिचाराभावनियमो वर्तते एवेत्यर्थः । उपपादकान्तरमाह - **युक्तं चेति**। तथा युक्तं यद्व्यतिरेके व्यभिचाराभाव इत्येवोक्तम्। कुतः ? यतो यदभावो व्यभिचारविरोधी इत्यनेन यद्व्यतिरेके व्यभिचाराभाव इत्युक्तमस्ति । तथा च तदेव दूषणीयम् । ननु अनुमितिर्न भवत्येवेति नोक्तमस्ति । न तद् दूषणीयमित्याशङ्कार्थः । समाधत्ते - **तथापीति** । **तत्रेति कुसुमाञ्जलिप्रकाशो(शे)** यद्व्यतिरेके अनुमितिर्न भवत्येवेति साक्षादुक्तमस्तीति । तथैवोक्तम् । उपाधेर्लक्षणान्तरमनूद्य दूषयति ।

**नापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं साधना-वच्छिन्नसाध्यव्यापकोपाध्यव्यापनात्। शब्दोऽभिधेयः प्रमेयत्वात् इत्यत्र अश्रावणत्व-स्योपाधित्वापत्तेश्च शब्दधर्मगुणत्वावच्छिन्नाभिधेयत्वं यत्र रूपादौ तत्र अश्रावणत्वं व्यापकं पक्षे प्रमेयत्वस्य साधनस्याव्यापकं हि तत् । आर्द्रेन्धनवत्त्वादौ उपाधौ पक्ष-नियततादृशधर्माभावाच्च। अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकः उपाधिः तेन ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्यापकं भावत्वमुपाधिः श्यामत्वे शाकपाकजत्वमुपाधिरिति । तन्न । पक्षधर्मावच्छिन्न-साध्यव्यापकोपाध्यव्यापनात् जलं प्रमेयं रसवत्त्वात् इत्यत्र रसवत्त्वावच्छिन्नसाध्य-व्यापकपृथिवीत्वस्योपाधित्वप्रसङ्गात् सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्न-साध्यव्यापकव्यभिचारित्वे साधनावच्छिन्नेत्यस्य व्यर्थत्वप्रसङ्गात् च ।**

**नापीति**। पक्षधर्मावच्छिन्नं यत् साध्यं तस्य व्यापकत्वे सति साधनस्याव्यापक उपाधिः। यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र पक्षधर्मो वायुधर्मो बहिर्द्रव्यत्वम्, तदवच्छिन्नं यत् प्रत्यक्षत्वं तस्य व्यापकमुद्भूतरूपवत्त्वमिति स उपाधिः। एवं धूमवान् वह्नेः इत्यत्रापि पर्वतमहानसान्यतरत्वरूपपक्षधर्मावच्छिन्नधूमव्यापकार्द्रेन्धनमुपाधिः। एवमन्यत्रापि पक्षधर्मः कोऽपि कल्पनीय इति भावः। दूषयति - **साधनावच्छिन्नेति**। साधनावच्छिन्नं यत् साध्यं तस्य व्यापकमुद्भूतरूपवत्त्वम्, यत्र बहिर्द्रव्यत्वावच्छिन्नं प्रत्यक्षत्वं तत्र उद्भूतरूपवत्त्वमिति साधनावच्छिन्नसाध्यव्यापकताऽस्ति परम् उद्भूतरूपवत्त्वस्य पक्षधर्मावच्छिन्नसाध्यव्यापकता नास्ति। पक्षधर्मो भवति आत्मत्वम् आत्मघटान्यतरत्वं वा, तदवच्छिन्नं साध्यं प्रत्यक्षत्वम्, तद्व्यापकत्वाभावात् तदवच्छिन्नसाध्यस्य आत्मन्येव सत्त्वात्, तत्र उद्भूतरूपवत्त्वाभावाद् बहिर्द्रव्यत्वस्य चापक्षधर्मत्वात्, इति साधनावच्छिन्नसाध्यव्यापकोपाधौ अव्याप्तिरित्यर्थः। दूषणान्तरमप्याह - **शब्द** इति। अत्र भवु(व)दनुमानेऽश्रावणत्वमप्युपाधिः स्यात्, पक्षधर्मावच्छिन्नसाध्यव्यापकत्वात्। तथाहि पक्षधर्मो भवति गुणत्वम्, तदवच्छिन्नं यत् साध्यमभिधेयत्वं तद्व्यापकत्वात् रूपादौ अश्रावणत्वस्य। अथ च साधनाव्यापकत्वात्। साधनं प्रमेयत्वम्, तदस्ति शब्दे अश्रावणत्वं तु नास्तीति साधनाव्यापको भवतीत्यतिव्याप्तिः। दूषणान्तरमप्याह - **आर्द्रेन्धनवत्त्वादाविति**। धूमवान् वह्नेः इत्यत्र [9B] आर्द्रेन्धनादौ उपाधौ अव्याप्तिः यथा पक्षधर्मावच्छिन्नसाध्यव्यापकत्वाभावात्। तत्र तस्योपाधेः शुद्धसाध्यव्यापकाते(? कत्वे) व्याप्तिः।

**अथ टीका। साधनावच्छिन्नेतीति। प्रागभावेति**। प्रागभावो विनाशी जन्यत्वात् इत्यत्र भावत्वमुपाधिर्भवति। तन्न व्याप्तिः, यथा पक्षधर्मो भवति प्रागभावत्वं प्रागभावघटान्यतरत्वं वा, [तद]वच्छिन्नं साध्यं विनाशित्वम्, तद्व्यापकत्वं भावत्वस्य नास्ति। यतः प्रागभावघटान्यतरत्वावच्छिन्नसाध्यस्य प्रागभावे सत्त्वात् तत्र च भावत्वाभावात् इति भावः। **अन्ये तु** इति। एवं फक्किकां योजयन्ति - इदं यत् पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति इत्युपाधिलक्षणमुक्तं तत् उपाधिमात्रस्य लक्षणनिर्वचनं न भवति, किन्तु येन रूपेण ज्ञात उपाधिः हेतोः दोषो भवति तद्रूपस्य निर्वचनमिदं पक्षधर्मावच्छिन्नत्वादिरूपमेव वक्तव्यम्। तत्र चायं दोषः। तथा च पक्षधर्मावच्छिन्नसाध्यव्यापकत्वेनैव ज्ञातस्योपाधेः दूषकता नास्ति, यतः पक्षधर्मावच्छिन्नसाध्यव्यापकत्वेन ज्ञातस्यापि साधनावच्छिन्नसाध्यव्यापकत्वेन ज्ञातस्य शुद्धसाध्यव्यापकत्वे सति साधनाव्यापकत्वेन ज्ञातस्यार्द्रेन्धनादेरपि हेतुदोषत्वात् इति कृत्वा पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति इत्यादिकं येन रूपेण उपाधिर्ज्ञातः तद्रूपं न भवति इत्येतन्निर्वस(च)नेऽर्थान्तरमेवेति टीकार्थः। **शब्दोऽभिधेय** इति टीका। न तु शब्दधर्मगुणत्वावच्छिन्नसाध्यव्यापकत्वम् अश्रावणत्वस्य, गुणत्वावच्छिन्नाभिधेयत्वस्य शब्दे एव सत्त्वात् तत्र चाश्रावणत्वाभावान्न साध्यव्यापकत्वमित्यत आह - **एतच्चेति**। अश्रावणत्वोपाधौ अतिव्याप्तिरूपं दूषणं पक्षातिरिक्ते साध्यव्यापकतामादायेति मतमाश्रित्य ज्ञेयम्। तथा चाश्रावणत्वस्यापि शब्दातिरिक्ते रूपादौ गुणत्वावच्छिन्नाभिधेयत्वव्यापकत्वात् तत्रातिव्याप्तिरिति भावः। **आर्द्रेति** टीका। यद्यपि आर्द्रेन्धनवत्त्वोपाधावपि

पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमस्त्येव । कथम् ? पक्षधर्मो भवति द्रव्यत्वम्, तदवच्छिन्नं साध्यं धूमस्तद्व्यापकमस्त्येव । **अन्यथेति** । यदि द्रव्यत्वरूपं पक्षधर्ममादाय तदवच्छिन्नसाध्यव्यापकता नोच्यते तदा सिद्धान्तेऽप्यगतेः । अयमर्थः पर्यवसितः साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधेरग्रे सिद्धान्ते लक्षणं कर्तव्यमस्ति । तत्र पर्यवसितत्वं नाम पक्षधर्मताबललभ्यत्वम् । पक्षधर्मस्तु वाच्य एव । स चार्द्रेन्धनादौ द्रव्यत्वादिरेव । तथा च [1]तमादाय इदमपि लक्षणमार्द्रेन्धनादावपि गच्छत्येव । **तथापीति** टीका । येन रूपेण उपाधिर्ज्ञातो दोषः तद्रूपस्य निर्वचनमिदम्, तथा च पक्षधर्मावच्छिन्नसाध्यव्यापकत्वं येन रूपेणोपाधिर्दोषस्तद्रूपं न भवति । यतः पक्षधर्मावच्छिन्नसाध्यव्यापकत्वेनाज्ञातस्य शुद्धसाध्यव्यापकत्वेनैव ज्ञातस्यार्थंध(द्रेन्ध)नादेः धूमवान् वह्नेः इत्यादौ दोषत्वादेतद्रूपस्य निर्वचनेऽर्थं विरमेतेत्यर्थः । **यद्येति** टीका । यद्यप्यार्द्रेन्धनादावप्युपाधौ द्रव्यत्वादिरूपः पक्षधर्मोऽवच्छेदको भवति तथाप्यवच्छेदको यो धर्मः स साध्यनिष्ठा या व्याप्यता 'साध्यं व्याप्यमुपाधिर्व्यापकः' इत्याकारिका तस्या अवच्छेदकोऽपेक्षितः । धूमवान् वह्नेः इत्यत्र तु आर्द्रेन्धनस्य धूमे व्याप्यताऽस्ति । तस्या अवच्छेदकं द्रव्यत्वं न भवति गौरवात्, किन्तु व्याप्यतावच्छेदकं धूमत्वमेव लाघवात् । **गौरवादिति** [10A] उपलक्षणम् । अतिप्रसक्तत्वादित्यपि द्रष्टव्यम् । द्रव्यत्वं तु साध्यनिष्ठां व्याप्यतां विहाय गगनादावपि वृत्तेरिति द्रव्यत्वं व्याप्यतावच्छेदकं न भवतीति अर्थः । केषाञ्चिन्मतं दूषयितुमुपक्रम्यति । साधनावच्छिन्नं यत् साध्यं तस्य व्यापकत्वे सति साधनस्याव्यापक उपाधिरिति । यथा ध्वंसो विनाशी जन्यत्वात् इत्यत्र भावत्वमुपाधिः । यतः साधनं जन्यत्वम्, तदवच्छिन्नं यत् साध्यं विनाशित्वं तस्य व्यापकं भवति [भावत्वम्] । अथ च साधनं भवति जन्यत्वं तद्व्यापकं न भवति । जन्यत्वमस्ति ध्वंसे तत्र भावत्वं नास्ति । इति भावत्वमुपाधिः । यथा वा मित्रातनयः श्यामो मित्रातनयत्वात् इत्यत्र साधनं मित्रातनयत्वम्, तदवच्छिन्नं यत् साध्यं श्यामत्वं तस्य व्यापकं भवति शाकपाकजत्वम् । अथ च साधनं मित्रातनयत्वं तस्याव्यापकं भवति गौरवर्णमित्रातनये व्यभिचारात् । [इति शाकपाकजत्वमुपाधिः] ।

**पक्षधर्मावच्छिन्नेति** मूलम् । पक्षधर्मावच्छिन्नं यत् साध्यं तस्य व्यापको य उपाधिस्तत्राव्याप्तिः । कथम् ? तथाहि - वायुः प्रत्यक्षः वायुत्वात् प्रमेयत्वात् वा इत्यत्र व्यभिचारिणि उद्भूतरूपवत्त्वमुपाधिः भवति । स पक्षधर्मो बहिर्द्रव्यत्वम्, तदवच्छिन्नं यत् साध्यं प्रत्यक्षत्वं तस्य व्यापको भवति । यत्र यत्र बहिर्द्रव्यत्वावच्छिन्नं प्रत्यक्षत्वं तत्र तत्रोद्भूतरूपवत्त्वं यथा घटे । अत्रोपाधेः साधनावच्छिन्नसाध्यव्यापकता नास्ति । साधनं वायुत्वम्, तदवच्छिन्नं प्रत्यक्षत्वमेवासिद्धमिति उद्भूतरूपवत्त्वोपाधौ अव्याप्तिरित्यर्थः । **जलमिति** मूलम् । जलं प्रमेयं रसवत्त्वात् इत्यत्र सद्धेतोः पृथिवीत्वस्यापि उपाधित्वं स्यात्, यतः साधनं रसवत्त्वं तदवच्छिन्नं यत् साध्यं प्रमेयत्वं तद्व्यापकत्वमस्ति पृथिवीत्वस्य, यथा यत्र यत्र रसवत्त्वावच्छिन्नं प्रमेयत्वं तत्र तत्र पृथिवीत्वमित्यस्ति इत्यर्थः । ननु कथमस्योपाधे

---

१. द्रव्यत्वादि ॥ प्रतौ टिप्पणी ।

रसवत्त्वावच्छिन्नसाध्यव्यापकता, रसवत्त्वावच्छिन्नसाध्यस्य जल एव भावात्, इत्यत आह - **इदमपी**ति टीका। जलं प्रमेयं रसवत्त्वात् इत्यत्र पृथिवीत्वस्योपाधित्वापादनरूपं पक्षातिरिक्ते साध्यव्यापकताऽभिप्रायेण, तथा च पृथिवीत्वस्योपाधेरपि जलपक्षे रूपपक्षे भिन्ने रसवत्त्वावच्छिन्नप्रमेयव्यापकत्वात् तत्रातिव्याप्तिरिति सुखं(स्थं) दूषणम्। ननु तथापि कथमतिप्रसङ्गापादनम्?, पृथिवीत्वस्योपाधेः वस्तुगत्या साध्यव्यापकता नास्ति। वस्तुगत्या रसवत्त्वावच्छिन्नं प्रमेयत्वं जल एव वर्तते, तत्र पृथिवीत्वं नास्तीत्यत आह - **परमार्थतस्त्वि**ति। वस्तुगत्या पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधौ वायुः प्रत्यक्षः प्रमेयत्वात् इत्यत्रोद्भूतरूपवत्त्वे **चार्वा[को]**क्तप्रकारेणाव्याप्तिरेव द्रष्टव्या। तत्र साधनावच्छिन्नसाध्यव्यापकत्वाभावादित्यर्थः। जलं प्रमेयं रसवत्त्वात् इदं दूषणं वस्तुगत्या न लगति, साधनावच्छिन्नसाध्यव्यापकत्वाभावादितीह भावः।

दूषणान्तरमाह - **सोपाधित्वादि**ति मूलम्। अयं हेतुरसाधकः सोपाधित्वादित्यनुमानमुपाधिदायकेन वादिना कर्तव्यम्। तत्र सोपाधिकत्वादित्यस्य हेतोरयमर्थः - साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वादिति। तत्र च व्यर्थविशेषणता, यतः साध्यव्यापकव्यभिचारित्वादित्यस्यैव हेतुः(तोः) साधुत्वं यतो यो हेतुः साध्यव्यापकव्यभिचारी सोऽवश्यं साध्यासाधकः इत्येतावन्मात्रेणैव चरितार्थत्वम्। साधनावच्छिन्नेति साध्यविशेषणं व्यर्थम्, प्रयोजनाभावात्, इति मूलार्थः।

**नन्वि**ति [10B] टीका। साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वादित्यत्र व्यर्थविशेषणता न सम्भवति, यतो व्यभिचारित्वं नाम साध्याभाववृत्तित्वं तच्च भावगर्भत्वम्। तथा च साध्यव्यापकव्यभिचारित्वं हेतुर्भिन्नः साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वं च हेतुर्भिन्नः। ततः साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वरूपहेतुनिष्ठा व्याप्तिः साधनावच्छिन्नेति विशेषणं विना ग्रहीतुं न शक्यते। अतः साधनावच्छिन्नेति विशेषणमपि सार्थकम्। अन्यथा यदि उक्तप्रकारेण वैयर्थ्यं वे(ते)नोच्यते तदा केवलं साध्यव्यापकव्यभिचारित्वादिति हेतुपक्षेऽपि व्यापकपदं व्यर्थं स्यात्, यतः साध्यव्यभिचारित्वादित्यस्यैव हेतोः सा(स)म्य[क्]त्वात्। यतः यत् साध्यस्य व्यभिचारि तत् साध्यासाधकमिति व्याप्तिसत्त्वात्। तस्मात् येन साध्यव्यापकव्यभिचारित्वमिति हेतुः कर्तव्यः तेनापि अखण्डाभावतया वैयर्थ्यं निरसनीयम्। तथाहि साध्यव्यभिचारित्वं भिन्नम्, साध्यव्यापकव्यभिचारित्वं च भिन्नम्। कथम्? साध्यव्यभिचारित्वेन हेतुना ह्रदत्वादेरपि सङ्ग्रह आयाति, यथा यत्र यत्र ह्रदत्वं तत्र धूमव्यभिचारित्वं वर्तते इति। अथ च साध्यव्यापकव्यभिचारित्वेन ह्रदत्वादेः सङ्ग्रहो न भवति। यत्र ह्रदत्वं तत्र साध्यव्यापकद्रव्यत्वप्रमेयत्वादिकं तिष्ठत्येव। तथा द्वयं भिन्नम्। साध्यव्यभिचारित्वं साध्यव्यापकव्यभिचारित्वं च भिन्नम् इति कृत्वा साध्यव्यापकव्यभिचारित्वरूपहेतुनिष्ठा व्याप्तिर्व्यापकपदं विना ग्रहीतुं न शक्यते इति व्यापकपदं सार्थकं वाच्यम्। एवं मयाऽपि साध्यव्यापकव्यभिचारित्वरूपो हेतुर्भिन्नः अथ च साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वरूपो हेतुर्भिन्नः। तथा च साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वरूपहेतुनिष्ठा

व्याप्तिः साधनावच्छिन्नेति विशेषणं विना ग्रहीतुं न शक्यते इति साधनावच्छिन्नेति विशेषणं सार्थकम् । **अखण्डाभावतये**ति टीका । 'अखण्डाभाव'शब्देन प्रकृतसाधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वं साध्यव्यापकव्यभिचारित्वापेक्षया भिन्नमित्यर्थः। अखण्डाभावेऽभिन्नाभावे इत्यर्थः। तथा च साध्यव्यापकव्यभिचारित्वमित्यस्य साध्यव्यापकाभाववद्वृत्तित्वमित्यर्थः । साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वमित्यस्य साधनावच्छिन्नसाध्यव्यापकाभाववद्वृत्तित्वादि(त्तित्वमि)त्यर्थः। तत्र च साध्यव्यापकाभावो भिन्नः साधना[वच्छिन्न]साध्यव्यापकाभावो भिन्न इत्यखण्डाभावतयेत्यर्थः । स्पष्टं तथा च न वैयर्थ्यम् इत्यर्थः स्पष्टो दर्शितः ।

**किञ्च पक्षद्वयेऽपि विशिष्टसाध्यव्यभिचारं विशिष्टसाध्यव्यतिरेकं वा प्रसाध्य पश्चात् केवलसाध्यव्यभिचारः केवलसाध्यव्यतिरेको वा साधनीयस्तथा चार्थान्तरं केवलसाध्ये हि विवादो न तु विशिष्टे। अथ प्रकृतसाध्यव्यभिचारसिद्ध्यर्थं विशिष्टसाध्यव्यभिचारः साध्य इति चेत् । न । अप्राप्तकालत्वात् । प्रथमं साध्यव्यभिचार एवोद्भाव्यस्तत्रासिद्धावुपाधिरिति चेत्, तर्हि प्रकृतानुमाने नोपाधिर्दूषणं स्यात्। किञ्च साध्यव्यभिचारहेतुत्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकव्यभिचार एवोपन्यसनीयो नोपाधिः ।**

**किञ्चे**ति मूलम् । पक्षद्वयेऽपि साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमित्येकः पक्षः । द्वितीयस्तु पक्षधर्मेत्यादिकः। अत्र पक्षद्वयेऽपि दूषणम्। यथा प्रथमं साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वेन किं साधनीयम् ? विशिष्टसाध्यव्यभिचारित्वं साधनीयम्, यथा साधनं साधनावच्छिन्नसाध्यव्यभिचारि । साधनावच्छिन्नसाध्यव्यापकोपाधिव्य(र्व्य)भिचारीति पूर्वं साधनीयं पश्चात् केवलसाध्यव्यभिचारः साधनीयः, यथा हेतुः साध्यव्यभिचारी साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वादिति शुद्धसाध्यव्यभिचारः साधनीयः। विशिष्टसाध्यव्यतिरेको यथा इदं साधनवदधिकरणं साधनावच्छिन्नसाध्याभाववत् साधनावच्छिन्नसाध्यव्यापकोपाध्यभाववत्त्वात्। इदं पूर्वं साधनीयं पश्चात् शुद्धसाध्याभावः पूर्ववत् साधनीयः। तथा च एवं च साधनेऽर्थान्तरं स्यात्। प्रकृतानुपयुक्तमर्थमर्थान्तरं यतः केवलसाध्ये विवादोऽस्ति। [11A] तत्र केवलेन हेतुना साध्यं साधनीयम्। प्रतिवादिना चोपाधिदात्रा साध्याभावः साधनीयः इति। विशिष्टसाध्याभावसाधनं तु व्यर्थमेव। यदि विशिष्टसाध्ये विवादः स्यात् तदा विशिष्टसाध्याभावसाधनमुपयुक्तं स्यात् इत्यर्थान्तरं स्पष्टमित्यर्थः ।

**परम्परये**ति टीका । पूर्वं विशिष्टसाध्यव्यभिचारः, तस्य सिद्ध्यर्थम् । प्रथमतो विशिष्टसाध्यव्यभिचारः साधनीयः, न चार्थान्तरमिति वाच्यम् । शुद्धसाध्यव्यभिचारस्य शुद्धसाध्यव्यभिचारहेतुभूतो यो विशिष्टसाध्यव्यभिचारः तस्य सिद्ध्यर्थम्। **अथेतीति प्रकृतेति**। प्रकृतं साध्यं शुद्धसाध्यम्, तद्व्यभिचारो विशिष्टसाध्यव्यभिचारित्वेन हेतुना भवतीति नार्थान्तरमित्याशङ्कार्थः । **तदानीमि**ति टीका । प्रथमतो विशिष्ट-

साध्यव्यापकव्यभिचारित्वेन विशिष्टसाध्यव्यभिचारसाधनकाले विशिष्टसाध्यव्यभिचार आकाङ्क्षितो नास्ति, किन्तु शुद्धसाध्यव्यभिचार एवाऽऽकाङ्क्षितः। अप्रधानकालतालक्षणं वा काङ्क्षिताभिधानम्। न तेन शुद्ध-[साध्य]व्यभिचार एव साध्य इत्यर्थः। शङ्कते **प्रथममिति**। प्रथमं मया विशिष्टसाध्यव्यभिचारो न साधनीयः, किन्तु शुद्धसाध्यव्यभिचार एव विशिष्टसाध्यव्यभिचारेण साधनीयः, विशिष्टसाध्यव्यभिचारस्य परेणासिद्धौ उद्भावितायां यथा विशिष्टसाध्यव्यभिचारोऽसिद्धः प्रमाणाभावात् इत्यसिद्धौ उद्भावितायाम् उपाधिरुद्भाव्यः। तथा च सोपाधिकत्वेन हेतुना विशिष्टसाध्यव्यभिचारस्य सिद्धिरिति प्रथमं साध्यव्यभिचारस्यैवोद्भावितत्वात् नार्थान्तरमिति भावः।

**तत्रेति** मूलम्। शुद्धसाध्यव्यभिचारस्य लिङ्गीभूतो यो विशिष्टसाध्यव्यभिचारस्तस्यासिद्धौ परेणोद्भाविताया-मित्यर्थः। यथाऽयं हेतुः साध्यव्यभिचारी पक्षधर्मावच्छिन्नसाध्यव्यभिचारित्वात्। अत्र परेणोक्तम् - पक्षधर्मावच्छिन्न-साध्यव्यभिचारोऽसिद्धः प्रमाणाभावात् इत्यसिद्ध्युद्भावितायां विशिष्टसाध्यव्यभिचारसिद्ध्यर्थम् उपाधिवादिना उपाधिरुद्भाव्यः तेन नार्थान्तरमित्याशङ्कार्थः। **तर्हीति** मूलम्। यदि प्रथमं शुद्धसाध्यव्यभिचार एव साधनीय उद्भा-वनीय इति यावत्। तस्य लिङ्गीभूतो यो विशिष्टसाध्यव्यभिचारः तस्यासिद्धौ परेणोद्भावितायामुपाधिरुद्भावनीयः, तदा प्रकृतानुमाने उपाधिर्दूषणं न स्यात्। धूमवान् वह्नेरित्यत्रोपाधिरार्द्रेन्धनं दूषणं न स्यात्। तदाऽत्रानुमानेऽस्योपा-धितया दूषणता स्यात् यदि साक्षादनेन स्वव्यभिचारद्वारा शुद्धसाध्यव्यभिचारः साधनीयः, स तु न साध्यते किन्तु विशिष्टसाध्यव्यभिचार एव, इति धूमवान् वह्नेः इत्यादौ उपाधेर्दूषकता न स्यात् साक्षात् शुद्धसाध्य-व्यभिचारोन्नायकत(?ता)या अभावादित्यर्थः।

**नन्विति** टीका। त्वयोक्तम् - यः साक्षात् शुद्धसाध्यव्यभिचारोन्नायकोपाधिः स एव दूषणम्, परं परम्परया विशिष्टसाध्यव्यभिचारोन्नायको य उपाधिः स दूषणं न भवति। तत्रोच्यते - साक्षात्त्वं त्यज्यतां गौरवात्, किन्तु यथाकथञ्चिदेव शुद्धसाध्यव्यभिचारोन्नायक एव दूषणमिति। तथा च परम्परया शुद्धसाध्यव्यभिचारोन्नायकस्यापि दूषक(ण)त्वं स्यादित्याशङ्कार्थः।

**किञ्चेति** मूलम्। त्वयोक्तम् - प्रथमं साध्यव्यभिचार एवोद्भावनीयः। तस्य लिङ्गीभूतो यो विशिष्ट-साध्यव्यभिचारस्तस्यासिद्धौ परेणोद्भावितायामुपाधिः किमर्थमुद्भाव्यते ? किन्तु पक्षधर्मावच्छिन्नसाध्य-व्यापकव्यभिचार एवोपन्यस्यताम्, [11B] किमर्थमुपाधिरुपन्यस्यते ? यतः उपाधिरुपन्यस्तो विशिष्टसाध्य-व्यभिचारसिद्ध्यर्थेनोचितः कथमुपाधिः ? विशिष्टसाध्यव्यभिचारेण सह व्यधिकरणत्वम्, व्यधिकरणश्च हेतुर्न भवति तथा च वह्न्यादिहेतोः पक्षधर्मावच्छिन्नसाध्यव्यभिचारी पक्षधर्मावच्छिन्नसाध्यव्यापकार्द्रेन्धन-व्यभिचारित्वात्। अयं हेतुः समानाधिकरणो भवति, यतो हेतोर्वह्नित्वादौ पक्षधर्मावच्छिन्नसाध्यव्यभिचारोऽपि

वर्तते अथ च पक्षधर्मावच्छिन्नसाध्यव्यापकार्द्रेन्धनव्यभिचारोऽपि वर्तते इति कृत्वा पक्षधर्मावच्छिन्नसाध्य-व्यापकव्यभिचारस्यैवोद्भावनं कर्तव्यं न उपाधेः, व्यभिचारेण सह व्यधिकरणत्वात्।

**तदव्याप्यतया वे**ति टीका। उपाधेः विशिष्टसाध्यव्यभिचारो व्याप्यत्वेनेत्यर्थः। कथम्? यत्र यत्रोपाधिस्तत्र तत्र विशिष्टसाध्यव्यभिचारो व्याप्यत्वेनेत्यर्थः। यत्र यत्रोपाधिस्तत्र विशिष्टसाध्यव्यभिचार इति नास्ति। कथम्? यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र उद्भूतरूपवत्त्वम् उपाधिर्भवति। स उपाधिर्वर्तते घटे। तत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यभिचारो नास्तीत्युपाधि(धेः) विशिष्टसाध्यव्यभिचाराव्याप्यता। तथा च विशिष्टसाध्यव्यभिचारस्य व्याप्यो यो विशिष्टसाध्यव्यापकव्यभिचारः स एवोद्भावनीयः, परमुपाधि-नो(धेर्नो)द्भावनमित्यर्थः।

**स्यादेतत् पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः। पर्यवसितं साध्यं पक्षधर्मताबललभ्यं यथा शब्दः अनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवान् मेयत्वात् इत्यत्र पर्यवसितं यत् साध्यम् अनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः। यदि च तथैव कृतकत्वमपि शब्दे साध्यते तदा अनित्यत्वमुपाधिः। तदुक्तम् - ''वाद्युक्तसाध्य-नियमच्युतोऽपि कथकैरुपाधिरुद्भाव्यः पर्यवसितं नियमयन् दूषकताबीजसाम्राज्यात्'' इति।**

**पर्यवसिते**ति मूलम्। पर्यवसितं यत् साध्यं तस्य व्यापकत्वे सति साधनस्याव्यापक उपाधिः। पर्यवसितमित्यस्यार्थमाह-**पर्यवसितेऽपी**ति। **पक्ष[धर्म]**तेति मूलम्। तथा च पक्षधर्मताबललभ्यं यत् साध्यं तस्य व्यापकत्वे साधनाव्यापक उपाधिरित्यर्थः। उदाहरति - **यथे**ति मूलम्। शब्दः पक्षः। अनित्यत्वातिरिक्ता ये शब्दधर्माः गुणत्वशब्दत्वसत्तादयः तदतिरिक्तो यो धर्मः तद्वान् इति साध्यम्। प्रमेयत्वादिति हेतुः। अत्रानित्यत्वाति-रिक्तो यो धर्मः गुणत्वादिः, तदतिरिक्तो धर्मो भवति घटत्वम् अनित्यत्वं च, तत्र घटत्वं शब्दे बाधादेव न सिध्यति। अर्थात् अनित्यत्वमेव सिध्यतीति। अनित्यत्वं पक्षधर्मताबललभ्यम्, तस्य व्यापकं भवति कृतकत्वं यत्रानित्यत्वं तत्र [कृतकत्वम्], कृतकत्वमुपाधिः। **यदि चे**ति मूलम्। यदि कृतकत्वमपि शब्दे तथैव साधनीयम् यथा शब्दः कृतकत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवान् प्रमेयत्वात् इत्याकारेण साध्यते, तदा अनित्यत्वमुपाधिः स्यात्। अत्र पक्षधर्मताबललभ्यं साध्यं कृतकत्वम्, तस्य व्यापकं भवति अनित्यत्वं यत्र कृतकत्वं तत्रानित्यत्वम्, अथ च साधनं प्रमेयत्वं तस्याव्यापकं यथा यत्र यत्र प्रमेयत्वं तत्र तत्र अनित्यत्वमिति नास्ति आकाशे व्यभिचारादित्यर्थः।

**तथा चे**ति टीका। बाधानुन्नीतः पक्षेतरः पर्वतेतरत्वादिः तत्र अव्याप्तिर्न भवति। पर्यवसितपदाभावे यथाश्रुते तत्रातिव्याप्तिः भवति, पर्यवसितपदे न भवतीति। पर्यवसितं साध्यं पक्षधर्मताबलात् पर्वतीयो वह्निः, तद्व्यापकं

पर्वतेतरत्वं न भवति। पर्वतीयवह्निः पर्वते तत्र वर्तते [पर्वते]तरत्वं नास्तीत्यर्थः। **यद्यपीति** टीका। यत्रोपाधिस्तत्र व्यभिचारः इति व्यभिचार उपाधेर्व्यापको भवति। प्रकृते च शब्दोऽनित्यः इति। यदि प्रकृतानुमाने व्यभिचारो नास्ति कथं यत्र यत्र प्रमेयत्वं तत्रानित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवत्त्वं विद्यते ?, यथा प्रमेयत्वं घटेऽस्ति तत्रापि अनित्यतारिक्तपक्षधर्मातिरिक्तधर्मो भवति घटत्वम्, [12A] तद्वर्तत एव व्यभिचारः इति। तथा चोपाधि-व्यापको भवति, पर्यवसितपदे न भवतीति। पर्यवसितं साध्यं पक्षधर्मताबलात्, व्यभिचारः उपाधिव्यापकीभूतः, व्यभिचारनिवृत्तौ उपाधेरपि निवृत्तिः [व्याप्यनिवृत्तिः] व्यापकनिवृत्ताविति न्यायात्। तथा च व्यभिचाराभावे कथमत्रानुमाने उपाधिरित्याशङ्कार्थः। मध्ये शङ्कते - **न चेति** टीका। प्रकृते व्यभिचारोऽपि वर्तते। कथम् ? यद्यपि अनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवत्त्वेन सह व्यभिचारो नास्ति घटत्वपटत्वादिकमादाय सर्वत्र प्रमेय-त्वाधिक[र]णे साध्यसत्त्वात् तथापि प्रकृतानुमाने पक्षधर्मताबललभ्यं यत् साध्यं तद्व्यभिचारमादाय सोपाधिकत्व-मुपपाद्यते तदा धूमस्यापि सोपाधि[क]त्वापत्तिः। पक्षधर्मताबललभ्यं साध्यं पर्वतीयवह्निः, तेन समं धूमस्यापि व्यभिचारो वर्तते, यथा यत्र यत्र धूमस्तत्र पर्वतीयवह्निरिति व्याप्तिर्नास्ति महानसादौ पर्वतीयवह्नेरभावात् इति कृत्वा धूमस्यापि पर्यवसितसाध्येन सह व्यभिचारसत्त्वात् सोपाधि[क]त्वं स्यादित्यर्थः। **तथापीति**। सत्प्रतिपक्षे विरोधमात्रं तत्र प्रयोजकम्। तथा चानेन कृतकत्वरूपोपाधिना व्यभिचारानुमानं पूर्वोक्तयुक्त्या कर्तुं यद्यपि न शक्यते तथापि स्वव्यतिरेकद्वारा उपाधिव्यतिरेकद्वारा सत्प्रतिपक्षोन्नयनं कर्तुं शक्यते, यथा शब्दो नानित्यः अकृतकत्वात् [इत्यत्र] उपाधिर्वर्तते कृतकत्वं तदभावेन साध्याभावसाधनं कर्तुं शक्यते, एव इति कृत्वा कृतकत्वसत्प्रतिपक्षोत्थापकतया प्रकृतानुमाने दूषणत्वं परं व्यभिचाराभावात् व्यभिचारोन्नायकतया न दूषणत्वमिति **रत्नकोशकार**मततात्पर्यम्। शङ्कते **न चेति**। कृतकत्वसोपाधेः स्वव्यतिरेकद्वारा कथं सत्प्रतिपक्षोत्थापकतया दूषकत्वम् ?, यतः शब्दो नानित्यः कृतकत्वाभावात् इत्येव हि सत्प्रतिपक्षोत्थापनम्। तत्र च शब्दे कृतकत्वा-[भावा]दिति हेतुः स्वरूपासिद्धः शब्दस्य कृतकत्वादित्याशङ्कार्थः। **शब्देति**। सत्प्रतिपक्षोत्थापनं तु उपाधिदात्रा कर्तव्यम्। प्रकृते चोपाधिदाता शब्दनित्यतावादी **मीमांसकः** एव। तन्मते अकृतकत्वादिति न स्वरूपासिद्धः। तन्मते शब्दस्य नित्यत्वेनाकृतकत्वात् इत्यर्थः। **अत एवेति**। यत एव **मीमांसक**मते शब्दोऽकृतकः अत एव **मीमांसकं** प्रति शब्देऽकृतकत्वसाधनं **यदि चे**त्यनेन ग्रन्थेन अग्रे निकटे आशङ्क्य निषिध्यते। अन्यथा यदि तन्मते शब्दः कृतकः तदा तं प्रति शब्दे कृतकत्वसाधनमनवसरदुःस्थं स्यादित्यर्थः। **यदि चेती**ति टीका। यदि चेति स्फुटं व्याख्यानम्। मूलव्याख्याने प्राचां संमतिमाह - **तदुक्त**मिति मूलम्। **वाद्युक्तेति**। वादिनोक्तं यत् साध्यमनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवत्त्वं तन्नियमच्युतोऽपि तेन नियमच्युतोऽपि तस्याव्यापकोऽपीत्येव। तथाहि - यत्रानित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवत्त्वं तत्र कृतकत्वमिति नास्ति, गगने व्यभिचारात्। गगने अनित्यत्वातिरिक्तेत्यादिधर्मः शब्द ए(इ)व तद्वत्त्वं वर्तते एव परं तत्र कृतकत्वं नास्तीति वाद्युक्तसाध्याव्यापकोऽप्यु-

पाधिरुद्भावनीयः यतो यद्यपि वाद्युक्तसाध्याव्यापको भवति तथापि पक्षधर्मताबललभ्यं यत् साध्यमनित्यत्वं तस्य व्यापकः कृतकत्वरूप उपाधिर्भवत्येव। तत्र हेतुमाह - **दूष[क]तेति** मूलम्। [12B] दूषकताबीजं यत् सत्प्रतिपक्षोत्थापकत्व[म्]। तेषामेव मते यत्रोपाधिस्तत्रावश्यं व्यभिचार इति उपाधेरवश्यं व्यभिचारव्याप्यता। येषां च मते सत्प्रतिपक्षोत्थापकतया दूषकत्वं तेषां मते व्यभिचारव्याप्यता नास्ति, यथा यत्रोपाधिस्तत्रावश्यं व्यभिचार इति नियमो नास्ति। तथा च शब्दोऽनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवानिति अनुमाने व्यभिचारासत्त्वे नोपाधिसत्त्वं विरुद्धमिति भावः। **अन्यथापीति** टीका। सत्प्रतिपक्षोत्थापकतापक्षेऽपीत्यर्थः। **रत्नकोशकार**मते शङ्कते - **नन्विति**। पर्वतो वह्निमान् धूमात् इत्यत्र सदनुमानेऽपि पाषाणवत्त्वमुपाधिः स्यात्। तस्यापि पर्यवसितं साध्यम्। पर्वतीयो वह्निः पक्षधर्मताबलात् पर्वतीय एव वह्निः सिध्यति। यत्र धूमस्तत्र न पाषाणवत्त्वमित्यपि साधनाव्यापकत्वं महानसे व्यभिचारादस्तीति। मध्ये शङ्कते - **न चेति**। तत्रानुमाने पाषाणवत्त्वमुपाधिर्भवतु। न च सदनुमाने कथमुपाधिरिति वाच्यम्, यथा शब्दोऽनित्यत्वातिरिक्तेत्यत(क्तेत्यादि) सदनुमानेऽपि कृतकत्वमुपाधिः स्यादेव। यथा शब्दोऽनित्यत्वेत्यादि सदनुमाने प्रमेयत्वं हेतुः, तस्याव्यभिचरितस्यापि यथा कृतकत्वलक्षणोपाधिमत्त्वम्, तथा सद्धेतोरपि धूमस्य पाषाणवत्त्वमुपाधिः स्यादित्याशङ्कार्थः। **पक्षवृत्तित्वेनेति** टीका। प्रमेयत्वहेतौ कृतकत्वोपाधेरस्य पाषाणवत्त्वस्य च महान् विशेषः। यथा कृतकत्वमुपाधिः पक्षे शब्दे नास्ति इति कृत्वा कृतकत्वमुपाधिः स्वव्यतिरेकेण सत्प्रतिपक्षोत्थापनक्षमो भवति। पाषाणवत्त्वं च पर्वतेऽपि वर्तते इति न तस्य व्यतिरेकद्वारा सत्प्रतिपक्षोत्थापकत्वं यतः पाषाणवत्त्वस्य पर्वते अभावो नास्तीति। तेन कथं न पर्वतो वह्निमान् पाषाणवत्त्वाभावादित्येवं सत्प्रतिपक्षोत्थापनं कर्तव्यमिति। सत्प्रतिपक्षानुत्थापके पाषाणवत्त्वेऽतिव्याप्तिरिति। **रत्नकोशकार**मते दोषे सत्येव दूषणान्तरमाहेत्याभासार्थः। **एवं हीति** टीका।

**अनेन पक्षधर्मसाधनावच्छिन्नसाध्यव्यापकोपाधिः संगृह्यते तादृशसाध्यस्य पर्यवसितत्वादिति। तत्र। एवं हि द्व्यणुकस्य सावयवत्वे सिद्धे द्व्यणुकमनित्यद्रव्यासमवेतं जन्यमहत्त्वानधिकरणद्रव्यत्वात् इत्यत्र निःस्पर्शद्रव्यसमवेतत्वमुपाधिः स्यात्, भवति हि नित्यद्रव्यसमवेतत्वं पर्यवसितं साध्यं तस्य व्यापकं साधनाव्यापकं च। किञ्च पक्षधर्मताबललभ्यसाध्यसिद्धौ निष्फल उपाधिः तदसिद्धौ च कस्य व्यापकः, न हि सोपाधौ पक्षधर्मताबलात् साध्यं सिध्यति यस्य व्यापक उपाधिः स्यादिति।**

**अनेनेति** मूलम्। पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकमित्युपाधिलक्षणेन पक्षधर्मावच्छिन्नसाध्यव्यापकः अथ च साधनावच्छिन्नसाध्यव्यापकः अनयोरप्युपाधौ सङ्ग्रहः, तयोरपि पक्षधर्मताबललभ्यसाध्यव्यापकत्वात्। **तादृशसाध्यस्येति** मूलम्। पक्षधर्मतावच्छिन्नसाध्यस्य साधनावच्छिन्नसाध्यस्येत्यर्थः। तथा च

तत्र स्थले द्वयेऽपि पर्यवसितं साध्यं पक्षधर्मावच्छिन्नं साध्यमथ च साधनावच्छिन्नं साध्यं तद्व्यापकत्वात् द्वयोरपि उपाधित्वमिति **रत्नकोशकार**मते पर्यवसितः अर्थः । एतन्मतं दूषयति - **तन्नेति** । **एवं हीति** मूलम् । द्व्यणुकं सावयवं जन्यमहत्त्वानधिकरणद्रव्यत्वात् इत्यनेनानुमानेन द्व्यणुकस्य सावयवत्वे सिद्धे तद् द्व्यणुकं पक्षः अनित्यद्रव्यासमवेतं जन्यमहत्त्वान्य(न)धिकरणद्रव्यत्वात् आकाशवत् । अत्रानुमाने निःस्पर्शद्रव्यसमवेतत्वमुपाधिः स्यात् पर्यवसितसाध्यव्यापकत्वात् । तथाहि - पर्यवसितं साध्यं नित्यद्रव्यसमवेतत्वम्, तद्व्यापकत्वं निःस्पर्शद्रव्यसमवेतत्वस्य वर्तते यत्र यत्र नित्यद्रव्यसमवेतत्वं तत्र तत्र निःस्पर्शद्रव्यसमवेतत्वं यथा शब्दे इत्येवं साध्यव्यापकता, साधनाव्यापकता यथा साधनं जन्यमहत्त्वान्य(न)धिकरणद्रव्यत्वं तद्व्यापकता निःस्पर्शद्रव्यसमवेतत्वस्य नास्ति, जन्यमहत्त्वानधिकरणद्रव्यत्वं वर्तते गगने निःस्पर्शद्रव्यसमवेतत्वं नास्ति इति साधनाव्यापकताऽप्यस्तीत्यर्थः ।

**असमवेतत्वेऽपीति** टीका । [13A] द्व्यणुकस्य सावयवत्वे सिद्धे इति यदि नोच्यते तदा नित्यद्रव्यासमवेतं चेत् तदाऽसमवेतमेवाऽऽयास्यति [इति] कृत्वा असमवेतपर्यवसानवारणाय सावयवत्वे इति उक्तम् । तथा च द्व्यणुकं सावयवं भवति । अथ चानित्यद्रव्यासमवेतं तदा पर्यवसितं नित्यद्रव्यसमवेतमेवेति तद्व्यापकत्वमस्त्येवोपाधेरित्यर्थः । **जन्येतीति** टीका । जन्यपदकृत्यमाह - **अत्रेति** । यदि हेतौ जन्यपदं न दीयते तदा महत्त्वान्य(न)धिकरणद्रव्यत्वादित्येव हेतुः पर्यवसितः । तथा च व्याप्तिग्रहस्थलमेव नास्ति यतो महत्त्वानधिकरणद्रव्यत्वं नास्ति । कुतः ? तदभावात् । ननु परमाणुष्वि(ष्वे)व महत्त्वा[?न]धिकरणद्रव्यत्वं वर्तते इत्यत आह - **परमा[णोः] एव [अ]सिद्धीति** टीका । तथा च परमाणुरेवासिद्धः । कुत्र महत्त्वा[?न]धिकरणद्रव्यत्वं प्रतीयेत येनानित्यद्रव्यासमवेतत्वरूपसाध्यस्य व्याप्तिग्रहः स्यादित्यर्थः । ननु मनसि महत्त्वानधिकरणद्रव्यत्वं वर्तते अनित्यद्रव्यासमवेतत्वमपि वर्तते, तत्रैव व्याप्तिग्रहो भविष्यति इति किं जन्यपदेनेत्यत आह - **मनस इति** । तथा च मनसोऽणुत्वासिद्धिदशायां मनोवैभववादिमते मनसि महत्त्वं गगनवत् समागतमेव । तेन मनोऽपि न महत्त्वानधिकरणद्रव्यं येन तत्रानित्यद्रव्यासमवेतत्वस्य महत्त्वानधिकरणद्रव्यत्वेन व्याप्तिग्रहः स्यात् । तथा च जन्यपदे दत्ते महत्त्वानधिकरणद्रव्यत्वस्य गगनादौ प्रसिद्धत्वात् तत्रैव व्याप्तिग्रहः । यद्यपि गगनादौ महत्त्वं वर्तते तथापि तद् महत्त्वं न जन्यं तथा च जन्यत्वरूपविशेषणाभावकृतजन्यत्वविशिष्टमहत्त्वाभावस्य सत्त्वात् तत्र व्याप्तिग्रहः सुकर एवेति भावः । **वस्तुत** इति । जन्यमहत्त्वत्वं च जातिरेव सामान्यतो महत्त्वत्वव्याप्यं यथा परममहत्त्वत्वं महत्त्वत्वस्य व्याप्यं तथा च न जन्यपदविशेषणं येन वैयर्थ्यं स्यात् । परमाणुसिद्धिदशायामपि मनसोऽणुत्वसिद्धिदशायामपि जन्यमहत्त्वत्वस्य जातित्वानङ्गीकारेऽपि न क्षतिरित्याह - **अखण्डाभाव** इति टीका । व्यतिरेकव्याप्तौ यथा यत्रानित्यद्रव्यासमवेतत्वाभावः तत्र जन्यमहत्त्वानधिकरणद्रव्यत्वाभावो घटवत् तत्र च जन्यमहत्त्वानधिकरणद्रव्यत्वाभावो व्यापकः, न हि व्यापके व्यर्थविशेषणं दूषणावहं न वा वैयर्थ्यमपि । तथाहि - महत्त्वानधिकरण-

द्रव्यत्वाभावात् जन्यमहत्त्वानधिकरणद्रव्यत्वाभावोऽभिन्न एवाखण्डः। न हि तत्राभावे जन्यत्वं विशेषणं यस्य वैयर्थ्यमाशङ्क्येत। एकधर्मिणि व्याप्यत्वावच्छेदकधर्माक्रान्ते व्याप्यतावच्छेदकधर्मेतरघटित[त्व]मेव वैयर्थ्यबीजं यथा नीलधूमत्वमेकस्मिन् धर्मिणि धूमे धूमत्वरूपव्याप्यतावच्छेदकाक्रान्ते नीलधूमत्वरूपव्याप्यतावच्छेदकाक्रान्ततत्सामानाधिकरण्येन घटितत्वं वैयर्थ्यबीजम्। धूमप्रागभावत्वादौ तु धूमत्वादिव्याप्यतावच्छेदकान्तरघटितत्वेऽपि धूमत्वेन सह धूमप्रागभावत्वस्य सामानाधिकरण्यविरहात् धूमत्वं यदि धूमप्रागभावे वर्तेत तदा सामानाधिकरण्यं स्यात् तथा च तत्र सामानाधिकरण्यविरहात् न वैयर्थ्यम्। वैयर्थ्यं हि सामानाधिकरण्यव्याप्यतावच्छेदकान्तरघटितत्वम्। तथा च जन्यमहत्त्वानधिकरणत्वविशिष्टद्रव्यत्वाभावत्वस्य न समानाधिकरणव्याप्यतावच्छेदकान्तरघटितत्वमिति भावः। यो महत्त्वानधिकरणद्रव्यत्वाभावः स तु भिन्न एव। न हि तेन घटिते जन्यमहत्त्वानाधिकरणद्रव्यत्वाभावः। तस्य [13B] अखण्डाभावत्वादिति भावः। ननु वह्निमान् नीलधूमात् इत्यत्रापि नीलधूमत्वं व्याप्यतावच्छेदकं भवत्येव, तदेव व्याप्यतावच्छेदकं यद्धर्मावच्छेदेन व्याप्तिर्गृह्यते, तदेव व्याप्यतावच्छेदकं नीलधूमत्वावच्छेदेन व्याप्तिग्रहे न किञ्चित् बाधकम्। तद्बाधकं तु व्यभिचारादिकं तत्र तत्र वर्तत एव। **नीलधूमादिति** प्रयोगे तु पुरुषस्तु अधिकेन निगृह्यते, तदप्यन्वयव्याप्तावेव न तु व्यतिरेकव्याप्तौ। नीलधूमाभावस्याखण्डाभावतया न वैयर्थ्यमिति पुरुषदोष एव न तु वस्तुदोषः। तथा च प्रकृतेऽपि जन्यमहत्त्वानाधिकरणद्रव्यत्वं व्याप्यतावच्छेदकमेव। व्यभिचारावारकविशेषणस्यापि व्याप्तिग्रहो(हौ)पयिकत्वाच्च सार्थकत्वमिति भावः। अन्यथा अयमभिधेयः प्रमेयत्वात्, प्रमेयत्वमित्यत्र प्रमाविषयत्वमित्यत्र विषयत्वादित्येवास्तु किं पभापदेन इत्यपि वक्तुं सुकरत्वात् तथा च न अभिधेयत्वप्रमेयत्वयोरपि व्याप्तिग्रहः स्यात्। **अन्य** इति अस्वरसोद्भावनम्, तद्बीजं तु उपाध्युद्भावनपरार्थतया। वस्तुदोषविरहेऽपि पुरुषदोषस्य अधिकत्वरूपस्य तत्र वर्तमानत्वात् तस्य त्वनुद्धार एवेति। **अपर** इति अस्वरसबीजम्। यथा जन्यमहत्त्वत्वस्य जातित्वे जन्यमात्रवृत्तित्वे च जन्यमात्रवृत्तित्वजातेर्जन्यतावच्छेदकत्वनियमेन जन्यमहत्त्वत्वस्य जनकतावच्छेदकं मृग्यम्। तत्तु न सम्भवति। न हि बहुत्वं जनकतावच्छेदकम्, द्व्यवयवारब्धे महद्घटे व्यभिचारात्। तत्रावयवगतमहत्त्वमेव जन्यमहत्त्वम्। न च अवयवमहत्त्वमेव जनकतावच्छेदमस्तु, त्रसरेणौ व्यभिचारात्। अन्यथा तद्धर्मावच्छिन्नस्य आकस्मिकतापत्तेः(त्तिः) अन्वे[ति]। टीका **द्रव्यपदमिति**। यत्र यत्र अनित्यद्रव्यासमवेतत्वं तत्र तत्र निःस्पर्शसमवेतत्वमित्येवास्तु किं द्रव्यपदेनेत्याह-**समव्याप्तीति**। यन्मते समव्याप्त एव उपाधिः तन्मतमवलम्ब्य द्रव्यपदं दत्तम्। द्रव्यपदाऽदाने तु समव्याप्तत्वं नास्ति, यत्र निःस्पर्शसमवेतत्वं सत्तादौ तत्र नानित्यद्रव्य(व्या)समवेतत्वम् अनित्ये घटादौ सत्तायाः समवायादिति न समव्याप्तिः। द्रव्यपदे दत्ते तु यत्र[1] निःस्पर्शद्रव्यसमवेतत्वं तत्रा[नित्यद्रव्य]समवेतत्वम्, परमाणौ स्पर्शस्य विद्यमानत्वान्न तत्र निःस्पर्श[द्रव्यत्व]म् अत एव न द्व्यणुके निःस्पर्शद्रव्यसमवेतत्वमिति भावः। तथा च

१. शब्दादौ। इति प्रतौ टिप्पणी।

पर्यवसितसाध्यव्यापकत्वं नास्ति। तथाहि पर्यवसितं च साध्यं पक्षधर्मताबललभ्यं साध्यम्, पक्षधर्मताबललभ्यं च साध्यं द्व्यणुकवृत्ति, यत् साध्यं न हि तस्याव्यापकं निःस्पर्शद्रव्यसमवेतत्वं तत्रैव व्यभिचारादिति भावः। **न अतिव्याप्तिरिति** टीका। अनिःस्पर्शद्रव्यासमवेतत्वे इति भावः। तथा च द्व्यणुकं सावयवं निःस्पर्शद्रव्यसमवेतत्वे जन्यमहत्त्वानधिकरणद्रव्यत्वात् घटवत् इत्यत्रोपन्यस्ते निःस्पर्शद्रव्यसमवेतत्वरूपोपाधौ नातिव्याप्तिरिति भावः। तदुपाधेः पक्षधर्मताबललभ्यद्व्यणुकवृत्तिसाध्यस्याव्यापकत्वादित्यर्थः। इति पूर्वपक्षग्रन्थः। ग्रं. १३५०॥

। अथोपाधिवादसिद्धान्तः।

**अत्रोच्यते यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिः, लक्षणं तु पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वम्, यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं पर्यवसितं साध्यम्, स च धर्मः क्वचित् साधनमेव, क्वचित् द्रव्यत्वादि, क्वचित् महानसत्वादि, तथाहि समव्याप्तस्य विषमव्याप्तस्य वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभिचारः स्फुट एव व्यापकव्यभिचारिणः तद्व्याप्य-व्यभिचारनियमात्, साधनावच्छिन्न-पक्षधर्मावच्छिन्नसाध्यव्यापकयोः व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव, यथा ध्वंसस्यानित्यत्वे साध्ये भावस्य, वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च, विशेषणाव्यभिचारिणि साधने विशिष्ट-व्यभिचारस्य विशेष्यव्यभिचारित्वनियमात्।**

। अथ सिद्धान्तः।

**कर्तव्येति** टीका। करणीयं यद् उपाधिलक्षणम्। लक्षणं तु पर्यवसितेत्यादिना। तस्य लक्ष्यतावच्छेद[क]माह --- [14A] **सङ्ग्राह्यं लक्ष्यतावच्छेदकम्**। ननु अनुमित्यादिलक्षणे लक्ष्यतावच्छेदकानिरूपणेऽपि यथा लक्षणं कृतं तथा प्रकृतेऽपि उपाधिलक्षणं क्रियताम् किं लक्ष्यतावच्छेदकनिरूपणेनेति चेत् तत्रायमाशयः। लक्षणं त्विद[मि]त्यादिना पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वमिति लक्षणं निरूपितम्, तस्य च लक्षणस्य यन्मते सत्प्रतिपक्षोत्थापकतया उपाधेर्दूषकत्वं तन्मते साधनाव्यापकपदं व्यर्थमेव, ह्रदो वह्निमान् धूमात् इत्यत्र वह्निसामग्रीरूपोपाधौ सत्प्रतिपक्षोन्नायकतया तन्मते लक्ष्यत्वेनाभिमते अव्याप्तिश्च स्यात्, तथा च लक्षणं त्वित्यादिग्रन्थोऽपि न सङ्गच्छते। तस्मात् व्यभिचारोन्नायक एव लक्ष्यत्वेनाभिमत इति मन्वानः सत्प्रतिपक्षोत्थापकतया दूषकोपाधिमलक्ष्यत्वेन परिहरन् लक्ष्यतावच्छेदकं प्रकृते निरूपयतीति भावः। **यद्व्यभिचारित्वेनेति** टीका। ननु यद्व्यभिचारित्वेनेति मूले तृतीयायाः को वाऽर्थः? यदि करणे तृतीया तदा धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनव्यभिचारित्वं न धूमव्यभिचारित्वे कारणम्। धूमव्यभिचारित्वं हि धूमाभाववद्वृत्तित्वम्। तत्र च वृत्तित्वे

स्वरूपसम्बन्धविशेषे धूमाभाववत्संयोगित्वे वा धर्मे आर्द्रेन्धनाभाववत्संयोगित्वस्य आर्द्रेन्धनव्यभिचारित्वस्य न कारणत्वम्। न हि व्यापकव्यभिचारो व्याप्यव्यभिचारे कारणं येन करणे तृतीया स्यात्। किन्तु ज्ञापके एव तृतीया। ज्ञापकं तु ज्ञानजनकत्वम्। तथा च यद्व्यभिचारेण यद्व्यभिचारज्ञानेनेति। यद्व्यभिचारपदं यद्व्यभिचारज्ञानपरम्। तथा च यद्व्यभिचारज्ञानं यद्व्यभिचारप्रमापकमिति मूलस्य भावं प्रकाशयन् लक्षणे प्रमीयते इति पदं पूरयन् आह - **लिङ्गेनेति**। लिङ्गज्ञानविधया ज्ञापकत्वम्, स्वनिष्ठा व्याप्तिः, पक्षधर्मताविषयकज्ञानेन प्रमापकेनेत्यर्थः। प्रमीयते इति प्रमापदम्। वह्निमान् धूमात् इत्यत्र भ्रमेण व्यज(ञ्ज)नवत्त्वव्यभिचारेण यत्र धूमे वह्निव्यभिचारित्वस्य भ्रमानुमितिर्जाता तत्रातिव्याप्तिवारणाय प्रमापदम्। यद्व्यभिचारित्वेन लिङ्गेनेत्यत्रापि इत्थं प्रमापदं देयमेव, अन्यथा धूमवान् वह्नेः इत्यत्र वह्निसामग्रीव्यभिचारित्वेन लिङ्गेन भ्रमेण वह्नेर्धूमव्यभिचारित्वे प्रमापिते वह्निसामग्र्यामतिव्याप्तिः तद्वारणाय प्रमेति पदमिति भावः।

**साधनस्येति** साधनपदं प्रकृतसाधनार्थकम्। अन्यथा वह्निमान् धूमात् इत्यत्र वह्निसामग्रीव्यभिचारित्वलिङ्गस्य **प्रमेयत्वे द्रव्यत्वादौ वा वह्निव्यभिचारोन्नायकत्वेन** तत्रातिव्याप्तिः स्यात् तदनुरोधेन तद्वारणाय साधनस्येति। तच्च **यद्यपि प्रमेयत्वादौ वह्निव्यभिचारोन्नायकं** तथापि न लिङ्गस्य धूमात्मनो वह्निव्यभिचारोन्नायकमिति न तत्रातिव्याप्तिरिति। **साध्येति** प्रकृतसाध्यमित्यर्थः। अन्यथा वह्निमान् धूमात् इत्यत्र व्यञ्जनवत्त्वव्यभिचारित्वस्य व्याप्यीभूतवह्निव्यभिचारित्वोन्नायकत्वस्य प्रकृतलिङ्गे धूमेऽपि सम्भवात् तत्रातिव्याप्तिवारणाय साध्यपदं प्रकृतसाध्यपरम्, तथा च यद्यपि व्यञ्जनवत्त्वव्यभिचारित्वस्य स्वव्याप्यीभूतवह्निविशेषव्यभिचारोन्नायकत्वं तथापि न प्रकृतसाध्यव्यभिचारोन्नायक[त्व]मिति व्याप्तिः।

**तत्राकाशेत्यादि**। अयमाकाशवान् द्रव्यत्वात् इत्यत्र घटः उपाधिः स्यात्, उपाधित्वेन लक्ष्यः स्यात्। तथा च लक्षणं त्वित्यादिना कृतं लक्षणं तत्र न [14B] गच्छतीति अव्याप्तिः स्यादिति भावः। लक्ष्यतावच्छेदकं तु तत्र गच्छत्येव। यथा द्रव्यत्वं गगनव्यभिचारि गगनात्यन्ताभाववृत्ति घटव्यभिचारित्वात्। यत्र यत्र घटव्यभिचारित्वं तत्र गगनव्यभिचारित्वं पटत्ववत् वृत्तिमत्सु यावत्स्वेव गगनव्यभिचारित्वस्य वर्तमानत्वात् इत्याशङ्कार्थः। ननु घटव्यभिचारित्वस्य व्यर्थविशेषणत्वेन गगनव्यभिचारित्वोन्नायकमित्याह - **घटव्यभिचारित्वं हीति**। घटव्यभिचारित्वपदार्थं विवृणोति - **घटात्यन्ताभावेति**। घटात्यन्ताभावः घटानधिकरणघटत्वावच्छिन्नघटात्यन्ताभाववद्वृत्तित्वं वक्तव्यम्, अन्यथा कपालत्वेऽपि घटविशेषाभाववद्वृत्तित्वात् इत्यत्र हेतौ वृत्तित्वात् इत्यस्यैव सार्थकत्वे अधिकं व्यर्थं गगनव्यभिचारित्वस्य वृत्तिमन्मात्रवृत्तित्वात्। वृत्तित्वस्यैव घटव्यभिचारित्वघटकीभूतस्य सार्थकत्वे शेषवैयर्थ्यादिति भावः। ननु व्यभिचारवारकविशेषणमपि व्याप्तिग्रहो(हौ)पयिकतया सार्थकमेव। **यन्निष्ठेत्यादिना** सिद्धान्तितत्वात् सार्थकत्वस्य। तथा च घटव्यभिचारित्वस्य वैयर्थ्येऽपि गगनव्यभिचारोन्नायकत्वस्य विद्यमानत्वात् अतिव्याप्तिः स्यात्। यद्वा व्यर्थविशेषणत्वमन्वयव्याप्तावेव, न व्यतिरेकव्याप्ताविति। तथा

चान्वयविधयाऽगमकत्वेऽपि घटव्यभिचारित्वस्य व्यतिरेकविधयैव गमकत्वमस्तु। तथा च तत्रातिव्याप्तिरितिदृढैवेत्यत आह-**साध्यसामानाधिकरण्ये**ति । यद्व्यभिचारित्वेनेत्यत्र यत्पदार्थः साध्यसा(स)मानाधिकरणत्वेन विशेषणीयः। तथा च घटः न साध्यसमानाधिकरणो न गगनसमानाधिकरण इति न घटेऽतिव्याप्तिः गगनस्याधिकरणविरहात्। न साध्यसामानाधिकरण्यं साध्यव्यभिचारित्वमुन्नीयते इत्यत्र साध्यपदं वा वृत्तिमत्पदमित्यर्थः। तथा च न घटेऽतिव्याप्तिः गगनस्यावृत्तिमत्त्वात्। ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र उद्भूतरूपोपाधौ अव्याप्तिः। न हि उद्भूतरूपवत्त्वव्यभिचारित्वं शुद्धं प्रत्यक्षत्वव्यभिचारोन्नायकम्, रूपादावेव व्यभिचारात् । तथाहि रूपे रूपत्वस्योद्भूतरूपव्यभिचारित्वात् प्रत्यक्षव्यभिचारित्वशून्यत्वाच्च न तयोः प्रत्यक्षव्यभिचारित्वोद्भूतरूपव्यभिचारित्वयोर्व्याप्तिः येन उद्भूतरूपव्यभिचारित्वं प्रत्यक्षत्वव्यभिचारोन्नायकं स्यात् इत्यत आह - **साधनपक्षधर्मे**ति। **अये(ग्रे) स्फुटमि**ति किञ्चिद्विशेषणदानेनेत्यर्थः । यथा प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि बहिर्द्रव्यवति उद्भूतरूपव्यभिचारित्वात् यथा गगनम्। रूपत्वं तु न बहिर्द्रव्यवत् इति न तत्र व्यभिचारः। तथा च इत्थं उद्भूतरूपव्यभिचारित्वस्यापि प्रत्यक्षत्वरूपसाध्यव्यभिचारोन्नायकत्वं सम्भवत्येव । एवं स श्यामो मित्रातनयत्वात् इत्यत्र शाकपाकजत्वमुपाधिः। तत्र यद्यपि शाकपाकजव्यभिचारित्वस्य काकत्वादौ श्यामत्वव्यभिचारित्वं तथापि किञ्चिद्विशेषणदानेन साध्यव्यभिचारोन्नायकत्वं सम्भवत्येव। यथा मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्ववति शाकपाकजत्वव्यभिचारित्वात् । इत्थं व्यभिचारोन्नयनसमर्थे साधनपक्षधर्मावच्छिन्नयोः उपाध्योः नातिव्याप्तिरिति भावः। तथा च तत्र लक्ष्यतावच्छेदकसत्त्वात् लक्षणं त्वित्यादिना कृतलक्षणस्य गमनेऽपि नातिव्याप्तिरिति भावः। ननु प्रमीयते इत्यत्र प्रमा विशेषणं वा उपलक्षणं वा ? आद्ये यत्र साध्यव्यभिचारानुमितिर्न [15A] जाता तत्राव्याप्तिः। उपलक्षणत्वे उपलक्ष्यतावच्छेदकधर्मविरहात् नोपलक्षणत्वं वक्तुं शक्यम्, न ह्युपलक्षणतावच्छेदकधर्म(र्मा)संभवे उपलक्षणं सम्भवति। तथा च व्याप्तिरेव स्यात्। तथा च प्रमायोग्यता वाच्या। सा च व्याप्ति(प्तिः) पक्षधर्मता [च]। तथा च प्रमापदं [न] तद्वतितत्प्रकारत्वपरं किन्त्वनुमितिसामान्यपरम्, तद्वतितत्प्रकारत्वस्य विवक्षणे प्रयोजनविरहात्। त(न) हि भ्रमेण तदुन्नायके व्यञ्जनवत्त्वादौ अतिव्याप्तिवारणाय। तव(त्र) भ्रमेणोन्नायकत्वसम्भवेऽपि व्याप्तिपक्षधर्मताविरहात् न तत्र योग्यतेति नातिव्याप्तिः। यद्व्यभिचारित्वेनेत्यस्य चायमर्थो वक्तव्यः। यद्व्यभिचारित्वं यत्सा(स)मानाधिकरणीभूतयत्किञ्चिद्व्यक्त्यधिकरणवृत्तित्वं साध्यव्यभिचारित्वव्याप्यसाधनवृत्तित्वं च तत्र साधने उपाधिः। योग्यता व्याप्तिः पक्षधर्मता च। उन्नायकत्वम् उन्नयनयोग्यता । सा च व्याप्तिः पक्षधर्मता [च] । **साधनवृत्ती**त्यनेन पक्षधर्मता दर्शित(ता), साध्यव्यभिचारित्वसाधने साधनस्यैव पक्षत्वात् । यथा धूमवान् वह्नेः इत्यत्र वह्निर्धूमव्यभिचारी आर्द्रेन्धनव्यभिचारित्वात् इत्यत्र वह्नेः पक्षत्वम्। **यदभावाधिकरणे**त्यादिकं तु साधनावच्छिन्नपक्षधर्मतावच्छिन्नसाध्यमात्रव्यापकस्य शुद्धसाध्याव्यापकस्योद्भूतरूपस्य व्यभिचारित्वं यद्यपि न साध्यव्यभिचारित्वव्याप्यं तथापि न

*तत्राव्याप्तिः । यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र उद्भूतरूपे उपाधौ उद्भूतरूपाभावाधिकरणी-*भूतयत्किञ्चिद्द्रव्यक्त्यधिकरणे वायौ यद्वृत्तित्वसामान्यं वायुवृत्तित्वसामान्यं साध्यव्यभिचारित्वस्य प्रत्यक्ष-व्यभिचारित्वस्य व्याप्यं भवत्येवेति न तत्रातिव्याप्तिः । सामान्यपदं तु वह्निमान् धूमात् इत्यत्र व्यञ्जनवत्त्वे अतिव्याप्तिवारणाय । तथाहि व्यञ्जनवत्त्वाभावाधिकरणीभूतयत्किञ्चिदधिकरणं पर्वतादिः तद्वृत्तित्वं सत्तादौ वर्तते । तत्र च साध्यव्यभिचारित्वस्य च व्याप्यत्वेऽपि अतिव्याप्तिसम्भवात् । न पर्वतवृत्तित्वसामान्यं साध्य-व्यभिचारित्वव्याप्यमिति न तत्रातिव्याप्तिः । पर्वतवृत्तित्वसामान्यमध्यप्रविष्टस्य धूमनिष्ठवृत्तित्वस्य साध्य-व्यभिचारित्वव्याप्यविरहात् न तत्र उन्नयनयोग्यतेति भावः ।

एवं लक्ष्यतावच्छेदकमुक्त्वा लक्षणमाह - **लक्षणं त्विति** मूलम् । **पर्यवसितेति** । पर्यवसितपदं साधना-वच्छिन्नपक्षधर्मावच्छिन्नोदासीनधर्मावच्छिन्नशुद्धसाध्यानां सङ्ग्रहाय । अन्यथा एकतरोपादाने अन्यतरस्मिन् व्याप्तिः । लक्षणे पर्यवसितपदार्थं निरूपयति - **यद्धर्मेति** । पर्यवसितं च साध्यं यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तद्धर्मावच्छिन्नसाध्यव्यापकत्वे तद्धर्मावच्छिन्नसाधनाव्यापकत्वम्, न तु पक्षधर्मताबललभ्यं पूर्वोक्तदूषणात् । तच्च द्व्यणुकं सावयवं जन्यमहत्त्वानधिकरणद्रव्यत्वात् इत्यत्र निःस्पर्शद्रव्यसमवेतत्वमुपाधिः स्यात्, तत्र च लक्षणमतिव्याप्तं तदुपाधेः पक्षधर्मताबललभ्यसाध्यव्यापकत्वादिति । **स चेति** मूलम् । स धर्मः पर्यवसितो धर्मः । **क्वचिदिति** मूलम् । शुक्लघटं पक्षीकृत्य घटः श्यामो मित्रातनयत्वात् इत्यत्र शाकपाकजत्वमुपा(त्वोपा)धौ साधनं मित्रातनयत्वमेव पर्यवसितो धर्मः । नीलान्यघटपक्षीकरणे तु शुक्लघटश्याममित्रातनयत्वान्यतरत्वधर्म-मादाय पक्षधर्मोऽपि **सम्भवतीति** [15B] नील[?न्य]घटपक्षीकरणम् । **साधनमेवेति** अत्र एवकारेण पक्षधर्मा-**वच्छिन्नस्य बिवच्छेदः(विच्छेदः)** । **क्वचिदिति** । वायुः प्रत्यक्षः **प्रमेयत्वात्** इत्यत्र महत्त्वोपाधेर्द्रव्यत्वावच्छिन्न-**साध्यव्यापकत्वात् द्रव्यत्वमेव पर्यवसितो धर्मः । क्वचिदिति** मूलम् । पर्वतो महानसीयवह्निमान् धूमात् इत्यत्र **व्यञ्जनवत्त्वोपाधौ महानसत्वं पर्यवसितो धर्मः**, महानसत्वावच्छिन्नसाध्यव्यापकं व्यञ्जन[वत्]त्वम्, तद्धर्मा-**वच्छिन्नं साधनमयोगोलकीयवह्निरूपं** तस्याव्यापकमिति ।

**नन्विति** टीका । साध्यप्रसिद्ध्यवच्छेदकस्य, साध्यप्रसिद्धिः साध्यज्ञानम्, तस्यावच्छेदकं यद्धर्मिता-वच्छेदकम्, यथा मित्रातनये श्यामत्वम् इत्यत्र मित्रातनयत्वं धर्मितावच्छेदकम् । तथा च यद्धर्मावच्छेदेनेति अत्र यावद्धर्मावच्छेदेन साध्यं प्रसिद्धं तावद्धर्मावच्छिन्नसाध्यव्यापकत्वं वा यत्किञ्चिद्धर्मावच्छेदेन साध्यं प्रसिद्धं तद्धर्मावच्छिन्नसाध्यव्यापकत्वं वेति विकल्पद्वयम् । **तत्र नाद्य** इति । आद्यं यावद्धर्मितं दूषयति - **वायुरिति** । वायुः प्रत्यक्षः इत्यत्र प्रत्यक्षत्वं साध्यम्, तस्यावच्छेदका यावन्तो धर्माः द्रव्यत्वरूपत्वरसत्वादयः तावद्धर्मावच्छिन्नस्य प्रत्यक्षत्वस्य साध्यस्य न व्यापकमुद्भूतरूपत्वम्, रूपादौ व्यभिचारात् । तथा च वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्रापि उद्भूतरूपत्वमुपाधिर्न स्यात्, तावद्धर्मावच्छिन्नसाध्यस्याव्यापकत्वादुद्भूतरूपत्वोपाधेः । **तस्येति** टीका ।

प्रत्यक्षात्मकसाध्यस्य यत् ज्ञानं प्रमेयं प्रत्यक्षमित्याकारं तत्र धर्मितावच्छेदकं प्रमेयत्वम्, तदवच्छिन्नसाध्यस्य प्रमेयत्वावच्छिन्नप्रत्यक्षस्य उद्भूतरूपोपाधेः अव्याप्यत्वात् अत एवोपाधेरव्यापकत्वम्, तथा च पर्यवसितसाध्या-व्यापकत्वात् न तत्र लक्षणसमन्वय इत्यव्याप्तिः। **नान्त्य** इति। अन्त्यः यत्किञ्चिद्धर्मगर्भितः। वह्निमान् धूमात् इत्यत्र धूमेऽपि साधने सद्धेतो(तौ) व्यञ्जनवत्त्वस्य उपाधितापत्तिः। यत्किञ्चिद्धर्मो महानसत्त्वम्, महानसं वह्निमत् इत्या-कारकज्ञाने महानसत्वस्य धर्मितावच्छेदकतया तदवच्छिन्नसाध्यस्य महानसत्वावच्छिन्नवह्नेरपि पर्यवसित-साध्यत्वात् तस्य च व्यञ्जनवत्त्वं व्यापकम्, धूमस्य साधनस्याव्यापकत्वाच्च तत्र लक्षणसमन्वये अतिव्याप्तिः। अत्र अतिव्याप्त्युद्धाराय केचित् **यज्ञपत्युपाध्यायाः** यत्किञ्चिद्धर्म एवेति, एवकारा[त्] पूर्वकल्पपरित्यागः। पूर्व-कल्पस्य यावद्धर्मावच्छिन्नसाध्यस्य व्यापकस्तु शुद्धसाध्यव्यापक उपाधिरेव। तथा च [साधनावच्छिन्न]-पक्षधर्मावच्छिन्नोदासीनधर्मावच्छिन्नसाध्यव्यापकोपाधिषु उद्भूतरूपादिषु अव्याप्तिरेव। न वा यावत्त्वविवक्षणे फलमपि किञ्चिदस्ति। लाघवात् साध्यव्यापकत्वे सति साधनाव्यापकमेव लक्षणं वक्तुमुचितम्, अव्याप्तिस्तु उभयथाऽपीति, भवन्मते तु गौरवं परमवशिष्यते इति मन्वान एवकारेण सर्वकल्पं परिहरन् अयं यत्किञ्चिदि-[त्यादिकल्पः स्वीकरोति]। यत्किञ्चिद्धर्मः किंविशिष्टः ? साधनव्यापकीभूतः। तथा च साधनव्यापकीभूतो यो धर्मः साध्यप्रसिद(सिद्धोऽ)वच्छेदक(कः) साध्यप्रसिद्धो धर्मितावच्छेदकः। एवम्भूतो यः पर्यवसितो यत्किञ्चिद्धर्मः तदवच्छिन्नसाध्यव्यापकत्वे सति इति सत्यन्तार्थः। अस्मिन्नर्थे अग्रिमग्रन्थस्वरसमाह - **विशेषणाव्यभिचारिणी**ति टीका। विशेषणं साधनव्यापकीभूतो [16A] धर्मः। साधनव्यापकीभूतोऽथ बहिर्द्रव्यत्वादिः तदवच्छिन्नसाध्यस्य व्यापकम् उद्भूतरूपमुपाधिः। तद्व्यभिचारेण उद्भूतरूपव्यभिचारेण साधने उद्भूतस्पर्शे विशिष्टस्य साधन-व्यापकीभूतबहिर्द्रव्यत्वविशिष्टस्य प्रत्यक्षत्वरूपसाध्यस्य व्यभिचारः सिध्यति। तत्र च विशेषणस्य बहिर्द्रव्यत्वस्य न व्यभिचारः, तस्य साधनव्यापकत्वात्। किन्तु विशेष्यस्य साध्यस्य प्रत्यक्षत्वस्य व्यभिचारः। तथा च शुद्ध-साध्यव्यभिचारः सुतरां सिद्ध्यतीति अग्रिमग्रन्थोपष्टम्भः स्वमते दर्शितः। तथैव साधनव्यापकीभूतधर्मावच्छिन्न-साध्यव्यापकत्वे सति इत्याकारेणैव लाभात्। अन्यथा साधनाव्यापकधर्मावच्छिन्नसाध्यव्यभिचारसिद्धावपि न शुद्धसाध्यव्यभिचारः सिद्ध्यति। कदाचित् साधनाव्यापकीभूतो यो धर्मः तद्व्यभिचारमादायैव विशिष्टव्यभिचारः सिद्ध्यतु न विशेष्यसाध्यव्यभिचारमादाय। इत्थं लक्षणकरणे तु विशेषणस्य पर्यवसितधर्मस्य व्यभिचारः, तस्य साधनव्यापकत्वात्। पूर्वोक्तातिव्याप्तिमुद्धरति - **व्यञ्जनवत्त्वमि**ति टीका। व्यञ्जनवत्त्वं न धूमस्य व्यापकीभूतो यो धर्मः आर्द्रेन्धनादिः तदवच्छिन्नस्य धूमस्य व्यापकम्, पर्वतादावेव व्यभिचारात्। पर्वतादौ तादृशधर्मावच्छिन्नो वह्निरस्ति परं व्यञ्जनवत्त्वं नास्ति इति वह्निमान् धूमात् इत्यत्र व्यञ्जनवत्त्वे उपाधौ नातिव्याप्तिः। तस्य साधन-व्यापकीभूतधर्मावच्छिन्नसाध्याव्यापकत्वात् नोक्तदोषः नातिव्याप्तिरित्यर्थः। **नन्वि**ति। एवं साधनव्यापकीभूत-धर्मावच्छिन्नसाध्यव्यापकत्वे सति इत्यादिलक्षणकरणे। **प्रमेयत्वेने**ति। प्रमेयत्वेन हेतुना वायौ प्रत्यक्षत्वे साध्ये

बहिरिन्द्रियजन्यप्रत्यक्षत्वसाधने उद्भूतरूपं नोपाधिः स्यादिति योजना। यथा वायुः बहिरिन्द्रियजन्यप्रत्यक्षः प्रमेयत्वात् इत्यत्र द्रव्यत्वावच्छिन्नसाध्यव्यापके उद्भूतरूपोपाधौ अव्याप्तिः। बहिरिन्द्रियं मनोऽन्यदिन्द्रियं तेनात्मनि व्यभिचारो नान्यथा आत्मन्यपि द्रव्यत्वावच्छिन्नप्रत्यक्षस्य सत्त्वात् उद्भूतरूपविरहाच्च न द्रव्यत्वावच्छिन्नसाध्यव्यापकमुद्भूतरूपमिति तत्र लक्षणागमनेऽपि न क्षतिः। बहिःपददाने तु द्रव्यत्वावच्छिन्नबहिरिन्द्रियप्रत्यक्षत्वस्य साध्यस्य व्यापकमुद्भूतरूपं भवत्येवेति तत्र अव्याप्तिः सङ्गच्छते। अथ च साधनं प्रमेयत्वम्, तद्व्यापकीभूतो धर्मोऽभिधेयत्वम्, तदवच्छिन्नसाध्यस्य बहिरिन्द्रियजन्यप्रत्यक्षस्य व्यापकम् तो(उ)द्भूतरूपं नास्ति, रूपादौ व्यभिचारात्। यत्तु वर्तते द्रव्यत्वं धर्मो तन्न साधनव्यापकम्। तथा च तत्राव्याप्तिरिति दृढा। केवलान्वयिसाधने दूषणमुक्त्वा व्यतिरेकिसाधने दूषणमाह - **कोकिलादी**ति। कोकिलः श्यामः मित्रापुष्टत्वात्। अत्र मित्रापुष्टत्वं साधनम्, साध्यं च श्यामत्वम्, तत्र शाकपाकजत्वमुपाधिः। तत्र अव्याप्तिः। यथा मित्रातनयत्वं यत् वर्तते तत् न साधनस्य व्यापकम्, मित्रापुष्टत्वं यत्साधनस्य व्यापकं तद्विशिष्टसाध्यस्य श्यामस्य न शाकपाकजत्वं व्यापकं मित्रापुष्टकोकिलायां व्यभिचारात्। **कोकिलासाधारणेने**त्यादिना अयमेव भावः प्रकाशितः। तथा च स कोकिलः श्यामः मित्रापुष्टत्वात् इत्यत्र मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापके [16B] शाकपाकजत्वरूपोपाधौ अव्याप्तिः, मित्रातनयत्वस्य साधनाव्यापकत्वात्। साधनव्यापकीभूतधर्मान्तरावच्छिन्नसाध्यस्य व्यापकं शाकपाकजत्वं मित्रापुष्टकोकिलायामेव व्यभिचारः उपाधिर्न स्यात्। तत्राव्याप्तिरित्यर्थः। भ्रान्तः शङ्कते - **न चे**ति। अनयोः द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकोद्भूतरूप-मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकशाकपाकजत्वयोः। **शुद्धसाध्ये**त्यादि। तथा च द्रव्यत्वादिविशिष्टसाध्यव्यभिचारस्य प्रमेयत्वादौ साधने सिद्धौ अपि न शुद्धसाध्यव्यभिचारः सिद्ध्यति, कदाचिद्विशेषणं यद् द्रव्यत्वादि तद्व्यभिचारमादाव्या(दाया)पि सिद्ध्यतु, द्रव्यत्वादेः साधनाव्यापकत्वात् तद्व्यभिचारस्यापि साधने सम्भवात्। स्वमते तु न सम्भवति, साधनव्यापकधर्मघटितत्वात्। इत्यैवं भ्रमबीजं ध्येयम्। **अनुपाधित्वमिश्रमि**त्यनेनालक्ष्यत्वं दर्शितम्। तथा च तयोर्लक्षणागमनेऽपि न क्षतिरित्याशङ्कार्थः। शुद्धसाध्यव्यभिचारित्वेनानयोर्लक्ष्यत्वं व्यवस्थापयन् पूर्वोक्ताव्याप्तिं दृढीकुर्वन्नाह - **प्रमेयत्वं ही**ति। प्रमेयत्वं साधनम्, अत्र पक्षः बहिरिन्द्रियजन्यप्रत्यक्षत्वम्, यच्छुद्धसाध्यं तद्व्यभिचारित्वं साध्यम्। तथा च प्रमेयत्वं बहिरिन्द्रियजन्यप्रत्यक्षत्वात्यन्ताभाववद्वृत्ति। हेतुमाह - **द्रव्ये** इति। द्रव्ये उद्भूतरूपव्यभिचारित्वात्। द्रव्ये इति विशेषणात् न रूपादौ व्यभिचारः। तत्र यद्यपि उद्भूतरूपव्यभिचारो वर्तते तथापि नासौ द्रव्यत्वविशिष्टः, द्रव्यत्वविशिष्टव्यभिचारस्तु वाय्वादौ। तत्र बहिरिन्द्रियजन्यप्रत्यक्षत्वव्यभिचारो वर्तते एवेति भावः। तथा च शुद्धसाध्यव्यभिचारोन्नायकत्वमुद्भूतरूपोपाधाव[?ल]क्षणमिति। तस्य लक्ष्यत्वं व्यवस्थापितम्। तत्र च लक्षण(णा)गमने अव्याप्तिरेवेति। द्वितीयस्य शुद्धसाध्यव्यभिचारोन्नायकत्वमाह - **मित्रापुष्टत्वमि**ति। मित्रापुष्टत्वं साधनम्, श्यामत्वस्य शुद्धसाध्यस्य व्यभिचारित्वं साध्यम्। हेतुमाह - **मित्रातनये** इति। मित्रातनये

**नरे** वेति विशेषणम् [अ]त्र कोकिलादौ व्यभिचारवारणाय। नरे इति विशेषणपदम्। **आयुर्वेदे** शाकपाकजन्मा नरः श्याम इत्युपदेशात् धर्मपुरस्कारेणैवात्र लिखितं नर इति। तथा च नरत्वावच्छिन्नश्यामत्वेन कार्यता शाकपाकत्वेन कारणता इति कार्यकारणभावग्रह आयुर्वेदादेवेति। तथा च शाकपाकजन्ये गौरमित्रातनये एव व्यभिचारो ध्येयः। इत्थं चापि **विशेषणवतीत्या**दिग्रन्थोऽपि सङ्गच्छते इति भावः द्रव्ये इति विशेषणात् एवं मित्रातनये नरे वेति विशेषणात् उद्घाटितः। विशेषणवति विशिष्टव्यभिचारसिद्धौ विशेष्यव्यभिचारमादायैव सिद्ध्यतीति भावः। तच्च विशषणं साधनस्य भवतु मा वा इत्यन्यदेतत्। तथा चाव्याप्तिः दृढैव। अथ घटत्ववत् सामान्यशब्दो विशेषपरः। तथा चाघटो घटभिन्नो गौरमित्रातनय इति प्राञ्चः। नव्यास्तु अघटत्वं घटभिन्नत्वं श्यामत्वव्यभिचारि मित्रातनये नरे वा शाकपाकजत्वव्यभिचारित्वात्। इत्थमपि अघटत्वे साध्यसाधनयोः सत्त्वात् दुतांत(दृष्टान्त)त्वं सम्भवत्येव, किमर्थं सामान्यशब्दो विशेषपरतयेति। तयोर्लक्ष्यत्वानङ्गीकारेणातिव्याप्तिं परिहरति - **नेति**। उक्तरीत्या पूर्वोक्तरीत्या साधनव्यापकधर्मावच्छिन्नसाध्यव्यापकव्यभिचारित्वादिति पूर्वोक्तरीत्या। तथा चेत्थं तयोर्व्यभिचारोन्नायकत्वं न सम्भवत्येवेति न तयोर्लक्ष्यत्वम्। तत्र लक्षणागमनेऽपि न क्षतिरिति भावः। तथा च [17A] अव्या[प्ति]स्तु इष्टैव, तयोरलक्ष्यत्वात्। **अविशेषितेनेति**। अविशेषितेन विशेषणान्तरावच्छिन्नेन यद्व्यभिचारित्वेन शुद्ध-साध्यव्यभिचारोन्नी(चार उन्नी)यते स एवोपाधिः। तथा च प्रकृते द्रव्येतरे इति विशेषणाभ्यां विशिष्टो-पाधिव्यभिचाराभ्यामेव साध्यव्यभिचारोन्नयनात् तयोरलक्ष्यत्वम्। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र तु अविशेषितस्यैव साधनव्यापकधर्मावच्छिन्नव्यापकव्यभिचारेणाविशेषितेनैव साध्यव्यभिचारोन्नयनसम्भवात् तस्य लक्ष्यत्वमिष्टमेवेति भावः। पक्षधर्मताबलादिति विशेषणवति विशिष्टव्यभिचारसिद्धौ विशेष्यव्यभि-चारमादायैव सिद्ध्यति विशेषणाभावविशेष्याभावयोरेव विशिष्टधीनियामकत्वादिति प्राचां मतमवलम्ब्येति। यद्वा इतरबाधसहकृता या साध्यसिद्धिः सैव पक्षधर्मताबललभ्या, यथा महानसीयादिबाधधीसहकृता पर्वतीय-वह्निसिद्धिः पक्षधर्मताबललभ्येति गीयते, तत्र च पर्वतीयवह्नित्वस्य व्यापकतानवच्छेदकत्वेऽपि पक्ष-धर्मताबलादेव पर्वतीयवह्नित्वप्रकारेणैव सिद्धिरिति प्राञ्चः। नव्यास्तु वह्नित्वप्रकारेणैव पर्वतीयवह्निसिद्धिरिति। प्राचां मते तु पर्वतीयवह्नित्वप्रकारेण परामर्शविरहा[त्] कारणबाध एवास्वरस उन्नेयः। तथा च प्रकृते साधन-व्यापकधर्मावच्छिन्नसाध्यव्यापकोपाधिव्यभिचारेण साधनवति साधनव्यापकधर्मावच्छिन्नसाध्यव्यभिचारसिद्धौ विशेषणं यत्साधनव्यापको धर्मः तद्व्यभिचारस्य बाधज्ञानसहकारेण शुद्धसाध्यव्यभिचार एव सिद्ध्यति पक्ष-धर्मताबलात्। भवन्मते तु तन्न सम्भवति, द्रव्यत्वादेः साधनाव्यापकत्वात् तद्व्यभिचारस्य साधने प्रमेयत्वादौ विद्य-मानत्वेन बाधविरहात् न तत्सहकारेण विशेष्यव्यभिचारसिद्धिरिति भावः। **न चैवमिति** टीका। एवमविशेषितेन य-द्व्यभिचारित्वेनेत्यादिविवक्षया उद्भूतरूपादेरलक्ष्यत्वे तत्र 'वायुः प्रत्यक्ष(क्षः) बहिरिन्द्रियजन्यप्रत्यक्षः प्रमेयत्वात्' 'कोकिलः श्यामो मित्रापुष्टत्वात्' इत्यनुमानद्वये व्यभिचारोऽपि इति उपाधिविरहात् व्यभिचारोऽपि न स्यादित्यन्वयः,

व्यभिचारे चावश्यमुपाधिरिति नियमात्। तस्य व्यभिचारस्य उपाधिव्याप्यत्वात्। तथा च व्यापकस्योपाधेर्विरहात् व्याप्यस्य व्यभिचारस्यापि विरहोऽस्त्वित्याशङ्कार्थः। **न हीति**। तत्रानुमानद्वये उपाधिरेव नास्ति। उपाधिसामान्याभावं ब्रूमः। ततः **साध्यस्य साध्यवत्त्वप्रकारकप्रमाविशेष्यत्वस्य** वोपाधित्वसम्भवात्। **एतयोरिति**। एतयोः उद्भूतरूपशाकपाकजत्वयोः साधनाव्यापकधर्मावच्छिन्नसाध्यव्यापकयोरितरविशेषणासहकृतसाध्यव्यभिचारोन्नायकव्यभिचाराप्रतियोगिनोः अनुपाधित्वम् उपाधिलक्ष्यतावच्छेदकशून्यत्वं ब्रूम इति योजना। तथा च तयोरलक्ष्यत्वे तत्र लक्षणागमनेऽपि न क्षतिरिति भावः। अनुमानद्वये साधनाव्यापकधर्मावच्छिन्नसाध्यव्यापकोपाधिं [17B] दर्शयति - **प्रत्यक्षसामग्र्यादेरिति**। अत्र प्रत्यक्षसामग्री उपाधिः, आदिपदात् बहिरिन्द्रियजन्यप्रत्यक्षम्, तस्य व्यापिका प्रत्यक्षसामग्री एवं साधनस्याव्यापिका, तस्याः शुद्धसाध्यव्यापकत्वात् अवच्छिन्नसाध्यव्यापकत्वं सुतरामेव। इदं पुनरिहावधेयम्। यत् साधनाव्यापकबहिरिन्द्रियजन्यप्रत्यक्षत्वं न व्याप्यतावच्छेदकम्। स्तव-(त्व)दुपदर्शितप्रत्यक्षसामग्र्याः लाघवात् बहिरिन्द्रियजन्यप्रत्यक्षत्वस्यैव व्यापकतावच्छेदकत्वात्। अभिधेयत्वादेर्व्यर्थविशेषणत्वात् नीलधूमत्वादिवदिति। तत्रापि अनुमानद्वयेऽपि तयोरेव प्रत्यक्षसामग्र्योः उपाधित्वसम्भवात्। अविशेषितस्वव्यभिचारेण साध्यव्यभिचारोन्नायकत्वादिति शेषः। तन्मतं दूषयति-**तन्नेति**। शुद्धसाध्येति शुद्धसाध्यव्यभिचारस्य बहिरिन्द्रियजन्यप्रत्यक्षत्वश्यामत्वव्यभिचारस्य यदुन्नयनमनुमानं तत्क्षमं तल्लिङ्गम्, यत्स्वव्यभिचारः तत्प्रतियोगित्वस्य उपाधेर्दूषकताबीजस्य सत्त्वेन तयोर्लक्ष्यत्वम्। अत एवानुपाधित्वमलक्ष्यत्वं वक्तुमशक्यमिति। **निरुक्तेति**। निरुक्तं यल्लक्ष्यतावच्छेदकं यद्व्यभिचारित्वेनादितेन धर्मेण तयोरुपदर्शितोपाध्योः लक्ष्यत्वेन स्वीकार इति। न हि लक्ष्यतावच्छेदके यद्व्यभिचारेणेत्यादौ अविशेषितेन, यद्व्यभिचारेणेति विशेषितं येन तयोरलक्ष्यत्वं स्यात्। केचित् तु इत्यादिवादिनं परिहसति **स्वयमित्यादि**। स्वयं स्वस्य लक्षणकरणासामर्थ्येन उपाधिलक्षणनिर्वचनासामर्थ्येन जाड्यादिना। **एतदिति**। उपदर्शितोपाधिद्वयव्यावर्तनाय तत्र लक्ष्यतावच्छेदकनिरुक्तौ विशेषणान्तरप्रक्षेपः। विशेषणान्तरमितराविशेषितेन यद्व्यभिचारित्वेनेत्यादि। अनुचितत्वात् अयुक्तत्वात्। तद्विशेषणप्रक्षेपस्य स्वासामर्थ्यप्रकाशत्वादिति भावः। **अन्यथेति**। यदि विशेषणप्रक्षेपेणानयोरलक्ष्यत्वमित्युच्यते तदा इतोऽपि लघुप्रकारः सम्भवति। **शुद्धसाध्येति**। अवच्छिन्नसाध्यव्यापकोपाध्यसङ्ग्राहकशुद्धसाध्यव्यापकोपाधिसङ्ग्राहकलक्ष्यतावच्छेदकनिर्वचनेन उपदर्शितोपाधिद्वयवत् सर्वेषामेवोपाधीनामलक्ष्यत्वमस्तु, किमेतावता प्रयासेनेत्यर्थः। **शुद्धसाध्येत्यादि**। तथा च पर्यवसितेत्यादिपदं न देयमित्येव **सौकर्यम्। यदि चेति तदस्फुरणेऽपीति**। तदस्फुरणे शुद्धसाध्यव्यापकोपाध्यस्फुरणे। **पक्षधर्मेति**। बहिर्द्रव्यत्वावच्छिन्नोद्भूतप्रत्यक्षत्वव्यापकोद्भूतरूपोपाधिस्फुरणे पक्षधर्मादीत्यादिपदात् साधनावच्छिन्नोदासीनधर्मावच्छिन्नादिपरिग्रहः। **व्यभिचारेति**। स्वव्यापकोपाधिना स्वव्यभिचारेण लिङ्गेन साध्यव्यभिचारोन्नयनेन अनुमितिप्रतिबन्धात् अनुमितिकारणीभूतव्याप्तिज्ञानप्रतिबन्धादित्यर्थः। तस्यैव अवच्छिन्नसाध्यव्यापकस्य उद्भूतरूपादेः

एवकारो व्यर्थः। तस्यापि उपाधित्वेन उपाधिलक्ष्यत्वस्वीकारेण तत्र पर्यवसितेत्यादिपदादाने अव्याप्तिरिति मन्यसे। [18A] **यदि** वेत्यादि **मन्यसे** इत्यन्तयोजना। **तदेति**। वायुः बहिरिन्द्रियजन्यप्रत्यक्षः प्रमेयत्वात् इत्यत्र भवदुपदर्शितोपाधेः प्रत्यक्षसामा यादेः अस्फुरणे अस्फूर्तिदशायामुक्तरीत्या विशेषणदानेन व्यभिचारः। व्यभिचारोन्नायकयोः शुद्धसाध्यव्यभिचारोन्नायकयोः तयोः उद्भूतरूप-शाकपाकजत्वयोः स्फुरणे स्फूर्तिदशायां स्वव्यभिचारेणोन्नीत-शुद्धसाध्यव्यभिचारानुमानेनानुमितिप्रतिबन्धात् अनुमितिकारणीभूताव्यभिचरितज्ञानप्रतिबन्धात् तयोरपि उद्भूतरूप-शाकपाक[ज]त्वयोः उपाधित्वे दूषकताबीजसत्त्वेन उपाधित्वेनाङ्गीकारे तस्य लक्ष्यत्वेनाभिमते एतल्लक्षणस्य साधनाव्यापकधर्मावच्छिन्नसाध्यव्यापकत्वे सतीत्यादिलक्षणस्याव्याप्तेः द्रव्यत्वादेः साधनाव्यापकत्वेनेत्यादि। स्वमतेऽपि **विशेषणाव्यभिचारिणि** इत्यादिग्रन्थं सङ्गमयति। प्रकृताभिप्रायकम् अवच्छिन्नसाध्यव्यापकोपाध्यभिप्रायकम्, न तु सर्वत्र, शुद्धसाध्यव्यापकोपाधिस्थले विशीषणाव्यभिचारिणीत्यादिविशेषणप्रक्षेपस्यानौचित्यादिति भावः। अन्यत्र शुद्धसाध्यव्यापकोपाधिस्थले प्रकारान्तरेणापि विशेषणाव्यभिचारिणीत्यादिविशेषणप्रक्षेपेणापि शुद्धसाध्यस्य धूमादेर्व्यभिचारोन्नयनं व्यभिचारानुमानम्। तथा च धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनरूपोपाधिस्थले वह्निर्धूमव्यभिचारी आर्द्रेन्धनव्यभिचारात् इत्येव व्यभिचारानुमानं कर्तव्यम्। ननु अत्रापि विशेषणाव्यभिचारिणीत्यादिविशेषणप्रक्षेपे वैयर्थ्यमेव। न तु प्रयोजनमपि। तथा च स ग्रन्थः अवच्छिन्नसाध्यव्यापकोपाध्यभिप्रायेणैवेति। **यत्त्वि**त्यादि यद्धर्मावच्छेदेनेति पर्यवसितेत्यादि यदुक्तं तत्तुच्छमिति प्रयोजना। **यद्धर्मावच्छेदेने**ति मूलं साधनवतीति विशेषणेन पूरि(पूरयि)त्वा यत् व्याख्यातं तत् तुच्छम्। **वायुरि**ति। वायुः प्रत्यक्षः वायुत्वात् इत्यत्र उद्भूतरूपोपाधौ अव्याप्तेः। साधनवतीत्यादिविशेषणाभावात्। साधनवति वायौ प्रत्यक्षत्वस्याप्रसिद्धेः। न च तस्यालक्ष्यत्वमित्यत आह - **उक्ते**ति। उक्तं यल्लक्ष्यतावच्छेदकं यद्व्यभिचारित्वेनेत्याद्युक्तलक्ष्यतावच्छेदकं तत्सङ्गृहीतत्वेन तदाक्रान्तत्वेन दूषकताबीजमप्यानयति-**व्यभिचारे**ति। व्यभिचारोन्नयनं प्रत्यक्षत्वस्य शुद्धसाध्यस्य व्यभिचारोन्नयनम्। तत्र समर्थस्य तद्योग्यताव्याप्तिपक्षधर्मतावद्व्यभिचारप्रतियोगिन अननु(अनु)पाधित्वेन अलक्ष्यत्वेन वक्तुमशक्यत्वात्। **नन्वि**ति। उक्तरीत्या विशेषणाव्यभिचारिणीत्याद्युक्तरीत्या व्यभिचारोन्नयनसमर्थस्यैव लक्ष्यत्वं तथापि न नो हनि(हानिः)। सङ्ग्राहकं लक्षणम्। तथा च **पर्यवसिते**त्यादि मूलम्। पर्यवसितं यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्युक्तौ तत्र च यत्किञ्चिद्विशेषणप्रक्षेपे व्यञ्जनवत्त्वे अतिव्याप्तिरुपन्यस्ता। तामुद्धरन्नाह - **तद्धर्मावच्छिन्ने**ति। **तथा** च व्यञ्जनवत्त्वे नातिव्याप्तिः। व्यञ्जनवत्त्वस्य महानसत्वावच्छिन्नसाध्यव्यापकत्वेऽपि महानसत्वावच्छिन्नसाधनव्यापकत्वेन तद्धर्मावच्छिन्नसाधनाव्यापकत्वविरहात् न लक्षणसमन्वय इति नातिव्याप्तिः। प्रकारान्तरेणाव्याप्तिमुद्धरति - **यत्रे**ति। यत्राधिकरणे साधनाव्यापकत्वमुपाधेः तद्वृत्तिः यत्किञ्चित् धर्म एव पर्यवसितपदेन विवक्षितः। तथा च पूर्वलक्षणे लाघवम्, पूर्वलक्षणे पर्यवसितपदस्योभयत्र दानेन। अत्र [18B] पुनरेके त्विति लाघवम्। तथा च इत्थं

विवक्षायामपि व्यञ्जनवत्त्वेनातिव्याप्तिः। यत्र पर्वते व्यञ्जनवत्त्वस्य साधनाव्यापकत्वं तद्वृत्तिर्यो धर्मः पर्वतत्वादिः तदवच्छिन्नसाध्यस्य तद्विशिष्टसाध्यस्य वह्नेः व्यञ्जनवत्त्वस्य अव्यापकत्वात् नातिव्याप्तिः गिरिपर्वते व्यञ्जने। एवं वायुः प्रत्यक्षः प्रमेयत्वात् इत्यादौ यत्र अधिकरणे वायौ साधनाव्यापकत्वमुद्भूतरूपस्य तद्वृत्तिर्यो धर्मः यत्किञ्चिद्द्रव्यत्वादेः तदवच्छिन्नबहिरिन्द्रियजन्यप्रत्यक्षस्य साध्यस्य व्यापकमुद्भूतरूपमिति, न तत्रातिव्याप्तिः । एवं कोकिलः श्यामः मित्रापुष्टत्वात् इत्यत्र शाकपाकजत्वस्य साधनाव्यापकं यत्रापि गौरमित्रातनये तद्वृत्तिर्यो धर्मः मित्रातनयत्वं नरत्वं वा तदवच्छिन्नसाध्यस्य श्यामत्वस्य व्यापकमेव शाकपाकजत्वमिति नाव्याप्तिरिति पूर्वलक्षणेऽपि ध्येयम् । साधनाव्यापकत्वापेक्षया स्वानधिकरणत्वस्य लघुत्वेन तद्घटितं लक्षणान्तरमाह - **स्वानधिकरणे**ति । स्वं लक्ष्यत्वेनाभिमतमुपाधिरिति यावत्, तस्यानधिकरणं यत्साधनाधिकरणम्, तद्वृत्तिर्यो धर्मः स एव पर्यवसितपदेन विवक्षितः। तथा च तदवच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वम् इत्येव लक्षणं जातम्। तथा च व्यञ्जनवत्त्वे नातिव्याप्तिः। यथा व्यञ्जनवत्त्वं लक्ष्यत्वेन भवदभिमतम्, तस्यानधिकरणं पर्वतादिः यत्साधनाधिकरणम्, तद्वृत्तिः यो धर्मः पर्वतत्वं तदवच्छिन्नसाध्यस्य वह्नेः अव्यापकमेव व्यञ्जनवत्त्वमिति नातिव्याप्तिः। एवं वायुः प्रत्यक्षः प्रमेयत्वात् इत्यत्र उद्भूतरूपस्यानधिकरणं यत्साधनाधिकरणं वायुः, तद्वृत्तिधर्मो द्रव्यत्वम्, तदवच्छिन्नसाध्यस्य बहिरिन्द्रियजन्यप्रत्यक्षत्वस्य व्यापकमेवोद्भूतरूपमिति नाव्याप्तिः । एवं कोकिलः श्यामः मित्रापुष्टत्वात् इत्यत्र शाकपाकजत्वस्यानधिकरणं यत्साधनाधिकरणं गौरमित्रातनयः, तद्वृत्तिर्यो धर्मः मित्रातनयत्वं नरत्वं वा तदवच्छिन्नसाध्यस्य व्यापकं शाकपाकजत्वमिति नाव्याप्तिरिति भावः । कृतलक्षणत्रितये अव्याप्तिमाशङ्कते - **अथे**ति। एवं पर्यवसितपदार्थनिर्वचनेन लक्षणत्रितयेऽपि कृते। **गन्धप्रागभावावच्छिन्ने**ति। गन्धप्रागभावावच्छिन्नो गन्धप्रागभावकालीनो यो गन्धः तद्वानित्यर्थः। यो घटः पक्षीकृतः तद्वृत्तिर्य आद्यगन्धः तदीयो यः प्रागभावः तदवच्छिन्न इत्यर्थः। अन्यथा अन्यदीयगन्धप्राग[भाव]कालीनगन्धवत्त्वमादाय बाधितमपि न स्यात्। एवं तद्घटस्यैव पाकदशायां जायमानो यो गन्धस्तद्गन्धप्राक्कालीना(न)दशावर्तिगन्धमादायापि अबाधितमेव स्यादिति ध्येयम्। अवच्छिन्नत्वं तु न साध्यतावच्छेदकम्, तथा सति पृथिवीत्वहेतोर्व्यभिचारित्वमेव स्यात् । तथा च सति तस्य व्यभिचारित्वे तत्रोपाधेरवश्यंभावस्वीकारे कुतोऽतिव्याप्तिरित्युच्यते । तस्यापि लक्ष्यत्वात् न हि लक्ष्ये लक्षणगमनमतिव्याप्तिरिति। किन्तु यथा घटः पृथिवी कम्बूग्रीवादिमत्त्वात् इत्यत्र घटत्वरूपो यः पक्षधर्मः पक्षता तदवच्छेदेन साध्यसिद्धिरिति। तथा प्रकृतेऽपि तदीयाद्यगन्धप्रागभावः पक्षतावच्छेदकः तदवच्छेदेन गन्धः साध्यः, अवच्छिन्नत्वं तु प्रकृते स्वरूपसम्बन्धविशेषः तद्गन्धप्रागभावकालीनत्वमेव पर्यवसितः इति भावः । अत एव [19A] तत्र बाधः। अन्यथा साध्यस्य विद्यमानत्वादबाधितत्त्वमेव स्यात्। **एतदि**ति। एतदुक्तगन्धप्रागभावः तत्कालीनं यद्रूपवत्त्वं तस्य तस्मिन् घटे तृतीयक्षणे घटान्तरे वा। तत्र च तत्प्रागभावकालीनगन्धस्य विद्यमानत्वात् रूपवत्त्वस्य व्यापकत्वम्। साधनाव्यापकत्वं च पृथिवीत्ववति पक्षे एव। तादृशगन्धप्रागभावावच्छिन्नत्वं साध्यतावच्छेदकत्वं

मन्वान आशङ्कते - **न चेति**। तथा च तस्य लक्ष्यत्वमेव, कुतो लक्षणमतिव्यापकमिति। तत्प्राग्भा(गभा)वावच्छिन्नसाध्यतावच्छेदकत्वभ्रमं निराकुर्वन् अव्यभिचरितत्वं पृथिवीत्वस्य व्यवस्थापयन्नाह - **अपसिद्धान्तादिति**। न हि व्यभिचारशून्ये उपाधिर्नाम। न हि कदापि पृथिवीत्वं गन्धस्य व्यभिचारि येनात्र तादृशरूपवत्त्वमुपाधिः स्यात्। न च तादृशगन्धप्रागभावावच्छिन्नत्वं साध्यतावच्छेदकं येन व्यभिचारः स्यात्, किन्तु शुद्धगन्धत्वमेव साध्यतावच्छेदकम्। प्रागभावावच्छिन्नत्वं तु पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वादित्याविष्कारार्थमुपन्यस्तमिति। न तु तस्य साध्यतावच्छेदकत्वमिति। अत एव पक्षे तस्य साध्याव्यापका[त्वं] वक्ष्यते। **यद्धर्मवतीति**। यद्धर्मवति यद्धर्मावच्छिन्नसाध्यस्य व्यापकत्वम्। यद्धर्मः धर्मितावच्छेदकं विधाय साध्यस्य व्यापकत्वमुपाधेर्गृह्यते तदेव धर्मं धर्मितावच्छेदकं विधाय साधनाव्यापकत्वं वक्तव्यमित्यर्थः। उक्तोपाधिः तत्प्रागभावकालीनरूपवत्त्वस्वरूप उपाधिः न तथा, तद्धर्ममादाय न साधनाव्यापकः। तथाहि यो घटः पक्षीकृतः तद्भिन्ने एव वर्तमाने घटे पक्षीयगन्धप्रागभावकालीनगन्धस्य वर्तमानत्वात्। तत्रैव साध्यव्यापकत्वं तादृशरूपवत्त्वस्य। न च तद्धर्मावच्छेदेन साधनाव्यापकत्वं तादृशरूपवत्त्वस्योपाधेः, तद्धर्मावच्छेदेनोपाधेरपि वर्तमानत्वात्। न साधनाव्यापकत्वम् अवच्छेदकत्वम्, व्यापकातिरिक्तमवच्छेदकत्वं पक्षतावच्छेदकस्य नास्तीति। व्यापकत्वे तु प्रागभावप्रतियोगिनः अस्त्येव। न च प्रागभावकालीनत्वमवच्छेदकमिति मन्वानो दूषणान्तरमाह - **तद्धर्मवतीति**। तद्धर्मवति तत्प्रागभावविशिष्टे घटे उत्पत्स्यमानगन्धस्य साध्यस्याव्यापकत्वादुपाधेरिति भावः। **न चैवमिति**। एवं यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकमिति विवक्षायां स श्यामो मित्रापुष्टत्वात् इत्यत्र नरत्वावच्छिन्नसाध्यव्यापकस्य शाकपाकजत्वस्य हंसादौ मित्रापुष्टे साधनाव्यापके अव्याप्तिः, न हि नरत्वं हंसेऽपि वर्तते येन तद्धर्मविशिष्टसाधनाव्यापकत्वं शाकपाकजत्वोपाधिः स्यात्। तथा च तल्लक्षणं नाव्यापकमिति भावः। तदेव विवृणोति - **नरत्ववतीति**। नरत्ववति नरत्वं धर्मितावच्छेदकं विधाय तादृशरूपस्य श्यामत्वस्य साध्यस्य शाकपाकजत्वमिति ग्रहीतुं [शक्यते]। न हि तदेव नरत्वं धर्मितावच्छेदकं विधाय साधनाव्यापकत्वमपि ग्रहीतुं शक्यते। अंशे एव तस्य साधनाव्यापकत्वात्। ननु मित्रापुष्टः कश्चन गौरो नरान्तरो भविष्यति। तत्रैव साधनाव्यापकत्वं शाकपाकजत्वस्य भविष्यति नरत्वरूपमेकमेव धर्मितावच्छेदकं विधायेति। तथा च नाव्याप्तिरित्यत आह - **मित्रापुष्टस्येति**। [19B] तथा च मित्रया यो यः पुष्टः स नरः श्याम एव। तथा च तत्र शाकपाकजं विनाऽवश्यं भवितव्यम्। तथा च नरत्वावच्छेदेन शाकपाकजत्वस्य मित्रापुष्टत्वरूपसाधनाव्यापकत्वं शाकपाकजत्वस्येति। तत्राव्याप्तमेवेत्याशङ्कार्थः। **नरहंसान्यतरत्वेति**। नरत्वस्य साधनाव्यापकतायामनवच्छेदकत्वेऽपि नरहंसान्यतरत्वरूपो यो धर्मो भेदः तदादायैव लक्षणसमन्वयः। तथा च नाव्याप्तिः। तथाहि नरहंसान्यतरत्वावच्छिन्नश्यामरूपस्य व्यापकं शाकपाकजत्वं नरहंसान्यतरत्वावच्छिन्नमित्रापुष्टस्याव्यापकमपि शाकपाकजत्वमिति यद्धर्मावच्छेदेन साध्यन(साधना)व्यापकत्वमुपाधेस्तद्धर्मावच्छेदेन साध्यव्यापकत्वमुपाधेरिति न लक्षणमव्यापकमिति भावः। पूर्वोक्ताव्याप्तिद्वयमुद्धरति - **अत्र**

चेति । अत्र लक्षणे नातिव्याप्तिरिति योजना । वायुः प्रत्यक्षः प्रमेयत्वात् इत्यत्र उद्भूतरूपत्वमुपाधिः उदासीन-धर्मावच्छिन्नमुद्भूतत्वमुपाधिः । **रूपत्वावच्छिन्ने**ति । रूपत्वावच्छिन्नं यत्र यत्र प्रत्यक्षत्वं तत्र उद्भूतत्वं घटीय-रूपवत् इति रूपत्वं धर्मितावच्छेदकं विधाय साध्यव्यापकत्वग्रहः, एवं तदेव रूपत्वं धर्मितावच्छेदकं विधाय ता(वा)यन(व)रूपे अनुद्भूते रूपत्वावच्छिन्नप्रमेयत्वसाधनवति साधनाव्यापकत्वमुद्भूतत्वाभावात् इति भावः । शुद्धसाध्यव्यभिचारोन्नयनप्रकारमाह - **प्रमेयत्वमि**ति । प्रमेयत्वे प्रत्यक्षत्वं व्यभिचारि । प्रत्यक्षत्वरूपं यत् साध्यं तस्य व्यभिचारिरूपे रूपत्वविशिष्टोद्भूतत्वव्यभिचारित्वं तत्त्वादित्यर्थः । **रूपत्वे**ति व्यभिचारविशेषणात् उद्भूतत्व-शून्ये प्रत्यक्षत्ववति घटो न व्यभिचारगुणत्ववदिति । गुणत्वं रूपत्ववति अनुद्भूतेन येन रूपे[ण] उद्भूतत्वव्यभिचारि प्रत्यक्षत्वस्य व्यभिचारीति दृष्टान्तीकृतं तस्यापि उद्भूतत्वस्यापि स्वव्यभिचारेण शुद्धसाध्यव्यभिचारोन्नयनसम्भवात् एतस्यापि लक्ष्यत्वमेवेति भावः । तस्योद्भूतत्वरूपोपाधेः उदासीनधर्मावच्छिन्नसाध्यव्यापकतया । **स्वीकृते**ति । स्वीकृतो यस्त्रिविधोपाधिः शुद्धसाध्यव्यापकः पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकः, एतत्त्रितयात्मकोपाधिबहिर्भूतत्वोपाधिस्वीकारेऽपसिद्धान्त इति सर्वतान्त्रिका(क)सम्मतत्वादिति भावः । समाधत्ते - **तस्ये**ति । तस्य त्रिविधोपाधेः नोपाधित्वव्यापकत्वं किन्तु व्यापकत्वमेव इत अन्यत्रापि तत्सम्भवात् । यथा घटीयरूपं प्रत्यक्षं प्रमेयत्वात् इत्यत्र बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकमुद्भूतरूपत्वम्, तथा चात्र बहिर्द्रव्यत्वं न पक्षधर्मः न वा साधनधर्मः न वा तदुपाधेः शुद्धसाध्यव्यापकत्वम्, तथा च तस्य यथा त्रितयबहिर्भूत[म]प्युपाधित्वं तथा प्रकृतेऽपीति भावः । ननु तर्हि अपसिद्धान्तग्रन्थस्य न्यूनता वा पक्षधर्मावच्छिन्न-साधनावच्छिन्न-शुद्धसाध्यव्यापकोपाधीनामेव गमनात् । उदासीनधर्मावच्छिन्नसाध्यव्यापकोपाधेरि(र)निर्देशात् ग्रन्थस्य न्यूनतेत्यत आह - **पक्षधर्मे**ति । पक्षधर्मावच्छिन्नसाध्यव्यापकत्वेनैव तस्य निर्देशात् न ग्रन्थस्य न्यूनता न वाऽपसिद्धान्त इति । ननु वायुः प्रत्यक्षः प्रमेयत्वात् इत्यत्र [20A] रूपत्वं न पक्षधर्मः, तत्कथं पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधौ प्रवेश इत्यत आह - **पक्षधर्मपदेने**ति । पक्षधर्मपदेन साधनसमानाधिकरणो यो धर्मस्तस्यैव विवक्षणात् । तथा च रूपत्वं साधनं यत् प्रमेयत्वं तत्समानाधिकरणं भवत्येव । तदवच्छिन्नप्रत्यक्षत्वव्यापकस्योद्भूतत्वस्य पक्षधर्मावच्छिन्नसाध्यव्यापकमध्यप्रवेशात् पक्षधर्मावच्छिन्नेत्यादिग्रन्थेन सिद्धान्ति[त]त्वात् न तस्योपाधित्वस्य स्वीकारेऽपसिद्धान्तः न वा ग्रन्थस्य न्यूनता । तथा च यद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति तद्धर्मावच्छिन्न-साधनाव्यापकत्वमिति पर्यवसितेत्यादिग्रन्थनिरुक्तेरर्थः। तथा च लक्षणे नाव्याप्तिर्नातिव्याप्तिरिति **यज्ञपति**-मतं पुरस्कृत्य दूषयति - **अत्र वदन्ति** [इति] । घटः पृथिवी द्रव्यत्वात् इत्यत्र घटजलान्यतरत्वमादायापि न लक्षणसमन्वयः इति । घटः पक्षीकृतः, घटेऽपि साध्यस्य विद्यमानत्वात् । साध्यशून्यस्वर्णघटपक्षीकरणे तु तद्घटान्यतरत्वावच्छिन्नसाध्यस्य व्यापकं [घटावर्तिगुणवत्त्वम्], घटावर्तिगुणवत्त्वादेर्व्यापकत्वान्न लक्षणाव्याप्तिः इति । पृथिव्यात्मकमृद्घट एव पक्षीकृत इति । घटान्यत्वं यो धर्मो घटभेदः तदवच्छिन्नसाध्यस्य व्यापकं

घटावर्तिगुणवत्त्वम्, तद्धर्मावच्छिन्नं यत् साधनं द्रव्यत्वं तस्यापि व्यापकम्, यथा यत्र घटान्यत्वावच्छिन्नद्रव्यत्वं तत्र घटावर्तिगुणवत्त्वं जलवत् इति कुत्रापि व्यभिचारः। तथा च तद्धर्मावच्छिन्नसाधनाव्यापकत्वविरहादव्याप्तिरेव। न च साधन(ना)व्यापकत्वविरहात् तन्न लक्ष्यमिति वाच्यमित्यत आह - **पक्षे** इति। तत्र घटावर्तिगुणवत्त्वोपाधौ। **उक्तानी**ति। उक्तानि यत्र साधनाव्यापकत्वेत्यादिपूर्वोक्तानि। तदेव विवृणोति - **घटान्यत्वे**ति। घटान्यत्वावच्छिन्नपृथिवीत्वस्य व्यापकं यद् घटावृत्तिगुणवत्त्वं तस्य यत्र घटे साधनाव्यापकत्वं तद्वृत्तिधर्मावच्छिन्नस्य पृथिवीत्वस्य न व्यापकं घटावर्तिगुणवत्त्वम्, घटे एव व्यभिचारात्। अत्र(त) एव यत्र साधनाव्यापकत्वमुपाधिस्तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमित्युक्तनिरुक्ते अव्याप्तिः इत्येकं लक्षणमव्याप्तम्। द्वितीयलक्षणेऽव्याप्तिं ददाति - **स्वानधिकरणभूते**ति। स्वशब्देनोपाधित्वेनाभिमतं यल्लक्ष्यं यद् घटावर्तिगुणवत्त्वं तस्योपाधेरनधिकरणीभूतो यद्घटः तद्वृत्तिर्यो धर्मः घटत्वादिः तदवच्छिन्नसाध्यस्य पृथिवीत्वस्य न व्यापकं घटावृत्तिगुणवत्त्वमिति स्वानधिकरणीभूतधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमिति लक्षणमव्याप्तम्। अलक्ष्यत्वेनाव्याप्तिमुद्धरति - **न चे**ति। अलक्ष्यत्वमेव कुतः ? तदाह - **शुद्धसाध्यव्यभिचारे**ति। शुद्धसाध्यव्यभिचारानुन्नायकत्वेनायमुपाधिरेव न भवति। तस्य लक्ष्यत्वनिर्णायकं शुद्धसाध्यव्यभिचारोन्नयनमाह - **द्रव्यत्वमि**ति। द्रव्यत्वं पृथिवीत्वव्यभिचारि। द्रव्यत्वपटत्वप्रमेयत्वेति हेतुः। हेतुस्थविशेषणानां व्यावृत्तिमाह - **अत्रे**ति। **स्वरूपासिद्धी**ति। द्रव्यत्वं व्यभिचारसाधने पक्षः। तत्र यदि घटत्वप्रमेयत्वा(दी)नीति प्रतीतिविशेष्ये सतीत्युच्यते तदा [20 B] द्रव्यत्वे तादृशप्रतीतिविशेष्यत्वाभावात् व्यभिचारसाधनस्य तादृश(शे) सति एतद्विशिष्टस्य उपाधिव्यभिचारित्वस्य घटावृत्तिगुणवत्त्वव्यभिचारस्य विशेषणाभाव(वे) सत(ति) विशिष्टाभावस्य सत्त्वात् पक्षे द्रव्यत्वे निरुक्तसाधनस्याश(स)त्वात् स्वरूपासिद्धिरिति भावः। द्रव्यत्वपददाने तु न स्वरूपासिद्धिः, तद्विशेष्यत्वस्य द्रव्यत्वेऽपि सत्त्वात्। द्रव्यत्वस्य वैयर्थ्यमाशङ्क्यते - **न चे**ति। व्यभिचारवारकस्य विशेषणस्यैव सार्थकत्वमिति मन्वानः तादृशप्रतीतिविशेष्यत्वस्याखण्डत्वेन न वैयर्थ्यमिति समाधत्ते - **त्रितये**त्यादि। तथा च तादृशप्रतीतिविशेष्यत्वस्य परिचायकमेव द्रव्यत्वादि, न तु तस्य विशेषणम् येन भवद्भिः वैयर्थ्यमाशङ्क्येत। **व्यावृत्तिस्तु** [इति]। ननु यदि विशेषणं तदा व्यावृत्त(र्त)कम्। असिद्ध(द्धि)वारणायेत्यादिकं कथमुक्तम् विशेषणस्यैव व्यावर्तकत्वादिति चेत्, न, पटत्वप्रमेयत्वे इति समूहालम्बनात्मिका या धीः तद्विशेष्यत्वं विहाय द्रव्यत्वपटत्वप्रमेयत्वविषयकसमूहालम्बनविशेष्यत्वपरिग्रहे ग्रन्था(न्थ)भावाविष्काराय इत्यर्थः। तथा च पटत्वप्रमेयत्वे इत्याकारिका या धीः तद्विशेष्यत्वात् द्रव्यत्वपटत्वप्रमेयत्वविशेष्यका या धीः सा भिन्नैव न तु एतस्या घटकं पूर्वविशेष्यत्वं येन नीलधूमधूमवत् वैयर्थ्यं स्यादित्यपि ध्येयम्। तथा च पटत्वप्रमेयत्वमात्रविशेष्यका या धीः तद्विशेष्यत्वपरिग्रहे तद्विशेष्यत्वस्य द्रव्यत्वेऽभावात् न तद्घटितव्यभिचारसाधकहेतुर्द्रव्यत्वे इति स्वरूपासिद्धिः। त्रितयवर्तिविशेष्यत्वपरिग्रहे तु न स्वरूपासिद्धिः, तद्विशेष्यत्वस्य

द्रव्यत्वेऽपि पक्षेऽपि सत्त्वात् न विशेषणाभावकृतो विशिष्टाभावः व्यभिचारसाधकहेतोर्द्रव्यत्वे पक्षे इति पटत्ववृत्तिविशेष्यत्वपरिग्रहे भावाविष्कारं कुर्वन्नाह - **व्यर्थविशेष्यत्वे** इति। अयमत्र भावः। द्रव्यत्वप्रमेयत्वमात्रवृत्तिविशेष्यत्वपरिग्रहे द्रव्यत्वं पृथिवीत्वव्यभिचारि द्रव्यत्वप्रमेयत्वमात्रवृत्तिधीविशेष्यत्वात् प्रमेयत्ववत् इत्यस्यैव गमकत्वे घटावृत्तिगुणवत्त्वव्यभिचारित्वस्य विशेष्यस्य वैयर्थ्यम्। द्रव्यत्वपटत्वप्रमेयत्वमात्रविशेष्यकसमूहालम्बनधीविशेष्यत्वपरिग्रहे तु तादृशविशेष्यत्वस्य पटत्वेऽपि सत्त्वात् तत्र पृथिवीत्वव्यभिचारित्वरूपसाध्यस्याभावात् व्यभिचारः, अतस्तद्वारणाय घटावृत्तिगुणवत्त्वव्यभिचारित्वस्य हेतुमध्ये प्रवेशः। तथा च पटत्वे घटावृत्तिगुणवत्त्वस्य व्यभिचारित्वाभावात् विशेष्याभावकृतव्यभिचारसाधकहेतोरपि विशिष्टाभावसत्त्वात् न तत्र व्यभिचारः। साध्याभाववति साधनसत्त्वे एव व्यभिचारात् न तु हेत्वभावेऽपीति भावः। **व्याप्तिग्रहे**ति। व्याप्तिग्रहज्ञानार्थं दृष्टान्ता(न्ती)करणार्थम्। यथा द्रव्यत्वं पृथिवीत्वव्यभिचारि इत्यत्र साध्ये हेतौ यदि द्रव्यत्वपटत्वमात्रविशेष्यका या धीः तद्विशेष्यत्वे सति घटावृत्तिगुणवत्त्वव्यभिचारित्वादिति हेतुः क्रियते तदा तादृशहेतोः द्रव्यत्वे एव सत्त्वात् द्रव्यत्वस्य च पक्षत्वात् तस्य दृष्टान्तत्वस्य विरहात् पक्षे साध्यप्रसिद्धिविरहादेव न दृष्टान्तत्वम्। [21 A] यथा च साध्यं साधनं प्रसिद्धं तत्रैव सहचारग्रहो भवतीति सामानाधिकरण्यग्रहार्थम् अन्वये दृष्टान्तत्वम्। यत्र च साध्याभावसाधनाभावयोः सहचारग्रहः तस्य व्यतिरेके दृष्टान्तत्वम्। तथा च प्रकृते दृष्टान्तार्थं प्रमेयत्वनिष्ठविशेष्यत्वपरिग्रहः, तादृशत्रितयनिष्ठविशेष्यत्वपरिग्रहे च हेतोः प्रमेयत्वेऽपि सत्त्वात् तत्रैव साध्यसाधनयोः सामानाधिकरण्यग्रह इति दृष्टान्तत्वमित्यर्थः। ननु यद्व्यभिचारित्वेनेत्यादिलक्ष्यतावच्छेदके यद्व्यभिचारित्वेनाविशेषितेन साधने साध्यव्यभिचार उन्नीयते तदेव लक्ष्यतावच्छेदकम्। तथा च प्रकृतोपाधिव्यभिचारेण विशेषितेनैव साधने साध्यव्यभिचारित्वमुन्नीयते इति न तस्य लक्ष्यत्वम्। तथा च तत्रोपाधिलक्षणागमनेऽपि न क्षतिः। लक्ष्यतावच्छेदकशून्यात् न लक्ष्यत्वमिति नाव्याप्तिरिति आशङ्कते - **न चे**ति। समाधत्ते - **एवं ही**ति। लक्ष्यतावच्छेदके यद्व्यभिचारित्वेनेत्यत्राविशेषितेन यद्व्यभिचारित्वेनेति विशेषणप्रक्षेपो न कर्तव्यः येन उक्तोपाध्यसङ्ग्रहे उक्तोपाधेर्लक्ष्यत्वेन तत्साधारणलक्षणकरणासमर्थानां भवतां नायासो भवतीति परिहासेन समाधत्ते - **एवं ही**ति। एवं यद्व्यभिचारित्वेनेत्यत्राविशेषितेनेति विशेषणप्रक्षेपेण तस्यालक्ष्यत्वव्यवस्थापने एवमित्यस्यार्थः प्रत्यक्षत्वेत्यादिः। वायुः प्रत्यक्षः प्रमेयत्वात् इत्यत्र उद्भूतरूपवत्त्वमुपाधिर्न स्यात्। अविशेषितेनास्वव्यभिचारित्वे साधने साध्यव्यभिचारसाधकत्वाभावात् निरुक्तलक्ष्यतावच्छेदकविरहेणोपाधिर्न स्यात् इत्यर्थः। **तत्सङ्ग्राह्यमुक्तलक्षणे**ति। तत् उद्भूतरूपवत्त्वं तस्य सङ्ग्राह्यम्। यल्लक्षणं यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमिति यल्लक्षणं कृतं तदतिव्याप्तमिति भावः। तथा च लक्ष्यतावच्छेदके विशेषणप्रक्षेपे वायुः प्रत्यक्षः प्रमेयत्वात् इत्यत्र उद्भूतरूपवत्त्वलक्ष्यतावच्छेदकविरहेण यद्धर्मावच्छिन्नेत्याद्युक्तलक्षणे अतिव्याप्तिः, विशेषणाप्रक्षेपे तु लक्ष्यतावच्छेदके घटः पृथिवी द्रव्यत्वात् इत्यत्र घटावृत्तिगुणवत्त्वस्योक्तप्रकारेण शुद्धसाध्य-

व्यभिचारोन्नायकस्यासङ्ग्रहेण अव्याप्तिः इति **उपाध्याय**कृतलक्षणानि दूषयित्वा स्वा[य]माह - **ब्रूम** इति । यदि उक्तप्रकारेण विशेषणप्रक्षेपेण द्रव्यत्वपटत्वप्रमेयत्वानीति विशेष्यत्वे सतीति विशेषणप्रक्षेपेणोपाधि-व्यभिचारित्वस्य घटावर्तिगुणवत्त्वव्यभिचारित्वस्य शुद्धसाध्यव्यभिचारोन्नायकत्वेनोपाधित्वेन घटावर्तिगुण-वत्त्वादेरपि सङ्ग्राह्यत्वं तदा तत्साधारणलक्षणकरणेऽपि नास्मादृशामसामर्थ्यम् येन लक्ष्यतावच्छेदके विशेषण-प्रक्षेपेणालक्ष्यत्वेन स न ग्राह्य इत्येव वक्तव्यमिति शौटीर्यं प्रकटइ(य)ति। घटावर्तिगुणवत्त्वादिसङ्ग्राहकं लक्षणमाह-**पर्यवसितेत्यादि**। पर्यवसितसाध्यव्यापकत्वे सति तस्य साध्यसा(स)मानाधिकरणत्वे सति इत्यर्थो बोद्धव्यः। तथा च साध्यसा(स)मानाधिकरणत्वे सति साध्यव्यभिचारिसाधनाव्यापकत्वमिति लक्षणं जातं पर्यवसितेत्यादिना। तथा च घटः पृथिवी द्रव्यत्वात् इत्यत्र घटावर्तिगुणवत्त्वस्य पृथिवीत्वरूपसाध्यसा(स)मानाधिकरणत्वात् पृथिवीत्वरूप-साध्यव्यभिचारिद्रव्यत्वरूपसाधनाव्यापकत्वात् च तस्य सङ्ग्रहः। एवं धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनस्य धूमसमा-नाधिकरणत्वात् धूमरूपसाध्यव्यभिचारिवह्निरूपसाधनाव्यापकत्वाच्च तस्यापि सङ्ग्राह्यत्वम् । लक्षणे व्यावृत्तिम् [21 B] आह - **अत्र चेति**। निरु(र)धिकरणे आकाशादौ। अविशेषितेनापि कुत्रचिद्व्यभिचारेणे(ण) आकाशादौ। आकाशव्यभिचारेणापि किञ्चिद्विशेषितेन साध्यव्यभिचारोन्नयनसम्भवात्। [यद्व्यभिचा]रित्वेनेत्यत्र यत्पदं वृत्तिमत्त्वपरतया व्याख्यातम्। अत एव तस्यालक्ष्यत्वम्, तद्वारणाय साध्यसा(स)मानाधिकरणेति विशेषणं दत्तं लक्षणे । ननु वृत्तिमत्त्वे सति साध्यव्यभिचारिसाधनाव्यापकत्वमित्येवास्तु, किं साध्य[समाना]धिकरण-घटितत्वेन इत्यत आह - **साध्यविरुद्धेति**। तथा च धूमवान् वह्नेः इत्यत्र ह्रदत्वे साध्यव्यभिचारिसाधनाव्यापके वृत्तिमत्त्वेऽतिव्याप्तिवारणाय साध्यसा(स)मानाधिकरणेति। **सर्वथेति**। सर्वतान्त्रिकाणां यत्रोपाधिरिति व्यवहारो नास्ति तत्र गगनादौ अतिव्याप्तिवारणाय साध्यसमानाधिकरणेति। ननु पर्वतो वह्निमान् धूमात् इत्यत्र व्यञ्जनवत्त्वे वह्नि-समानाधिकरणे धूमरूपसाधनाव्यापके अतिव्याप्तिवारणाय साध्यव्यभिचारीति । धूमस्य साध्यव्यभिचारि-त्वाभावादेव नातिव्याप्तिरिति भावः। ननु उपाधिना स्वव्यभिचारेण साध्यव्यचिभारोऽनुमेयः। तथा चोपाधिज्ञान-दशायामे(मि)वोपाधिज्ञानात् पूर्वमपि साधने साध्यव्यभिचारज्ञानात् किमुपाधिज्ञानेन ? कथं चोपाधिज्ञानात् पूर्वं साध्यव्यभिचारिज्ञानं साधने भवतु येन तद्घटित उपाधिः ज्ञायेत इत्याशङ्कते - **नन्विति** । एवं साधन-निष्ठसाध्यव्यभिचार उपाधिलक्षणकरणे उपाधिज्ञानकाले एवेत्यकिञ्चित्करणम्, उपाधिज्ञानात् पूर्वमपि तस्योपाधिघटकत्वात् । तथा च विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वेन एवं विशिष्टवैशिष्ट्यबुद्धौ विशेषणावच्छेदकप्रकारकज्ञानस्य कारणत्वेन वोभयथापि भवदुक्तप्रकारेण उपाधिज्ञानार्थं साधने साध्य-व्यभिचारज्ञानं कारणमिति । तथा चोपाधिज्ञानात् पूर्वमपि साध्यव्यभिचारज्ञानापेक्षणात् इति भावः । इति चेत्, भ्रान्तोऽसि। **नन्विति**। भ्रान्तानामाशङ्का। तां दूषयति - **न हीति**। अनेन रूपेण यथा लक्षणं कृतं तेनैव रूपेण न व्यभिचारोन्नायकत्वं येनोपाधिज्ञानात् पूर्वमुपाधिज्ञानकाले वा साधने साध्यव्यभिचारज्ञाने साधने साध्य-

व्यभिचारानुमानं निष्फलं स्यात् इति भावः । उपाधिज्ञानस्य व्यभिचारज्ञानप्रकारमाह - **किन्त्वित्यादि शुद्धेति** । आदिना साधनावच्छिन्नोदासीनधर्मावच्छिन्नसाध्यव्यापकोपाध्योः परिग्रहः । इदं यत् प्रकृते साध्यसमानाधिकरणे सति साध्यव्यभिचारिसाधनाव्यापकत्वमिति लक्षणम् । **सकलेति** । सकलसङ्ग्राहकम्, साधनावच्छिन्न-पक्षधर्मावच्छिन्नोदासीनधर्मावच्छिन्नशुद्धसाध्यव्यापकोपाधीनां सङ्ग्रहार्थमिति । इदमेव दृष्टान्तेन द्रढयति - यथा सव्यभिचारस्य साधारणासाधारणानुपसंहार्यात्मनः लक्षणं मूलेनोभयकोट्युपस्थापकतावच्छेदकं कृतम् । तत्र च साधारणमन्वयेन, असाधारणं व्यतिरेकिणा, अनुपसंहारी पक्षे एव । साध्यतदभावकोट्योरुपस्थापकः इति सव्यभिचारलक्षणे व्याख्यातुमुपेक्षितम् । न हि साधारणादेः उभयकोट्युपस्थापकतावच्छेदकप्रकारकं दूषणावहम्, [22 A] किन्तु साध्याभाववद्वृत्तित्वं साध्यवदवृत्तित्वम् अत्यन्ताभावाप्रतियोगिसाध्यवत्त्वम् इत्यादिरूपेणोप-स्थितस्य दूषकत्वम् । न तु येन रूपेण लक्षणं कृतं तेन रूपेण दूषकत्वम् । यथा प्रकृतेऽपि । **एवमिति** । एवं येन रूपेण दूषकत्वं तेन रूपेण न लक्षणं कृतम्, येन रूपेण च लक्षणं कृतं तेन रूपेण न दूषकत्वमिति भवद्भिरभ्युपगन्तव्यम् । **अन्यथेति** । यदि येन रूपेण लक्षणं कृतं तेनैव रूपेण ज्ञान(त)स्य दूषकत्वं तदेति शेषः । **पर्यवसितेत्यादि** । यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्याद्यस्फुरणे शुद्धसाध्यव्यापकत्वस्फुरणे धूमव्यापकं वह्नेरव्यापकम् आर्द्रेन्धनमिति स्फुरणे धूमव्यापकार्द्रेन्धनव्यभिचारिवह्निरित्याद्यस्फुरणे व्यभिचारोन्नायकत्वं साध्यव्यभिचारोन्नायकत्वं न स्यात् । शङ्कते - **न चेति** । अनुमितिप्रतिबन्धक-मनुमितिकारणीभूतव्याप्तिज्ञानप्रतिबन्धकं यद् ज्ञानं तद्विषयतावच्छेदकमुपाधित्वम् । यद्विषयत्वेन ज्ञानस्य व्याप्तिग्रहप्रतिबन्धकत्वं तथोपाधिर्निव(र्व)क्तव्यः इति अग्रिमग्रन्थः । स भवन्मते न स्यात् येन रूपेण लक्षणं कृतं तस्यानुमितिप्रतिबन्धकतावच्छेदकत्वविरहात् । **तस्येति** । तस्य अग्रिमग्रन्थस्य यथाश्रुताभिप्रायेण । न हि तत्र ग्रन्थकारस्य निर्भराभिप्रायः । **साधनाव्यापकत्वमिति** । साधनाव्यापकत्वे उक्ते सव्यभिचारिसाधने उपाधि-व्यभिचारित्वरूपहेतोः पूर्व(र्वं) साधनरूपपक्षवृत्तित्वमुक्तम् । तदेवानुमितिकारणीभूतव्यभिचारज्ञानोपयोगि । **न त्वेवमिति** । एवम् एकरूपेण लक्षणकरणे इतरथाऽपि व्यभिचारोन्नयनसम्भवः । पर्वतो वह्निमान् धूमात् इत्यत्र पाषाणवत्त्वमुपाधिः स्यात् । पर्वतत्वरूपं यः पक्षधर्मः तदवच्छिन्नसाध्यव्यापकत्वे सति । **धूमेति** । धूमाव्यापकत्वेन ज्ञातस्य पाषाणवत्त्वादेः । वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र उद्भूतरूप[व]त्त्वस्य बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वसाधनाव्यापकत्वस्य च ज्ञानात् यथा व्यभिचारानुमानं तथा प्रकृतेऽपि स्यात् इति भावः । **अन्यथेति** । यदि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमिति ज्ञात(न)स्यापि न दूषकत्वं तदेत्यर्थः । उद्भूतरूपवत्त्वादेरपि उद्भूतरूपस्य बहिर्द्रव्यत्वावच्छिन्नसाध्य-प्रत्यक्षत्वव्यापकस्य प्रत्यक्षस्पर्शाश्रयत्वाव्यापकस्य च तद्दूषकत्वं न स्यात् । उपाधिव्यभिचारित्वेन साध्यव्यभिचारित्वं न स्यात् । व्यभिचारानुमाने बाधमुपन्यस्यति - **वह्नीति** । न हि वह्निव्यभिचारो धूमे

वर्तते येन पाषाणवत्त्वव्यभिचारेण सोऽनुमेयः । **तत एव** बाधादेव अनुमित्यभावात् व्यभिचारोन्नयनानुमित्यभावादित्यर्थः । ननु यदा बाधस्य ज्ञानं न जातं तदा तथानुमानं स्यात्, न हि बाधः स्वरूपसत् एव प्रतिबन्धकः । इष्टापत्त्या समाधत्ते - **इष्टापत्तिरि**ति । तद्धूमानुमितेः वह्निव्यभिचारिभ्रमानुमितेः साध्यस्य वह्निव्यभिचारित्वस्य [22 B] धूमे बाधादेव भ्रमः । **न चे**ति । लक्ष्यतावच्छेदकेनैव सर्वसङ्ग्रहे पक्षधर्मावच्छिन्नाद्युपाधीनां सङ्ग्रहे किमिति अनेन साध्यसमानाधिकरणत्वे सति साध्यव्यभिचारिसाधनाव्यापकत्वमिति लक्षणेन । तस्य यद्व्यभिचारित्वेनेत्यादेः लक्ष्यतावच्छेदके एवोपयोगात् । **अस्य चे**ति । अस्य साध्यसमानाधिकरणेति लक्षणे लक्ष्यतावच्छेदकस्य लक्षणकरणे ग्रन्थकृतस्तात्पर्यं वर्णयति - **अत एवे**ति । यत एव सर्वतान्त्रिकाणां यत्र यत्र उपाधित्वेन व्यवहारः स एवोपाधित्वेन मया लक्षणीयः । सर्वतान्त्रिकाणां कुत्रोपाधित्वेन प्रत्यक्षत्वव्यवहारः ? यद्व्यभिचारित्वेनेत्यत्र । अत एव ग्रन्थकृता लौकिकप्रत्यक्षस्य यल्लक्षणं कृतं तल्लक्ष्यतावच्छेदकमभिधायैव । तथा प्रकृतेऽपि उपाधिलक्षणं यद्व्यभिचारित्वेन लक्ष्यतावच्छेदकं विधाय पर्यवसितसाध्यव्यापकेति लक्षणं कृतम् । **इतरभेदे**ति । उपाधिः इतरभेदानुमाने । उपाधिः इतरेभ्यो भिद्यते साध्यसमानाधिकरणे सति साध्यव्यभिचारिसाधनाव्यापकत्वात् । **एकस्येति** । एवं लक्ष्यतावच्छेदकत्वेन यदुक्तं तत् पक्षतावच्छेदकम् । यथा साध्यव्यभिचारानुमापकस्वव्यभिचारकः इतरेभ्यो भिद्यते साध्यसमानाधिकरणत्वे सति साधनाव्यापकत्वादिति । इत्थम् इतरभेदानुमाने लक्ष्यतावच्छेदकस्य पक्षतावच्छेदकत्वं लक्षणस्य हेतुत्वमिति भावः । संक्षेपः लक्षणव्याख्याया इति शेषः। **ध्वंस** इति । ध्वंसो विनाशी जन्यत्वात् इत्यत्र भावत्वमुपाधिः । अत्र पर्यवसितो धर्मः जन्यत्वम् । तथा च यत्र यत्र जन्यत्वावच्छिन्नविनाशित्वं तत्र तत्र भावत्वम् । प्रागभावे व्यभिचारवारणाय जन्यत्वेति साधनाव्यापकत्वं पक्षे एव । एतन्मते क्वचित् साधनमेवेत्यत्र एवकारः अप्यर्थः । जन्यत्वस्य पक्षधर्मस्यापि साधनत्वात् वा । साधनमेवेति अपरे । वस्तुतस्तु ध्वंसजन्यभावान्यतरत्वावच्छिन्नविनाशित्वरूपसाध्यस्य व्यापकं तदन्यतरत्वावच्छिन्नजन्यत्वरूपसाधनाव्यापकं भावत्वमुपाधिः सम्भवत्येव । तथा च कथं पर्यवसितो धर्मः साधनमेवेति । वायुः बहिरिन्द्रियजन्यप्रत्यक्षः प्रमेयत्वात् इत्यत्र उद्भूतरूपवत्त्वमुपाधिः । अत्र पर्यवसितो धर्मः द्रव्यत्वमेव । तथा च यत्र द्रव्यत्वावच्छिन्नबहिरिन्द्रियजन्यप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वं रूपवत्त्वं वा । यत्र द्रव्यत्वावच्छिन्नप्रमेयत्वं तत्रोद्भूतरूपवत्त्वं रूपवत्त्वं वा नास्ति । यथा घटो वायुर्वेति । साध्यव्यापकत्वं साधनाव्यापकत्वं चाऽवगन्तव्यम् । अयं धूमवान् वह्नेः इत्यत्र व्यञ्जनवत्त्वमुपाधिः । तत्र पर्यवसितो धर्मः महानसत्वम् । तथा च महानसत्वावच्छिन्नसाध्यव्यापकं साधनाव्यापकं च । महानसत्वमिति पर्यवसितो धर्मः स्वमताम(व)ष्टम्भे एव । अन्यथा महानसत्वावच्छिन्नसाध्यस्य व्यापकं व्यञ्जनवत्त्वं न महानसत्वावच्छिन्नसाधनाव्यापकमिति न **यज्ञपत्युपाध्याय**मते सम्भवति । तन्मते यद्धर्मावच्छिन्नसाध्यव्यापकं तद्धर्मावच्छेदेनैव साधनाव्यापकत्वमित्येव [23 A] लक्षणकरणाय । न च इत्थं विशेषणाव्यभिचारिणीति ग्रन्थो न सङ्गच्छते तथा महानसत्वस्य वह्निव्यभिचारित्वात् विशेषणा-

व्यभिचारित्वस्य तत्रासम्भवात् इति वाच्यम्। महानसत्वव्यभिचारित्वस्य तत्र सत्त्वेऽपि विशेषणान्तरस्याव्यभिचारस्य तत्र सत्त्वात्। तथाहि वह्निर्धूमव्यभिचारी। महानसीयः वह्निः, वह्निद्रव्यं त्वा(त्व)योगोलके। एतद्धि विशेष्यत्वे सति व्यञ्जनवत्त्वोपाधिव्यभिचारित्वात्। अत्र च विशेषणं तद्वा विशेष(ष्य)त्वं तद्व्यभिचारस्य वह्नौ सत्त्वात्। तथा च सोऽपि ग्रन्थः सङ्गच्छते। न च तद्विशेषणं न साध्यविशेषणं ग्रन्थस्य साध्यविशेषणे एव तात्पर्यात्। अन्यथा शुद्धसाध्यव्यभिचारसिद्धौ तस्यानुपयोगादिति वाच्यम्। महानसीयधूमवान् महानसीयवह्नेः इत्यत्र महानसीयधूमत्वावच्छिन्नस्य व्यापकं व्यञ्जनवत्त्वं यत्र अथ च महानसीयार्द्रेन्धनाप्रभववह्नेरव्यापकं व्यञ्जनवत्त्वम् एतदभिप्रायेणैव क्वचिन्महानसत्वमित्युक्तम्। वस्तुतस्तु शुद्धसाध्यव्यापकोपाधिस्थल इव प्रकृतेऽपि विशेषणाव्यभिचारीति ग्रन्थस्य न तात्पर्यमिति ध्येयम्। व्यभिचारोन्नयनप्रकारस्तु उक्तदिशाऽवसेयः। **सर्वविधस्येति**। साधनावच्छिन्नपक्षधर्मावच्छिन्नोदासीनधर्मावच्छिन्नशुद्धसाध्यव्यापकोपाधिसमूहस्य उक्तस्वरूपमिति।

व्यभिचारोन्नयनस्वरूपमुपपादयति - **समव्याप्तस्येति** मूलम्। यन्मते समव्याप्त एवोपाधिस्तन्मत(ते) साधारण्येन विषमव्याप्तस्योपदूषकतायामुपयोगं दर्शयति - **विषमव्याप्तस्येति** मूलम्। वाकारोऽनास्थायाम्। तथा च समव्याप्तो विषमव्याप्तो वोपाधिः स्वव्यभिचारेण साध्यव्यभिचारोन्नायको भवत्येवेति विषमव्याप्तेन किमपराद्धं येन तस्योपाधिता न स्वीक्रियते इति भावः। समव्याप्तो यथा धूमवा[न्] वह्नेः इत्यत्र आर्द्रेन्धनप्रभवो वह्निः। विषमव्याप्तो यथा धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनमुपाधिः। तयोः। **साध्यव्यापकस्येति**। साध्यस्य धूमस्य शुद्धसाध्यस्य धूमत्वावच्छिन्नस्य साध्यतावच्छेदकावच्छिन्नस्येति यावत्। अन्यथा तद्वत् साध्यव्यापकस्य पाषाणवत्त्वादेः व्यभिचारेण वह्नित्वावच्छिन्नव्यभिचाराव्यापकत्वादिति शुद्धेत्यभिहितम्। पाषाणवत्त्वादेर्वह्नित्वावच्छिन्नस्य साध्यतावच्छेदकावच्छिन्नस्याव्यापकत्वादिति भावः। साध्यव्यापकस्य आर्द्रेन्धनप्रभववह्नेरार्द्रेन्धनस्य वा व्यभिचारेण साधनवर्तिना साध्यव्यभिचारो धूमस्य व्यभिचारः धूमाभाववद्वृत्तित्वं व्यभिचारः। यथा वह्निः धूमव्यभिचारी आर्द्रेन्धनप्रभववह्निव्यभिचारित्वात् आर्द्रेन्धनव्यभिचारित्वात् वा, यत्र यत्र आर्द्रेन्धनप्रभववह्निव्यभिचारित्वं तत्र तत्र धूमवद्व्यभिचारित्वं यथा द्रव्यत्वादि। अनुद्भवं तर्कमाह - **व्यापकव्यभिचारिण** इति। यदि व्यापकव्यभिचारे सत्यपि न व्याप्यस्य व्यभिचारः किन्तु व्यापकव्यभिचार(रे) सत्यपि [अ]धिकरणेऽपि व्याप्यस्य वृत्तित्वं तदा व्यापकतैव न स्यात्। न वा तस्य व्याप्यत्वमिति तदभाववद्वृत्तित्वेन तस्य व्यापकविरहात् व्याप्यविरहात् च। [23 B] **स्फुट एवेति**। इतराविशेषितेनैव स्वव्यभिचारेण साध्यव्यभिचारोन्नायकत्वात् स्फुटत्वम्। **साधनावच्छिन्नेत्यादि**। साधनावच्छिन्नस्य मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं यत् शाकपाकजत्वं तद्व्यभिचारेण मित्रातनयत्वविशेषितेन श्यामत्वव्यभिचारस्य साधनात् इतरविशेषितेनेत्यस्फुटस्येति ध्येयम्। एवं **पक्षधर्मावच्छिन्नेति**। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र पक्षधर्मो यो बहिरिन्द्रियत्वं

तदवच्छिन्नलौकिकप्रत्यक्षात्मकसाध्यस्य व्यापकं यदुद्भूतरूपवत्त्वं तद्व्यभिचारेण साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यभिचारित्वस्य तदभाववद्वृत्तित्वम् उन्नेयमिति। **व्यभिचारित्वमेवे**ति। एवकारेण तद्व्यभिचारेण साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिव्यभिचारवति तादृशपक्षधर्मसाधनरूपविशेषणविशिष्टे शुद्धसाध्याव्यभिचारायोगो व्यवच्छिद्यते एवकारेणेत्यर्थः। तथा च शुद्धसाध्यव्यभिचारस्य व्यापकत्वं तत्तद्विशेषणविशिष्टावच्छिन्नसाध्यव्यापकव्यभिचारोपाधिव्याप्यत्वमिति भावः। **विशेषणाव्यभिचारिणी**ति मूलम्। विशेषणाव्यभिचारिणो ध्वंसो विनाशी जन्यत्वात् इत्यत्र विशेषणं जन्यत्वं साध्यस्य विशेषणम् तस्याव्यभिचारिणि जन्यत्वे साधने विशिष्टसाध्यस्य जन्यत्वं विशिष्टविनाशित्वस्य साध्यस्य व्यापकं यद्भावत्वमुपाधिः। तद्व्यभिचारेण तदभावध्वंसवृत्तित्वेन जन्यत्वस्य जन्यत्वावच्छिन्नविनाशित्वाभाववद्वृत्तित्वसिद्धिदशायां विशेषणव्यभिचारित्वबाधसहकारेण विनाशित्वव्यभिचारः सिद्ध्यति।

**अत एव नार्थान्तरं विशेषणाव्यभिचारित्वेन ज्ञाते साधने विशिष्टव्यभिचारः सिद्ध्यन् विशेष्यसाध्याव्यभिचारम् आदायैव सिद्ध्यति पक्षधर्मताबलात् अन्यथा प्रतीतेरपर्यवसानात्। न च पक्षधर्मताबलात् प्रकृतसिद्धौ अर्थान्तरम्। यद्वा प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वात् महत्त्ववत्, तथा मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयनत्वाव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकव्यभिचारित्वात् अघटत्ववत्, अव्यभिचारश्च तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वं तच्चाभेदेऽपि।**

**अत एव नार्थान्तरम्**। अन्यथा शुद्धसाध्यव्यभिचारस्य प्रश्ने विशिष्टसाध्यव्यभिचारेणोत्तरेऽर्थान्तरमेव प्रकृतासम्बद्धत्वात्। न च शुद्धसाध्यव्यभिचारोन्नयनार्थमादौ विशिष्टव्यभिचारः साध्यः। तथा च प्रकृतोपयोगित्वात् नार्थान्तरत्वमिति वाच्यम्। तथापि अप्राप्तकालत्वात् निराकाङ्क्षत्वात् तदभिधानं दूषणावहमेवेति आदौ शुद्धसाध्यव्यभिचार एवोद्भावनीयः। तत् कथमित्याकाङ्क्षायामेव विशेषणवति व्यापकसाध्यव्यभिचारस्य उपन्यासात् अप्राप्तकालत्वमर्थान्तरत्वमेवेति भावः।

तदेव विवृणोति - **न हीति** टीका। विशिष्टव्यभिचारसाधनानन्तरं जन्यत्वविशिष्टविनाशित्वव्यभिचारसिद्ध्यनन्तरं विशेष्यव्यभिचारः विनाशित्वव्यभिचारः। तस्य साधनमनुमानम्। **येनेति**। प्रकृतासम्बद्धत्वात् इति। अर्थान्तरत्वं यथाकथञ्चित् प्रकृतसम्बद्धत्वेऽपि अप्राप्तकालत्वमिति शेषः। **किन्त्विति**। तत्सिद्धिरेव विशिष्टसाध्यव्यभिचारसिद्धिरेव। **विशेष्यव्यभिचारसिद्धिरिति**। पक्षधर्मताबलात् विशेषणाभावबाधसहकारेण विशेष्य-

व्यभिचारमादाय विशिष्टव्यभिचारः सिद्ध्यतीति शेषः। **पक्षधर्मते**ति पदार्थं विवृणोति। **यदाऽऽलिङ्ग[ने]**नेति। यस्य विशेष्याभावस्य आलिङ्गनं विषयीकरणं तद्विना [24 A] पक्षे जन्यत्वादौ ध्वंसरूपाधिकरणवर्तिनि साध्यसिद्धिरेव न भवति। साध्यसम्प्रतीते(तेः) साध्यानुमितेः अपर्यवसान[म्] असम्भवः। तदेव साध्यं यदाऽऽलिङ्ग[ने]नैव यद्विषया(यी)कृत्वैव पक्षेऽनुमितिः। पर्वतीयवह्निविषयत्वं भवति तदेव साध्यम्, पक्ष-धर्मताबलात् सिद्ध्यतीति। यथा पर्वते महानसीयादिवह्नेर्बाधात् न महानसीयादिवह्निसिद्धिः। पर्वतो वह्निमान् इत्यनुमितेः पर्वतीयवह्निविषयत्वम्। अपर्यवक्षानसम्भवः (? अपर्यवसानमसम्भवः)। पर्वतीयवह्निं विषयीकृत्वैव पर्वतो वह्निमान् इत्यनुमानमिति पर्वतीयवह्निः पक्षधर्मताबलात् सिद्ध्यति। तथा प्रकृतेऽपि इति भावः।

**अन्यथे**ति मूलम्। यदि बाधवशात् महानसीयादिवह्न्यविषयत्वे सति पर्वतीयवह्निमपि न विषयीकुर्यात् तदा किंविषयकं वह्न्यनुमानं स्यात् इत्येव प्रतीतेरपर्यवसानम्। तथा प्रकृतेऽपि विशेषणव्यभिचारस्य बाधात् तदविषयीकरणे सति यदि विशेष्यव्यभि[चार]मपि न विषयीकुर्यात् तदा व्यभिचारानुमानं किंविषयकं स्यादिति भावः। न हि निर्विषयकम् अन्यविषयकं वा सल्लिङ्गपरामर्शजन्यानुमानम्। एतच्च विशेषणाव्यभिचारीत्यादि प्रकृताभिप्रायेण। अवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारेण शुद्धसाध्यव्यभिचारानुमानाभिप्रायेण। अन्यत्र धूमवान् वह्नेः इत्यादौ आर्द्रेन्धनप्रभववह्निव्यभिचारेणार्द्रेन्धनव्यभिचारेण शुद्धसाध्यस्य धूमस्य व्यभिचारानुमाने।

**उक्ते**ति। उक्तप्रकारेण शुद्धसाध्यव्यभिचारानुमानप्रकारेण। व्यभिचारोन्नयने व्यभिचारानुमाने। नार्थान्तरम्, प्रकृतसम्बद्धत्वात्। शुद्धसाध्यव्यभिचारानुमानस्यैव प्रकृतोत्तरत्वादिति भावः। ननु विशेषणाभावविशेष्या-भावतत्सम्बन्धाभावेभ्यो अतिरिक्त एव विशिष्टाभावः शक्तिवादे व्यवस्थापितः, तत् कथं विशेषणाभावबाधे विशेष्याभावं विषयीकृत्वैव विशिष्टाभावसिद्धिरित्युक्तम्। तुष्यतु दुर्जन इति न्यायेन भवतु वा विशिष्टाभावो नातिरिक्तः किन्तु विशेषणाभावो विशेष्याभावस्तत्सम्बन्धभावो वाऽस्तु। तथापि विशिष्टाभावत्वेनैव सिद्धि-र्भवतु, न तु विशेष्याभावत्वादिना प्रकारेण। न हि दण्डवति पुरुषाभावदशायां दण्डी नास्तीत्यत्र पुरुषाभावत्व-प्रकारेण न विशिष्टाभावसिद्धिः किन्तु विशिष्टत्वाभावत्वप्रकारणैव। तथा च जन्यत्वविशिष्टविनाशित्व-व्यापकभावत्वव्यभिचारेण जन्यत्वविशिष्टव्यभिचारसिद्धौ कथं विनाशित्वव्यभिचारं विषयीकृत्वैव सिद्ध्यति। तस्य विनाशित्वव्यभिचारस्य जन्यत्वविशिष्टविनाशित्व(त्वं) व्यभिचारी(रि) [त]दतिरिक्तत्वात्। अनतिरिक्तत्वेऽपि जन्यत्वविशिष्टविनाशित्वप्रकारेणैव सिद्ध्यतु, न विनाशित्वव्यभिचारप्रकारेणैव। तथा च शुद्धसाध्यव्यभिचारस्याकाङ्क्षितत्वात्। तत्त्वेनैवोत्तरस्याणु(स्यान्वि)तत्वात्। ननु विशिष्टव्यभिचारित्व-प्रकारेणैव विशिष्ट उत्तरे अर्थान्तरम् इत्याशङ्कते - **नन्वि**ति। विशिष्टाभावविशेष्याभावयोः जन्यत्वविशिष्ट-विनाशित्वाभावयोर्भेदेनातिरिक्तत्वेन घटितयोः विशिष्टव्यभिचारशुद्धसाध्यव्यभिचारयोरप्यतिरिक्तत्वेन

पक्षधर्मताबलादपि विशिष्टव्यभिचारः जन्यत्वविशिष्टविनाशित्वव्यभिचारः सिद्ध्यति। अनुमितेः व्यभिचारानुमितेः व्यापकतावच्छेदकप्रकारेण विशिष्टसाध्यव्यापकव्यभिचारनिष्ठा या [24 B] व्याप्यता तन्निरूपिता या व्यापकता तदवच्छेदकं विशिष्टव्यभिचारित्वं तत्प्रकारेणैव साध्यानुमितिरिति नियमात्। तथा च कथं विनाशित्वव्यभिचारित्वप्रकारेणानुमितिः विनाशित्वव्यभिचारस्य भावत्वव्यभिचारव्यापकतानवच्छेदकत्वादिति। न हि यत्र यत्र भावत्वव्यभिचारः तत्र तत्र विनाशित्वव्यभिचारः प्रागभावत्वे व्यभिचारात्। कथं व्यापकतानवच्छेदकविनाशित्वव्यभिचारित्वप्रकारेण साध्यसिद्धिः इति। न हि पक्षधर्मताबलात् पर्वतीयवह्नित्वप्रकारेण वह्निसिद्धिः किन्तु वह्नित्वप्रकारेण वह्निसिद्धिरिति, पर्वतीयवह्नित्वस्य व्यापकतानवच्छेदकत्वात्। तथा च प्रकृते विशिष्टव्यभिचारित्वप्रकारेण सिद्धौ अर्थान्तरं विशेष्यव्यभिचारित्वप्रकारेण सिद्धौ विशेष्यव्यभिचारित्वस्य व्यापकतावच्छेदकत्वात् तत्प्रकारकपरामर्शविरहात् कारणबाधः इति।

अपरितोषादाह - **यद्वेति** मूलम्। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र उद्भूतरूपवत्त्वमुपाधिः। तस्य यथा शुद्धसाध्यव्यभिचारोन्नायकत्वं तदाह - **प्रत्यक्षस्पर्शाश्रयत्वमिति** मूलम्। साधने साध्यव्यभिचार उन्नेय इति साधनमेव पक्षीकृतम्। तच्च साधनं प्रत्यक्षस्पर्शाश्रयत्वम्, प्रत्यक्षत्वं यत् साध्यं तद्व्यभिचारि तदत्यन्ताभाववर्ति। साध्यं प्रत्यक्षत्वं बहिरिन्द्रियपरतया व्याख्येयम्। तेन नात्मनि व्यभिचारः, आत्मनि द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरूपव्यभिचारस्य सत्त्वात् प्रत्यक्षत्वव्यभिचारस्याभावात्। व्यभिचारसाधने व्यभिचारः इत्थं तु न भवति। बहिरिन्द्रियजन्यप्रत्यक्षत्वस्य व्यभिचारस्य साध्यस्य आत्मन्यपि सत्त्वात् न व्यभिचार इति भावः। हेतुमाह - **द्रव्यत्वाव्यभिचारीति**। द्रव्यत्वाव्यभिचारित्वे सति द्रव्यत्वात्यन्ताभाववदवृत्तित्वे सतीत्यर्थः। **द्रव्येति**। द्रव्यप्रत्यक्षं द्रव्यबहिरिन्द्रियजन्यप्रत्यक्षम्, तद्व्यापकं यदुद्भूतरूपवत्त्वं तद्व्यभिचारित्वात् तदत्यन्ताभाववद्वृत्तित्वात् इति हेत्वर्थः। **महत्त्ववदिति** मूलम्। महत्त्वं यथा द्रव्यत्वाव्यभिचारि उद्भूतरूपव्यभिचारि बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षव्यभिचारि च तथा प्रत्यक्षस्पर्शाश्रयत्वं द्रव्यत्वाव्यभिचारि उद्भूतरूपव्यभिचारि बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षव्यभिचारि इत्यर्थः।

पदकृतिमाह - **साध्ये हेताविति**। प्रत्यक्षत्वव्यभिचारीति यत् साध्यं तन्निविष्टं यत् प्रत्यक्षपदं तद् बहिरिन्द्रियजन्यप्रत्यक्षपरतया व्याख्येयम्, तच्च प्रत्यक्षं लौकिकमपि ध्येयम्। अन्यथा आत्मनि अप्युप(पा)यवशा[त्] बहिरिन्द्रियजन्यप्रत्यक्षत्वसत्त्वात् स दोषः तदवस्थ एवेति ध्येयम्। हेतावपि प्रत्यक्षपदं बहिरिन्द्रियजन्यप्रत्यक्षत्वपरम्। अन्यथा उद्भूतरूपवत्त्वस्य प्रत्यक्षत्वव्यापकत्वविरहात् हेत्वसिद्धिर्हेतुविशेषणासिद्धिः। एतदपि प्रत्यक्षं लौकिकप्रत्यक्षपरम्। अन्यथा द्रव्यबहिरिन्द्रियजन्यप्रत्यक्षत्वस्यापि न व्यापकम् उद्भूतरूपमिति तथैव हेत्वर्थेऽसिद्धिरिति ध्येयम्। **तद्रूपत्वादाविति**। तद्रूपत्वे प्रत्यक्षात्मकघटादिरूपत्वे। तत्पदं तु रूपत्वे अतीन्द्रिय-

रूपाधिकरणे प्रत्यक्षत्वे व्यभिचारस्यापि सत्त्वात् न व्यावृत्तिं कर्तुं शक्यते [ते]नेति तत्पदम्, इत्थं च घटीयरूपत्वे उद्भूतरूपव्यभिचारस्य सत्त्वात् [25 A] तत्र च प्रत्यक्षत्वव्यभिचारस्य साध्यस्यासत्त्वात् नाव्यभिचार इति। **द्रव्यत्व-मिति**। द्रव्यत्वमव्यभिचारि व्यापकं यस्य उद्भूतरूपस्येति अन्वयः। **न त्विति षष्ठीतत्पुरुष** इति। द्रव्यत्वस्याव्य-भिचारिद्रव्यत्वस्य व्यापकम्। **तथा सतीति**। यदि षष्ठीतत्पुरुषः द्रव्यत्वस्य व्यापकत्वे सतीत्यर्थः। इत्थं च किं भवति तदाह - **तावन्मात्रेति**। तावन्मात्रं द्रव्यत्वव्यापकम्, तन्मात्रस्य व्याप्यत्वे प्रत्यक्षत्वव्यभिचारित्वरूपसाध्यस्य च व्याप्यत्वे शेषवैयर्थ्यम् इति शेषः। उद्भूतरूपव्यभिचारित्वरूपः तस्य वैयर्थ्यम्। **निरर्थकतेति**। यथा यद् द्रव्यत्वस्य व्यापकं सत्तापरिमाणादि तदवश्यं गगनादिवृत्तित्वेन प्रत्यक्षत्वव्यभिचारि भवत्येवेति किमर्थमुद्भूतरूपवत्त्वे सतीति विशेषणं देयम्। यन्मते व्यर्थविशेषणत्वं न दूषणावहं तन्मते दूषणान्तरमाह - **दृष्टान्तासिद्धिरिति** टीका। दृष्टान्तं तावद् महत्त्वम्। तत्र च साध्यस्य प्रत्यक्षत्वव्यभिचारस्य विद्यामानत्वात्। साधनस्य द्रव्यत्वव्यापकत्वे सति उद्भूतरूपव्यभिचारित्वस्यासत्त्वात्। महत्त्वे द्रव्यत्वव्यापकत्वविरहात् परमाण्वादावेव व्यभिचारात्। विशेषणाभावसहकृतहेतुविशिष्टाभावस्य सत्त्वात्। **साध्यवान्** साधनविकलो दृष्टान्त इति दृष्टान्तासिद्धिः इति। स्वरूपासिद्धावपि **ध्येयम्**। प्रत्यक्षस्पर्शाश्रयत्वे व्यभिचारसाधनपक्षे द्रव्यत्वव्यापकत्वविरहादेव विशेषणा-भावसहकृतविशिष्टाभावस्य सत्त्वात् स्वरूपासिद्धिरिति। **तद्घटत्वेति**। तद्घटत्वे द्रव्यत्वाव्यभिचारस्य **सत्त्वात्**। प्रत्यक्षत्वव्यभिचारित्वरूपसाध्यस्य विरहात् व्यभिचारः, तद्वारणाय **द्रव्यप्रत्यक्षत्वव्यापकेति**। द्रव्यप्रत्यक्षस्य यद् व्यापकम् उद्भूतरूपं **तद्व्यभिचारित्वस्य** असत्त्वेन तद्घटत्वे विशेष्याभावसहकृतहेतोः विशिष्टाभावस्य सत्त्वात् न व्यभिचारः। **यथा साध्यं नास्ति तथा** तद्घटत्वे हेतुरपि नास्तीत्यर्थः। यथा विशेषणविशेष्ययोरसन्निवेशेन **वैयर्थ्यमाशङ्कते**। सन्निवेशे तु न वैयर्थ्यमिति। समाधत्ते - **यद्यपीत्यादिना**। यद्यपि प्रत्यक्षत्वव्यापकव्यभिचारित्वात् **इत्यस्यैव सार्थकत्वे सत्यन्तस्य वैयर्थ्यम्**। तथा च प्रत्यक्षपदमपि बहिरिन्द्रियजन्यलौकिकप्रत्यक्षपरं न कार्यम्, **यथाश्रुतमेवं सम्यक्**। तथा च **प्रत्यक्षस्पर्शाश्रयत्वं** प्रत्यक्षत्वव्यभिचारि प्रत्यक्षत्वव्यापकात्यन्ताभाववद्वृत्तित्वात् **इत्यस्यैव** गमकत्वमस्तु इति यद्यपीत्यादेराशङ्कार्थः। समाधत्ते - **तथापीति**। व्यभिचारस्य प्रत्यक्षत्व-व्यापकव्यभिचारस्य अभावगर्भतया अभावघटिततया। **द्रव्यत्वेति**। पूर्वं द्रव्यबहिरिन्द्रियजन्यप्रत्यक्षत्वस्य यद्व्यापकम् उद्भूतरूपादि तदत्यन्ताभाववद्वृत्तित्वस्य हेतोः कृतकत्वात्। भवद्भिस्तु प्रत्यक्षत्वव्यापकात्यन्ता-भाववद्वृत्तित्वम् एवास्तु कृतकत्वम्। तेन वैयर्थ्यम्। द्रव्यबहिरिन्द्रियजन्यप्रत्यक्षत्वव्यापकत्वात्यन्ताभावात् [25 B] शुद्धप्रत्यक्षव्यापकात्यन्ताभावो भिन्न एवेति न हि तद्घटितो हेतुः कृतः येन वैयर्थ्यमाशङ्क्येत। न हि प्रत्यक्षत्वव्यापकात्यन्ताभावे द्रव्यं विशेषणं येन तस्य वैयर्थ्यमाशङ्क्येत। परमार्थं वर्णयति - **वस्तुत** इति। तथा च द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरूपव्यभिचारित्वादित्येव हेतुः कृतः। तत्र च न वैयर्थ्यगन्धोऽपीति भावः। **न चैवमिति** टीका। अस्य उद्भूतरूपत्वस्य उपाधित्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वेन

व्यभिचारानुमापकत्वं शुद्धसाध्यव्यभिचारानुमापकत्वं न निर्वहेत्। केवलतद्व्यभिचारेण हेतुना न निर्वहेदित्यर्थः। इतराविशेषितेन तदेव निर्व(र्वा)हयति। **यदीति**। तस्य उद्भूतरूपस्य पर्यवसितं यत् साध्यं शुद्धसाध्यं तस्य व्यापकत्वज्ञानं साध्यव्यभिचारानुमाने प्रयोजकं भवति। भवद्भिः अवच्छिन्नसाध्यस्यैव व्यापकत्वात् अवच्छिन्नसाध्यव्यभिचारव्याप्य एव एतद्व्यभिचार इति यद्धर्मावच्छिन्नं यस्य व्याप्यं तद्धर्मावच्छिन्नव्यभिचारस्यैव तद्व्यभिचारव्यापकत्वात्। तथा च बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षस्य व्यापकम् उद्भूतरूपवत्त्वं बहिर्द्रव्यत्वावच्छिन्न-प्रत्यक्षत्वव्यभिचारमेव स्वव्यभिचारेणानुमातुं शक्नोति। कथं स्वव्यभिचारेण बहिरिन्द्रियजन्यप्रत्यक्षत्व-व्यभिचारमनुमापयति स्वव्यभिचारस्य तदप्यव्यभिचाराव्याप्यत्वात् इत्याशङ्कार्थः। **विपक्षेति** टीका। विपक्षबाधकत्वेन विपक्षे अप्रयोजकत्वशङ्का। तद्बाधकत्वेन तदुत्सारकत्वेन व्याप्तिग्रहौपयिकतया शुद्धसाध्यव्यभिचारेण सह उपन्यस्तहेतोः द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरूपव्यभिचारित्वहेतोः व्याप्तिग्रहौपयिकतया, अप्रयोजकत्वशङ्कानिवृत्तिद्वारा व्याप्तिग्रहौपयिकतया तत्प्रयोजक[त्व]सम्भवात्। अवच्छिन्नसाध्यव्यापकत्वस्य प्रयोजकत्वसम्भवात्। तथाहि प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि बहिर्द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरूपव्यभिचारित्वात् इत्यत्र द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरूप-व्यभिचारित्वस्य बहिरिन्द्रियजन्यप्रत्यक्षत्वेन व्याप्तिग्रहे किं प्रयोजकम्? न हि सहचारदर्शनमात्रेणैव व्याप्तिग्रहः, पाषाणवत्त्वलोहलेख्यत्वयोरपि व्याप्तिग्रहप्रसङ्गात्। तस्मादप्रयोजकत्वाशङ्का अवश्यमपेक्षणीया। सा च शङ्का हेत्वभिमतं वस्तु स्यात् साध्याभिमतं न स्यात् इत्याकारा। तन्निवृत्तिस्तु विपक्षबाधकतर्कादेव भवति। तच्च प्रकृते यथा द्रव्यत्वविशिष्टबहिरिन्द्रियजन्यप्रत्यक्षत्वस्य व्यापकमुद्भूतरूपवत्त्वम्। तद्व्यभिचारश्च द्रव्यत्वविशिष्टबहिरिन्द्रियजन्यप्रत्यक्षत्वव्यभिचारस्य व्याप्यम्। व्यापकव्यभिचारो(रे) व्याप्यव्यभिचारस्या-वश्यंसा(भा)वनियमात् व्यापकत्वमेव न स्यादिति। तथा चोद्भूतरूपव्यभिचारे सति वायौ द्रव्यत्वविशिष्ट-प्रत्यक्षत्वव्यभिचारेण [26 A] अवश्यं भवितव्यम्। तत्र च विशेषणस्य द्रव्यत्वस्याव्यभिचारो हेतौ एव निविष्टः विशेषणाव्यभिचारे विशिष्टव्यभिचारे सति विशेष्यव्यभिचारस्यैव भावात् इति विपक्षबाधकतर्कस्फोरणाय अवच्छिन्नसाध्यव्यापकत्वमुपाधेरुपयुज्यते इति भावः। ननु वायुः बहिरिन्द्रियजन्यप्रत्यक्षः प्रमेयत्वात् इत्यत्र उक्तप्रकारेण व्यभिचारानुमानं न सम्भवति। प्रमेयत्वस्य द्रव्यत्वाव्यभिचारित्वविरहात् हेतोः स्वरूपासिद्धिः स्यात् इत्याशङ्कते - **यद्यपीति** टीका। **प्रमेयत्वादि[ ति] हेतौ**। वायुर्बहिरिन्द्रियजन्यप्रत्यक्षः प्रमेयत्वादिति अनुमाने प्रमेयत्वादिति हेतौ। **प्रत्यक्षेति**। प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि इति व्यभिचारसाधकानुमाने। **निरुक्तमिति**। निरुक्तं यत् **साधनं** द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरूपव्यभिचारित्वात् इत्याकारके। **स्वरूपासिद्धिरिति**। प्रमेयत्वे द्रव्यत्वाव्यभिचारित्वरूपविशेषणविरहात् स्वस्वहेतोर्विशिष्टाभावस्य सत्त्वात् स्वरूपासिद्धिः। समाधत्ते-**तथापीति** टीका। **तथा च** द्रव्यत्वाव्यभिचारित्वे सति इति विशेषणं न हेतौ देयम्। तथा चेत्थमनुमानं प्रत्यक्षं मेयत्वं

बहिरिन्द्रियजन्यप्रत्यक्षत्वव्यभिचारि द्रव्ये उद्भूतरूपव्यभिचारित्वात् इत्येव हेतुः कर्तव्यः । तथा च न स्वरूपासिद्धिरिति द्रव्ये वायौ उद्भूतरूपव्यभिचारस्य प्रमेयत्वेऽपि सत्त्वात्। **तन्त्रमिति**। शुद्धसाध्यव्यभिचारानुमाने इत्थमेवानुमानं तन्त्रमिति भावः। ननु विशिष्टसाध्यव्यापकोपाधिस्थले मूलोपदर्शितप्रकारारि(दि)त्याशङ्कते। **न हीति** टीका। [न हि] एकेन रूपेण मूलोपदर्शितरूपेणैव सर्वत्र सर्वसाधनसाधारणा व्यभिचारानुमितिः येन मूलस्यासङ्गतिमाशङ्क्येत। **उक्तप्रकारमिति** टीका। उक्तप्रकारं शुद्धसाध्यव्यभिचारोन्नयनप्रकारं साधनावच्छिन्नसाध्यव्यापकोपाधिस्थले दर्शयति।

**तथा मित्रेति**। कोकिलः श्यामः मित्रातनयत्वात् इत्यत्र शाकपाकजत्वोपाधौ मित्रातनयत्वं पक्षः पूर्वोक्तानुमाने यत् साधनं श्यामत्वव्यभिचारि। श्यामत्वात्यन्ताभाववद्वृत्तिहेतुमाह - **मित्रातनयत्वेति**। मित्रातनयत्वस्य अभेदेन स्वाव्यभिचारित्वं सिद्धमेव। न स्वव्यभिचारित्वे व्याप्यत्वे स्वतोऽप्यपेक्षिते अप्रयोजकत्वात्। परार्थानुमाने दृष्टान्तविरहान्न तथा प्रयुज्यते इत्येवमात्रम्, कदाचित् प्रयुज्यतेऽपि तथा समयब(बा)धात्। श्याममित्रातनयत्वस्य व्यापकं यत् शाकपाकजत्वं तद्व्यभिचारित्वात् तदत्यन्ताभाववद्वृत्तित्वात् । **अघटत्ववदिति** । घटभेदतदवत्(त्ववत्)। सामान्यशब्दो विशेष्यपरः गौरमित्रातनयत्ववदित्यर्थः। अन्यथा अघटत्वस्य घटभेदस्य मित्रातनयत्वाव्यभिचारित्वविरहात् घटादौ मित्रातनयत्वव्यभिचारसत्त्वात् साधनविकलो दृष्टान्तः इति दृष्टान्तासिद्धिः । सामान्यशब्दस्य अघटत्वस्य विशेषपरत्वे गौरमित्रातनयत्वपरत्वे न दृष्टान्तासिद्धिः । गौरमित्रातनयत्वस्य मित्रातनयत्वाव्यभिचारादित्यर्थः । **अव्यभिचारश्चेति** । तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वम् । तच्चाभेदेऽप्यस्तीति । तथा च मित्रातनयत्वात्यन्ताभावाप्रतियोगित्ववर्तमानत्वात् मित्रातनयत्वाव्यभिचारित्वं मित्रातनये वर्तते एवेति न स्वरूपासिद्धिरिति भावः ।

**न चेति** टीका। अघटत्वे घटभेदे मित्रातनयत्वाव्यभिचारित्वस्य विरहात् साधनविकलः साध्यवान् दृष्टान्तः इत्याशङ्कार्थः। समाधत्ते [26 B] - **यत्रेति** टीका। मित्रातनये गौरमित्रातनये अघट इति नामनि। **आप्तवाक्यादिनेति** । आप्तवाक्यादिना तस्मिन् गौरमित्रातनये शाकपाकजत्वाभावोऽवगतः। तत्र शाकपाकजत्वव्यभिचारस्त(स)त्त्वात् मित्रातनयत्वाव्यभिचारस्य सत्त्वात् न दृष्टान्तासिद्धिः इति। तथा च अघटत्वं चैत्रत्वादिवत् गौरमित्रातनयवृत्तिजातिविशेष एव, न त्वस्य घटभेदः, न च दृष्टान्तस्य साधनवैकल्यम्। **तत्रेति** टीका। तत्र गौरमित्रातनये उपाध्यभावस्यानवगतौ सन्दिग्धत्वापत्तिः। स मित्रातनयो गौरो न वेति। यथा डित्थ इति संज्ञाभेदः तथा अघट इत्यपि नाम। **तद्वृत्तीति** अघटवर्तिधर्मोऽघटत्वमिति । न त्वव्यभिचारित्वं तदवच्छिन्नसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं येन अघटत्वे घटभेदे मित्र(भिन्न)घटभेदसमानाधिकरणपटादिवृत्त्यत्यन्ताभावस्य प्रतियोगित्वाऽव्यभिचारित्वं न स्यात्। किन्तु प्रकृताव्यभिचारिपदेन त्वस्य यत्किञ्चिदधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वमेव

वक्तव्यम् । तथा च घटभेदस्य यत्किञ्चिदधिकरणं गौरमित्रातनयः तन्निष्ठो योऽत्यन्ताभावः तदप्रतियोगित्वस्य मित्रातनयत्वे सत्त्वात् मित्रातनयत्वाव्यभिचारित्वस्य इत्थंभूतस्याघटत्वेऽपि सत्त्वात् न दृष्टान्तासिद्धिः । तच्चाव्यभिचरितत्वं तत्सामानाधिकरण्यमात्रपर्यवसन्नम् । तथा च मित्रातनयत्वाव्यभिचारित्वे सति इत्यस्यार्थः । **मित्रातनयत्वसमानाधिकरणे**ति । तथा च किं यत्किञ्चिदित्यादिविवक्षया इत्याशङ्कार्थः । **यद्यपी**त्यस्य व्यभिचारिसाधारणमित्रातनयत्वस्य यद्व्यभिचारि सत्ताद्रव्यत्वादि तत्साधारणसत्ताद्रव्यत(त्व)योः यत्किञ्चिन्मित्रातनयरूपाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वात् । तथा च सत्ताद्रव्यत्ववत् श्याममित्रातनयकोकिलान्यतरत्वेऽपि मित्रातनयत्वाव्यभिचारित्वस्य सत्त्वात् शाकपाकजत्वव्यभिचारित्वस्य सत्त्वात् उक्तहेतोर्व्यभिचारात् व्यभिचार इति भावः । समाधत्ते - **तथापी**ति टीका । **सती**ति । मित्रातनयत्वाव्यभिचारित्वे सतीति सूत्रस्थसप्तमीमहिम्ना विशिष्टवैशिष्ट्यलाभः । विशिष्टवैशिष्ट्यमेव दर्शयति - **यदधिकरणावच्छेदेने**ति । अयं भावः - सतिसप्तम्या समभिव्याहृतपदार्थः, समकालत्वं समभिव्याहृतपदार्थतावच्छेदकावच्छिन्नत्वं चार्थः । यथा गोषु दुह्यमानासु आगतः इत्यत्र गोदोहनसमकालीनत्वं गोदोहनस्य प्रतीयते एवं गुणकर्मान्यत्वे सति सत्त्वात् इत्यत्र गुणकर्मान्यत्वावच्छिन्नसत्त्वं प्रतीयते । तत्र च यथा यदधिकरणगुणकर्मान्यत्वं तत्रैव सत्त्वाधिकरणमित्येव विशिष्टवैशिष्ट्यं गुणकर्मान्यत्वाधिकरणतावच्छिन्नसत्ताधिकरणताकत्वमिति यावत् । तेन गुणकर्मान्यत्वस्य सत्तया सह द्रव्ये सामानाधिकरण्यसत्त्वेऽपि न गुणे कर्मणि वा गुणकर्मान्यत्वविशिष्टसत्ताप्रतीतिः । तथा मित्रानतयत्वाव्यभिचारित्वे सति शाकपाकजत्वव्यभिचारित्वात् इत्यत्र यदधिकरणान्तर्भावेन मित्रातनयत्वस्याव्यभिचारित्वं तदधिकरणान्तर्भावेन शाकपाकजत्वव्यभिचारित्वं हेतुः, तथा च कोकिलश्याममित्रातनयत्वान्यतरत्वस्य शाकपाकजत्वव्यभिचारित्वनिरुक्तमित्रातनयव्यभिचारित्वसत्त्वेऽपि नैकाधिकरणान्तर्भावेन तयोः सत्त्वम्, श्याममित्रातनयरूपाधिकरणान्तर्भावेन [27 A] निरुक्तमित्रातनयाव्यभिचारित्वं कोकिलाधिकरणत्वेन च शाकपाकजत्वव्यभिचारित्वमिति नैकाधिकरणान्तर्भावेन तयोः सत्त्वमिति न मित्रातनयत्वाव्यभिचारित्वविशिष्टशाकपाकजत्वव्यभिचारित्वं श्याममित्रातनयकोकिलान्यतरत्वे वर्तते येन श्यामत्वव्यभिचारित्वस्य साध्यस्य तत्र विरहेण व्यभिचारः स्यादिति तथापीत्यादेराखण्डलार्थः । **तेन न व्यभिचारी**ति । व्यभिचारोऽत्र श्यामत्वरूपव्यभिचारित्वरूपसाध्यस्य व्यभिचारो बोध्यः । व्यभिचारिसाधारण्यमुपात्तमित्रातनयकोकिलान्यतरत्वादिरूपव्यभिचारिसाधारण्यम् । तत्तूक्तमेव । **इदं चे**ति । इदं च रूपं मित्रातनयत्वाव्यभिचारित्वम्, अश्यामो मित्रातनयः गौरमित्रातनयः, अघटत्वस्य यत्किञ्चिदधिकरणं गौरमित्रातनयः, तद्वृत्तिर्योऽत्यन्ताभावः तदप्रतियोगित्वस्य मित्रातनयत्वे सत्त्वात् । मित्रातनयत्वमघटत्वस्य निरुक्ताव्यभिचार्येव तदेव गौरमित्रातनयरूपाधिकरणान्तर्भावेन शाकपाकजत्वव्यभिचारित्वसत्त्वात् न साधनविकलो दृष्टान्तः इत्यर्थः । **इत्याहुरिति उपाध्यायाः** आहुरिति । अस्वरसोद्भावनम्, तद्बीजं मित्रातनयत्वाव्यभिचारित्वस्य यत्किञ्चिदधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्व-

रूपस्यापेक्षया समानाधिकरणेव्य(त्य)स्यैव लाघवेन सर्वसामञ्जस्ये किमेतावता प्रयासेन। त्वयै(ये)व मयाऽपि ऐकाधिकरण्यमेव वैशिष्ट्यं वक्तव्यम्। तथा च मित्रातनयत्वश्यामत्वसामानाधिकरण्यविशिष्टशाकपाकजत्व-व्यभिचारित्वमेव हेतुः। तथा च अघटत्वे गौरमित्रातनयरूपाधिकरणान्तर्भावेन अघटत्वस्य शाकपाकजव्यभि-चारित्वमित्रातनयत्वसामानाधिकरण्ययोः सत्त्वात् न साधनवैकल्यं दृष्टान्तस्य। श्याममित्रातनयकोकिलान्यतर-त्वस्य च न एकाधिकरणान्तर्भावेन मित्रातनयत्वसामान्याधिकरण्यशाकपाकजत्वव्यभिचारौ स्तः इति न तत्साधारण्यमिति लघुप्रकारेणैव सम्भवे गुरुतरप्रकारारम्भ एवास्वरसो बोद्धव्यः। **पूर्वमिति**। पूर्वं शुद्धसाध्य-व्यभिचारोन्नयनप्रकारकथितग्रन्थे। **साक्षादिति**। साक्षात् शुद्धसाध्यव्यभिचारोन्नायक एवोपाधिः। साक्षात् प्रथमत एव शुद्धसाध्यव्यभिचारोन्नायक एवोपाधिरिति पूर्वमुक्तम्। तथा च शुद्धसाध्यव्यापकोपाधिवत् अवच्छिन्न-साध्यव्यापकोपाधेरपि उक्तप्रकारेण शुद्धसाध्यव्यभिचारोन्नायकतया समव्याप्तविषमव्याप्तोपाधिवत् अनयोरपि लक्ष्यत्वं व्यवस्थापयता समव्याप्त एवोपाधिरिति शुद्धसाध्यव्यापक एवोपाधिरिति वादिद्वयस्य निगर्वं खण्डयता **यद्वा** इत्याद्यग्रिमो ग्रन्थ उक्तः, अधुना प्रकारान्तरेण तदेव निगर्वं खण्डयति।

**यद्वा यः साधनव्यभिचारी साध्यव्यभिचारोन्नायकः स उपाधिः तत्त्वं च साक्षात् परम्परया वेति नार्थान्तरम्। किञ्च अर्थान्तरस्य पुरुषदोषत्वात् आभासान्तरस्य तत्रा-भावादुपाधिरेव भावत्वादिकं दोषः। न चैवं शब्दोऽभिधेयः प्रमेयत्वात् इत्यत्र अश्रावणत्वं जलं प्रमेयं रसवत्त्वात् इत्यत्र पृथिवीत्वम् उपाधिः स्यात्, केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात्।**

**तथात्वं** शुद्धसाध्यव्यभिचारोन्नायकत्वम्। **सम्प्रतीति**। यद्वेत्याद्यग्रिमग्रन्थेन। साक्षात् विशिष्टसाध्य-व्यभिचारानुमानद्वारा वा [27B]। **वेति** वाकारोऽनास्थायाम्। तथा च स्वव्यभिचारेण व्यभिचारोन्नायक एवोपाधिरिति लाघवात् न तु तत्र साक्षात्त्वगर्भगौरवात् इति तेषां वादिनां निगर्वं खण्डयति- **यद्वेति**। **तत्त्वं चेति** मूलम्। तत्त्वं साक्षात् परम्परया वा साध्यव्यभिचारोन्नायकत्वम्। **नार्थान्तरमिति** मूलम्। विशिष्टसाध्य-व्यभिचारानुमाने नार्थान्तरमिति भावः।

**साधनमिति** टीका। साधनं प्रकृतानुमानसाधनं व्यभिचारि। अत्यन्ताभाववद्वृत्तिः यस्य स तथा साधनाव्यापकः साधनसमानाधिकरणात्यन्ताभावप्रतियोगीति यावत्। साध्यव्यभिचारोन्नायकः स्वव्यभिचारित्वेनेति शेषः पूरणीयः। **तेनेति**। तेन स्वव्यभिचारेणेति पूरणेन अप्रयोजकत्वादौ नातिप्रसङ्गः नातिव्याप्तिः। यथा अहं(यं) हेतुः व्यभिचारी अप्रयोजकत्वात् इति व्यभिचारानुमापके प्रयोजकत्वेन अव्याप्तिरिति स्वव्यभिचारेण साध्यव्यभि-

चारोन्नायकत्वविरहात्। न हि अप्रयोजकत्वं स्वव्यभिचारेण साध्यव्यभिचारोन्नायकं किन्तु स्वयमेवेति नातिप्रसङ्गः। अप्रयोजकत्वादौ [आदि]पदा[त्] आर्द्रेन्धनादिव्यभिचारपरिग्रहः। तस्य व्यभिचारोन्नायकत्वं यथा वह्निः धूमव्यभिचारी आर्द्रेन्धनव्यभिचारित्वात्। इत्यार्द्रेन्धनव्यभिचारित्वस्य व्यभिचारोन्नायकत्वेऽपि न स्वव्यभिचारद्वारेति न धूमसाध्यकवह्निहेतौ उपाधिः तस्य स्वव्यभिचारेण व्यभिचारोन्नायकत्वविरहात् इति भावः। अभ्युपेत्य अभिगमवादपुरस्सरं समाधत्ते - **अर्थान्तरस्येति**। मित्रातनयत्वं मित्रातनयत्वविशिष्टश्यामत्वव्यभिचारि मित्रातनयत्वविशिष्टश्यामत्वव्यापकशाकपाकजत्वव्यभिचारित्वात् इत्यत्र शुद्धसाध्यव्यभिचारस्य प्रकृतत्वात् विशिष्टसाध्यव्यभिचारस्य नाकाङ्क्षितत्वात् अर्थान्तरत्वं प्रकृतासम्बद्धत्वात्। प्रकृतासम्बद्धमुत्तरमर्थान्तरमिति परिभाषितत्वात्। तस्याश्च(तस्य च) प्रकृतानाकाङ्क्षितमुत्तरत्वमर्थः। ननु तस्यापि विशिष्टसाध्यव्यभिचारस्यापि शुद्धसाध्यव्यभिचारोन्नयनोपयोगित्वात् प्रकृतसम्बद्धत्वात् नार्थान्तरत्वमिति चेत् तत्राह - **अप्राप्तेति**। अप्राप्तकालत्वम् यद्यदाकाङ्क्षितं भवति तत्तदोपन्यसनीयम्। न हि यदाकदाचिदाकाङ्क्षितमेव प्रथमत उपन्यसनीयम्। तथा सति प्रतिज्ञापूर्वमपि हेतोरुपन्यासापत्तिरिति। तथा च प्रकृतेऽपि शुद्धसाध्यव्यभिचार एव प्रथमत उपन्यसनीयः। तत्र हेत्वाकाङ्क्षायां विशेषणवति विशिष्टसाध्यव्यभिचार उपन्यसनीयः। तथा च प्रथमतो विशिष्टसाध्यव्यभिचारोपन्यासे प्रतिज्ञापूर्वं हेतूपन्यासवत् अप्राप्तकालत्वमिति दोषान्तरमिति द्रष्टव्यम्।

**किञ्चेति** मूलम्। तत्र ध्वंसो विनाशी जन्यत्वात् इत्यत्र भावत्वमुपाधिः दोषः अर्थान्तरस्य। ध्वंसो विनाशी जन्यत्वात् इत्यत्र जन्यत्वं भावत्वावच्छिन्नविनाशित्वव्यभिचारि भावत्वव्यभिचारित्वात् इत्यत्र विनाशित्वव्यभिचारित्वस्य प्रकृतोपयोगित्वात् विशिष्टव्यभिचारित्वस्यार्थान्तरत्वमप्राप्तकालत्वं वोवर्थः (वाऽर्थः)। ननु अर्थान्तरत्वादिकं वादकथायां नोपयोगि तत्र वस्तुदोषस्यैवोपयोगात्। तथा च किमत्र वस्तुदोष इति प्रश्ने उपाधिरेवोद्भावनीय इत्याह - **आभासान्तरस्य**। हेत्वाभासान्तरस्य अभावात् उपस्थितिविषयत्वेन अभावात् अनुपस्थितत्वात् इति भावः। यथाश्रुते तु व्यभिचारस्यैव सत्त्वात् कथं हेत्वाभासान्तरस्याभावः ? तत्र अनुमाने भावत्वादिकमुपाधिर्दोष उद्भावनीय इति शेषः। [28 A] यद्यप्युपाधेरपि नो साक्षात् दूषकत्वं किन्तु व्यभिचारज्ञानद्वारैव तथापि सिद्धसाधनवत् उपन्यसनीय एव। न हि सिद्धसाधनं स्वतो दूषकं किन्तु पक्षताविघटनद्वारैव। तस्य यथा स्वतो दूषकत्वाभावेऽपि वादकथायामुपयोगः उपन्यासार्हत्वं तथा उपाधेरपीति भावः। **न चैवमिति** मूलम्। एवमवच्छिन्नसाध्यव्यापकस्यापि उपाधिलक्ष्यत्वे शब्दोऽभिधेयः प्रमेयत्वात् इत्यत्र अश्रावणत्वमुपाधिः। अश्रावणत्वं श्रवणेन्द्रियजन्यलौकिकप्रत्यक्षाविषयत्वमुपाधिः। तत्र पक्षे साध्यसन्देहात् पक्षातिरिक्ते पृथिवीत्वपक्षे च साधनाव्यापकमिति पृथिवीत्वमुपाधिः स्यात् इत्याशङ्कार्थः। साधनावच्छिन्नसाध्यव्यापकत्वं पृथिवीत्वमुपाधिः, पक्षे एव गृहीतसाधनाव्यापकत्वं च, पक्षे एवेति अवच्छिन्नसाध्यव्यापकत्वस्योपाधित्वे इदमपि उपाधिद्वयं स्यात्। पूर्वं पक्षधा[र्मा]न्वयित्वसाधकं यत् प्रमाणं तेन प्रमेयत्वस्य केवलान्वयित्वे सिद्धे शब्देऽपि प्रमेयत्वं सिद्धमेव।

अन्यथा तस्य प्रमेयत्वस्य केवलान्वयित्वं न स्यात् शब्दवृत्त्य[त्य]न्ताभावप्रतियोगित्वादिति भावः। **पक्षधर्मावच्छिन्नेति** टीका। शब्दोऽभिधेयः प्रमेयत्वात् इत्यत्र शब्दः पक्षः, तद्वृत्ति गुणत्वं पक्षधर्मः, तदवच्छिन्नसाध्यस्याभिधेयत्वस्य व्यापकमश्रावणत्वं न भवति, शब्दे एवाभिधेयत्वस्य केवलान्वयित्वसाधकप्रमाणेनाभिधेयत्वस्य सिद्धेः तत्रैव गुणत्वावच्छिन्नाभिधेयत्वस्य सत्त्वात् शब्दस्य च श्रवणेन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वेनाश्रावणत्वाभावात्। न गुणत्वावच्छिन्नाभिधेयत्वस्य व्यापकमश्रावणत्वमिति। **साधनावच्छिन्नेति**। जलं प्रमेयं रसवत्त्वात् इत्यत्र रसवत्त्वावच्छिन्नप्रमेयत्वस्य केवलान्वयित्वसाधकप्रमाणेन जलेऽपि प्रमेयत्वसिद्धौ तत्र च रसवत्त्वस्य साधनस्य विद्यमानत्वात् रसवत्त्वावच्छिन्नप्रमेयत्वस्य जलेऽपि सत्त्वात्। तत्र च पृथिवीत्वविरहेण रसवत्त्वावच्छिन्नप्रमेयत्वस्य साध्यस्य न पृथिवीत्वं व्यापकमिति न स उपाधिरिति भावः।

**न च पक्षेतरे स्वव्याघातकत्वेनानुपाधौ अतिव्याप्तिः तत्रानुकूलतर्काभावेन साध्यव्यापकत्वानिश्चयात् सहचारदर्शनादेस्तेन विना संशायकत्वादित्युक्तम्। बाधोन्नीते चानुकूलतर्कोऽस्त्येवेति, एवं पर्वतावयववृत्त्यन्यत्वादेरपि नोपाधित्वं पक्षमात्रव्यावर्तकविशेषणवत्त्वात्।**

**न च पक्षेतर** इति। पर्वतो वह्निमान् धूमात् इत्यत्र पर्वतेतरत्वस्य। **स्वव्याघातकत्वेनेति** मूलम्। स्वव्याघातकत्वेन स्वव्यभिचारेण साधनस्य साध्यव्यभिचारित्वविरहेण स्वव्याघातकत्वेन, तद्यथा साधनं साध्यव्यभिचारि साध्यव्यापकपक्षेतरव्यभिचारित्वात् इत्यत्रापि पक्षेतरत्वस्योपाधितापत्तिः, तस्मात् पक्षेतरत्वरूपोपाधेः न व्यभिचारोन्नायकत्वम्, अत एव न लक्ष्यत्वं तस्य, अत एव तत्र लक्षणगमने अतिव्याप्तिरिति आशङ्कार्थः। समाधत्ते - **तत्रेति**। तत्र पक्षेतरत्वोपाधौ अनुकूलतर्कविरहेण साध्यव्यापकताग्राहकानुकूलतर्कविरहेणेत्यर्थः।

**यद्यपीति** टीका। ग्रन्थकृन्मत इति **मणिकारमते** व्यभिचारादर्शनस्यैव व्याप्तिग्राहकत्वेन, तर्कस्य व्याप्तिमूलकत्वेन तत्रापि तर्कान्तरापेक्षायामानवस्थादुःस्थितया न तर्कस्य व्याप्तिग्राहकत्वम्। तथा च कथमनुकूलतर्कविरहेण न पक्षेतरत्वस्य व्याप्तिग्रह इत्युक्तम्। व्याप्तिग्रहे अनुकूलतर्कस्याकार[ण]त्वात् कथं तदभावे(व)स्य व्याप्तिग्रहाभावप्रयोजकत्वम्। न हि अकारणाभावस्य कार्याभावे प्रयोजकत्वम्, कारणाभावस्य कार्याभावे प्रयोजकत्वादिति। **यद्यपीत्याशङ्कार्थः**। समाधत्ते - **तथापीति**। तदभावे अनुकूलतर्काभावे, निवर्तकाभावेन अप्रयोजकत्वशङ्काया निवर्तकाभावेन, अप्रयोजकत्वशङ्कानिवृत्तौ अनुकूलतर्कस्य प्रयोजकत्वेन ग्रन्थकृताऽपि [28 B] यावदाशङ्कं तर्कानुसरणादित्युक्तत्वात्। तथा चाप्रयोजकत्वशङ्कायां सत्यां तज्जनितव्यभिचारसंशयस्याप्यनुमानत्वात्। व्यभिचारज्ञानाविरहेण न व्याप्तिग्रह इति ग्रन्थकृत आशयमुद्घाटयति। तथापीत्यादि भाव इत्यन्तेन योजना।

**सहचारदर्शनादेरिति** मूलम्। तेन विना अनुकूलतर्केण विना। तथा चाप्रयोजकत्वशङ्कया जनितव्यभिचार-संशयेन व्याप्तिग्राहकं व्यभिचारादर्शनमिति न पक्षेतरत्वस्य साध्यव्याप्तिग्रह इति नोपाधित्वं तस्येति भावः इत्युक्तं पूर्वपक्षग्रन्थे इति शेषः। ननु पर्वतो वह्निमान् धूमात् इत्यत्र पर्वतेतरत्ववत् वह्निरनुष्णः कृतकत्वात् इत्यत्र वह्नीतरत्वमपि उपाधिर्न स्यात् तस्य स्वव्या[घा]तकत्वेन पक्षेतरत्वस्योपाधित्वविरहात् इत्यत आह - **बाधोन्नीतेति** मूलम्। बाधोन्नीतो वह्निरनुष्णः कृतकत्वात् इत्यादौ वह्नीतरत्वोपाधौ अनुकूलतर्कोऽस्त्येव। अनुकूलतर्कस्तु वह्नित्वेन उष्णत्वेन कार्यकारणभावः। यद्यप्युष्णत्वं सौरकिरणादावपि तथाप्युष्णत्वव्याप्यवह्निस्पर्शवृत्तिजाति-विशेषपुरस्कारेण कार्यकारणभावो बोद्धव्यः। **एवमिति**। एवं वह्निमान् धूमात् इत्यत्र पर्वतेतरत्वे अनुकूल-तर्कविरहेण साध्यव्यापकानिर्णये यथा नोपाधित्वं तथा पर्वतावयववृत्त्यन्यत्वादेरपि नोपाधित्वम् अनुकूल-तर्कविरहेण तादृशसाध्यव्यापकत्वानिर्णयादिति भावः।

विपक्षाव्यावर्तकेत्यादिग्रन्थस्याकिञ्चित्करेणानुकूलतर्काभावे एव तात्पर्यं विवृणोति **यद्यपीत्यादिना**। एतदुपाधौ पर्वतो वह्निमान् धूमात् इत्या[त्र] पर्वतावयववृत्त्यन्यत्वोपाधौ पर्वतस्य यदवयवं यद्वृत्तिर्यथा पर्वतस्तथा रूपादिरपि तथा च पर्वतावयववृत्तिरूपं वह्निसाध्ये विपक्षं भवत्येव। तथा च तद्व्यावर्तकं पर्वतावयववृत्त्यन्यत्वं भवत्येव। तथा च विपक्षाव्यावर्तकविशेषणशून्यत्वमस्त्येव प्रकृतोपाधौ कथं स नोपाधिरिति यद्यपीत्याशङ्कार्थः। **समाधत्ते - तथापीति**। तथा च विपक्षाव्यावर्तकेत्यादिग्रन्थस्यापि अनुकूलतर्कविरहेणाप्रयोकत्वशङ्कया जनित-व्यभिचारशङ्काया अनुवर्तमानत्वात् न व्यभिचारादर्शनसहकृतसहचारदर्शनस्य व्याप्तिग्राहकस्य सत्त्वम् इति। न वह्निरूपसाध्यस्य पर्वतावयववृत्त्यन्यत्वोपाधेर्व्यापकत्वनिश्चय इति तन्निश्चायकविरहादिति भावः। तदेव विवृणोति -**यद्यपीत्यादिना**। **पर्वतपदमिति**। वह्निमान् धूमात् इत्यत्र पर्वतावयववृत्त्यन्यत्वमुपाधिः। तत्रोपाधौ पर्वतावयव-वृत्तिपदं विपक्षस्य निश्चितवह्न्यभाववतो रूपादेः। यद्यपीति योजना। तथा च विपक्षाव्यावर्तकविशेषण-शून्यत्वमुपाधौ वर्तत एवेति कथं न तस्योपाधित्वमिति यद्यपीत्याशङ्कार्थः। समाधत्ते - **तथापीति**। उक्तस्य पर्वतावयववृत्त्यन्यत्वादिरूपस्योपाधेः तत्त्वं विपक्षं यद्रूपं [29 A] तद्रूपव्यावर्तकत्वं ह्रदपर्वतान्यतरेतरत्ववत् उपाधितायां साध्यव्यापकत्वे साधनाव्यापकत्वे च न प्रयोजकम्, तेन विनाऽपि पर्वतेतरत्वस्य साध्यव्यापकत्व-साधनाव्यापकत्वादिसम्भवात्। **किन्त्विति**। तस्य पर्वतावयववृत्तिपदस्य पर्वतेतरत्ववत् पक्षमात्रव्यावर्तकत्वमु-पाधितायामुपयुज्यते पक्षे साधनाव्यापकत्वोपयोगित्वादुपयुज्यते। न तु रूपव्यावर्तनमपि तत्प्रयोजकं तत्र साधनधूमविरहात्। तथा च पक्षमात्रव्यावर्तकत्वमेवोपाधितायां भवन्मते उपयुज्यते इति। तत् तु न सम्भवति विपक्षाव्यावर्त[क]विशेषणशून्यत्वस्यैवोपाधितायां प्रयोजकत्वात्। तत् तु प्रकृते नास्तीति न पर्वतावयववृत्त्यन्य-

त्वमुपाधिरिति भावः। **तेनैवेति**। पक्षमात्रव्यावर्तनेनैवोक्तोपाधेः पर्वतावयववृत्त्यन्यत्वोपाधेः साधनाव्यापकत्व-निर्वाहात् धूमाव्यापकत्वनिर्वाहात् इति अभिप्रेत्य तथोक्तं पर्वत[ावयव]वृत्त्यन्यत्वं नोपाधिः पक्षमात्रव्यावर्तक-[विशेषणव]त्त्वात् इत्युक्तं मूलकारेण। तथा च पक्षमात्रव्यावृत्तिरेव साधनाव्यापकत्वोपयोगितया उपयुज्यते न तु रूपादिव्यावृत्तिरपीति भावः। उपसंहरति - **एवं चेति** टीका। पर्वतो वह्निमान् धूमात् इत्यत्र पर्वतावयववृत्त्यन्यत्वं नोपाधिः साध्यम्। तत्र हेतुमाह - **उपाधितेति** टीका। उपाधिता साध्यव्यापकत्वे सति साधनाव्यापकता, तस्याः उपाधिघटकीभूतसाधनाव्यापकतायाः प्रयोजकीभूतं यत् पर्वतावयववृत्तिरूपं विशेषणं तद्वत्त्वात् इत्यर्थः। **आहुरिति** अस्वरसोद्भावनम्, तद्बीजं तु पर्वतावयववृत्त्यन्य[त्व]स्य पर्वत एव साध्याव्यापकत्वादेव न तद्व्यभिचारेण साधनस्य साध्यव्यभिचारोन्नयनयोग्यता येन तस्योपाधिता स्यात्। न च साधने साध्यव्यभिचारोऽपीति। न वा तत्र लक्षणमपि गच्छति साध्याव्यापकत्वात्। न वा साध्यसमानाधिकरणत्वे सति साध्यव्यभिचारिसाधनाव्यापकत्वरूपं तत्र लक्षणं गच्छति, साधनस्य धूमस्य साध्यव्यभिचारित्वविरहादिति। तथा इत्थमेवानुपाधित्वे किमेतावता प्रयासेनेति भावः।

**अत एव धूमे आर्द्रेन्धनप्रभववह्निमत्त्वं, द्रव्यबहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वं, मित्रातनयश्यामत्वे शाकपाकजत्वं, जन्यानित्यत्वे भावत्वम् उपाधिः, तदुत्कर्षेण साध्योत्कर्षात्, अनन्यथासिद्धान्वयव्यतिरेकतो वैद्यकात् कारणतावगमेन घटोन्मजनप्रसङ्गेन साध्यव्यापकतानिश्चयात्, तत् किं कार्यकारणयोरेव व्याप्तिः, तथा च बहु व्याकुली स्यादिति चेत्।**

**अत एवेति** मूलम्। यत एव साध्यव्यापकताग्राहकोऽनुकूलतर्को वर्तते अत एव एतेषामुपाधित्वमिति अन्वयः। **धूम** इति मूलम्। धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनप्रभववह्निमत्त्वमुपाधिः आर्द्रेन्धनप्रभववह्नेर्धूमव्यापकत्वे कार्यकारणभाव एवानुकूलतर्को द्रष्टव्यः, यथा धूमत्वेन कार्यता आर्द्रेन्धनप्रभववह्नित्वेन कारणता। तत्र कारणताग्राहकं **तदुत्कर्षेणे**त्यादिना। वायुः बहिरिन्द्रियजन्यप्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र उद्भूतरूपवत्त्वोपाधेः द्रव्यत्वावच्छिन्नबहिरिन्द्रियजप्रत्यक्षव्यापकतायां कार्यकारणभाव एवानुकूलतर्को द्रष्टव्यः, यथा बहिरिन्द्रियजन्य-द्रव्यप्रत्यक्षत्वेन कार्यता उद्भूतरूपवत्त्वेन कारणता। तत्र कारणताग्राहकमन्वयव्यतिरेकं स्वयमेव वक्ष्यते। **मित्रातनयेति**। स श्यामः मित्रातनयत्वात् इत्यत्र शाकपाकजत्वं मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकम्। तथा च नरत्वावच्छिन्नश्यामत्वेन कार्यता शाकपाकजत्वेन कारणतेति आयुर्वेदादेव कार्यकारणभावग्रहं वैद्यकादिति वक्ष्यते। **अनित्यत्व** इति मूलम्। ध्वंसो विनाशी जन्यत्वात् इत्यत्र भावत्वोपाधेः जन्यभावत्वेन कारणता

विनाशित्वेन कार्यता। तथा च जन्यभावत्वस्य नाशव्यापकत्वे भावत्वं सुतरां व्यापकमेव भावत्वस्य [29 B] तद्घटकत्वात्। ननु जन्यभावत्वं न कारणतावच्छेदकं जन्यभावत्वस्य ध्वंसे विरहात्। लाघवात् जन्यत्वेन ध्वंसत्वेन कार्यकारणभावोऽस्तु। न हि तत्र भावत्वमपि निवेशनीयम्, गौरवात्। येन ध्वंसस्य विनाशित्वं न स्यदिति चेत्। तत्र गौरवस्य प्रामाणिकत्वं दर्शयति - **घटोन्मज्जने**त्यादि।

**त्रिष्विति**। प्रथमत्रिषु यथासङ्ख्यं त्रिषु त्रयं हेतु[त्रयं] प्रत्येकमेवान्वेतीति भावः। चतुर्थे घटो विनाशी जन्यत्वात् इत्यत्र। ननु घटोन्मज्जनस्य कोऽर्थः? घटोत्पत्तिरिति चेत् घटध्वंसनाशाभ्युपगमेऽपि घटसामग्रीविरहादेव स घटः नोत्पत्स्यते इति। घटप्रत्यक्षत्वं चेत् तदा तत्रापि तथा तत्सामग्रीविरहादेव न प्रत्यक्षः। आविर्भावश्चेत् तस्याप्युत्पत्तिप्रत्यक्षयोरेवान्तर्भावात्। न हि ध्वंसवादिनां मते आविर्भावतिरोभावौ स्तः इत्यत उन्मज्जनपदार्थमाह - **प्रतियोगीति**। अयं भावः। यदि घटध्वंसस्य ध्वंसः अङ्गीक्रियते तदा घटध्वंसध्वंससमयं पक्षीकृत्य ध्वस्तघट-समयत्वं साधनीयं यथा - अयं कालः तद्घटवान् तद्ध्वंसतत्प्रागभावानधिकरणसमयत्वात् यथा तद्घटस्थितिकालः इत्यनुमानमेव घटध्वंसध्वंसे बाधकं विपक्षबाधकं च। जन्यभावत्वेन नाशत्वेन कार्यकारणभावे इदमनुमानं विपक्षबाधकम्। तदेवाह - **प्रतियोगी**त्यादिना। तथा च यदि घटध्वंसघटप्रागभावानवच्छिन्नसमयेऽपि घटो न स्यात् तदा कालवृत्तिरेव न स्यात् प्रतियोगिनः कालवृत्तितायां तद्ध्वंसप्रागभावयोरेव बाधकत्वात् इति। नन्वेवं प्रागभावोन्मज्जनं स्यात्। प्रागभावध्वंसरूपघटस्य नाशदशायां प्रागभावकालत्वं स्यात्। यथा अयं कालः घट-ध्वंसकालः तत्प्रागभाववान् स्वप्रतियोगिप्रागभावध्वंसानधिकरणसमयत्वात्। यद्वा प्रागभावाप्रतियोगिध्वं-सानाधिकरणसमयत्वाद्वा घटपूर्वकालवत्। तथा च प्रागभावोन्मज्जनमपीत्थं स्यात्। घटध्वंसस्य घटप्रति-योगिक[त्वा]वत् प्रागभावप्रतियोगि[क]त्वमिति। तथा च घटप्रागभावध्वंसस्यानधिकरणमेव स समयो न भवति। तथा च हेत्वसिद्धेरेव न तथानुमानं भविष्यति इति चेत् घटध्वंसध्वंसेऽपि घटप्रतियोगिकत्वमङ्गीक्रियताम्। तथा च तत्रापि घटध्वंसानधिकरणत्वेन हेत्वसिद्धितया न घटप्र[?ागभाव]समयत्वरूपघटोन्मज्जनप्रसङ्गो भविष्यति इति चेत्, न, अनन्तध्वंसधाराकल्पनं तत्र ध्वंसधारासु घटप्रतियोगिकत्वकल्पनप्रसङ्गादिति तद्गौरवापेक्षया लाघवात् जन्यभावत्वेन नाशत्वेनैव कार्यकारणभावोऽस्तु। ननु इत्थमपि कार्यकारणभावो न सम्भवति प्रागभावे व्यभि-चारात् इति चेत्, न, नाशपदेन सप्तमपदार्थ एवोक्तः, तथा च घटप्रागभावस्य आद्यनाशस्तु घटरूप एव भवति, तत्र न सप्तमपदार्थः वृत्तिनाशत्वं तथा च न व्यभिचारः, अन्त्यनाशस्तु घटादेव जन्यभावादेव भविष्यतीति न व्यभिचारः। अत्र केचित् यथा सुखत्वेन शरीरत्वेन कार्यकारणभावकल्पनायां स्वर्गीयसहस्रशरीरकल्पना न दूष-णावहा फलमुखगौरवत्वेनादूषणत्वात्। अन्यथा लौकिकसुखत्वेन शरीरत्वेन कार्यकारणभावोऽस्तु किं स्वर्गीय-सहस्रशरीरकल्पनया। अथ प्रथमतः लाघवात् सुखत्वेन कार्यता शरीरत्वेन कारणता इत्येव कार्यकारणभावग्रहः,

[30 A] न तु लौकिकसुखत्वेन गौरवात्। तथा चेत्थं कार्यकारणभावे क्लृप्ते तन्मूलप्रवृत्तशरीरसहस्रकल्पनाया गौरवं फलमुखतया न दूषणावहं फलमुखगौरवस्यादूषणत्वात्। तथा प्रकृतेऽपि जन्यत्वेन नाशत्वेनैव कार्यकारणभावोऽस्तु लाघवात्, न तु जन्यभावत्वेन गौरवात्। न च ध्वंसधाराकल्पनरूपगौरवं दूषणावहम्, तस्यापि फलमुखत्वात्, स्वर्गीयसहस्रशरीरकल्पनावत् इति प्राहुः। तन्न, भावानवबोधात्। फलमुखगौरवज्ञानं न प्रमाणविरोधीति सत्यम्, तदर्थश्च यत्प्रमाणविषयीभूतार्थः(र्थ)निबन्धनगौरवज्ञानं तत्प्रमाणं न विरुणद्धि। यथा शरीरत्वेन सुखत्वेन कार्यकारणभावविषयकप्रमाणेन विषयीकृतस्वर्गीयशरीरसहस्रनिबन्धनगौरवज्ञानं न तत्कार्यकारणभावग्राहकप्रमाणं विरुणद्धि, प्रकृते तु न तथा। तथा हि जन्यभावत्वेन नाशत्वेन क्लृप्तकार्यकारणभावग्राहकप्रमाणेन न ध्वंसधारा विषयीक्रियते न वा ध्वंसधारासु घटप्रतियोगिकत्वं विषयीक्रियते येन ता[द्]गौरवज्ञानं जन्यभावत्वेन नाशत्वेन कार्यकारणभावं न विरुध्यात्। तथा च ध्वंसधाराकल्पनं तत्र ध्वंसधारासु घटप्रतियोगित्वकल्पनं न फलमुखमिति युक्तमुत्पश्यामः। अत एव फलमुखगौरवज्ञानं प्रमाणात् पूर्वं न वृत्तमेव, वृत्ते च प्रमाणे कस्य प्रतिबन्धकं तद्गौरवज्ञानमिति फलमुखगौरवज्ञानस्य न प्रतिबन्धकत्वमिति निरस्तम्, प्रमाणात् पूर्वमपि फलमुखगौरवज्ञानस्य तर्कितोपस्थितिसम्भवात्। यथा ईश्वरज्ञानासिद्धिदशायामपि तत्रानित्यत्वकल्पने तद्ध्वंसतत्प्रागभावतत्कारण-सहस्राणां तर्कितोपस्थितिसम्भवेन तदुपस्थितिनिबन्धनगौरवज्ञानम् ईश्वरज्ञाननिष्ठानित्यत्वानेकत्वादिज्ञान-प्रतिबन्धकम्, लाघवात् नित्यमेकमेव ज्ञानं सिद्ध्यति; तथा प्रकृतेऽपि स्वर्गीयशरीरसहस्रकल्पनम्, तर्कितोपस्थिति-सम्भवात् तन्निबन्धनगौरवज्ञानमपि प्रतिबन्धकं स्यात् इति पूर्वोक्तयुक्तिरेव शरणीकरणीयेति निष्कर्षः।

ननूदाहरणचतुष्टयेषु धूमवान् वह्नेः इत्यादिषु आर्द्रेन्धनप्रभववह्न्याद्युपाधिषु तदुत्कर्षेणेत्यादिना तर्कचतुष्टयं दर्शितम्। तत्र च आद्यत्रयं कार्यकारणभावमूलकम्। अन्त्यस्तु अनिष्टापत्तिमूलकः। तथा च "तत् किं कार्यकारणयोरेव" इति एवकारो मूलस्थो न सङ्गच्छते, तद्व्यावर्तनीयस्य कार्यकारणभावामूलकघटोन्मज्जनापत्ति-रूपेऽनिष्टापत्तिमूलकतर्कस्य दर्शितत्वात्। इत्यन्यथा व्याचष्टे - **तमदृष्ट्वैवेति**। तथा च भ्रान्तः शङ्कते - **तत् किमितीति** टीका। भ्रमबीजं तु घटोन्मज्जनापत्तेरदर्शनमेवेति भावः। **रसादेरपीति** मूलम्। आदिपदात् स्पर्शपरिग्रहः। तथा च रूपं त्रयाणां व्यापकं न स्यात्। न हि रूपत्वेन रसत्वेन कार्यकारणभावः येन तन्मूलकस्त-र्कोऽप्रयोजकत्वशङ्कानिवर्तको भवेत् इति भावः। समाधत्ते - **नेति** टीका। सर्वत्र व्याप्तिग्रहे अप्रयोजकत्व-शङ्कानिवर्तनायेत्यादि शेषः। **क्वचित् साक्षादिति**। धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनप्रभववह्नित्वमिति साक्षात् कार्यकारणभावमूलकानुकूलतर्क एवाप्रयोजकत्वशङ्कानिवर्तकः। **परम्परयेति**। इदं द्रव्यं [30 B] पृथिवीत्वात् इत्यत्र पृथिव्यां किमपि अवश्यं कार्यं भविष्यत्येव। तत्र द्रव्यरूपसमवाय(यि)कारणं विनाऽसिद्धम्। तथा च कार्यकारणभाव एव व्याप्तिग्राहकमूलको भवति। एवं रूपरसयोरपि। रसाधिकरणे नित्ये परमाणौ यदि रूपं न स्यात्

तदा रसाधिकरणे द्व्यणुकेऽपि रूपं न स्यात्। एवं द्व्यणुके यदि रूपं न स्यात् तदा त्रसरेणावपि रूपं न स्यात्। तथा च त्रसरेणोः प्रत्यक्षं न स्यात् तथा चात्रापि कार्यकारणभावमूलक एवानुकूलतर्कोऽनुसन्धेयः।

**न, तदुपजीव्यान्येषामप्यनुकूलतर्केण व्याप्तिग्रहात्, यत्र च साध्योपाध्योः हेतु-साध्ययोः वा व्याप्तिग्राहकसाम्यात् नैकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वं व्यभि-चारसंशयोपधायकत्वात्। यदा च तादृश्येकत्रानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितं पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वमतो न सन्दिग्धो-पाधिरपि सः।**

**तदुपजीव्येति**। तत् कार्यकारणभावस्वरूपम् उपजीव्यं येषामनुकूलतर्काणामिति। **स्वव्याघातकत्वेति**। पर्वतो वह्निमान् धूमात् इत्यत्र पर्वतेतरत्वरूपोपाधौ साध्यः व्यापकत्वव्यतिरेकनिश्चय एव। तादृशव्यतिरेकनिश्चये स्वव्याघातकत्वरूपप्रतिकूलतर्कोऽध्यवसेयः। यदा तु तर्को न स्फुरति तदा तस्य सन्दिग्धोपाधित्वं ब्रह्मणाऽपि निवारयितुं न शक्यते इति भावः।

**यद्यपीति**। विशेषादर्शनदशायां साध्यव्यापकत्वाभावनिर्णायकाभावदशायां स्वव्यभिचारेण पक्षेत[रत्व]-रूपोपाधिव्यभिचारेण साधनस्य धूमस्य वह्निव्यभिचारित्वसंशयाधायकत्वं संशयजनकत्वं सम्भवत्येव। व्याप्यसंशये व्यापकसंशयस्यावश्यकत्वात् इति। यद्यपीत्याशङ्कार्थः। समाधत्ते - **तथापीति**। वस्तुतः उपाधि-त्वाभावेन साध्यव्यापकत्वे सति साधनाव्यापकत्वाभावेन साध्यसमानाधिकरणत्वे सति साध्यव्यभिचारिसाधना-व्यापकत्वविरहात् वा न तस्य पक्षेतरस्योपाधित्वम्। अत एव न सन्दिग्धोपाधित्वमपि। य एव वस्तुगत्योपाधिर्भवति तस्यैव सन्देहदशायां सन्दिग्धोपाधित्वम् अन्यत्र तु उपाधित्वप्रकारसन्देहादेव व्यभिचारसन्देहो भवति। यथा उपाधिभ्रमात् व्यभिचारभ्रमः, न हि तत्र स्वव्यभिचारेण व्यभिचारानुमानसम्भवेऽपि तस्योपाधित्वमिति भावः। सत्प्रतिपक्षोत्थापकतयोपाधेर्दूषकत्वमाशङ्क्य निषेधति।

**यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि ग्राहक-साम्यात्, तथा चोभयव्यापकनिवृत्त्या साध्यतदभावाभ्यां पक्षे निवर्तितव्यम्, न चैवम्, तथा च पक्षेतरः साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषयेदिति, तन्न, तथापि साध्यव्यापकतापक्षमालम्ब्य हेतुव्यभिचारसंशयाधायकत्वेन दूषकं स्यादेव।**

**यत्त्विति** मूलम्। पक्षेतरत्वस्य पर्वतेतरत्वस्य तथा साध्यव्यापकत्वं वह्निव्यापकत्वं तथा वह्न्यभाव-व्यापकत्वमिति महानसादौ पक्षातिरिक्ते ह्रदादौ तु ग्रहमिति। तन्निवृत्त्या पक्षेतरत्वनिवृत्त्या पक्षे साध्यतदभावाभ्यामपि निवर्तयितव्यम्। तथा च साध्यतदभावयोरपि न ज्ञानं पक्षे सत्प्रतिपक्षस्थल इव। वस्तुगतो(ति)मनुरुद्ध्याह-न

**चैवमिति**। साध्यमपि नास्ति साध्याभावोऽपि नास्तीति [ता]दृशं स्थलमपि नास्ति, प्रतियोगितदभावान्यतरत्वावच्छिन्नस्य केवलान्वयित्वात्। **तथा चेति** मूलम्। तथा च पक्षेतरत्वे साध्यव्यापकतदभावव्यापकत्वसन्देह एव। तथा च स्वयं सन्दिग्धः कथं परान् दूषयेदिति। इत्थमेव पक्षेतरत्वस्य नोपाधित्वमिति यत्तु वादिनो मतं निष्कर्षः। परं स्वयं साध्यं स्वव्यभिचारेण व्यभिचारोत्थापनद्वारा कथं दूषयेदित्यर्थः। इत्थमाकारेण पक्षेतरत्वस्य उपाधित्वदूषकं दूषयति। **तत्रेति** मूलम्। **तथापीति** मूलम्। तथापि पक्षेतरत्वस्य साध्यव्यापकत्वनिर्णयाभावेऽपि। **साध्येति**। साध्यव्यापकत्वप्रकारेण संशयमालम्ब्य तथा च स्वव्यभिचारेण व्याप्येन सन्दिग्धेन साधने[न] साध्यव्यभिचारसंशयाधायकत्वात् सन्दिग्धोपाधित्वं स्यादि[त्ये]व। तथा च कथमुक्तं स्वयं सन्दिग्धः कथं परं दूषयेदिति। स्वस्य सन्देहेऽपि [31 A] व्यभिचारसंशयाधायकत्वेन दूष[क]त्वमिति भावः।

**साध्यव्यापकताकोटिरिति** टीका। साध्यव्यापकताकोटिकः संशय इत्यर्थः। उक्तरीत्या स्वव्याघातकत्वेन वस्तुतः साध्यव्यापकत्वविरहेण वा साध्यसमानाधिकरणत्वे सति साध्यव्यभिचारिसाध्यव्यापकत्वविरहेण वा न पक्षेतरत्वमुपाधिरिति अस्मदुक्तं मतमेवाङ्गीकरणीयम्, भवदुक्तमतं तु असमीचीनं मत्वा इति भावः।

**तेनेति** टीका। तेन स्वव्याघातकत्वेन उपाधित्वव्यतिरेकनिर्णयेन सन्दिग्धोपाधित्वमिति भावः। न तत्संशयाधायकत्वं साध्यव्यभिचारसंशयाधायकत्वं स्वस्य साध्यव्यापकत्वाभावनिर्णयात् इति भावः। अनुकूलतर्काभावेन उपाधेर्दूषकत्वम् अन्यथासिद्ध्यति।

**ननु यत्रोपाधिस्तत्रानुकूलतर्को यदि नास्ति तदा तदभावेनैव व्याप्तेरग्रहः, अथास्ति तदा साध्यव्याप्याव्यापकत्वेनोपाधिः साध्याव्यापकत्वनिश्चयात् नोपाधिरित्युभयथापि नोपाधिर्दूषणम्। न च व्याप्त्यभावव्याप्यमुभयमत उपाधिरपि तदभावोन्नयनेन दोष इति वाच्यम्।**

**नन्विति** मूलम्। पर्वतोऽयं धूमवान् वह्नेः इत्यत्र यदि धूमवह्न्योर्व्याप्तिग्राहकः अनुकूलतर्को नास्ति तर्हि तदभावादेव न धूमसाध्यकवह्निसाधनकव्याप्तिग्रहः किमुपाधिना। अथास्ति तदा व्याप्यस्य वह्नेरव्यापकत्वादेवार्द्रेन्धनस्य न धूमव्यापकत्वं तथा च साध्यव्यापकत्वविरहात् कथमुपाधित्वं तस्य। इत्युभयथाऽपि उपाधेर्दूषकत्वं न स्यादित्याशङ्कार्थः। विनिगमनाविरहेणानुकूलतर्काभावे एवोपाधेरपि दूषकत्वं शङ्कते। **न चेति** मूलम्। व्याप्त्यभावव्याप्यं धूमवान् वह्नेः इत्यत्र धूमनिरूपिता या व्यापकता तन्निरूपिता या व्याप्तिः तदभावव्याप्यम्। उभयम् अनुकूलतर्काभाव उपाधिश्च। तथा च यथा धूमेन नालोकान्यथासिद्धिः विनिगमनाविरहात् उभयोरपि व्याप्यत्वात् वह्न्युन्नायकत्वमुभयोरपि, तथा अनुकूलतर्काभावस्य उपाधेश्च व्याप्त्यभावव्याप्यत्वात् उभयोरपि

साध्यव्यभिचारोन्नायकत्वम्, न हि एकेनापरस्य अन्यथासिद्धिः इत्याशङ्कार्थः। विनिगमनादर्शनेन विनिगमनाविरहरूपं तर्कं दूषयित्वा अनुकूलतर्काभावेन उपाधेरन्यथासिद्धिं दर्शयति।

**उपाधेरात्मलाभार्थमनुकूलतर्काभावोपजीवकत्वेन तस्यैव दोषत्वादिति चेत्। न। सोपाधावेकत्र साध्यतदभावसम्बन्धस्य विरुद्धत्वात् अवच्छेदभेदेन तदुभयसम्बन्धो वाच्यः, तथा च साधने साध्यसम्बन्धितावच्छेदकं रूपम् उपाधिरावश्यकः तथानुकूलतर्काभावोऽप्यावश्यक इति उभयोरपि विनिगमकाभावात् दूषकत्वात्।**

**उपाधेरिति** मूलम्। अनुकूलतर्काभावे उपजीव्यत्वरूपविनिगमनां दर्शयति - उपाधेरिति। उपाधेः आत्मलाभार्थं साध्यव्यापकत्वसिद्ध्यै अनुकूलतर्काभावस्यावश्यमपेक्षणीयत्वात्। तस्यैव दूषकत्वमस्तु किमुपाधिनेति शेषः। तस्यैव अनुकूलतर्काभावस्यैव दोषत्वादिति चेत् कथमुपजीवकत्वम्? एतदेव विवृणोति - **अनुकूलतर्कसत्त्वे** हीति टीका। पुनरपि उपाधौ विनिगमनां दर्शयित्वा उभयत्र तुल्यविनिगमकत्वेन विनिगमनाविरहदर्शनेन सिद्धान्तयति। **सोपाधाविति** मूलम्। सोपाधौ धूमवान् वह्नेरित्यादौ व्यभिचारिणि साधने, एकत्र वह्नयो(? वह्नौ) व्यभिचारिसाधने। **साध्येति**। साध्यो धूमः, तदभावः धूमाभावः, तयोः सम्बन्धः [31 B] सामानाधिकरण्यम् अवच्छेदकभेदं विना दुःस्थम्। तयोः साध्यसामानाधिकरण्यसाध्याभावसामानाधिकरण्ययोः विरुद्धत्वात् परस्पराभावव्याप्यत्वात्। **तथा चेति**। अवच्छेदकभेदोऽवश्यमपेक्षणीयः। य एव साध्यसामानाधिरण्यावच्छेदकः स एवोपाधिः। तथा च सामानाधिकरण्यावच्छेदकतया अनुकूलतर्काभावमन्तरेणापि उपाधेरवश्यमपेक्षितत्वम्, नानुकूलतर्काभावेनोपाधेरन्यथासिद्धत्वम् न वोपाधिनाऽनुकूलतर्काभावस्यान्यथासिद्धिरित्युक्तमेव। उभयोरनुकूलतर्काभावोपाध्योः विनिगमनाविरहात् दूषकत्वम्, नैकेन अपरस्यान्यथासिद्धिरिति भावः।

**साधारणे** इति टीका। व्यभिचारिणीति शेषः। **विरुद्धसाध्ये** इति टीका। अयं गोः अश्वत्वात् इत्यादौ साध्येन समं साधनस्य सामानाधिकरण्याभावेऽपि सास्नादिमत्त्वस्य उपाधित्वेन स्वीकारात्। विनिगमकाभावं विवृणोति - **उपाध्यभाव** इति टीका। यथोपाधेरात्मलाभार्थम् अनुकूलतर्कविरह उपजीव्यः तथा अनुकूलतर्काभावेऽपि उपाधेः सत्त्वमुपजीव्यम्। अनुकूलतर्काभावे कथमुपाधेरुपजीव्यत्वं तदाह - **उपाध्यभाव** इति टीका। उपाध्यभावे सति यत्रोपाधिरसामान्यपर(रा)न्यत्वं तत्र निरुपाधिसहचारदर्शनमेवानुकूलतर्कः, तथा चोपाधिविरहे सति अनुकूलतर्काभाव एव नास्ति। अनुकूलतर्काभावस्यापि आत्मलाभार्थमुपाधिरवश्यमपेक्षणीय इति भावः। उभयोः अनुकूलतर्काभावोपाध्योः। तथा चानुकूलतर्काभावे उपाधिरुपजीव्यः उपाधौ वाऽनुकूलतर्काभाव उपजीव्यः इत्युक्तमेव। तथा च मिथः उपजीव्यत्वाविशेषः। द्वयोरपि उपजीव्यत्वरूपविनिगमनासाम्ये एकत्राधि[क]बलविरहात् विनिगमनाविरहो द्रष्टव्यः। तथा च विनिगमनाविरहादेवोपाधेर्दूषकत्वम्। ननु साध्यसामानाधिकरण्य-

साध्याभावसामानाधिकरण्ययोः विरुद्धतया साध्यसामानाधिकरण्यावच्छेदकतयोपाधेः सिद्धिरिति मूलोक्तं यथाश्रुतमेव न तत्र निपूरः कार्यः। अयं गौः अश्वत्वात् इत्यत्र गोत्वस्य अश्वत्वेन सह सामानाधिकरण्यविरहात् कुतस्तत्र सास्नावत्त्वस्योपाधित्वमिति। वायुः प्रत्यक्षः प्रमेयत्वात् इत्यत्र उद्भूतरूपवत्त्वस्य साध्यसामानाधिकरण्य-न्यूनवृत्तितया न साध्यसामानाधिकरण्यावच्छेदकत्वमिति ध्येयम्। तथा च पू[र्वम्] अस्मदुक्तविनिगमना-विरहरूपयुक्तिरेवोपाधेर्दूषकत्वे अनुसन्धेया। ननु मूलोक्तं साध्यसामानाधिकरण्यमिति क्वाचित्काभिप्रायेण, क्वचिदिति टीका।

**अन्ये तु यद्व्यावृत्त्या यस्य साधनस्य साध्यं निवर्तते स धर्मस्तत्र हेतौ उपाधिः। स च धर्मो यस्याभावात् पक्षे साध्यसाधनसम्बन्धाभावः यथा आर्द्रेन्धनवत्त्वं, व्यावर्तते हि तद्व्यावृत्त्या धूमवत्त्वमयोगोलके। अत एव तत्र साध्यसाधनसम्बन्धाभावः पक्षे एवं भावत्वव्यावृत्त्या ध्वंसे जन्यत्वानित्यत्वयोः सम्बन्धो निवर्तमानः पक्षधर्मताबलात् अनित्यत्वाभावमादाय सिद्ध्यति, तथा वायौ उद्भूतरूपवत्त्वं निवर्तमानं बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं निवर्तयत् प्रत्यक्षत्वाभावमादाय सिद्ध्यति, तथा चोभयत्रापि पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीति। अत एव बाधानुन्नीतपक्षे-तरस्यानुपाधित्वं स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्तकत्वादिति।**

[**अन्ये इति**] साधनवति साध्याभावाधिकरणीभूतसाधनाधिकरणे अयोगोलोके यद्व्यावृत्त्या आर्द्रेन्धनव्यावृत्त्या लिङ्गेन आर्द्रेन्धनाभावरूपव्याप्येनेत्यर्थः। साधनस्य वह्नेः। साध्यव्यावृत्तिः साध्यस्य धूमस्य व्यावृत्तिरभाव-वद्वृत्तित्वम्। अनुमातुं शक्यते इति योग्यता विवक्षिता। सा च [व्याप्ति-]पक्षधर्मताभ्याम्। सा तूक्तैव। तस्मिन् साधने वह्निरूपे स आर्द्रेन्धनमुपाधिरिति।

**स चेति** मूलम्। धर्म उपाधिरूपः आर्द्रेन्धनप्रभववह्न्यादिरूपः यस्याभावादार्द्रेन्धनप्रभववह्नेरभावात् पक्षे साध्यशून्यसाधनवति। **साध्येति**। साध्यस्य धूमस्य। साधनस्य वह्नेः। सम्बन्धाभावः तत्सामानाधिकरण्याभावः। [32 A] तदेव विवृणोति- **आर्द्रेन्धनवत्त्वमिति**। **अतएवेति** मूलम्। यतएव साध्यसाधनसामानाधिकरण्याभावमुपाधेः।

**पक्षे** इति पदं यथाश्रुताभिप्रायेण दूषयति - **एतच्चेति** टीका। एतदुक्तप्रकारः पक्षावृत्तिः उपाधिः पक्षे अन्यथा **पर्वते धूमवान्** वह्नेरित्यत्र न सम्भवति, पक्षे पर्वते आर्द्रेन्धनव्यावृत्त्यभावात्, न तद्व्यावृत्त्या धूमव्यावृत्तिरिति **भावः**। ह्रदो वह्निमान् ह्रदत्वात् इत्यत्र वह्निसामग्रीरूपोपाधौ तथा बोध्यम्। तथा च वह्निसामग्रीव्यावृत्त्या ह्रदे **वह्निव्यावृत्तिसम्भवादिति भाव**। **तदन्येति** टीका। यत्र पक्षावृत्तिरुपाधिस्तदन्यस्थले अन्यत्रैव पक्षादन्यत्र

व्यभिचारनिरूपकाधिकरण इति यावत्। साधनवति साध्याभावाधिकरणे साधनवति साध्याभावसाधने स्वस्योपाधेः साध्यव्यापकस्याभावेन लिङ्गेन साध्याभावसाधने इत्यर्थः। व्यभिचारज्ञानद्वारा साधनस्य साध्यवद्वृत्तित्वद्वारा तस्योपाधेर्दूषकत्वं व्याप्तिग्रहप्रतिबन्धकत्वम्, न तु सत्प्रतिपक्षोत्थापकतयेत्यर्थः। नन्वेवं तन्निवृत्त्या च निवर्तते साध्यसाधनसम्बन्धाभाव इति न [सं]गच्छते, भवता साध्याभावस्यैव साधनात्। इत्यत आह - **साध्यसाधने**ति टीका। **यत्रे**ति। यत्र साधनवति साध्याभावः साध्यते तत्र साध्यसाधनसम्बन्धाभावोऽप्यस्तीति अभिप्रायेणैव मूलेनोक्तम्-**साध्यसाधनसम्बन्धाभाव** इति। न हि साध्यसाधनसम्बन्धाभावः साध्यते, अपि तु साध्याभाव इति। **अत एवे**ति टीका। यत एव साध्याभावसाधने एव तात्पर्यम् अत एव यद्व्यावृत्त्या साध्यं निवर्तते इत्युक्तम्, न तु साध्यसाधनसम्बन्धो निवर्तते इत्युक्तम्। **अत एवे**ति। यत एव साध्याभावे एव मूलस्य तात्पर्यम् अत एवेति तद्व्यावृत्त्या आर्द्रेन्धनव्यावृत्त्या साधनवति वह्निमिति धूमवत्त्वरूपं साध्यं व्यावर्तते तथा च व्यभिचारज्ञानद्वारा उपाधेर्दूषकत्वमिति भावः।

**अयोगोलके**ति। अयोगोलकं धूमवद्वह्नेः इत्यत्रायोगोलक एव पक्षीकृतः। **तत्रे**ति। यत एव साध्यं धूमो व्यावर्तते अत एव साध्यसाधनसम्बन्धाभावोऽपीत्यर्थः। अन्ये त्वित्यादि ग्रन्थं साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमित्युपाधिलक्षणपरतया ये वर्णयन्ति तन्मतं दूषयति - **अत्रे**ति टीका। **तत्रे**ति टीका। तस्य साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमिति लक्षणस्य पूर्वपक्षे पूर्वपक्षग्रन्थे दूषितत्वात् अव्याप्त्यादिदूषणैर्दूषितत्वात्। दूषणान्तरमाह - **विरुद्धोऽपी**ति टीका। विरुद्धस्थले य उपाधिः यथा अयं गौः अश्वत्वात् इत्यत्र यथा सास्नावत्त्वं तस्य साधनावच्छिन्नसाध्यस्यैवाप्रसिद्धतया न साधनावच्छिन्नसाध्य-व्यापकत्वमिति अस्मिन्मते यद्व्यावृत्त्या सास्नावत्त्वव्यावृत्त्या साधनवत्यश्वत्ववति गोत्वसाध्यं निवर्तते इत्याद्युक्त-प्रकारेण तत्रापि लक्षणसमन्वयः इति भवन्मते तु तत्राव्याप्तिः। **एतेने**ति श्रितेन विरुद्धस्थलीयोपाधावव्याप्तिकथनेन साध्यसाधनसम्बन्धव्यापकत्वे सति [32 B] साधनाव्यापकत्वमित्युपाधिपरमेव। अन्ये त्वित्यादिग्रन्थः इत्यपि दूषितम्। तदेव विवृणोति - **विरुद्धे** इति। विरुद्धे साध्याभावव्याप्यसाधनस्थले अयं गौः अश्वत्वात् इत्यादौ। **साध्ये**ति। साध्यसाधनयोः सम्बन्धाभावः गोत्वाश्वत्वयोः सम्बन्धविरहादित्यर्थः। तदुपाध्यसङ्ग्रहात् विरुद्ध-स्थलीयोपाधेः सास्नावत्त्वादेः असङ्ग्रहः।

**एवमिति** मूलम्। ध्वंसः अनित्यः ध्वंसप्रतियोगीति साध्यम्, अन्यथा ध्वंसप्रागभावप्रतियोगित्वरूप-स्यानित्यत्वस्य सत्त्वात् जन्यत्वादित्यत्र भावत्वमुपाधिः, यतः भावत्वव्यावृत्त्या साधनाधिकरणे जन्यत्वाधिकरणे ध्वंसे साध्यसाधनयोः जन्यत्वानित्यत्वयोः सम्बन्धः जन्यत्वध्वंसप्रतियोगित्वयोः सम्बन्धः घटादौ प्रसिद्धः सामानाधिकरण्यमिति यावत्। पक्षधर्मताबलात् विशेषणवति विशिष्टाभावसिद्धो (द्धिः) विशेष्य(ष्या)भावमादाय

सिद्ध्यतीति पक्षधर्मताबलात् विशेष्याभावसिद्धिस्तथा चानित्यत्वाभावमादाय सिद्ध्यतीति। दृष्टान्तेन तदेव दृढयति - **तथेति**। उभयत्रापि पक्षे वायौ ध्वंसे च। **साध्याभावेति**। विनाशित्वाभावसिद्ध्या प्रत्यक्षत्वाभावसिद्ध्या च। साध्यसाधनसम्बन्धाभावः विनाशित्वजन्यत्वाभावः प्रत्यक्षत्वप्रत्यक्षस्पर्शाश्रयत्वाभावश्च वर्तते। **अत एवेति** मूलम्। यत एव साध्यव्यापकत्वमुपाधेरुक्तं स्वनिवृत्त्या पक्षे साध्याभावसाधकत्वं वा अत एव इत्यर्थः। **बाधानुन्नीतेति** । पर्वतो वह्निमान् धूमात् इत्यत्र पर्वतेतरत्वस्यानुपाधित्वम् उपाधित्वविरहः । तदभावस्य पक्षे साध्याभावासाधकत्वात्, साध्यस्यैव वह्नेः पक्षे वर्तमानत्वात्। तदेव विवृणोति - **स्वघातकत्वेनेति** टीका। उपाधेः स्वव्याघातकत्वं कुतस्तदेव विवृणोति। तेनापि यथा पर्वतो न वह्निमान् पर्वतेतरत्वविरहात् इत्यत्रापि पर्वतेतरत्वमुपाधिः स्यादित्यर्थः। **स्वव्यतिरेकेति** टीका। स्वव्यतिरेकद्वारा स्वस्य पक्षेतरत्वस्य व्यतिरेकद्वारा अभावात्मकलिङ्गज्ञानद्वारा साध्याभावसाधक इत्यर्थः । पक्षे पर्वतादौ साध्याभावसाधने तत्रापि पक्षेतरत्वं पर्वतेतरत्वमुपाधिः स्यात् इत्येव स्वव्याघातकत्वप्रसङ्गेनेत्यस्यार्थः ।

**यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्मत्वं पक्षेतरोऽपि क्वचिदुपाधिः, तत्तदुपाधेस्तु तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वम् । न च धूमवह्निसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम् । आपाद्याप्रसिद्धेरिति । तन्न । अनुमितिप्रतिबन्धकज्ञान-विषयतावच्छेदकमुपाधित्वमिह निरूप्यं तच्च न व्यतिरेकित्वमतिप्रसङ्गात् विशेषलक्षणे वह्निधूमसम्बन्धे पक्षेतरस्योपाधित्वप्रसङ्गात् च ।**

**यत्त्विति** मूलम् । उपाधिमात्रस्य उपाधिसामान्यस्य । व्यतिरेक[कि]धर्मत्वं वृत्तिमत्त्वे सति अत्यन्ता-भावा(व)प्रतियोगित्वम् । गगने अतिव्याप्तिवारणाय वृत्तिमत्त्वे सतीति । न हि गगनं कुत्रापि उपाधिर्भवति । तद्व्यतिरेकेण कुत्रापि साधनवति साध्याभावासाधनात्। गगनस्य केवलान्वयित्वात्। अत्यन्ताभावप्रतियोगित्वं विशेषणं केवलान्वयिन्यतिव्याप्तिवारणाय न हि केवलान्वयी कुत्रापि साध्ये उपाधिर्भवति। तद्व्यतिरेकस्यैवा-प्रसिद्धेः। नन्वेवं पर्वतेतरत्वमपि उपाधिः स्यात् तस्यापि व्यतिरेकिधर्मत्वात्। **क्वचिदिति** मूलम्। पर्वतो जलं पाषाणवत्त्वात् इत्यत्र पर्वतेतरत्वमुपाधिः। ननु कुत्र क उपाधिरिति विशिष्य निर्वक्तव्यमिति। अत आह - **तत्तदिति** मूलम्। तत्तदुपाधेः धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनत्वादेः। ननु वह्निमान् धूमात् इत्यत्र पक्षेतरत्वमुपाधिः स्यात् तस्यापि व्यतिरेकिधर्मत्वात् । व्यतिरेकिधर्मत्वेन साधनेन पक्षेतरस्य [33 A] धूमवह्निसम्बन्धोपाधित्व-मापादनीयमिति शङ्कार्थः ।

**आपाद्येति** टीका। धूमवह्निसम्बन्धोपाधित्वविरहात् धूमस्य वह्निव्याप्यत्वेनारू(?त्वेन निरु)पाधिकत्वात् ।

**साधनव्यापकत्वेनेति** टीका । तत्र साधनव्यापकत्वमित्यकिञ्चित्करं स्वव्यतिरेकाप्रसिद्धेरित्यपि द्रष्टव्यम् । **वह्नीति** टीका । वह्निधूमसम्बन्धस्य निरुप(पा)धित्वात् । **न हीति** टीका । न हि वह्निधूमसम्बन्धोपाधित्वमापाद्यं येनापाद्याप्रसिद्धिः स्यात् । किन्तु वह्निधूमसम्बन्धे पर्वतेतरत्वस्योपाधित्वमापाद्यते । तत्तु प्रसिद्धमेव । **एतच्चेति** टीका । एतत् पक्षेतरत्वस्योपाधित्वं पर्वतेतरत्वस्योपाधित्वं पर्वते बाधितसाध्यके पर्वते बाधितं साध्यं यस्य साधनस्य पर्वतावृत्तिसाध्यकपर्वतवृत्तिहेतौ पर्वतेतरत्वस्योपाधित्वं प्रसिद्धम् । तथा च नापाद्याप्रसिद्धिः । **न चेत्यादि**ग्रन्थस्यान्यथा विवरणं केचित् कुर्वन्ति । धूमाव्यापकत्वेनेति । पर्वतो वह्निमान् धूमात् इत्यत्र धूमाव्यापकत्वेन धूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वेन निश्चिते साधनाव्यापकत्वेन निश्चिते साध्यव्यापकत्वम् आपाद्यं तथा चाप्रसिद्धिः, वह्निव्यापकत्वस्य वह्निसामग्र्याऽप्रसिद्धत्वात् । व्यतिरेकिधर्मत्वमुपाधिलक्षणं दूषयति - **तन्नेति** मूलम् । अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकम् अनुमितिकारणीभूतव्याप्तिज्ञानप्रतिबन्धकव्यभिचारज्ञानं तद्विषयतावच्छेदकं यद् रूपं साध्यव्यभिचारित्वं तन्निरूपितव्याप्यताशालिव्यभिचारिप्रतियोगित्वमुपाधित्वं वाच्यम् । तादृशं चोपाधित्वं न व्यतिरेक(कि)धर्मवत्त्वम् अतिप्रसङ्गात् । वह्निमान् धूमात् इत्यत्र व्यतिरेकिधर्मज्ञानेऽपि अनुमितिकारणीभूतव्याप्तिज्ञानाप्रतिबन्धादिति अर्थः । विशेषलक्षणे साध्यव्यापकत्वे सति साधनाव्यापकत्वलक्षणे वह्निधूमसम्बन्धे पर्वतो वह्निमान् धूमात् इत्यत्रापि पर्वतेतरत्वस्योपाधित्वप्रसङ्गादित्यर्थः । यथा सत्प्रतिपक्षोत्थापकतयाऽपि दूषकत्वं सम्भवत्येव तथा बाधोत्थापकतयाऽपि दूषकत्वम् । उपाधिस्तु न स्वतो दूषकः किन्तु हेत्वाभासोत्थापनद्वारा । तच्च हेत्वाभासत्वं साधारणादिपञ्चहेत्वाभाससाधारणमेवेति भावः । तथा च सत्प्रतिपक्षोत्थापने बाधोत्थापने च यत् प्रयोजकं तदेवाह - **साध्येति** टीका । साध्यव्यापकत्वं तु साध्याभावसाधकतयोपयुज्यते व्यापकाभावस्य व्याप्याभावव्याप्यत्वात् । पक्षावृत्तित्वं पक्षे साध्याभावसाधने साध्यव्यापकाभावरूपव्याप्यस्य पक्षधर्मतालाभाय । यथा ह्रदो वह्निमान् धूमात् इत्यत्र वह्निसामग्र्याः साधनव्यापकत्वेऽपि धूमव्यापकत्वेऽपि साध्यव्यापकतया तदभावस्य साध्याभावव्याप्यतया ह्रदरूपपक्षे वृत्तितया च साध्याभावसाधकत्वं वर्तते एव वह्न्यभावनिरूपितव्याप्तिपक्षधर्मतासत्त्वात् । यथा ह्रदो न वह्निमान् वह्निसामग्रीविरहात् इत्यत्र वह्निसामग्रीविरहस्य व्याप्तिपक्षधर्मतावत्त्वमिति भावः ।

**केचित्तु साधनव्यापकोऽप्युपाधिः क्वचिद् यत्र पक्षावृत्तिर्हेतुः यथा करका पृथिवी कठिनसंयोगात् इत्यत्रानुष्णाशीतस्पर्शवत्त्वम् । न च तत्र स्वरूपासिद्धिरेव दोषः, सर्वत्रोपाधेर्दूषणान्तरसङ्करादित्याहुः । साध्यं च नोपाधिः व्यभिचारसाधने साध्याविशिष्टत्वात् अनुमितिमात्रोच्छेदप्रसङ्गाच्च ।**

**क्वचिदिति** मूलम् । क्वचिद् ह्रदो वह्निमान् धूमात् इत्यादौ । तत्र पक्षावृत्तिः हेतुः, पक्षो ह्रदः, तत्र हेतुर्धूमो

नास्ति। **पक्षावृत्तीति**। साधनव्यापकतानिर्वाहाय। अन्यथा पक्षे हेतुसत्त्वे साध्यव्यापकत्वे सति पक्षावृत्तित्व-रूपोपाधेः न साधनव्यापकत्वसम्भवः पक्षे एव [33 B] साधनाव्यापकत्वादिति तन्निर्वाहाय पक्षावृत्तिर्हेतुरित्युक्तम्। दृष्टान्तेन द्रढयति - **यथेति** मूलम्। करका पृथिवी कठिनसंयोगवत्त्वात् इत्यत्रानुष्णाशीतस्पर्शवत्त्वमुपाधिः अनुष्णाशीतस्पर्शस्य पृथिवीत्वव्यापकत्वात्। तदभावस्य पृथिवीत्वाभावव्याप्यत्वात्। अनुष्णाशीतस्पर्शस्य पक्षावृत्तित्वात्। तदभावस्य पक्षवृत्तित्वात्। कठिनसंयोगाभावे व्याप्तिपक्षधर्मतावत्त्वात्। पृथिवीत्वाभाव-साधकत्वेन करकायां बाधोन्नायकत्वं द्रष्टव्यम्। साध्याभावसाधकत्वेनैव बाधकत्वात्। अनुष्णाशीतस्पर्शस्य पृथिवीत्वव्यापकत्वेन तदभावस्य पृथिवीत्वाभावव्याप्यतया करकावृत्तितया च व्याप्तिपक्षधर्मतावत्त्वम्, करकायां तु न कठिनसंयोगो वर्तते अत एव साधनव्यापकत्वमपि कठिनसंयोगस्य पृथिवीमात्रवृत्तित्वादिति भावः। ननु तत्र किमुपाधिना किं वा तदुन्नीतबाधज्ञानेन ?, अनुमितिप्रतिबन्धस्तु स्वरूपासिद्धेरेव सम्भवादित्यत आह - **न चेति** मूलम्। समाधत्ते - **सर्वत्रेति** मूलम्। सर्वत्र व्यभिचारिणि उपाधेर्दूषणान्तरसत्त्वात्। अन्ततः व्यभिचारस्याप्रयो-जकत्वस्य सत्त्वात्। तथा च तत्तद्दूषणान्तरास्फूर्तिदशायां तत्तदुपयुज्यते इति चेत् तदा प्रकृतेऽपि दीयतां दृष्टिः, तदस्फूर्तिदशायां स्वरूपासिद्ध्यस्फूर्तिदशायां बाधोन्नायकतयोपाधिरुपयुज्यते इति भावः। **आहुरिति** अस्वरसोद्भावनं तद्बीजं तु सर्वतान्त्रिकसम्मतत्वम्। अन्यथा सिद्धसाधनस्यापि आश्रयासिद्ध्युन्नायकतया तस्या-प्युपाधितापत्तेः। न हि हेत्वाभासमात्रोन्नायकतयैवोपाधित्वम् अतिप्रसङ्गादिति भावः। **केचित्त्वित्यादेरनभि-**मतबीजमस्वरसबीजं वर्णयति।

**अत्रेदमिति** टीका। अत्र बाधोन्नायकोपाधौ अस्वरसबीजं सोपाधौ व्यभिचारसाधने अवश्यं व्यभिचार इति सर्वतान्त्रिकसम्मतत्वात्। प्रकृते च व्यभिचारविरहात् पृथिवीत्वस्य कठिनसंयोगाभावव्यापकत्वात्। न हि कठिनसंयोगः पृथिवीत्वव्यभिचारी येन तत्रोपाधिः स्यात्। तथा च व्यभिचारस्योपाधिव्यापकस्य विरहात् कथमुपाधिसत्त्वमिति। अत्राव्यभिचारित्वे उपाधिव्यापकस्य व्यभिचारस्याभावसत्त्वे तदसम्भव उपाधेरसम्भवः। उपाधेर्व्यभिचारव्याप्यत्वमेव नास्तीत्यत आह - **न चेति** टीका। तत्र धूमवद्वह्नेः इत्यत्र व्यभिचारोन्नायकस्य यथा दूषकत्वं तथा वह्निरनुष्णः कृतकत्वात् इत्यत्र बाधोन्नायकस्यापि दूषकत्वं तथा प्रकृतेऽप्यस्तु। तथा च बाधोन्ना-यकतयाऽपि उपाधेर्दूषकत्वम्। न चोपाधेर्व्यभिचारव्याप्यत्वम् अप्रयोजकत्वादिति। एवं हेत्वाभासोन्नायकतयैवो-पाधित्वे। **अनुमितिरिति** टीका। अनुमितेर्विरोधी प्रतिबन्धकतावच्छेदकः। तदुपस्थापकमात्रस्यैव मात्रपदं कात्स्न्यार्थम्। उपाधित्वे उपाधित्वाङ्गीकारे। **अप्रयोजकत्वादेरिति** टीका। अप्रयोजकत्वादेरसिद्ध्युन्नायकत्वा-देरपि। [34 A] **तदन्तर्भावेति**। उपाध्यन्तर्भावापत्तेः। **तत्रेति**। अप्रयोजकत्वादौ। वृद्धव्यवहाराभावात् वृद्धस्य तान्त्रिकस्योपाधित्वेन व्यवहाराभावात्। न तथात्वं न तस्योपाधित्वम् इति यदि तदा **व्यभिचारिणीति**। साधना-व्यापकस्यैव उपाधित्वेन वृद्धव्यवहारात् अस्यापि व्यभिचारशून्यस्य कठिनसंयोगस्य तद्व्यापकस्यानुष्णाशीत-

स्पर्शस्य नोपाधित्वेन तान्त्रिकव्यवहार इति।

**साध्यं चे**ति मूलम्। साध्यं नोपाधिः वादकथायां नोपाधित्वेन उद्भावनीय इति भावः। अन्यथा धूमवान् वह्नेः इत्यत्र धूमस्य साध्यव्यापकतया साधनाव्यापकतया च उपाधित्वं केन वारणीयम् ? परन्तु वादकथायां नोद्भावनीयः तद्व्यभिचारेण साध्यव्यभिचारसाधने साध्याविशेषादिति। अत एवोक्तम् - व्यभिचारे वाऽन्ततः साध्यं स एवोपाधिः, अन्यथा साध्यस्यानुपाधित्वे स ग्रन्थोऽपि न सङ्गच्छेत। वादकथायामुपन्यसनीये बीजमाह - **व्यभिचारसाधने**ति मूलम्। यथा धूमवान् वह्नेः इत्यत्र धूमस्यैवोपाधित्वे धूमव्यभिचारेण धूमव्यभिचारसाधने साध्याविशेषः साध्याविशिष्टत्वादिति। तथा च पक्षे वह्निरूपहेतौ वृत्तित्वसन्देहात् कथं साध्यव्यभिचारं साधयेत्। तथा च पक्षधर्मतानिर्णयस्यैव साध्यसाधकत्वात् प्रकृते च तद्विरहः। एवं व्याप्तिग्रहकाले एव पक्षे साध्यसिद्धिसत्त्वात् पक्षताविरहोऽपि द्रष्टव्यः। ननु सन्दिग्धोपाधिरेवास्तु साध्यम्, न हि सन्दिग्धोपाधिस्थले पक्षधर्मतानिर्णयोऽपेक्ष्यते येन साध्यं नोपाधिः स्यात् इत्याशङ्क्य दूषणान्तरमाह - **अनुमितीति**। अनुमितिमात्रम् अनुमितिकारणीभूतव्याप्तिज्ञानमात्रम्। सर्वत्र साध्यसन्देहेन पक्षे साध्यको(?स्यो)पाधित्वात्। उपाधिसन्देहाधीनसाध्यपक्षीयसाध्यसन्देहस्य प्रतिबन्धकत्वात्। इति अनुमितिमात्रमुच्छिद्येतेत्यर्थः।

यत्र पक्षावृत्तिर्हेतुरित्यत्र पक्षावृत्तिपदस्य कृत्यमाह - **हेतोरि**ति टीका। हेतोः पक्षवृत्तित्वे हेतुव्यापकीभूतोपाधेरपि पक्षवृत्तित्वमवश्यं वाच्यम्। तथा च उपाध्यभावेन पक्षे साध्याभावसाधने उपाध्यभावः पक्षे न वर्तेत। तथा च हेतोः स्वरूपासिद्धतया कथं साध्याभावसाधकत्वम् ? **बाधादी**ति टीका। बाधाद्यनुपस्थापकत्वात् पक्षे साध्याभावासाधकत्वादित्यर्थः। ननु भेदेनैव व्याप्यव्यापकभावे न त्वभेदेनैवेति मतमवलम्ब्याह - **नन्वि**ति मूलम्। साध्यरूपे उपाधौ उक्तलक्षणं साध्यव्यापकत्वे सति साधनाव्यापकत्वरूपम् अव्यापकम्, भेदेनैव व्याप्यव्यापकभावात्। न हि स्वं साध्यं स्वस्य व्यापकम्, स्वस्मिन् स्वभेदविरहात्। तस्य व्यापकत्वस्य स्वाव्यावर्तकत्वात्, स्वस्मिन् वर्तमानत्वात्, व्यापकत्वस्य भेदघटितत्वात् इति भावः। यथा लक्ष्यतावच्छेदके न सङ्ग्राह्यत्वं तथा लक्षणेऽपि न सङ्ग्राह्यत्वम्। लक्ष्यतावच्छेदके असङ्ग्राह्यत्वस्य बीजमाह - **साध्याविशेषादि**ति टीका। तथा च साध्याविशेषात् तद्व्यभिचारेण न स्वा[व्य]भिचारोन्नायकत्वमिति। न यद्व्यभिचारेणेत्यादि लक्ष्यतावच्छेदके न तस्य साध्यस्य सङ्ग्रहः। तथा च लक्ष्यत्वविरहात् तत्र लक्षणागमनेऽपि नाव्याप्तिरिति भावः। अत्रापि लक्षणेऽपि साध्यावैशिष्ट्यस्य प्रकारान्तरेण साध्यतावच्छेदकभिन्नप्रकारेण उपन्यासेन दूषणत्वमित्याशङ्कते - **यद्यपी**ति टीका। [34 B] अयं वह्निः साध्यव्यभिचारी धूमव्यभिचारी धूमव्यापकव्यभिचारित्वात्। उपाधिभेदात् साध्यतावच्छेदकापेक्षया उपाधिव्यभिचारस्य भेदात् न साध्यावे(वै)शिष्ट्यम्, तथा चेत्थं साध्यव्यभिचारस्य साध्यव्यभिचारसाधने लक्ष्यतावच्छेदकाक्रान्ततया तत्र लक्षणमव्याप्तमित्याशङ्कार्थः। समाधत्ते - **तथापी**ति

टीका। साध्यावैशिष्ट्यपदम् *अन्यथा व्याचष्टे* । **साध्यवदिति** *टीका* । *अवैशिष्ट्यम् अविशेषः* । *अविशेषोऽपि* पक्षवृत्तित्वं संशयविषयतया। तथा च वह्निर्धूमव्यभिचारी धूमव्यापकोपाधिव्यभिचारित्वात् इत्यत्र हेतोः वह्नौ धूमव्यभिचारित्ववत् धूमव्यापकव्यभिचारित्वमपि सन्दिग्धमेव इत्येव साध्यावैशिष्ट्यम्। तथा च साध्यव्यभिचारस्य न कदाचिदपि साध्यव्यभिचारोन्नायकत्वमिति साध्यव्यापकव्यभिचारित्वस्य न साध्यव्यभिचारव्यापकतावच्छेदकत्वमिति। तथा च साध्यव्यापकव्यभिचारित्वज्ञानमप्रयोजकत्वशङ्कानिराकरणद्वारोपयुज्यते इत्याह - **उपाधिव्यभिचारित्वमेवेति**। उपाधिव्यभिचारित्वमार्द्रेन्धनप्रभववह्निव्यभिचारित्वम्, तत्र चाप्रयोजकशङ्कायामार्द्रेन्धने साध्यव्यापकतोपन्यासात्। तथा च व्यापकव्यभिचारे व्याप्यव्यभिचारस्यावश्यंभावनियमादिति भावः। तथा च प्रकृते धूमव्यभिचारसाधने धूमव्यभिचार एवार्द्रेन्धनव्यभिचारवत् उपन्यसनीयः। न तु धूमव्यापकव्यभिचारित्वप्रकारेण उपन्यसनीयः। धूमव्यापकत्वस्य धूमार्द्रेन्धनसाधारणस्यैकस्याभावात् विशिष्य विशिष्य वक्तव्यं धूमत्वप्रकारेण आर्द्रेन्धनत्वप्रकारेण। तथा च धूमव्यभिचारित्वेनैवोपन्यसनीयः। इत्थमेव च साध्याविशेष इति भावः। **अत्रेदमिति** टीका। सद्धेतौ वह्निमान् धूमात् इत्यादौ साध्यस्य वह्नेः धूमाव्यापकत्वविरहादेवानुपाधित्वम् उपाधित्वविरहः, कथमनुमितिमात्रोच्छेदप्रसङ्ग इति पूर्वपक्षः। **अनन्तरेति** टीका। साधनव्यापकोऽप्युपाधिरिति वादिमते इदं दूषणम् अनुमितिमात्रोच्छेदरूपं दूषणम्। यत्र पक्षावृत्तिर्हेतुः तत्रैव तस्यावकाशः, प्रकृते तु पक्षे पर्वते धूमस्य वृत्तित्वात् न प्रकृते सम्भवतीति भावः। तथा च कथं मूले अनुमितिमात्रोच्छेदप्रसङ्ग इति चिन्त्यम्। तद्बीजं तु साध्यस्यानुपाधित्वेऽपि उपाधित्वप्रकारेण सन्देहात् तत्संशयाहितसाध्यसंशयस्यानुमितिप्रतिबन्धकत्वात् अनुमितिमात्रोच्छेद इति। न च साध्यनिर्णयस्थले सिसाधयिषयाऽनुमितेरनुच्छेद इति वाच्यम्। तत्रापि प्राचां मते पक्षताघटिततया संशयस्यावश्यं स्वीकारात्। अन्यानाहितपक्षीयसाध्यसन्देहस्यैवाप्रतिबन्धकत्वात्। यन्मते साध्यमप्युपाधिः तन्मते सर्वस्यैव साध्यसंशयस्यान्याहितत्वात् संशयस्थलीयानुमितिमात्रोच्छेदः इति।

## । अथोपाधिविभागः ।

**स चायं द्विविधः निश्चितः सन्दिग्धश्च। साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम्। यत्र साधनाव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशायकत्वेन सन्दिग्धोपाधिः यथा मित्रातनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणतिजत्वम्। न च तेनैव हेतुना शाकपाकजत्वमपि साध्यम्, तत्र श्यामत्वस्योपाधित्वादुभयस्यापि साधने अर्थान्तरं श्यामत्वमात्रे हि**

**विवादो न तूभयत्र । न चैवं धूमात् वह्न्यनुमानेऽपि वह्निसामग्र्युपाधिः स्यात्, तत्र वह्निनेव तत्सामग्र्यापि समं धूमस्यानौपाधिकत्वनिश्चयात्, अत्र तु मित्रातनयत्वव्याप्य-श्यामसामग्र्या स्थातव्यम् इत्यत्र कार्यकारणभावादीनां व्याप्तिग्राहकाणामभावात् ।**

## । अथ उपाधिविभागनिरूपणम् ।

उपाधिविभागसङ्गतिमाह - **प्रसङ्गादिति** टीका । स्मृतस्यापेक्षानर्हत्वात् इति । तथा च सर्वत्रोपाधिव्यभिचारस्य साध्याव्यभिचाराननुमापकत्वेऽपि व्यभिचारसंशायक(को)त्थापनद्वारा सन्दिग्धोपाधेरपि दूषकत्वं मन्वान आह - **स चेति** मूलम् । स चायं निरुक्तोपाधिः द्विविधः - निश्चितः सन्दिग्धश्च । निश्चितः [35 A] साध्यसमानाधिकरणत्वे सति साध्यव्यभिचारिसाधनाव्यापकत्वेन निश्चितः । सन्दिग्धोऽप्युपाधिस्तत्प्रकारेणैव । इत्थं च सद्धेतौ कदाचिदुपाधिभ्रमेणैव तथा सन्देहेऽपि न सन्दिग्धोपाधित्वं साधनस्य साध्यव्यभिचारविरहादिति भावः । निश्चितोपाधिमाह - **साध्यव्यापकत्वेनेति** मूलम् । साध्यव्यापकत्वेन साध्यसमानाधिकरणत्वेन साध्यव्यभिचारि-साधनाव्यापकत्वेन निश्चितः । तेन अवच्छिन्नसाध्यव्यापकस्थले नाव्याप्तिः । व्यापकत्वाभिधानं यन्मूले तद् दूषयत्यभिप्रायेण । व्यापकव्यभिचारे व्याप्यव्यभिचारस्यावश्यंभावात् इति भावः । तदेवोदाहरति - **वह्निमत्त्वेनेति** । वह्निमत्त्वेन वह्निना धूमत्वसाधने मतुपो व्यर्थत्वात् । तथा च धूमवान् वह्नेरित्यत्र आर्द्रेन्धनप्रभववह्निमत्त्वम् आर्द्रेन्धनप्रभववह्निः । ननु उक्तोपाधेः सन्देहदशायामेव सन्दिग्धोपाधित्वेन किं यत्रेत्यादि विशेष्यकथनेनेति चेत्, न, उपाधेः सन्देहमात्रस्य न प्रतिबन्धकत्वं न वा व्यभिचारोन्नायकत्वं न वा तदुन्नीतव्यभिचारज्ञानस्य पक्षीय-स्वारसिकव्यभिचारसंशयवत् प्रतिबन्धकत्वम् । तथा सति जितं **चार्वाकैः**, सर्वत्र साध्यसाधने ऐन्द्रियकोपाधि-सामान्यशून्यत्वग्रहेऽपि अतीन्द्रियोपाधेर्व्यतिरेकं निर्णेतुमशक्यत्वात् । तस्यैव सन्देहात् तदुन्नीतव्यभिचारसन्देहे न कुत्रापि व्याप्तिनिर्णयः स्यात् । तथा च तादृशव्याप्तिनिर्णयविरहादेवानुमितेरप्रामाण्यमिति वादिभिः **चार्वाकैरेव** जितं स्यात् । तथा चोभयवादिसमाधेयतया तादृशसंशयस्याप्रतिबन्धकत्वं वाच्यम् । तथा च उपाधिसामान्यसंशयस्य न प्रतिबन्धकत्वम्, किन्तु विशिष्याकारेणैव । तत्र यो विशेषस्तदाह - **यत्रेति** मूलम् । धूमवान् वह्नेः इत्यत्रापि साध्यव्यापकत्वेन निर्णीतस्यार्द्रेन्धनवह्न्यव्यापकत्वस्य संशयदशायां सन्दिग्धोपाधित्वम्, तत्रैव साधना-व्यापकत्वेन निर्णयदशायां साध्यव्यापकत्वेन संशयदशायामपि सन्दिग्धोपाधित्वम् । एवं तत्रैव साध्य-व्यापकत्वांशेऽपि यदा सन्देहस्तदोभयसन्देहदशायामपि सन्दिग्धोपाधित्वम् । यत्रैव वस्तुत उपाधित्वं तत्रैव सन्देहदशायां सन्दिग्धोपाधित्वम् । न तु वह्निमान् धूमात् इत्यत्र व्यञ्जनवत्त्वादेः साध्यव्यापकत्वदशायां सन्दिग्धोपाधित्वम्, वस्तुतस्तत्र उपाधिविरिहात् । न हि भ्रमात् वस्तुसिद्धिः । व्याप्तिग्रहप्रतिबन्धस्तु बाधभ्रमात् ।

अनुमितिप्रतिबन्धवत् व्यभिचारभ्रमात् व्याप्तिग्रहप्रतिबन्धेऽपि न क्षतिरिति। न हि तत्र भ्रमात् वस्तुतो बाधसिद्धिरिति भावः। गर्भस्थमित्रातनये मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकत्वेन गृहीतशाकपाकजत्वस्य सन्देहे सौकर्यात् तदेवोदाहरति - **मित्रातनयत्वेने**त्यादि मूलम्। मित्रातनयत्वेन सा गर्भस्था व्यक्तिः श्यामा मित्रातनयत्वात् इत्यत्र शाकाद्याहारपरिणतिजत्वं शाकपाकजत्वमिति यावत्। शाकाहारपरिणामेन जायते यो रसस्तेन आरभ्यते यद्वपुस्तत् श्यामं भवतीति वैद्यकाद् गृहीतं तादृशरसारभ्यत्वं गर्भस्थशरीरे [35 B] वर्तते न वेति सन्देहात् साधना-व्यापकत्वसन्देहेन सन्दिग्धोपाधित्वम्। **तत्रे**ति मूलम्। तत्र मित्रातनयत्वहेतोः श्यामत्वव्यभिचारसंशयाधायकत्वेन सन्दिग्धोपाधित्वम्। न तु प्रकृते श्यामत्वरूपसाध्यव्यापकत्वेन गृहीतस्य साधनाव्यापकत्वसन्देहादेवोपाधेः सन्देहो वाच्यः। तत्र बहिःस्थेषु मित्रातनयेषु कार्यत्वेन श्यामत्वेनैव कारणस्य शाकपाकजत्वस्यानुमानान्न तत्र साधनाव्यापकत्वम्। गर्भस्थव्यक्तौ तु कार्यस्य श्यामत्वस्य सन्देहात् न शाकपाकजत्वस्य निर्णयः तन्निर्णायकत्व-विरहात्। तत्रैव साधनाव्यापकत्वसन्देहात् तदेव सन्दिग्धोपाधेरुदाहरणम्। तत्र च शाकपाकजत्वस्य निर्णायकं हेतुमुपन्यस्य सन्दिग्धोपाधेरुदाहरणं दूषयितुमाशङ्कते - **न चे**ति मूलम्। **तेनैव हेतुना** [मित्रातनयत्वेनैव हेतुना]। **श्यामत्वस्ये**ति मूलम्। श्यामत्वमुपाधिः, श्यामत्वस्य मित्रातनयत्वावच्छिन्नशाकपाकजत्वरूपसाध्यव्यापकत्वात्। गर्भस्थमित्रातनये साधनाव्यापकत्वसन्देहात् स एव सन्दिग्धोपाधेरुदाहरणं भविष्यतीति भावः। तथा च सन्दिग्धोपाधेरिदमेवोदाहरणं भविष्यतीति। तथा चोदाहरणविरहात् न सन्दिग्धोपाधेरसिद्धिरिति भावः। ननु न तदपि उदाहरणं भविष्यति, मित्रातनयत्वेन हेतुना गर्भस्थे मित्रातनये शाकपाकजत्ववत् श्यामत्वस्यापि साधनात् तथा च साधनाव्यापकसन्देहविरहात् न सन्दिग्धोपाधित्वमिति कथं सन्दिग्धोपाधित्वेन तदुदाहृतमित्याशङ्कार्थः। समाधत्ते - **अर्थान्तरमि**ति। अनभिमतसाध्यसाधने एवार्थान्तरत्वम्। तथा चात्र श्यामत्वे एव विवादात् तस्यैव साधनौचित्यात् शाकपाकजत्वसाधनस्य अर्थान्तरत्वमिति। यदि चोभयत्रापि विवादः इति स्वीक्रियते तदोभयोः साध्ययोस्तत्र सन्देहात् मिथः सन्दिग्धोपाधित्वमक्षतमिति। न चोदाहरणविरहात् सन्दिग्धोपाधित्वं नेत्यपि निर्णीतम्।

**आपातत** इति टीका। यत्र विवादस्तदसिद्धावेतन्पमा(तन्मा)त्रसाधने एवार्थान्तरमित्यभिप्रायेणाह - आपातत इति। उभयसाधने श्यामत्वशाकपाकजत्वयोः साधने। **प्रत्येकमि**ति। स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वमुपाधिः, स शाकपाकजः मित्रातनयत्वादित्यत्र श्यामत्वमुपाधिरिति दूषणं द्रष्टव्यम्।

भ्रान्तः शङ्कते - **न चैवमि**ति मूलम्। एवं साध्यव्यापकत्वादिसन्देहात् सन्दिग्धोपाधित्वे। **धूमादि**ति। वह्निमान् धूमात् इत्यत्र वह्निसामग्री उपाधिः स्यात्। **वह्निसामग्री**ति। सामग्र्या अतीन्द्रियत्वात् तस्या एव सन्दिग्धोपाधित्वमुपन्यस्तम्। **वह्निनेवे**ति मूलम्। यथा वह्नेः धूमव्यापकत्वं तथा वह्निसामग्र्या अपि धूमव्यापकत्वं

व्यापकव्यापकस्य सुतरां व्यापकत्वात्। तथा च न धूमाव्यापकत्वं वह्निसामग्र्याः इति साधनाव्यापकत्वविरहात् न तस्या उपाधित्वम्, उपाधित्वविरहादेव न सन्दिग्धोपाधित्वं सन्दिग्धोपाधित्वस्योपाधित्वव्याप्यत्वात्। वह्निमान् धूमात् इत्यत्र वह्निसामग्रीतो वैलक्षण्यं श्यामसामग्र्या आह - **अत्रेति** मूलम्। अत्र स श्यामो मित्रातनयत्वात् इत्यत्र श्यामसामग्र्याः सन्दिग्धोपाधित्वं स्यादेवेति। न तु वह्निसामग्र्या यथा धूमे अनुपाधित्वं तथा श्यामसामग्र्या अपि मित्रातनये अनुपाधित्वं स्यात् इत्यत [36 A] आह - **मित्रातनयत्वेति**। मित्रातनयत्व-श्यामत्वव्याप्यश्यामसामग्र्या स्थातव्यमित्यत्र व्याप्तिग्राहकाभावादिति योजना। तथा च श्यामत्वं न श्यामसामग्र्या व्याप्यं तादृशव्याप्तिग्राहकविरहादिति श्यामसामग्र्याः सन्दिग्धोपाधित्वम्। न हि मित्रातनयत्वेन श्यामसामग्रीत्वेन कार्यकारणभावः येन श्यामसामग्र्या व्याप्यं मित्रातनयत्वं स्यादिति भावः। वह्निसामग्र्यास्तु धूमव्यापकत्वमनायत्या स्वीकर्तव्यम्। वह्निसामग्रीत्वेन वह्नित्वेन कार्यकारणभावः। वह्निव्यापकत्वं वह्निसामग्र्याः। वह्नित्वेन धूमत्वेन कार्यकारणभावात् धूमव्यापकत्वं वह्नेः। तथा च व्यापकव्यापकस्य सुतरां व्यापकत्वात् वह्निसामग्र्याः धूमव्यापकत्वं न सन्दिग्धमेवेति न सन्दिग्धोपाधित्वम्।

**अत एव साध्यसामग्र्या सह हेतोरपि यत्र व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधिः, यत्र तु तन्नास्ति तत्र साप्युपाधिरित्यभिसन्धाय सामग्री च क्वचिन्नोपाधिर्न तु सर्वत्र इत्युक्तम्, यथा तुल्ययोगक्षेमयोरुपाधेर्व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वाणु-त्वादिः, यथा च शाकपाकजत्वस्य साध्यव्यापकतासन्देहे मित्रातनयत्वे। यत्तु उपाधि-सन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोग इति। तन्न। सन्दिग्धानैकान्तिकवत् व्यभिचारसंशयाधायकत्वेन दूषकत्वादुपाधेरिव व्यभिचार-निश्चयाधायकतया।**

**अत एवेति** मूलम्। यत एव साध्यव्यापकत्वसाधनाव्यापकत्वघटितं सन्दिग्धोपाधित्वमुक्तमत एव सामग्री च कुत्रचिन्नोपाधिर्न तु सर्वत्रेत्युक्तमिति योजना। यत्र सामग्र्या नोपाधित्वं तदेव विवृणोति - **साध्येति**। **साध्य-सामग्र्या** वह्निमान् धूमात् इत्यत्र वह्निसामग्र्या। **व्याप्तिग्राहकम्** धूमेन सह व्याप्तिग्राहकम्। व्याप्तिग्राहकः धूमवह्न्योः व्याप्तिग्राहकः कार्यकारणभावः। स एव कार्यकारणभावः धूमवह्निसामग्र्योरपि परम्परया व्याप्तिग्राहकः। **तत्र** च वह्निमान् धूमात् इत्यत्र **सामग्री** वह्निसामग्री **नोपाधिः**। **यत्र** स श्यामो मित्रातनयत्वात् इत्यत्र। **तत्** श्यामसामग्रीमित्रतनयत्वयोर्व्याप्तिग्राहकं **नास्ति**। **तत्र** श्यामो मित्रातनयत्वात् इत्यत्र श्यामसामग्री उपाधिः। ग्रन्थान्तरं संवादयति - **उक्तमिति**। उक्तं क्वचिदित्यनेन। तथा च क्वचिन्नोपाधिरित्युक्तौ न सर्वत्रेति लभ्यते। तथा

च सामग्री कुत्रचिदुपाधिः भवत्येवेति ग्रन्थान्तरस्यापि भावार्थोऽपि सङ्गच्छते इति। साधनाव्यापकत्वसन्देहात् उपाधिसन्देहेन सन्दिग्धोपाधिं दर्शयित्वा साध्यव्यापकत्वसन्देहेन उपाधिसन्देहात् सन्दिग्धोपाधिं दर्शयति - **यथेति** मूलम्। ईश्वरानुमाने इति परमताव(तमव)लम्ब्य, स्वमते नु(न)। क्षितिः सकर्तृका कार्यत्वात् इत्यत्र कार्यत्वस्य सकर्तृकत्वस्य त्वौपाधिकत्वात् वह्निमान् धूमात् इत्यत्र व्यञ्जनवत्त्ववत्। अनणुत्वं शरीरजन्यत्वं च नोपाधिः अत एव न तस्य सन्दिग्धोपाधित्वमिति परमतमवलम्ब्यैव तदुक्तम्। क्षितिः सकर्तृका कार्यत्वात् इत्यत्र यथा कार्यत्वसकर्तृकत्वयोर्व्याप्तिग्रहः तथा सकर्तृकत्वानणुत्वयोरेवं सकर्तृकत्वशरीरजन्यत्वयोः व्याप्तिग्राहक-साम्या(त्) कार्यत्वसकर्तृकत्वयोर्व्याप्तिग्राहकतर्कास्फुरणदशायाम् उपाधेः अनणुत्वस्य शरीरजन्यत्वस्य च [1]साध्यव्यापकतासन्देहदशायां साध्यव्यापकसन्देहेन सन्दिग्धोपाधित्वमिति। वस्तुतस्तु सकर्तृकत्वकार्यत्वयो-र्व्याप्तिग्राहकतर्कस्फुरणे सकर्तृकत्वव्याप्यकार्यत्वाव्यापकत्वेन उपाधेरनणुत्वादेः न सकर्तृकत्वरूपसाध्यव्यापक-त्वमिति ध्येयम्। स्वमतेनाह - **यथेति** मूलम्। एतेषां मते तृतीयम्। साध्यव्यापकत्वसाधनाव्यापकत्वसन्देहात् यत्र सन्दिग्धोपाधिसन्देहस्तदाह - **यथेति** मूलम्। स श्यामो मित्रातनयत्वात् इत्यत्र शाकपाकजत्वस्य साध्यव्यापकत्वसन्देहे साधनाव्यापकत्वसन्देहस्तु [36 B] गर्भस्थे मित्रातनये वर्तते एवेति उभयसंशयस्थले सन्दिग्धोपाधित्वमुदाहृतम्। ननु येषां मतेऽनौपाधिकत्वं व्याप्तिः तन्मते उपाधेर्व्याप्यत्वासिद्धतया स्वतन्त्रे एव हेत्वाभासतया तदुद्भावने वादिनो निरासात्। येषां मते तु अनौपाधिकत्वं न व्याप्तिः तन्मते उपाधेर्न व्याप्यत्वा-सिद्धत्वम्। तथा च तदुद्भावने वादिनो निग्रहः स्यादिति अनु(नौ)पाधिकत्वव्याप्तिभिन्नत्ववादिनं प्रत्याशङ्कते - **यत्त्विति**। उपाधिसन्देहः स श्यामो मित्रातनयत्वात् इत्यत्र शाकपाकजत्वसंदेहः गर्भस्थमित्रातनय इति शेषः। नोपाधिः न श्यामत्वरूपसाध्यव्यभिचारोन्नायक इति। तत्रोन्नायकत्वस्य व्याप्तिपक्षधर्मत्वेन निर्णयस्य स्वरूप-योग्यत्वस्योक्तत्वात्। तच्च न प्रकृते पक्षधर्मतासन्देहात्। न वा अस्मदुक्तानुपाधित्ववत् भवन्मतेऽप्यनु(नौ)पा-धिकत्वं व्याप्तिः येन व्याप्यत्वासिद्धतया हेत्वाभासान्तरं स्यादित्याशङ्कते - **न वेति** मूलम्। तदुद्भावने सन्दिग्धो-पाधेरुद्भावने प्रतिवादिनो निग्रहः स्यात्। तत्र निग्रहस्थानमाह - **निरनुयोज्यानुयोग** इति मूलम्। निरनुयोज्यस्य निर्दोषस्यानुयोगः दोषोद्भावनं निरनुयोज्यानुयोग इति यद् दूषणं सन्दिग्धोपाधिमुपन्यस्तं तस्य दूषणत्वविरहात् वादिनो निरनुयोज्यत्वम्, तत्र सन्दिग्धोपाधिमुपन्यस्य ''निगृहीतोऽसि'' इति अनुयोगकरणे येनानुयोगः क्रियते तस्यैव निग्रहो भवति इति सन्दिग्धोपाध्युद्भावने निरनुयोज्यानुयोग इत्याशङ्कार्थः।

**दूषणमात्र** इति टीका। तत्कारणस्य वा साक्षात्प्रतिबन्धकत्वस्यैव हेत्वाभासत्वात्। उपाधेस्तु व्यभिचारो-त्थापनद्वारैव व्याप्तिग्रहप्रतिबन्धकत्वम्। अत एव वक्ष्यते परमुखनिरीक्षकतया सिद्धसाधनवत् न पृथक् इति। तथा च न निरनुयोज्यानुयोग इति भावः। प्रथमे स श्यामो मित्रातनयत्वात् इत्यत्र सन्दिग्धोपाधिना साध्याभाववति

---

१. साध्य = सकर्तृकत्व इति प्रतौ टिप्पणी।

निश्चितसाध्याभाववति शुक्लघटादौ न साधनसन्देहः न मित्रातनयत्वस्य सन्देह आधीयते येन निरुक्तसंशयाधायकत्वेनोपाधेर्दूषकत्वं स्यात् । निरुक्तश्च दूषणावहव्यभिचारसंशयः साध्याभावांशे निश्चयहेतोः वृत्तित्वे संशयरूपः, स च प्रकृते न सम्भवति साध्याभावांशे एव सन्देहात् मित्रातनयत्वस्य साधनस्य गर्भस्थव्यक्तौ वृत्तित्वांशे निश्चयाच्च। किन्तु साध्याभावसंशयाधायकत्वेनैवोपाधेर्दूषकत्वं वाच्यम्, स च सन्देहो न दूषणावहः, सुतरां तदुद्भावकस्योपाधिसन्देहस्य न दूषकत्वम्, तथा च तदुद्भावने निरनुयोज्यानुयोग इति भावः । तदेव विवृणोति - **किञ्चि[दि]त्यादिना**। साधनवति पक्षे गर्भस्थमित्रातनये पक्षसमे वेति। न हि पक्षे पक्षसमे व्यभिचारो दोषायेति स्फोरणाय स्वेति स्वस्य शाकपाकजत्वस्य व्यावृत्तिसन्देहेन अभावसन्देहेन साध्याभावसन्देहः श्यामत्वाभावसन्देहः, स च श्यामत्वरूपस्य साध्यस्याभावांशे सन्देहात्मकः मित्रातनयत्वरूपस्य हेतोः वृत्तित्वांशे निश्चयातत्मकः सन्देहो न [37 A] व्यभिचारसंशयतया प्रतिबन्धक इत्यर्थः । **अनुमानमात्रेति** । मात्रपदं कात्स्न्यार्थकं तथा च अनुमानसामान्योच्छेदापत्तिः । कुतः ? सर्वत्र पक्षे साध्यस्य संशयात् हेतोश्च पक्षवृत्तित्वनिश्चयात्। तथा चेत्थं व्यभिचारसंशयस्य सर्वत्र विद्यमानत्वात् अनुमानमात्रोच्छेदापत्तेरित्यर्थः । इदमपि प्राचां मतमवलम्ब्य । प्राचां मते सन्दिग्धसाध्यधर्मा धर्मी पक्षः इति पक्षताङ्गीकारात् । पक्षतानुरोधेन सर्वत्र साध्यसन्देहस्य स्वीकारात् । तत्र च साध्यनिर्णया(यो) न र्व(व)र्तते । सिसाधयिषयाऽनुमितिस्तत्रापि तन्मते आहार्यसंशयस्वीकारात् । वस्तुतस्तु सन्दिग्धस्थले एवानुमितिः प्रवर्तते । सन्दिग्धे हि न्यायः प्रवर्तते इति न्यायात्। तत्र सिद्धे सन्दिग्धे पदारूढे अनुमाने निश्चितस्थलेऽपि तत्कल्पते, अनुभवानुरोधात्। यदि च सन्दिग्धे अनुमानं न सिद्धयेत उपदर्शितव्यभिचारसंशयस्य सर्वत्र सत्त्वात् तत्र चानुमानस्यासिद्धौ तदधीनव्यवहारादिकं न सिद्धयेत इति बहुव्याकुलीस्यादिति। एवं निश्चितस्थलेऽपि कथमनुमानं भविष्यति, व्यवहारादेः प्रत्यक्षादिनैव सम्भवात् । इत्यनुमानमात्रोच्छेदापत्तेरित्यस्यार्थः। तस्मात् सन्दिग्धोपाधिना कृतव्यभिचारसंशयस्यानुमानमात्रोच्छेदादेवाप्रतिबन्धकत्वात् तस्यादूषणत्वेन तदुन्नायकस्य सन्दिग्धोपाधेः सुतरामदूषकत्वम्। तथा च श्यामो मित्रातनयत्वात् इत्यत्र शाकपाकजत्वस्योपाधित्वेनादूषणतयोद्भावने निरनुयोज्यानुयोगप्रसङ्गतया उपाध्युद्भावनकर्तुर्वादिन एव निग्रहः स्यात् इति। **यद्यपीत्याशङ्कार्थः**। समाधत्ते - **तथापीति** टीका। तदुच्छेदभिया अनुमानमात्रोच्छेदभिया स्वरसवाहिनः स्वारस्ये कस्यान्यान्य(ना)हितस्येति यावत्। साध्याभावांशे सया(संशया)त्मकहेतोर्वृत्तित्वांशे निश्चयात्मकसंशयस्यान्यानाहितस्याप्रतिबन्धकत्वेऽपि। **अन्याहितस्येति**। अन्यस्तु उपाधिसन्देहो अप्रयोजकत्वादि[ति], तेन[ना]हितः तज्जनि[तः]। तत्संशयस्य प्रतिबन्धकत्वं वाच्यमेवेति। फलबलात् तथानुभवात्। फलं तावत् प्रकृते व्याप्तिग्रहप्रतिबन्धः, सन्दिग्धोपाधिस्थले व्याप्तिग्रहस्य स श्यामो मित्रातनयत्वात् इत्यादौ शाकपाकजत्वस्य उपाधित्वेन सन्देहदशायाम् अनुमितिकारणीभूतव्याप्तिग्रहप्रतिबन्धदर्शनरूपफलबलेन उपाधिसंशयाहित[त]थाविधव्यभिचारसंशयोऽपि प्रतिबन्धकः । तथा च तत्संशयस्य दूषकत्वे तदुद्भावनक्षमस्य

सन्दिग्धोपाधेरपि दूषणत्वेन न निरनुयोज्यानुयोगप्रसङ्गः। न वा तदुद्भावयिर्नि(वने नि)ग्रहापत्तिरिति न वा त्वदुक्त-बाधकस्यानुमानमात्रस्योच्छेदस्य प्रसङ्गः । अन्यानाहितव्यभिचारसंशयस्याप्रतिबन्धकत्वात् अन्यानाहित-साध्यसंशयस्थले एवानुमानप्रवृत्तेरप्रत्यूहतया तत्रैवानुमानप्रवृत्तेन(र्ना)नुमानमात्रोच्छेदप्रसङ्ग इति भावः दृष्टः। अन्याहितव्यभिचारसंशयस्य प्रतिबन्धकत्वं दृष्टान्तेन द्रढयति - **अत एवेति**। यत एवाहितव्यभिचारसंशयस्य प्रतिबन्धकत्वमत एव क्षित्यादिकं द्विकर्तृकं कार्यत्वात् घटवत् [37 B] इत्यत्र यथा घटे कुलालरूपम् ईश्वररूपं चादाय द्विकर्तृकत्वं तथा द्व्यणुकादावपि स्यात्, इत्यत्राप्रयोजकत्वमुद्भाव्यम्, कार्यत्वेन कर्तृत्वेन एव कार्यकारण-भावात् न तु द्विकर्तृकत्वेन । तत्र चाप्रयोजकत्वेन जनितव्यभिचारसंशयस्य द्विकर्तृकत्वरूपसाध्याभावांशे संशयात्मक[स्य] कार्यत्वरूपवृत्तित्वांशे निश्चयात्मकस्य व्यभिचारसंशयस्य यथा प्रतिबन्धकत्वं तथा प्रकृतेऽ-पीत्यर्थः। इत्थं च साध्याभावांशे संशयात्मक[स्य] वृत्तित्वांशे निश्चयात्मक[स्य] व्याप्तिग्रहत्वेन प्रतिबध्यत्वं स्वारसिकत्वं वाऽन्यानाहितत्वमित्युक्तमेव। अन्याहितो यो यः संशयः तद्भेदकूटस्यैवावच्छेदकत्वात्। तथा च यादृशयादृशव्यभिचारसंशयसत्त्वेन व्याप्तिग्रहः तद्भिन्नमेव स्वारसिकत्वं वक्तव्यम्, तथा च भेदकूटघटितत्वात् दुर्ज्ञेयत्वमित्यस्वरसमादाय। **यद्वेति** टीका। उपाध्यादिसन्देहेन। आदिपदात् अप्रयोजकत्वादिसंशयपरिग्रहः। तथा चोपाध्यादिसन्देहात् साध्यस्य उत्कटकोटिकः संशयः आधीयते उत्पाद्यते इति। फलबलात् अनुमितिकारणी-भूतव्याप्तिग्रहप्रतिबन्धदर्शनबलेन तस्य साध्याभावांशे उत्कटकोटिक[संशयात्मकस्य] वृत्तित्वांशे निश्चयात्मकस्य प्रतिबन्धदर्शनात् स्वारसिकत्वम् उत्कटकोटिकसंशयातिरिक्तसंशयत्वम्। तथा च पक्षताघटकीभूतः संशयस्तु नोत्कटकोटिक इति नानुमानमात्रोच्छेदः न वा उपाध्युद्भावने निरनुयोज्यानुयोग इति सर्वं समञ्जसम्। केषाञ्चिन्मत[म्] उपन्यस्यति। **यद्यपीति** टीका। उपाधिसन्देहः स्वरूपसत् ज्ञानाविषय एव प्रतिबन्धकः। ननु संशयस्यापि ज्ञानं प्रतिबन्धकम्, तथा च न तस्य हेत्वाभासत्वम्, ज्ञानविषयतया प्रतिबन्धकस्यैव हेत्वाभासत्वात्। हेत्वाभासभिन्नतया तदुद्भावने निरनुयोज्यानुयोगः स्यादिति भावः। **परं प्रति** प्रतिवादिनं प्रति। **तदुद्भावने** सन्दिग्धोपाधेरुद्भावने। **तदुद्भावनं तज्ज्ञापकं तद्व्यभिचारः**। तस्य ज्ञापकं तत्संशयरूपज्ञानजनकम्, न तु तदुत्पादकः। **तस्य** व्यभिचारस्य साध्याभाववद्वृत्तित्वस्य न उत्पादकं न जनकम् इति यदुक्तं तदकिञ्चित्करमिति। न हि हेत्वाभासव्याप्यानामपि प्रतिबन्धकत्वम्। तथा सति सत्प्रतिपक्षस्थले साध्याभावव्याप्यव्याप्यानामपि प्रतिबन्धकत्वं स्यात्। तथा चोपाधिज्ञानं न प्रतिबन्धकम्। तदुद्भावनमकिञ्चित्करं प्रतिवादिनो न किञ्चित् करोति इत्यर्थः। तथा च निरनुयोज्यानुयोग इत्याद्युक्तदोषस्तदवस्थ एवेति। **यद्यपीति** आशङ्कार्थः। समाधत्ते - **तथापीति** टीका। सन्देहज्ञापनमुखेन व्यभिचारसंशयज्ञापकमुखेन तद्द्वारा पराभिमतव्याप्तिः मित्रातनयत्वश्यामत्वयोः सम्बन्धरूपा, वस्तुतस्तस्य व्याप्तित्वविरहात्। पराभिमतेति परेषामभिमानमात्रम्, न तु तत्र वस्तुतो व्याप्तिरित्यर्थः। गौरमित्रातनये एव व्यभिचारस्य स्फुटत्वात्। साधकमानं [38 A] व्याप्तिग्राहकं तदभावः, तस्य प्रदर्शनपरं तज्ज्ञापकपरम्। तथा च व्याप्तिग्राहकं व्यभिचारादर्शनसहकृतसहचारदर्शनं व्याप्तिग्राहकं तदैव व्याप्तेः साधकमानं तस्याभावो

व्यभिचारदर्शनं तस्य जनकमुपाधिसन्देहः । तथा चोपाधिसन्देहस्य स्वतोऽदूषकत्वेऽपि व्यभिचारसंशयद्वारा दूषकतायामुपयुज्यते । **यथासिद्ध(द्धेति)** । स्वतोऽदूषकत्वेऽपि आश्रयासिद्धिरूपपक्षविघटनद्वारा सिद्धसाधनं दूषकतायामुपयुज्यते, तथा व्यभिचारसंशयद्वारा उपाधिज्ञानमुपयुज्यते इति भावः । परस्य पतिवादिनः । तत्र व्याप्तौ साधकाभावं व्यभिचारादर्शनस्य साधकस्याभावं व्यभिचारदर्शनमापादयन् जनयन् तत्संशयं व्याप्तिसंशय-मापादयतीति सप्रयोजनं सन्दिग्धोपाधेरुद्भावनं सप्रयोजनं तथा च निग्रहस्थानमिति भावः । **आहुरिति** अस्वरसोद्भावनम् । तद्बीजं तु उपाधिसन्देहात् उपाध्यभावस्य साध्याभावव्याप्यतया व्याप्यसन्देहस्य व्यापक-सन्देहजनकत्वात् व्यभिचारसंशयस्यैव व्यभिचारनिश्चय एव । व्याप्तिग्रह[प्रति]बन्धकत्वेन ऋजुवर्त्मनैव सन्दिग्धो-पाधेर्दूषकत्वेन किं व्याप्तिग्रहे साधकमानाभावप्रदर्शनमुखेन व्याप्तिसन्देहद्वारा प्रतिबन्धकत्वेन ?, व्याप्तिसन्देह-स्याप्रतिबन्धकत्वात् । व्याप्तिनिश्चयस्य कारणत्वात् व्याप्तिसन्देहदशायां व्याप्तिनिश्चयस्य कारणस्याभावा-देवानुमितेरनुत्पादोऽस्तु, किं व्याप्तिसन्देहस्य प्रतिबन्धकत्वेन ? तदेव प्रतिबन्धकं स्वाभावातिरिक्तसकल-सामग्रीसत्त्वे यत्सत्त्वे कार्यानुत्पादः । न हि प्रकृते तथात्वं व्याप्तिसन्देहदशायां व्याप्तिनिश्चियस्यैवाभावात् । न वा व्याप्तिनिश्चये व्याप्तिसंशयः प्रतिबन्धकः ग्राह्यसंशयस्यैव प्रतिबन्धकत्वादिति भावः । अत्र नव्याः पक्षीयव्यभिचार-संशयोऽपि प्रतिबन्धकः, न चानुमानमात्रमुच्छिद्येत । व्याप्तिनिश्चयदशायां व्यभिचारसंशयेन किं कर्तव्यम् ?, तत्कर्तव्यस्य व्याप्तिग्रहप्रतिबन्धस्याशक्यत्वात् व्याप्तिग्रहस्योत्पन्नत्वात् । अत एवोक्तं हेत्वाभासे करणे पूरणे किमसिद्ध्या करणे व्याप्तिनिश्चये पूरणे उत्पन्ने सति किमसिद्ध्या किं व्यभिचारज्ञानेन प्रतिबन्धकत्वेन । प्रति-बन्धकं तावत् कार्यस्योत्पत्तिं विरुणद्धि, न तु स्थितिं विरुणद्धि । तथा च सामान्यतः व्यभिचारज्ञानत्वेन प्रतिबन्धकत्वं न तु स्वारसिकसंशयातिरिक्तव्यभिचारज्ञानत्वेन गौरवात् इति भावः । इत्युपाधिटिप्पणम् ।

## । अथोपाधेर्दूषकताबीजम् ।

**इदानीमुपाधेर्दूषकताबीजं चिन्त्यते । नाप्यस्य स्वव्यतिरेकद्वारा सत्प्रतिपक्षत्वेन दूषकत्वम्, तदा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवत् उपाधेरुद्भावनं न स्यात् । न च प्रतिपक्षबाहुल्येनाधिकबलार्थमुद्भावनम्, शतमप्यन्धानां न पश्यतीति न्यायात् एकेनापि बहूनां प्रतिबन्धाच्च, व्याप्तिपक्षधर्मते हि बलं तच्च तुल्यमेव, न तु भूयस्त्वमपि, एकस्मा-दप्यनुमितेः सन्दिग्धोपाधेरदूषकतापाताच्च तद्व्यतिरेकस्य सन्दिग्धत्वात् ।**

### । अथोपाधेर्दूषकताबीजं निरूप्यते ।

प्रसङ्गादुपाधेर्दूषकताबीजं निरूपयति । प्रसङ्गश्च स्मृतस्योपेक्षानर्हत्वम् । उपेक्षानर्हत्वं हि तदा स्यात् यदि

तन्निरूपणस्येष्टसाधनत्वं स्यात् । इष्टसाधनत्वं च प्रकृते वर्तत एव तत्त्वनिर्णयविजयप्रयोजनद्वारा । यद्वा स्वव्यभिचारेणेत्यादिलक्ष्यतावच्छेदकलक्षणोपोद्घातसङ्गत्या उपाधेर्दूषकताबीजं व्यभिचारोन्नायकत्वं स्थापयति [38 B] । **इदानीमिति** मूलम् । इदानीमुपाधिलक्षणपरीक्षानिरूपणानन्तरं दूषकताबीजं हेत्वाभासोत्थापनं तस्य स्वतो दूषकत्वात् । **नाप्यस्येति** मूलम् । अस्योपाधेः न स्वव्यतिरेकद्वारा प्रतिबन्धकत्वम् । स्वस्योपाधेः व्यतिरेकः साध्यव्यापकाभावतया साध्याभावव्याप्यो भविष्यति । उपाधेश्च पक्षावृत्तित्वात् पक्षधर्मोऽपि तथा च साध्याभावसाधको भविष्यति । यथा स्थापनाहेतुना साध्यं साध्यते तथा साध्याभावहेतुनाऽपि साध्याभावः साध्यते इति सत्प्रतिपक्षोत्थापकत्वम् । एतद्वादिमते च साध्यव्यापकत्वे सति पक्षावृत्तित्वमेवोपाधेर्लक्षणं भविष्यति । साध्यव्यापकत्वेन तदभावस्य उपाध्यभावस्य साध्याभावव्याप्यत्वं सत्प्रतिपक्षतायामुपयुज्यते । पक्षावृत्तित्वेनोपाध्यभावस्य पक्षधर्मतालाभः तथा च साध्याभावनिरूपितव्याप्तिपक्षतावत्त्वादुपाध्यभावस्य साध्याभावसाधकत्वमिति भावः । इति सत्प्रतिपक्षोत्थापकत्वं व्यवस्थाप्य सम्प्रदायविरोधितयाऽपसिद्धान्ततया दूषयति । **तदा हीति** मूलम् । तदोपाधेः सत्प्रतिपक्षोत्थापकतया दूषकत्वे सत्प्रतिपक्षे यथा सत्प्रतिपक्षान्तरं नोद्भाव्यते तथा सत्प्रतिपक्षे उपाध्युद्भावने निग्रहः स्यात् इति सत्प्रतिपक्षेऽप्युपाधेरुद्भावनं व्यवस्थापयति । **न चेति** मूलम् । प्रतिपक्षबलार्थमुपाधेरुद्भावनं क्रियते । अयं भावः सत्प्रतिपक्षे सत्प्रतिपक्षोत्थापने एकेनैव हेतुना साध्यसिद्धौ पुरुषोऽधिकेन निगृह्यते । यथा पर्वतो वह्निमान् धूमात् आलोकात् इत्यादौ धूमरूपहेतुनैव साध्यसिद्धौ सत्यामालोकात् इत्यस्य निरर्थकत्वं तथा सत्प्रतिपक्षे उपाधेरुद्भावनेऽपि प्रथमोक्तसाध्याभावसाधकहेतुनैव साध्याभावसिद्धौ उपाध्यभावरूपहेतोः साध्याभावसाधकस्य निरर्थकत्वम् । न चेत्यादि तस्य सार्थकत्वं व्यवस्थापयति । प्रतिपक्षबलार्थं प्रतिहेतोर्बलार्थं तथा च स्थापनाहेतोः दुर्बलतया न सत्प्रतिपक्षितत्वं समानबलोपस्थित्या प्रतिरुद्धकार्यत्वस्यैव तदर्थत्वात् । इत्थं च सत्प्रतिपक्षे उपाधेरुद्भावनं न निरर्थकं प्रतिहेतोर्बलवत्त्वव्यवस्थापनेन सार्थकत्वात् इति वाच्यम् । न च बहुभिर्हेतुभिर्बलाधिक्यं क्रियते, शतमपि अन्धानां न पश्यतीति न्यायात् । तथा च एकत्र बहवो व्यभिचारिणोऽसिद्धा वा हेतवः उपन्यस्ताः तेषु हेत्वाभासोद्भावने साध्याभावसाधकतया कार्याक्षमत्वं नाथ तुल्यत्वम् एकेन सद्धेतुना व्याप्तिपक्षधर्मतावता बहूनामसिद्धहेतूनां प्रतिबन्धात् तत्साध्यानुमितेः प्रतिबन्धात् इति भावः । तथा च साहित्यं न बलं किन्तु व्याप्तिपक्षधर्मते, तच्चैकस्याप्यस्ति द्वयोरपि चास्तीति तुल्यम् । सहित्यस्य बलत्वे शतव्यभिचारिहेतूनामुपन्यासे प्रतिवादिनो जयः स्यात्, न चैवम्, शतमप्यन्धानां न पश्यतीति न्यायात् [39 A] । **तुल्यमेवेति** । अत्र ज्ञानमेवेति शेषः । वस्तुतः साध्याभावस्य साध्यस्य च यद्व्याप्यद्वयं तदेकत्राधिकरणे न वर्तते एवेति ज्ञानमित्युक्तम् । यथा पर्वतो वह्निव्याप्यधूमवान् वह्न्यभावव्याप्यपाषाणमयत्ववान् इति सत्प्रतिपक्षदशायामुभयोर्व्याप्तिपक्षधर्मतावत्त्वे न निर्णयो वर्तते, स च पाषाणमयत्वे वह्न्यभावव्याप्यत्वस्य विरहात् । न त्वल्पत्वं किन्तु तुल्यतया ज्ञानमेव । तच्च ज्ञानं भ्रमः । तथा च सत्प्रतिपक्षे सत्प्रतिपक्षोत्थापने एकेनैव

तत्सिद्धौ अधिकस्योद्भावने यथा निग्रहः तथा उपाधेः सत्प्रतिपक्षतया दूषकत्वे निग्रहः स्यादिति भावः । **न तु भूयस्त्वं** हेतूनां बाहुल्यं बलमिति न साध्यसाधकम् । **एकस्मादिति** बाहुल्यव्यतिरेकेणापि एकस्मात् सद्धेतोः साध्यस्यानुमितिदर्शनात् । बाहुल्यस्य व्यतिरेकव्यभिचारदर्शनेन न तस्यानुमितौ कारणत्वम् । न हि येन विनाऽपि यत् भवति तत् तस्य कारणमिति ।

**इष्टापत्तिमिति** टीका । सत्प्रतिपक्षे उपाध्युद्भावने इष्टापत्तिमाशङ्क्याह - **सन्दिग्धोपाधेरिति**। उपाध्यभावस्य साध्याभावव्याप्यस्य व्याप्तिपक्षधर्मतानिश्चयस्यैव साध्याभावसाधकत्वात् । तच्च प्रकृते न सम्भवति । उपाधेः सन्देहेन तदभावस्यापि सन्देहात् । न हि व्याप्तिपक्षधर्मतासन्देहदशायामपि सत्प्रतिपक्षः । तथा च उपाधेः सत्प्रतिपक्षोत्थापकतया दूषकत्वे सन्दिग्धोपाधिस्थले उपाध्यभावस्य साध्याभावसाधकस्य सन्देहात् न सत्प्रतिपक्षत्वमिति भावः । स्वमते तु व्यभिचारोन्नयनद्वारा दूषकत्वे उपाधिसन्देहस्य व्यभिचारसंशयाधायकत्वं दर्शितमेव व्याप्यसन्देहस्य व्यापकसंशयं प्रति कारणत्वात् ।

**तद्व्यतिरेकस्येति** मूलम् । तद्व्यतिरेकस्य साध्याभावसाधकस्य सन्दिग्धत्वात् तथा च व्याप्तिपक्षधर्मतानिश्चयविरहात् न सत्प्रतिपक्षत्वमिति भावः । ननु यथा भवन्मते व्यभिचारसंशयद्वारा सन्दिग्धोपाधेर्दूषकत्वं तथाऽस्मन्मतेऽपि साध्याभावव्याप्यवत्ताज्ञानद्वारोपाधेर्दूषकत्वं वक्तव्यम् । तच्च साध्याभावव्याप्यवत्ताज्ञानं क्वचिन्निश्चयः क्वचित् सन्देहश्च । तथा च सन्दिग्धोपाधिस्थले साध्याभावव्याप्यवत्तासन्देहादेव साध्याभावसन्देहात् तत्संशयस्य स्वारसिकभिन्नत्वेन प्रतिबन्धकत्वात् साध्याभावव्याप्यवत्ताज्ञानत्वेनैव लाघवात् । प्रतिबन्धकत्वेन सन्दिग्धोपाधिस्थले अनुमितिर्न भविष्यति साध्याभावव्याप्यवत्ताज्ञानस्य संशयात्मनो विद्यमानत्वात् । न च साध्याभावव्याप्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वं वक्तव्यम् । निश्चयत्वं च संशयान्यत्वं तदभावा(व)प्रकारकत्वं वा । तथा च तदपेक्षया तदभावव्याप्यवत्ताज्ञानत्वस्यैव प्रतिबन्धकतावच्छेदकत्वात् लाघवात् । ननु निश्चये त्वस्यै[व] गौरवात् ।

**अपि चैवं बाधोन्नीतपक्षेतरस्योपाधित्वं न स्यात् व्यतिरेकेऽसाधारण्यात् पक्षवृत्तिश्च उपाधिर्न स्यात् यथा घटोऽनित्यो द्रव्यत्वात् इत्यत्र कार्यत्वम् अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वात् इत्यत्र अश्रावणत्वं तद्व्यतिरेकस्य पक्षावृत्तित्वात्, न च नायमुपाधिः, तल्लक्षणसत्त्वात् अन्यथा दूषकत्वसम्भवाच्च । किञ्च साध्यव्याप्याव्यापकत्वेनोपाधेः साध्याव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्षः, न हि अव्यापकव्यतिरेकादव्याप्यव्यतिरेकः ।**

इत्यस्वरसादाह - **अपि चेति** मूलम्। एवं सत्प्रतिपक्षोत्थापकतया दूषकत्वे। **बाधोन्नीतेति**। बाधानुन्नीतपक्षेतरत्वस्योपाधित्वेनासङ्ग्रहेण बाधोन्नीतेति। यथा वह्निरनुष्णः कृतकत्वात् इत्यत्र वह्नीतरत्वमुपाधिः स एव बाधोन्नीत इति। [39 B] **व्यतिरेके** इति मूलम्। व्यतिरेके साध्याभावसाधने यथा वह्निरुष्णः वह्नीतरत्वविरहात् इत्यत्र वह्नीतरत्वे उपाधित्वं न स्यात्। तस्याभावे वह्नीतरत्वविरहे असाधारण्यस्य पक्षमात्रवृत्तित्वस्य सपक्षविपक्षव्यावृत्तस्य सत्त्वेन न साध्याभावसाधनत्वं तथा च न सत्प्रतिपक्षोत्थापकतया दूषकत्वमिति भावः।

**एतत् त्विति** टीका। एतत् सन्दिग्धोपाधे(धेः) व्यतिरेकस्य पक्षे सन्दिग्धत्वम्। पक्षे गर्भस्थमित्रातनये साधनाव्यापकसन्देहेन साध्यव्यापकत्वेन गृहीतस्य शाकपाकजत्वस्य पक्षे गर्भस्थमित्रातनये अव्यापकत्वसन्देहात् पक्षवृत्तित्वसन्देहः तथा च शाकपाकजत्वाभावस्य नरत्वावच्छिन्नश्यामत्वाभावव्याप्यत्वेऽपि न पक्षवृत्तित्वनिर्णयः। तथा च न श्यामत्वाभावसाधकत्वमिति भावः। **तद्व्यतिरेके** इति टीका। तद्व्यतिरेके बाधोन्नीतपक्षेतरव्यतिरेके न असाधारण्यं न सपक्षविपक्षव्यावृत्तत्वं बाधग्रहदशायां पक्षस्यैव सपक्षत्वात् तत्रैव साध्याभावरूपसाध्यस्य निर्णयात्। **सपक्षीभूतेति**। साध्यवत्त्वेन निर्णीतस्य तस्य वह्नेः पक्षस्य वह्निरनुष्णः कृतकत्वात् इत्यादौ बाधास्फूर्तिदशायामाप्तवाक्यादिना वह्नीतरत्वस्योपाधित्वेन ग्रहदशायामसाधारण्यं स्यात् इत्यभिप्रायेणेदमित्यस्यार्थः इति वाच्यम्। **न च तत्रापीति** टीका। यत्र बाधो न गृहीतस्तत्रापि व्यतिरेकिणोपाधिव्यतिरेकेण वह्नीतरत्वविरहेण सत्प्रतिपक्षसम्भवात्। यथा वह्निः अनुष्णत्वव्याप्यकृतकत्ववानयम् अनुष्णत्वाभावव्याप्यवह्नीतरत्वाभाववांश्चेति सत्प्रतिपक्षसम्भवात्। **न चासाधारण्यमिति** टीका। अत्राप्यसाधारण्यं पक्षसपक्षविपक्षव्यावृत्तत्वात्। पक्षे बाधास्फूर्तितः पक्षस्य न सपक्षत्वम्। तस्यापि असाधारण्यस्यापि सत्प्रतिपक्षोत्थापकतया दूषकत्वम्। यथा सपक्षव्यावृत्तत्वेन साध्यवदवृत्तितया साध्याभावव्याप्यत्वमागतं साध्याभाववद्व्यावर्त(वृत्त)त्वेन साध्याभाववदवृत्तितया साध्यव्याप्यत्वमागतं तथा चेत्थंभूतसाधनस्य पक्षवृत्तित्वग्रहदशायां साध्याभावव्याप्यवत्ताग्रहत्वेन वह्नीतरत्वविरहग्रहस्य साध्यानुमितिप्रतिबन्धकत्वम्। एवं साध्यव्याप्यवत्ताग्रहत्वेन तस्यैव वह्नीतरत्वविरहग्रहस्य साध्याभावानुमितिप्रतिबन्धकत्वम्। इत्थं वासाधारण्येऽपि सत्प्रतिपक्षोत्थापकतया दूषकत्वे न किञ्चिदनुपपन्नमिति भावः।

इत्यपरितोषाद् दूषणान्तरमाह - **पक्षवृत्तिश्चेति** मूलम्। तथा च पक्षे उपाध्यभावस्यावर्तमानत्वेन न तस्य सत्प्रतिपक्षोत्थापकतया(कता) सम्भवति। पक्षे साध्याभावव्याप्यवत्ताज्ञानस्यैव साध्यानुमितिप्रतिबन्धात्(बन्धकत्वात्)। तच्च प्रकृते न सम्भवति, साध्याभावव्याप्यस्योपाध्यभावस्य पक्षेऽपि वृत्तित्वात्। तथा च प्रसिद्धोपाधौ पक्षवृत्तौ अव्याप्तिः, तदेव दृष्टान्तेन द्रढयति - **यथेति**। घटोऽनित्यः द्रव्यत्वात् इत्यत्र कार्यत्वस्य [40 A] पक्षवृत्तित्वात् न तदभावस्य साध्याभावव्याप्यत्वेऽपि पक्षवृत्तित्वं न वा पक्षे साध्याभावः इति न सत्प्रति-

पक्षोत्थापकतया दूषकत्वमिति । अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वात् इत्यत्र अश्रावणत्वमुपाधिः अश्रावणत्वस्य पक्षेऽपि वर्तमानत्वात् न तदभावस्य पक्षवृत्तित्वम् इति न सत्प्रतिपक्षोन्नायकत्वम्। तद्व्यतिरेकस्य कार्यत्वव्यतिरेकस्य एवमश्रावणत्वव्यतिरेकस्य पक्षावृत्तित्वादित्यनेन साध्याभावव्याप्यवत्ताग्रहस्यैव पक्षे साध्यानुमितिप्रतिबन्धात्(बन्धकत्वात्) इति। **नायम्** [इति]। अयं पक्षवृत्तिः नोपाधिः नोपाधित्वेन सङ्ग्राह्यः इति न च। **तल्लक्षणसत्त्वात्**। लक्षणं तु साध्यसमानाधिकरणत्वे सति साध्यव्यभिचारिसाधनाव्यापकत्वरूपस्य तल्लक्षणस्य सत्त्वात् । तथा च तस्योपाधित्वेनासङ्ग्रहो न वक्तुं शक्यः इति । न चोक्तरूपसत्प्रतिपक्षोन्नाय-कत्वरूपदूषकताबीजविरहरूपाधिकत्वं वाच्यम्। इत्यत आह - **अन्यथेति**। अन्यथा सत्प्रतिपक्षोन्नयनभिन्नप्रकारेण स्वव्यभिचारेण व्यभिचारोन्नयनद्वारा सम्भवात् ।

**पक्षवृत्तित्वज्ञानदशायामिति** टीका। तथा चोपाधेः पक्षवृत्तित्वनिश्चयेनोपाध्यभावस्य पक्ष(क्षा)वृत्तित्व-निर्णयो भवितुमर्हति, प्रतियोगिज्ञानस्यैव विरोधिनो वर्तमानत्वात्। ननु ह्रदो वह्निमान् धूमात् इत्यत्र वह्निसामग्री-रूपोपाधौ भवन्मते उपाधित्वं न स्यात्, वह्निसामग्र्या धूमाव्यापकत्वविरहात्। तथा चास्मन्मते तु तस्य सत्प्रति-पक्षोन्नायकतया दूषकत्वं सम्भवत्येव। तथा च भवता तस्योपाधित्वेनाङ्गीकारे भवतोक्तोपाधिद्वयस्यापि पक्षवृत्तेः मया न स्वीकरणीयमित्यत आह - **किञ्चेति** मूलम् । साध्यव्याप्याव्यापकत्वेनायोगोलकं धूमवत् वह्नेः इत्यत्र भवता अयोगोलके आर्द्रेन्धनव्यतिरेकेण धूमाभावः साधनीयः, तन्न सम्भवति। धूमव्याप्यवह्नेरव्यापकत्वेनार्द्रेन्ध-नस्य धूमाव्यापकत्वं साधनीयम् । तथा चार्द्रेन्धनाभावो न धूमाव्याप्यः, व्यापकाभावस्य व्याप्यत्वात् । धूमाव्याप्याव्यापकत्वेनार्द्रेन्धनस्य धूमाव्यापकत्वात् । एतच्च ज्ञानगतिमनुरुध्य, न तु वस्तुगतिमनुरुध्येति । वस्तुतः वह्नेर्धूमव्याप्यत्वात् इति भावः । अव्यापकव्यतिरेकात् अव्याप्यव्यतिरेको न साधनीयः । एतदपि व्याप्यवृत्तिप्रतियोगिकाभावमनुरुध्य वक्तव्यम्, अन्यथा आकाशस्याव्याप्यत्वेऽपि घटाभावेन तदभावसाधनात् । न हि आकाशं घटस्य व्याप्यम्। एवं घटाभावेन संयोगाभावसाधनात्। न हि तत्र घटसंयोगयोः व्याप्यव्यापकभावः । इदं पुनरिहाभिधेयम् इत्थं ज्ञानगतिमनुरुध्य । तथा च साध्यव्याप्याव्यापकत्वेनोपाधिरपि साध्याव्यापकत्वे सत्प्रतिपक्षोन्नयनवत् व्यभिचारोन्नायकतयापि दूषकत्वं न स्यात्, व्यापकव्यभिचारेणैव व्याप्यव्यभिचारा-वश्यंभावात्। न हि अव्यापकव्यभिचारेणाव्याप्यव्यभिचार उन्नेय इति [40 B] त्वदुक्तरीत्या व्यभिचारोन्नयनमपि न स्यात्। वस्तुगत्या वह्नेर्धूमस्याव्याप्यत्वेन न तदव्यापकत्वेनार्द्रेन्धनस्य धूमाव्यापकत्वमिति चेत् तर्हि प्रकृतेऽपि दीयतां दृष्टिरिति ध्येयम्। प्रकारान्तरेणोपाधेर्दूषकत्वमुपन्यस्य दूषयति।

**नापि व्याप्तिविरहरूपतया, असिद्धत्वेनानौपाधिकत्वस्य व्याप्तित्वनिरासात्। नाप्य-नौपाधिकत्वज्ञानस्य व्याप्तिधीहेतुत्वस्य तत्त्वेन व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वा-सिद्धेरन्तर्भावः, न ह्यन्यस्य साध्यव्यापकत्व-साधनाव्यापकत्वज्ञानं अन्यस्य व्याप्तिज्ञाने**

**स्वतः प्रतिबन्धकमित्युक्तम् । न च साध्यव्यापकाव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्याप्यत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यम् ।**

**नापीति** मूलम् । व्याप्तिविरहरूपतया व्याप्यत्वासिद्धिरूपतया । यथा धूमवान् वह्नेः इत्यादौ वह्निर्धूमाव्याप्यः सौपाधि[क]त्वात् इति प्रकारेण वह्नेः धूमाव्याप्यत्वं साधनीयम् । नापीत्याशङ्कार्थः । समाधत्ते - **अनौपाधिकत्वे**ति । अनौपाधिकत्वं यदि व्याप्तिः स्यात् तदा तदभावः उपाधिः व्याप्यत्वासिद्धिः स्यात् । न चैवम्, तस्य वह्निमान् धूमात् इत्यत्र सिद्ध्यसिद्धिपराहतत्वात् । प्रकृते स्थले धूमलिङ्गकवह्निसाध्यकानुमाने उपाधिः यदि प्रसिद्धोऽस्ति तर्हि तदभावः कथं साधनीयः ?, तस्य प्रसिद्धत्वेन बाधितत्वात् । अप्रसिद्धश्चेत् तर्हि प्रतियोग्यप्रसिद्ध्याऽभावस्यापि अप्रसिद्धेः । साध्यव्यापकत्वेन सिद्धानां साधनाव्यापकत्वविरहः एवं साधनाव्यापकत्वेन सिद्धानां साध्यव्यापकत्वविरहः [अ]नौपाधिकत्वमिति चेत्, तस्य निरुक्ताभावद्वयस्य साध्यव्यापकसाधनाव्यापकयोरेव वर्तमानत्वात् साधनावृत्तित्वेन न व्याप्तित्वं सम्भवति । इति व्याप्तिवादे प्रपञ्चितम् । तथा च व्याप्यत्वासिद्धतया नोपाधेर्दूषकत्वम् । अज्ञानरूपासिद्धिद्वारा उपाधेर्दूषकत्वमाशङ्कते - **नापीति** । अनौपाधिकत्वज्ञानस्य व्याप्तिग्राहकत्वेन औपाधि[कत्व]ज्ञाने सति प्रतियोगिज्ञानस्य वर्तमानत्वात् [न अ]नौपाधिकत्वज्ञानं भवितुमर्हति । तथा च कारणस्य व्याप्तिग्रहकारणस्य अनौपाधिकत्वज्ञानस्य विरहेण न व्याप्तिग्रहो भवितुमर्हति, कारणाभावे कार्याभावस्यावश्यंभावात् । अन्यथा कारणतैव न स्यात् । न हि यद्विरहेऽपि यत् सम्भवति तत् तस्य कारणम्, कारणताघटकीभूतनियमांशस्य व्यभिचारे सति विरहादित्यन्यत्र विस्तरः । **व्याप्यत्वासिद्धेरन्तर्भावः** [इति] । व्याप्यत्वाज्ञानरूपा या असिद्धिः । **तत्त्वेने**त्यर्थः । तथा चानुमितिकारणीभूतव्याप्तिग्रहस्य कारणाभावमुखेन व्याप्तेरज्ञानरूपासिद्धौ उपाधिज्ञानमुपयुज्यत इति भावः इति । **नापी**त्याशङ्कार्थः । दूषयति - **न ही**ति । व्याप्तिग्रहे अनौपाधि[कत्व]ज्ञानस्य कारणत्वं न सम्भवति सिद्ध्यसिद्धिपराहतत्वात् । भाव(वे) वा **न हि अन्यस्य साध्ये**ति । अयं भावः - वह्निमान् धूमात् इत्यत्र वह्निसाध्यकधूमलिङ्गकोपाधिविरहेण न वह्निसाध्यकधूमलिङ्गकानौपाधिकत्वज्ञानं सम्भवति तद्घटकीभूतोपाधेरप्रसिद्धेः । धूमवान् वह्नेः इत्यादि धूमसाध्यकवह्निलिङ्गक(कं) यत् आर्द्रेन्धनरूपोपाधिज्ञानं [न] तद(द्) वह्निमान् **धूमात्** इत्यत्र प्रतिबन्धकं येन तदभावज्ञानस्य वह्निमान् धूमात् इत्यत्र कारणत्वं स्यात् । आकाङ्क्षादिज्ञानवत् कारणीभूतज्ञानविघट[क]ता[या] एव ज्ञानस्य प्रतिबन्धकत्वात् । तथा च अनौपाधिकत्वज्ञानस्य कारणत्वविरहात् अनौपाधिकत्वज्ञानस्य कारणीभूतज्ञानविघटकत्वेन प्रतिबन्धकत्व[म्] । अनौपाधिकत्वज्ञानस्य कारणत्वविरहस्तु सिद्ध्यसिद्धिपराहतत्वादित्युक्त एव । **न स्वत** इति मूलम् [41 A] । न स्वतः न साक्षात् । तथा च स्वाभावग्रहस्य [वा] स्वाभावव्याप्यवत्ताग्रहस्य वा स्वाभावावच्छेदकवत्ताग्रहस्य वा स्वग्रहे साक्षात् प्रतिबन्धकत्वम् । व्याप्तेरभावस्य [वा] व्याप्त्यभावव्याप्यत्वस्य वा व्याप्त्यभावावच्छेदकस्य वा अविष[य]कत्वेन उपाधि-

ज्ञानस्यान्यसाध्यसाधनीयस्य न साक्षात् प्रतिबन्धकत्वं न वा परम्परया । साक्षाद् विरोधिनो ज्ञानस्य कारणीभूतज्ञानविघटनद्वारैव प्रतिबन्धकत्वनियमात् । अत एवोक्तं कारणीभूतज्ञानविघट[क]तयैव ज्ञानस्य प्रतिबन्धकत्वम्। तच्च न सम्भवति, अनौपाधिकत्वज्ञानस्य व्याप्तिग्रहेऽकारणत्वात्। व्याप्तिग्रहोपाये प्रपञ्चितमित्यलमतिविस्तरेण।

**यद्यपीति** टीका। स्वतः प्रतिबन्धकत्वं साक्षात् प्रतिबन्धकत्वम्। किन्तु अनौपाधिकत्वज्ञानविघ[ट]नद्वारा। तथा च अनौपाधिकत्वज्ञानं चेत् व्याप्तिग्रहे कारणं भवति तदा तस्य विघटनद्वारा व्याप्तिग्रहाभावेऽज्ञानरूपासिद्धौ उपाधिज्ञानं यथाकथञ्चिदुपयुज्येत। तच्च न सम्भवति, सिद्ध्यसिद्धिपराहतत्वादिति भावः। **वस्तुतस्तु स्वत** इति मूलम् । साक्षाद् विरोधिनो ज्ञानस्य कारणीभूतज्ञानविघटनद्वारैव प्रतिबन्धकत्वमिति व्याप्तिस्फोरणाय । तथा चोपाधिज्ञानस्य साक्षात् प्रतिबन्धकत्वं नास्तीति साक्षाद् विरोधित्वं वर्तते एवेति स्फोरणाय स्वत इति। अन्यथापि व्याप्यत्वासिद्धिग्रहद्वारोपाधिज्ञानस्य प्रतिबन्धकत्वमाशङ्कते।

**न चेति** मूलम्। साध्यस्य धूमस्य व्यापको य उपाधिरार्द्रेन्धनं तस्य वह्नेरव्याप्यत्वेन धूमव्याप्यत्वं वह्नौ ग्रहीतुं न शक्यते। साध्यव्यापकाव्याप्यत्वग्रहस्यैव प्रतिबन्धकत्वात्। तथा च व्याप्यत्वस्य व्याप्तेरज्ञानरूपासिद्धिद्वारैव साध्यव्यापकाव्याप्यत्वरूपप्रकारकोपाधिज्ञानं व्याप्तिग्रहप्रतिबन्धकमिति भावः। इत्याशङ्कार्थः।

**न हि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञानकारणं येन तत्प्रतिबन्धकं स्यात्, किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा। नापि व्यभिचारोन्नायकत्वेन, यथा हि साध्यव्यापकव्यभिचारितया साधनस्य साध्यव्यभिचारित्वमनुमेयं तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमुपाधेरप्यनुमेयं व्याप्तिग्राहकसाम्यात्[१]। नापि साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया, साध्यव्याप्याव्यापकत्वेनोपाधेरेव साध्याव्यापकत्वसाधनात्, तस्मात् उपाधिः हेत्वाभासान्तरमिति।**

समाधत्ते - **न हीति** । साध्यव्यापकाव्याप्यत्वज्ञानं न साक्षात् प्रतिबन्धकं स्वाभा[वा]द्यविषयकत्वात् इति पूर्वोक्तयुक्तेः । तथा च साध्यव्यापकाव्याप्य[त्वज्ञानं] च व्याप्तिग्रहस्य साक्षाद् विरोधीति कारणीभूतज्ञानविघटनद्वारैव तस्य प्रतिबन्धकत्वं वाच्यम्, साक्षाद् विरोधे(धि)नो ज्ञानस्येत्यादि उक्तव्याप्तेः। तथा च यदि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिग्रहकारणं भवति तदा तद्विघटनद्वारा साध्यव्यापकाव्याप्यत्वज्ञानं प्रतिबन्धकं भविष्यति। न चैवम्, साध्यव्यापकव्याप्यत्वज्ञानस्य कारणत्वस्यैवाभावात्। **व्याप्तिग्रह-**

१. व्याप्तिग्राहकतौल्यात् इति पाठान्तरम्।

(? **ग्राहक)तौल्यादि**ति ज्ञानगतिमनुरुध्य, वस्तुतस्तु सौपाधि[क]साधनस्य साध्यव्याप्यत्वमेव नास्तीति भावः । **तस्मादि**ति मूलम् । तस्मात् उपाधिज्ञानस्य हेत्वाभाससमुत्थापनद्वारा अप्रतिबन्धकत्वव्यवस्थापनात् । ज्ञायमानं सत् व्याप्तिग्रहप्रतिबन्धकत्वाच्च हेत्वाभासान्तरं सव्यभिचारादिपञ्चविधातिरिक्तं हेत्वाभासान्तरं न स्यात् तथा च पञ्चैव हेत्वाभासा इति विभागव्याघातः ।

**यद्यपी**ति टीका । ज्ञायमानेन वेति । ज्ञायमानं सत् यत् अनुमितिप्रतिबन्धकं तस्यैव हेत्वाभासत्वम् । तथा चोपाधिज्ञाने सति अपि व्यभिचाराद्यस्फूर्तिदशायां व्याप्तिज्ञानदर्शनात् न तस्य साक्षात् प्रतिबन्धकत्वमिति तथा च कथं [41 B] हेत्वाभासान्तरमिति । **यद्यपी**ति आशङ्कार्थः । समाधत्ते - **तथापी**ति । उपाधिवादिना साक्षादेव उपाधिज्ञानस्य प्रतिबन्धकत्ववादिना परिशेषानुमानेन उपाधिज्ञानस्य साक्षात् प्रतिबन्धकत्वं वक्तव्यम् । परिशेषानुमानं यथा - उपाधिज्ञानं साक्षात् व्याप्तिग्रहप्रतिबन्धकं कारणभूतज्ञानाविघटकत्वे सति सव्यभिचाराद्यनुत्थाप[न]द्वारा प्रतिबन्धकत्वात् इति । तेषामयमाशयः । अनुमितिप्रतिबन्धकतावच्छेदकरूपवत्त्वमेव प्रकृते हेत्वाभासत्वमिति भावः । वस्तुतस्तु न किञ्चिदेतत् । येनोपाधिज्ञानस्य सत्प्रतिपक्षोत्थापकतया दूषकत्वं न वक्तव्यम् । ततः साक्षादेव प्रतिबन्धक[त्वं] वक्तव्यम् । तथा च ज्ञायमानं सत् बाधादिज्ञानवत् साक्षात् प्रतिबन्धकत्वात् हेत्वाभासत्वम् अक्षतम् । अन्यथा तदुद्भावने वादिनो निग्रहो न स्यात्, किन्तु उद्भावयितुरेव निरनुयोज्यानुयोगतया निग्रहः स्यात् इति भावः । व्यभिचारोन्नायकत्वेन दूषकतामुपाधेर्व्यवस्थापयति - **व्यभिचारोन्नायकत्वेने**ति । अत एव मूले लक्ष्यतावच्छेदकमपि यद्व्यभिचारित्वेनेत्यादिनोक्तम् । **पूर्वोक्तदोषमि**ति । साध्यव्याप्यसाधनाव्यापकत्वेनोपाधेः साध्याव्यापकत्वसाधनेन नोपाधिव्यभिचारस्य साध्यव्यभिचारोन्नायकत्वमिति पूर्वोक्तदोषमुद्धरति - **तर्कादिने**ति । धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनोत्कर्षेण धूमोत्कर्षदर्शनात् आर्द्रेन्धनत्वेन कारणता धूमत्वेन कार्यता वक्तव्या, सा च धूमव्यापकत्वेनैव सम्भवति अनन्यथासिद्धनियतपूर्ववर्तिन एव कारणत्वात् । तथा च इत्थमेव कार्यकारणभावेनानुकूलतर्केणार्द्रेन्धनस्य धूमव्यापकत्वेन निश्चिते दूषकताबीजचिन्तनं व्यभिचारोन्नयनचिन्तनम् । इत्थं च धूमार्द्रेन्धनयोः कार्यकारणभावमूलकतर्केण धूमव्यापकत्वेनार्द्रेन्धनस्य निर्णयये(र्णये) न वह्न्यव्यापकत्वेनार्द्रेन्धनस्य धूमाव्यापकत्वं सम्भवति, विरोधिनः प्रतियोगितावच्छेदकावच्छिन्ननिर्णयस्य विद्यमानत्वात् । तदा वह्नौ धूमव्याप्यत्वग्रहः धूमनिरूपितव्याप्यताग्राहकानुकूलतर्कविरहात् इति पूर्वोक्तदूषणोद्धार इति भावः । तथा च व्यभिचारोन्नायकतयोपाधेर्दूषकत्वं सम्भवत्येव व्यापकव्यभिचारे व्याप्यव्यभिचारित्वनियमात् इति भावः । **निश्चितोपाधी**ति । सन्दिग्धोपाधौ साध्यव्यापकत्वसाधनाव्यापकत्वनिश्चियविरहात् । निश्चितोपाधौ यदि व्यभिचारोन्नायकत्वेन दूषकत्वमागतं तर्हि सन्दिग्धोपाधिस्थले व्यभिचारसंशयद्वारा दूषकत्वं भविष्यतीत्याकरभावार्थः ।

**उच्यते आर्द्रेन्धनवत्त्वादेस्तर्कादिना साध्यव्यापकत्वसाधनाव्यापकत्वे निश्चिते दूषकताबीजचिन्तनम्। यदि च साध्यसाधनसहचारदर्शनेनोपाधौ साध्यव्यापकतानिश्चय एव नास्ति तदोपाधित्वनिश्चयाभावात् दूषकतैव नास्तीति क्व बहिर्भावान्तर्भावचिन्ता। किञ्च सत्प्रतिपक्षतया व्याप्यत्वासिद्धतया स्वातन्त्र्येण वा यदि दोषत्वं सर्वथा साध्य-व्यापकतानिश्चयो वक्तव्यः तेन विना तेषामभावात्।**

**यदीति** मूलम्। यदि च भवदुक्तरीत्या साध्यव्याप्याव्यापकत्वेन नोपाधिः(धेः) साध्यव्यापकत्व-ग्रहस्तदोपाधित्वप्रकारेण(रक)निर्णय एव नास्ति तदा क्व कस्य बहिर्भावान्तर्भावचिन्ता क्व कस्मिन् हेत्वाभासे बहिर्भावः उपाधेः अन्तर्भावः हेत्वाभासोत्थापकेऽन्तर्भावः चिन्ता कस्य उपाधित्वप्रकारकनिर्णयविरहात्। [42 A] तत्प्रकारकनिर्णये व्यभिचारोत्थापनद्वारैव दूषकत्वसम्भवात् इति भावः। एतत्तु मया उपाधि[त्व]-प्रकार[क]निर्णय एव भवतीत्युच्यते। साध्यव्याप्याव्यापकत्वेन नोपाधेः साध्याव्यापकत्वनिर्णयात्। तत्र च कार्यकारणभावमूलकानुकूलतर्कास्फूर्तिदशायामुपाधित्वप्रकारकनिर्णय एव न स्यात् इति। अत आह - **किञ्चेति**। अयमाशयः। उपाधेः साध्यव्यापकत्वानिर्णयदशायामुपाधिज्ञाने सति केनापि अनुमितिप्रतिबन्धो नाङ्गीकर्तव्यः इति। साध्यव्यापकतानिश्चयस्तूपाधेरवश्यमङ्गीकर्तव्यः। येन केनापि प्रकारेणोपाधेर्दूषकत्वे साध्यव्यापकताग्रहस्तु अवश्यमपेक्षणीय एवेति। तदेव विशिष्य विशदयति। **सत्प्रतिपक्षेति**। सत्प्रतिपक्षतया दूषकत्वे उपाधेः साध्यव्यापकत्वावश्यकत्वनिर्णये तदभावस्य साध्याभावव्याप्यतया उपाध्यभावस्य साध्या-भावव्यापकत्वम्। अत एव तस्य साध्याभावसाधकत्वम्। अत एव सत्प्रतिपक्षोत्थापकतयोपाधेर्दूषकतावादिनः साध्यव्यापकत्वे सति पक्षावृत्तित्वमुपाधिलक्षणमाहुरिति। सत्प्रतिपक्षोत्थापकतया दूषकतायां साध्यव्यापकत्व-निर्णयोऽवश्यमपेक्षणीय एवेति व्यापकाभावस्यैव व्याप्याभावव्याप्यत्वात् इति भावः। **व्याप्यत्वासिद्धतयेति** मूलम्। व्याप्यत्वासिद्धतया दूषकत्ववादिनामयं भावः - साध्या(ध्य)व्यापकस्योपाधेरव्याप्यत्वेन साधनस्य साध्याव्याप्यत्वं साधनीयम्, स्वव्यापकव्याप्यस्य स्वाव्याप्यत्वनियमात्। यथा वह्निर्धूमाव्याप्यः धूमव्यापका-र्द्रेन्धनव्याप्यत्वात्। एतन्मते तु साध्यव्यापकत्वे साधनाव्यापकत्वमित्येव लक्षणम्। अव्यापकत्वं तु व्याप्यत्व-विरहः। स च व्याप्यत्वविरहः साधनव्यभिचारितया साधनासमानाधिकरणतया चेत्युभयथापि सम्भवति। अत एव धूमवान् आकाशात् इत्यादौ आकाशे धूमव्यभिचारित्वविरहेऽपि धूमव्यापकार्द्रेन्धनाव्याप्यत्वेन आकाशस्य धूमाव्याप्यत्वं साधनीयम्। व्यभिचारोन्नायकत्वेनोपाधेर्दूषकत्ववादिनां नयादित्येव (?) वैलक्षण्यमवधेयम्। **स्वातन्त्र्येण वेति** मूलम्। न सत्प्रतिपक्षोत्थापकतया, नापि व्यभिचारोन्नायकतया, न वाऽसिद्ध्युन्नायकतया, न वा बाधाद्युन्नायकतया उपाधेर्दूषकत्वं किन्तु मणिमन्त्रन्यायेनोपाधिज्ञाने सति अनुमितिर्न भवतीति फलदर्शनेन

स्वातन्त्र्येण तस्य कल्पनात्। इत्थं स्वातन्त्र्येणैव प्रतिबन्धकत्वं वाच्यम्। साक्षादेवोपाधिज्ञानस्य विरोधितया च नोपाधिज्ञानस्य कारणीभूतेत्यादि व्याप्तिविरोधः साक्षाद् विरोधस्थले एव तस्याः कल्पनात्। इत्थं स्वातन्त्र्येण प्रतिबन्धकत्ववादिनामपि साध्यव्यापकत्वनिर्णयोऽवश्यमपेक्षणीय एव। तत्कथं साध्यव्याप्याव्यापकत्वेनोपाधेः साध्यव्यापकत्वमुक्तमिति भावः। तथा च साध्यव्यापकत्वानिर्णयदशायामुपाधेः दूषकत्वं केनापि प्रकारेण केनापि नाङ्गीकरणीयम्। तेन विना साध्यव्यापकत्वनिश्चयेन [42 B] विना तेषां सत्प्रतिपक्षोत्थापनादीनाम-सम्भवादिति भावः।

**तस्मादुपाधिनिश्चयात् व्यभिचारनिश्चयः तत्संशयात् तत्संशय इति व्यभिचारज्ञानद्वारा साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया वा उपाधेर्दूषकत्वम्। यद्वा साध्य-व्यापकाभाववद्वृत्तितया साध्यव्यभिचारित्वमुन्नेयम्। न च साधनाभाववद्वृत्तित्वमुपा-धिरिति वाच्यम्। उपाधिमात्रोच्छेदप्रसङ्गात् सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकवत् अवृत्तिगगनादौ साध्याव्यापकत्वात् संयोगादौ हेतौ साधनव्यापकत्वाच्च।**

**तस्मादिति** मूलम्। तस्मात् व्यभिचारोन्नायकतया दूषकतायां साध्यव्याप्यसाधनाव्यापकत्वेनोपाधेः साध्याव्यापकत्वमित्युपन्यस्तदूषणोद्धारात्। उपाधिनिश्चयात् तद्व्यभिचारनिश्चयः इति व्यापकव्यभिचारस्य व्याप्यव्यभिचारित्वनियमात्। तदुन्नयनप्रकारस्तु बहुधा दर्शित एव। तत्संशयात् उपाधिप्रतियोगिकव्यभिचार-संशयात् वा तत्संशयः साध्यसाधनव्यभिचारसंशयः। उपाधिसंज्ञानाऽऽहितव्यभिचारसंशयस्य यथा दूषकत्वं तथोक्तमेव। तथा च व्यभिचारद्वारोपाधेर्दूषकत्वम्। तस्मादित्यस्यार्थमाह - **उपाधिरिति** टीका। **औचित्यावर्जित** इति। साध्यव्यापकतयोपाधेः साधनवति च उपाध्यभावे यत्रा(त्र) साधनाधिकरणे उपाध्यभावस्तत्रावश्यं साध्याभावो वाच्यः व्यापकाभाववति व्याप्य(प्या)भावस्यावश्यंभावनियमात्। साधनवति च साध्याभावसिद्धौ साध्यव्यभिचारित्वं स्फुटमेव। **मानस** इति टीका। सर्वत्रानुमित्यादिसामग्री न सम्भवति इति समाधिसौकर्यात् मानस इत्युक्तम्।

**साध्यव्यापकाव्याप्यत्वेनेति** मूलम्। साध्यव्यापकस्योपाधेरव्याप्यत्वेन साधनस्य साधनत्वाभिमतस्य व्याप्तिविरहोन्नायकत्वम्। **व्याप्तिविरहेति**। गगनादिहेतुसाधारण्यं दर्शितम्। व्याप्तिविरहस्तु व्यभिचारितया साध्यसामानाधिकरण्यतया वेत्युक्तम्। ननु लक्ष्यतावच्छेदकं यद्व्यभिचारित्वेनेत्यादिकं यत्र तदेवोपाधित्वेन लक्ष्यम्। तस्यैव दूषकताबीजं चिन्त्यते। व्याप्तिविरहोन्नायकतया च दूषकत्वेऽतिप्रसङ्गः। लक्ष्यतावच्छेदकशून्येऽपि दूषकताबीजस्य सम्भवात् इत्याशङ्कते - **यद्यपीत्यादि** टीका। इदं व्याप्यत्वविरहोन्नायकतया दूषकत्वम्। इदं

द्रव्यम् आकाशात् इत्यादौ गुणवत्त्वोपाधौ अतिप्रसङ्गः। तदेव विवृणोति - **आकाशमि**ति। आकाशं द्रव्यत्वा-व्याप्यम्। **तदि**ति। द्रव्यत्वाव्यापकगुणवत्त्वाव्याप्यत्वादिति। **गुणवत्त्वादौ** अपि दूषकताबीजमस्ति, एतस्य तु उपाधित्वं नास्त्येव लक्ष्यतावच्छेदकविरहात्। गगनस्य साध्याव्यभिचारित्वात् उपाधिव्यभिचारित्वविरहाच्च न गुणवत्त्वोपाधेः स्वव्यभिचारेण साधने आकाशे साध्यव्यभिचारोन्नायकत्वम्। **आकाशवदि**ति टीका। लक्षणा-व्यभिचारित्वं च दर्शयति। साधनाव्यापकत्वं साधनसमानाधिकरणात्यन्ताभावप्रतियोगित्वम्, तच्च प्रकृते न सम्भवति गगनस्य साधनत्वेनावृत्तितया तदधिकरणाप्रसिद्धिः इति न लक्षणमपि तत्र गच्छति। दूषकताबीजं तु तत्रास्त्येवेति भावः। इष्टापत्त्या समाधत्ते - **तथापी**ति टीका। दूषकताबीजे योऽतिप्रसङ्गः स दूषणावहो न भवति। तदेव दृष्टान्तेन द्रढयति। **अत एवे**ति टीका। यत एव दूषकताबीजस्यातिरिक्तवृत्तित्वं न दूषणावहम् अत एव अप्रयोजकत्वादेरित्यादिपदात् अयोगोलकवृत्तित्वादिपरिग्रहः। तथा च व्यभिचारोन्नायकतया [43 A] दूषकत्ववादिनापि भवता उपाधित्वशून्ये अप्रयोजकत्वे अयोगोलकत्वादौ च दूषकताबीजस्य व्यभिचारोन्नयनस्य स्वीकरणीयत्वात्। तथा भवताऽपि दूषकताबीजस्यातिप्रसङ्गोऽपि न दूषणावहः इति वक्तव्यमेवेति भावः। अभ्युपगमवादेनाह - **दोषत्वेनेति** टीका। दूषकताबीजस्य व्याप्तिविरहोन्नायकस्यातिरिक्तवृत्तित्वेन दूषकत्वा-ङ्गीकारेऽपि। **स्वव्यभिचारे**ति टीका। अयं भावः - न हि वयं व्याप्तिविरहोन्नायकत्वमात्रमेव वक्ष्यामः किन्तु स्वव्यभिचारेण व्याप्तिविरहोन्नायकत्वम्, तच्च गुणवत्त्वे नास्ति गुणवत्त्वात्यन्ताभावस्य गगने साधने अवृत्तित्वात्, तथा चेत्थं दूषकताबीजमनतिप्रसक्तमेवेति। न च स्वव्यभिचारेणेत्यधिकमिति वाच्यम्, भवताऽपि अतिप्रसङ्गभङ्गाय स्वव्यभिचारेण साध्यव्यभिचारोन्नायकत्वस्य दूषकताबीजस्य वक्तव्यत्वात्, अन्यथा प्रयोजकत्वादौ अतिप्रसङ्ग[स्य] तदवस्थत्वात्। ननु साध्यव्यापकत्वे सति साधनाव्यापकत्वमिति लक्षणमुक्तम्। तत्र च साधना-व्यापकत्वं साधनसमानाधिकरणात्यन्ताभावप्रतियोगित्वम्। तच्च व्यभिचारोन्नयने एवोपयुज्यते। अत एव **मिश्रै**रपि लक्षणं तु इत्यादिग्रन्थो दूषकताबीजमित्यादि[ना] व्याख्यातं(तः)। इत्थं च दूषकताबीजाश्रय एव उपाधिपदवाच्य इति लाघवात्, न तु साधननिष्ठोपाधिव्याप्यत्वविरहः साधनाव्यापक इति पदार्थः, तथा सति व्याप्यत्वस्य सामानाधिकरण्यादिघटितत्वेन गौरवात् इति। अत आह - **यद्वे**ति मूलम्। उन्नेयमनुमेय-मित्यर्थः। तच्च योग्यता वाच्या। सा च व्याप्तिपक्षधर्मता साध्यव्यापकत्वेनोपाधेस्तदभावस्योपाध्यभावस्य साध्याभावव्याप्यत्वदर्शनात्। साध्यव्यभिचारित्वस्य वा व्याप्यत्वदर्शनात्। व्यापकव्यभिचारित्वस्य व्याप्या[व्यभि]चारित्वनियमात्। साधनाव्यापकत्वेन पक्षधर्मता उपदर्शिता। पक्षे साध्यव्यभिचारित्वसाधने उपाधिव्यभिचारित्वस्य साध्यव्यभिचारित्वस्य साध्यव्यभिचारित्वस्यो(सा)धनस्य साधनवृत्तित्वेन पक्षधर्मता दर्शिता। इत्थं च कदाचित् साध्यव्यभिचारानुमितिविरहेऽपि न क्षतिः। साध्यव्यभिचारोन्नयनरूपफलोप-

धानमभिप्रेत्याह - **एतच्चेति** टीका । यत्र साधनाधिकरणे साध्यव्यभिचारः । **अधिकरणेति** तत्र व्यभिचार-निरूपकाधिकरणे । **सन्निकर्षाद्यभावात्** इति अनेनानुमितिविरोधिप्रत्यक्षसामग्रीविरहः सूचितः । **अयोग्य** इत्यनेनानुमितिविरोधिप्रत्यक्षात्मकसिद्धिविरोधोऽपि दर्शितः । इत्थं च व्यभिचारोन्नयने पक्षतोपपादिता । व्याप्तिपक्षधर्मतोपपादिते च व्यभिचारोन्नयनरूपफलोपधानं सम्भवतीति भावः । **अन्यथेति** टीका । साधने साध्यव्यभिचारस्य प्रत्यक्षसामग्रीसत्त्वे तत्र प्रत्यक्षसामग्र्याः बलवत्त्वेन अनुमित्यनुत्पादे व्यभिचारोन्नयनरूप-फलोपधानं न सम्भवतीति भावः । यत्र च व्यभिचारप्रत्यक्षसामग्री [43 B] अधिकरणादिसन्निकर्षो वर्तते तत्रापि उपाधिव्यभिचारो विशेषदर्शनतया भ्रमसंशयोत्तरप्रत्यक्षे उपयुज्यते तथा च व्यभिचारोन्नयनमिति । अत्रोन्नयनपदमुपाधिव्यभिचारनिष्ठव्याप्यदर्शनजन्यज्ञानपरतया व्याख्येयम् । तच्चोभयथापि सम्भवति प्रत्यक्षद्वारा अनुमितिद्वारा वेति । अन्यदेतत् दृष्टान्तमाह - **करादीति** टीका । अयं स्थाणुर्वा पुरुषो वेति संशयानन्तरं पुरुषत्व-प्रकारकनिर्णये करादिदर्शनं अवच्छेदकधर्मदर्शनतया [वा] भ्रमविरोधिदर्शनतया वा व्याप्यदर्शनतया वा पुरुष-त्वप्रकारके निर्णये उपयुज्यते इति, तथा उपाधिव्यभिचारदर्शनमपि साध्यव्यभिचारनिर्णये उपयुज्यते । तथा च साध्यव्यभिचारोन्नयनमित्युन्नयनपदेन उपाधिव्यभिचारदर्शनजन्यसाध्यव्यभिचारज्ञानं विवक्षितं तच्च क्वचित् संशयोत्तरप्रत्यक्षं क्वचित् सन्देहः क्वचिदनुमानमित्येतत् ।

ननु वह्निर्धूमव्यभिचारी न वेति संशयदशायाः सत्यपि व्यभिचारनिरूपकाधिकरणसन्निकर्षादौ साध्य-व्यभिचारानुमितिरेव भविष्यति, उपाधिव्यभिचारज्ञानस्य व्याप्यस्य परामर्शस्वरूपस्य पक्षतायाश्च विद्यमानत्वात्, तत्कथमुन्नयनपदमुपाधिव्यभिचारदर्शनजन्यज्ञानपरतया व्याख्यातमित्यत आह - **समाने** इति टीका । तथा च सिद्धसाधनवत् समानविषये प्रत्यक्षसामग्री अपि अनुमितिप्रतिबन्धिका तथा च सत्यां समानविषयप्रत्यक्षसामग्र्याम् अनुमितेरनुदयात् उन्नयनपदार्थस्यानुमानस्य तत्र बाधात् अन्यथा व्याख्यातमिति भावः । समानविषयप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वं यथा पर्वतो वह्निमान् इत्याकारानुमितित्वेन प्रतिबध्यता पर्वतो वह्निमान् इत्युक्तविशिष्ट-विषयतान्यूनविषयताशालिप्रत्यक्षसामग्रीत्वेन प्रतिबन्धकतेति यावत् । एतच्च संशयोत्तरप्रत्यक्षस्थले पुरुषत्व-व्याप्यकरादिमान् अयम् इत्याकारकपरामर्शोत्तरजायमानज्ञानस्य प्रत्यक्षत्वेनानुव्य[व]सायः नानुमितित्वेनेति तथा क्लृप्तत्वमिति भावः । ननु एवं विरोधिपरामर्शस्य प्रतिबन्धकत्वे उपाधिव्याप्यत्वज्ञानस्यैव प्रतिबन्धकत्व-मस्तु किं व्यभिचारानुमितेः प्रतिबन्धकत्वेनेत्यत आह - **न चेति** टीका । यत्र व्यभिचारनिरूपकाधिकरणे सन्नि-कर्षविरहात् [? न] प्रत्यक्षादिसामग्री तत्रानुमितिसामग्र्या एव विद्यमानत्वात् साध्यव्यभिचारव्याप्यस्य उपाधि-व्यभिचारस्य परामर्शस्य विद्यमानत्वात् न साध्याव्यभिचरितसामानाधिकरण्यात्मकव्यभिचारज्ञानं भविष्यति

तदभावव्याप्यवत्ताज्ञानस्य बाधादिज्ञानवत् स्वातन्त्र्येणैव प्रतिबन्धकत्वात् किं तत्प्रतिबन्धार्थं व्यभिचारानुमित्या इत्याशङ्कार्थः । समाधत्ते - **प्रत्यक्षेणे**ति टीका । प्रत्यक्षेण लौकिकप्रत्यक्षेण व्याप्तिग्रहे व्याप्तिनिर्णये विरोधि-व्याप्यबुद्धेस्तदभावव्याप्यवत्ताज्ञानस्य अ[प्र]तिबन्धकत्वात् इति भावः । अयं भावः - तदभावव्याप्यवत्तानिर्णयत्वे न प्रतिबन्धकत्वं तद्गोचरलौकिकप्रत्यक्षनिश्चयातिरिक्तत्वरूपसाध्यव्यभिचारोन्नयने [44 A] वह्न्यभाववद्वृत्तित्व-व्यभिचारित्वरूपसाधनतदभाववदवृत्तित्वस्यापि उपाधित्वसम्भवात् । तत्र तत्रापीत्थमुन्नेयमिति । **उपाधिमात्रोच्छेद** इति । इत्येवानिष्टापत्तिरूपः प्रतिकूलस्तर्कः तेन । तस्य वह्न्यभाववद्वृत्तित्वरूपोपाधेः । **साध्ये**ति टीका । साध्यस्य धूमव्यभिचारित्वस्याव्यापकत्वनिर्णयादिति । तथा च न तस्योपाधित्वम् ।

**सत्प्रतिपक्षे** इति मूलम् । पर्वतो वह्निव्याप्यधूमवानयं वह्न्यभावव्याप्यपाषाणमयत्ववानयम् इत्यत्र पूर्व-साधनस्य स्थापनासाधनस्य धूमस्य व्यतिरेकोऽभावः उपाधिः स्यात् । यत्र यत्र वह्न्यभावः तत्र तत्र धूमाभाव इति साध्यव्यापकता । यत्र यत्र पाषाणमयत्वं तत्र तत्र न धूमाभावः पर्वते एव व्यभिचारात् इति साधनाव्यापकत्वम् । यद्यपि एतस्य साध्यव्यापकत्वे सति साधनाव्यापकत्वं वर्तते एव तथापि असौ नोपाधित्वेनोद्भावनीयः सत्प्रति-पक्षमात्रोच्छेदापत्तेरिति भावः ।

**न त्वि**ति टीका । वह्निमान् प्रमेयत्वात् इत्यत्र पूर्वसाधनस्य मेयत्वस्य केवलान्वयित्वात् तदभावस्याप्रसिद्ध्या तदभाववद्वृत्तित्वमप्यप्रसिद्धमिति नोपाधिमात्रोच्छेदप्रसङ्गः । वह्निमान् प्रमेयत्वात् वायुः बहिरिन्द्रियजन्यप्रत्यक्षः प्रमेयत्वात् इत्यादौ वह्निसामग्री-प्रत्यक्षसामग्र्योः उपाधित्वसम्भवात् नोपाधिमात्रोच्छेद इति दूषणम्, साधना-भावाप्रसिद्धेः साधनस्य केवलान्वयित्वादिति शेषः ।

**अवृत्ती**ति मूलम् । अवृत्तिगगनादौ साध्ये अयं गगनवान् पृथिवीत्वात् इत्यादौ पृथिवीत्वाभाववद्वृत्तित्वस्य गगनाव्यापकत्वात् । गगनस्यावृत्तित्वादिति । अत्र यत्र यत्र गगनाभाववद्वृत्तित्वं तत्र तत्र पृथिवीत्वाभाववद्वृत्तित्वम् इत्यत्र गन्धादौ व्यभिचारः गन्धादौ गगनाभाववद्वृत्तित्वस्य साध्यस्य सत्त्वात् पृथिवीत्वाभाववद्वृत्तित्वस्यो-पाधेरसत्त्वात् । साध्याव्यापकत्वं यद्यपि तथापि तद्व्यभिचारास्फूर्तिदशायां ज्ञानगत्या साध्यस्य गगनव्यभिचारि-त्वस्य व्यापकं पृथिवीत्वाभाववद्वृत्तित्वस्य सुग्रहमेवेति भावः ।

**एतच्चे**ति टीका । एतत् गगनादौ साधने पूर्वसाधनाभाववद्वृत्तित्वं साध्यस्य व्याप्तिविरहोन्नयनतात्पर्यकम् । तथाहि इदं द्रव्यं गगनात् इत्यत्र द्रव्यत्वाभाववद्वृत्तित्वं यद्यपि गगनेऽप्यप्रसिद्धं गगनावृत्तित्वात् । तथा च तत्रो-पाधिरेव नास्ति साधने साध्यव्यभिचारित्वविरहात् । कस्मिन् साध्ये पूर्वसाधनव्यतिरेकवद्वृत्तित्वमुपाधिः स्यात् इत्यनुशयेनाह - **एतच्चे**ति टीका । एतत् गगनाभाववद्वृत्तित्वमुपाधिः साध्यव्याप्यत्वविरहानुमाने । **व्याप्ति-विरहे**ति । व्याप्तिविरहः द्रव्यत्वगगनयोः । व्याप्तिविरहानुमानाभिप्रायेण यन्मते व्याप्तिविरहोन्नायक उपाधिः

तदभिप्रायेण । **वृत्तित्वेति** टीका । साध्याभाववद्वृत्तित्वरूपस्य व्यभिचारस्य वृत्तित्वघटितत्वात् अवृत्तौ गगन-रूपसाधने अवृत्तित्वेन तत्साध्यके गगनपक्षकद्रव्यत्वाभाववद्वृत्तित्वरूपसाध्यकानुमाने बाधितं स्यात् । [44 B] तदनुरोधेन द्रव्यत्वरूपसाध्यव्याप्तिविरह एव साधनीयः । तत्साधके द्रव्यत्वरूपसाध्यव्याप्तिविरहसाध्यकानुमाने तस्य गगनाभाववद्वृत्तित्वस्य साध्याव्यापकत्वसम्भवात् । अवृत्तिषु गगनादिषु द्रव्यत्वरूपसाध्यव्याप्तिविरहसाध्यस्य सत्त्वेन तत्र च गगनाभाववद्वृत्तित्वरूपोपाधेरसत्त्वान्न साध्यव्यापकत्वमुपाधेरिति मूले उक्तम् गगनादौ साध्या-व्यापकत्वादिति **टीकाकाराभिप्रायः** । **उपाध्यायमतमुपन्यस्य** दूषयति - **यत्त्विति** टीका । **उभयकोटीति** *टीका । द्रव्यं गगनात् इत्यादौ । गगनादौ साधने यद्यपि साध्याभाववद्वृत्तित्वरूपव्यभिचारो न सम्भवति तथापि* उभयकोट्युपस्थापकतावच्छेदकतारूपसाध्यव्यभिचारस्य तत्रापि सत्त्वात् तत्र साधनाभाववद्वृत्तित्वस्यासत्त्वात् न साध्यव्यापकत्वं सम्भवतीति । इत्यभिप्रायेण व्याख्यातं मूलमिति । **स चेति** टीका । स च व्यभिचारः गगनादौ सम्भवति । सपक्षविपक्षव्यावृत्तत्वात् गगनस्योभयोपस्थापकत्वम्, सपक्षस्य साध्यवतः व्यावृत्तत्वात् साध्या-भावोपस्थापकत्वम्, विपक्षस्य साध्याभाववतो व्यावृत्तत्वात् साध्योपस्थापकत्वम् । तद् दूषयति - **तन्नेति** टीका । **अनुमितिप्रतिबन्धार्थमनुमितिकारणीभूतव्याप्तिज्ञानप्रतिबन्धार्थम्** । व्यभिचारानुमानमुपाधिव्यभिचारेण साध्यव्यभिचारानुमानम् । **न चेति** टीका । तस्य उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वसव्यभिचारस्य ज्ञानं न विरोधिविषयकं न व्याप्तिघटकीभूताव्यभिचाराभावविषयकम् । **अविरोधीति** अविरोधिविषयत्वात् व्याप्तिग्रहस्य विरोधी यो व्यभिचारादिः तदविषयत्वादित्यर्थः । **किन्त्विति** । विपक्षगामित्वं साध्याभाववद्वृत्तित्वमेव । तथा व्याप्तिग्रहप्रतिबन्धकत्वं वस्तुतस्तु धूमवान् वह्नेः इत्यादौ सर्वत्र सोपाधौ, कुत्रापि पूर्वसाधनाभाववद्वृत्तित्वं नोपाधिः सम्भवति । तथाहि वह्निर्धूमाव्याप्यः धूमव्यापकार्द्रेन्धनाव्याप्यत्वात् इत्यत्र पूर्वसाधनस्य वह्नेः अभाव-वद्वृत्तित्वं नोपाधिः । गगनादौ साध्याव्यापकत्वात् । गगनादौ धूमासामानाधिकरण्यादेव धूमाव्याप्यत्वं साध्यं च वर्तते । तत्र च वह्न्यभाववद्वृत्तित्वरूपोपाधेरसम्भवात् साध्याव्यापकत्वम् । इत्थं च न कुत्रापि पूर्वसाधना-भाववद्वृत्तित्वमुपाधिः । सर्वत्र पूर्वसाधनाभाववद्वृत्तित्वस्य गगनादौ साध्यव्यभिचारित्वेन न स उपाधिरित्येव मूलाभिप्रायः । यद्यपि अत्रापि साध्याभाववद्वृत्तित्वं नोपाधिः तथापि साधनाव्याप्यत्वमुपाधिः सम्भवत्येवेति । तस्य च गगनेऽपि सत्त्वात् न साध्याव्यापकत्वमिति । तथापि उपाधिमात्रोच्छेदभिया पूर्वसाधनाव्याप्यत्वस्य नोपाधित्वम् । न च वायुः बहिरिन्द्रियन्यिप्रत्यक्षः प्रमेयत्वात् इत्यादौ पूर्ववत् तत्रैवोपाधित्वसम्भवात् नोपाधि-मात्रोच्छेदः इति वाच्यम् । प्रमेयत्वाव्याप्यत्वस्य गगने एवासिद्धत्वात् व्यभिचारास्फूर्तिदशायां साध्यव्यापकत्वसुग्रहात् । व्यभिचारस्फूर्तिदशायां तु धूमवान् [45 A][1] ...

---

1. 45-46-47 पत्राणि नोपलभ्यन्ते ।

## । अथोपाध्याभासनिरूपणम् ।

अथोपाध्याभासाः। असाधारणविपर्ययः, यथा अन्वयव्यतिरेकिणि साध्ये बाधोन्नीतान्यपक्षेतरत्वम्। अप्रसिद्धसाध्यविपर्ययः, यथा केवलान्वयिनि साध्ये पक्षेतरत्वादिः । बाधितसाध्यविपर्ययः, यथा वह्निरुष्णः तेजस्त्वात् इत्यत्र अकृतकत्वम्। पक्षाव्यापकविपर्ययः, यथा क्षित्यादिकं सकर्तृकं कार्यत्वात् इत्यत्र अणुव्यतिरिक्तत्वम् । अत्राणुव्यतिरिक्तत्वव्यतिरेकस्य क्षित्यादेरेकदेशवृत्त्या भागासिद्धेः। पूर्वसाधनव्यतिरेकः, यथा शर्करारसः अनित्यः अनित्यवृत्तिगुणत्वात्। स नित्यः रसनेन्द्रियजन्यनिर्विकल्पकविषयत्वात् रसत्ववदित्यादौ । पूर्वसाधनतायाः प्रयोगानुरोधित्वेनाव्यवस्थितत्वात् कदाचिन्नित्यत्वसाधनव्यतिरेकस्योपाधित्वं कदाचिदनित्यत्वसाधनव्यतिरेकित्वस्येति वस्तुव्यवस्था न स्यात् उपाधेर्नित्यदोषत्वात् । न हि यत् येन सोपाधिसम्बद्धं तत् तेन अनुपाधित्वसम्बद्धं सम्भवति, न तु सत्प्रतिपक्षोच्छेदः पूर्वसाधनव्यतिरेकस्यानुपाधित्वे बीजम्, स्थापनाया यत्राभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वात् । न च पूर्वहेतोस्तत एवासाधकत्वात् सत्प्रतिपक्षवैयर्थ्यं तत्रेति वाच्यम् । अगृह्यमाणविशेषदशायां सत्प्रतिपक्षसम्भवात् । पूर्वसाधनव्याप्यव्यतिरेकः, यथा अकर्तृकत्वानुमाने नित्यत्वादिः । पक्षविपक्षान्यतरान्यः, यथा प्रसिद्धानुमाने पर्वतजलह्रदान्यतरान्यत्वम् । पक्षेतरसाध्याभावः[१], यथात्रैव पर्वतेतराग्निमत्त्वम् । न चात्र [२]व्यर्थविशेषणत्वं दूषणम्, तत्त्वेऽप्युपाधेराभासत्वात्। तत्तुल्यश्च, यथात्रैव पर्वतेतरेन्धनवत्त्वम् । एवं वह्निसामग्र्यादिकमूह्यम् ।

### [उपाध्याभासनिरूपणम्]

[48 A] साधनव्यतिरेकस्य उपाधित्वे नियमो नास्तीति मूलस्य भावार्थमुद्घाटयति। अत्रेति टीका। नियमभङ्गस्य स्थलं दर्शयति - **साध्यव्यापकत्वे सतीति**। यथा क्षितिः सकर्तृका कार्यत्वात् इति स्थापनादूषणं च।

---

१. पक्षेतरसाध्याधारः इति पाठान्तरं गुणरत्नस्वीकृतम् ।

२. व्यर्थविशेष्यत्वमिति पाठान्तरं गुणरत्नेन स्वीकृतम् ।

क्षितिरकर्तृका शरीराजन्यत्वात् इत्यत्र पूर्वसाधनस्य व्यतिरेकः अजन्यत्वम्। तस्य व्यतिरेकोऽ जन्यत्वमुपाधिर्भवत्येव। यत्राकर्तृकत्वं तत्र तत्राजन्यत्वमिति पूर्वसाधनव्यतिरेकस्य साध्यव्यापकत्वं द्व्यणुकादौ साधनाव्यापकत्वं चेति **तस्योपाधित्वेन सर्वतान्त्रिकैरुपन्यासात्**। न तस्य उपाधित्वे नियम इत्येव ग्रन्थस्य तात्पर्यमिति भावः। **समीचीन** इति टीका। समीचीनो यः प्रतिपक्षः प्रत्यनुमानं शर्करारसः अनित्यः अनित्यवृत्तिगुणत्वात् इत्यत्र अनित्यवृत्तिगुणत्वे समीचीनत्वं न स्यात् सोपाधित्वादित्याशङ्कार्थः। द्वितीयस्य समीचीनासमीचीनस्य वा सोपाधित्वनियमात् पूर्वसाधनव्यतिरेकस्य सर्वत्रोपाधित्वादिति शेषः। तस्योच्छेदः सोपाधित्वेनोच्छेदः इत्यर्थः।

**स्थापनाया** इति मूलम्। स्थापनायाः पूर्वः (वं) प्रयोगनिबद्धहेतोः यत्र नासत्त्वं व्यभिचारित्वं तत्र तत्साधनाभावस्य न साध्याभावव्यापकत्वमिति व्याप्याभावस्यैव व्यापकत्वादिति भावः। तथा च रसनेन्द्रियग्राह्यनिर्विकल्पकविषयत्वाभावो नानित्यत्वव्यापक इत्यर्थः। तथा च न तस्योपाधित्वं साध्यव्यापकत्वविरहात् इति। न तस्योपाधित्वम् अत एव सतः प्रतिपक्षस्य प्रत्यनुमानस्यानित्यत्वसाधकस्यानित्यवृत्तिगुणत्वस्य सत्त्वं समीचीनत्वं नोच्छिद्यते। पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनोपाधित्वविरहात् न तस्योपाधित्वम्। अत एव तस्य समीचीनत्वात् न सत्प्रतिपक्षोच्छेद इति भावः। पूर्वहेतोः शर्करारसे नित्यत्वसाधकहेतोः रसनेन्दियग्राह्यनिर्विकल्पकविषयत्वस्य तत एव पूर्वोपदर्शितव्यभिचारित्वरूपाभासत्वादेव असाधकत्वात् नित्यत्वासाधकत्वात्। यथा अयं हेतुः न नित्यत्वसाधकः सव्यभिचारित्वात् इत्यत्र। इत्यनेनैव व्यभिचारोपन्यासेन शर्करारसे नित्यत्वानुमितिप्रतिबन्धात् किं नित्यत्वाभावसाधकसमीचीनप्रतिपक्ष[स्य] अनित्यवृत्तिगुणत्वस्य उपन्यासेनेति।

**न त्विति** टीका। सत्प्रतिपक्षस्य समानबलोपस्थित्या प्रतिरुद्धलिङ्गकार्यत्वस्य उच्छेदो नेत्यर्थः। **सत्यपीति** टीका। तस्य आभासीभूतपूर्वसाधनव्यतिरेकस्य उपाधित्वे सत्यपि उपाधित्वाङ्गीकारेऽपि तत्प्रतिसन्धानदशायामुपाधित्वेना(न) प्रतिसन्धानदशायाम्। दशायामिति दशाविशेषे। तस्य तदभावव्याप्यवत्तापरामर्शस्य दोषकत्वसम्भवात् अनुमितिप्रतिबन्धात्। येनोच्यते सत्प्रतिपक्षोच्छेद इति यदसमा[न]पला(बलो)पस्थित्या प्रतिरुद्धलिङ्गकार्यत्वं तं प्रति ग्रन्थास्वरसमादाय दूषयति - **किञ्चेति**। यथाश्रुते सत्प्रतिपक्षपदस्य प्रसिद्धा(द्धबा)-धकत्वे यत्रैवोपाधिः पूर्वसाधनव्यतिरेकस्य साध्यस्य प्रतिपक्षसाध्यस्य जन्यत्वादेरेति यावत्। साध्याव्यापकत्वं [48 B] पूर्वसाधनव्यतिरेकस्यैवेति यावत्। तथा च पूर्वकल्पस्य स्थापनानुमानस्य सव्यभिचारित्वेन निर्णयदशायां न सत्प्रतिपक्षितत्वं सम्भवति समानबलत्वविरहात्। तत्रैव स्थापनानुमाने नित्यत्वसाधकानुमाने व्यभिचारे व्यभिचारस्फूर्तिदशायां साध्यव्यापकत्वाग्रहे प्रतिपक्षसाध्यस्याव्यापकत्वग्रहे व्यभिचारिहेतोरभावस्य साध्याभावव्यापकत्वात्। इति उपाधिना अनित्यवृत्तिगुणवत्त्वाभावेन तद्ग्रहे उत्तरकल्पसाध्यस्य व्यभिचारग्रहे व्यभिचारेण व्यभिचाररूपविशेषदर्शनेन उत यथा पूर्वकल्पे उत्तरकल्पे वा विशेषादर्शनासम्भवे सत्प्रतिपक्षत्वस्यासम्भवात् समानबलोपस्थित्यादेरसम्भवात् समानबलत्वाभावात्। अन्यतरत्रोभयथापि व्यभिचारदर्शनान्न व्याप्य-

वत्त्वेन ग्रहः। विशेषादर्शनदशायामिति अग्रिमग्रन्थविरोधः अन्यतरत्र विशेषदर्शनस्य व्यभिचारग्रहस्यैव सत्त्वात्। न हि अन्यतरत्र व्यभिचारग्रहदशायां सत्प्रतिपक्षः। यथोक्तमेव सत्प्रतिपक्ष इत्याद्युक्तमेव मनोहरम्। स्वरूपासिद्धतया सत्प्रतिपक्षतया वा साधनस्याभासत्वेऽपि तदभावस्य साध्याभावव्यापकत्वसम्भवात् यथा ह्रदो वह्निमान् धूमात् इत्यत्र धूमस्य। 'स्वरूपासिद्धतया' पदस्य व्यभिचारपरतया व्याख्यानमिति व्याख्याबीजम्।

**तत एवेति** मूलम्। ततः आभासताप्रयोजकव्यभिचारादेवेत्यर्थः। **तत्रेति** टीका। क्षितिरकर्तृका शरीराजन्यत्वात् इत्यत्र नित्यत्वं सदुपाधिः, नित्यत्वस्याकर्तृकत्वरूपसाध्यव्यापकत्वात् शरीराजन्यत्वरूपसाधनाव्यापकत्वाच्च। शरीराजन्येऽङ्कुरादौ नित्यत्वविरहेण साधनाव्यापकत्वात्। इत्थं च मूलासङ्गतिः। तदेवोद्धरति - **न चेति** टीका। प्रागभावे अकर्तृकत्वस्य साध्यस्य सत्त्वात् नित्यत्वविरहात् साध्याव्यापकत्वम् अत एवोपाध्याभासत्वमिति न मूलासङ्गतिः इत्याशङ्कार्थः। समाधत्ते - **तथाभावेति** टीका। तथाभावेऽपि प्रागभावे शुद्धसाध्याव्यापकत्वेऽपि। **भावेति** भावस्वरूपो यः पक्षः क्षितिः तद्वृत्तिर्यो धर्मः भावत्वं तदवच्छिन्नस्य भावत्वावच्छिन्नाकर्तृकत्वस्य नित्यत्वव्याप्यत्वादकर्तृकभावमात्रस्यैव नित्यत्वात्। तथा च तत्र सदुपाधित्वादेव नोपाध्याभासत्वमिति मूलासङ्गतिरिति मूलस्य भावमन्यथा व्याचष्टे। **तथापीति** टीका। तत्त्वं साधनव्याप्यत्वं नोपाधितायां प्रयोजकम्। यथा पूर्वसाधनव्यतिरेकः नोपाधितायां प्रयोजकः तथा पूर्वसाधनव्याप्यत्वमपि नोपाधितायां प्रयोजकः (कम्)। तत्र हेतुमाह - **वस्तुव्यवस्थानुपपत्तेरेवेति** टीका। अत्रापि वस्तुव्यवस्थानुपपत्तिः प्रयोगस्य पूर्वापरनियमविरहेण। यत्र पूर्वमेवाङ्कुरादौ अकर्तृकत्वसाधकानुमानमुपन्यस्तं तत्र नित्यत्वस्योपाधित्वेनाङ्कुरादौ सकर्तृकत्वसाधकानुमानस्य सोपाधित्वे उपदर्शिततदशापूर्वस्यापि सोपाधित्वेऽङ्कुरे सकर्तृकत्वं च वस्तुद्वयव्यवस्था न स्यात्, [49 A] द्वयोरपि सोपाधित्वात् उपाधेश्च नित्यदोषत्वात्। अत एव तदग्रहदशायामपि न वस्तुसिद्धिरिति भावः। उपाधितायां यत् प्रयोजकं तदाह - **किञ्चिदिति** टीका। साध्यव्यापकतायामुपाधेः साध्यव्यापकतायां योऽनुकूलस्तर्कः तदभावस्य साध्याभावस्य साध्याभावसाधने साध्याभावव्याप्यतयोपयुज्यते इति भावः। तदसत्त्वे अनुकूलतर्कासत्त्वे उपाधेः साध्याव्यापकतया नोपाध्या(ध्य)भावस्य साध्याभावसाधकत्वम्, साध्यव्यापकाभावस्यैव साध्याभावसाधकत्वम्, साध्यव्यापकाभावस्यैव साध्याभावसाधकत्वादिति भावः। इत्यत्र तात्पर्यं ग्रन्थस्य, न तु पूर्वसाधनव्यतिरेकस्यानुपाधित्वे साधनव्याप्यस्य वानुपाधित्वे इति भावः।

**पक्षविपक्षान्यतरान्य** इति मूलम्। पक्षस्य साध्यसाधकत्वेनाभिमतस्य विपक्षस्य साध्याभाववतः एतदन्यतरत्वावच्छिन्नस्य भेदवतः नोपाधित्वम्। प्रसिद्धानुमाने पर्वतो वह्निमान् धूमात् इत्यत्र पर्वतः पक्षः विपक्षो जलह्रदः तदन्यतरान्यत्वम्। एतदन्यतरत्वमेतावेव तदन्यमेतदन्यद्विश्वं तथा च तस्याभावः पक्षे पर्वते ह्रदे च वर्तते इति न तस्य साध्यव्यापकत्वमिति तस्योपाध्याभासत्वं विपक्षाव्यावर्तकविशेषणशून्येऽपि तस्योपाध्याभासत्वमिति

यावत्। पक्षे एव साध्याव्यापकत्वात् एवम्। **पक्षेतरसाध्याधार** इति मूलम्। साध्यस्याधारः साध्याधारः साध्याधिकरणम्। पक्षेतरसाध्याधिकरणान्यतरत्वावच्छिन्न उपाध्याभासः। अत्रैव पर्वतो वह्निमान् धूमात् इत्यादौ पर्वतेतराग्निमत्त्वं पर्वतेतरत्वविशिष्टाग्निमत्त्वं नोपाधिः, पक्षे एव साध्याव्यापकत्वात्। शङ्कते-**न चेति** मूलम्। पर्वते साध्याभावसाधने व्यर्थविशेष्यत्वम्। पर्वतेतरत्वविशिष्टवह्न्याधारव्यतिरेकेण साध्याभावः पर्वते साधनीयः यत्र च विशेषणस्य पर्वतेतरत्वस्य व्यतिरेकेणैव साध्याभावस्यावगमे विशेष्यत्वस्य वह्न्याधारत्वस्य वैयर्थ्यमिति व्यर्थविशेष्यत्वादेव न तस्योपाधित्वमित्याशङ्कार्थः। **तत्त्वेऽपि** व्यर्थविशेष्यत्वेऽपि उपाधेराभासत्वमक्षुण्णमेवेति भावः। वस्तुतस्तु अखण्डाभावतया न व्यर्थविशेष्यत्वमिति ध्येयम्। **तत्तुल्यश्चेति**। तत्तुल्यः पूर्वोपदर्शितवह्न्याधारपर्वतेतरतुल्यः। अत्रैव पर्वतो वह्निमान् धूमात् इत्यत्रैवानुमाने पर्वतेतरे इन्धनवत्त्वं पर्वतान्यत्वविशिष्टेन्धनवत्त्वं नोपाधिः पर्वते एव साध्याव्यापकत्वादिति भावः। एतेषु उपाध्याभासेषु सर्वत्र साध्यव्यापकत्वविरहात् **आभासत्वमुक्तमुपाधेः**। साधनाव्यापकत्वविरहात् यत्राभासत्वं तदाह - **एवमिति** मूलम्। एवं प्रसिद्धानुमाने **पर्वतो वह्निमान् धूमात्** इत्यनुमाने **वह्निसामग्र्याः** साध्यव्यापकत्वेऽपि साधनाव्यापकत्वविरहात् आभासत्वमिति भावः। **वह्निसामग्र्याः** वह्नेर्व्यापकत्वेन सुतरां धूमव्यापकत्वं व्याप्यव्यापकस्य सुतरां व्यापकत्वात्। '**आदि**' पदात् द्रव्यत्वादिपरिग्रहः इत्युपाध्याभासाः सम्पूर्णाः।

**। उपाधिवादः सम्पूर्णः ।**

## । अथ पक्षतानिरूपणम् ।

व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते । तत्र न तावत् सन्दिग्धसाध्यधर्मत्वं पक्षत्वम्, सन्देहो हि न विशेषणं परामर्शपूर्वं लिङ्गदर्शनव्याप्तिस्मरणादिना तस्य नाशात्। नोपलक्षणम् अव्यावर्तकतापत्तेः। नापि साधक-बाधकप्रमाणाभावः, उभयाभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात् । नाप्यभावद्वयं तथा, बाधकप्रमाणाभावस्य व्यर्थत्वात् ह्रदादेः पक्षत्वेऽपि बाध-हेत्वसिद्ध्यादेरावश्यकत्वेनानुमित्यनुत्पादात् । नापि साधकप्रमाणाभावः, "श्रोतव्यो मन्तव्यः" इति श्रुत्या समानविषयकश्रवणानन्तरं मननबोधनात् प्रत्यक्षदृष्टेऽप्यनुमानदर्शनात् एकलिङ्गावगतेऽपि लिङ्गान्तरेण तदनुमानाच्च मन्तव्यश्चोपपत्तिभिरिति स्मरणात्। अथ सिषाधयिषितसाध्यधर्मा धर्मी पक्षः तथाहि मुमुक्षोः शब्दादात्मावगमेऽपि मननस्य मोक्षोपायत्वेन सिद्धिविशेषानुमितीच्छया आत्मानुमानम्, अत एव प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः, न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातार इति वाचस्पतिवचनयोरविरोधः अनुमित्सा-तद्विरहाभ्यां तदुपपत्तेरिति चेत् । न । सन्देहवत्परामर्शपूर्वं सिषाधयिषाया अप्यभावात् योग्यतायाश्चानिरूपणात् सिषाधयिषाविरहेऽपि घनगर्जितेन मेघानुमानात् स्वकारणाधीनतृतीयलिङ्गपरामर्शबलेनानपेक्षितानुमानदर्शनाच्च ।

उच्यते । सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः, तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति स न पक्षः, यत्र साधकप्रमाणे सत्यसति वा सिषाधयिषा यत्र वोभयाभावः तत्र विशिष्टाभावात् पक्षत्वम् । यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्य भेदकत्वम्, तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम् ।

### । अथ पक्षतानिरूपणम् ।

[49 B] सिद्धान्तमाह - **सिषाधयिषेति** मूलम् । सिषाधयिषाविरहसहकृतं यत् साधकप्रमाणं तस्याभावः पक्षता । अत्र 'साधकप्रमाण'शब्देन सिद्धिः ग्राह्या । यथाश्रुते चक्षुरादेः साधकप्रमाणसत्त्वेऽपि पक्षतासत्त्वेनानुमितिर्भवत्येवेत्यसम्भवः । तथा च सिषाधयिषाविरहसह[कृता] द्वि(धी)रनुमितौ क्ष(प्र)तिबन्धिकेति तस्या

अभावः पक्षता। यदि सिद्ध्यभावमात्रं पक्षतेति यत्र प्रत्यक्षरूपा सिद्धिर्वर्तते सिषाधयिषा च वर्तते इति तत्र सिद्ध्यभावाभावात् पक्षता न स्यादित्यत आह - **सिषाधयिषाविरहसहकृते**ति विशेषणम्। विशिष्टाभावोऽयम्, स च कुत्रचिद्विशेष्याभावादित्यादि। अत्र सिषाधयिषाविरहो विशेषणम्, सिद्धिर्विशेष्या। अथ विशेष्याभावाद् **विशिष्टाभावमाह - तेनेति**। तथा च सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति तत्र विशेष्यं नास्तीति **विशेष्याभावाभावात्** न विशिष्टाभाव इति तत्र न पक्षता।१। यथा महानसः न पक्षः सिसा(षा)धयिषाविरहकालीनः न पक्षः। अथोभयाभावाद् विशिष्टाभावमाह - **साधके**ति। यदि साधकप्रमाणं वर्तते सिषाधयिषाप्यस्ति अत्र विशेषणाभावाद् **विशिष्टाभावः**। यथा महानसे सिषाधयिषाकालीने निश्चितसाध्यवति पक्षता।२। असति **साधकप्रमाणे यत्र** च साधकप्रमाणं नास्ति सिषाधयिषा च वर्तते तत्रोभयाभावाद् विशिष्टाभावः पक्षता यथा पर्वते।३। **शङ्कते** पक्षत्वं **केवलान्वयी**ति। पक्षेतरत्वं नेतरभेदसाधकत्वं यथा पक्षत्वमितरेना(तरान्न) भिद्यते विशिष्टा-**भावत्वात्। सर्वस्यैव पक्षत्वात्** इतरस्य पक्षत्वभिन्नस्याप्रसिद्धेरिति शङ्कार्थः। समाधत्ते - **तथापी**ति **सिषाधयिषेत्यादि। पक्षपदप्रवृत्तिनिमित्तमुक्तं न तु लक्षणमित्यर्थः।**

**अथ टीका। न चैवमिति**। एवमिति संशयोत्तरप्रत्यक्षस्थलेऽपि सिषाधयिषापि वर्तते। यथा इदं साधयामीति **इच्छास्ति। तथा च** संशयोत्तरप्रत्यक्षपूर्वक्षणे विशेष्याभावात् सिद्ध्यभावात् पक्षतासत्त्वेऽनुमितिः स्यादित्या-**शङ्कार्थः। समाधत्ते - स नेति**। समानविषयत्वं चान्यूनविषयत्वम्। प्रत्यक्षसामग्र्या बलवत्त्वात् प्रत्यक्षमेव, नानुमितिः। **अत्र वदन्तीति** टीका। परामर्शो यथा वह्निव्याप्यधूमवानयमिति प्रत्यक्षरूपः परामर्शः। स्वकारणादिष्टसाधनाज्ञानादनुमित्सा। तदुत्तरक्षणे स्मरणलक्षणः परामर्शः उत्पन्नः। अनुभवरूपपरामर्शस्य चतुर्थक्षणत्वात् नाशः इति स्मरणलक्षणः परामर्शः उक्तः। तदुत्तरक्षणे ततोऽनुमितिः। **तत्रे**ति। अनुमितिपूर्वकाले तदनी(तदानीं) पक्षताकालेऽनुमितिपूर्वकाले इत्यर्थः। ननु यत्र एतादृशपरम्परया सामग्री न संवृत्ता तत्र भिन्ना **सामग्रीति कथं तत्र गतिरित्यत आह - यद्वेति**। अनुमितीष्टसाधनतायाः प्रकृतव्याप्त्यादेः समूहालम्बनरूपं स्मरणं **जातम्**। यथा अनुमितेर्यदिष्टसाधनं धूमो वह्निव्याप्यः पर्वतवृत्तिश्चेति स्मरणं समूहालम्बनमिति। तदुत्तरक्षणे **समूहालम्बनोत्तरक्षणे** एवानुमित्सा जाता [50 A]। तदुत्तरक्षणे एव पूर्वं यत् व्याप्त्यादिस्मरणं जातमस्ति तच्च *विनश्यदवस्था(स्थ)मादाय तत्साचिव्यात् तत्सहकारात् मानसः परामर्शः। तदुत्तरकाले इत्यतोऽप्यनुमितिकाले* अनुमित्सा अस्तीति तद्घटिता पक्षता सुलभेति। अत्र विवक्षान्तरं करोति - **यदे**ति। **कथञ्चिदि**ति। यदा तु **पूर्वोक्तरीत्या** एकानुमितिर्जाता तदनन्तरं स्मरणलक्षणः परामर्शो वर्तते अनुमित्सा च वर्तते इति अनुमिति-**सामग्रीसत्त्वात्** पुनरप्यनुमित्यापत्तिरित्याशङ्क्य परिहरति - **स्वविषये**ति। अत्र सिषाधयिषा कीदृशी विवक्षितेत्याह - **स्वे**ति। स्वशब्देन सिषाधयिषा, तस्याः विषयः सिद्धिः, तदनुपहिता ग्राह्या तदकालीना तदनुपरक्ता इत्यर्थः।

तथा च द्वितीयानुमितिर्न भवति इत्यर्थः । पक्षकल्पान्तरमाह - **यद्वेति** । **प्रथममिति** परामर्शात् पूर्वमनुमितिः । सा अनुमितिर्ममेष्टसाधनमिति ज्ञानं स धूमो वह्निव्याप्यश्चेति ज्ञानं युगपज्जातम् । तदनन्तरक्षणे एवानुमित्सा । तदनन्तरं मानसः परामर्शः । **तदुत्तरेति** । पूर्वोक्तसमूहालम्बनोत्तरक्षणे जातः तदुत्तरक्षणे जातः । तदुत्तरक्षणे एवानुमित्सा । उत्तरक्षणे एव विनश्यदव(स्थ)व्याप्त्यादिस्मरणसहायात् परामर्शः । उत्तरे एवानुमितिरित्यतोऽपि सानुमित्सा तदानुमितिकाले सुलभा विनश्यदवस्था इत्यर्थः । **यदा त्विति** । यदा त्वनुमित्युपादे एवं क्रमस्तदापि । यदाऽनु[भव]रूपपरामर्शात् अनन्तरं स्मरणरूपः परामर्शो जातः तदनन्तरमनुमित्सा जाता ततः स्मरणरूपपरामर्शात् विनश्यदवस्थानुमितिः तदा अनवश्य(अविनश्य)दवस्थानुमित्सा वर्तत इति तत्र तादृशानुमित्यात्मकपरामर्शात् यो वह्निव्याप्यधूमवान् पर्वतो वह्निमान् इतयेवंरूपात् पुनरनुमितिः कथं न जायते ? सिषाधयिषापि विनश्यदवस्था वर्तते परामर्शो वर्तते इति कृत्वा पुनरप्यनुमितिः स्यात् । तदर्थं स्वविषयानुपहिता सिषाधयिषा विवक्षिता । तथा च द्वितीयानुमितौ स्वविषयानुपहिता सिषाधयिषा नास्ति । स्वशब्देन सिषाधयिषा, तद्विषया सिद्धिः तदुपहितैवेति । पूर्वं सिषाधयिषा, तदनन्तरं व्याप्तिस्मरणम्, तदनन्तरं परामर्शः, तदनन्तरमनुमितिः, तत्रापि पक्षतामाना(न)यति । **अन्ये त्विति** । **द्वित्रिक्षणेति** । यदा प्रथमक्षणे व्याप्तिस्मरणपक्षधर्मतादिज्ञानं समूहालम्बनम्, तदनन्तरं स्मरणात्मकः परामर्शः, तदनन्तरमनुमित्सा, तदनन्तरमनुमित्यात्मकः परामर्शः, तदनन्तरं पुनरनुमितेरनुभूयमानत्वात् । यथा पर्वतोऽयं वह्निमान् इत्यनुमितिः, तत्रानुमित्सा ना(ने)ति यतोऽनुमित्सा परामर्शात् पूर्वं जाता नष्टा च । तदर्थं सिषाधयिषापदेन । **स्वोत्पत्त्युत्तरकालीनेति** । स्वशब्देन सिषाधयिषा, तदुत्पत्त्युत्तरकालीनो यः स्वविषय-सिद्ध्यनुत्पादकालो गृहीतः । अयमर्थः - सिषाधयिषोत्पत्त्यनन्तरं यः स्वविषयसिद्ध्यनुत्पादकालः । कोऽर्थः ? यद्यपि एका सिद्धिः जाता अस्ति तथापि द्वितीयापि सिद्धिः स्वविषया भवत्येव तदनुत्पादकालस्य विद्यमान-कालघटिता पक्षताऽ[स्ति] एव, एतन्मते [50 B] अतीन्द्रियाऽस्ति । तथा च सिषाधयिषोत्पादानन्तरं क्षणत्रयान्तरेऽपि पक्षतासत्त्वात् न दोषः । **शङ्कते न चेति** । यदा कुत्रचित् काले सिषाधयिषा तदनन्तरं कामिनीदर्शना(न)व्यासङ्गे जाते अनुमितिरुत्पन्ना नास्ति । तत्र मासानन्तरमनुमितिविषयः(या) सिषाधयिषा भू(धू)मप्रत्यक्षो जातः । तत्रापि भवदभिमता पक्षना(ता)स्ति, कथं नानुमितिरित्याशङ्कार्थः । समाधानमाह - **सिद्ध्यननुगुणेति** । सिद्धेरनुमितेरननु-गुणो योऽ[न]नुकूलो यः क्षणः तदनन्तरि[त]त्वमपि विशेषणं देयमित्यर्थः । तत्र च सिद्ध्यननुगुणान्तरितत्वात् नातिप्रसङ्ग इति ज्ञेयम् ।

**लिङ्गदर्शनेति** । यत्र लिङ्गदर्शनव्याप्तिस्मरणादिभिर्व्यवधानं तत्राप्येवं विवक्षितमस्ति । द्वित्रिक्षणान्तरितत्वं वर्तते । पूर्वं सिषाधयिषा, तदनन्तरं द्वितीये क्षणे लिङ्गदर्शनम्, तदनन्तरं तृतीये क्षणे व्याप्तिस्मरणम्, ततः परामर्शात् चतुर्थक्षणवर्तिनः पञ्चमक्षणे अनुमितिः, तत्रापि सिषाधयिषाघटिता पक्षता वर्तते एव यतः तादृशः कालो वर्तते एव । **तत्रेति** । यत्र व्यासङ्गादिना सिद्धिर्नोत्पन्ना तत्र बहुभिरुदासीनैः क्षणैरन्तरितत्वमिति नानुमितिः । **एवमिति** ।

यत्र सिषाधयिषायां जातायामपि सिद्ध्यननुगुणविषयान्तरसञ्चारोऽस्ति तदनन्तरं स्मरणलक्षणः परामर्शः तत्राप्यनुमित्युत्पादे प्रमाणं नास्ति। तथा च सिषाधयिषोत्पादानन्तरं विषयान्तरसञ्चारो यत्रास्ति तत्रानुमित्युत्पादप्रसङ्ग एव नास्ति। अनुभवाभाव एव प्रमाणं तत्र। द्वित्रिक्षणान्तरितायामनुमितिर्भवति लिङ्गदर्शनादिना। तथा च लिङ्गस्य प्रघट्टकार्थः। यत्रानुमित्सा जाता तदनन्तरं सिद्ध्यननुगुणविषयान्तरसञ्चारो जातः तदव्यवहितोत्तरक्षणे एव स्मरणलक्षण एव परामर्शः तत्रानुमितिर्न स्यात् सिद्ध्यननुगुणान्तरितत्वाभावात्। न चेष्टापत्तिस्तत्र। अनुमितिर्न भवत्येवेतीष्टापत्तिरित्यर्थः। परामर्शाव्यवहितसमये विनश्यदवस्थानुमित्सासत्त्वेन एकक्षणान्तरितायां सिषाधयिषायामनुमितिर्न भवति लिङ्गदर्शनादिना द्वित्रिक्षणान्तरितायां तस्यामनुमितिर्भवतीत्यत्र प्रमाणाभाव इत्यर्थः। अत्र युक्तिमाह - **स्वाव्यापारीति**। 'स्व'शब्देनानुमित्सा। तस्या अव्यापारीभूतेन व्यासङ्गेन लिङ्गदर्शनेनान्तरि[ता]स्य तुल्यत्वात् लिङ्गदर्शने अनुमित्साऽजन्यत्वेनाव्यापार एवेति भावः। **तस्मादिति**। यत्र सिषाधयिषा द्वित्रिक्षणैर्व्यवहिता तत्रानुमित्युत्पादो यद्यङ्गीक्रियते तदाऽनुमित्सोत्पादानन्तरं यावत्क्षणानन्तरमनुमित्यभाव उभयसिद्धः तावत्क्षणानन्तरितत्वमेवानुत्पादकाले विशेषणं दीयतामिति युक्तमित्यर्थः। **न चैवमिति**। प्रथममनुमित्सा जाता, तदनन्तरं विषयो वह्न्यादिः प्रत्यक्षीकृतः। **तदग्रिमेति**। प्रत्यक्षाग्रिमक्षणे परामर्श उत्पन्नः यथा वह्निव्याप्यधूमवानयमिति। तत्रापि अनुमित्युत्पत्तिः स्यात्। कथम्? सिषाधयिषाविषयो(ये)ऽनुमितिस्तदनुत्पादकालस्य विद्यमानत्वात् पक्षतासत्त्वेनानुमित्यापत्तिरित्याशङ्कार्थः। **तन्मतेति** [51 A] **पक्षधरमते**। **इष्टापत्तेः** प्रत्यक्षगृहीतेऽपि साध्येऽनुमित्सासत्त्वादनुमितिः स्यादेवेतीष्टापत्तेरित्यर्थः। इष्टापत्तौ युक्तिमाह - **प्रत्यक्षेति**। यथा पूर्वं साध्यविषयकं प्रत्यक्षं जातं तदनन्तरं द्वित्रिक्षणव्यवधानेन सिषाधयिषा जाता तादृशस्थलेऽनुमित्या भाव्यमित्यङ्गीक्रियते परः प्रत्यक्षात् पूर्वक्षणे उत्पन्नायां सिषाधयिषायां द्वित्रिक्षणव्यवधानमपि जातं व्यासङ्गादिना तत्रानुमितिर्न भवतीत्यत्र किञ्चित् प्रमाणं नास्ति येन तत्रानुमितिर्नाङ्गीक्रियते। सिद्ध्यननुगुणं यत्प्रत्यक्षं तदन्तरितत्वमेवास्तीति नानुमितिस्तत्र नियामकाभावात्। **सिषाधयिषा चेति**। सिद्धित्वं प्रकारो यत्र एतादृशी या सिद्धीच्छा सिषाधयिषा यथा मे सिद्धिर्जायताम् इत्यादिरूपा। अत्र सिद्धित्वं प्रकारीभूयते। दूषयति - **मननस्थलेति**। यत्र मननं भवति यथाऽत्मानुमितिर्मननं तत्रात्मानुमितिर्जायताम् इत्यत्र सिषाधयिषायां सिद्धित्वं प्रकारो नास्ति, सिद्धेर्वेदेनैव ज्ञातत्वात्, किन्त्वनुमितित्वं प्रकारः। **सिद्धिविषयेति**। वस्तुगत्या या सिद्धिर्वर्तते तद्विषयिणीच्छा। तथा च यस्यामिच्छायां सिद्धिर्विषयो भवति एतादृशी सिषाधयिषेत्यपि नेत्याह - **प्रत्यक्षेणेति**। यद्यप्रत्यक्षेण जानीयामितीच्छा जाता सापि सिद्धिविषयिणीच्छा भवति तत्रापि सिषाधयिषाधीना पक्षता वर्ततेऽनुमितिः स्यात्। **न चैवमिति**। दुष्टं लक्षणम्। **अनुमितित्वेति**। अनुमितिप्रत्यक्षरूपा सिद्धिर्मे जायताम् इतीच्छायामनुमितित्वं प्रकारः, एतादृशीच्छा सिषाधयिषां दूषयति। **एकेति**। यत्रैकेन लिङ्गेन सिद्धिर्जाता लिङ्गान्तरेण पुनरनुमितिर्जाता यथा धूमेन वह्निरनुमितः पुनरालोकेन वह्न्यनुमितिर्जायतामित्यनुमित्सायामनुमितिर्न स्यात् वस्तुगत्या भवति।

अनुमितित्वप्रकार(रि)केच्छा नास्ति द्वितीयानुमितित्वप्रकारिकेच्छा अस्ति यतः प्रथमानुमितित्वप्रकारिकेच्छाभावविशिष्टसिद्धेः प्रतिबन्धकस्य विद्यमानत्वात्। **नापी**ति। अनुमितिमात्रविषयिणीच्छा सा। तथा च पूर्वदूषणं निवृत्तम्। द्वितीयानुमितिमात्रविषयिणी वर्तते इति कृत्वा दूषणं न भवति। दूषयति। सिद्ध्यनन्तरं प्रथमतो यत्रानुमितिर्जाता पुनर्जानीयामितीच्छा जाता तदनन्तरं परामर्शो जातः तादृशस्थलेऽनुमितिर्न स्यात् यतस्तत्रेच्छा जानीयामिति ज्ञानमात्रविषयिणी न त्वनुमितिमात्रविषयिणीति। सिद्धान्तयति **किन्त्वि**ति। सिषाधयिषेदृशी विवक्षिता। अनुमितिगोचरेछामात्रम् अनुमितिविषयिणीच्छामात्रम्। सा चानुमितित्वप्रकारिका वा भवतु। यथा अनुमितिर्मे जायतामिति रूपा, अत्र सिद्धिर्मे जायतामिति रूपा वेत्यत्र नास्तीत्यर्थः। **एकलिङ्गे**त्याद्युक्तौ अपि अनुमितिविषयिणीच्छा वर्तते एवेति शेषः। न दोषः। **न चे**ति। पूर्वं धूमेन वह्न्यनुमित्सा जाता तत्रालोकादिना वह्न्यनुमितिः स्यात् अनुमित्सायाः सत्त्वादित्याशङ्कार्थः। उत्तरमाह - या अनुमितिः [51 B] येन लिङ्गेन यत्रोत्पद्यते तद्विषयिणीच्छा विवक्षितेति पूर्वोक्तो न दोषः। **न चैवमि**ति। पूर्वं पुरुषं जानीयामितीच्छा जाता तदनन्तरं यत्र पुरुषविषयकः संशयः जायते तत्र प्रत्यक्षसामग्र्यां विशेषदर्शनरूपायां संशयोत्तरप्रत्यक्षस्थलेऽप्यनुमितिः स्यात्। अत्रेच्छा पुरुषं जानीयामिति रूपा वर्तते, अनुमितिसामग्री अनुमित्सापरामर्शरूपा विद्यते सामग्र्यां सत्यामपि प्रत्यक्षमेव जायते न त्वनुमितिरिति कथं स्यात्। न च तत्र प्रत्यक्षसामग्र्या अनुमितिप्रतिबन्धान्नानुमितिरिति वाच्यम्। **अनुमित्से**ति। यद्यनुमित्सा तदा प्रतिबन्ध एव कर्तुं न शक्यते। दूषयति। प्रत्यक्षसामग्र्याम् उत्तेजिका कीदृशीच्छा? या प्रत्यक्षातिरिक्तसिद्धिमात्रविषयिणीच्छा। सा च संशयोत्तरप्रत्यक्षस्थले नास्ति। कुतः? पुरुषं जानीयामितीच्छायाः प्रत्यक्षातिरिक्तसिद्धिमात्रगोचरत्वाभावात्। प्रत्यक्षेणापि पुरुषज्ञानेच्छाऽस्त्येव। **तदि**ति **उभयं ने**ति। प्रत्यक्षसामग्रीप्रतिबन्धिका अथ च पक्षताघटिता एकैवेच्छा विवक्षिता। तथा च संशयोत्तरप्रत्यक्षस्थले नानुमितिः स्यात्। तत्साध्यीयाऽपि विवक्षणीया। अन्यस्य सिषाधयिषया अन्यस्यानुमितिः स्यात्। अन्यसाध्यविषयकसिषाधयिषया अन्यसाध्यविषयाऽनुमितिः स्यात्। तत्कालीनापि विवक्षणीया। अन्यथा भिन्नकालीनां सिषाधयिषामादायानुमितिः स्यात्। **एवं चे**ति। पूर्वोक्ता तत्पुरुषीयेत्यादिका सिषाधयिषा घनगर्जितस्थले अप्रसिद्धा। यदा घनगर्जितमवगत्य मेघानुमानं जायते तत्र सिषाधयिषाघटिता पक्षता नास्ति इति कथमनुमितिरिति पूर्वपक्षार्थः। समाधत्ते - **स्वीये**ति। साध्ये स्वीयसिषाधयिषाविषयत्वाभावसमानाधिकरणसिद्धिविषयत्वाभावः पक्षता। अयमर्थः - स्वीया या सिषाधयिषा तत्पुरुषीया तद्विषयत्वाभावसमानाधिकरणा या सिद्धिः तद्विषयत्वाभावः साध्ये पेक्षि(पक्ष)ता। एवं च पर्वतो वह्निमान् इत्यत्र साध्ये वह्नौ समानाधिकरणा या सिद्धिः सिद्ध्यन्तरे वह्नेर्यद्भविष्यति तया सह समानाधिकरणाऽऽत्माद्यधिकरणा या सिद्धिस्तद्विषयत्वाभावः साध्ये वर्तते। तथा च वह्निसिद्ध्यन्तरविषयत्वाभावः पर्वतवह्नौ वर्तते इति कृत्वा तादृशं साध्यं वर्तते इति पक्षता पक्षनिष्ठा। शङ्कते - **नन्वि**ति। अत्र लक्षणे सिषाधयिषायां तत्कालीनत्वं विवक्षितं न वा?

आद्ये घनगर्जितेन यत्रानुमानं तादृशी सिषाधयिषा अप्रसिद्धा सिषाधयिषाया एवाभावात्। अन्त्ये इति **स्पष्टम्**। **सिषाधयिषे**ति। तत्कालीनी या सिषाधयिषा तद्विषयत्वाभावः साध्ये इति लभ्यते विशेषणस्य सम्बद्धत्वात्। **न चे**ति। तत्कालीनत्वमपि विवक्षायां प्रवेशनीयम्। **एवं चे**ति। **पक्षधर**मते द्वित्रिक्षणान्तरितसिषाधयिषायां यत्रानुमितिस्तत्र तत्कालीना सिषाधयिषा नास्त्येवेति कृत्वा अनुमितिः कथं स्यादिति चिन्त्यम्। **पक्षा[न्]तरे**ति। यत्र महानसे वह्नेः [52 A] सिषाधयिषा पक्षे पर्वते सिद्धिसाधनं तत्रापि पक्षता स्यात्। सिषाधयिषाविषयत्वा(त्वं) साध्येऽस्ति। **अत एवे**ति। यतः पूर्वोक्तं सिषाधयिषाविषयत्वमेव साध्ये वर्तते। अतः कथमनुमितिः स्यात् स्वीयेति, अनुमितिकाले सिषाधयिषाया नष्टत्वात्। तद्विषयत्वाभाव एव साध्येऽस्ति। यस्य पुरुषस्य पक्षे वर्तते कदाचिदपि सिषाधयिषा भूततत्पक्षकानुमितिस्थले सिषाधयिषा अप्रसिद्धा इत्यपि चिन्त्यम्। **वस्तुत** इति। त्वया अन्यपुरुषीयान्यकालीयसिषाधयिषामादाय अतिप्रसङ्गो लक्षणस्य दत्तः समा(म)स्ति कथं तत्पुरुषे ? अन्यकालीनाऽन्यदीया च सिषाधयिषा तत्र(तत्)पुरुषे नास्त्येव यतस्तल्लिङ्गकत्वं तत्पक्षकत्वं विवक्षितं वर्तते। मतान्तरमाह - **यत्त्विति**। सिद्ध्यनन्तरं या अनुमितिर्भविष्यति तत्र सिषाधयिषा- विशेषसामग्री परामर्शमात्रं सामान्यसामग्रीति विशिष्टाभावः - कारणमेव न भवति। तथा च सिषाधयिषा अनुमितिविशेषे कारणम्, यत्र सिद्ध्युत्तरमनुमितिस्तत्रैव कारणम्। विशिष्टाभावेन सर्वत्रानुमितौ सिषाधयिषा कारणमित्यायाति। कारणत्वं तु सर्वत्र न्वा(ना)स्त्येवेति भावः। **एवमि**ति। दाहे उत्तेजकाभावविशिष्टः मण्यभावः कारणम्, सोऽपि न स्यात्। कुतः ? मणिसमवधानं दाहे उत्तेजकम्। **विशेषसामग्री**ति। दाहेऽपि विशिष्टाभावो हेतुर्न स्यात्। न चेष्टापत्तिः निराकरिष्यमाणत्वात्। शङ्कते - **नन्विति**। सिषाधयिषाविरहविशिष्टसिद्धिरनुमितौ प्रतिबन्धिका भवतीति तदभावः प्रतिबन्धकाभावत्वेन कारणं वक्तव्यम्। तच्च न सम्भवति। कुतः ? प्रतिबन्धकाभावस्य कार्यकाले एव हेतुत्वमवधारितम्। तथा च सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य कथं पक्षता ? कार्यम् अनुमितिः, तत्काले सिषाधयिषाविरहविशिष्टसिद्ध्यभावो नास्ति सिद्धेः सत्त्वादित्याशङ्कार्थः। दूषयति। **मण्यादि(दी)**ति। प्रतिबन्धकाभावस्य कार्यसहभूतत्वेन कारणतायां मण्यादेर्विद्यमानेऽपि दाहः स्यात् यतो मणेः पूर्वमभावः स्थितः इति कृत्वा दाहः स्यादिति बाधकेनान्यत्र प्रतिबन्धकाभावस्य कार्यसहभूतत्वेन कारणत्वे प्रकृतेऽनुमितिस्थले कार्यसहभूतत्वेन कारणत्वं न कल्पनीयम्, गौरवात्। अथवा इयं विवक्षा कर्तव्या - कार्यसहभूतस्य प्रतिबन्धकाभावस्य कारणता कार्यातिरिक्तं प्रतिबन्धकं यत्र नास्ति तत्र कल्पनीयं(या), यत्र तु कार्यातिरिक्तमेव प्रतिबन्धकं तत्र कार्यसहभूतत्वेन कारणत्वं न कल्पनीयम्।

पूर्वं व्याप्तिर्निरूपिता तदनन्तरं पक्षता आश्रयधर्मिधर्मिता पक्षताऽपि निरूपिता। अथ व्याप्तिविशिष्टपक्ष-धर्मताज्ञानस्य कारणत्वं विचारयति इत्युपोद्धातसङ्गतिर्ज्ञेया।

**। पक्षतानिरूपणं सम्पूर्णम्।**

## । परामर्शनिरूपणम् ।

**पक्षधर्मस्य व्याप्तिविशिष्टज्ञानमनुमितिहेतुः । ननु व्याप्यत्वावच्छेदकप्रकारेण व्याप्तिस्मरणं पक्षधर्मताज्ञानं तथा लाघवात् परामर्शहेतुत्वेनावश्यकत्वाच्च एवं च धूमो वह्निव्याप्यो धूमवांश्चायमिति ज्ञानद्वयादेवानुमितिरस्तु । न चानुमितिं प्रति व्याप्यत्वज्ञानमेव हेतुर्लाघवात् उपजीव्यत्वाच्चेति वाच्यम् । तस्यानुमितेः पूर्वमसिद्धौ युगपदुपस्थित्यभावात् ।**

### [परामर्शनिरूपणम्]

[52 B] **पक्षधर्मस्येति** मूलम्। **नैयायिकानां** मते पक्षधर्मस्य धूमस्य व्याप्तिविशिष्टज्ञानमनुमितिकारणं वह्निव्याप्यधूमवानयमित्यकारकम्। तथा च **न्यायमते** अनुमितेः कारणं विशिष्टज्ञानमेकं कारणम्। व्याप्तिप्रकारकपक्षधर्मताज्ञानं विशिष्टज्ञानम्। **मीमांसकमते** तु अनुमितौ ज्ञानद्वयं कारणम्। यथा धूमो वह्निव्याप्यः, धमवांश्चायमिति द्वितीयम् । अत्र **मीमांसकः** शङ्कते - **नन्विति**। व्याप्यतावच्छेदकं धूमे धूमत्वम्, तेन धूमत्वं प्रकारो यत्र एतादृशं यद्व्याप्तिस्मरणं पक्षधर्मताज्ञानं धूमवांश्चायमिति रूपम्। **तथेति**। कारणम् एतावतोक्तम्। अनुमितौ ज्ञानद्वयमेव कारणं **लाघवात्** इति । विशिष्टवैशिष्ट्यावगाहि यत् ज्ञानं वह्निव्याप्यधूमवान् पर्वत इत्येवंरूपं तज्ज्ञानापेक्षया लाघवम्, ज्ञानद्वयस्यानुमितिकारणत्वेन लाघवम्, विशिष्टवैशिष्ट्यावगाहिज्ञानापेक्षया विशिष्टज्ञाने लाघवम् । यथा धूमो वह्निव्याप्य इति व्याप्तिर्विशेषणं धूमो विशेष्य इत्येव विशिष्टज्ञानम् । द्वितीयं ज्ञानं धूमवांश्चायमिति। तत्रापि धूमत्वविशिष्टधूमज्ञानं विशिष्टज्ञानम्। तथा च विशिष्टज्ञानं विशिष्टवैशिष्ट्यज्ञानापेक्षया लघु । तदेवानुमितौ कारणमस्तु, किं परामर्शरूपविशिष्टवैशिष्ट्यज्ञानेन इति मूलार्थः । **परामर्शेति** । येनापि परामर्शो हेतुर्वक्तव्यस्तेनापि परामर्शहेतुत्वेन ज्ञानद्वयं वक्तव्यमेव। यदि धूमो वह्निव्याप्यः १ धूमवांश्चायम् २ इति ज्ञानद्वयं जातं भवति तदैव वह्निव्याप्यधूमवानयमिति परामर्श उत्पद्यते तत्कारणत्वात् तस्य इत्यर्थः। तद्धेतोरेवास्तु किं तेनेति न्यायादनुमितावेव ज्ञानद्वयस्य कारणताऽस्तु इति मूलाशङ्कार्थः ।

**व्याप्तिनिश्चय** इति टीका। यथाश्रुतेऽसङ्गतिः, यतो व्याप्तिप्रत्यक्षादपि अनुमितिर्जायते, तत्र व्याप्तिस्मरणं नास्ति, इत्यतोऽन्यथा व्याचष्टे। निश्चयस्तु स्मरणप्रत्यक्षसाधारण इत्यर्थः। **अतिरिक्तेति**। ज्ञानद्वयादतिरिक्तमेकं विशिष्टवैशिष्ट्यावगाहिज्ञानं किमर्थं कल्पनीयमित्यर्थः। **द्वयत्वमिति उभयेति**। उभयं व्याप्तिपक्षधर्मते तद(द्)गोचरं यत् समूहालम्बनम् । यथा धूमो वह्निव्याप्यो धूमवांश्चायमिति भिन्नविषयकमेकं ज्ञानं समूहालम्बनम् । तस्मादेकस्मादप्यनुमितिर्जायते। अतो ज्ञाने द्वित्वमविवक्षितम् द्वित्वनियमोऽविवक्षित इत्यर्थः ।

**न चेति** मूलम् । व्याप्तिज्ञानस्य व्याप्यतावच्छेदकप्रकारकज्ञानत्वेन वा कारणता विवक्षिता किं वा व्याप्तिप्रकारकज्ञानत्वेन ? धूमो वह्निव्याप्यः धूमवांश्चायमिति ज्ञानद्वयम् । अत्र धूमत्वं व्याप्यतावच्छेदकं व्याप्तिप्रकारकज्ञानं च वह्निव्याप्यधूमवानिति रूपम् । तन्मध्ये अनुमितिं प्रति व्याप्यत्वज्ञानं धूमो वह्निव्याप्य इति व्याप्तित्वप्रकारकं ज्ञानं कारणमस्तु । **लाघवादिति** मूलम् । ज्ञानद्वये अवच्छेदकपदस्याधिकस्य प्रविष्टत्वादित्यर्थः ।

**उपजीव्यत्वादिति** टीका । व्याप्यत्वावच्छेदकं ज्ञानं [53 A] व्याप्यत्वज्ञानजन्यमिति तदेवास्तु । **तस्येति** मूलम् । व्याप्तिप्रकारकज्ञानस्यानुमितेः पूर्वं सिद्धिर्नास्ति प्रमाणेन तत्र पूर्वं साधितं नास्ति । **युगपदिति** । व्याप्यत्वावच्छेदकप्रकारकज्ञानव्याप्तिप्रकारकज्ञानयोर्युगपदुपस्थितिर्नास्तीति कथं लाघवगौरवावतारः इति मूलार्थः । **सामग्रीति** । सन्निकर्षादिसामग्रीबलेन व्याप्तिप्रकारकं यज्ज्ञानं तत् सिद्धमेव । तदनन्तरं युगपदुपस्थितौ सत्यां लाघवगौरवावतारो भविष्यतीत्याशङ्कते - **नन्विति** ।

**अथ यथा तत्ताविशिष्टस्मरणे सतीन्द्रियसन्निकृष्टे स एवायमिति अभेदप्रत्ययो भवति तथेन्द्रियसन्निकृष्टे धूमे वह्निव्याप्यधूमस्मरणे धूमत्वासाधारणधर्मदर्शनाद् व्याप्योऽयमित्यभेदप्रत्ययः स्यात् सामग्र्या वृत्तत्वादिति स एवानुमितिहेतुरिति चेत् । न । प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वात् अनुमितिरेवोत्पद्यते, न तु व्याप्याभेदप्रत्ययः । अन्यथा तवापि परामर्शानन्तरं परामर्शान्तरं तदनुव्यवसायो वा भवेत्, न त्वनुमितिः ।**

**नैयायिकः** शङ्कते - **अथेति** मूलम् । पूर्वं तत्ताविशिष्टस्मरणं यथा स इति । इन्द्रियसन्निकृष्टे तस्मिन्नेव स एवायमिति अभेदप्रत्ययो जायते । तथा प्रकृतेऽपि । इन्द्रियसन्निकृष्टे यो धूमः तत्र वह्निव्याप्यधूमस्मरणे स एवायं धूमो वह्निव्याप्य इति अभेदप्रत्यभिज्ञानं तथा च युगपदुपस्थितिर्वर्तते । लाघवगौरवावतारो भविष्यतीति । सामग्र्याः संस्कारसन्निकर्षरूपसामग्र्याः सत्त्वात् । **स एवानुमितिहेतुरिति** । व्याप्तिप्रकारकपरामर्शोऽनुमितिहेतुरस्तु इति मूलार्थः ।

**समाने विषये** इति टीका । यथा स्थाणुर्वा पुरुषो वेति संशयो जातः, ततः पुरुषत्वव्याप्यकरादिमानिति विशेषदर्शनम्, ततः पुरुषप्रत्यक्षज्ञानम् । तत्रानुमितिः कुतो न भवति यथा अयं पुरुषः करादिमत्त्वात् ? तत्रोच्यते । अनुमितिस्तत्र न भवति । समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वम् । समानविषयत्वं तु - विशेषदर्शनमपि पुरुषत्वस्य, अनुमितिरपि पुरुषत्वस्य इति । समानविषये प्रत्यक्षसामग्री बलवतीति प्रत्यक्षमेव भवतीति । अनुभव एव तत्र प्रमाणम् । यदि प्रत्यक्षसामग्री बलवती तर्हि परामर्शोत्तरं वह्निप्रत्यक्षं ज्ञानं कुतो न भवतीति ? अत्र उच्यते । **भिन्नविषये** इति । परामर्शो धूमस्य, प्रत्यक्षं तु वह्नेः, इति परामर्शप्रत्यक्षयोर्भिन्नविषयत्वात् अनुमितिरेव । प्रत्यक्षे तु विशेषदर्शनं पुरुषत्वस्य, अनुमितिरपि पुरषत्वस्य, इति समानविषयत्वमेव ।

**व्यप्याभेदे**ति। तथा च तत्राभेदप्रत्यक्षो(क्षं) न भवति, किन्त्वनुमितिरेव तत्र भवतीति मूलार्थः। **अन्यथे**ति। यदि भिन्ने विषये अनुमितिसामग्री बलवतीति नोच्यते तदी(दा) परामर्शो जातः पुनरपि परामर्शः कुतो न भवति, परामर्शधारा कुतो न भवति ? **तदनुव्यवसाये**ति। वह्निव्याप्यधूमवन्तं जानामि इत्यनुव्यवसाय एव कुतो न भवति ?

**अथ धूमो वह्निव्याप्य इति स्मरतः पर्वतीयधूमेन्द्रियसन्निकर्षे प्रथमत एव व्याप्ति-धूमत्वयोर्वैशिष्ट्यं यत्र भासते विशेषणज्ञानस्य पूर्वं वृत्तत्वात् तत्र, यत्र चाप्तवाक्याद् वह्निव्याप्यवान् अयमिति ज्ञानं तत्रोभयत्रापि लाघवात् पक्षधर्मव्याप्यत्वज्ञानस्य हेतुत्वकल्पनादन्यत्रापि तथेति चेत्। न। इन्द्रियासन्निकृष्टेऽतीन्द्रिये च लिङ्गे प्रत्यक्ष-विशिष्टज्ञानसामग्रीविरहात् तेन विनानुमित्यनुत्पादापत्तेः अस्मदुक्तसामग्र्याश्च तत्रापि सत्त्वात्। न चानुमानात् तत्र परामर्शः, अनवस्थानात्।**

पुनर्**नैयायिकः** शङ्कते - **अथे**ति। स वह्निव्याप्यो धूम इति स्मरणं जातं पर्वतीयधूमे यदेन्द्रियसन्निकर्षो जातः। **प्रथमत एवे**ति। इन्द्रियसन्निकर्षानन्तरमेवेत्यर्थः। **व्याप्ती**ति। यथा वह्निव्याप्यो धूम इत्यत्र व्याप्तिर्विशेषणं धूमो विशेष्यस्तेन तयोर्वैशिष्ट्यभानं विशेषणज्ञानस्य व्याप्तिज्ञानस्य पूर्वं विशिष्टज्ञानात् पूर्वं वृत्तत्वात् जातत्वादिति हेतुः। **यत्र चे**ति। आप्तवाक्यात् परामर्शज्ञानं व्याप्तिप्रकारकं जातम्। कारणत्वमुभयत्रापि पूर्वोक्तस्थलद्वये व्याप्तिज्ञानस्य कारणता दृष्टेति। सर्वत्र तदेव कारणमस्तु इत्याशङ्कार्थः। **मीमांसकः** समाधत्ते - **इन्द्रिये**ति। पूर्वोक्तं व्याप्तिप्रकारकपक्षधर्मताज्ञानमेव कारणम्। ननु व्याप्यत्वावच्छेदकप्रकारकज्ञानं न कारणमिति। तत्र दूषणमाह- **इन्द्रिये**ति। यत्र धूम इन्द्रियासन्निकृष्टोऽस्ति। अतीन्द्रिये लिङ्गे यथा [53 B] आकाशं नित्यसङ्ख्यावत् नित्य-परिमाणवत्त्वात् इति रूपे प्रत्यक्षविशिष्टसामग्री नास्ति, ततो व्याप्तिप्रत्यक्षाभावात् अनुमितिर्न स्यात्।

**ततो व्यभिचारा**दिति टीका। इन्द्रियासन्निकृष्टस्थले व्यभिचारात्। यतस्तत्र व्याप्तिप्रत्यक्षसामग्री नास्ति ततो व्याप्तिप्रकारकपक्षधर्मताज्ञानं कारणं [न] भवति। अस्माकं **मीमांसका**नां मते व्याप्यत्वावच्छेदकप्रकारकज्ञानं चातीन्द्रियस्थलेऽपि वर्तते इति कृत्वा तत्रानुमितिर्मम मते भवति, व्याप्यत्वावच्छेदकप्रकारकं यत्पक्षधर्मताज्ञानं यन्मदुक्ता सामग्री सा च ज्ञानमात्रं (सा चात्र) वर्तत एव। तव मते व्याप्तिप्रत्यक्षसामग्र्यभावादनुमितिर्न स्यात् इत्यर्थः।

**न चे**ति। तत्रेन्द्रियासन्निकृष्टस्थले व्याप्तिप्रत्यक्षं यद्यपि नास्ति तथाप्यनुमानात् परामर्शो वाच्यः। यथानुमाने पर्वतवृत्तिधूमत्वं वह्निव्याप्तिव्याप्यं धूमत्वात् इत्यनुमानरूपपरामर्शेऽनवस्थादूषणमाह - **अनवस्थाना**दिति। अत्र

परामर्शः कारणं भवति, सोऽप्यनुमानरूपो वाच्यः, तत्राप्यनुमाने परामर्शः कारणम्, सोऽप्यनुमानरूपो वाच्यः, इत्यनवस्था स्यात्। तस्मादिन्द्रियासिन्निकृष्टस्थले व्याप्तिप्रत्यक्षस्य व्यभिचारान्न व्याप्तिप्रत्यक्षं कारणमित्युक्तम्।

**अथ यथा स देवदत्तो गौरो न वा परमाणूरूपाधिकरणं न वेति संशयो बहिरस्वतन्त्रेणापि मनसा कोटिस्मरण-विशेषादर्शनादिसहकारिवशाज्जन्यते, यथा वा निद्रासहकारेण बाह्यस्वप्नानुभवः तथेहापि ज्ञानान्तरोपनीतविशेष्ये व्याप्तिस्मरणसहकृतेन मनसा परामर्शो जन्यते तदनन्तरमनुमितिदर्शनादिति चेत्। न। व्याप्तिस्मरणादेः प्रमाणान्तरतापत्तेः, तदेव हि प्रमाणान्तरं यदसाधारणं सहकारि समासाद्य मनोबहिर्गोचरां प्रमां जनयति यथेन्द्रियादि, संशय-स्वप्नौ तु न प्रमे इति न निद्रादेः प्रमाणान्तरत्वम्। न च तवापि कथं स धूमो वह्निव्याप्य इति व्यवहारः तदानीं तद्व्याप्यत्वानुभावकाभावादिति वाच्यम्। तत्र स्मृतधूमे धूमत्वेन वह्निव्याप्यत्वानुमानात्।**

अथ **नैयायिकः** परामर्शस्य कारणतामानयितुं शङ्कते - **अथे**ति मूलम्। अयं परमाणुरूपविषयः संशयो मनसा जन्यते। यद्यपि तज्जनने मनसो बहिःपदार्थगोचरज्ञानजनने स्वातन्त्र्यं नास्ति किन्तु ज्ञानसुखादि-कामतर(दिकमान्तर)मेषितेन ज्ञापयितुं तेन स्वातन्त्र्येण शक्यते, प्रकृते कोटिस्मरणादिसहकारिकारणवशाद् बहिरप्युक्तसंशयो जन्यते। **यथा वे**ति। स्वप्नानुभवो निद्रासहकारिवशान्मनसा जन्यते। **तदनन्तरमि**ति। संशयानन्तरं परमाणुः रूपवान्न वेति संशयानन्तरमिति सन्देहमीति अनुव्यवसायः, अथवाऽस्य स्वप्नानुभवानन्तरम् अपि स्वप्नो मया दृष्ट इति अनुव्यवसायो वर्तते। **तथे**ति। तद्वद् इहापीति। इन्द्रियासन्निकृष्टधूमवह्निस्थले ज्ञानान्तरोपनीतो यो धूमः। कथम्? पूर्वं यो धूमो दृष्टोऽभूत् तद्दर्शनमेव धियाऽसन्निकृष्टस्य धूमस्योपनायकं यथा बाह्यणोपनीते सौरभे प्रत्यक्षदृष्टेऽपि चन्दने घ्राणोपनीतं सौरभं भासते। तथेहापि ज्ञानोपनीतो यो विशेष्यो धूमः तत्र व्याप्तिस्मरणसहकृतं यत् मनः तेन परामर्शो जन्यते। तदनन्तरमनुमितिरिरिति कृत्वा परामर्शकारणमागत[म्] एवेत्याशङ्कार्थः। **व्याप्तिस्मरणादेरि**ति मूलम्। **यदसाधारणे**त्यादिना। तथा च मनोऽसाधारणं सहकारि व्याप्तिस्मरणलक्षणमासाद्य बहिर्गोचरां परामर्शरूपां प्रमां जनयतीति। व्याप्तिस्मरणमपि प्रमाणान्तरं स्यादित्याशङ्कार्थः। ननु व्याप्तिस्मरणं प्रमाणान्तरं भवति, कथं परामर्शद्वारा व्याप्तिज्ञानमप्यनुमितिकरणं वर्तते?, इत्यन्यथा व्याचष्टे - **प्रमाणान्तरत्वेने**ति। तथा च परिगणितानि तदपेक्षया पृथक्परिगणनं स्यादित्यर्थः। ननु तर्हि निद्रादेः प्रमाणान्तरता कथं स्यादित्यत आह - **संशये**ति। प्रमां जनयतीत्युक्तत्वादिति भावः। **न चे**ति। **मीमांसकमते**ऽपि ज्ञानद्वयमनुमितौ कारणम्, प्रथमं यद्व्याप्यतावच्छेदकप्रकारकं स धूमो

वह्निव्याप्य इति रूपम्, तत्र व्याप्तिर्भासते एवेति, यदि व्याप्तिस्मरणं मनसा नोच्यते तदा स धूमो वह्निव्याप्य इति व्यवहारोऽपि भवतो मते [54 A] कथमनुभावकाभावात् इत्याशङ्कार्थः। समाधत्ते - **तत्रेति**। पूर्वोक्तव्यवहारे स्मृतधूमे वह्निव्याप्यत्वमनुमीयते - यथा स धूमो वह्निव्याप्यो धूमत्वात् इत्यनुमानेन व्याप्तिरनुमीयते।

**न च तन्मते धूमत्वेन व्याप्त्यनुभवः सम्भवति, अत एव यो वह्निव्याप्यवान् सोऽवश्यं वह्निमान् इति व्याप्तिज्ञानवतोऽनुमितिर्नान्यथा। अथ पर्वतीयधूमे धूमत्वेन ज्ञाते वह्नि-व्याप्योऽयं न वेति संशयेऽप्यनुमितिः स्यादिति चेत्। न। धूमो वह्निव्याप्य इति स्मरणे विद्यमाने धूमत्वज्ञानस्य विशेषदर्शनत्वेन संशयाभावात्, अन्यथा परमर्शोऽपि कुतो न स्यात्, संशयेन प्रतिबन्धादिति चेत् तुल्यम्। न च सामान्यनिश्चयस्य सामान्यसंशय-निवर्तकत्वात् धूमसामान्ये एव संशयो मा भूत् विशेषसंशयश्च विशेषनिश्चयनिवर्तनीय इति धूमविशेषे संशयनिरासार्थं पृथग्व्याप्तिनिश्चयो वाच्य इति वाच्यम्। यत्र हि यद्व्या-वर्तकधर्मदर्शनं तत्र न तत्संशयः तच्च सामान्ये विशेषे वेति। वस्तुतस्तु धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्मताज्ञाने चानुमितिर्भवत्येव।**

**न चेति** मूलम्। तन्मते **नैयायिक**मते धूमत्वेन व्याप्यत्वानुभवो न सम्भवति स धूमो वह्निव्याप्यो धूमत्वादित्यनेन।

टीका - **अत्र धूम** इति। यथा धूमे इन्द्रियासन्निकृष्टे वह्निव्याप्यत्वपरामर्शो न सम्भवति तथा धूमत्वेऽपीन्द्रिया-सन्निकृष्टे वह्निव्याप्तिव्याप्यत्वपरामर्शो न सम्भवति। तत्र हेतुमाह - **विशेष्येति**। इन्द्रियासन्निकृष्टस्थले यदा धूमेन सह सन्निकर्षो नास्ति तथा धूमत्वेनापि सह सन्निकर्षो नास्ति, इति कथं धूमत्वे वह्निव्याप्तिव्याप्यत्वपरामर्श इत्यर्थः। यदुक्ता सामग्री व्याप्तिस्मृतिरथ च धूमत्वेन धूमज्ञानमितिरूपा तत्राप्यस्तीति अनुमितिर्भवत्येवेति भावः।

**अत एवेति**। यतो मया व्याप्यतावच्छेदकप्रकारकज्ञानमनुमितिकारणमुक्तमत एवेत्यर्थः। **अत एवेति** टीका। प्रत्येकवृत्तिर्या वह्निव्याप्तिर्यथा वह्न्यभाववदवृत्तिरूपा यतो वह्न्यभाववदवृत्तित्वं(त्वा)वच्छिन्ना या सकल-वह्निव्याप्यनिष्ठा या व्याप्तिः यथा वह्न्यभाववदवृत्ति(त्त्य)समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदक-वह्नित्वावच्छिन्नसमानाधिकरणो धूम इति सकलवह्निव्याप्यसाधारणी या व्याप्तिस्तद्विषयकं यत् प्रत्यक्षं तद् यदा भवति तदैवानुमितिर्नान्यथा। अत्रायमर्थः। वह्न्यभाववान् ह्रदस्तदवृत्तिः धूमालोकादिस्तदसमानाधिकरणो योऽत्यन्ताभावो घटपटादेः तत्प्रतियोगितानवच्छेदकं यद् वह्नित्वं तदवच्छिन्नो वह्निस्तत्समानाधिकरणो धूम इत्यर्थः।

**नैयायिकः** शङ्कते - **अथेति**। पर्वतीयधूमे धूमत्वेन ज्ञाते सति वह्निव्याप्यत्वसन्देहेऽप्यनुमितिः स्यात्। यतोऽत्र व्याप्यतावच्छेदकं यद्धूमत्वं तत्प्रकारकं पक्षधर्मताज्ञानं वर्तते, सामग्री एतदुक्ताऽस्तीति कथं नानुमितिरिति मूलार्थः। **धूम** इति मूलम्। यदि तत्र धूमो वह्निव्याप्य इति स्मरणं विद्यते तदा तदेव विशेषदर्शनं यस्मिन् सति नानुमितिः, यदि च तत्स्मरणं नास्ति तदा व्याप्तिस्मरणरूपकारणाभावादनुमितिर्न भवतीत्यर्थः। **अन्यथेति** मूलम्। यदि व्याप्तिस्मरणे सत्यपि संशयः स्यादित्युच्यते तदा मयोच्यते परामर्शस्य कुतो न संशयो भवति ? शङ्कते - **संशयेनेति**। संशयेन परामर्शः प्रतिबध्यत इति स न भवतीत्याशङ्कार्थः। **तुल्यमिति** मूलम्। संशयेनानुमितिरपि न भवतीति तुल्यम्।

**वस्तुत** इति टीका। वह्निव्याप्यो धूमो न वेति संशयो न स्यादेव यतः संशयस्यानुमितिं प्रति प्रतिबन्धकता अनुमितिजनकज्ञानविघटनद्वारैव वाच्या। प्रकृते चानुमितिजनको व्याप्यत्वनिश्चयः, तस्य विघटनं तु संशयेन कर्तुं न शक्यते यतो विशेषदर्शनं व्याप्यत्वनिश्चयरूपं तत् संशयप्रतिबन्धकम्। ननु संशयो विशेषदर्शनविघटक इति। अत्र टीकाकारो युक्तिमाह - **अन्यथेति**। यदि संशयस्य अनुमितौ प्रतिबन्धकता स्यात् तदा अनुमितिजनकीभूतो यो व्याप्यत्वनिश्चयस्तदनिश्चयनद्वारा स्यात् नान्यथा, साक्षात् प्रतिबन्धकता नास्तीत्यर्थः। ततो व्याप्तिस्मरणे संशयो भवतीत्यागतमेव।

मध्ये शङ्कते - **न चेति**। [54 B] सामान्यनिश्चयो यथा धूमो वह्निव्याप्य इति रूपः, तस्य सामान्यसंशयो धूमो वह्निव्याप्यो न वेति संशयनिवर्तकतास्ति। तथा च व्याप्तिस्मरणे विद्यमाने धूमो वह्निव्याप्यो न वेति संशयो मास्तु। विशेषसंशयस्तु अयं धूमो वह्निव्याप्यो न वेति संशयो भविष्यति विशेषसंशयत्वात् तस्येति। तस्य निवर्तकताभावात्। अतो विशेषसंशयनिवृत्त्यर्थं विशेषनिश्चयो वाच्य इति। अतः पृथक् व्याप्तिनिश्चयो वाच्यः यथा अयं धूमो वह्निव्याप्य इति। तथा चायं परामर्श इति **नैयायिक**समीहितं सिद्धमित्याशङ्कार्थः। उत्तरं ददाति- **यत्र हीति तत्रेति**। यदवच्छेदेन धूमत्वावच्छेदेन यद्व्यावर्तकधर्मो व्याप्तिः तज्ज्ञानं चेज्जातं तदा धूमत्वावच्छेदेन यः संशयः तद्व्यावर्तकमपि भवति।

**यद्धर्मनिश्चय** इति टीका। धूमत्वावच्छेदेन यदि व्याप्तिज्ञानं जातं तद्व्याप्तिज्ञानं तद्धर्मकोटिकसंशयविरोधि *व्याप्तिकोटिकसंशयविरोधि। तत्राह* - ***लाघवादिति***। तत्कोटिकसंशयविरोधीति वक्तव्यम्। व्याप्तिकोटिकसंशयविरोधीति वाच्यम्। **तदवच्छिन्नेति**। व्याप्तित्वावच्छिन्नकोटि[क]संशयविरोधि नास्ति। तत्र हेतुमाह - **गौरवादिति**। तथा चैतत् सिद्धं सामान्यव्याप्तिनिश्चयेऽपि विशेषसन्देहो न भवतीति सिद्धम्, तथा च ज्ञानद्वयरूपसामग्र्यामेवानुमितिर्निर्विघ्नोत्पद्यते। **न चेति** टीका। घटत्वेन पटादिभेदनिश्चये जातेऽपि पृथिवीत्वेन भेदसंशयः केवलव्यतिरेकिग्रन्थे कथं स्वीकृतः ? स न लगति यद्धर्मत्वेन निश्चयो यथा घटत्वावच्छेदेन भेदनिश्चयः

तद्धर्मज्ञानं भेदज्ञानं तद्धर्मके संशयो यथा पृथिवी भिन्ना न वेति संशयः कथं भवति विरोधिज्ञानस्य विद्यमानत्वादिति आशङ्कार्थः । **एतदिति** टीका । एतदुक्तम् तन्मतान्तरमिति भावः । **न केवलमिति** टीका । प्रकृते व्यावर्तको [विशेष]रूपस्तद्दर्शनादेव संशयाभाव इति नोच्यते । तथा चानुमितिसामग्रीबलवत्त्वमपि संशयनिवर्तकम् तथा चानुमितिसामग्र यां सत्यां संशयो न भवतीत्यर्थः ।

**ननु भावोऽभावो वा उभयथापि प्रमेयमित्यत्र भावत्वाभावत्वयोर्व्याप्यत्वावच्छेदकयोरग्रहादनुमानं न स्यात् तदन्यान्यत्वरूपस्यान्यतरत्वस्य लिङ्गत्वाभावादिति चेत् । न । भावत्वाभावत्वान्यान्यधर्मवत्त्वस्य तत्र लिङ्गत्वात्, एवं धूमालोकान्यतरत्वमपि लिङ्गम् । अथ यद्व्यतिरेकज्ञानं यदुत्पत्तिप्रतिबन्धकं तत्तन्निश्चयसाध्यं तथा च पक्षधर्मस्य व्याप्यभेदज्ञानमनुमितिप्रतिबन्धकम् अतो व्याप्याभेदज्ञानं तद्धेतुः सिध्यतीति चेत् । न । धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्मताज्ञाने च सति विशेषदर्शनान्न धूमे व्याप्यभेदज्ञानं किन्तु अनुमितेरेवोत्पत्तिः तत्सामग्रीसत्त्वात् अतो व्याप्यभेदज्ञानं नानुमितिप्रतिबन्धकं येन व्याप्याभेदज्ञानं तद्धेतुः स्यात् । न च धूमत्वप्रकारेण व्याप्तिस्मरणपक्षधर्मताग्रहे इयं धूमव्यक्तिर्वह्निव्याप्या नेति भ्राम्यतोऽनुमित्यापत्तिरतो विशिष्टज्ञानं हेतुरिति वाच्यम् । धूमत्वस्य विशेषस्य दर्शनेन तादृशभ्रमानुत्पत्तेः तत्रानुमितिसद्भावादेव अन्यथा निश्चयसामग्र यां सत्यां भ्रमानन्तरं परामर्श एव कुतो न भवति । अस्तु वा व्याप्यतया पक्षधर्मतया चावगतस्य भेदाग्रह एवानुमितिहेतुः । परामर्शहेतुतया तस्यावश्यकत्वात् ।**

**नैयायिकः** शङ्कते - **नन्विति** । यदि भवतां मते व्याप्यतावच्छेदकप्रकारकं पक्षधर्मताज्ञानं कारणं तदा भावोऽभावो वेति प्रमेयम् । तथा चेदं प्रमेयं भावत्वात् इत्यत्र व्याप्यतावच्छेदकं भावत्वम् अभावत्वं वा । यथा संशयस्त्वेवं भवति । अयं भावो वाऽभावो वा प्रमेयमिति संशयस्तत्रानुमितिर्भवत्येव, परं व्याप्यतावच्छेदकप्रकारकनिश्चयाभावात् कथमनुमितिः ? तत्र व्याप्यतावच्छेदकयोरुभयोरे[व] निर्णयादनन्यगत्या व्याप्यत्वज्ञानमेव कारणं भवतु, न तु व्याप्यतावच्छेदकप्रकारकं पक्षधर्मताज्ञानं तस्यानिश्चयात् तथा चानुमितिर्न स्यादित्याशङ्कार्थः । तथा चानुमानम् - इदं प्रमेयं भावादभावाद्वा । अत्र भावत्वाभावत्वे द्वे व्याप्यतावच्छेदकतयोः सन्देहोऽस्ति, न तु निर्णयः । **अनन्यगत्येति** । द्वयोरपि व्याप्यताज्ञानं वर्तते इति कृत्वा अनुमितिर्भविष्यतीति आशङ्का **नैयायिकानाम्** । व्याख्यानान्तरं दूषयति - **नन्विति** । तथा चेदं प्रमेयं भावत्वादित्यत्र भावत्वाभावत्वपदं भावत्वत्वाभावत्वत्वपरम्,

तथा च भावत्वत्वं व्याप्यतावच्छेदकमभावत्व[त्व]मपि [55 A] व्याप्यतावच्छेदकम् तस्यानिश्चयात् इत्यर्थं केचित् कुर्वन्ति। तद् दूषयति - **तथा सती**ति टीका। उभयथाऽपि प्रमेय इति पुल्लिङ्गनिर्देशः स्यात्, न तु प्रमेयमिति नपुंसकम्। **उभयथापी**ति। प्रकृते भावत्वाभावत्वान्यान्यधर्मवत्त्वस्य लिङ्गत्वमेव न सम्भवति। यतो लिङ्गं कृतं वर्तते। भावाभावान्यतरादिति कृत्वा भावत्वाभावत्वान्यान्यधर्मवत्त्वं लिङ्गतावच्छेदकम्, न तु लिङ्गम्, इत्यन्यथा व्याचष्टे। **लिङ्गतावच्छेदकत्वा**दित्यर्थ इति। **अय**मिति। अयं वह्निव्याप्यो धूमालोकान्यतरादिति हेतुः। अत्रेदं लिङ्गं न भवति किन्तु लिङ्गतावच्छेदकम्, तथा च लिङ्गं यदि धूमालोकान्यत[र]त्वमिति तदा व्याप्यतावच्छेदकं **धूमालोकान्यतरत्वं तन्निष्ठो** धर्मः तस्य निर्णयः प्रमाणान्तरेण वर्तते इति कृत्वाऽनुमानं भवत्येवेति नानुभवति। **तत्रे**ति। यत्र धूमालोकान्यतरत्वं लिङ्गं वर्तते तत्राप्रसिद्धिर्नास्ति, यतो धूमालोकात् अन्यो घटादिः तदन्यतरत्वम् एतयोः प्रसिद्धमित्यर्थः। **नैयायिकः** शङ्कते - **अथ यदि**ति। यथा व्याप्तिव्यतिरेकज्ञानमनुमित्युत्पत्तिप्रतिबन्धकम्। **तत् अनुमितिज्ञानम्। तन्निश्चयसाध्यं** व्याप्तिनिश्चयसाध्यम्। **पक्षधर्मस्ये**ति। धूमादेर्व्याप्यभेदज्ञानं धूमो न वह्निव्याप्य इति रूपं तदनुमितिप्रतिबन्धकमिति कृत्वा व्याप्याभेदज्ञानं परामर्शरूपमनुमितिं प्रति कारणमायास्यति। तथा च व्याप्याभेदज्ञानत्वेन परामर्शसिद्धिरिति मूलार्थः।

**ग्राह्ये**ति टीका। मूले यथाश्रुते ग्राह्यव्यतिरेकज्ञानम्, ग्राह्यो घटादिः तद्व्यतिरेकज्ञानं यथाऽत्र घटो नास्तीति रूपं यदुत्पत्तिप्रतिबन्धकं ग्राह्यज्ञानोत्पत्तिप्रतिबन्धकं वर्तते तद्ग्राह्यज्ञानं ग्राह्यनिश्चयसाध्यं न भवति। अतोऽन्यथा व्याचष्टे - **ग्राह्यातिरिक्ते**ति। तथा च ग्राह्यातिरिक्तस्य यस्य व्यतिरेकज्ञानं यदुत्पत्तिप्रतिबन्धकमिति ज्ञेयम्। ग्राह्यव्यतिरेकज्ञानं तु न गाह्यातिरिक्तस्येति न पूर्वदोषः। न हि घटो नास्तीति व्यतिरेकज्ञानं घटातिरिक्तस्य। अथ व्याख्यानान्तरं दूषयति - **यत् तु** इति। कश्चिदेवं व्याख्याति। यद्व्यतिरेकज्ञानत्वावच्छिन्नं यत्र प्रतिबन्धकं तत्त्वनिश्चयसाध्यं तदा ग्राह्यव्यतिरेकज्ञानत्वावच्छिन्नप्रतिबन्धकं न भवति, यतो ग्राह्यव्यतिरेकज्ञानत्वावच्छिन्नमध्ये ग्राह्यसंशयोऽप्यागतस्तस्य च न प्रतिबन्धकत्वमिति। **तथे**ति। प्रतिबन्धकमित्यर्थः। **एवमि**ति। यथाश्रुतेऽव्यभिचारव्यतिरेकज्ञानत्वावच्छिन्नं यावद् वर्तते संशयो वा निश्चयो वा तद्व्यभिचाराभावनिश्चये प्रतिबन्धकं भवत्येव। न चाव्यभिचारनिश्चये अव्यभिचारनिश्चयहेतुरिति कृत्वा ग्राह्यातिरिक्तं विशेषणं तत्र देयम्। अव्यभिचारो व्याप्तिः, सा च ग्राह्यैवेति कृत्वा तदतिरिक्तत्वं विशे[षणं] देयमेवेत्यर्थः। [55 B]

**मीमांसक** आह - **धूमत्वे**ति मूलम्। धूमो वह्निव्याप्यः धूमवांश्चायमिति ज्ञानद्वये धूमत्वपुरस्कारेण जाते सति व्याप्यभेदज्ञानं धूमो न वह्निव्याप्य इति ज्ञानं न भवति, विशेषदर्शनस्य धूमो वह्निव्याप्य इति ज्ञानस्य विद्यमानत्वात्; किन्तु द्वयानन्तरमनुमितिरेवोत्पद्यते, अनुमितेरुक्तरूपायाः सामग्र्या विद्यमानत्वात्। **न चे**ति। न तु

यद्व्यतिरेकज्ञानमित्यनेनापि व्याप्यभेदज्ञानस्य प्रतिबन्धकता आनीता। अनेनापि व्याप्यभेदज्ञानस्य प्रतिबन्धकता शक्यते इति कृत्वा पौनरुक्त्यं स्यादित्यन्यथा व्याचष्टे - **पूर्वमिति**। पूर्वं सामान्यतः प्रतिबन्धकता धूमो न वह्निव्याप्य इति ज्ञानस्याशङ्किता, अधुना पुनर्विशेषस्य पक्षधर्मधूमविशेषविषयस्य न प्रतिबन्धकत्वं व्याप्येयं धूमव्यक्तिरिति।

**न चेहेति** टीका। व्याप्येयं धूमव्यक्तिः। पदं वर्तते तत्र पक्षधर्मपदं वर्तते यथा पक्षधर्मस्य व्याप्यभेदज्ञानमिति अनुमितिप्रतिबन्धकम्। तथा च पौनरुक्त्यमेवेति न च वाच्यम्। **सामान्येति** टीका। धूमो न वह्निव्याप्य इति सामान्याकारभेदज्ञानं पक्षधर्मविषयकं भवति। **परं तन्मात्रेति**। धूमविशेषविषयकं भेदज्ञानं तद् भवतीत्यत्र प्रमाणाभावः, तथा च तत् सामान्यविषयकम्। इयं धूमव्यक्तिर्वह्निव्याप्या नेति धूमविशेषविषयकम्। केचिदेवं पौनरुक्त्यं परिहरति - **यत् त्विति**। इयं धूमव्यक्तिर्वह्निव्याप्या नेति ग्रन्थस्य व्याप्यात्यन्ताभावभ्रमः प्रतिबन्धक इत्यत्र तात्पर्यम्। तस्य ग्रन्थस्य यद्व्यतिरेकेतिरूपस्य व्याप्यभेदभ्रमप्रतिबन्धकत्वमित्यत्र तात्पर्यम् यथायं व्याप्यो न व्याप्यादन्य इति प्रतीतेः। **वह्निव्याप्येति**। इयं धूमव्यक्तिर्वह्निव्याप्या नेत्यस्यापि ग्रन्थस्य व्याप्यान्योन्याभाव-भ्रमपरतैवायाति।

**अन्यथेति** मूलम्। यदा निश्चयसामग्री वर्तते भ्रमो नास्ति। **अनन्तरमिति**। सर्वदा परामर्श एव कुतो न भवति ?। तथा ज्ञानद्वयात्मिका सामग्री यदि वर्तते तदा अनुमितिरेव भवति, न तु व्याप्याभेदज्ञानम्। **अस्तु वेति**। धूमो वह्निव्याप्य इति व्याप्यतया धूमोऽवगतः धूमवांश्चायमिति पक्षधर्मतया च धूमोऽवगत इति तस्य धूमस्य भेदाग्रहो भेदग्रहाभावः भेदज्ञानाभाव एव कारणमस्तु अनुमितौ। तत्र युक्तिमाह - **परामर्शेति**। पूर्वं **नैयायिके**नाशङ्कितं भेदज्ञानं प्रतिबन्धकमिति कृत्वाऽभेदज्ञानं कारणमिति तदुपरि **मीमांसके**न सिद्धान्तितं भेदज्ञानं प्रतिबन्धकमेव न भवतीति, साम्प्रतं भेदज्ञानस्य प्रतिबन्धकत्वमस्तु तथाप्यभेदज्ञानमनुमितौ कारणं न भवति किन्तु भेदज्ञानाभाव एव कारणम्। त्वयाऽपि भेदग्रहाभावः परामर्शं प्रति कारणं वाच्यः, मया तूच्यते स अनुमितिं प्रति एव कारणमस्तु तद्धेतौ तेनेति न्यायादिति प्रघट्टकार्थः।

**अत एवासन्निकृष्टधूमज्ञानादप्यनुमितिः। न चैवं गौरवं, तदा विशिष्टज्ञानानुपस्थितेः। न च जनकज्ञानाविरोधिनो ज्ञानस्याप्रतिबन्धकत्वात् भेदग्रहो न प्रतिबन्धक इति वाच्यम्। अभेदज्ञानस्याजनकत्वात् त्वयापि लिङ्गपरामर्शे तादृशस्य प्रतिबन्धकत्वस्वीकाराच्च। अथ गोत्वं मधुरत्वावान्तरजातिर्वा लिङ्गं न स्यात् तद्गतधर्मान्तरस्याभावात् स्वत एव तस्य विलक्षणत्वात् इति चेत्। न। व्यक्तेरेव तत्र प्रकारत्वात्, न हि गौर्गोत्वमिति ज्ञानयोर-**

**विशेषः, अन्यथा गोत्वमिति ज्ञानस्य निर्विकल्पकत्वापत्त्या व्याप्यत्वग्रहे परामर्शे चानुपयोगात् गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं गोत्वत्वमित्यनुभवाच्च । न चैवमनवस्था, तदितरावृत्तित्वे सति तद्वृत्तित्वस्यानुभवेनापलापासम्भवात् ।**

**अत एवेति** मूलम् । असन्निकृष्टे इन्द्रियासन्निकृष्टेऽपि धूमे भेदग्रहाभावो वर्तते एवेत्यनुमितिर्भविष्यति [56 A] । तथा च भेदग्रहाभावः यथा धूमो वह्निव्याप्य इति भेदग्रहाभाव एवानुमितौ कारणम् । **तेनेति** टीका । धूमो न वह्निव्याप्य इति भ्रमोत्पत्तिर्यद्यभ्युपेयते तदा तदभिमतः **नैयायिका**भिमतः विशेषदर्शनरूपो यः परामर्शः तत्सामग्र्यामिन्द्रियसन्निकर्षादिरूपायां सत्यां भ्रमो न भवेदेवेति । भ्रमोत्पत्तिकाले परामर्श एव कुतो न भवतीति तन्मते **नैयायिक**मते पर्यनुयोग आशङ्कादित्यर्थः । **अभ्युपेत्येति** । भ्रमो भवतु, परं भेदज्ञानाभाव एव कारणमिति सिद्धम् । **गौरवमिति** । यद्यनुमितिं प्रति भेदग्रहाभावस्य कारणतोच्यते तदा गौरवम्, लाघवादभेदज्ञानमेव कारणमस्त्वित्यर्थः । **तदेति** । भेदग्रहाभावस्य यद्यनुमितौ कारणता तदा विशिष्टज्ञानं तदोपस्थितमेव नास्ति इति यल्लाघवगौरवावतारः स्यादित्यर्थः । **न चेति** । भेदग्रहो धूमो न वह्निव्याप्य इत्येवंरूपो भेदग्रहो न प्रतिबन्धकः । अत्र युक्तिमाह - **जनकेति** टीका । भेदग्रहस्तदा प्रतिबन्धको भवति यद्यनेनानुमितिजनकं ज्ञानं किञ्चिद् विघट्यते । अभेदज्ञानं तु तव मते जनकमेव न भवतीत्याशङ्कार्थः । **अभेदज्ञानस्येति** । यद्यभेदज्ञानं वह्निव्याप्यधूमवान् इति रूपं कारणं स्यात् तदा ज्ञानस्य प्रतिबन्धकता जनकज्ञानविघटनद्वारैवेति व्याप्तिः स्यात् । न चैवम् । **त्वयापीति** । तादृशस्य भेदज्ञानस्य परामर्शे प्रतिबन्धकता अङ्गीकृतास्ति । तथा चेयं व्याप्तिरसिद्धा । **न हीति** । अभेदज्ञानं वह्निव्याप्यधूमवान् इति रूपम् । परामर्शेऽभेदज्ञाने भेदज्ञानं कारणं नास्ति । **व्यभिचारादिति** टीका । भेदज्ञान[स्य] परामर्शं प्रति प्रतिबन्धकताऽस्ति । सा जनकज्ञानविघटनद्वारा नास्ति । परामर्शजनकीभूतं ज्ञानं खण्डव्याप्तिज्ञानं तन्न विघट्यते इति कृत्वा व्यभिचार इत्यर्थः । **ग्राह्याभावेति** टीका । ग्राह्याभावभिन्नस्य ज्ञानं जनकज्ञानविघटनद्वारा प्रतिबन्धकमित्यपि न वाच्यम् । परामर्शं प्रति प्रतिबन्धकं यद् भेदज्ञानं तद् ग्राह्याभावज्ञानमेव तद्भिन्नं न भवतीति । तत्र दूषणमाह - **अप्रयोजकत्वादिति** । ज्ञानस्य प्रतिबन्धकताऽस्तु, जनकज्ञानविघटनद्वारा मास्तु । अत्र विपक्षे बाधकस्तर्को नास्तीत्यर्थः । पुनर्**नैयायिकः** शङ्कते - **अथेति** । यदि व्याप्यतावच्छेदकप्रकारकं पक्षधर्मताज्ञानं कारणं तदा गोत्वस्य लिङ्गत्वं न स्यात् । तद्गतव्याप्यतावच्छेदकं धर्मान्तरं नास्ति । न च गोपदप्रवृत्तिनिमित्तत्वं गोत्वधर्मान्तरं भविष्यति इत्यत आह - **मधुरत्वावान्तरेति** । मधुरत्वावान्तरजातौ पदप्रवृत्तिनिमित्तत्वं धर्मान्तरं वक्तुं न शक्यते । कुतः ? आख्यातुमशक्यत्वे सति प्रत्याख्यातुमशक्यत्वात् । मधुरत्वावान्तरजातिराख्यातुमशक्या, अतः प्रत्याख्यातुमशक्या सा । अनुमानं यथा अयं सास्नावान् गोत्वात् गोत्वस्य व्याप्यतावच्छेदकं धर्मान्तरं नास्ति । तथा अयमुत्कृष्टरसवान् मधुरत्वावान्तरजातेः अत्र मधुरत्वावान्तरजातेः पदप्रवृत्तिनिमित्तत्वं नास्ति [56 B] आख्यातुमशक्यत्वात् । मधुरत्वं कियदित्याख्यातुं न शक्यते प्रत्याख्यातुमपि न शक्यते । यथेक्षुक्षीरा-

दिरसे कीदृशो मधुरो रस इति पृष्टे मधुरो रस ईदृश इत्याख्यातुं न शक्यते, मधुरो रसो नास्ति इत्यपि प्रत्याख्यातुं न शक्यते। ततस्तत्र पदप्रवृत्तिनिमित्तत्वाभावात् तस्य लिङ्गत्वे व्याप्यतावच्छेदकं नास्तीति। कथम् लिङ्गत्वं मधुरत्वावान्तरजातिविशेषस्य तत्र पदप्रवृत्तिनिमित्तरूपव्याप्यतावच्छेदकधर्मान्तराभावादित्यर्थः। **तस्य** इति टीका। मधुरत्वावान्तरजातेरित्यर्थः। **व्यक्तेरेवे**ति मूलम्। यत्र गोत्वं व्याप्यं भवति तत्र व्याप्यतावच्छेदकं त्वयोक्तं नास्तीति। तत्राह - गोत्वे व्याप्यतावच्छेदिका व्यक्तिरेव गोव्यक्तिरेव, गोत्वादेर्ज्ञाने व्यक्तेरेव प्रकारत्वात्। यतो गोत्वे व्यक्तिघटितो धर्मो गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं गोत्वत्वमिति गोव्यक्तिघटितमेव। यतो गोव्यक्तिर्गोत्वत्वप्रविष्टा ततो व्याप्यतावच्छेदकं धर्मत्वं गोत्वत्वस्यास्तीति भावः। ननु व्यक्तेः गोत्वमित्यत्र प्रकारकत्वाभावात् कथं व्यक्तेरेव प्रकारत्वमित्यन्यथा व्याचष्टे - **व्यक्तिघटितपक्षधर्मस्ये**ति। गवेतरावृत्तित्वे सति सकलगोमात्रवृत्तित्वमित्यस्येत्यर्थः **गवेतरावृत्तित्वे सती**ति। प्रमेयादावतिव्याप्तिवारणार्थम् एतदेवोपपादयति - **न ही**ति मूलम्। अविशेषो न किन्तु विशेषः। एकत्र गौरिति ज्ञाने गोत्वं प्रकारः, अपरत्र गोत्वमिति ज्ञाने गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं प्रकारः, इति विशेष इत्यर्थः। **उभयोरि**ति टीका। गौरिति ज्ञाने गोत्वं विशेषणत्वेन विषयः, अपरत्र गोत्वमिति ज्ञाने विशेष्यत्वेन गोत्वं विषयः, इति विशेषः। **अन्यथे**ति। यदि गौरिति गोत्वमिति च ज्ञानयोरविशेष उच्यते तदा इत्यर्थः। यदि गोत्वमित्यत्र ज्ञाने प्रकारो न भासते तदा एतद् ज्ञानं निष्प्रकारकत्वेन निर्विकल्पकं स्यात्। तथा च तादृशं ज्ञानं निष्प्रकारकं व्याप्यत्वग्रहेऽप्यनुपयुक्तं व्याप्यतावच्छेदक-प्रकारकग्रहेऽप्यनुपयुक्तं परामर्शग्रहेऽप्यनुपयुक्तम्। कथम् ? यतः परामर्शज्ञानं विशिष्टवैशिष्ट्यावगाहि ज्ञानं भवति। तत्र च विशेषणतावच्छेदकप्रकारकं ज्ञानं कारणम्। गोत्वमिति ज्ञानस्य निष्प्रकारकत्वेन तत्रानुपयुक्तत्वा-दित्यर्थः। **अस्यापी**ति टीका। गोत्वमिति ज्ञानस्यापीत्यर्थः। एवं यथा गौरिति ज्ञाने गोत्वांशे निर्विकल्पकत्वं तथा यदि गोत्वमिति ज्ञानस्यापि निर्विकल्पकत्वं स्यादिति कृत्वोभयोर्विशेषो वाच्यः। स विशेषः - एकत्र गोत्वं प्रकारः, अन्यत्र व्यक्तिः प्रकारः इति। **व्याप्यतावच्छेदके**ति टीका। व्याप्यतावच्छेदको यो धर्मो गोत्वमित्यत्र ज्ञाने यदि प्रकारो न जा(ज्ञा)तस्तदा तस्य परामर्शे उपयोगो नास्ति निष्प्रकारकस्योपयोगो न स्यादित्यर्थः। यदुक्तं गोत्वमिति ज्ञाने व्यक्तिघटितो धर्मः प्रकार इत्यत्रानुभवं प्रमाणयति - **गवेतरे**ति मूलम्। तथा च गोत्वे गोत्वत्वमेव प्रकार इत्यर्थः। **न चैवमि**ति मूलम्। यदि गोत्वमित्यत्र [57 A] गोत्वत्वं प्रकारः तदा गोत्वत्वमित्यत्र कः प्रकारः ? तत्रापि यदि गोत्वत्वा[त्व]मपि प्रकारस्तदाऽनवस्था स्यात् इत्याशङ्कार्थः। **तदितरे**ति। तथा च प्रामाणिकी अनवस्था न दोषायेति भावः।

**अत्रोच्यते। अयमालोको धूमो वा उभयथापि वह्निव्याप्य इति ज्ञानं ततोऽनुमितिः। न च धूमत्वेनालोकत्वेन वा तत्र निश्चयः। अथ तदन्यान्यत्वमेव तत्र लिङ्गम्। न च तदज्ञान-दशायामनुमितिदर्शनात् न तथेति वाच्यम्। धूमालोकान्यान्यत्वज्ञानं विना तवापि तत्र**

**व्याप्यत्वानिश्चयेन तदर्थं तद्बोधावश्यकत्वादिति चेत् । न । न हि धूमालोकान्यान्यत्वं धूमान्यान्यत्वं वा व्याप्यावच्छेदकम्, गौरवात् व्यभिचारावारकविशेषणवत्त्वाच्च, किन्तु धूमत्वादिकम्, तच्च तत्र सन्दिग्धमेव । ननु तदन्यान्यद्वह्निव्याप्यमेव व्यभिचाराभावेन व्याप्तिविरहसाधनस्य बाधितत्वात्, पुरुषस्तु तत्र नीलधूमवत्त्वादित्यत्रेवाधिकेन निगृह्यते, न तु व्याप्यत्वासिद्ध्येति चेत् । न । तदन्यान्यद्धूमालोकस्वरूपमेव तच्च व्याप्यमिति सत्यम् । न च वस्तुगत्या व्याप्यज्ञानादनुमितिः, अतिप्रसङ्गात् । किन्तु व्याप्यतावच्छेदकप्रकारकज्ञानात्, न च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकम्, इत्युक्तम् । न चैवं तदन्यान्यत्वाद् वह्निव्याप्यत्वमपि तत्र नानुमेयं व्यर्थविशेषणत्वादिति वाच्यम् । प्रत्यक्षं हि तदन्यान्यत्वविशेषदर्शनाद् व्याप्यत्वज्ञानं जनयति विशेषज्ञान-विशेषणविशेष्यसम्बन्ध-विशेषणविशेष्येन्द्रियसन्निकर्ष-तदसंसर्गाग्रहविशेषदर्शनानां सत्त्वेन वह्निव्याप्यत्वप्रत्यक्षसत्त्वात् ।**

अथ **नैयायिको** व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य कारणतां खण्डयित्वा परामर्शस्य कारणतां स्थापयति । **अत्रोच्यते** इति । आलोकोऽयं वा धूमोऽयं वा इति ज्ञानं संशयरूपं यदा जायते तदनन्तरं यद्यनुमितिस्तत्र व्याप्यतावच्छेदकप्रकारस्य निश्चयो नास्ति, इति न तत्र व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानं कारणमित्यर्थः । आशङ्कते **मीमांसकः अथेति** । धूमत्वमालोकत्वं वा लिङ्गतावच्छेदकं न भवति किन्तु धूमालोकोन्यान्यत्वम्, तस्य निर्णयो अस्त्येवेति अनुमितिर्भविष्यति । **न चेति** । सदा धूमालोकान्यान्यत्वज्ञानं नास्ति तदा(था)प्यनुमितिर्वर्तते इति कृत्वा धूमालोकान्यान्यत्वं न व्याप्यतावच्छेदकमित्याशङ्कार्थः । **तथेति** मूलम् । व्याप्यतावच्छेदकमित्यर्थः ।

**तत्रेति शेष** इति टीका । धूमालोकान्यान्यत्वज्ञानदशायामपि तत्र स्थलेऽनुमितिर्दृष्टाऽस्तीत्यर्थः । **अन्यथेति** । यदि धूमालोकान्यान्यत्वज्ञानं नास्ति तदा भवतां मते **नैयायिकमते**ऽपि व्याप्यत्वनिश्चयो न संभवति । धूमो वा आलोको वेति सन्देहस्थले धूमालोकान्यान्यत्वज्ञानं ता(द्)व्याप्यत्वेन एकं यदि तत्र स्यात् तदा व्याप्यत्वनिश्चयोऽपि न सम्भवतीत्यर्थः ।

**तदर्थमिति** मूलम् । व्याप्यत्वनिश्चयार्थम् । तद्बोधावश्यकत्वात् धूमालोकान्यान्यत्वज्ञानस्यावश्यकत्वात् । धूमालोकान्यान्यत्वज्ञानं निश्चितमित्याशङ्कार्थः । **न हीति** मूलम् । यत् त्वयोक्तं धूमालोकान्यान्यत्वं व्याप्यतावच्छेदकं तत्रेति वदति । **गौरवादिति** । धूमालोकान्यान्यत्वस्य व्याप्यतावच्छेदकत्वापेक्षया धूमत्वस्या-

लोकत्वस्य वा लघुत्वम्। अभावघटितत्वादित्यर्थः। **व्यभिचारेति** मूलम्। धूमालोकान्यान्यत्वं व्याप्यतावच्छेदकं न भवति। तत्र हेतुमाह - **व्यभिचारेति**। यथा नीलधूमादिति विशेषणं व्यर्थम्। यथा पर्वतो वह्निमान् धूमात् आलोकात् वा इत्येवास्तु। व्याप्तिग्रहस्तु धूमात् इत्यनेनैव भवतीति तदधिकं धूमालोकान्यान्यत्वमित्यर्थः। ततो धूमालोकान्यान्यत्वं व्याप्यतावच्छेदकं न भवति किन्तु धूमत्वमेव व्याप्यतावच्छेदकम्, इत्याह - **किन्त्विति**। **तच्चेति** मूलम्। यत्र आलोको धूमो वेति सन्देहाद् अनुमितिस्तत्र धूमत्वस्यालोकत्वस्य व्याप्यतावच्छेदकस्य सन्देहादनुमितिर्न स्यादित(ति) व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानम् अनुमितौ व्यभिचारात् कारणं न भवतीति सिद्धम्। **मीमांसकः** शङ्कते त्वयोक्तं तदन्यान्यत्वं व्याप्यतावच्छेदकं न भवतीति। तत्रोच्यते - **तदन्यान्यदिति**। धूमालोकान्यान्यदित्यर्थः। धूमालोका[न्या]न्यत् न वह्निव्याप्यम् इति यत् साध्यं तत् बाधितम्। यदि धूमालोकान्यान्यस्मिन् हेतौ व्यभिचारो भवति तदा बाधः स्यात्। प्रकृते च यत्र धूमालोकान्यान्यत्वं तत्र वह्निव्याप्यत्वमिति व्याप्तिरस्ति। [57 B] ततो भवदभिमतं व्याप्तिसाधनं तद्बाधितमित्याह - **व्यभिचाराभावेनेति** मूलार्थः। ननु तर्हि धूमालोकान्यान्यदित्युच्यमाने पुरुषस्य कथं निग्रह इत्यत आह - **पुरुष** इति। **स्वार्थेति** टीका। परामर्शा(परार्था)नुमाने यद्यपि अधिकं बाधकं वर्तते तथापि स्वार्थानुमाने न किञ्चिद् बाधकम्। धूमात् इत्यनेनाप्यनुमितिः, धूमालोकान्यान्यस्मात् इत्यनेनापि स्वार्थानुमितिर्भवतीत्यर्थः। **नैयायिकः** दूषयति - **तदन्यान्यदिति** मूलम्। तदन्यान्यत्वं धूमस्यालोकस्य वा स्वरूपम्। **तच्चेति** मूलम्। धूमालोकान्यान्यत् व्याप्यमिति यद् उक्तं तत् सत्यमेवेत्युक्तम्। तत् तु व्याप्यं भवत्येव। परं वस्तुगत्या यद् व्याप्यं तस्य ज्ञानात् अनुमितिरिति नास्ति, अतिप्रसङ्गादिति। यत्र प्रमेयत्वादिना व्याप्यत्वज्ञानं यत्र जातं तत्राप्यनुमितिः स्यादित्यतिप्रसङ्गः। **न चेति**। व्यर्थविशेषणत्वात् इत्येव दूषणं पूर्वोक्तं ज्ञेयम्। **न चैवमिति**। यदि धूमालोकान्यान्यत्वं व्याप्यतावच्छेदकं न भवति तदा वह्निव्याप्यत्वानुमानमपि धूमालोकान्यान्यत्वादित्यनेन [ न ] स्यात्, वर्तते चानेनानुमानम् यथा धूमालोकौ वह्निव्याप्यौ धूमालोकान्यान्यत्वात् इति। अत्रापि व्यर्थविशेषणत्वं वर्तते एवेत्याशङ्कार्थः। **धूमत्वालोकत्वेति** टीका। ननु धूमालोकान्यान्यत्वादिति हेतुं विहाय किमर्थं धूमत्वालोकत्वेत्यादिहेतुकरणमित्यत आह - **तथा च सतीति** टीका। विवक्षितहेतौ कृते व्यर्थविशेषणता न भवति। कथं न भवति धूमालोकान्यान्यत्वात् इति हेतुर्यदि क्रियते; तदा धूमात् आलोकात् वा एतावदेवास्तु, व्यर्थमधिकं पूर्वोक्तमित्यायाति। परं धूमत्वालोकत्वेत्यादिकरणे तन्न भवति। यदि धूमत्वात् आलोकत्वात् वेति क्रियते तदा तद्व्याप्यमेव न भवति। ततो धूमत्वालोकत्वान्यान्यधर्मवत्त्वेन व्यर्थविशेषणाशङ्केत्यर्थः।

**प्रत्यक्षमिति** मूलम्। तत्र सन्देहे सति अनुमितौ प्रत्यक्षम् आलोकप्रत्यक्षं वा व्याप्यत्वज्ञानं जनयति। कुतः ? धूमालोकान्यान्यरूपो यो विशेषस्तस्य दर्शनम्, तस्मात्। प्रत्यक्षसामग्रीमुपपादयति यथा घटोऽयमिति प्रत्यक्षे घटत्वरूपं यद् विशेषणं तस्य ज्ञानम्, विशेष्येन्द्रियसन्निकर्षो घटेन्द्रियसन्निकर्षः, तदसंसर्गाग्रहो घटत्व-

घटयोरसंसर्गाग्रहः असम्बन्धज्ञानाभावः, अथ च विशेषदर्शनम्। इदं संशयोत्तरप्रत्यक्षाभिप्रायेण, घटादिप्रत्यक्षस्थले विशेषदर्शनस्यानुपयोगात्। तथा प्रकृते धूमो वह्निव्याप्य इति प्रत्यक्षज्ञाने वह्न्यादिज्ञानं धूमेन्द्रियसन्निकर्षे(र्ष) च विशेषदर्शनमधि[कं] वर्तते। अतो वह्निव्याप्यत्वप्रत्यक्षं भवति, नन्व(न त्व)नुमितिः। **व्याप्यताभिमते**ति टीका। धूमादौ व्याप्यो लघुना धूमत्वेन आलोकत्वेन वा अवच्छेदकत्वं सम्भवति, गुरुणा धूमालोकान्यान्यत्व-रूपेण। **तद्ग्रहासम्भवादि**ति व्याप्तिग्रहासम्भवादित्यर्थः। **उक्तरीत्ये**ति। धूमत्वालोकत्वान्यान्यधर्मवत्त्वादिति हेतौ क्रियमाणे व्यर्थविशेषणत्वाभावात् तेनापि वह्निव्याप्यत्वानुमानं सम्भवत्येव। [58 A] तथापि प्रत्यक्ष-सामग्र्या उक्तरूपाया बलवत्त्वात् वह्निव्याप्यत्वज्ञानं धूमादौ प्रत्यक्षमेव नानुमितिरित्यर्थः।

**न चैवं न प्रत्यक्षेऽपि तदन्यान्यत्वज्ञानं सहकारीति वाच्यम्। अन्वयव्यतिरेकाभ्यां गुरोरपि तस्य विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वात् तस्मात् तदन्यान्यत्वज्ञानं तत्र व्याप्य-ताज्ञानोपक्षीणं न तु साक्षादनुमितिहेतुरिति, किञ्च वह्निव्याप्यवानयमिति शाब्दज्ञाने व्याप्यत्वज्ञानं कारणमित्यन्यत्रापि तथा।**

**न चैवमि**ति मूलम्। धूमालोकान्यान्यत्वज्ञानं प्रत्यक्षे सहकार्येव न भवति। तथा च तत्र वह्निव्याप्यत्वज्ञानं प्रत्यक्षं भवत्येव। न इति न च वाच्यमित्यन्वयः। **अन्वये**ति मूलम्। धूमालोकान्यान्यत्वज्ञाने सति संशयोत्तरप्रत्यक्षं भवति, अन्यथा न भवति, इति गुरूभूतस्यापि तदन्यान्यत्वज्ञानस्य विशेषदर्शनविधया प्रत्यक्षसहकारित्वं क्लृप्तमेवेत्यर्थः। उपसंहरति - **तस्मादि**ति। धूमालोकान्यान्यत्वज्ञानमनुमितिं प्रति साक्षात् कारणं न भवति किन्तु वह्निव्याप्यत्वा(ता)ज्ञाने अन्यथासिद्धम्। अयमर्थः - धूमालोकान्यान्यधर्मवत्त्वज्ञाने न वह्निव्याप्यताज्ञानं प्रत्यक्षरूपं व्याप्तिज्ञानं भवति, ततोऽनुमितिरिति प्रघट्टकार्थः। **न त्वि**ति। संशयोत्तरप्रत्यक्षस्य सहकारि धूमत्वालोकत्वान्यान्यधर्मवत्त्वज्ञानं जातं तेनापि प्रत्यक्षं स्यात्, वस्तुगत्या तेन प्रत्यक्षं न स्यादित्यर्थः। केन रूपेण तत्कारणमित्याह - **किन्त्वि**ति। वह्निव्याप्तिव्याप्यत्वेन। वह्निव्याप्तिव्याप्यत्वं यथा यत्र यत्र धूमत्वालोकत्वान्यान्य-धर्मवत्त्वं तत्र वह्निव्याप्तिर्यथा धूमे, एवमनेनापि कारणता वक्तुं न शक्यते इत्याह - **धूमत्वादेरि**ति। धूमत्वादिकं यत् वह्निव्याप्तिव्याप्यतावच्छेदकं तस्य निर्णयो नास्ति। अयमालोको वा धूमो वेत्यादौ तस्य निर्णयाभावात् यदवच्छेदकं वह्निव्याप्तिव्याप्यतावच्छेदकं तन्निश्चितं नास्ति। अथ धूमालोकान्यान्यत्वं यदवच्छेदकं निश्चितं तत् तु गौरवेण यथा धूम[?त्वा]त्वालोकत्वत्वादित्येव हेतुर्भवतु न तु धूमत्वालोकत्वादिति, इति गौरवेण तदनवच्छेद-कमित्याशङ्कार्थः। **व्याप्यतावच्छेदके**ति टीका। धूमत्वालोकत्वान्यान्यधर्मवत्त्वं यद्यपि व्याप्यतावच्छेदक-रूपेणोपस्थितं नास्ति तथापि तस्य व्याप्तिग्रहः पूर्वोक्तः स्वीक्रियत एव। **फलबलेने**ति टीका। तथानुभवरूपफल-दर्शनेनेत्यर्थः। व्याप्यतावच्छेदकरूपेणानुपस्थितेऽपि व्याप्तिग्रहो भवतीति यदुक्तं तदुपपादयति - **सहचार-**

**दर्शनादीति**। सहचारदर्शनादिरूपा व्याप्तिग्रहसामग्री यदा वर्तते तदा तद्व्यतिरेकेण धूमत्वालोकत्वान्यान्यधर्मवत्त्वज्ञानव्यतिरेकेण व्याप्तिग्रहव्यतिरेको दृष्टो नास्ति, कारणत्वं तु तदैव स्यात् यदि तद्व्यतिरेकेण तद्व्यतिरेकः स्यात्। **अत एवेति**। यतो वह्निव्याप्तिव्याप्यतावच्छेदकरूपेणोपस्थितं यद्धूमत्वालोकत्वज्ञानं तत्कारणं न भवति अत एव धूमालोकान्यान्यत्वेनोपस्थिते पक्षधर्मे धूमव्याप्तिग्रहः सर्वसिद्धः। अयमत्र भावार्थः। यद्यपि धूमत्वालोकत्वान्यान्यत्वज्ञानं व्याप्यतावच्छेदकप्रकारेणोपस्थितं नास्ति तथापि व्याप्तिप्रत्यक्षग्रहे तत्कारणं भवत्येव यथा वह्निव्याप्यधूमवानयमिति परामर्शो व्याप्तिप्रत्यक्षम् तत्र तत्कारणं भवतीत्यर्थः। [58 B] **एवमिति**। वह्निव्याप्तिव्याप्यपरामर्शो यथा धूमत्वं वह्निव्याप्तिव्याप्यम् अयमपि परामर्शो वर्तते इति कृत्वा यद्यपि वह्निव्याप्तिव्याप्यत्वानुमानमपि सम्भवति तथापि प्रत्यक्षसामग्रीसत्त्वे तस्या बलवत्त्वादनुमानं निरवकाशमिति भावः। आभासदानार्थमाह - **न त्विति**। स धर्मो व्यवच्छेदको भवतु मा भवतु वा परं व्याप्यत्वनियतसमानाधिकरणत्वेन प्रतीयमानो यो धर्मो धूमालोकान्यान्यत्वादिस्तेन रूपेण पक्षधर्मताज्ञानं धूमादिज्ञानमनुमितिं प्रति कारणमस्तु। तच्च प्रकृते अयमालोको वेत्यादावप्यस्तीत्याशङ्क्याह - **आभासार्थः**। **किञ्चेति** मूलम्। वह्निव्याप्यवान् इति शाब्दज्ञाने व्याप्यत्वज्ञानं कारणं दृष्टम्। व्याप्तिकारणं तत्र कारणमस्तीति, **अन्यत्रापि** परामर्शरूपं यत्र प्रत्यक्षं जायते यथा वह्निव्याप्यधूमवान् अयमिति तत्रापि व्याप्यत्वज्ञानं कारणमस्तु इत्यर्थः।

**अथ वह्निव्याप्यत्वमपि वह्निव्याप्यतावच्छेदकं तथाहि वह्निनिरूपिता धूमादिप्रत्येकवृत्तिरेव व्याप्तिर्व्याप्तित्वेन सकलधूमादिवृत्तिव्याप्त्यवच्छेदिका आश्रयभेदेनावच्छेदकभेदेन च व्याप्तिभेदादिति चेत्। न। सकलधूमादिवृत्तिव्याप्तौ मानाभावात् यत्र वह्निव्याप्यस्तत्र वह्निरिति व्याप्तिबुद्धौ शाब्दव्याप्यत्वबुद्धौ च प्रत्येकवृत्तिव्याप्त्याश्रयत्वस्यैव विषयत्वात् प्रत्येकवृत्तिव्याप्तिज्ञानं विना तद्बोधाभावात्। अपि च यत्र धूमत्वव्याप्त्योर्वैशिष्ट्यं प्रथममेव प्रत्यक्षेण युगपत् पक्षधर्मे भासते तत्र लाघवात् व्याप्यत्वज्ञानत्वमेव कारणतावच्छेदकम्। न चैवमतिरिक्तविशिष्टज्ञानकारणत्वे गौरवं दोषाय, सप्रमाणकत्वात् कारणताग्रहदशायां फलमुखगौरवस्य सिद्ध्यसिद्धिभ्यामदोषत्वात्।**

**मीमांसकः** शङ्कते - **अथेति**। यदुक्तं पूर्वं यत्राप्तवाक्याद् वह्निव्याप्यधूमवान् अयमिति अवगतं तत्र वह्निव्याप्यत्वमपि वह्निव्याप्यतावच्छेदकं भवतीति कृत्वा तद् ज्ञानं कारणम्। व्याप्यत्वं कथं व्याप्यतावच्छेदकमिति दर्शयति - **तथाहीति**। एका व्याप्तिरवच्छेद्या एकावच्छेदिका। सकलधूमादिवृत्तिर्या महाव्याप्तिः साऽवच्छेद्या।

या तु विशेषव्याप्तिः प्रत्येकधूमादिवृत्तिर्व्याप्तिस्तु - सामान्यव्याप्तिः वह्न्यभाववदवृत्तित्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणधूमत्वमिति महाव्याप्तिः - एतस्या महाव्याप्तेरवच्छेदिका। वह्न्यभाववदवृत्तित्वरूपा विशेषव्याप्तिः, सा - वह्निनिरूपिता धूमादिनिष्ठा सकलधूमादिवृत्तिः [या] सा [सामान्यव्याप्तिः, तस्याः] सामान्यव्याप्तेरवच्छेदिका भवति यथा यो वह्निव्याप्यधूमवान् सोऽवश्यं वह्निमान् इति महाव्याप्तिज्ञानसामग्री यत्र वर्तते तत्रानुमितिसाम्ग्र यपि व्याप्यतावच्छेदकप्रकारकं पक्षधर्मताज्ञानमप्यनुमितौ कारणं तत्रापि शाब्दपरामर्शस्थलेऽपि वर्तते। **आश्रयेति** मूलम्। व्याप्तेराश्रयो धूमः। व्याप्तेः सामान्यव्याप्तेः **अवच्छेदिका विशेषव्याप्तिरित्या**श्रयावच्छेदकभेदेन व्याप्तिभेदः। तथा चानुमितावपि व्याप्यतावच्छेदकप्रकारकं **पक्षधर्मज्ञानं कारणं सिद्धमित्यर्थः**। **सकलेति**। महाव्याप्तौ मानं नास्ति। ननु तर्हि यत्र वह्निव्याप्यस्तत्र वह्निरिति ज्ञाने वह्निव्याप्यवान् इत्याप्तेन यदोच्यते तत्र को वा विषय इत्यत आह - **प्रत्येकेति**। प्रत्येकवृत्तिर्या व्याप्तिः वह्न्यभाववदवृत्तित्वरूपा **सैव विषयः** यथा महानसीयवह्न्यभाववान् पर्वतस्तदवृत्तित्वं महानसीयधूमस्य **अस्तीति विशेषव्याप्तिः, अनयैव विशेषव्याप्त्योपपत्तौ** सामान्यव्याप्तेः प्रमाणाभाव इत्यर्थः। अत्र युक्तिमाह- **प्रत्येकेति। वह्न्यभाववदवृत्तिर्धूम** इति ज्ञानं विना महाव्याप्तिबोधोऽपि न सम्भवति। महाव्याप्तेरेतद्घटितत्वादित्यर्थः।

सामान्यव्याप्तौ [59 A] प्रमाणं शङ्कते टीकाकारः - **नन्विति**। यो धूमवान् सोऽग्निमान् इत्यनुभवो यथा वर्तते तथा यो वह्निव्याप्यवान् सोऽवश्यं वह्निमान् इति महाव्याप्त्यनुभवोऽप्यपह्नोतुं न शक्यते। विपक्षे बाधकमाह- **अन्यथेति**। महाव्याप्तिस्तव यद्यपि अलक्ष्या तदा पूर्वोक्तव्याप्तिलक्षणानां प्रतियोग्यसमानाधिकरणेत्यादीनाम् अत्र महाव्याप्तौ विद्यमानत्वात् अतिव्याप्तिः स्यात् अतोऽपीयं लक्ष्या व्याप्तिर्वक्तव्या। तथा च वह्निव्याप्यधूमवान् इति शाब्दपरामर्शस्थलेऽपि व्याप्यतावच्छेदकज्ञानं कारणं कल्पनीयमित्यस्वरसादाह - **अपि चेतीति**। **यत्रेति** मूलम्। धूमे धूमत्वम् अथ च व्याप्तिः अनयोः सामानाधिकरण्यं यत्र पक्षधर्मे धूमे प्रत्यक्षेण भासते तत्र व्याप्यत्वज्ञानं यथा धूमो वह्निव्याप्यः इति व्याप्ति(व्याप्यत्व)ज्ञानं कारणतावच्छेदकम्, तथा च यदा व्याप्यत्वज्ञानत्वं कारणतावच्छेदकं तदा व्याप्तिज्ञानं कारणमेवेति परामर्शसिद्धिस्तद्रूपत्वात् तस्य इत्यर्थः। तत्र हेतुमाह - **लाघवादिति** मूलम्। व्याप्यतावच्छेदकेति अत्र अवच्छेदकं प्रदर्श्याधिकस्य प्रवेशादिति भावः। **एवमिति** टीका। यदि व्याप्यतावच्छेदकप्रकारकं पक्षधर्मताज्ञानं कारणं भवति तदा महाव्याप्तेः कल्प्यते। तत्तु कारणमेव न भवति इति भावार्थः। **न चैवमिति** मूलम्। यदि ज्ञानद्वयातिरिक्तं परामर्शरूपं विशिष्टज्ञानमङ्गीक्रियते तदा गौरवम् **अतिरिक्तकल्पनैव गौरवमित्यर्थः**। **लाघवेति** टीका। कथं सप्रमाणकत्वमित्यत आह - लाघवसहकृतं यत् **प्रथमप्रवृत्तं** विशिष्टज्ञानकारणताग्राहकं प्रमाणं तन्मूलकत्वात्। तत्र विशिष्टज्ञानकारणताग्राहकं यत् प्रमाणं तत् **प्रथमं प्रवृत्तम्**। तच्च लाघवसहकृतं तत् प्रमाणम् अन्वयव्यतिरेकसहकृतं प्रत्यक्षम्, तदेव लाघवसहकृतम्। व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन वा कारणता वाच्या व्याप्यत्वप्रकारकपक्षधर्मताज्ञानत्वेन वा,

लाघवाद् व्याप्यत्व(त्वे)न त्वेव पक्षधर्मताज्ञानस्य कारणता वाच्येति स्पष्टोऽर्थः। **तदेवेति** टीका। कारणताग्राहकं प्रमाणम् अन्वयव्यतिरेकसहकृतं प्रत्यक्षं कथं गौरवात् प्रथमं प्रवर्तते इत्यर्थः। **कारणते**ति मूलम्। यदा विशिष्टज्ञानस्य कारणता ग्राह्या तदा गौरवं सिद्धं वा असिद्धं वा। सिद्धं चेत्, तदा विशिष्टज्ञानकारणताग्रहमुपजीव्य प्रवृत्तं गौरवं कथं कारणताया भञ्जकं स्यात् उपजीव्यविरोधात्। विशिष्टज्ञानं तु उपजीव्य प्रवृत्तं गौरवं कथं तन्नाशकं स्यादिति। गौरवमसिद्धं [ चेत् ], तदा विशिष्टज्ञानस्य कारणता सुतरां सिद्धैव। '**फलमुख**'पदस्य व्याख्यानमाह - **विशिष्टज्ञाने**ति टीका। अन्वयव्यतिरेकावेव विशिष्टज्ञानस्य कारणताग्राहकौ। ततो विशिष्टज्ञानस्य कारणताग्रहः फलम्। तन्मुखस्येत्यस्य व्याख्यामाह - **उपस्थितबीजम्**। तन्मुखमुपस्थापकं यस्य [उप]स्थितिजनकं यस्य गौरवस्य तत् तथा। तथा च कारणतायां गृह्यमाणायां गौरवस्योपस्थितिर्भवति, नान्यथेत्यर्थः। [59 B] फलितार्थमाह - **तथा चे**ति टीका। यदा विशिष्टज्ञानस्य प्रतिपादनम् अनुमितिकारणतायां तदा गौरवम्। ततो विशिष्टज्ञानप्रतिपादनगौरवसिद्धौ गौरवज्ञानस्य कारणताग्रहे प्रतिबन्धकता न सम्भवति तदुपजीव्य तत्प्रवृत्तेरिति टीकार्थः। तथा च विशिष्टज्ञानकारणताग्रहमुपजीव्य प्रवृत्तं गौरवं कारणताग्रहस्य परिपन्थि प्रतिबन्धकं न भवति इति निष्कर्षः।

शङ्कते - **नन्विति**। व्याप्यत्वं प्रकारो यत्र एतादृशं यज्ज्ञानं तस्य विषयो यो धर्मस्तन्मात्रगतत्वेन यत् प्रतीयते तत्प्रकारकं यत्पक्षधर्मताज्ञानं तत्त्वेन कारणता। **तच्चेति**। व्याप्यत्वेत्यादिरूपं विशिष्टज्ञानेऽपि वर्तते ज्ञानद्वयेऽपि वर्तते। प्रथमे विशिष्टज्ञाने वह्निव्याप्यवान् इत्यत्र व्याप्यत्वमेव प्रकारः, ज्ञानद्वये च धूमत्वं प्रकारः इति कृत्वैतद्ज्ञानद्वयसाधारणमेकं कारणतावच्छेदकम् उक्तरूपं भविष्यतीत्यर्थः। **तथा चेति** टीका। एतदुक्तरूपकारणतावच्छेदके प्रोच्यमाने विशिष्टज्ञानस्याथ च ज्ञानद्वयस्यापि यथास्थानं कारणताग्रहः, यत्र यज्जातं तत्र तत एवानुमितिरतो द्वयमपि कारणमित्यर्थः। अतः सर्वत्र यद् विशिष्टं ज्ञानमेकं कारणं कल्पते तन्न कल्पनीयं गौरवात्। प्रयोजनाभावेत्याशङ्कार्थः। उत्तरयति - **तदपेक्षये**ति। व्याप्यत्वप्रकारकेत्यादिपूर्वोक्तकारणतावच्छेदकापेक्षया व्याप्यत्वप्रकारकत्वस्यैव लघुत्वम्, तस्य नानापदार्थघटितत्वादित्यर्थः। शङ्कते - **नन्विति**। एवं व्याप्यत्वप्रकारकत्वमात्रेण यदि कारणता तदापि गौरवावतारः सम्भवति। यद्येवं व्याप्यत्वप्रकारकत्वेनैव कारणतोच्यते तदा अतिरिक्तविशिष्टज्ञानकल्पना स्यादिति सम्भावनात्मिका या उपस्थितिः तयाऽपि गौरवावतारः। सम्भावनारूपं गौरवं स्यादिति कृत्वा व्याप्यत्वप्रकारकत्वमात्रेण कारणता न कल्पनीया इत्याशङ्कार्थः। **एवंविधेति**। सम्भावनया उपस्थितं गौरवं प्रमाणप्रवृत्तिप्रतिकूलं न भवति। अत्र युक्तिमाह - **अत एवे**त्यर्थः। यतस्तर्कितं गौरवं [न] प्रमाणप्रवृत्तिप्रतिबन्धकमत एवेत्यर्थः। यथा निषादस्थपतिं याजयेत् इति अत्र कर्मधारयो वा षष्ठीतत्पुरुषो वा। कर्मधारये शूद्रस्यापूर्वा नवीना विद्या कल्प्या स्यात्। पूर्वं शूद्रस्याध्ययनं क्लृप्तं नास्ति, तत् कल्पते इति सिद्धान्तः।

यदि तर्कितं गौरवं प्रतिबन्धकं तदा प्रकृतेऽप्येवं स्यात्। यद्यत्र कर्मधारयः स्यात् तदा शूद्रस्य विद्याप्रयुक्तिकल्पना स्यात्। इति तर्कितगौरवप्रतिसन्धानेन शूद्रस्य विद्याप्रयुक्तिकल्पना स्यात्। क्वैवम् ? सा च शूद्रस्यापि परसिद्धन्ते **मीमांसक**सिद्धान्ते विद्या क्लृप्ताऽस्ति। ततस्तर्किते सम्भावनात्मकं गौरवं न दोषाय। अयमत्रार्थः - **मीमांसक**मते निषादस्थपत्यधिकरणे तर्कितं गौरवं न दोषाय। तथा ममापि मतेऽत्र तर्कितं गौरवं न दोषाय इत्यर्थः। **एतेनेति निरस्तमिति** अनेनान्वयः। [60 A] अन्यदपि व्याप्यत्वप्रकारकं तु अवच्छेदकं तत्तु पूर्वपक्ष(क्षं) य[द्] लघ्विति भावः। शङ्कते - **नन्विति**। सामान्येन रूपेण यावत् कारणता सम्भवति तावदन्येन रूपेण कल्पते। सामान्येनैव कल्पना यथा कर्तृजन्यतावच्छेदकं कार्यत्वं कल्प्यते न तु घटत्वादिकं सामान्यं जातिरूपं तथा प्रकृतेऽपि उभय-साधारणं यत् पूर्वोक्तम् अवच्छेदकं रूपं तेनैव कारणता अस्तु न तु व्याप्यत्वप्रकारकत्वेन विशिष्टज्ञान-मात्रकारणतावच्छेदकेन कारण[त्व]मित्याशङ्कार्थः। उत्तरयति - दृष्टान्तदार्ष्टान्तिकयोर्विरोधात्। तत्र घटत्वादीनां कर्तृजन्यतावच्छेदकत्वे कल्प्यमाने तेषामानन्त्यात् तेन तेन रूपेण कारणताकल्पनमनुचितं प्रकृते तु व्याप्यत्व-प्रकारकत्वस्यानन्त्याभावात् तदवच्छेदक[त्व]मदुष्टमेवेत्यर्थः। **यत्रेति** टीका। अत्र विशेषोऽपि धर्म एकोऽस्ति अथ च लघुभूतः, तत्र सामान्यस्य गुरुभूतस्यावच्छेदकता नास्ति। यथा आख्यातवाच्यतावच्छेदकं यत्नत्वं वा व्यापारत्वं वा। यत्र यत्नत्वमेव आख्यातवाच्यतावच्छेदकं लघुभूतमेकं चेति कृत्वा, व्यापारत्वम् उपाधिरूपं नानापदार्थघटितत्वात् वाच्यतावच्छेदकं शक्यतावच्छेदकं न भवति। यत्नत्वं तु विशेषः तस्य चेतनमात्रनिष्ठत्वात्। व्यापारस्तु चेतनाचेतनसाधारणो यथा रथो गच्छति इत्यत्रापि व्यापारोऽस्ति, न यत्नः। ननु तर्हि रथो गच्छतीत्यादौ गग(म)नानुकूलयत्नाभावात् कथमाख्यातवाच्य(ता) यत्नस्येति चेत् न, गमनानुकूलव्यापारे लक्षणावृत्तिर्न तु शक्तिः।

**न चासन्निकृष्टे धूमे तदभावः, भवन्मते अनुमितिहेतुव्याप्तिस्मरण-धूमत्वज्ञानसहितेन मनसा तदुत्पादात् यथा परमाणुर्निरवयवद्रव्यं नित्यपरिमाणवत्त्वात् आकाशादिवत् इत्यादौ प्रत्येकानुमानोपनीतातीन्द्रियसाध्य-साधनयोराकाशवृत्तितया स्मरणे व्यभिचाराज्ञाने मनसा व्याप्त्यनुभवः अनुमानयोः प्रत्येकतदुभयसहचाराविषयत्वेन व्याप्यग्राहकत्वात्। न चातीन्द्रियव्याप्यत्वमतीन्द्रियेऽनुमेयम्, तत्रापि व्याप्तिग्राहका-भावात्। न च तदुपनयसहितस्य मनसो बहिरर्थप्रमाहेतुत्वे उपनयस्य प्रमाणान्तरत्वम्, इन्द्रियादेः सन्निकर्षवदुपनयस्य नियतव्यापाराभावेन प्रमायामकरणत्वात्, सहकारिता च तदभावेऽपि भवति बहिरिन्द्रियलिङ्गसादृश्यादिव्यापारं विनापि चिन्तोपनीतपदार्थानां**

**बाधकानवतारे मनसा संसर्गानुभवस्य सकलजनसिद्धत्वात् कथमन्यथा कवि-काव्यादिकमिति।**

**न चासन्निकृष्ट** इति मूलम्। असन्निकृष्टे धूमे तदभावः परामर्शाभावः व्याप्तिप्रत्यक्षाभावात् इत्याशङ्कार्थः। **भवन्मते** इति मूलम्। **मीमांसक**मते। व्याप्तिस्मरणं यथा स धूमो वह्निव्याप्यः इति रूपम्, तत्सहकृतं यन्मनः तेनैव, धियाऽसन्निकृष्टे स्थले परामर्शोत्पादः, दृष्टान्तेनोपपादयति - **यथे**ति। अत्र निरवयवत्वानुमानेन अथ द्रव्यत्वानुमानेन नित्यपरिमाणवत्त्वानुमानेन वा उपनीते ये अतीन्द्रिये साध्यसाधने तयोराकाशवृत्तितया स्मरणं जातम्, तदनन्तरं व्याप्त्यनुभवो मनसा। तथा इन्द्रियासन्निकृष्टस्थलेऽपि व्याप्त्यनुभव इत्यर्थः। **अनुमानयोरिती**ति टीका। साध्यसाधनानुमानयोः प्रत्येके सहचारो विषयो नास्तीति व्याप्तिग्राहकता न सम्भवति। तथाहि साध्यानुमानं यथा रूपं निरवयवं गुणत्वात् घटो द्रव्यं पृथिवीत्वात् इत्यनुमानाभ्यां द्रव्यत्वनिरवयवत्वे विशकलिते सिद्धे। ततो विशिष्टं निरवयवद्रव्यत्वं परमाणौ साध्यते। साधनानुमानं यथा आकाशं नित्यपरिमाणवत् नित्यसङ्ख्यावत्त्वात्, अनेन नित्यपरिमाणवत्त्वं सिद्धम्, तेन निरवयवद्रव्यत्वं परमाणौ साध्यते। अनयोरनुमानयोः प्रत्येके साध्यसाधनयोः यः सहचारः स विषयो नास्ति। कथम् अनुमाने नु साध्यसाधने एव विषयौ ?। **स इदमि**ति टीका। सहचारविषयत्वम् अभिप्रायः सम्भवति। यदा एकस्य साध्यं द्वितीयस्यान्यतरस्य पक्षतावच्छेदकं कृतम् तत्रानुमानेनापि सहचारग्रहः सम्भवति, [60 B] यथा निरवयवः द्रव्याकाशः नित्यपरिमाणवान् भवितुमर्हति नित्यसङ्ख्यावत्त्वात् अत्र निरवयवद्रव्यत्वं पक्षतावच्छेदक[म्] साध्यं नित्यपरिमाणवत्त्वम्, अनेनानुमानेनापि साध्यसाधनयोः सहचारग्रहः सम्भवति इत्यर्थः।

**न चे**ति मूलम्। अतीन्द्रियव्याप्यत्वं साध्यम् अतीन्द्रिये हेतौ अनुमेयम् यथा नित्यपरिमाणवत्त्वं निरवयवत्वव्याप्यनित्यपरिमाणत्वात्। तथा चानुमानेन साध्यसाधनयोः व्याप्तिग्रहो भविष्यतीति न वाच्यम् इत्याशङ्कार्थः। युक्तिमाह - **तत्रापी**ति मूलम्। व्याप्यत्वानुमानेऽपि व्याप्तिग्रहः केन भविष्यति ? अनुमानान्तरेण चेत् अनवस्था, प्रत्यक्षस्यानवकाशत्वात् अतीन्द्रियत्वात् तयोरित्यर्थः। **न चैवमि**ति। तत्तदुपनयः साध्यसाधनोपनयः, स चानुमानेन पूर्वं दर्शि[तः], तेन सहितस्य तत्सहितस्य [मनसः] बहिरर्थप्रमाजनकत्वे उपनयस्य प्रमाणान्तरत्वापत्तिरिति आशङ्कार्थः। **इन्द्रियादेरि**ति मूलम्। यथा इन्द्रियादेः सन्निकर्षाख्यो नियतो व्यापारोऽस्ति तद्वत् उपनयस्य व्यापारो नियतो नास्तीति प्रमायाम(यां) करणत्वं न सम्भवति इत्यर्थः। **नियते**ति टीका। एतन्नियतकथनं यत् तत् स्वरूपमात्रकथनम्। तदेवाह - अनियतस्य व्यापारत्वाभावात्। अस्यार्थोऽयम् - यं जनयित्वैव यत् जनयति तस्य तं प्रति व्यापारता यथा चक्षुः सन्निकर्षं जनयित्वैव ज्ञानं जनयति, ज्ञाने जनयितव्ये चक्षुषो व्यापारः सन्निकर्षः, तथा चायं नियतोऽस्ति। तद्वत् उपनयस्यान्यो नियतो व्यापारो नास्ति। अनियतः चेत्, तदा

तस्य व्यापारत्वमेव [न] सम्भवति। ननु तर्हि उपनयस्य व्यापाराभावे कथं सहकारितेत्यत आह - **सहकारिता चेति**। एतदेवोपपदायति। **बहिरिति**। बहिरिन्द्रियस्य चक्षुरादेः अथ चानुमानस्य सादृश्यस्य यत्र व्यापारो नास्ति तत्रापि चिन्ता विचारः, तदुपनीता ये पदार्थाः तेषां मनसैव सम्बन्धानुभव भवति, तत्र व्यापारो नास्ति, तत्र करणं मनः सहकारिकारणं चिन्ता, तस्या व्यापारो नास्ति तथापि तस्याः सहकारित्वं मनसि अस्ति इति भावः। **अन्यथेति**। यदि व्यापारवत्त्वाभावे सहकारित्वमपि नाङ्गीक्रियते तदा कविकाव्यादिकं कथं स्यात् ? तत्र चिन्तोपनीतपदार्थानां संसर्गानुभवो जायते इति। चिन्ता सहकारिणी मनस इति सा न प्रमाणम्। तथा उपनयोऽपि न प्रमाणमिति निष्कर्षः।

**स्यादेतत् पक्षधर्मस्य व्याप्यताज्ञानं नेन्द्रियेण वह्नेरसन्निकर्षे तन्नियतसामानाधिकरण्यस्य व्याप्यत्वस्यायोग्यत्वात्। न च धूमत्वेन सकलधूमव्याप्यतावगमात् धूमविशेषे संस्कारात् स्मरणात् वा उपनीतव्याप्याभेदग्रहः प्रत्यभिज्ञाने तत्ताविशिष्टस्येवेति वाच्यम्। एवं हि धूमवत्त्वेन वह्निमत्त्वज्ञानात् धूमवद्विशेषे पर्वते संस्कारवशात् प्रत्यक्षेण व्याप्तिज्ञानापेक्षेण वह्निमदभेदग्रहो वह्निमत्त्वग्रहो वास्तु किमनुमानेन, पृथक् वह्निमत्त्वस्मरणं तत्र नास्ति किन्तु व्याप्त्यवच्छेदकतयेति चेत्। न। वह्निमान् न वा इति संशयानुरोधेन स्वतन्त्रवह्निमत्त्वस्मरणात्। न च विशिष्टज्ञाने स्वतन्त्रविशेषणज्ञानत्वेन हेतुत्वम्, गौरवात्। अथ यो यत्र विशिष्य पूर्वमवगतः स तत्र संस्कारवशात् यथार्थप्रत्यक्षे भासते यथा तत्ताप्रत्यभिज्ञाने, न च पर्वते विशिष्य पुरा वह्निरवगतः, यत्र चन्दने सौरभमुपलब्धं तत्र संस्कारवशात् चक्षुषा सुरभि चन्दनम् इति ज्ञानम् अन्यथा अनुमितिरिति चेत्, तर्हि पक्षधर्मधूमेऽपि न पुरा विशिष्य व्याप्तिरवगतेति कथं संस्कारवशात् तद्गतव्याप्तिबोधः प्रत्यक्षेण। न च सहचारदर्शनजन्यसंस्कारसहितेनेन्द्रियेण व्यभिचारज्ञानाभावे सति महानसीयधूमवत् पर्वतीयधूमे व्याप्त्यवगमो वह्नेस्तु न प्रत्यक्षसामग्री सन्निकर्षाभावात् इति वाच्यम्, हेतुसाध्यसाक्षात्कारं विना प्रत्यक्षेण व्याप्त्यग्रहात्।**

**मीमांसकः** शङ्कते - **पक्षधर्मस्येति**। धूमस्य व्याप्यताज्ञानं यथा धूमो वह्निव्याप्य इतिरूपं नेन्द्रियेण ग्रहीतुं शक्यते, वह्नेरसन्निकर्षात् - यतो व्याप्यत्वं व्याप्तिः, तन्निरूपको वह्निः, तस्य सन्निकर्षो नास्ति -, इति तन्नियतसामानाधिकरण्यम् अपि अप्रत्यक्षम् इत्यर्थः। **न चेति** मूलम्। धूमत्वेन सकलधूमानां व्याप्यताऽवगता,

तदनन्तरं धूमविशेषे पर्वतधूमादौ संस्कारेण मतभेदेन [61 A] **स्मरणेन** वा उपनीतं यद्व्याप्यधूमादिकं तदभेदग्रहः सम्भवतीति। यथा प्रत्यभिज्ञाने तत्ताविशिष्टस्याभेदग्रहः संस्कारेण मतभेदेन स्मरणेन वा भवति तथा प्रकृते धूमो वह्निव्याप्य इति धूमत्वेन सकलधूमे व्याप्यता गृहीता सैव धूमविशेषे वह्निनिरूपिता संस्कारेण स्मर्यते इत्याशङ्कार्थः। **एवं हीति** मूलम्। यदि पूर्वोक्तकल्पनया व्याप्याभेदग्रहस्तदा सामान्यतो धूमवत्त्वेन वह्निमत्त्वे ज्ञाते धूमवद्विशेषे पर्वतादौ संस्कारवशात् व्याप्तिज्ञानापेक्षं यत्प्रत्यक्षं तेनाभेदग्रहो वह्निमदभेदग्रहः पर्वतस्य अथवा वह्निमत्त्वं वा गृह्यते, इत्येवास्तु किमनुमानप्रयोजनमित्यर्थः। **मतभेदेनेति** टीका। केषाञ्चिन्मते तत्र स्मृतिः प्रत्यभिज्ञानं प्रति कारणम्, केषाञ्चिन्मते तत्र संस्कारः कारणम्, इति संस्कारात् वा स्मरणात् वा इति मतभेदेनेति मूलकारेणोक्तम्। मध्ये शङ्क्य(क)ते - **पृथगिति** मूलम्। स्वातन्त्र्येण वह्निमत्त्वस्मरणं तत्र नास्ति किन्तु व्याप्यतावच्छेदकत्वेन वह्नेः स्मरणं यथा धूमो वह्निव्याप्यः तदवच्छेदको वह्निर्यतो धूमत्वावच्छेदेन वह्निमत्त्वं ज्ञातम्, परः(रं) किमवच्छेदेन धूमवत्त्वं गृह्णाति? वह्निमत्त्वावच्छेदेनेति वह्निरवच्छेदकः। मध्ये शङ्कते - **न चेति**। विशिष्टज्ञाने स्वतन्त्रविशेषणज्ञानत्वेन वह्निमत्त्वस्मरणस्य कारणता, मम मते तत्कारणं स्वतन्त्रवह्निमत्त्वस्मरणं प्रकृते नास्ति। यतो धूमवत्त्वावच्छेदेन वह्निमत्त्वज्ञानात् वह्निमत्त्वस्मरणं व्याप्यतावच्छेदकतयोपस्थितं परं स्वातन्त्र्येणोपस्थितं नास्तीति कृत्वा कथं वह्निमदभेद इति। न च वाच्यमित्यनेनान्वयः। **गौरवादिति**। लाघवात् विशिष्टज्ञाने स्वतन्त्रविशेषणज्ञानस्य विशेषणज्ञानत्वेन कारणता, न तु स्वतन्त्रविशेषणज्ञानत्वेन गौरवात्। **उपलक्षणमिति** टीका। प्रामाण्यसंशयानन्तरम् अर्थसंशयो जायते, यथा पूर्वम् इदं ज्ञानं प्रमा न वा इति ततः प्रामाण्यसन्देहात् घटसन्देहो जायते अयं घटो न वा इति। तत्र व्यभिचारः, तत्र घटत्वतदभावकोट्योः स्वातन्त्र्येण स्मरणं नास्ति किन्तु प्रामाण्यावच्छेदकतयैवेति कृत्वा व्यभिचारादपि स्वतन्त्रविशेषणज्ञानं विशिष्टज्ञाने कारणं भवतीति टीकार्थः। **तत्तेति**। यथा तत्ता पूर्वं घटे स इति तत्ताऽवगता तदनन्तरं यथार्थप्रत्यक्षे प्रत्यभिज्ञानरूपे तत्ता भासते तथा पर्वते विशेषाकारेण पूर्वं वह्निर्ज्ञातो नास्ति येन वह्निमत्त्वग्रहे कथं वह्निर्भासते। **अत एवेति**। यस्मिन् चन्दनखण्डे पूर्वं घ्राणेन सौरभं ज्ञातमस्ति तत्र संस्कारवशात् सुरभि चन्दनमिति ज्ञानं चक्षुषा जायते, चन्दनखण्डान्तरे त्वनुमानात् इदं चन्दनखण्डं सुरभि चन्दनत्वात् खण्डान्तरवत्। तथा च पर्वते वह्निमत्त्वग्रहो न सम्भवति पूर्वं तत्रैव विशिष्य व्याप्तेर्ग्रहो नास्ति इत्याशङ्कार्थः। **तर्हीति** मूलम्। पर्वतवृत्तिधूमेऽपि व्याप्तिर्विशेषाकारेणावगता नास्ति यथा पर्वतवृत्तिर्धूमो वह्निव्याप्य इति पुरा विशिष्य व्याप्तिः प्रत्यक्षेण गृहीता न, अतः संस्कारेण तदीयेन कृत्वा व्याप्तिबोधः प्रत्यक्षः कथं भवति?, पुरा विशिष्य व्याप्तेरग्रहात् इत्यर्थः। मध्ये शङ्कते - **न चेति**। पूर्वं धूमवह्न्योः सहचारो महानसे गृहीतोऽभूत्, ततः सहचारज्ञानेन संस्कारो जनितः, [61 B] तेन सहकृतं यत् इन्द्रियं चक्षुः तेन व्यभिचारज्ञानाभावे सति यथा महानसीयधूमे व्याप्त्यवगमः प्रत्यक्षेण भवति तथा पर्वतीयधूमेऽपि व्याप्तिग्रहः संस्कारसहकृतचक्षुषैव भविष्यति यतो व्यभिचारज्ञानासहकृतं यत् सहचारदर्शनं तदेव व्याप्तिग्राहकमिति कृत्वा

व्यभिचारज्ञानाभावे सति इत्युक्तं मूले। परं वह्नेः प्रत्यक्षज्ञानं न भवति, तेन समं लौकि[क]वह्निविषयप्रत्यक्षसामग्री नास्तीति **मीमांसक**शङ्कार्थः । **न च विशिष्येति** अत्र 'विशिष्य'पदकृत्यमाह टीकाकारः - सामान्यलक्षणया प्रत्यासत्त्या वह्नित्वेन वह्निज्ञानं वर्तते, परं विशिष्य पर्वतीयवह्नित्वेन वह्निज्ञानं नास्तीति टीकार्थः । हेत्विति मूलम् । प्रत्यक्षेण व्याप्तिग्रहस्तदा भवति यदि हेतुसाध्ययोः साक्षात्कारो भवति। तथा च प्रत्यक्षेण व्याप्तिग्रहो न सम्भवतीत्यर्थः ।

**न च पर्वते वह्निसाक्षात्कारः, न च पक्षधर्मस्य साध्यसामानाधिकरण्यविशेषो व्याप्तिः पक्षे साध्यग्रहं विना, इत्युक्तम् । उच्यते । विशेषणज्ञानं तस्य विशेष्ये सम्बन्धस्तयोरसंसर्गाग्रहो विशेषदर्शनं विशेषण-विशेष्येन्द्रियसन्निकर्षो गौरयमित्यादि-यथार्थविशिष्टप्रत्यक्षकारणम्, अस्ति चात्रापि व्याप्तिस्मरणं स्मृतव्याप्तेः पक्षवृत्तिधूमे सत्त्वम् एकैव हि सा व्याप्तिः तयोरसंसर्गाग्रहो धूमत्वविशेषदर्शनं व्याप्तिविशिष्टधूमेन्द्रिय-सन्निकर्षश्च व्याप्तिविशिष्टज्ञानकारणम् । न च वह्निविशिष्टज्ञानसामग्री, वह्नेरसन्नि-कर्षात् । कश्चित् तु धूमत्वे परम्परासम्बन्धेन वह्निव्याप्यत्वं पूर्वगृहीतं तथा च संस्कारोपनीतं वह्निव्याप्यत्वं परम्परासम्बन्धेन पक्षवृत्तिधूमत्वे प्रत्यभिज्ञायते तद्वृत्तित्वेन पूर्वमनुभवात्, एवं च धूमत्वव्याप्यत्वपरामर्शादेवानुमितिरिति प्राह ।**

**न चेति** मूलम् । पक्षधर्मस्य धूमस्य साध्येन सहाव्यभिचरितसामानाधिकरण्यं हेतोर्व्याप्तिः, सा च पक्षे साध्यग्रहंव्यतिरेकेण ग्रहीतुं न शक्यते, साध्यस्य व्याप्तिनिरूपकत्वात् इत्यर्थः । स्यादित आरभ्य एतावत्पर्यन्तं **मीमांसक**पूर्वपक्षः । **उच्यत** इति **नैयायिकेने**ति शेषः । प्रथमतो विशिष्टज्ञानसामग्रीं सामान्यत उपपादयति । **विशेषणे**ति । विशेषणज्ञानं कारणं तस्येति गोत्वस्य विशेष्ये सम्बन्धः समवायः, तयोर्गोगोत्वयोरसंसर्ग-ग्रहाभावोऽसंसर्गाग्रहः, प्रतिबन्धो यथा गोत्वं गवि नास्ति इति ज्ञानं भ्रमरूपं तदभावोऽसंसर्गाग्रहो विशिष्टप्रत्यक्षे कारणम्, एतत् त्रयं प्रत्यक्षसामान्ये कारणम्। संशयोत्तरविशिष्टप्रत्यक्षे तु विशेषदर्शनमपि कारणमित्यभिप्रायेणाह - **विशेषदर्शनमि**ति । विशेषणं गोत्वम्, विशेष्या गौः, ताभ्यामिन्द्रियसन्निकर्षः, सोऽपि विशिष्टप्रत्यक्षे इदंघा(वा)ची(चि)तामताभिप्रायेण, वस्तुगत्या विशेषणज्ञानमेव कारणं विशिष्य सन्निकर्षेण तस्यान्य-थासिद्धत्वादिति ज्ञेयम् । **यथार्थे**ति मूलम् । भ्रमे विशेषणविशेष्यसम्बन्धाभावात् । यत्र शुक्तौ रजतत्वारोपस्तत्र शुक्तौ रजतत्वस्य सम्बन्धाभावात् यथार्थविशिष्टेति पदम् । **अस्ति चे**ति मूलम् । अत्रापि धूमवह्निस्थलेऽपि व्याप्तिस्मरणं वर्तते । विशेषणं व्याप्तिः, विशेष्यो धूमः, तयोः सम्बन्धमपि वर्तते, पर्वतवृत्तिधूमे स्मृतव्याप्तेः

सत्त्वात्। **एकैवेति**। या पूर्वं महानसे प्रत्यक्षेण गृहीता सा पर्वतवृत्तिधूमे स्मर्यते। तथा च व्याप्तिधूमयोरसंसर्गाग्रहो वर्तते। अथ च धूमत्वरूपविशेषदर्शनं वर्तते। अथ च व्याप्तिविशिष्टो यो धूमस्तेन सममिन्द्रियसन्निकर्षोऽपि वर्तते। ततो व्याप्तिः प्रत्यक्षेणैव गृह्यत इत्यर्थः। वह्नेः पुनर्विशिष्टसामग्री नास्ति, लौकिकसन्निकर्षस्य तेन सहाभावात्। ततो वह्निप्रत्यक्षज्ञानं न स्यात्। धूमत्वे यत्परम्परासम्बन्धेन धूमघटितसम्बन्धेन वह्निव्याप्यत्वं गृहीतमभूत् तत्संस्कारोपनीते पर्वतवृत्तिधूमत्वे तस्य वह्निव्याप्तिव्याप्यत्वस्य प्रत्यभिज्ञानं जायते, तदेतत् पर्वतवृत्तिधूमत्वं वह्निव्याप्तिव्याप्यमिति परामर्शात् प्रत्यभिज्ञानरूपात् धूमत्वव्याप्यत्वपरामर्शात् अनुमितिरिति केचित् प्राञ्चः। [62 A]

**अन्ये त्विति** टीका। धूमत्वावच्छेदेन उपनी(ने)या व्याप्तिः यथा महानसे ज्ञाता साऽत्र पर्वते भासते इत्युपनेया व्याप्तिः, ततो धूमत्वस्य दर्शनं विशिष्टप्रत्यक्षे कारणमित्यभिप्रायेण विशेषदर्शनमित्युक्तं मूलकारेण, परं संशयाद्युत्तरप्रत्यक्षाभिप्राये[णे]ति न व्याचक्षते। तथा च विशेषदर्शनं धूमत्वदर्शनम्, तदपि कारणमित्यर्थः **व्याप्तिविशिष्टेति** टीका। व्याप्तिविशिष्टो धूमः। तेन समम् इन्द्रियार्थसन्निकर्षः कारणम्, न तु व्याप्त्या समम् इन्द्रियार्थसन्निकर्षाभावात्। कथं तद्विशिष्टप्रत्यक्षमित्यन्यथा व्याचष्टे - **व्याप्त्यापीति**। व्याप्ते(प्तेः) नना(नाना)-पदार्थः(र्थ)घटितत्वात् अतीन्द्रियत्वेऽपि ज्ञानलक्षणा प्रत्यासत्तिः ज्ञानमेव व्याप्ते(प्तेः) प्रत्यासत्तिरस्ति इत्यर्थः। **वह्नेरिति** टीका। ननु अलौकिको ज्ञानलक्षणसन्निकर्षो भवतीत्यत आह - **संयोगेति**। शङ्कते - **नन्विति**। त्वयोक्तं व्याप्त्या सहेन्द्रियस्य ज्ञानमेव प्रत्यासत्तिरित्युक्तम्, तत्राशङ्कते लौकिकसन्निकर्षो व्याप्तौ भविष्यतीत्यादि इति। शङ्कते - **न चेति**। सामानाधिकरण्यं समानेनाधिकरणेन सम्बन्धः, स च संयोगादिः यथा चक्षुःसंयुक्तो धूमः, तत्र संयोगस्य समवेतत्वात्, इति कृत्वा व्याप्त्या समं संयुक्तसमवायो लौकिकः सन्निकर्षो भविष्यति इत्याशङ्कार्थः। **न हीति**। संयोगादिकं व्याप्तिर्न भवति। आदिशब्दात् समवायः, यथा अयं गौर्गोत्वात् इत्यत्र समवायः, गोगोत्वयोः समवायसम्बन्धात्। कुतः संयोगादिकं न व्याप्तिः ?, इत्यत आह - **किन्त्विति**। साध्यादयो ये नानापदार्थाः तद्विशिष्टा कथं व्याप्तिः ? यथा व्याप्तिलक्षणे अत्यन्ताभावसाधनसाध्यावच्छेदकप्रतियो[गि]नाना-पदार्थाः प्रविष्टाः सन्ति। तत्र नानापदार्था विशेषणानि सन्ति। **विशिष्टेति**। नानापदार्थविशिष्टेन संयोगेन संयुक्तसमवायो न सम्भवति। अयमर्थः - यदि केवलवह्निसंयोगो व्याप्तिर्भवति तदा तस्य धूमसमवेतत्वेन चक्षुषा संयुक्तसमवायः सम्भवति, परमनेकपदार्थविशिष्टसंयोगोऽतीन्द्रियः तेन समं संयुक्तसमवायो ग्रहीतुं न शक्यते, इति कृत्वा व्याप्तिग्रहे ज्ञानमेव प्रत्यासत्तिः। **न चेति** टीका। साध्यादीनि विशेषणानि प्रत्यक्षाणि न सन्ति इति नानापदार्थविशिष्टव्याप्तिः संयोगात्मिका न सम्भवति इत्यर्थः। **व्याप्ताविति** टीका। लौकिको वा सन्निकर्षोऽलौकिको वा व्याप्तावस्तु, परं वह्नौ ज्ञानमेव प्रत्यासत्तिरस्तु इति सिद्धान्तः। मध्ये शङ्कते - **न चेति**। पर्वते पूर्वं वह्नेर्ज्ञानं नास्ति, ततः तदुपनीतभानं वह्न्युपनीतभानं तत्र कथं स्यात् इत्याशङ्कार्थः। **सामान्येति**।

धूमत्वावच्छेदेन वह्निमत्त्वं ज्ञातं सामान्यलक्षणया यथा यो धूमवान् सोऽग्निमान् इति, तदनन्तरं पर्वते वह्निः भासते। ननु पूर्वं विशिष्य ज्ञानं नास्तीति कृत्वा कथं पर्वते तद् भासते इत्यत आह - **विशिष्येति** टीका। तथा च विशिष्य ज्ञानमप्रयोजकम्, ज्ञानमात्रं कारणम्। **अन्यथेति** टीका। यदि वह्निमात्रं व्याप्तिप्रत्यक्षे प्रयोजकं तदा पर्वतीयधूमेऽपि व्याप्तिप्रत्यक्षं न स्यात् इत्यर्थः। [62 B] आशङ्काकार एव स्वाभिप्रायं विशदयति - **वस्तुत** इति टीका। यदवच्छेदेन यो धर्मो वह्निमत्त्वधर्मो ज्ञातः तदवच्छेदेन धूमवत्त्वावच्छेदेन वह्निमत्त्वज्ञानम्, वह्निमत्त्वोपनयसामग्री इयम्, तथा च धूमत्वेन ज्ञातो यः पर्वतस्तत्र वह्निमत्त्वोपनयो भविष्यत्येव। वह्निप्रत्यक्षज्ञानं ज्ञानरूपप्रत्यासत्त्या भविष्यतीत्याशङ्कार्थः। **ज्ञानेति** टीका। अतस्त्वया ज्ञानलक्षणया प्रत्यासत्त्या वह्निप्रत्यक्षमापद्यते, तदुपनयः स्यात् इत्यापादनं यथा कृतं तदलौकिकमेव वह्निप्रत्यक्षं भविष्यति। **न चेति** टीका। तत्सामग्री अलौकिकसामग्री सा प्रमाणान्तरप्रवृत्तेः प्रतिबन्धिका न भवति। तत्र युक्तिमाह - **समान** इति। अलौकिकप्रत्यक्षसामग्र्याः समाने विषये अनुमित्यादिसामग्र्यपेक्षया दुर्बलत्वात्। **अन्यथेति** टीका। सर्वत्र कस्यचिदलौकिकप्रत्यासत्तेः सत्त्वात् अलौकिकमेव प्रत्यक्षं स्यात् न तु अनुमित्यादिरिति दुर्बलत्वात् तस्याः इत्यर्थः। यस्यैवालौकिकप्रत्यक्षं तस्यैवानुमितिरिति समानविषयत्वम्। **वह्नेरिति**। प्रमाणान्तरसामग्र्या बलवत्त्वमेवोपपादयति। **शब्देति** टीका। यद्यलौकिकप्रत्यक्षसामग्र्यपेक्षया प्रमाणान्तरसामग्र्या बलवत्त्वं नास्ति तदा शाब्दज्ञानस्थले कविकाव्यमूलीभूतमानसवत् मनसैव संसर्गप्रत्यक्षं भविष्यति, शब्दप्रमाणमप्रयोजकं स्यात् इत्यर्थः। **बलेति** टीका। अलौकिकप्रत्यक्षसामग्र्यपेक्षया प्रमाणान्तरसामग्र्या अनुमानादिप्रमाणसामग्र्याः फलबलेन बलवत्त्वं सिद्धमित्यर्थः। शङ्कते - **यद्यपीति** टीका। करादिभ्रमात् संशयोत्तरपुरुषप्रत्यक्षभ्रमो जायते यथा पुरुष एवायमिति, [स भ्रमो] न स्यात्। तत्र हेतुमाह - **तस्येति**। भ्रमस्येत्यर्थः। यथेदं रजतमिति ज्ञानमिदमंशे लौकिकम् रजतांशेऽथालौकिकम्, लौकिकसन्निकर्षाभावात् अलौकिकसन्निकर्षः, रजतस्मरणमितिवत् प्रकृतेऽपि प्रत्यक्षभ्रमः कथं भवेत्?; अलौकिकप्रत्यक्षसामग्र्या दुर्बलत्वात्। ततोऽलौकिकसामग्र्यपि बलवतीति वाच्ये धूमभ्रमात् वह्निप्रत्यक्षम् अलौकिकप्रत्यासत्त्या भविष्यति, न तु भ्रमरूपा अनुमितिः इत्याशङ्कार्थः। समाधत्ते - **तथापीति**। फलबलात् अनुमितित्वम्, अप्रत्यक्षभ्रमरूपफलबलात्। तत्र अदोषस्यैव बलवत्त्वम् न तु अलौकिकप्रत्यक्षसामग्र्या ज्ञानादिरूपायाः, ततः एकत्र भ्रमानुमितिः अपरत्र भ्रमपुरुषप्रत्यक्षम् तत्रापि पुरुषस्य लौकिकप्रत्यक्षत्वम्। **तस्मादिति** टीका। वह्नेः प्रत्यक्षानुमित्योर्विषयत्वे तुल्ये लौकिकप्रत्यक्षसामग्र्या इन्द्रियसन्निकर्षरूपाया बलवत्त्वात् वह्नेः ज्ञानं प्रत्यक्षमेव परं नानुमितिः स्यात् इति **मीमांसका**भिमतम्। **न लौकिकेति** टीका। लौकिकं यत् वह्निविषयं प्रत्यक्षं तत्सामग्री नास्ति। तत्र हेतुमाह - **वह्नेरिति**। लौकिकप्रत्यक्षोपायं शङ्कते - **नन्विति**। यदुक्तं त्वया लौकिकं प्रत्यक्षं वह्निविषयकं न भवति तत्रोच्यते - विशेषणसन्निकर्षस्य कारणतायां प्रमाणं नास्ति, किन्तु [63 A] विशिष्टज्ञाने विशेषणज्ञानमपेक्ष्यते तत् तु वर्तते एव यथा वह्निरूपविशेषणज्ञानं वर्तते, विशेष्यः पर्वतस्तेन

सहेन्द्रियसन्निकर्षोऽपि वर्तते, इति कृत्वा लौकिकप्रत्यक्षसामग्री वर्तते एव, इति लौकिकप्रत्यक्षमेव वह्निविषयकं भवतु न तु अलौकिकप्रत्यक्षम्, इत्याशङ्कार्थः। **तदितरे**ति। तत्पदेन विशेषणसन्निकर्षः। तदितरसकलानुमिति-सामग्रीसत्त्वे पर्वते या अनुमितिर्जायते तत्काले वह्निविशिष्टप्रत्यक्षसामग्रीसत्त्वे अनुमितिसामग्री बलवतीति वक्तुं न शक्यते, प्रत्यक्षसामग्र्या अपि विद्यमानत्वात्। **न चे**ति। इष्टापत्तिः। तत्र प्रत्यक्षमेव भवतु इति न च वाच्यम्, वह्निमनुमिनोमि इत्यनुव्यवसायस्य बाधकत्वात्। समाधानान्तरमुपन्यस्य दूषयति - **यत् तु** इति। विशेष्यः विषय-विशेषो भवति इति कृत्वा तत्सन्निकर्षापेक्षया विशेष्यसन्निकर्षापेक्षया लाघवात् विषयसन्निकर्षत्वेनैव कारणता। तथा च विशिष्टज्ञाने विशेषणसन्निकर्षस्यापि कारणता भवतु, उभयविषयकज्ञानत्वात् विशिष्टज्ञानस्य। ततो वह्ने-रसन्निकर्षात् वह्निविषयकं ज्ञानं न भवति इति क(के)चित् तन्नेति दूषयति - **एवं ही**ति। यदि विशिष्टप्रत्यक्षे विषय-सन्निकर्षत्वेन कारणता तदा पर्वते वह्निप्रत्यक्षं भवेदेव, हेतुमाह - **पर्वतरूपे**ति। दूषणान्तरमाह - **विशेषणे**ति। ननु विशेष्यसन्निकर्षस्य कारणता न वाच्यैवेत्यत आह - **विशेषणे**ति। कुत्रापि विशेषणसन्निकर्षे सति विशेष्येण सह यदा सन्निकर्षो नास्ति तदापि विशिष्टप्रत्यक्षं स्यात्। न चैवं ततो विशेष्यसन्निकर्षोऽपि कारणं वाच्य इत्यर्थः। न त्वेवं वक्तव्यं यावद्विषयसन्निकर्षत्वेन कारणता वाच्या। तथा च यत्र विशेष्येण सह सन्निकर्षो नास्ति तत्र यावद्विषयसन्निकर्षाभावात् कारणतावच्छेदकावच्छिन्नता [ना]स्तीति कृत्वा विशेष्यासन्निकर्षस्थले प्रत्यक्षं न भवतीत्यर्थः। **एतदि**ति। यावद्विषयसन्निकर्षापेक्षया विशेष्यसन्निकर्षस्यैव लाघवेन हेतुत्वं वाच्यमित्यर्थः। **संसर्गस्ये**ति। पूर्वमुक्तं विशेष्यसन्निकर्षस्यैव लाघवात् कारणत्वम्। अथ वदति यदि यावद्विषयसन्निकर्षत्वेन कारणता तदा भ्रमस्थले व्यभिचारः। तथाहि - संसर्गस्य विशेषणविशेष्ययोः सम्बन्धस्य पूर्वज्ञातस्य भासमानत्वात्, कथम्?, यथा इदं रजतम् इति भ्रमे रजतं रजतत्वं तत्सम्बन्धोऽपि भासते इदं रजतमिति प्रत्ययात्, तथा च संसर्गेण सह सन्निकर्षाभावात् व्यभिचारः। ततो यावद्विषयसन्निकर्षेण कारणता न वाच्या इति भावः। यावद्विषयसन्निकर्षस्य विशिष्टज्ञानकारणत्वे दूषणान्तरमाह - **किञ्चे**ति। विशेषणसन्निकर्षे विशेष(ष्य)सन्निकर्षे च एकं कारणता-वच्छेदकं नास्ति। कुतः?, इत्यत आह - **अलौकिके**ति। विशेषणसन्निकर्षः - लौकिकसन्निकर्षः कारणम् क्वचित् अलौकिकोऽपि कारणम्। **भ्रमे**ति। यतो भ्रमे रजतत्वेन सह लौकिकः सन्निकर्षो नास्ति तत्र रजतत्वेन एवंसन्निकर्षः (=अलौकिकः सन्निकर्षः)। विशेष्यसन्निकर्षो लौकिक एव संयोगादिः चक्षुःसहकारी। **अन्यथे**ति। यद्येवं नोच्यते तदा दण्डस्मरणे सति पुरुष[स्या]पि स्मृतिः वर्तेत। दण्डीति चाक्षुषबुद्धिः कुतो न भवेदिति [63 B] पुरुषेण सह ज्ञानलक्षणसन्निकर्षस्य विद्यमानत्वात्। ततो लौकिक एव सन्निकर्षः विशिष्ट-लौकिकप्रत्यक्षं प्रति कारणम् इति सिद्धम्। **असंसर्गाग्रहदशायामि**ति। यदा दण्डपुरुषयोः संसर्गाग्रहो नास्ति यथा नायं दण्डी इतिरूपः तदा दण्डस्मरणं वर्ततेऽथ च पुरुषेण सह सन्निकर्षो वर्तते दण्डो व्यवहितः तत्र दण्डीति [चाक्षुष]बुद्धिर्न भवतीति सर्वजनसिद्धम् इति कृत्वा विशेषणसन्निकर्षस्यापि लौकिकस्यैव कारण-

त्वमन्वयव्यतिरेकाभ्यामेव हेतुत्वं विशिष्टप्रत्यक्षं प्रति । तथा च लौकिकविशिष्टप्रत्यक्षे लौकिकविशेषण-सन्निकर्षोऽपि(र्षः एव) कारणमिति वह्नेः प्रत्यक्षं न भवति वह्नेरसन्निकर्षादित्याहुः ।

**भवतु तावदेवं तथापि जातिरेव लिङ्गं स्यात् न तु व्यक्तिः, तथा च सर्वोपसंहारेण व्यक्तौ व्याप्तिग्रहार्थं सामान्यलक्षणप्रत्यासत्त्युपादानमफलं स्यात्, दृश्यते च परम्परा-सम्बन्धज्ञानं विना जातिव्याप्तिमविदुषोऽपि धूमात् वह्न्यनुमानम्, न हि व्याप्यता-वच्छेदकतया भासमानस्यावश्यं व्याप्यताग्रहः, मानाभावात्। तस्मात् पक्षधर्मे व्याप्ति-विशिष्टज्ञानं तदनन्तरं विशिष्टवैशिष्ट्यज्ञानं पक्षे वा तृतीयलिङ्गपरामर्शः । अन्ये तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्यापकत्वम्, तत्सामानाधिकरण्यं च व्याप्यत्वम्, तथा च लाघवात् व्यापकताज्ञानमनुमितिहेतुः, साध्यस्य पक्षधर्मव्यापक-ताज्ञानं च परामर्शः, न तु साध्यव्याप्तस्य पक्षधर्मताज्ञानं साध्यव्याप्यवत्पक्षज्ञानं वा गौरवात्। अत एव यो यो धूमवान् सोऽग्निमान् इत्युदाहरणवाक्ये साध्यायोगव्यवच्छेदेन धूमव्यापकता वह्नेरुपदर्श्यते, अन्यथा वह्निमानेव धूमवान् इति अन्ययोगव्यवच्छेदेनो-दाहरणशरीरं स्यात्, दोषोऽपि व्यभिचारादिर्न पक्षधर्मव्यापकं साध्यमित्येवोद्भाव्यः ।**

**तथापीति** मूलम्। पूर्वमुक्तं धूमत्वव्याप्यत्वपरामर्शादेवानुमितिरित्युक्तम्। तथा च धूमत्वं वह्निव्याप्तिव्याप्यं धूमवांश्चायमिति ज्ञानद्वयं तदेव परामर्श इति मतं दूषयितुमाह - **जातिरेवेति**। पर्वतो वह्निमान् धूमत्वात् इत्येव हेतुः स्यात्, तथा च व्यक्तौ व्याप्तिग्रहार्थं पूर्वं सामान्यलक्षणा व्युत्पादिता साऽपि व्यर्था स्यात्, तथाहि धूमत्व-सामान्यलक्षणया पूर्वं सकलधूमज्ञानमप्रयोजकं स्यात् । **दृश्यते चेति** । यस्य परम्परासम्बन्धज्ञानं नास्ति जातिनिरूपितव्याप्तिज्ञानमपि नास्ति तस्यापि धूमात् वह्न्यनुमानं भवत्येव। तथाहि धूमत्वं धूमे वर्तते स धूमो वह्निव्याप्य इति परम्परासम्बन्धज्ञानं विना वह्न्यनुमानं जायते। तत्र व्यभिचारः। जातिनिरूपितं व्याप्तिज्ञानं यथा **धूमत्वं** वह्निव्याप्यम् इतिरूपम्, एतज्ज्ञानं विनाऽप्यनुमितिसम्भवात् एतत् ज्ञानमनुमितिकारणं न भवति **अन्वयव्यतिरेकव्यभिचारात्**। ततो धूमत्वात् इति हेतुर्न कर्तव्यः, धूमात् इत्येव वाच्यम्। **नैयायिकः** स्वमत-मुपसंहरति - **तस्मादिति** । पक्षधर्मस्य व्याप्तिविशिष्टत्वज्ञानं धूमो वह्निव्याप्य इति प्रथमं ज्ञानम् । तदनन्तरं पर्वतवृत्तिधूमे वह्निव्याप्तिः इति द्वितीयम्। व्याप्ति(प्तिः) विशेषणं धूमस्य, तस्या वैशिष्ट्यं पर्वते भासते इति विशिष्टवैशिष्ट्यरूपं दितीयं पर्वते एव। तदनन्तरं वह्न्यनुमितिः इति मूलफक्किकार्थः। **पक्षवृत्तिरिति** टीका। महानसे भवति। तदनन्तरं वह्निव्याप्यधूमवान् इति विशिष्टवैशिष्ट्यज्ञानं पर्वते तृतीयं परामर्शो वर्तते, अनन्तरम-

नुमितिरिति परामर्शार्थः कारणं तत्र। अथ व्यापकतापरामर्शस्य कारणतां व्यवस्थापयन् वादी प्रत्यवतिष्ठते । **अन्ये** त्विति मूलम् । **स्वेति** । स्वं साधनम्, तर(त्)समानाधिकरणोऽत्यन्ताभावो घटादीनाम्, तदप्रतियोगित्वं वह्नौ वर्तते इति वह्नित्वं व्यापकत्वमित्यर्थः । वह्निव्या(र्व्या)पकः । **तदिति** । तत्पदेन वह्निः, तत्सामानाधिकरण्यं व्याप्यत्वम्, तत् तु धूमत्वम् । **तथा चे**ति मूलम् । व्यापकताज्ञानमनुमितिकारणम्, तस्य व्याप्यताज्ञानापेक्षया लघुत्वम् । यतः पर्वतवृत्तिधूमव्यापको वह्निरित्येतादृशं ज्ञानं कारणम्, न तु वह्निव्याप्यधूमवान् इत्याकारकम् । कथम् ? व्याप्यत्वलक्षणे व्यापकत्वलक्षणापेक्षया सामानाधिकरण्यस्याधिकस्य प्रवेशात् । **साध्यस्येति** । [64 A] वह्नेः पक्षधर्मो धूमः, तद्व्यापकताज्ञानं परामर्शो वाच्यः । **न त्विति** मूलम् । साध्यव्याप्तस्य धूमस्य पक्ष-धर्मताज्ञानमनुमितिकारणं न भवति, गौरवात् सामानाधिकरण्यरूपाधिकप्रवेशगौरवादित्यर्थः । **साध्येति** मूलम् । साध्यव्याप्यवान् यः पक्षस्तज्ज्ञानं वा नानुमितिकारणम्, गौरवात्, इत्यर्थः । **अत एवेति** मूलम् । यतो व्यापकताज्ञानमनुमितिकारणमत एव । **साध्यायोगेति** । साध्येन सह योऽयोगव्यवच्छेदोऽसम्बन्धव्यवच्छेदः तेन । **यो यो धूमवान् स** इति । अस्यार्थः धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निमान् इत्येवंरूपः । **अन्यथेति** मूलम् । यदि उदाहरणवाक्येन व्यापकता नोपदर्श्यते तदा वह्निमानेव धूमवान् इति अन्ययोगव्यवच्छेदेनोदाहरणशरीरं स्यात् । तथा च धूमवदस्मिन् वह्नेर्योगो नास्तीति अन्ययोगव्यवच्छेदरूपं व्याप्यत्वं प्रदर्श्यते । न वैतादृशमुदाहरण-वाक्यम् । अनेन वह्निमानेव धूमवान् इति रूपेण व्याप्यता प्रदर्श्यते । यतोऽयोगव्यवच्छेदो व्यापकत्वमुच्यते, अन्ययोगव्यवच्छेदस्तु व्याप्यत्वमिति । एतादृशं व्याप्यत्वरूपम् उदाहरणवाक्ये यो य इत्यादिरूपे नास्तीति व्यापकतापरामर्श एव तत्र कारणम् । **दोषोऽपीति** मूलम् । एवं दोषोऽपि व्यभिचारादिरीदृश एवोद्भाव्यः यत् पक्षधर्मस्य साध्यं व्यापकं न । अयं भावः - व्यापकतापरामर्शपक्षे यत्र व्यभिचारादिर्भवति तत्र स कथमुद्भाव्यः ?, यतः पर्वतवृत्तिहेतुव्यापकं न साध्यम् न तु हेतुः साध्यव्यभिचारीत्यादिरूपः ।

**अथ पर्वतवृत्तिधूमव्यापको वह्निरिति परामर्शो यदि तदा पर्वतीयधूमं प्रति व्यापक-तायाः पूर्वतधूमसामानाधिकरण्यनैयत्यात् पर्वतवह्निः परामर्शविषय एवेति किमनुमेय-मिति चेत्, तर्हि पर्वतीयधूमे नियतसाध्यसामानाधिकरण्यस्य व्याप्यत्वस्य भानं साध्य-सामानाधिकरण्यभाननियतमिति व्याप्यत्वभानेऽपि तुल्यम् । यदि च स्मृता व्याप्तिर्धूमेऽ-वगम्यते तदा व्यापकत्वेऽपि समानम् । वस्तुतस्तु व्यापकत्वं तद्वन्निष्ठात्यन्ताभावा-प्रतियोगित्वम्, न तु धूमसामानाधिकरण्यम्, व्याप्यत्वं तु सामानाधिकरण्यविशेष इति तवैवानुमितिरफला स्यात् । न चैवं परामर्शस्य चाक्षुषत्वं न स्यात् व्यापकस्य विशेष्य-**

**स्येन्द्रियासन्निर्षादिति वाच्यम्। इष्टापत्तिः, असन्निकृष्टधूमादाविव मानस एव हि सर्वत्र परामर्शः, चक्षुरन्वयव्यतिरेकानुविधानं च पक्षवृत्तिधूमोपनयोपक्षीणम्।**

**मध्ये नैयायिकः** शङ्कते - **अथे**ति। यदि तव मते पर्वतवृत्तिधूमव्यापको वह्निरिति परामर्शस्तदा पर्वतधूमं प्रति वह्नेर्या व्यापकता सा पर्वतीयधूमसामानाधिकरण्यनियता भवति। तथा च पर्वतीयो यो वह्निः सोऽपि परामर्श-विषयो जात इति किमनुमेयम्, अनुमितिः निष्फला स्यात्, पर्वतीयवह्निः परामर्शसाध्य एव भानादित्याशङ्कार्थः। **तर्ही**ति मूलम्। एवं चेत् तदा पर्वतीयधूमे नियतसाध्यसामानाधिकरण्यरूपं यत् व्याप्यत्वं तस्य भानमपि साध्य-सामानाधिकरण्यभाननियतमिति कृत्वा येषां मते व्याप्यतापरामर्शः तेषां मतेऽपि पर्वतीयवह्नि(ह्ने)र्भान[म्] इति अनुमितिर्निष्फला स्यादिति तुल्यम् इत्यर्थः। **यदि चे**ति मूलम्। स्मृता महानसादौ पूर्वं प्रत्यक्षीकृता पर्वते स्मृता, तदनन्तरं सा धूमेऽवगम्यते स्मर्यते इति, तथा च स्मृता व्यापकता वह्नौ अवगन्तव्या, एवं चानुमितेर्वैफल्यं नास्ति। यतः पूर्वं पर्वतीयवह्नेरभानात् परामर्शकाले वह्नेर्व्यापकतायाः स्मरणमेव, तदनन्तरमनुमितिरनुभवरूपा, इति कृत्वाऽनुमितेर्वैफल्यं नास्तीत्यर्थः।

*अथ टीकामव्याख्यदि*ति। अनेन यो य इत्यनेन वाक्येन धूमाधिकरणे वह्न्यत्यन्ताभावव्यवच्छेदः क्रियते, तेन धूमसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं वह्नेस्तेन वाक्येन प्रतिपाद्यते। वह्निमान् एव धूमवान् इत्यनेन वह्न्यभाववान् न धूमवान् इति वह्न्यभाववद्(द)वृत्तित्वं धूमे प्रतिपाद्यते। इदमेवास्य व्याप्यत्वम्। तथा च एतद्बोधस्य व्याप्यत्वबोधस्य अनुमितिहेतुत्वेऽन्ययोगव्यवच्छेदेन वह्निमान् एव धूमवान् इत्युदाहरणशरीरं स्यात्, न तु यो यो धूमवान् इति रूपम्। व्यापकतापरामर्शवादी [64 B] व्यापकताज्ञानस्यैव हेतुत्वं द्रढयति।

**वस्तुत** इति मूलम्। तद्वन्निष्ठो धूमवन्निष्ठो योऽत्यन्ताभावः तदप्रतियोगित्वं वह्नेर्व्यापकत्वम्, न तु धूमसामानाधिकरण्यघटितं व्यापकत्वम् सामानाधिकरण्यपदप्रवेशेन गौरवात्, लाघवात् तद्विशिष्टेत्यादिकमेव। भवतां मते च वह्निसामानाधिकरण्यविशेष्य इति तवैव मतेऽनुमितेर्वैयर्थ्यम् व्याप्यतापरामर्शकाल एव पर्वतीयवह्नेर्भानात् इत्यर्थः। **न चैवमि**ति मूलम्। यदि पर्वतवृत्तिधूमव्यापको वह्निरिति भवतां मते परामर्शस्तदा परामर्शस्य चाक्षुषत्वं न स्यात् वह्निविशेष्यकपरामर्शे विशेष्यो यो वह्निस्तेन सह सन्निकर्षाभावात् इति न वक्तव्यम्। उत्तरयति - **इष्टापत्तिरि**ति मूलम्। अस्माकं मते परामर्शेऽचाक्षुषत्वमेव। **असन्निकृष्टे**ति मूलम्। यथा तव मते असन्निकृष्टधूमे मानसः परामर्शो भवति तथा मम मते सर्वत्र मानसः परामर्शः। ननु तर्हि मानसत्वे परामर्शस्य चक्षुरन्वयव्यतिरेकानुविधानं कथमित्यत आह - **चक्षुरि**ति मूलम्। **पक्षवृत्ती**ति मूलम्। पक्षवृत्तिर्यो धूमस्तस्योपनयज्ञाने, अन्यथा चक्षुरित्यर्थः।

**अथ जनकज्ञाने उपसर्जनतया भातस्य पक्षस्य पर्वतादेरनुमितौ प्राधान्येन भानं न स्यात्। न हि जनकज्ञाने उपसर्जनतया अवगतं जन्यज्ञाने प्राधान्येन भासते, तथा-दर्शनात्। न चानुमितेस्तथात्वमसिद्धम्, पर्वतोऽयं वह्निमान् इत्यनुमितेर्लोकसिद्ध-त्वात् इति चेत्। न। पुरुषस्य दण्ड इति ज्ञानानन्तरं दण्डी पुरुष इति ज्ञानजन्यज्ञानदर्शनात्, अन्यथा तवापि कथं पक्षविशेष्यकत्वनियमः, न हि कारणीभूतज्ञाने यद्विशेष्यतया भासते तत्कार्यीभूतेऽपि तथा, इह भूतले घटो नास्ति इति ज्ञानजन्ये घटाभाववद्भूतलम् इति ज्ञाने तत्र च व्यभिचारात्। तस्मात् पक्षवृत्तिलिङ्गपरामर्शस्यायं स्वभावो यत् स्वाश्रयविशेष्यिकामनुमितिं जनयति नातथाभूताम् एवं ममापि तुल्यमिति।**

**नैयायिकः** शङ्कते - **अथेति** मूलम्। यदि पर्वतवृत्तिर्धू(धू)मव्यापको वह्निरिति परामर्शः तदा अनुमितौ पर्वतादेः प्राधान्येन भानं न स्यात्। अत्र युक्तिमाह - **तथेति** मूलम्। **न चेति** मूलम्। फलभूते वह्न्यनुमित्यादौ प्राधान्येन पर्वतादेर्भानं नास्त्येव इति न च वाच्यम्। **पर्वतोऽयमिति** मूलम्। तथा च वस्तुगत्या पर्वतस्य मुख्यतया विशेष्यतयैव भानं वर्तते। तन्न स्यादित्याशङ्कार्थः। समाधत्ते **पुरुषस्येति**। प्रथमतः पुरुषस्य दण्ड इति [दण्डज्ञानम्, ततः] दण्डज्ञानजन्यं [दण्डी पुरुषः इति] ज्ञानं जायते। तत्र जनकज्ञाने दण्डज्ञाने उपसर्जनतया भातस्य पुरुषस्य दण्डी पुरुष इति ज्ञाने प्राधान्यं न स्यात्। **जनकज्ञानेति** व्याप्तेर्भङ्ग इत्यर्थः। **अन्यथेति**। यदि एतद्व्याप्तिरप्रयोजिकेति नोच्यते तदा तवापि **नैयायिकस्यापि** पक्षविशेष्यकत्वनियमः [कथम् ?] यदि पर्वत(ते) वह्निरिति प्रथमतो ज्ञानं भवति तदनन्तरं पर्वतो वह्निमान् इति ज्ञानं भवति तदा [प्र]थमज्ञाने पर्वते वह्निरिति रूपे पर्वतस्य प्रकारत्वेन भानात् उपसर्जने(र्जनत्वे) पर्वतो वह्निमान् इत्यनुमितौ कथं विशेष्यतया भानम् ? न तु कारणीभूतज्ञाने यत् विशेष्यतया भासते तत् कार्यीभूतज्ञानेऽपि विशेष्यतया भासते इति नियम इत्यत आह - **न हीति**। **इह भूतल** इति। इह भूतले घटो नास्तीति ज्ञानजन्ये घटाभाववद्भूतलमिति ज्ञाने व्यभिचारः। जनकज्ञानं यथा भूतले घटो नास्तीति ज्ञानम्, अत्र घटो विशेष्यतया भासते, स घटः घटाभाववद्भूतलम् इत्यत्र विशेष्यतया न भासते, इति व्यभिचारः। जनकं तु भवत्येव। उत्तरं विशिष्टज्ञानम्, तत्र विशेषणज्ञानत्वेन भूतले घटो नास्तीति ज्ञानस्य कारणताऽस्ति यत उत्तरत्र घटाभावज्ञानं विशेषणज्ञानमेव। उपसंहरति - **तस्मादिति** मूलम्। पर्वतवृत्तिः यो धूमस्तस्य यः परामर्शः तस्यायं स्वभावः यत् साधनाश्रयविशेष्यकामनुमितिं जनयति यथा पर्वतो वह्निमान् इति रूपाम्, न तु पर्वते वह्निः इत्यादिकाम्, एवं ममापि मते पर्वतविशेष्यका एवानुमितिः ज्ञा(जा)यते [65 A] यथा पर्वतो वह्निमान् इतीति तुल्यमित्यत [आ]ह। अन्ये इत्यारभ्याहुः इत्यन्तेन व्यापकतापरामर्शवादिनो वदन्ति स्मेत्यर्थः।

अथैतन्मतदूषणं टीकाकार आह - **अत्रेदमिति** टीका। व्यापकतापरामर्शे दूषणोद्भावनं क्रियते इत्यर्थः। **जनकज्ञानस्येति** टीका। कारणीभूतं यत् ज्ञानं तस्य यावद्विषयत्वेन जनकत्वम्, तथा च कारणीभूतज्ञाने यावन्तो विषयाः तावन्मध्ये यत् जनकीभूतज्ञाने प्राधान्येन भासते तावन्मध्ये फलीभूतबोधेऽपि तदेव प्राधान्येन भासते इति नियमो विवक्षितः, तथा च दण्डी पुरुष इति ज्ञाने फलीभूते पुरुषस्य दण्ड इति ज्ञानस्य दण्डमात्रविषयत्वेनैव कारणत्वमस्ति परं यावद्विषयत्वेन कारणता नास्ति। दण्डी पुरुष इति विशिष्टज्ञाने फलीभूते दण्डमात्रविषयत्वेनैव कारणता यतो विशेषणज्ञानमात्रं कारणम् न तु विशेष्यज्ञानम् विशेष्यसन्निकर्षस्यैव कारणत्वात् इति कृत्वा दण्डी पुरुष इति ज्ञाने व्यभिचारो नास्ति। तथा च त्वया दण्डी पुरुष इति ज्ञाने नियमस्य व्यभिचारो दत्तः स न भवति। अत्र एतादृशोक्तस्य नियमस्य विवक्षितत्वादिति भावः इति। केचिदनभिमतबीजं वदन्ति तन्न इत्यन्येन दूषयति। **भूतले** इति टीका। यत्र प्रथमतो भूतले घटो नास्तीति ज्ञानं जातम्, तदनन्तरं घटाभाववद्भूतलमिति ज्ञानं जायते, तत्र व्यभिचारः। यतो जनकज्ञानं भूतले घटो नास्तीति रूपम्, जन्यं [घटाभाव]वद्भूतलमिति ज्ञानम्, तत्र सर्वं विशेषणत्वेन जनकमिति। भूतले घटो नास्तीति जनकज्ञानस्य यावद्विषयत्वेन जनकत्वं तावन्मध्ये प्राधान्येन घटो भासते यतो घटस्यैव विशेष्यत्वम्। फलीभूतबोधो घटाभाववद्भूतलमिति, तत्र प्राधान्येन [घटो] न भासते, भूतलमेव यतो विशेष्यत्वेन भासते, घटस्तु अप्राधान्येन भासते यतो भूतलस्य विशेषणमभावस्तस्य विशेषणं घट इत्यप्रधानः। **एतदिति**। भूतले घटो नास्तीति ज्ञानस्य भूतलविषयत्वेनापि जनकता वर्तते, यतो हि सद्भ्याम् अधिकरण-प्रतियोगिभ्याम् अभावो निरूप्यते न तु एकेन सता इति भूतलस्यापि विषयता। तथा चात्र व्यभिचारः सम्पन्नः इति भावः। मध्ये शङ्कते - **न चेति**। अभावाविशेष्यकं यत् प्रत्यक्षं तत्रैवाधिकरणज्ञानस्य कारणता, नान्यत्र। तथा च भूतलज्ञानं कारणं न भवति इति यावद्विषयकत्वेन जनकता नास्तीति न व्यभिचार इति न च वाच्यमित्यर्थः। **लाघवेनेति**। लाघवादभावप्रत्यक्षत्वावच्छिन्नं यत् ज्ञानं तत्रैवाधिकरणज्ञानं कारणम्, न तु अभावविशेष्यकप्रत्यक्षत्वावच्छेदेनाधिकरणज्ञानं कारणम् गौरवात्। लाघवादभावप्रत्यक्षत्वावच्छेदेनेति भावः। **यदपीति**। **अयोगव्यवच्छेदेनेति** टीका। यो यो धूमवान् स सोऽग्निमान् इति वीप्सया साध्यायोग-व्यवच्छेदे(दो) धूमवति वह्नेरयोगव्यवच्छेदः, तेन वह्नेर्व्यापकता दर्श्यते। तस्या एव परामर्श इति मूले यदुक्तं तदपि नेत्याह - **केवलान्वयिनीति**। केवलान्वयिनि साध्य(ध्या)योगो हेतुना सह प्रसिद्ध एव नास्तीति [65 B] कथं तदवच्छेदः ? दूषयति - **तदपीति**। एवमपीति व्यापकताज्ञानस्य कारणतायां दोषः त्वया नोक्तः स्यात्। तथा च मया व्यापकता केवलान्वयी साधारणी स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमात्रम्, एतच्च केवलान्व-यिन्यप्यस्ति इति न तद् दूषणमिति भावः। **यत् त्विति**। स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमिति हेतु-समानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यरूपा व्याप्तिः, एवं गौरवम्। **तदप्रवेशादिति** सामानाधिकरण्याप्रवेशादिति। सामानाधिकरण्याप्रवेशात् व्यापकत्वं तु हेतुसमानाधिकरणात्यन्ताभावा-

प्रतियोगित्वमात्रमिति, न तत्र सामानाधिकरण्यप्रवेश इति कृत्वा व्यापकताज्ञानस्य हेतुता, तदा साध्यासमानाधिकरणात्यन्ताभावकत्वमित्येव व्याप्यत्वमस्तु व्याप्तेरस्तु इति यावत्। तथा च व्यापकत्वघटकाः ये पदार्थाः अत्यन्ताभावसामानाधिकरण्यादयः तेषाम् अत्रापि व्याप्यत्वे प्रवेशेन तदपेक्षया व्यापकत्वापेक्षया गौरवाभावात् व्याप्यत्वज्ञानमेव कारणमस्तु इत्यर्थः। **एतावतापी**ति। व्याप्तिज्ञाने कारणतायां नियामकं किञ्चिन्नोक्तम्। ननु तत्र लाघवमेव विनिगमकमित्यत आह - **किञ्चे**ति। उक्ते साध्यासमानाधिकरणात्यन्ताभावकत्वं व्याप्यत्वमिति व्याप्यत्वापेक्षया व्यापकत्वमेव लघु। कथम्? व्यापकत्वं तु हेतुसमानाधिकरणात्यन्ताभावप्रतियोगित्वसामान्याभावः, भवतां व्याप्यत्वं तु साध्यासा(स)मानाधिकरणयावदत्यन्ताभावगर्भम्, अन्यथा व्यभिचारिसाधारण्यं स्यात्। यदि व्याप्यत्वलक्षणे यावत्पदं न दीयते तदा धूमवान् वह्निरित्यत्रातिव्याप्तिः स्यात्। कथम्? अत्रापि साध्यं धूमस्तेन सहासमानाधिकरणो महानसीयवह्न्यत्यन्ताभावो भवति तत्कत्वं च हेतौ वर्तते इति तन्निरासाय **यावदि**ति। तथा च यावन्मध्ये वह्निना सहायोगोलकीयवह्निना सहासमानाधिकरणोऽत्यन्ताभावो भवति। किन्तु समानाधिकरण एव। एतदपेक्षया व्यापकत्वं लघु। **स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वसामान्याभाव** इति। स्वं धूमादिस्तत्समानाधिकरणात्यन्ताभावो घटपटादीनां तत्प्रतियोगित्वसामान्याभावो वर्तते यतो घटादीनां वह्निरप्रतियोगी भवति, तथा चात्र यावत्पदं न प्रविष्टमिति लाघवम्। **अन्ये** इति **पक्षधरमिश्राः**। भवतां व्यापकतावादिनां मते पर्वतवृत्तिधूमव्यापकत्वं वह्नौ ग्राह्यम्, तच्च स्मृतमुपनीयते। तथा च यथा अन्यत्र प्रमेयादौ धूमव्यापकता गृहीता न वा? यदि गृहीता, तदा प्रमेयत्वस्याप्यनुमितिसामग्री वर्तते इति कृत्वा प्रमेयत्व-वह्न्योः समूहालम्बनत्वात् उभयोरेवानुमितिः स्यात्। अतो ह्यत्रैका अनुमितिर्न स्यात्। यदि धूमव्यापकत्वं प्रमेयत्वादौ न गृहीतं तदा अप्रतीतस्य व्यापकत्वस्य पर्वते कथमुपनयः? **यत उपनये**ति। उपनेयं यस्योपनेयः क्रियते। एतादृशं व्यापकत्वम्, तस्याप्रतीतौ उपनयो न सिद्ध्यति। तथा च व्यापकत्वज्ञानमुभयथापि कारणं न भवति इत्यर्थः। अन्यदपि **पक्षधरो**क्तमस्वरसबीजं दर्शयति - **वस्तुतः** [66 A] इति टीका। व्यापकताज्ञानस्य कारणतायां लाघवमेव नास्ति। **कथमि**ति। तथाहि हेतुनाऽधिकरणात्यन्ताभावे प्रतियोग्यसमानाधिकरणत्वं विशेषणमवश्यं वाच्यम्। अन्यथाऽयमेतत्संयोगीत्यादावव्याप्तिः स्यात् तदर्थं प्रतियोग्यसमानाधिकरणेति देयम्। **तदर्थञ्चे**ति। प्रतियोग्यसमानाधिकरणत्वं प्रतियोगिनो घटादेः यदधि[करणं तदधि]करणभिन्नत्वं प्रतियोगिसमानाधिकरणाभावत्वं वा। **उभयथापी**ति प्रतियोग्यधिकरणानधिकरणत्वम् प्रतियोगिनो घटादेः यदधिकरणं भूतलादि तदनधिकरणं यस्यात्यन्ताभावस्येत्यर्थः। तथा चाकाशादेरपि प्रमेयत्वव्यापकता स्यात्। तथाहि अयमाकाशवान् प्रमेयत्वात् इत्यत्र प्रमेयत्वसमानाधिकरणाः प्रतियोग्यधिकरणभिन्ना ये घटाभावादयः तत्प्रतियोगित्वाभाव आकाशे वर्तते इति प्रमेयत्वस्यापि आकाश(शं) व्यापकं स्यात्। वस्तुगत्याऽऽकाशं व्यापकं व्याप्यं च न भवतीत्याकाशस्यावृत्तित्वात्। यथा आकाशे व्यापकत्वं नायाति तथा शङ्कते - **नन्वि**ति।

प्रमेयत्वसमानाधिकरणो योऽत्यन्ताभाव आकाशस्यापि तत्र प्रतियोग्यसमानाधिकरणत्वम् कोऽर्थः । प्रतियोग्यधिकरणाधिकरणभिन्नत्वं वर्तते एव । प्रतियागी आकाशात्यन्ताभावस्य आकाशः, तस्य यदधिकरणं तदधिकरणभिन्नत्वमाकशस्यात्यन्ताभावेऽस्त्येवेति तदप्रतियोगी आकाशो न भवतीति कृत्वा पूर्वोक्तं व्यापकत्वमाकाशे नायातीति । आकाशस्य व्यापकत्वापत्तिरिति दूषणोद्धारः इत्याशङ्कार्थः । **प्रतियोग्यधिकरणे**ति । आकाशात्यन्ताभावस्य प्रतियोगी आकाशः, तस्याधिकरणमेवाप्रसिद्धमिति कृत्वा प्रतियोग्यधिकरणाधिकरणभिन्नोऽभावो घटापटादेरेव कथमित्यत आह - **विशिष्टे**ति । प्रतियोग्यधिकरणाधिकरणा(ण)भिन्नो योऽभावः, तथा च विशेषणं प्रतियोग्यधिकरणाधिकरणभिन्नत्वम्, तद्विशिष्टोऽभावो घटपटाभावादिः, तदप्रतियोगित्वमाकाशेऽस्त्येवेति आकाशस्यापि व्यापकता स्यात् । **तस्मादि**ति टीका । आकाशस्य व्यापकतावारणाय साधनसमानाधिकरणत्वं विशेषणं व्यापकसाध्ये देयम् । तथा च साधनसमानाधिकरणात्यन्ताभावाप्रतियोगि यत् साध्यं तत् कीदृशम् ?, साधनसमानाधिकरणम् । आकाशस्य सामानाधिकरण्यं नास्ति, तदधिकरणाप्रसिद्ध्या आकाशे नातिव्याप्तिरित्यर्थः । एवं चेत् व्यापकत्वेऽपि लाघवं नास्ति, साधनसा(स)मानाधिकरणस्य व्यापकत्वेऽपि प्रवेशात् । व्यापकत्वेऽपि व्याप्यत्वापेक्षया लाघवं नास्ति इति । **अस्वरसबीजमिति** । **मिश्रमतं** दूषयति । तत्राद्यमस्वरसबीजं न सम्भवति । कुत इत्यत आह - **विशेष्ये** इति । विशेष्ये विशेषणम्, तत्र च विशेषणान्तरमिति न्यायेन । अस्यार्थः । विशेष्ये धूमे पर्वतवृत्तित्वं विशेषणम्, तत्र च पर्वतवृत्तित्वविशिष्टो यो धूमः स वह्नौ विशेषणं भासते, यथा पर्वतवृत्तिधूमव्यापको वह्निरिति । अत्र एवं प्रकारेण पर्वतवृत्तिर्यो धूमः [66 B] तद्व्यापकत्वस्य वह्नावुपपत्तौ जातायाम् । **नान्यत्रापी**ति अन्यत्र प्रमेयत्वादौ वह्निव्यापकत्वग्रहापेक्षैव नास्तीति । यतो धूमव्यापकत्वं च वह्नौ एव पुरा गृहीतुं(तम्) इति समूहालम्बनरूपानुमितिप्रसङ्ग एव नास्तीत्यर्थः । **न द्वितीयमिति** । अस्वरसबीजमिति शेषः । यत् त्वयोक्तम् आकाशस्य व्यापकतावारणार्थं साधनसमानाधिकरणं साध्ये विशेषणं दत्तं तन्न सम्भवतीत्यत आह - **प्रतियोग्ये**ति । यथाश्रुतेनैवोपपत्तेः । कथम् ? यतः प्रतियोग्यधिकरणाधिकरणाः संयोगाभावादयः प्रसिद्धाः, संयोगाभावस्य प्रतियोगी संयोगः, तदधिकरणाधिकरणत्वमेव संयोगाभावे वर्तते संयोगाभावस्याव्याप्यवृत्तित्वात् । तथा च तद्भिन्नत्वमाकाशात्यन्ताभावे वर्तते । तथा च प्रतियोग्यधिकरणाधिकरणो(ण)भिन्नोऽभावः आकाशात्यन्ताभावः तत्प्रतियोगित्वमेव वर्तते । **आकाशस्ये**ति । आकाश[व्यापकता]वारणं प्रतियोगित्वेनैव सिद्धम् किमर्थं साधनसमानाधिकरणेति विशेषणं देयम् ? स्वोक्तं दृष्टान्तेन द्रढयति - **एवमिति** । **स्वोपादाने**ति । **स्वशब्देन** क्षित्यादिकम्, तज्जन्या या कृतिरस्मदादिकृतिः तदजन्यत्वं क्षित्यादावस्ति । अत्र जन्यकृतिपदेनाजन्या कृतिर्वारणीया । अजन्या कृतिरप्रसिद्धेति चेत् तद्वारणार्थः(र्थ)मर्थस्य विवक्षा यथा स्वोपादानगोचरजन्यकृतिजन्या घटपटादयस्तद्भिन्नत्वं क्षित्यादौ प्रसिद्धम् । **एवं यथाश्रुतेनेति** । प्रतियोग्यधिकरणाधिकरणाः संयोगाभावादयः प्रसिद्धाः तद्भिन्नत्वमाकाशाभावे वर्तत एवेति न विवक्षान्तरं कर्तव्यम् । **किञ्चे**ति । अन्योन्या[भा]वगर्भव्याप्ते-

रनुमितिहेतुत्वेन ग्रन्थकारस्याभिमतत्वात्। तथा चान्योन्याभावगर्भं यद्व्यापकत्वं तत्र प्रतियोग्यसमानाधिकरणपदं न प्रविशत्येव। तेनेति लाघवम्। अत्यन्ताभावगर्भव्यापकत्वेऽपि आकाशेऽतिव्याप्तिवारणार्थं साधिकरणत्वमात्रं विशेषणमस्तु। हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाधिकरणं तत्त्वं व्यापकत्वमिति पर्यवसन्नम्। तथा च पूर्वोक्तमस्वरसबीजं नानुपपन्नम्। स्वाभिमतमस्वरसबीजमुपपादयति - **तस्मादिति**। यदि पर्वतवृत्तिधूमव्यापको वह्निरिति ज्ञानमनुमितिहेतुः तदा शब्दादिना आदिशब्दादनुमानेन व्यापकत्वं निश्चितम्। अवसरसङ्गत्या लिङ्गपरामर्शस्य कारणतां व्यवस्थापयति।

**एवं लिङ्गपरामर्श एव कारणं न तु परामृष्यमाणं लिङ्गम्। अथ परामर्शमात्रं न हेतुरपि तु लिङ्गपरामर्शः, तथा च लिङ्गमपि हेतुः विशिष्टकारणताग्राहकमानेन बाधकं विना विशेषणस्यापि हेतुत्वग्रहात्। न च लिङ्गं परामर्शपरिचायकत्वेनान्यथासिद्धम्, परिचेये विशेषणान्तराभावेन लिङ्गमेव विशेषकं तथा चानन्यथासिद्धत्वात् तदपि हेतुः अन्यथा परिचायकतया संयोगेनान्यथासिद्धमिन्द्रियमपि कारणं न स्यात्। अपि च धूमवान् वह्नि-मानिति धूमसमानकालवह्निविषया धूमविशेषणिकानुमितिः ज्ञायमानविशेषणजन्या विशेषणसमानकालतया विशेष्यविषयेऽशाब्दविशिष्टज्ञानत्वात् दण्डी पुरुष इति प्रत्यय-वत्। अत एव ज्ञायमानविशेषणजन्यत्वेन विशेषणकालवृत्तितया विशेष्यभाननैयत्यं यथा दण्डी पुरुष इति प्रत्यक्षे, तेन धूमसमानकालीनवह्निसिद्धिः, अन्यथा तत्तद्धूमकाल-वृत्तिवह्न्यनुमानं न स्यात् समयविशेषमन्तर्भाव्य व्याप्त्यग्रहात्। किञ्च लिङ्गकरणत्व-पक्षे परामर्श एव तद्व्यापारः परामर्शस्य तु न व्यापारान्तरमस्ति चरमकारणत्वादिति न तत् करणम्।**

**एवमिति**। लिङ्गस्य तृतीयं ज्ञानं वह्निव्याप्यधूमवान् इत्याकारकं कारणम्। **न न्विति**। परामृश्यमाणं ज्ञायमानं लिङ्गं कारणं न भवति। अतीतानागतस्थले यत्र अतीतलिङ्गेन अनागतलिङ्गेन वा अनुमितिर्न भवति तत्र ज्ञाय-मानलिङ्गं नास्ति लिङ्गस्यासत्त्वादिति। लिङ्गकरणतावादी शङ्कते - **अथेति**। परामर्शमात्रमनुमितिहेतुर्न भवति, तथा च कारणत्वं केन रूपेण? - परामर्शत्वेन वा लिङ्गपरामर्शत्वेन वा? नाद्यः साध्यस्य परामर्शमात्रेणानुमितिर्न भवति किन्तु लिङ्गपरामर्शत्वेन साधनपरामर्शत्वेन। तथा च विशिष्टपरामर्शस्य लिङ्गपरामर्शस्य कारणताग्राहकप्रमाणेन बाधकं विना लिङ्गस्यापि हेतुत्वं गृह्यते। अयमर्थः - येन येन प्रमाणेन परामर्शस्य [67 A] विशिष्टस्य कारणता गृह्यते

तेनैव प्रमाणेन विशेषणस्यापि कारणता गृह्यते यतो विशिष्टस्य कारणतायां वाच्यायां विशेषणस्यापि कारणता आयाति यथा इन्द्रियविशिष्टसन्निकर्षस्य कारणतायां [वाच्यायां विशेषणस्येन्द्रियस्यापि कारणता आ]याति। मध्ये शङ्कते - **न चेति**। लिङ्गं परामर्शपरिचायकत्वेन व्यावर्तकत्वेनान्यथासिद्धमिति न [अ]नुमितौ करणमित्याशङ्कार्थः। **परिचेये** इति मूलम्। परामर्शे विशेष[णा]न्तरं व्यावर्तकं नास्तीति लिङ्गमेव विशेषकं व्यावर्तकम्। तथा चा[न]न्य-थासिद्धत्वात् लिङ्गमपि अनुमितौ कारणम्। **अन्यथेति** मूलम्। यद्येवं परिचायकत्वेनान्यथासिद्धिरुच्यते तदा इन्द्रियमपि स्वसन्निकर्षपरिचायकमस्तीत्यन्यथासिद्धं स्यादित्यर्थः।

**बाधकं विनेति** टीका। दण्डत्वे व्यभिचारवारणार्थं बाधकं विनेत्युक्तम्, यथा दण्डत्वमन्यथासिद्धं घटे इति विशिष्टकारणताग्राहकप्रमाणा(णे)नान्वयव्यतिरेकसहकृतप्रत्यक्षेण विशिष्टस्य दण्डस्य कारणत्वे गृहीतेऽपि विशेषणस्य दण्डत्वस्य न कारणत्वमिति बाधकं विनेत्युक्तम्, तत्रान्यथासिद्धरूपस्य बाधकस्य सत्त्वात्। अन्य-थासिद्धिश्च येन सहैवेत्यादिका। **अत्रापीति** टीका। अन्यथासिद्धत्वं येन सहैवेत्यादिरेवान्यथासिद्धिरिति भावः। लिङ्गस्य कारणत्वसाधकयुक्त्यन्तरमाह - **धूमवानिति**। धूमसमानकालीनो यो वह्निस्तद्विषयिका धूमविशेष-णिकाऽनुमितिः धूमवान् वह्निमान् इत्याकारिका अनुमितिः पक्षः। **ज्ञायमानविशेषणजन्येति** साध्यम्। ज्ञायमानं यत् विशेषणं धूमस्तज्जन्या भवितुमर्हति। हेतुर्यथा **विशेषणेति**। विशेषणं धूमस्तत्समानकालतया विशेष्यविषयकं विशेष्यः पर्वतस्तद्विषयक(कं) शाब्दविशिष्टज्ञानत्वात् स दण्डी पुरुष इति प्रत्यक्षवत्। यथा दण्डी पुरुष इति प्रत्यक्षे विशेषणं दण्डस्तत्समानकालतया विशेष्यः पुरुषस्तद्विषयं शाब्दविशिष्टं ज्ञानं भवति। अथ च ज्ञायामानं यत् विशेषणं दण्डस्तज्जन्यत्वमप्यस्ति। तथा चानेनानुमानेन धूमस्याप्यनुमितौ जनकत्वं सिद्धम्। **वर्तमानेति** टीका। यथाश्रुते अंशतो बाधः। अतीतो यो धूमस्तज्जन्यता धूमविशेषणिकानुमितौ नास्ति धूमस्यातीतत्वात्, धूमरूप-विशेषणजन्यत्वाभावात् अंशतो बाधः इति अन्यथा व्याचष्टे - **वर्तमानेति**। स तु अतीतो धूम इति न बाध इत्यर्थः। यथाश्रुते धूमवान् वह्निमान् इति अनुमितिः, ज्ञायमानं यत् विशेषणं वह्निरूपम्; न, जन्यतयाऽर्थान्तरता स्यात्। प्रकृते वह्निजन्यत्वमनुमितौ नास्ति, परं तदेव सेत्स्यतीत्यन्यथा व्याचष्टे - ज्ञायमानविशेषणतावच्छेदकजन्या धूमवान् वह्निमान् पर्वत इत्यनुमितिः पक्षः इत्यत्र विशेष्यतावच्छेदको धूमः। कथम्? विशेष्यः पर्वतः, विशेषणं वह्निः, विशेष्यतावच्छेदको धूमः, तज्जन्यत्वं साध्यम्, वह्निस्तु विशेषणम्, अतीतादिस्थले विशेषणतावच्छेदकजन्यत्वं नास्तीति बाधवारणाय ज्ञायमानपदम्। यतो विशेष्यतावच्छेदेन धूमवत्त्वावच्छेदेनेति, धूमोऽवच्छेदक(कः) विशेषणसमानकालतयेति। एवं यत्र धूमासमानकालीनवह्निविषयिण्यनुमितिर्जायते धूमात् तत्र विशेष्य-विषयाशाब्दविशिष्टज्ञानत्वं वर्तते। तत्र ज्ञायमानविशेष[ण]जन्यत्वं नास्ति [67 B] धूमस्यासत्त्वात्। ततो विशेषणस-मानकालतयेति विशेषणम्। तत्र विशेषणसमानकालतया विशेष्यविषयाशाब्दविशिष्टज्ञानत्वं नास्ति। **अशाब्देति**

पदम्। यत्र धूमवान् वह्निमान् इति शाब्दज्ञानं वर्तते तत्र विशेषणसमानकालतया विशेष्यविषयविशिष्टज्ञानत्वं वर्तते। तत्र ज्ञायमानविशेषणजन्यत्वं नास्ति यतस्तत्र विषयस्य कारणता नास्ति। ततोऽशाब्देति पदम्। **वर्तमाने**ति टीका। वर्तमानं यद्विशेष्यतावच्छेदकं तद्विशिष्टे वर्तमानं यद्विशेषणान्तरं तद्वैशिष्ट्यावगाहि यत्शाब्दविशिष्टज्ञानं तत्त्वात्। यथाश्रुते यत्र धूमो वर्तमानो नास्ति तत्र विशि(शे)ष्यविषयाशाब्दविशिष्टज्ञानत्वं वर्तते। ज्ञायमानविशेषणजन्यत्वं नास्तीति कृत्वा व्यभिचारः स्यात्, तद्वारणाय वर्तमानविशेष्यतावच्छेदकविशिष्टेति पदम्। तत्र च धूमस्य वर्तमानना(ता)स्ति इति कृत्वा न व्यभिचारः। ननु तथापीश्वरज्ञाने व्यभिचार इत्यतो विवक्षान्तरं करोति विशिष्टज्ञानपदमिति। तथा च जन्यविशिष्टज्ञानत्वात्। **स्मरणे चे**ति। स धूमवान् वह्निमान् इति स्मरणं विशिष्टज्ञाने वर्तते परं विशेषणजन्यं तन्नास्ति अनुभवजन्यत्वात् तस्येति भावः। **निर्विकल्पकस्ये**ति टीका। विशिष्टपदेनैव वारणादित्यर्थः। न रू(उ)पमितौ व्यभिचारः यतस्तत्र विशेषणसमानकालतया विशेष्यविषयाशाब्दविशिष्टज्ञानत्वं वर्तते विशेषणजन्यत्वं तत्र नास्ति यतस्तत्र विशेषणज्ञानजन्यत्वं न किन्तु सादृश्यज्ञानजन्यत्वमित्यत आह - **उपमितेरि**ति **सपक्षत्वमि**ति। यदि तत्र ज्ञायमानविशेषणजन्यत्वं तदा तदन्यत्वमपि विशेषणं देयम्। **अत एवे**ति। यतो धूमवान् वह्निमान् इत्यनुमितिर्जायतेऽतो ज्ञायमानं यद् विशेषणं धूमादिस्तज्जन्यत्वेन विशेषणकालवृत्तितया विशेष्यं भासते। धूमसमान[काल] एव वह्निर्भासते इत्यर्थः। इति टीका। अतो धूमजन्यत्वं सिद्धमनुमितेरिति भावः। **अन्यथे**ति टीका। यदि धूमसमानकालीने(नो) वह्निर्न सिद्ध्यति तदा तत्तद्धूमसमानकालवृत्तिवह्न्यनुमानं न स्यात्। भवति च वह्न्यनुमानं यदा धूमवान् तदा वह्निमान् इति। **अन्यथे**ति टीका। तथा चेति ज्ञायमानं यद् विशेषणं धूमस्तज्जन्यत्वमेव धूमकालीनवह्निसिद्धौ नियामकम्। कुतः ? समयविशेषेति। यदा सदान्तर्भावेन यदि व्याप्तिग्रहो नास्ति तदा धूमकालवृत्तिवह्न्यनुमानं न स्यात्। वर्तते च धूमकालवृत्तिवह्न्यनुमानम्, तस्मात् धूमकालीनो वह्निः सिद्ध्यति, तदा धूमस्यापि कारणताऽनुमिता वाऽवगता।

**किञ्चे**ति मूलम्। येषां मते लिङ्गं कारणम्, लिङ्गस्य परामर्शो व्यापारः, परामर्शस्य तु व्यापारान्तरं नास्ति चरमकारणत्वात्। तत् करणमिति। तदिति लिङ्गं करणमित्यर्थः। **उभयोरि**ति लिङ्गपरामर्शयोरित्यर्थः।

**अत्रोच्यते। अतीतानागतधूमादिज्ञानेऽप्यनुमितिदर्शनान्न लिङ्गं तद्धेतुः व्यापारपूर्ववर्तितयोरभावात्। न च विद्यमानं लिङ्गान्तरमेव तद्धेतुः, तदा तस्यापरामर्शात् परामर्शाविषयस्य कारणताग्राहकाभावात्, भाविनि पक्षे व्यक्त्यैक्यमेव वा यत्र लिङ्गं तत्र लिङ्गान्तराभावाच्च। यदि च वर्तमानमेव तत्र लिङ्गं तदा वर्तमानवह्न्यनुमानोपपत्तिः। अथ भावि भूतं वा धूमादि न लिङ्गं किन्तु तत्प्रागभावस्तद्ध्वंसश्च वर्तमान एव तयोरपि**

**वह्निसमानदेशत्वनियमादिति चेत्। न। अतीतभाविदिनवृत्तितया निश्चितात् वर्तमानतया सन्दिग्धात् धूमादनुमितौ हि न प्रागभावध्वंसौ लिङ्गे तयोः सन्दिग्धत्वात्। नापि धूमः, तस्यावर्तमानत्वात्। किञ्च भूत-भावि-वर्तमानत्वाविषयात् पर्वते धूम इति ज्ञानात् यत्रानुमानं तत्र का गतिः, सर्वत्र प्रागभावाद्यन्यतमत्वं धूमाद्यत्यन्ताभावाभावत्वं वा लिङ्गमिति चेत्, न, व्यर्थविशेषणत्वेन तेषामलिङ्गत्वात् अन्यतमत्वाद्यज्ञानेऽपि धूमज्ञानादनुमितिसत्त्वाच्च। अपि च न धूमप्रागभावादि लिङ्गं, न वा तद्धीरनुमितिकारणम्, प्रागभावादीनां व्यर्थत्वात् आवश्यकधूमज्ञानादेवानुमितिसम्भवाच्च।**

**अतीतेति**। अतीतादिस्थले लिङ्गं नास्ति परमनुमितिर्जायते, यथाऽतीतलिङ्गेन यत्रानुमितिर्जायते यथा रामोऽभूत् दशरथपुत्रत्वात्।

शङ्कते - **नन्विति**। तथा च विद्यमानं यत्र लिङ्गं तादृशी याऽनुमितिस्तत्त्वावच्छेदेन लिङ्गप्रागभावस्य कारणताऽस्तु। यत्र धूमो वर्तते तत्रापि धूमप्रागभावोऽस्त्येव कस्यचित् धूमस्य प्रागभावो वर्तते एव, अनागतादिस्थले सुतरां प्रागभावोऽस्ति। [68 A] अतीतादिस्थले तस्य परामर्शः स कारणमित्याशङ्कार्थः। **अतीतेति**। अतीतलिङ्गकानुमितौ क्लृप्ता सामग्री परामर्शरूपा यैव वर्तमानानागतस्थलेऽनुमित्युत्पत्तौ। **विशेषेति**। लिङ्गप्रागभावरूपा सामग्री न कल्पनीया गौरवात्। लिङ्गस्यानुमितिकारणत्वे अन्वयव्यतिरेकाभ्यां व्यभिचारमाह - **अयोग्येति**। यत्र लिङ्गमतीन्द्रियमस्ति तेन लिङ्गेनानुमितिर्जायते तत्र व्यभिचारः। कथम्? तत्र लिङ्गस्य करणत्वं भवति परामर्शरूपव्यवहार(रा)सम्भवात्। परामर्शस्तु प्रत्यक्ष एवोचितः। **शब्दादीति**। वह्निव्याप्यधूमवान् इति शब्देन यदा अनुमितिर्जायते तत्र लिङ्गस्य कारणता न सम्भवति, तत्र लिङ्गस्य कारणता नास्ति तेन विनापि तत्सम्भवात् इति कृत्वा निर्व्यापारस्य परामर्शस्य कारणत्वम्, तदा सर्वत्रावश्यकत्वात् तेनैवानुमित्युत्पत्तौ(त्तिः) कारणान्तरं यल्लिङ्गं तस्य कल्पनायां प्रमाणाभावः।

**न चेति** मूलम्। अतीतानागतस्थलयोर्विद्यमानो धूमः स एव कारणमस्तीत्याशङ्कार्थः। **तदेति** मूलम्। अनुमितिप्राक्काले विद्यमानलिङ्गान्तरस्य परामर्शभावात् विद्यमानं लिङ्गं न हेतुः। **परामर्शेति** मूलम्। अतीतादिस्थले यः परामर्शो जायते तत्र लिङ्गस्य परामर्शविषयता वर्तते, परं तस्य कारणता नास्ति, अतीतत्वादेव परामर्शो लिङ्गेन न जन्यते किन्तु व्याप्त्येति भावः।

**परामर्शेति** टीका। यदा परामर्शो न जातः तदा परामर्शरूपद्वाराभावात् लिङ्गस्य कारणता न भवतीत्यर्थः। **भाविनीति** मूलम्। यदि विद्यमानलिङ्गान्तरमनुमितौ कारणं तदा यत्र भावी पक्षः तत्रापि विद्यमानं लिङ्गान्तरं न

सम्भवति इति कृत्वाऽनुमितिर्न स्यात् । अथवा यत्र एकव्यक्तिकमेव लिङ्गं यथा अयम् एतद्रूपवान् एतद्व्यक्तेः अत्रापि लिङ्गान्तरं नास्तीति कृत्वाऽनुमितिर्न स्यात् । **भाविनी**ति टीका । ननु त्वयोक्तं भाविनि पक्षे लिङ्गान्तरं न सम्भवतीति, तदशुद्धम् भाविनि वृष्ट्यादौ विद्यमानं लिङ्गं द्रव्यत्वादि वर्तते एवेति कृत्वा तस्यैव लिङ्गत्वम्, भाविनी वृष्टिर्विशिष्टा भवितुमर्हति इति विशिष्टमेघोन्नतेरिति अत्र विद्यमानद्रव्यत्वादिकमेव लिङ्गं वर्तते । **तथापी**ति टीका । तस्य द्रव्यत्वादेः स्वरूपेण लिङ्गत्वं नास्ति किन्तु पक्षवृत्तितया द्रव्यत्वादेः लिङ्गत्वम् । पक्षस्य तदानीं भाविपक्षस्थलेऽभावात्, तत्र पक्षाभावात् पक्षवृत्तित्वं लिङ्गस्य न सम्भवतीत्यर्थः । **नन्वि**ति । व्यक्त्यैक्यमेवेत्य[त्र] सम्भवति । यत्र एकव्यक्तिकमेव लिङ्गं तत्र विद्यमानलिङ्गान्तराभावात् इत्युक्तं तदशुद्धम्, एतद्व्यक्तिरिति स्थाने एतद्व्यक्तिसमनियतयत्तद्ज्ञानविशेषत्वं तस्यैव लिङ्गत्वं सम्भवतीति यथा यदा यदा साध्यं व्यक्तिः तदा तदा ज्ञानविशेष्य(ष) इति अस्यैव लिङ्गत्वसम्भवात्, तथा च लिङ्गान्तरं नास्तीत्यशुद्धम् । मध्ये शङ्कते - **न चे**ति । अयम् एतदतिरिक्तयावद्धर्माः तद्धर्मवान् एतद्व्यक्तित्वात् इत्यत्र ज्ञानविशेष्य(ष)त्वादेरपि लिङ्गत्वं न सम्भवति । साध्ये एतत्पदेन किञ्चिद्रूपादिकं धर्मस्तदतिरिक्तयावन्तो धर्माः सर्वे एतस्य धर्माः तद्वत्त्वं साध्यते तथा चात्र ज्ञानविशेषत्वादिकमपि तत्र हेतुर्न सम्भवति साध्यमध्ये एतस्याप्यन्तर्गतत्वात् यावद्धर्ममध्ये तस्याप्यागतत्वात् इत्याशङ्कार्थः । इति न च वाच्य[म्] ।

**प्रकारभेदेने**ति टीका । केनचिद् रूपेण ज्ञानविशेषस्य साध्यता, केनचिद् रूपेण हेतुता । तथा च धर्मत्वेन साध्यता, ज्ञानविशेषत्वेन हेतुता, इति भिन्नप्रकारकत्वम् । **अत एवे**ति टीका । [68 B] इदं तोयं पिपासो-पशमनसमर्थत्वात् इत्यादौ यदेव तोयं तदेव पिपासोपशमनसमर्थम् इति तोयपिपासोपशमनसमर्थयोरभेदेन हेतु-तत्साध्ययोरभेदेऽपि प्रकारभेदेन भेदः, यथा तोयत्वेन साध्यता पिपासोपशमनसमर्थतावच्छेदकरूपवत्त्वेन हेतुता । तद्वत् प्रकृतेऽपीत्यर्थः ।

**यदि चेति** मूलम् । भाविनि पक्षे एकव्यक्तिके च हेतौ विद्यमानं लिङ्गान्तरं यदि वर्तते तदा विद्यमानवह्नेरनुमानं स्यात् । वस्तुगत्या नास्ति । अयं वर्तमानवह्निमान् इत्यनुमानं स्यात्, तदसम्भवम् न सम्भवतीत्यर्थः । **अथे**ति मूलम् । भावि भूतं च धूमादि लिङ्गं नोच्यते किन्तु धूमप्रागभावो भाविस्थले ध्वंसश्च भूतस्थले, यथाऽयं वह्निमान् धूमप्राग-भावात् धूमध्वंसात् वा । **तयोरपी**ति मूलम् । ननु वह्निसामानाधिकरण्याभावात् कथं तयोर्लिङ्गत्वमित्यत आह - **तयोरपी**ति । यत्र देशे धूमप्रागभावो ध्वंसो वा तत्रावश्यं वह्निर्वर्तत एवेति भावः । **अतीतभाविदिने**ति मूलम् । अतीतदिनवृत्तित्वेन धूमो निश्चितोऽथ वाक्यादिना भाविदिनवृत्तित्वेनापि धूमो निश्चितोऽथ च वर्तमानत्वेन सन्दिग्धो यो धूमस्तस्मादनुमितौ धूमप्रागभावध्वंसौ न लिङ्गे यतो गतदिवसे धूमः स्थितोऽभूत् श्वो भविष्यति इत्यतीतदिनवृत्तित्वेनाथ च भाविदिनवृत्तित्वेन निश्चयो वर्तते । वस्तुगत्या च वर्तमाने नास्ति तदा धूमप्रागभाव-

धूमध्वंसयोर्लिङ्गत्वं न सम्भवति तयोः सन्देहात्, धूमोऽपि लिङ्गं न सम्भवति तस्यासत्त्वात्। तथा च तादृशस्थले एकस्यापि लिङ्गत्वं न सम्भवतीति न तयोर्लिङ्गत्वम्।

**यत्त्विति**। अतीतदिनवृत्तित्वेन निश्चितो यो धूमस्तस्य वर्तमानदिनेऽतीतदिनवृत्तित्वं यद् विशेषणं तद्वशेन अतीतदिनवृत्तिधूमध्वंसो निर्णेतुं शक्यते। तथा च तस्यैव लिङ्गत्वं भविष्यति। अयं वह्निमान् विशिष्टध्वंसात् इत्यनुमानं स्यात् इत्यर्थः। परिहरति - **तन्नेति**। विशिष्टध्वंसः शक्तिवादे ग्रन्थकृतैव निरस्तोऽस्ति। ततो यदि विशेषणध्वंसेन विशिष्टध्वंसोऽङ्गीक्रियते तदा घटादेः क्षणिकता स्यात्। रूपादिनाशेन घटस्य नाशः स्यात्। ततो घटादेः क्षणिकत्वापत्तिः। तथा च प्रकृतेऽतीतदिनवृत्तित्वरूपविशेषणध्वंसेन धूमध्वंसो न निश्चितः। अतो न स हेतुः। शङ्कते - **न चेति**। घटादिस्थले विशेषणध्वंसेन घटादौ क्षणिकता न स्यात् घटादीनां सत्त्वात्। प्रकृते धूमो नास्ति इति कृत्वा विशेषणध्वंसेन विशिष्टध्वंसः सम्भवति। सविशेषणे विधिनिषेधौ विशेषणमुपक्रामतो विशेष्ये बाधके सति इति न्यायात्। घटादेर्विशेष्यस्य विद्यमानत्वरूपप्रत्यक्षबाधकसत्त्वात् विशेषणस्यैव ध्वंसः न तु घटस्य ध्वंस इति न च वाच्यमित्यन्वयः। **एवमपीति** टीका। तथापि धूमध्वंसस्य हेतुत्वं न स्यात् वर्तमानदिनधूमसंन्देहेन विशिष्टधूमध्वंसस्याधि(पि) सन्दिग्धत्वात्। ननु विशिष्टध्वंसस्य निश्चय एव कुतो न भवति इत्यत आह - **नहीति** टीका। विशेष्ये विद्यमानेऽपि विशेषणध्वंसप्रयुक्तो विशिष्टध्वंसो नाङ्गीक्रियते प्रत्यभिज्ञाया बाधकत्वात् यथा [वि]शिष्ट(ष्टः) पुरुषो न नष्टा(ष्टः) पुरुषो न नष्ट इति बाधकप्रत्ययात्। **नन्विति**। तद्दिने मध्यष(?)दिने धूमप्रागभावस्य सन्देहेऽपि धूमस्य सन्देहो न भवति। कुतः ? धूमसत्ता आप्तवाक्यादिना निर्णीता इति कृत्वा धूमस्य वर्तमानत्वम् अथ च वर्तमानत्वेन निर्णयोऽप्यस्तीति न व्यभिचारः। पूर्वं यदुक्तं [69 A] यत्र धूमप्रागभावध्वंसादेः सन्देहोऽस्ति तत्रापि धूमसत्तैव नास्तीति पुन[र]त्र कस्य लिङ्गत्वमिति [तेन यो] व्यभिचारो दत्तोऽभूत् स निरस्तो यतस्तत्र धूमस्यैव हेतुत्वं भविष्यति। धूमसत्त्वेनैव पर्वतनिर्णयो वर्तते इति न व्यभिचारि(रः) इति टीकार्थः। अयमुत्तरग्रन्थभावार्थः। **किञ्चेति**। यत्र पर्वते पूर्वधूम इति ज्ञानं जातं - कीदृशं ज्ञानम् ?, भूतभाविवर्तमानत्वाविषयकमेव जातं - तत्रानुमितिर्न स्यात्। कथम् ? यतोऽनुमितिप्राक्काले पूर्वं धूम आसीत् तत्र वर्तमानत्वेन धूमनिर्णयो नास्ति कथमनुमितिरतीतत्वेन धूमविषयकमेव निर्णयात्। तथा च तादृशस्थले धूमसत्ता निर्णीता नास्ति, कथं लिङ्गं कारणमिति मूलार्थः। **वस्तुत** इति टीका। पर्वते धूमज्ञानं कीदृशं विवक्षितम् ?, वस्तुतोऽतीतधूमविषयत्वमिति व्याख्येयम्। यथाश्रुते धूमसत्त्वेऽनुमितौ बाधकं नास्ति इत्यसङ्गतिः स्यादिति भावः। **मीमांसकः** शङ्कते - **सर्वत्रेति** मूलम्। सर्वत्र यत्र वह्न्यनुमानं तत्र धूमप्रागभावधूमध्वंसान्यान्यत्वं लिङ्गं भवतु अथवा धूमात्यन्ताभावाभावत्वम्। तथा च यत्र धूमोऽस्ति तत्र धूमात्यन्ताभावो नास्ति, यत्र धूमप्रागभावः [तत्र धूमात्यन्ताभावो नास्ति], यत्र धूमध्वंसस्तत्रापि धूमात्यन्ताभावो नास्ति। अत्यन्ताभावस्यैतत्त्रितयविरोधित्वात्। तथा चातीतस्थले भाविस्थले च एतत्त्रितयान्यतमत्वं वर्तत एवेति कृत्वा लिङ्गं सर्वत्र कारणम्

अपरम् अतीतभाविस्थले धूमध्वंसप्रागभावयोः सत्त्वात् इत्याशङ्कार्थः। व्यर्थेति। प्रागभावाद्यन्यतमत्वात् इत्यत्र प्रत्येकं प्रागभावादेरेव हेतुत्वेऽन्यतमपदं व्यर्थम्। एवं धूमात्यन्ताभावाभाववत्त्वमित्यत्राप्यत्यन्ताभावाभावपदस्यापि व्यर्थत्वम्। दूषणान्तरमाह - **अन्यतमत्वेति** मूलम्। अन्यतमत्वादिकमज्ञात्वापि केवलं धूमादिज्ञानेनैवानुमितिः भवति इति न तेषां लिङ्गत्वमित्यर्थः। किञ्चेत्यत्राभासदानायाह - **नन्विति**। पूर्वधूमप्रागभावे विद्यमानाया व्याप्तेः धूमविशेषणं विना ज्ञानसम्भवात्। यन्निष्ठा यन्निरूपिता व्याप्तिः येन विशेषणेन विना ग्रहीतुं न शक्यते तद् विशेषणं सार्थकम् इति न्यायात्। तथा च धूमप्रागभावनिष्ठा व्याप्तिः धूमविशेषणं विना ग्रहीतुं न शक्यते इति कृत्वा तद् विशेषणं धूमविशेषणं सार्थकम्। एवं च धूमप्रागभावस्य गुरुभूतस्यापि अधिकसङ्ग्राहकत्वेन व्यर्थविशेषणत्वं कथम् ? यत्र धूमो नास्ति तत्रापि धूमप्रागभावोऽस्ति इति व्यर्थविशेषणता च तत्र भवति, यत्र गुरुभूतं सङ्कोचकं विशेषणं भवति यथा नीलधूमात् इति अत्र नीलपदं सङ्कोचकं विशेषणं नीलमित्युक्ते धूममात्रं नायाति तद्वत्। धूमात्यन्ताभावाभावेऽपि न व्यर्थविशेषणता, यन्निष्ठेति न्यायात्। धूमात्यन्ताभावाभावनिष्ठा व्याप्तिर्येन धूमविशेषणेन विना ग्रहीतुं न शक्यते एवे[त्य]र्थः।

**किञ्च लिङ्गं नानुमितिमात्रे हेतुः लिङ्गं विनापि धूलीपटलात् लिङ्गभ्रमेणानुमित्युत्पत्तेः। नापि लिङ्गं प्रमानुमितौ, परामर्शोऽनुमितिमात्रे हेतुः तद्विशेषप्रमात्वाप्रमात्वाभ्यामेवानुमितितथात्वात्, यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्य प्रयोजकत्वात्। अथ परामर्शस्य प्रमात्वं विद्यमानलिङ्गविषयत्वम्, तथा चायातं लिङ्गस्य प्रमानुमितिहेतुत्वमिति चेत्। न। भाविना भूतेन वा यदाकदाचित् विद्यमानेनापि लिङ्गेन परामर्शप्रमात्वसम्भवान्नानुमितिपूर्वसमये तत्प्रमात्वानुरोधेन लिङ्गस्य सत्त्वं कारणत्वं वा, धूमकालीनवह्न्यनुमानं च यदा यत्र धूमस्तदा तत्र वह्निरिति व्याप्तिज्ञानादेव। अथवा धूमकालः पक्षतावच्छेदकः पक्षतावच्छेदकधर्मसमानाधिकरणं च पक्षधर्मताबलात् साध्यं सिद्ध्यतीति धूमकालीनवह्निसिद्धिः। यत्तु व्यापाराभावान्न परामर्शः कारणमिति, तत्तथैव, किन्तु व्याप्तिज्ञानं करणम् परामर्शो व्यापारः। न च परामर्शस्य संस्कारो व्यापारः, परामर्शस्य च चरमकारणत्वेन संस्कारोत्पादनसमयेऽनुमित्युत्पादनात्। नापि तर्कः, व्याप्तिग्राहकस्य विषयपरिशोधकस्य वा तस्य तदजन्यत्वादिति।**

**॥ तत्त्वचिन्तामणौ सम्पूर्णोऽयं परामर्शः ॥**

**किञ्चेति** मूलम्। लिङ्गमनुमितिसामान्यं प्रति कारणं नोच्यते, धूमभ्रमेण धूलीपटलात् लिङ्गव्यतिरेकेणापि अनुमितिर्जायते इति। न च तदेव लिङ्गमस्तु इति वाच्यम्, तस्य परामर्शाविषयत्वात्। **नापी**ति। लिङ्गं प्रमानुमितिं प्रति कारणम्, सा तु भ्रमानुमितिः, इति नोक्तदोषः। परामर्शस्त्वनुमितित्वावच्छेदेन कारणमित्यपि न वाच्यम्, दूषणमाह - **तद्विशेषेति**। परामर्शविशेषप्रमात्वेनानुमितेः प्रमात्वम् परामर्शवि[शे]षाप्रमात्वेनाप्रमात्वमिति। [69 B] **यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्य प्रयोजकत्वा**दिति मूलम्। तथानुमितिसामान्ये परामर्शसामान्यं प्रयोजकमिति। **[तद्]विशेषे**ति। अनुमितिविशेषे परामर्शविशेषः कारणम्। तथा चानुमितिप्रमायां परामर्शप्रमा कारणम्, अनुमितिभ्रमं प्रति परामर्शभ्रमस्य कारणत्वम्। तथा च परामर्श एव कारणम्, लिङ्ग(ङ्गं) नेत्यर्थः। पुनर्लिङ्गकरणतावादी शङ्कते - **अथे**ति। प्रमापरामर्शः प्रमानुमितिं प्रति कारणमित्युक्तम्। तत्र परामर्शस्य प्रमात्वं नाम विद्यमानलिङ्गविषयत्वम्। तथा च विद्यमानलिङ्गविषयकपरामर्शस्य कारणत्वमागतम्। ततो विशेषणत्वेन लिङ्गस्यैव लाघवात् कारणत्वमित्याशङ्कार्थः। उत्तरयति - **भाविने**ति। विद्यमानलिङ्गवि[ष]यत्वमात्रं नास्ति। मूलतः **भाविने**ति। यत्र भावि लिङ्गं यत्र धूमो भावी वर्तते तेनापि लिङ्गेन परामर्शस्य प्रमात्वं सम्भवति, परन्तु अनुमितिपूर्वसमये परामर्शस्य प्रमात्वानुरोधेन लिङ्गस्य विद्यमानत्वं करणत्वं वा न सम्भवति, कथम्?, अतीतलिङ्गेनापि परामर्शस्य प्रमात्वसिद्धेः। ननु तर्हि यदि लिङ्गस्य विद्यमानत्वमप्यपेक्ष्यते तदा धूमकालीन-वह्न्यनुमानं कथं स्यादित्यत आह - **धूमकालीने**ति। यदा यत्र धूमस्तदा तत्र वह्निरिति व्याप्तिज्ञानादेव धूम-कालीनवह्न्यनुमानं भविष्यति। तथा च लिङ्गस्य विद्यमानता नापेक्ष्यते इति न लिङ्गस्य कारणत्वम्। धूमकाली-नवह्निसिद्धौ प्रकारान्तरमाह - **अथवे**ति। धूमकालं पक्षतावच्छेदकीकृत्य पक्षतावच्छेदकधर्मसामानाधिकरण्यरूपं साध्यं पक्षधर्मताबालात् सिद्ध्यतीति कृत्वा धूमकालीनो वह्निः सेत्स्यति। धूमकालीनः पर्वतो वह्निमान् धूमात् इत्यत्र धूमकालः पक्षतावच्छेदकः, तेन सह वह्नेर्यत् सामानाधिकरण्यं तद् अनुमितेः फलम्। तथा च धूमकालीनो वह्निः सिद्ध्यति। **यत्त्वि**ति। केचित् परामर्शस्य कारणतां खण्डयति। परामर्शस्य संस्कारद्वारा करणत्वमाह - **चरमकारणत्वे**ति। अनुभव एव प्रमाणमिति भावः। न च तर्कोऽपि परामर्शस्य व्यापारः इति वाच्यम्। तर्को द्विविधः - एको व्याप्तिग्राहकः अन्यस्तु विषयपरिशोधकः। आद्यस्तु यदि निर्वह्निः स्यात् तदा निर्धूमः स्यात्। द्वितीयस्तु धूमो यदि वह्निं विना स्यात् तदाऽनुत्पन्नः स्यात्। तथा च एतन्मध्ये परामर्शेण एकोऽपि जनयितुं न शक्यते। तथा च सिद्धं व्याप्तिज्ञानं कारणम्, परामर्शो व्यापारः, अनुमितिः फलमिति।

**यथे**ति टीका। धूमकालं पक्षतावच्छेदकीकृत्य पक्षतावच्छेदकधर्मसाध्यसामानाधिकरण्यमनुमितिः फलमिति बाधग्रन्थे वक्ष्यामः। **क्रियये**ति टीका। यस्य क्रियया सहायोगः असम्बन्धो नास्ति तथा च यस्मिन् सति अवश्यं क्रिया भवति इत्यर्थः। **कारकत्वस्ये**ति टीका। कारकमध्ये व्यापारवत्त्वमागतम्। क्रियायोगव्यवच्छेदः कारण-मित्युक्तं तत् सर्वदा कदापि वा? नाद्यः इत्यत आह - **चक्षुरादी**ति। चक्षुरादेः सर्वदा क्रियायोगव्यवच्छेदाभावात्।

न द्वितीय इत्याह - **कर्मादावपीति**। कर्मादावपि सहकारसम[वा]धाने करणत्वं स्यादित्यर्थः। **अत्र वदन्ति** इति। सिद्धान्तितं परामर्शद्वारा व्याप्तिज्ञानस्य करणत्वम्, तत् खण्डयति। **यत्रेति** टीका। व्याप्तिशरीरं प्रविष्टाः ये सहचारादिपदार्थाः तेषां यदा विशकलितत्वेन [70 A] स्मरणं जातं तत्र विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्यायेन विशिष्टवैशिष्ट्यावगाहिपरामर्शो जातः यथा पर्वतवृत्तिर्धूमो वह्निव्याप्यो धूमवांश्चायमिति ज्ञानाद्य(द)नुमितिः तत्र परामर्शद्वारा व्याप्तिज्ञानस्य कारणता न सम्भवति। कथमिति चेत्, यतः परामर्शपूर्वं व्याप्तिज्ञानस्य असत्त्वात् विशिष्टवैशिष्ट्यावगाहिज्ञानात् पूर्वं व्याप्तिज्ञानस्य असिद्धेः। ननु विशकलितव्याप्तिघटकपदार्थस्मरणमेव व्याप्तिज्ञानं भविष्यतीति चेत्, न, व्याप्तिर्नाम साधनसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यरूपा तत्र च घटकपदार्थज्ञानं विशिष्टव्याप्तिज्ञानं न भवति तथा च तादृशस्थले परामर्शद्वारा व्याप्तिज्ञानस्य कारणत्वं न सम्भवतीत्यर्थः अयमत्र प्रघट्टकार्थः। साधनसमानाधिकरणप्रतियोगिताऽवच्छेदकात्यन्ताभाव(वा)प्रतियोगीत्यादिपदार्थानां विशकलिततया स्मरणेन कृत्वा विशिष्टवैशिष्ट्यावगाहिज्ञानं परामर्शरूपम्, तेन चानुमितिर्जायते। तत्र च व्याप्तिज्ञानस्य कारणता न सम्भवति तद्घटकानां विशकलितस्मरणादेव विशिष्टवैशिष्ट्यस्य जातत्वात्। दूषणान्तरमाह - **किञ्चेति**। **यत्रेति**। स पर्वतो वह्निव्याप्यधूमवान् इति परामर्शादनुमितिः जायते, तत्र व्याप्तिज्ञानकारणता न सम्भवति। **न चेति**। स्मृतिकारणीभूतो योऽनुभवः पूर्वानुभवः स एव व्याप्तिज्ञानं भविष्यतीति आशङ्कार्थः। **तस्येति**। अनुभवेन संस्कारो जन्यते, तेन संस्कारेण च व्याप्तिस्मरणमिति व्यवहितं तत्। ननु व्याप्तिज्ञानस्य कुत्रापि अनुमितिकारणता न स्यात्, परामर्शेन व्यवधनात् इत्यत आह - **व्यापारमात्रस्येति**। यावान् व्यापारः तस्य करणव्यवधायकत्वायोगात्, तथा च तेन का(क)रणं न व्यवधीयते, करणेन क्रियायां जनयितव्यायां व्यापारो व्यवधायको न भवति, अन्यथा यागस्यापि स्वर्गं प्रति जनकता न स्यात् अपूर्वव्यापारसिद्ध्यर्था स्वर्गजनकत्वकल्पना भज्येत अपूर्वेण व्यवधानात्। ततो न व्यापारः कुत्रापि व्यवधायक इति सिद्धम्। **अनुमित्यन्तर** इति। व्याप्तिज्ञानं करणं न भवति यत्रानुमित्यन्तरे व्यभिचारात्, यत्र शाब्दपरामर्शो जातस्तत्र व्याप्तिज्ञानं नास्ति अतस्तदभावेऽप्यनुमितिः। आप्तवाक्याद् वह्निव्याप्यधूमवान् अयम् इतिरूपात् यत्रानुमितिस्त(र्य)त्र च प्रत्यक्षोऽपि परामर्शस्तत्रापि व्याप्तिज्ञानाभावेऽप्यनुमितिरिति व्यभिचारः। अथ व्याप्तिज्ञानस्यान्यथासिद्धत्वमानयति। **वस्तुत** इति। व्याप्तिज्ञानमन्यथासिद्धम् यत्र स्मृतिरूपपरामर्शो जायते यथा स पर्वतो वह्निव्याप्यधूमवान् इति, यत्र पूर्वानुभवः परामर्शं प्रत्युपक्षीणं(णः)। अन्यत्र क्लृप्तेत्यादिका अन्यथासिद्धिर्व्याप्तिज्ञानस्थलादन्यत्र विशकलितस्थले आप्तवाक्यादिस्थले क्लृप्तनियतपूर्ववर्ती परामर्शः, तेनैवानुमितिसम्भवे तत्सहभूतत्वं परामर्शसहभूतत्वं व्याप्तिज्ञानस्यान्यथासिद्ध[त्व]मिति। **अन्यथेति**। यदि अन्यथासिद्धत्वं नोच्यते तदा स्मृतिजन्ये प्रत्यभिज्ञानादौ आदिशब्दात् स्मृतिध्वंसस्य पूर्वानुभवस्यापि कारणता स्यात्। पूर्वानुभवेन स्मृतिर्जन्यते तथा च प्रत्यभिज्ञानम्, तत्र पूर्वानुभवोऽन्यथासिद्धः सोऽपि प्रत्यभिज्ञाने कारणं

स्यात्। प्रथमतो धूमो वह्निव्याप्य इति ज्ञानम्, तदनन्तरं वह्निव्याप्यधूमवान् पर्वत इति विशिष्टज्ञानं [70 B] जातम्, तत्र व्याप्तिर्विशेषणम्, तदनन्तरं वह्निव्याप्यवत्पर्वतवान् अयम् इति विशिष्टवैशिष्ट्यात्मकं प्रत्यक्षरूपं जातम्, तत्र विशिष्टज्ञानजनकं यद् विशेषणज्ञानं व्याप्तिज्ञानं तस्यापि करणत्वं स्यात्। न च एवम्, बहुव्याकुली स्यात्। अनुमितौ व्याप्तिज्ञानवत् पक्षतावच्छेदकं पर्वतत्वं तदपि विशेषणं भवत्येव तस्यापि करणत्वं स्यात्। मध्ये शङ्कते - **न चेति** टीका। अनुमितौ अन्यत् करणं न सम्भवतीति व्याप्तिज्ञानमेवागतमित्याशङ्कार्थः। मन एव सर्वत्र करणमस्तु, व्याप्त्यपेक्षया मनसो लाघवात्। क्लृप्तकल्पनयोः मध्ये क्लृप्तं बलवदिति न्यायेन मनसः साधारणत्वेन कारणत्वं क्लृप्तमस्ति इति कृत्वा मनसस्तत्रा(त्र) साधारणत्वेन करणता कल्पनीया। **स्मृतीति**। मनस्येव किं प्रमाणम्? तत्राह - स्मृत्यनुमितिकरणत्वम्, तत्साधकं मन एव। अत्र वदन्तीत्यारभ्यैतावत्पर्यन्तं पूर्वपक्षः। **तदपर इति**। व्याप्तिज्ञानं करणं न किन्तु मन एवेति यदुक्तं तद्दूषयति - **अनुमिताविति**। यदि अनुमितौ मनः कारणं तदा तस्याः अनुमितेः मानसप्रत्यक्षता स्यात्। किंवत्? औत्प्रेक्षिकज्ञानवत्। यदा कविः उत्प्रेक्षां करोति तदा इन्द्रियान्तरव्यापारो नास्ति, तदा मनस एव औत्प्रेक्षिकं ज्ञानं जायते, तद्वत् अनुमितेरपि मानसप्रत्यक्षता स्यात्। न चेष्टापत्तिः। तत्राह - **करणान्तरेति**। करणान्तरासहकृतं यन्मनः तज्जन्यत्वमेव मानसत्वे नियामकम्, तत्र परामर्श एव करणान्तरं भविष्यतीति न च वाच्यम्। **न चेति तस्मादिति**। यत्र परामर्शजनकज्ञानत्वं तत्रानुमितिकरणता, परामर्शजनकज्ञानत्वं तु पक्षतावच्छेदकज्ञानादीनामप्यस्तीति तेषामपि करणत्वेनेष्टापत्तिरेवेति नाव्याप्तिः क्वापि, तथा च विशकलितसहचारादिपदार्थस्मृतिस्थले परामर्शजनकं ज्ञानम् तदपि भवत्येवेति। तदपि लक्ष्यमेवेति नाव्याप्तिः। परामर्शजनकज्ञानत्वेन करणत्वे दृष्टान्तमाह - **मननेति**। श्रवणादिरूपा या प्रतिपत्तिः ज्ञानं तासां मननव्यापारकश्रवणत्वेन यथा श्रवणादीनां मुक्तिं प्रति करणता। यथा श्रवणस्य मुक्तिं प्रति करणता मननव्यापारकत्वेन, मननस्य तु तत्त्वसाक्षात्कारव्यापारकत्वेन, तत्त्वसाक्षात्कारस्यापि मिथ्याज्ञानध्वंसव्यापारकत्वेन, तथा च प्रकृतेऽपि परामर्शजनकज्ञानत्वेन व्याप्तिज्ञानादीनां करणत्वम्। मध्ये शङ्कते - **न चेति**। यथा विशिष्टवैशिष्ट्यावगाहि ज्ञानं प्रति विशेषणविशेषणज्ञानस्यान्यथासिद्धत्वेन न हेतुत्वम्, विशिष्टवैशिष्ट्यज्ञानं दण्डी पुरुष इति ज्ञानम्, तत्र विशेषणविशेषणज्ञानं दण्डत्वज्ञानम्, तद् यथा अन्यथासिद्धत्वेन न कारणं तथा प्रकृतेऽपि व्याप्तिज्ञानं - अनुमितिहेतुः परामर्शः तद्धेतुतया तत्कारणतयाऽन्यथासिद्धत्वेन - [न] कारणमित्याशङ्कार्थः। **येनेति**। यद्रूपावच्छिन्नस्यान्यथासिद्धत्वं तदन्यरूपावच्छिन्नस्य कारणतायां बाधकं नास्ति। यथा कुलालपितृत्वेन घटं प्रति अन्यथासिद्धस्यापि कुलालत्वेन नान्यथासिद्धिः तथा प्रकृतेऽपि आनयति। तदिह प्रकृते व्याप्तिज्ञानस्थले व्याप्तिज्ञानादीनामनुमितिहेतुपरामर्शहेतुत्वेनान्यथासिद्धावपि उक्तरूपेण परामर्शजनकज्ञानत्वेन नान्यथासिद्धिरित्यर्थः। मध्ये शङ्कते - **न चेति**। कुलालपितृस्थले कुलालपितुः कारणताग्राहकौ अन्वयव्यतिरेकौ स्तः प्रकृते तु न स्तः इत्याशङ्कार्थः। **तदिति**। यद्यपि तत्रान्वयव्यतिरेकौ न स्तः तथापि या क्रिया साऽवश्यं [71 A] करणजन्या इति

परिशेषपर्यवसितं यदनुमानं तस्यानुमानस्य कारणताग्राहकस्य सत्त्वात् तथा च या क्रिया सा करणजन्या इति अनुमानेन व्याप्तिज्ञानादीनां करणत्वमागतम् । **एतेनेति** । यदि परामर्शजनकज्ञानत्वेन कारणतोच्यते तदा पक्षतावच्छेदकज्ञानस्यापि करणता स्यादिति केनचिदनिष्टापादनं क्लृप्तं तदुद्धरतीत्यर्थः । पूर्वोक्तं व्यभिचारं निरस्यति - **न चेति** । व्याप्तिज्ञानं परामर्शजनकं न भवति स्मृतिरूपपरामर्शादप्यनुमितिर्जायत इति व्यभिचारः । **तज्जनकेति** । स्मृतिजनको योऽनुभवः तदेव तत्र व्याप्तिज्ञानमिति न व्यभिचार इत्यर्थः । **न चेति** । संस्कारेण व्यवहितः पूर्वानुभवः कथमनुमितिं प्रति करणम् ? व्यापारा(र)त्वेन व्यवधानात् करणं तत्र(त्र) सम्भवतीत्याशङ्कार्थः । **अनुमितिमिति** । वह्निव्याप्यधूमवानिति पूर्वानुभवस्याव्यवहितत्वमानयति । अनुभवस्य यदाऽनुमितिं प्रति करणता तदा स्मृतिरूपपरामर्शो व्यापारः, यदा स्मृतिरूपपरामर्शं प्रति करणता तदा संस्कारो व्यापारः, तथा चानुमितिं प्रति यदा पूर्वानुभवस्य करणता तदा संस्कारो व्यापारो न भवति इति भिन्नव्यापाराः । एतदेवाह - संस्कारोऽनुमितिं प्रति कारणं न भवति इत्युपपादयति । **न हीति** । अयं नियमो नास्ति यावान् व्यापारस्य जनकस्तावान् पुत्रस्यापीति जनक इति । **न चेति** । व्यापारः परामर्शः तज्जनकतया पूर्वानुभवस्य, स अनुमितिव्यवधायको भविष्यति इति न । **चक्षुरिति** । व्यभिचारं नयति । पूर्वं चक्षुषः कर्म जातम्, ततः चक्षुर्विषयसंयोगो जातः घटचक्षुःसंयोगो जातः, तदनन्तरं घटसाक्षात्कारः इति । तत्र साक्षात्कारे चक्षुःकर्मणः कारणता साक्षात्कारं प्रति नास्ति, व्यापारं संयोगं प्रति कारणताऽस्ति; न च तेन व्यवधानं कारणताप्रतिबन्धकम्, कारणता च संयोगस्यास्तीति सा न प्रतिबध्यते इति पूर्वोक्तव्यभिचारः । अथ लाघवादाह - परामर्शजनकत्वेनैवास्तु, किं परामर्शजनकज्ञानत्वेन ? इत्याह - **अस्तु वेति** । तथा च संस्कारोऽपि अनुमितिकारणमास्ताम् परामर्शजनकत्वेन रूपेणेत्यर्थः । **तत्रेति** अनुमितौ इत्यर्थः । **न चेति** । संस्कारश्चेदनुमितिं प्रति करणं तदाऽनुमितिरपि स्मृतिरूपा स्यादित्यर्थः । **संस्कारेति** । तत्रैव स्मृतित्वं यत्र संस्कारत्वेन जनकता, प्रकृते च परामर्शजनकत्वेन करणतायां किमपि बाधकं नास्तीत्यर्थः । **अन्यथेति** । यदि संस्कारमात्रजन्यत्वेनैव स्मृतित्वं तदा येषां मते लिङ्गमनुमितौ करणं तन्मते संस्कारलिङ्गकानुमितौ अयं ज्ञानवान् संस्कारवत्त्वात् इत्यत्र संस्कारजन्यत्वेन स्मृतित्वं स्यात् । **किञ्चेति** । संस्कारस्य स्वध्वंसं प्रति प्रतियोगितया कारणत्वेन तत्रापि स्मृतित्वापत्तिरित्यपि ज्ञेयम् । **वस्तुत इति** । यत्र समानविषयकः संस्कारः करणं तत्रैव स्मृतित्वम् । यथा घटगोचरः संस्कारः तद्विषयैव स्मृतिः, तत्रैव संस्कारजन्यत्वेन स्मृतित्वम् । प्रकृते च परामर्शगोचरः संस्कार अनुमितिगोचरा स्मृतिरिति भिन्नविषयत्वेन नानुमितेः स्मृतित्वमिति भावः । **अत एवेति** । यतः समानविषयसंस्कारजनकत्वेनैव स्मृतित्वम् अत एव समसमयोत्पत्तिकत्वं बाधकम् । कोऽर्थः ? यदा परामर्शोऽनुभवरूपो जातस्ततः संस्कारोऽपि जायते अनुमितिरपि जायते इति कृत्वा संस्कारस्यानुमित्या समसमयोत्पत्तिकत्वम्, तथा च संस्कारो व्यापारो न भवति अनुमितौ [71 B] एककालोत्पन्नत्वादुभयोरित्यर्थः । **अन्यथेति** । यदि समसमयोत्पत्तिकत्वं बाधकं नोच्यते तदा अनुमितेः स्मृतित्वापत्तिरिति उक्तिसम्भवः स्यादित्यर्थः ।

**अत्रेति**। [प]क्षे समाधानं स्वमतेनाह - यथा विशेषणविशेषणज्ञानं वैशिष्ट्यज्ञाने कारणं न भवति। यथा दण्डत्वज्ञानं दण्डी पुरुष इति विशिष्टज्ञानोपक्षीणं कारणं न भवति तथा प्रकृते पूर्वानुभवपक्षतावच्छेदकज्ञानव्याप्तिस्मरणादीनां परामर्शोपक्षीणानां परामर्शं जनयित्वा अनुमितौ। अन्यथासिद्धत्वेऽपि हेतुत्वमन्वयव्यतिरेकाभ्यां वा अनुमितिकरणत्वं करणान्तरानुपपत्त्या वा कल्पनीयम्। **तदभावादिति**। यत्र परामर्शोऽस्ति आप्तवाक्यादिनाऽस्ति तत्र व्याप्तिस्मरणादिव्यतिरकेणानुमिति(णान्वय)व्यतिरेकौ न स्त इति कृत्वा अन्वयव्यतिरेकाभ्यां करणत्वं व्याप्तिज्ञानादीनामसिद्धम्। नान्त्यः। यदि करणान्तरानुपपत्त्या परामर्शजनकत्वेन तेषां करणत्वं तदा परामर्शजनकत्वेनैव किमर्थं [न] कल्पनीयम्? लाघवात् परामर्शपूर्ववर्तित्वेनैव करणताऽस्तु, परामर्शजनकत्वे अनन्यथासिद्धत्वनियमादिप्रवेशे गौरवम्। यदि परामर्शपूर्ववर्तित्वेनेष्टापत्तिः ज्ञानादीनां करणत्वे इष्टापत्तिस्तदा दूषणमाह - **तथा चेति**। तेन रूपेणाकाशादीनामपि करणता स्यात्। ननु आकाशादीनामानन्त्यात् न तद्धेतुतापत्तिरित्यत आह - **अवच्छेदकेति**। यदि कारणतावच्छेदकं परामर्शपूर्ववर्तित्वं तच्चेल्लघु तदा व्यक्तिगौरवं व्यक्त्यानन्त्यं न दोषायेत्यर्थः। **दोषत्व** इति। यदि व्यक्तिगौरवदोषः तदा परामर्शपूर्ववर्तित्वापेक्षयाऽपि परामर्शप्रागभावत्वेनैव लाघवात् परामर्शप्रागभावो यत्र तत्त्वेनैव हेतुत्वम्, तथा च परामर्शप्रागभाव एव कारणं न त्वाकाशादिरिति सिद्धम्। ननु परामर्शप्रागभावः परामर्शेनान्यथासिद्ध इति न परामर्शप्रागभावः कारणमित्यत आह - **तुल्यमिति**। तदा व्याप्तिस्मरणादीनां परामर्शजनकत्वेनान्यथासिद्धत्वात् करणत्वं न स्यादिति तुल्यम्। ननु करणान्तरानुपपत्त्या अन्यथासिद्धमपि प्रागभावस्य करणत्वं कल्पनीयम्, तदा व्याप्तिस्मरणादीनां करणान्तरानुपपत्त्या कारणत्वमस्तु इति तुल्यमित्यर्थः। यस्मिन् पक्षे परामर्शजनकत्वेन करणता तन्मते परामर्शजनकीभूतसंस्कारस्य यथा करणत्वं तद्वत् परामर्शप्रागभावस्यापि करणत्वं भवति। तथा च करणान्तरानुपपत्त्यैव परामर्शप्राग[भाव]स्यैव हेतुत्वमस्तु न तु परामर्शजनकत्वेन गौरवात् इत्यर्थः। **एवं चेति**। पूर्वानुभवस्य व्याप्त्यनुभवस्य संस्कारव्यवहितस्य करणत्वं पूर्वं यथाकथञ्चिदानीतम् अथ च व्याप्त्यनुभवस्य संस्कारस्य चेदानीं द्वयोरपि करणत्वमुक्तं तदपि न भवति इत्यत आह - **अपर इति**। यतः परामर्शप्रागभावत्वेन प्रागभावस्य(वः) करणम् परामर्शो व्यापारः अनुमितिः फलमिति लाघवात् तु [द्व]यं न भवति इत्यर्थः। **वस्तुत** इति। अथ परामर्शप्रागभावस्यापि करणता दूष्यते। परामर्शप्रागभावस्यान्यथासिद्धतया अनुमितिकरणतायां प्रमाणं नास्ति इति कृत्वा स न तत्र हेतुः। यदि करणान्तरं न सम्भवतीति परामर्शप्रागभावः करणमिति चेत् तदा मन एवानुमितिकरणमास्ताम् किं परामर्शप्रागभावेनेत्याशङ्कते - **तथापीति**। प्रागभावस्य वा [72 A] करणत्वं मनसो वा करणत्वमित्यत्र किं विनिगमकमित्याशङ्कार्थः। **मनस** इति। मनसः अनुमितिकरणत्वं क्लृप्तमस्ति। कथम्? ज्ञानमात्रं प्रति मनसः करणत्वात्। परामर्शप्रागभावस्तु अनुमितिकरणत्वेन क्लृप्तो नास्तीति न परामर्शप्रागभावः करणमित्यर्थः। किञ्च प्रागभावत्वमुपाधिर्मनस्त्वं जातिरिति कृत्वा तस्य करणत्वे लाघवम्। न चैवम् अनुमितेर्मनोजन्यत्वेन मानसत्वं स्यादिति। तत्र हेतुमाह -

**करणान्तरेति**। करणान्तरासहकृतमेव मनोजन्यत्वमेव मानसत्वे प्रयोजकम् तच्च प्रकृतेऽस्त्येवेति कृत्वाऽनुमितेर्मानसत्वं स्यात् इत्याशङ्कार्थः। अथ अनुमितेर्मानसाध्यक्षताभावमुपपादयति। करणान्तर[त्वा]म् अनुमिति-करणान्तरत्वं हि प्रमित्यन्तरकरणत्वमेव। अन्यथाऽतिप्रसङ्गः। सुखादिज्ञाने मानसत्वं न स्यात् करणान्तरासहकृतत्वं मनोजन्यत्वं नास्ति तत्राप्यात्मादीनां सहकारित्वात्, अन्यथाऽऽत्मादीनामपि करणान्तरसहकृतत्वमेव मनस इत्यतिप्रसङ्गः। तथा च करणान्तरासहकृतत्वमित्यस्य कोऽर्थः ? प्रमित्यन्तरे यदसाधारणं करणं तदसमवहितं यन्मनः तत्प्रकारकत्वेन न तस्य परामर्शस्य हेतुत्वमिति न व्यभिचारोद्धारः। अयं भावः - विशेष्यः पर्वतः तत्र विशेषणं धूमः तत्र पर्वतवृत्तित्वं विशेषणमिति न्यायेन यत्रैतादृश एव परामर्शो जातः तत्र वह्निव्याप्यधूमवान् इति न जातः तत्र व्याप्तिप्रकार[क]पक्षधर्मताज्ञानस्यानुमितित्वे व्यभिचार इति न तस्य तत्त्वेन हेतुत्वम्, तस्मात् मनः करणम् परामर्शो व्यापारः अनुमितिः फलमित्येवायातमित्यर्थः। **विषयेति** टीका। ननु मूले पूर्वमुक्तं यत्तु व्यापाराभावात् न परामर्शः करणमिति, तत्र तर्क एव व्यापारो भविष्यतीति। अत आह - व्याप्तिग्राहको विषयपरिशोधकश्च तर्कः परामर्शजन्यो न भवति। व्यापारस्तु स एव भवति यज्जनयित्वैव यं जनयति स एव तस्य व्यापारः सन्निकर्षादिवत्। परामर्शस्तु तर्कं जनयित्वैवानुमितिं जनयतीति नियमो नास्ति। तर्कस्यानुमितिकारणता नास्तीति कृत्वा न परामर्शव्यापारः सः इति मूले उक्तम्। परामर्शजन्यः तर्को न भवतीति। अनुमितावेवोपयोगाभावात् तदभावेनैव उपयोगाभावेनैव तर्कस्य परामर्शव्यापारत्वाभावः उपपादनीयः इत्याशङ्कते - **नन्विति**। मध्ये शङ्कते - **न चेति**। विरोधिनी या शङ्का यथा धूमः क्वचिद् वह्निं विनापि भविष्यतीति रूपा तन्निवृत्तिः तर्कसाध्येति तद्द्वारा अनुमितिं प्रति उपयोगिता [इति] न च वाच्यम्। **परामर्शस्यैवेति**। वह्निव्याप्यधूमवान् इति परामर्शे च सति विरोधिनी शङ्कैव नोदेति तस्य परा[मर्शस्यैव] विशेषदर्शनत्वात्, विरोधिशङ्कानिवृत्तिस्तु परामर्शेनैव क्रियते किं तर्केण ? इत्याशङ्कार्थः। तर्कस्यानुमितावुपयोगमानयन्ति। **अत्राहुरिति**। परामर्शे विद्यमाने या स्वारसिका शङ्का [सा न भवति], या शङ्का अन्याहिता [सा] न(तु) भवति। यथा घटस्य विशेषदर्शने घटोऽयमिति ज्ञाने तस्य स्वारसिका घटविषयिणी शङ्का नोदेति, पर अन्याहिता भवति। तथा प्रकृतेऽप्यना(न्या)हिता शङ्का भविष्यति, इदमेव द्रढयति। **कथमिति**। यदि विशेषदर्शने विद्यमाने अन्याहिता शङ्का नोदेति तदा प्रामाण्यसंशयेनार्थः(र्थ)निश्चये जातेऽपि व्यवसायविषयो घटोऽयमिति ज्ञानं तस्य व्यवसायस्य विषयो घटः तस्य संशयो जायते, स न स्यात्। यतस्तत्रार्थः(र्थ)निश्चयो व्यवसायेन जातोऽस्ति तथापि प्रामाण्यसंशयेन अर्थः(र्थ)संशयो भवत्येव। प्रकृतेऽपि दृष्टान्तार्थमानयति। **तदिहेति**। इह परामर्शस्थले परामर्शानन्तरं स्वारसिका या शङ्का वह्न्यभाववान् धूमः इति शङ्का निवर्तते एव, परं बाधकप्रमाणं साध्याभावसाधकं यत् प्रमाणं तत्सन्देहनिबन्धनः साध्याभावसन्देहो भविष्यत्येव। तथा चात्र किञ्चित् साध्याभावसाधकं भविष्यतीति निबन्धना अन्याहिता साध्याभावशङ्का भविष्यतीति तन्निरासार्थं तर्कोपयोग इति सिद्धान्तरहस्यम्। संमतिमाह - **तदुक्तमिति**। विरोधिप्रमाणं साध्याभावसाधकं

प्रमाणम्, तत्शङ्कयाऽप्यनुमितिविलम्बो मुहूर्तमात्रं भवतीति तदपनोदार्थं तर्कादर इति अर्थः। एतदेव विवेचयति - **तथा चेति**। यथा धूमेन हेतुना वह्निमता पर्वतेन भवितव्यम्, तथा कुतश्चित् कस्माच्चिदपि पाषाणवत्त्वादितौ(तो) वह्न्यभाववताऽपि पर्वतेन भवितव्यम् इति शङ्का उदेत्येव। तथा च परामर्शे विद्यमाने तत् किं वह्न्यभावसाधकमिति जिज्ञासाऽपि भवति, सा च जिज्ञासा तर्केणोपनीयते इत्यन्वयः। तर्कमाह - **यदीति**। इति विषये साध्ये तर्केण परिशुद्धे शङ्का नाऽऽस्कन्देत स(इ)ति शङ्काविरहात् अनुमितिः निष्प्रत्यूहा भवतीति। **यत्र चेति** यत्र स्वभावादेव शङ्का नोदेति तादृशस्थले तर्कस्य नोपयोगः इति तर्को न व्यापार इति सर्वमवदातम्।

**। इति परामर्शप्रकाशिका।**

## । केवलान्वय्यनुमाननिरूपणम् ।

**तच्चानुमानं त्रिविधं केवलान्वयि-केवलव्यतिरेकि-अन्वयव्यतिरेकिभेदात् । तत्रासद्विपक्षं केवलान्वयि, तथाहि केवलान्वयिनोऽभिधेयत्वस्य न विपक्षः अभिधानेऽनभिधाने च विपक्षत्वव्याघातात् । अथ यथा आकाशशब्दाच्छब्दाश्रयत्वमनभिधेयमप्युपतिष्ठते, तथाभिधेत्वविपक्षस्यानभिधेयत्वेऽपि पदादुपस्थितिः स्यात्, एवं चाभिधेयत्वं कुतोऽपि व्यावृत्तं धर्मत्वात् गोत्ववदिति चेत् । न, व्यावृत्तत्वस्याव्यावृत्तत्वे व्यावृत्तत्वमेव केवलान्वयि, व्यावृत्तत्वे यत एव व्यावृत्तं व्यावृत्तत्वं तदेव केवलान्वयीति धर्मत्वस्यानैकान्तिकत्वात्, एवमत्यन्ताभावप्रतियोगित्वस्यात्यन्ताभावाप्रतियोगित्वे अत्यन्ताभावप्रतियोगित्वमेव केवलान्वयि, अत्यन्ताभावप्रतियोगित्वे यन्निष्ठात्यन्ताभावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं तदेव केवलान्वयि । न चात्यन्ताभावप्रतियोगित्वं व्यावृत्तत्वं च नानेति वाच्यम् । अनुगतप्रतीतिबलेन गोत्ववत् तयोः सिद्धेः ।**

### । केवलान्वय्यनुमाननिरूपणम् ।

अथ व्याप्तिविशिष्टपक्षधर्मजन्यं ज्ञानमनुमितिः, तत्करणम् अनुमितिरि(अनुमानमि)ति सिद्धम् । तत्कतिविधमिति प्रसङ्गसङ्गत्याह - **तच्चे**ति । प्रकृते यथाश्रुते वक्ष्यमाणानां ज्ञानभेदानामनुमानेऽसम्भवात् अन्यथा व्याचष्टे - अनुमानविषयीभूतमित्यर्थः । तथा च परामर्शस्य त्रिविधत्वं न सम्भवति इति कृत्वा अनुमानविषयीभूतं लिङ्गमित्यर्थः । **वक्ष्यमाणे**ति । अयं घटः प्रमेयत्वात् अत्र यद्यपि केवलान्वयिलिङ्गत्वमस्ति तथापि नायं केवलान्वयीति साध्याभावः (वे) सत्त्वात् इत्यन्यथा व्याख्यातम् - केवलान्वयिसाधकं लिङ्गं केवलान्वयीति तात्पर्यमिति । **असद्विपक्षमि**ति । अस्यापि केवलान्वयिधर्मसाधकत्वे तात्पर्यम् । यथाश्रुतदूषणमाह - **सिद्धी**ति । विपक्षः सिद्धो वा असिद्धो वा ? यदि सिद्धस्तदा तस्याभावो न सम्भवति । असिद्धः चेत् तदा कस्याभावः प्रतियोग्यनिरूपणात् इति कृत्वा सिद्ध्यसिद्धिव्याघातभिया यत्र केवलान्वयिधर्मस्य साध्यता तत्रैव केवलान्वयितेति ज्ञेयम् । अथ केवलान्वयिनः अभिधेयस्य विपक्षं शङ्कते - **अभिधेयत्वस्ये**ति । अभिधेयत्वस्य यो विपक्षः स अभिधेयोऽनभिधेयो वा ? तथा स विपक्षश्चेत् अभिधेयस्तदा विपक्षत्वं बाधितम्, तत्राप्यभिधेयस्य विद्यमानत्वात् । अनभिधेयश्चेत् तदा विपक्षः सर्वथा न सम्भवति । कथम् ? अलीकत्वात् शशशृङ्गवत् । अयमर्थः - यदि तत्राभिधेयत्वाभाववति

शब्दशक्तिविषयत्वं नास्ति तदा कथमनेन विपक्षपदेनाभिधानमिति विरोधः । **अभिधेयत्वस्ये**ति टीका । अभिधेयत्वं नाम शब्दशक्तिविषयत्वम्, तस्य न विपक्षः । तत्र हेतुमाह - **आकाशत्वादेरपि** [इति] । [73 A] आकाशपदेनाशक्यमपि आकाशत्वादिकं तद्वस्तुपदशक्यं भवत्येव । तथा च यद्यपि आकाशत्वम् आकाशपदशक्यं न भवति तथापि वस्त्वादिपदशक्यं भवत्येव । तथा विपक्षो यस्त्वया वाच्यस्तत्रान्ततो वस्त्वादिपदशक्तिविषयत्वं भविष्यति । तथा च विपक्षत्वं तस्य न सम्भवति, अभिधेयं तु वस्त्वेवेत्यर्थः । **अभिधाने**ति । यदि केनचित् पदेन तदुच्यते तदा तस्याभिधेयत्वमेव कथम् ?, तस्यानभिधेयत्वमनभिधान इति । यदि अभिधेयत्वाभाववान् पदशक्तिविषयो न भवति तदा स वस्तुपदेनाप्यभिधातुं न शक्यते अलीकत्वात् शशशृङ्गवत्, अवस्तुत्वादनभिधेय इत्यर्थः । वस्तुपदेनाप्यभिधेयो न स्यात् इति भावः । **पदाशक्यते(ता)पी**ति । यद्यपि विपक्षे पदस्य शक्तिर्नास्ति तथापि पदजन्यज्ञानविषयत्वमस्त्येव, पदेन तु तद्विषयकं ज्ञानं जन्यत एव । तथा च वस्तुत्वं विपक्षमपीदृशाभावविषयत्वं भविष्यतीत्याभासार्थः । **अथे**ति मूलम् । यद्यप्यभिधेयविपक्षोऽनभिधेयो भवति तथापि विपक्षपदस्य तत्र(त्रा)शक्यभावेऽपि पदजन्यज्ञानविषयत्वं वर्तत एवेत्यर्थः । अभिधेयत्वविपक्षं द्रढयति - **अभिधेयत्वमि**ति मूलम् । **उक्ते**ति टीका ।-यद्यपि अभिधेयो न भवति पदाशक्यत्वात् तथापि पदजन्यज्ञानविषयत्वेन विपक्षत्वं भविष्यति इति व्याघातनिरस्ते अनुमानतोऽपि विपक्षत्वं साधयति इत्यर्थः । **अन्यथे**ति टीका । यदि व्याघातमनिरस्यैव विपक्षत्वमनुमानेन साध्यते तदा अनुमानं बाधितं स्यादित्यर्थः । अनुमानं दूषयति - **व्यावृत्तत्वस्ये**ति मूलम् । व्यावृत्तत्वं साध्यं कृतं यत् तत् कुतोऽपि व्यावृत्तं न वा ? अत्र द्वितीये न व्यावृत्तं चेत् तदा तदेव केवलान्वयीति, एतदेवाह - **धर्मत्वस्ये**ति मूलम् । धर्मत्वं व्यावृत्तत्वे वर्तते, परं व्यावृत्तत्वं नास्ति यतस्ततो व्यावृत्तत्वं व्यावृत्तमित्यर्थः । **एवमि**ति । अभिधेयत्वमत्यन्ताभावप्रतियोगिधर्मत्वात् गोत्ववत् । अत्रापि अत्यन्ताभावप्रतियोगित्वम् अत्यन्ताभावप्रतियोगि भवति वा न वा ? द्वितीये अत्यन्ताभावप्रतियोगित्वस्यैव केवलान्वयित्वमागतम्, तत्रैव व्यभिचारः न प्रथमः(मे) । अत्यन्ताभावप्रतियोगित्वम् अत्यन्ताभावप्रतियोगि चेत् तदा यद्वृत्ति अत्यन्ताभावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं तत्र धर्मत्वमस्ति, अत्यन्ताभावप्रतियोगित्वं तावद्भिन्नमिति कृत्वा न व्यभिचारः । अनुमानं तु ईदृशम् - व्यावृत्तत्वं कुतोऽपि व्यावृत्तम् धर्मत्वात् इत्यत्र कुतोऽपि व्यावृत्तत्वरूपं यत् तस्याभावः कुत्रापि नास्ति इति कृत्वा तत्र साध्यमपि वर्तते इति न व्यभिचारः इत्याशङ्कार्थः । **अनुगते**ति । यथा अयं गौरिति प्रतीतिबलेनानुगतगोत्वं सिद्ध्यति तथा प्रकृतेऽपि व्यावृत्तं व्यावृत्तमित्यनुगतप्रतीतिबलेन व्यावृत्तत्वमप्येकमेवेति व्यभिचारववे(? व्यभिचारवारणाये)त्यर्थः । **यद्धर्मे**ति टीका । केवलान्वयि साध्यं धर्मो यस्य तं धर्मं निरूपयति । मतान्तरमुपन्यस्यति - **यस्त्वि**ति टीका । **उक्तप्रमाणे**ति । अत्यन्ताभावप्रतियोगित्वस्येत्यादिना अत्यन्ताभावाप्रतियोगित्वं केवलान्वयिधर्मलक्षणं तवाभिमतम् । तथा चाव्याप्तिः संयोगात्यन्ताभावे भवति, संयोगात्यन्ताभावः केवलान्वयी भवति सर्वत्र संयोगात्यन्ताभावस्य विद्यमानत्वात् । संयोगात्यन्ता-

भावस्याभावः संयोगः, तत्प्रतियोगित्वमेव संयोगात्यन्ताभावेऽस्ति इति आशङ्कते - **यदीदमिति** टीका। यदा अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिदं लक्षणं क्रियते तदा वक्ष्यमाणो यः संयोगात्यन्ताभावः स केवलान्वयी [73 B] न स्यात्। तथा चानेनैव क्रमेणावतारणीयोऽयं ग्रन्थः। ननु लक्ष्ये कः इत्याकाङ्क्षायां न तत्रेत्यादिको ग्रन्थोऽवतारणीयः। तत्र युक्तिमाह - **लक्षणेति**। लक्षणस्य चेत् प्रश्नः कृतो नास्ति तदा वृत्तिमदत्यन्तेत्यादिलक्षणप्रणयनं विरुद्धम्। यदि लक्ष्यस्यैव सङ्ग्राह्यप्रश्नस्तदा लक्षणप्रणयनमग्रे निरर्थकं स्यादिति केचिद् वदन्ति। **तन्नेति**। दूषयति - **नाप्याश्रयेति**। यद्यनेन प्रकारेण ग्रन्थस्यावतारस्तदाऽयं ग्रन्थोऽसङ्गतः स्यात्। न हि अव्याप्यवृत्तिसंयोगात्यन्ताभाववत् आश्रयनाशजन्यगुणनाशात्यन्ताभावोऽपि केवलान्वयित्वेन सङ्ग्राह्योति(ऽस्ति)। असङ्गतत्वमेवोपपदायति। अव्याप्यवृत्तित्वात्यन्ताभावः संयोगात्यन्ताभावो यथा केवलान्वयित्वेन सङ्गृहीतोऽस्ति य(त)था आश्रयनाशजन्यगुणादिनाशात्यन्ताभावः केवलान्वयित्वेन सङ्ग्राहो नास्ति। तस्य लक्ष्यत्वाभावान्नाव्याप्तिरिति कथं साशङ्कते(ङ्क्यते) इति कृत्वा नाप्याश्रयेत्यादिः असङ्गतः स्यात्। मध्ये शङ्कते **न चेति**। उक्तलक्षणेऽत्यन्ताभावाप्रतियोगित्वे संयोगात्यन्ताभावेऽव्याप्तिरेव द्रष्टव्या, परम् आश्रय[नाश]जन्यगुणादिनाशात्यन्ताभावे ति(तु) र्न(न) भवति इत्यभिप्रायेण नापी[ति] तस्य ग्रन्थस्यावतारः इत्याशङ्कार्थः। **लक्षणं दूषयितुरिति**। येनात्यन्ताभावाप्रतियोगित्वं लक्षणं दूष्यते तस्याभिप्रायो हि संयोगात्यन्ताभावेऽव्याप्तिरेव न तु आश्रयनाशजन्यगुणादिनाशात्यन्ताभावेऽतिव्याप्तिरिति ग्रन्थस्य तात्पर्यम्। **उक्ते** इति मदुक्ते। **नैव** [इति]। यद्धर्मसाध्यकं लिङ्गं तद्धर्मं निरूपयतीत्यर्थः इत्युक्ते नैवेत्यर्थः। ननु यदि धर्म एव निरूपयितुं प्रतिज्ञातस्तदा वृत्तिमदित्यादिसिद्धान्ते लक्षणकरणं विरुद्धमापद्यते इति शङ्कते - **न वेति** टीका। वृत्तिमदित्यादि केवलान्वयिलक्षणम्, न तु अत्यन्ताभावाप्रतियोगित्वमात्रम्। कुतः ? संयोगात्यन्ताभावेऽव्याप्तिः स्यात्। तथा च वृत्तिमदित्यादिलक्षणकरणे संयोगात्यन्ताभावः आकाशात्यन्ताभावः केवलान्वय्येव, सर्वत्र वृत्तिमदत्यन्ताभावाप्रतियोगित्वमस्तीति नोक्तदोषो भवेत् संयोगात्यन्ताभावेऽव्याप्तिलक्षणो दोषो न स्यादित्यभिप्रायेण तत्प्रणयनात् वृत्तिमदित्यादिप्रणयनात्। ननु यदि अव्याप्तिवारणार्थं वृत्तिमदित्यादिलक्षणं क्रियते तदा तेनापि संयोगात्यन्ताभावे नाव्याप्तिपरिहारः। संयोगात्यन्ताभावे वृत्तिमदत्यन्ताभावाप्रतियोगित्वं कथम् ?, यतः वृत्तिमान् संयोगात्यन्ताभावः तत्प्रतियोगित्वात् संयोगात्यन्ताभावस्य। तथा चाव्याप्तिस्तदवस्थैवेति। **यथेति**। वृत्तिमदित्यादिसिद्धान्तलक्षणे न यथा अव्याप्यवृत्त्यत्यन्ताभावसङ्ग्रहस्तथा अग्रे लक्षणं वक्ष्यत इत्यर्थः।

**तत्र न तावदव्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी, तस्य प्रतियोग्यवच्छिन्नेऽप्यत्यन्ताभावात् अत्यन्ताभावाप्रतियोगिनश्च केवलान्वयित्वात्। नाप्याश्रयनाशजन्यगुणनाशात्यन्ताभावः तस्य नाशस्य सर्वत्रात्यन्ताभावादिति वाच्यम्। यत्र हि प्रतियोगि-**

**प्रागभावो वर्तते तत्र न तदत्यन्ताभावो वर्तते, तथा च नाशस्य प्रागभावो यत्र नाश-प्रतियोगिसमानदेशे वर्तते तत्र कथं नाशात्यन्ताभावो वर्तताम्। तर्हि नाशस्य तत्र वृत्तिः स्यादिति चेत्। न। पूर्वं तत्र नाशप्रागभावस्यैव सत्त्वादुत्तरकाले आश्रयस्यैवाभावात्। नाप्याकाशात्यन्ताभावः केवलान्वयी, तस्यापि प्रतियोगिरूपात्यन्ताभावप्रतियोगित्वात् अभावात्यन्ताभावस्य भावत्वात्। अथ अभावात्यन्ताभावो न प्रतियोगिरूपस्तथा सति अन्योन्याभावात्यन्ताभावः प्रतियोगिरूप इति प्रतियोगिसमानदेशोऽन्योन्याभावो न स्यादिति चेत्। न। अत्यन्ताभावात्यन्ताभावः प्रतियोग्येव अन्योन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्तिरसाधारणो धर्म इति। उच्यते। वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवला-न्वयित्वम्, आकाशात्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभावप्रतियोगी तथापि स न वृत्तिमान् इति आकाशात्यन्ताभाव एव केवलान्वयी, तथा प्रमेयत्वाभिधेयत्वादि केवलान्वयि वृत्तिमतोऽत्यन्ताभावस्याप्रतियोगित्वात्।**

**न तावदिति मूलम्।** अव्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी न सम्भवति। अव्याप्यवृत्तिर्योऽत्यन्ताभावः स केवलान्वयी न सम्भवति। तत्र हेतुमाह - **प्रतियोगीति मूलम्।** यत्र वृक्षादौ संयोगात्यन्ताभावस्तत्र संयोगोऽपि वर्तते तत्संयोगप्रतियोगित्वं संयोगात्यन्ताभावेऽपि वर्तते। तथा संयोगात्यन्ताभावस्य अत्यन्ताभावः तत्प्रति-योगित्वमेव संयोगात्यन्ताभावस्य। त्वया अत्यन्ताभावाप्रतियोगित्वं केवलान्वयिलक्षणं कृतम्, तदव्याप्तमित्यर्थः। **नापीति मूलम्।** आश्रयो घटो गुणादी[नाम्]। तस्य घटस्य यो नाशः तज्जन्यो यो रूपादिनाशः तस्य योऽत्यन्ताभावः स सर्वत्र वर्तते इति कृत्वा सोऽपि केवलन्वयी [74 A] भवतु, वस्तुगत्या स केवलान्वयी न भवति। तस्य सर्वत्र विद्यमानत्वात् केवलान्वयित्वं प्राप्तम्, तत् खण्ड्यते। **यत्र हीति मूलम्।** भवता यदुक्तं नाशात्यन्ताभावः सर्वत्र वर्तते तदुच्यते - कथम् ? प्रतीयोगी गुणनाशः गुणादिनाशात्यन्ताभावस्य, तत्समवायि(यी) कोऽर्थः ? गुणनाशसमवायी आश्रयो घटः, तद्देशे गुणनाशात्यन्ताभावो नास्ति। यदा गुणनाशप्रागभावो वर्तते तदा गुणनाशात्यन्ताभावो नास्ति। तथा चात्यन्ताभावस्य प्रतियोगिनेव प्रागभावेनापि सह विरोधात् तत्र नाशात्यन्ताभावः कथं भविष्यतीति कृत्वा न तस्य सार्वत्रिकत्वेन केवलान्वयित्वापादनम्। ननु घटे गुणनाशात्यन्ताभावो यदि नास्ति तदा नाशस्य तत्र घटे वृत्तिः स्यादित्याशङ्कते - **तर्हीति।** तत्र घटे गुणनाशो वर्तते अत्यन्ताभावाभावात् इत्याशङ्कार्थः। समाधत्ते - **पूर्वमिति मूलम्।** त्वया गुणनाशस्य वृत्तिः कदापाद्यते — गुणनाशप्रागभावकाले वा गुणनाशप्रागभावोत्तरकाले ? तत्राद्ये दूषणमाह - **तत्रेति मूलम्।** तत्र घटे गुणनाशप्रागभावस्यैव विद्यमानत्वात्

न गुणनाशः। द्वितीये आह - **उत्तरकालमिति**। गुणनाशप्रागभावोत्तरकालं गुणनाशप्रागभावो यदा नास्ति तदा आश्रयस्य घटस्यैव नाशात् गुणनाशः कुत्र स्थास्यतीति, तस्मान्नाशवृत्तिर्घटे न सम्भवतीति। तथा च प्रतियोगिप्रागभावदेशे गुणनाशात्यन्ताभावाभावान्न गुणनाशात्यन्ताभावे केवलान्वयित्वापादनम्। **नापीति**। यदि अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं तदा आकाशात्यन्ताभावेऽव्याप्तिः, यतः स केवलान्वयी भवति तत्रात्यन्ताभावाप्रतियोगित्वं नास्ति। कथम्? आकाशात्यन्ताभावाभावः आकाशं(शः) तत्प्रतियोगित्वमेवाकाशात्यन्ताभावस्येति कृत्वाऽत्यन्ताभावाप्रतियोगित्वं नास्तीत्यतिव्या(त्यव्या)प्तिरिति अर्थः। एतदेवाह- **अभावेति** मूलम्। सुकरमाशङ्कते - **अभावेति**। अभावस्य योऽत्यन्ताभावः स प्रतियोगिरूपो न सम्भवति। यद्यभावात्यन्ताभावस्य प्रतियोगिरूपता तदाऽन्योन्याभावात्यन्ताभावोऽपि प्रतियोगिरूपः स्यात्। तथा च कपाले घटघटान्योन्याभावयोर्वृत्तिर्न स्यात्, प्रतियोगितदभावयोर्विरोधात्। कपाले घटोऽपि वर्तते घटान्योन्याभावोऽपि वर्तते इत्याशङ्कार्थः। **अत्यन्ताभावेति**। मया अभावात्यन्ताभावः प्रतियोगिरूप इति नोच्यते किन्तु अत्यन्ताभावात्यन्ताभावः स एव प्रतियोगी उच्यते। अन्योन्याभावात्यन्ताभावः प्रतियोगी न भवति किन्तु प्रतियोगितावच्छेदको धर्मः। तथा च न किञ्चिद्दूषणम्, घटान्योन्याभावात्यन्ताभावो घटत्वम् घटात्यन्ताभावात्यन्ताभावः घटः इति सिद्धमिति मूलार्थः। **प्रतियोग्येवेतीति** टीका। नन्वत्यन्ताभावात्यन्ताभाव(वः) प्रतियोग्येवेति असङ्गतम्। कुतः? प्रतियोगिप्रागभावादिरपि अत्यन्ताभावात्यन्ताभावो भवति, यतोऽत्यन्ताभावात्यन्ताभावस्य त्रितयरूपत्वं प्रतियोगितत्प्रागभावतद्ध्वंसरूपत्वम् तथा चात्यन्ताभावात्यन्ताभावः प्रतियोग्येवेत्यवधारणमसङ्गतमित्याशङ्कार्थः। **तस्यापीति** टीका। घटात्यन्ताभावात्यन्ताभावस्य त्रितयं प्रतियोगिघटः घटध्वंसो घटप्रागभावश्चेति त्रयाणामपि घटात्यन्ताभावात्यन्ताभावत्वात्। **प्रतियोगीति** टीका। प्रतियोगितावच्छेदकः घटत्वादिः, स एवान्योन्याभावात्यन्ताभावः। तथा च [74 B] घटत्व-घटान्योन्याभावयोरेवेति विरोधः यत्र घटत्वं तत्र घटान्योन्याभावो न भवति, परं घट-घटान्योन्याभावयोः न विरोधः कपाले घटोऽपि वर्तते घटान्योन्याभावोऽप्यस्ति। अथ केवलान्वयिधर्मस्य लक्षणमाह - **वृत्तिमदिति** मूलम्। **वृत्तिमान्** इति टीका। वृत्तिमान् योऽत्यन्ताभावः घटात्यन्ताभावः तदप्रतियोगित्वमाकाशात्यन्ताभावेऽस्तीति नाव्याप्तिः। शङ्कते - **नन्विति**। तथाप्याकाशात्यन्ताभावेऽव्याप्तिः। वृत्तिमदत्यन्ताभावाप्रतियोगित्वं नास्ति। इदानीमिदमाकाशमिति प्रत्ययबलात् वृत्तिमान् योऽत्यन्ताभावः आकाशात्यन्ताभावस्याकाशादौ वा विवक्षितः। तथा च इदानीमाकाशमिति प्रत्ययबलात् कालिकसम्बन्धेनाकाशस्य वृत्तित्वं न तु संयोगेन समवायेन वा। तथा च संयोगेन समवायेन वा वृत्तिमान् योऽत्यन्ताभावः घटपटरूपोऽत्यन्ताभावः तदप्रतियोगित्वमेवाकाशात्यन्ताभावस्यातो नाव्याप्तिरिति आशङ्कार्थः। इति न च वाच्यमित्यन्वयः। **घटादेरिति** टीका। संयोगेन समवायेन वृत्तिमान् योऽत्यन्ताभावः पटस्तद्रूपादिरत्यन्ताभावः तदप्रतियोगित्वमेव घटस्येति कृत्वा घटोऽपि केवलान्वयी स्यात् लक्षणस्य सत्त्वात्

इत्यर्थः। दूषणान्तरमप्याह - **अव्याप्त्येति**। संयोगात्यन्ताभावेऽव्याप्तिश्च स्यात्। समवायेन वृत्तिमान् योऽत्यन्ताभावः संयोगः तदप्रतियोगित्वं संयोगात्यन्ताभावे नास्ति। इति महाशङ्कार्थः। **स्ववृत्तीति** टीका। वृत्तिमानित्यत्र स्वशब्देन केवलान्वयित्वेन यदभिमतं तस्य या वृत्तिः तद्विरोधिनी या वृत्तिः तद्वान् योऽत्यन्ताभावः तदप्रतियोगित्वं केवलान्वयिन(त्व)मित्यर्थः। यथाऽऽकाशात्यन्ताभावः स्वशब्देनोच्यते, तस्य वृत्तिः तद्विरोधिनी या वृत्तिः सा आकाशस्य वृत्तिर्न सम्भवति। यतः आकाशात्यन्ताभावोऽपि काले वर्तते आकाशोऽपि वर्तते इति कृत्वा आकाशात्यन्ताभावस्य विरोधी आकाशो न भवतीति कृत्वा लक्षणगमनः(न)प्रकार उच्यते। स्ववृत्तिविरोधि-वृत्तिमान् यो यो घटस्तद्वृत्तिविरोधिनी या वृत्तिर्घटात्यन्ताभावस्य वृत्तिस्तद्वान् अभावः घटात्यन्ताभावो भवति, तदप्रतियोगित्वमाकाशात्यन्ताभावेऽपि वर्तते, इति तत्र लक्षणसम्भवात् नाव्याप्तिरिति स्पष्टो भावः। **स्ववृत्तिविरोधित्वं चेति**। स्वसमानाधिकरणधीविरोधित्वं स्वशब्देन घटः तत्समानाधिकरणधीविरोधित्वं घटात्यन्ताभावे वर्तते। यत्र घटः तत्र घटात्यन्ताभावो नास्ति, अत्यन्ताभावप्रतियोगित्वात् घटस्य, इति न पूर्वोक्तकेवलान्वयित्वापादनं घटे इति भावः। तथा च स्वसमानाधिकरणधीविरोधी वृत्तिमान् योऽभावः घटात्यन्ताभावः तद्(द)प्रतियोगित्वं घटे नास्ति। ननु संयोगात्यन्ताभावेऽव्याप्तिः। कथम्? वृत्तिमान् योऽभावः संयोगात्यन्ताभावात्यन्ताभावस्तस्य संयोगात्यन्ताभावस्य प्रतियोगित्वात्। अतोऽत्यन्ताभावाप्रतियोगित्वं नास्तीति अव्याप्तिः इत्यत आह - **संयोगादीति**। विवक्षितार्थस्तत्र नास्ति। तथाहि स्वशब्देन संयोगा-त्यन्ताभावस्तद्वृत्तिविरोधिवृत्तिमान् संयोगरूपो न भवति। यत एकत्र संयोगतदत्यन्याभावयोः प्रतीतिः। तथा च स्ववृत्तिविरोधिवृत्तिमान् [75 A] अभावो घटाभावस्तदप्रतियोगित्वं संयोगात्यन्ताभावे वर्तते एवेति नाव्याप्तिः। शङ्कते - **नन्विति**। **एवमिति**। यदि वृत्तिपदेन स्ववृत्तिविरोधिवृत्तिमत्त्वं विवक्षितं तदा संयोगोऽपि केवलान्वयी स्यात्। कथम्? स्वशब्देन संयोगस्तस्य या वृत्तिर्वृक्षादौ। शङ्कते - **न चेदमिति**। ननु प्रमेयत्वं केवलान्वयि न स्यात्। कथम्? प्रमेयवृत्तेर्विरोधिनी या वृत्तिः सा वृत्तिरप्रसिद्धा। प्रमेयत्व-[वृत्तिविरोधिवृत्ति]मदत्यन्ताभावः प्रसिद्धो भवति, तदेवं प्रमेयत्वं(त्व)वृत्तिविरोधिनी वृत्तिः प्रसिद्धा स्यात्, तथा चाव्याप्तिरिति न च वाच्यम्। स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावप्रतियोगिनो ये घटादयस्तद्भिन्नत्वं विवक्षितं स्वशब्देन। घटस्तद्वृत्तिविरोधिवृत्तिमान् अत्यन्ताभावो घटात्यन्ताभावस्तत्प्रतियोगिनो घटादयस्तद्भिन्नत्वं प्रमेयत्वस्यास्त्येवेति न तत्राव्याप्तिः। आकाशात्यन्ताभावेऽव्याप्ति। शङ्कते - **नन्विति**। भूतलादौ आकाश एव वर्तते इति कथं तत्र तदत्यन्ताभावोऽतः कथं तदत्यन्ताभावः केवलान्वयीत्याशङ्कार्थः। मध्ये शङ्कते - **न चेति**। भूतलादौ आकाशं न वर्तते परम् आकाशसंयोगो वर्तते अङ्गुलीद्वयसंयोगवत् इत्याशङ्कार्थः। **एवमिति**। यदि संयोगस्य द्रव्यवृत्तितानियामकं नोच्यते तदा घटादेरपि भूतलादौ वृत्तित्वं न स्यात् किन्तु घटसंयोग एव तत्र वर्तते न घट इत्यपि वक्तव्यं स्यात्। **नापीति**। समवेतत्वेनाकाशात्यन्ताभावः केवलान्वयी।

समवायसम्बन्धेनाकाशस्य सर्वत्रात्यन्ताभावस्य सत्त्वात् अत आकाशात्यन्ताभावः केवलान्वयी। तं दूषयति - **व्यधिकरणेत्वे(णे त्वि)**ति । समवेतत्वेन यदि आकाशात्यन्ताभावः केवलान्वयी तदा व्यधिकरण-धर्मावच्छिन्नप्रतियोगिकाभावोऽङ्गीकरणीयः यस्मात् समवेतत्वं व्यधिकरणो धर्मः आकाशे नास्तीति महा-शङ्कार्थः । दूषयति - **इदानीमिति ।** भूतले इदानीमाकाशः इत्याधाराधेयताविषयिणी प्रतीतिरेव नास्तीति येनाकाशस्य संयोगेन भूतलादौ वृत्तिः स्यात् । **तथा चेति** । तदवच्छिन्नाभावः संयोगित्वावच्छिन्नाभावः । तथा च संयोगित्वेनाकाशात्यन्ताभावः केवलान्वयी। तथा चाकाशस्य संयोगित्वं प्रसिद्धम्। तदवच्छिन्नाभावः समानाधिकरणधर्मावच्छिन्नाभाव एव, न व्यधिकरणधर्मावच्छिन्नाभावः । अतः आकाशसंयोगो भूतलादौ वर्तते परमाकाशो न वर्तते अङ्गुलीद्वयसंयोगवत् । **अन्ये तु** इति **मिश्राः ।** संयोगेन भूतलादौ वर्तताम् तथाप्याकाशात्यन्ताभावस्य समवायसम्बन्धावच्छिन्नाभावस्य केवलान्वयित्वं भविष्यत्येव। ननु यदि समवाय-सम्बन्धावच्छिन्नाकाशात्यन्ताभावस्य केवलान्वयित्वमुच्यते तदा व्यधिकरणधर्मावच्छिन्नात्यन्ताभावस्वीकारः स्यात् इत्याशङ्कते - **न चैवमिति** । समाधत्ते - **आकाशत्वावच्छिन्ने**ति । व्यधिकरणधर्मावच्छिन्नाभावो नाङ्गीक्रियते परं व्यधिकरणसम्बन्धावच्छिन्नाभावः अङ्गीक्रियते । कथमित्याह - समवायसम्बन्धः आरोप्य-सम्बन्धकोऽर्थः । समवायेन सम्बन्धेनाकाशं घटादावारोप्य निषेध्यते, यथा इह समवायेनाकाशं नास्ति इति प्रतीतिः। तथा च समवायसम्बन्धावच्छिन्नाकाशात्यन्ताभावः केवलान्वयी। अतो न कापि क्षतिः। यथा घटस्यैव [75 B] चत्वारोऽभावाः प्रागभावादयः। तत्र प्रतियोगितावच्छेदकभेदेनाभावभेदो नास्ति, परमारोप्यसम्बन्धभेदात् । आरोप्यसम्बन्धः प्रागभावे उत्तरकालसम्बन्धः। यथा प्रागभावे उत्तरकालसम्बन्धेन घटः आरोप्य निषेध्यते। ध्वंसे पूर्वकालसम्बन्धेन घटः आरोप्य निषेध्यते। अत्यन्ताभावस्थले संयोगसम्बन्धेनारोप्य घटो निषेध्यते। अन्यो-न्याभावस्थले तादात्म्यसम्बन्धमभेदसम्बन्धमारोप्य निषेध्यते। एवं च सर्वत्राभावे आरोप्यसम्बन्धभेदेनाभावभेदः । तथा च प्रकृते आकाशात्यन्ताभावे समवायसम्बन्धेनाकाशमारोप्य निषेध्यते इति कृत्वा समवायसम्बन्धावच्छिन्ना-काशात्यन्ताभावः केवलान्वयी । शङ्कते - **न चेति** । आकाशसमवाय एवाप्रसिद्धः, ततः तदप्रसिद्ध्या कथं समवायसम्बन्धेनाकाशस्यारोपः इति न च वाच्यम्। **सर्वत्रेति**। सर्वत्र सम्बन्धोऽप्रसिद्ध एवारोप्यते। वैशिष्ट्यपदेन सम्बन्धो ज्ञेयः। तदेवोपदर्शयति - **न हीति**। भूतले घटो नास्ति इति अत्र भूतलघटसंयोगप्रसिद्धिर्न मृग्यते किन्तु अप्रसिद्ध एव संयोग आरोप्यते। **यथेति**। आरोप्यं विशेषणम् आरोप्य(प)विषयो विशेष्यम्, भूतलं विशेषणम् घटो विशेष्यः, तत्प्रसिद्धिर्मृग्यते। तदुभयविशेषणविशेष्यसम्बन्धः अप्रसिद्ध एवारोप्यते। **यथा वेति**। अन्योन्या-भावे तदुभयप्रसिद्धिमात्रेण आरोप्यारोपविषयप्रसिद्धिमात्रेण तदुभयतादात्म्यमप्रसिद्धमेवारोप्यते, यथा घटः पटो न भवतीत्यत्र घटपटयोस्तादात्म्यमप्रसिद्धमेवारोप्यते । तथा चारोप्यारोपविषययोः प्रसिद्धिरेव वाच्या न तु तादात्म्यस्यापीति। **यदि चेति**। यद्वा(दा) आरोप्यसम्बन्धभेदेनाभावभेदो नाङ्गीक्रियते तदा आत्मा इतरेभ्यो

भिद्यते ज्ञानात् अत्रेदं व्यतिरेक्यनुमानं न स्यात्। कथमित्यत आह - **विषयेति**। विषयविषयिभावसम्बन्धेन ज्ञानं सर्वत्र विद्यते इति कृत्वा ज्ञानाभाव(वा)प्रसिद्धेः सर्वत्रापि ज्ञानविषयत्वात्, परं समवायेन ज्ञानाभावः प्रसिद्धोऽस्ति। तथा प्रकृतेऽपि भूतलादौ संयोगसम्बन्धेन वर्तते तथापि समवायेन सम्बन्धेन तदभावः आकाशात्यन्ताभावः केवलान्वयी भविष्यत्येव। अथाकाशात्यन्ताभावे स्ववृत्तिविरोधिवृत्तेः प्रसिद्धिमानयति - **येनेति**। येन सम्बन्धेनाकाशाभावः तेनैव सम्बन्धेनाकाशस्य यत् सत्त्वं तत् आकाशात्यन्ताभावविरोधिसंयोगेन सम्बन्धेन आकाश एवास्ति परं तदत्यन्ताभावो नास्ति इति संयोगसम्बन्धेन विरोधः। उपसंहरति - **तस्मादिति**। व्यधिकरणधर्मः शशीयत्वादिः। स प्रतियोगितावच्छेदको भूत्वाऽभावभेदको न भवति किन्तु व्यधिकरणधर्मोऽप्यारोप्यसम्बन्धो भूत्वा भेदको भवति इति न व्यधिकरणधर्मावच्छिन्नाभावाऽभ्युपगमः। तथा च समवायसम्बन्धावच्छिन्नाकाशात्यन्ताभावः केवलान्वयीत्यर्थः। **एवमिति** टीका। पूर्वमुक्तं समवायसम्बन्धावच्छिन्नाकाशात्यन्ताभावः केवलान्वयी सर्वत्र विद्यमानत्वात् इति। तथा च [येन] सम्बन्धेन यस्य वृत्तिः तदन्येन सम्बन्धेन तदभावः केवला[न्वयी] यथा समवायेन घटत्वं वर्तते इति संयोगसम्बन्धेन घटत्वात्यन्ताभावः केवलान्वयीति। एवं समवायसम्बन्धेन परमाण्व(ण्व)त्यन्ताभावः केवलान्वयी। [76 A] **तत्त्वेनेति** टीका। समवायसम्बन्धेनेत्यर्थः। आशङ्कते - **नन्विति**। येनेत्याद्युक्तव्याप्त्यङ्गीकारे प्रमेयत्वात्यन्ताभावस्य संयोगेन समवायेन वा केवलान्वयित्वे पूर्वोक्तव्याप्तिलक्षणे अव्यभिचरि[त]त्वरूपे साध्याभावप्रसिद्धिनिबन्धना केवलान्वयिनी(नि) अव्याप्तिर्दत्ता सा न सङ्गाघटीति साध्यात्यन्ताभावस्यानेन क्रमेण प्रसिद्धेरप्रतिबन्धात् इत्याशङ्कार्थः। समाधत्ते - **व्याप्तीति**। व्याप्तिशरीरे साध्यात्यन्ताभाववदवृत्तित्वरूपसाध्यतावच्छेद[क]सम्बन्धावच्छिन्नेत्यपि विशेषणीयम्। अव्यभिचरितत्वरूपव्याप्तिलक्षणे साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यात्यन्ताभाववद्वृत्तित्वम् अव्यभिचरितत्वमिति सम्पूर्णं लक्षणम्। अन्यथा एवं चेन्नोच्यते पर्वतो वह्निमान् धूमात् इति प्रसिद्धानुमानेऽपि व्यभिचरितत्वं स्यात्। कथम्? समवायसम्बन्धेन वह्न्यभाववति महानसे धूमस्य वृत्तेर्व्यभिचारात्। साध्यतावच्छेदकसम्बन्धावच्छिन्नेत्यादि विशेषणे दत्ते न भवति। यतस्तत्र समवायेन न साध्यता किन्तु संयोगेनैव साध्यता। तथा च तत्र साध्यतावच्छेदकसम्बन्धः संयोगः तेन वह्न्यभाववति ह्रदे धूमस्याप्यवृत्तेः प्रसिद्धानुमाने धूमस्य अव्यभिचरितत्वं निष्प्रत्यूहम्। तथा च प्रकृते केवलान्वयिस्थले पूर्वोक्तं साध्याभावप्रसिद्धिनिबन्धनमव्याप्तिकथनम् उपपद्यते एव। साध्यतावच्छेदकसम्बन्धः केवलान्वयिस्थले स्वरूपसम्बन्धः, तेन सम्बन्धेन प्रेमयत्वाभावस्याप्रसिद्धत्वात् अव्याप्तिसम्भव एव। **एवमिति** टीका। ननु वृत्तिमत्पदमप्रसिद्धिवारकत्वात् व्यर्थम् व्याप्तिग्रहौपयिकस्यैव विशेषणस्य सार्थकत्वादित्यत आह - **एवमिति**। मया वृत्तिमत्पदस्य असिद्धिवारकता नोच्यते येन व्यर्थविशेषणत्वमाशङ्क्येत। किन्तु अप्रसिद्धिवारकमेव वृत्तिमत्पदमुच्यते। यतोऽत्यन्ताभाव(वा)प्रतियोगित्वं कुत्रापि नास्ति सर्वस्यापि केन[ापि] सम्बन्धेन अत्यन्ताभावप्रतियोगित्वात् इत्यप्रसिद्धिः स्यात् तद्वारणाय वृत्तिमत्पदम्। तथा च येन सम्बन्धेन यो

वृत्तिमान् तदन्यसम्बन्धावच्छिन्नाभावः केवलान्वयी। यथा घटत्वं समवायेन सम्बन्धेन वर्तते तदन्यः सम्बन्धः संयोगः, तेन घटत्वात्यन्ताभावः केवलान्वयी। **अव्याप्तीति**। यदि मया असिद्धिवारकतोच्येत तदा व्यर्थविशेषणत्व-शङ्का भवेत्। अव्याप्तिरसिद्धिरेवेति। किन्तु अप्रसिद्धिवारकत्वेन सार्थकं वृत्तिमत्पदम्। **वस्तुत** इति। इन्द्रियलक्षणं **प्रत्यक्षखण्डे** यथा शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकरणमनःसंयोगाश्रयत्वात् इति अत्र शब्देतर-पदमसिद्धिवारणाय। उद्भूतविशेषगुणानाश्रयत्वं श्रोत्रेन्द्रिये नास्ति। यत उद्भूतविशेषगुणो यः शब्दः तदाश्रयत्वं श्रोत्रेन्द्रियस्य वर्तते। अतः शब्देतरपदमसिद्धिवारकमपि यथा सार्थकं तथा अत्रापि प्रकृते वृत्तिमत्पदमसिद्धि-वारकत्वेनापि सार्थकम् इति न दोषः। **वयं तु ब्रूमः** इति। अन्योन्याभावप्रतियोगिताया योऽनवच्छेदको धर्मः स केवलान्वयी, यथा प्रमेयत्वम्। इदमन्योन्याभावप्रतियोगितानवच्छेदकं भवति इदं प्रमेयवद्भिन्नमिति प्रतीत्या। ननु संयोगात्यन्ताभावस्य केवलान्वयित्वं [76 B] न स्यात्, अन्योन्याभावप्रतियोगितानवच्छेदकत्वाभावात्। यतोऽन्योन्याभावप्रतियोगितावच्छेदकत्वमेव। मूले वृक्षः कपिसंयोगवान् नाग्रे इति प्रतीत्या संयोगवदन्योन्या-भावोऽपि वृक्षे विद्यते संयोगात्यन्ताभाववदन्योन्याभावोऽपि वृक्षे वर्तते। संयोगवदन्योन्याभावोऽपि वर्तते। तत्प्रतियोगितावच्छेदकत्वं संयोगात्यन्ताभावेऽपि वर्तते इति कृत्वा अव्याप्तिः इत्यस्वरसेनाह - **अन्योन्याभावो व्याप्यवृत्तिरेवेति**। संयोगवति वृक्षे संयोगवद्भेदो नास्ति संयोगाभाववति भिन्ने संयोगवद्भेदो नास्ति इति कृत्वा संयोगात्यन्ताभावेऽव्याप्तिर्नास्ति इति भावार्थः। ननु अयं प्रमेयो घटत्वात् इति अत्राव्याप्तिः। तत्र घटत्वरूपलिङ्गे केवलान्वयि[त्वमि]ति। अन्योन्याभावप्रतियोगितानवच्छेदकधर्मवत्त्वं नास्ति यतो घटो न भवतीति प्रतीत्या अन्योन्याभावप्रतियोगितावच्छेदकत्वमेव वर्तते घटत्वे इति कृत्वा व्याप्तिरित्यत आह - **एतच्चेति**। अन्योन्याभावप्रतियोगितानवच्छेदकत्वं केवलान्वयिधर्मस्य लक्षणं न तु केवलान्वयिलिङ्गस्य। लिङ्गे पुनः केवलान्वयिधर्मसाध्यकत्वमेव लक्षणम्। तच्च घटत्वेऽप्यस्ति। प्रमेयत्वरूपं यत् साध्यं तद्धर्मकत्वं घटत्व-स्याप्यस्तीति। ननु दशाविशेषे कदाचित् धूमस्यापि व्यतिरेकव्याप्त्यस्फुर्तिदशायां केवलान्वयित्वात् तत्र व्याप्तिलक्षणगमनात् अतस्तत्रान्योन्याभावप्रतियोगितावच्छेदकत्वात् इति कृत्वा अव्याप्तिरित्यत आह - **सर्वसाधारण** इति। सर्वसाधारणो योऽन्वयी सर्वदा योऽन्वयिव्याप्तिमान् तस्यैव लक्ष्यता। तथा च कादाचित्कान्वयिधूमेनाव्याप्तिरित्यर्थः। ननु अयं घटः प्रमेयत्वात् इति अत्र निरुक्तकेवलान्वयिलक्षणा-सम्भवेनाव्याप्तिः स्यात् इत्यत आह - **सदनुमानेति**। अयं लिङ्गस्य विभागः सदनुमानस्येव। तथा च अयं घटः प्रमेयत्वात् इति अनुमानाभासस्य[1] त्रितयबहिर्भावेऽपि न काऽपि क्षतिः। **वृत्तिमानिति** मूलमिति। घटात्यन्ताभावे एव तादृशस्तदप्रतियोगित्वमाकाशात्यन्ताभावस्येति। **तथेति** टीका। आदिपदेन दिक्कालयोरप्यत्यन्ताभावः केवलान्वयी। अत्र हेतुमाह - **वृत्तिमत** इति। घटाद्यत्यन्ताभावादेरप्रतियोगित्वात् इत्यर्थः।

---

१. व्यभिचारित्वात्। इति प्रणौ टिप्पणी।

**न च प्रमेयत्वं प्रमाविषयत्वं तच्च न केवलान्वयि प्रमाविषयत्वस्य चाननुगमादिति वाच्यम्। प्रमात्वमेव हि परम्परासम्बन्धात् घटादौ प्रमेयत्वमनुगतं प्रमाजातीयविषयत्वं वा। तथापि केवलान्वयिनि सन्देहाभावात् कथमनुमितिः, प्रमेयत्वमत्र वर्तते न वेति संशयश्च न प्रमेयपक्षकः किन्तु प्रमेयत्वपक्षको भिन्नविषयकः, प्रमेयत्वपक्षके चास्तित्व-साध्यस्यान्वय-व्यतिरेकित्वं तथा च घटः प्रमेयो न वेति संशयो मृग्यते स च नास्त्येव। अथ पक्षः साध्यवान् न वा पक्षे साध्यमस्ति न वेति संशयौ समानविषयकावेव तदस्या-स्त्यस्मिन्निति मतुपोविधानादिति चेत्। न। विशेषण-विशेष्यभावभेदेनार्थभेदात्। मैवम्। य एव हि संशयः पक्षे साध्यसिद्धिविरोधी स एवानुमानाङ्गमावश्यकत्वात् लाघवाच्च न तु समानविषयकत्वमपि तत्र तन्त्रं गौरवात् प्रमेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयश्च घट प्रमेय इति साध्यसिद्धिविरोधी भवत्येव। यद्वा संशययोग्यतैवानुमानाङ्गं संशयस्य तदानीं विनाशात्।**

न चेति मूलम्। प्रमाविषयत्वरूपं प्रमेयत्वं केवलान्वयी(यि) न भवति। कुतः? यद्यपि वृत्तिमदत्यन्ता-भावाप्रतियोग्यस्ति तथापि नैतत् केवलान्वयि। तत्र दूषणमाह - **प्रमाविषयत्वस्येति**। घटप्रमादिरूपेण प्रमा अननुगता। तथा प्रमाविषयत्वमपि घटप्रमाविषयत्वादिना अननुगतमित्याशङ्कार्थः। प्रमाया विषयस्य चाननुगमेऽपि प्रमाघटितपरम्परासम्बन्धेन प्रमात्वमेव प्रमेयत्वम्। प्रमा-विषययोः विषयविषयिभावलक्षणः सम्बन्धः। तत्र प्रमायां प्रमात्वमनुगतमस्ति। तदेव प्रमाघटितसम्बन्धेन विषयेष्वपि प्रमात्वमस्ति। तदेव प्रमात्वमेव प्रमेयत्व-मित्यनुगतमेव। पक्षान्तरमाह - **प्रमाजातीयेति**। अथवा प्रमा एका विवक्षिता घटादिप्रमा। तज्जातीयविषयि(य)-त्वमुपाधिः पटादिप्रमासु वर्तत इति नाननुगमः। शङ्कते - **तथापीति** मूलम्। केवलान्वयिनि कथमनुमितिः सन्देहाभावादिति हेतोः? सन्देहश्च न सम्भवति। कोघः प्रसिद्धे प्रमेयत्वाभावरूपायरकोप्रप्रसिद्धे[१]। न च प्रमेयत्वम(त्र) वर्तते। [77 A] **न चेति** सन्देहो वाच्यमिति। अयं तु सन्देहः प्रमेयत्व-तदभावकोटिको न भवति किन्तु एतद्वृत्तित्व-एतद्वृत्तित्वाभावकोटिक(कः) प्रमेयत्वपक्षक एव भिन्नविषयकश्च। यथा घटः प्रमेय इति अनुमाने घटः पक्षः प्रमेयत्वं साध्यम्। अत्र साध्यसन्देहो भिन्नविषयक(कः), भिन्नौ एतद्वृत्तित्व-एतद्वृत्तित्वाभावौ तावेव साध्यसन्देहविषयौ। साध्यं वाऽनुमाने प्रमेयत्वमित्यतो भिन्नविषयकता। यदि प्रमेयत्वरूपसाध्यस्य विषयौ प्रमेयत्व-प्रमेयत्वाभावौ विषयौ सन्देहस्य भवतः तदा समीचीनं स्यादित्यर्थः। ननु प्रमेयमेतद्वृत्ति इति सन्देहे एतद्वृत्तित्वं विषयो भवति। तदेव साध्यीक्रियताम् इत्यत आह - **प्रमेयत्वेति**। प्रमेयत्वपक्षकमस्तित्वसाध(ध्य)कं

---

१. वाक्यमिदमस्पष्टम्।

यदनुमानं य(त)दन्वयव्यतिरेक्येव भवति न तु केवलान्वयीति। अनुमान(नं) प्रमेयत्वम् एतद्वृत्तिधर्मत्वात् इत्यत्र व्यतिरेके आकाशदृष्टान्तः तथा च प्रमेयत्वसाध्यके घटः प्रमेयः अभिधेयात् इत्यत्र घटः प्रमेयो न वेति संशयोऽपेक्ष्यते, स च नास्तीति कृत्वा कथमनुमितिरित्याशङ्कार्थः । अथ प्रकारान्तरेण संशयमुपपादयति। **अथे**ति मूलम् । सामान्यतः पक्षः साध्यवान् न वा इत्येकः । पक्षे साध्यमस्ति न वा इति द्वितीयः । तथा च घटः साध्यप्रमेयत्ववान् न वा, [अ]थ घटे प्रमेयत्वं साध्यमस्ति न वा इति द्वावपि सन्देहौ समानविषयकौ एव । अनुमितौ अपि प्रमेयत्वं विषयो भवति । अत्र सन्देहेऽपि प्रमेयत्वं विषयः । किञ्चिदत्र विलोक्यते । वान् इत्यत्र मतुबस्ति तदर्थोऽस्त्यस्य [अस्मिन्] वेति । अत्र प्रमेयत्वं घटेऽस्ति तस्मिन्नर्थे मतुप्प्रत्ययविधानात् । **सन्देहो भविष्यती**ति । इदमशुद्धम् । **विशेषणे**ति मूलम् । अनुमितौ घटो विशेष्यः प्रमेयत्वं विशेषणम्, सन्देहे तु प्रमेयत्वं विशेष्यं घटो विशेषणम्, इति भिन्नविषयकत्वं सप्तम्यन्तत्वात् अनुमितिसंशययोर्भिन्नविषयकत्वम् । तथा च पूर्वोक्तोऽपि संशयो नानुमानाङ्गं सम्भवति । समानविषयक एव संशय अनुमानाङ्गं भवति इत्यर्थः । **तथापी**त्यारभ्य एतत्पर्यन्तं पूर्वपक्षः । समाधत्ते - **मैवम्** इति । साध्यस्य सिद्धिर्विरोधिनी यस्य एतादृशो यः संशयः स एव अनुमानाङ्गं भवति । यथा वह्निरत्रास्तीति साध्यसिद्धौ वह्निमान् [न] वेति सन्देहो न भवति । तथा प्रकृतेऽपि घटः प्रमेय इति साध्यसिद्धौ जातायां प्रमेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि न वेति सन्देहः अथवा घटः प्रमेयो न वेति संशयो द्वावपि यदा घटः प्रमेय इति ज्ञानं तदा द्वयोर्मध्ये एकोऽपि न भवत्येवेति कृत्वाऽस्य साध्यसिद्धिर्विरोधिनीति अयं सन्देहोऽनुमानाङ्गमेवत्यर्थः । **यद्यपी**ति । यदुक्तं प्रमेयत्वं प्रमाजातीयविषयकत्वं तत् किमर्थम् ?, प्रमाविषयकत्वमेवानुगतं भविष्यतीतरप्रमामादायेत्याशङ्कार्थः । **तथापी**ति । **मीमांसक**मते ईश्वराभावादुभयसाधारण्यार्थं तदुक्तम् । ननु भिन्नविषय[क]त्वेऽपि किं बाधकमित्यत आह - **स चे**ति । भिन्नविषयकः सन्देहः साध्यसिद्धौ प्रयोजको न भवति। दूषणमाह - **अतिप्रसङ्गा**दिति। यदि भिन्नविषयकोऽनुमानाङ्गं तदा घटसन्देहात् पटानुमितिः स्यात्, ततः समानविषयकत्वमनुमित्यङ्गम् । य एव साध्यसन्देहविषयः स एवानुमितिविषय इत्यर्थः । घटोऽस्तीति प्रमेयत्वं [77 B] घटवृत्ति केवलान्वयिधर्मत्वात् अभिधेयत्ववत् इत्यन्वयित्वमेवेत्यर्थः । **तस्यैवे**ति । घटास्तित्वस्यैव संशयविषयत्वात् । तथा च घटे प्रमेयत्वास्तित्वमेव संशयकोटिरित्यर्थः समानविशेष्यकत्वमित्यर्थः इति टीका । ननु [समान]विषयत्वप्रतिक्षेपः क्रियते, स चायुक्तः, भिन्नविषयसन्देहस्यापि अनुमानाङ्गता स्यात्, इति पूर्वोक्तातिप्रसङ्गादित्यन्यथा व्याचष्टे - **समानविशेष्यके**ति । समानविषयत्वस्य प्रतिक्षेपो न क्रियते किन्तु समानविशेष्यकत्वस्य प्रतिक्षेपः क्रियते, तथा च न पूर्वोक्तोऽतिप्रसङ्गः । यदि भिन्नविषयकत्वमुच्यते तदाऽतिप्रसङ्गो भवत्येव परं यदि समानविषयकत्वं तदाऽतिप्रसङ्गो न भवत्येवेति । तत्प्रतिक्षेपकरण(णं) युक्तम् । ननु साध्यसंशयस्य नानुमानाङ्गता घनगर्जिते संशयाभावेऽप्यनुमितेर्दर्शनात् इत्यभिप्रायेणाह - **यद्वे**ति मूलम् । ननु साध्यसंशयोऽनुमानाङ्गं नोच्यते किन्तु संशययोग्यता । तथा च घनगर्जितस्थले संशययोग्यताऽस्ति इति कृत्वाऽनुमानं जायते इत्यर्थः । पुनः केवलान्वयिस्थले साध्याभावाप्रसिद्धिः ।

**न च सापि साधक-बाधकप्रमाणाभावः प्रमेयत्वाभावासिद्धौ तत्प्रमाणासिद्धेस्तदभावासिद्धिरिति वाच्यम्। पक्षनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानस्यैव साध्यसाधकत्वेन तदभावस्यैव योग्यतात्वात् । प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्राम्यतः सन्देह इत्यन्ये । नन्वेकरूपविकलमिदं कथं गमकं तत्त्वे वा व्यतिरेकविकलवत् रूपान्तरविकलमपि गमकं स्यादिति चेत् । न । अन्वयव्यतिरेकव्याप्त्योरन्यतरनिश्चयेनानुमित्यनुभवात् युगपदुभयव्याप्त्युपस्थितौ विनिगमकाभावेन उभयोरपि प्रयोजकत्वे व्यतिरेकोपासना व्यतिरेकश्च विपक्षवृत्तित्वशङ्कानिवृत्तिद्वारा व्यतिरेकव्याप्तावुपयुज्यते अत्र तु विपक्षाभावेन शङ्कैव नोदेति।**

**। समाप्तमिदं केवलान्वय्यनुमानम् ।**

शङ्कते - **न चेति** मूलम् । संशययोग्यता नु साधकबाधकप्रमाणाभावः । साध्यसाधकं यत् प्रमाणं प्रत्यक्षादिप्रमाणं तस्याभावो बाधकं च साध्याभावसाधकं यत् प्रमाणं तस्याभावः संशययोग्यता । तथा च केवलान्वयिस्थले साध्याभावाप्रसिद्ध्या तत्साध्यकप्रमाणस्याप्रसिद्धेः कथं तदभावेनानुमितिरिति न च वाच्यम् । **पक्षनिष्ठेति** मूलम् । पक्षनिष्ठो यो घटात्यन्ताभावस्तदप्रतियोगित्वज्ञानं साध्यस्य साधकमिति कृत्वा एतादृशज्ञानाभावे योग्यतासत्त्वं केवलान्वयिस्थले वर्तते एव । कथम् ? घटे पटादीनां योऽत्यन्ताभावस्तदप्रतियोगित्वज्ञानाभावः प्रमेयत्वेऽप्यस्त्येवेति योग्यतासत्त्वान्न किञ्चिद् बाधकमित्यर्थः । **अन्ये** इति । केवलान्वयिस्थले अन्येऽप्यनेनैव प्रकारेण साध्याभावसंशयमुपपादयन्ति । तथाहि प्रमेयत्वमत्यन्ताभावप्रतियोगि इति यस्य भ्रमः तस्य घटादावपि प्रमेयत्वाभावसंशयो भवत्येवेत्यर्थः । आशङ्कते - **न चेति** टीका । एतदज्ञानदशायां पक्षनिष्ठात्यन्ताभावाप्रतियोगित्वाज्ञानदशायामुक्तयोग्यतासाधकप्रमाणाभावो वर्तत इति कृत्वाऽनुमितिः स्यादित्याशङ्कार्थः । पक्षनिष्ठोभयात्यन्ताभावस्तत्प्रतियोगित्वज्ञानं यत्साध्यस्य तद्विरोधिज्ञानाभावस्यैव योग्यतात्वम् । तथा च पूर्वोक्तस्थले पक्षनिष्ठात्यन्ताभावप्रतियोगित्वज्ञानविरोधिज्ञानमेव वर्तते । तदभावो नास्तीत्यनुमित्यापादनरूपं न बाधकमिति भावः । **अस्वरसबीजमिति** टीका । **अन्ये** इत्यत्रेति शेषः । अस्वरसबीजमाह - **एवमिति** टीका । प्रमेयत्वेऽत्यन्ताभावप्रतियोगित्वप्रसिद्धौ भ्राम्यते इति भ्रमरूपायामपि प्रमेयो न वा इति यः संशयस्तत्कोटिभूतो योऽखण्डप्रमेयत्वाभावः स अप्रसिद्ध एव । प्रमेयत्वे यद्यपि प्रमाणात्यन्ताभावप्रतियोगित्व(त्वं) प्रसिद्धं तथापि प्रमेयो न वेति संशयकोटिभूतो यः प्रमेयत्वाभावः तस्याप्रसिद्धिरेव यतः [78 A] प्रमेयत्वस्यात्यन्ताभावप्रतियोगित्वमानीतं परं प्रमेयत्वाभावरूपकोटेरप्रसिद्धिरेवेत्यर्थः । **यदीति** । यदि तादृशो भ्रमोऽत्यन्ताभावप्रतियोगित्वधर्मोऽस्ति तदा तत एव तादृशभ्रमाभावादेव न केवलान्वयित्वम् । **अन्यथेति** । यदि भ्रमस्तादृशो नास्ति

तदा कोटयप्रसिद्धिरिति कृत्वा संशयो न सम्भवति। ननु अनुमानस्य पञ्चाङ्गानि - पक्षधर्मत्वम्, सपक्षे सत्त्वम्, विपक्षाद् व्यावृत्तिः, अबाधितत्वम्, असत्प्रतिपक्षत्वमिति । तथा च केवलान्वयिनि विपक्षव्यावृत्तत्वं न सम्भवति। कुतः ? साध्याभावस्याप्रसिद्ध्या तदभाववतो विपक्षस्य सुतरामे(म)प्रसिद्धेः, कथं केवलान्वयि अनुमानम् इत्याशङ्कते - **नन्विति**। **तत्त्वे** इति मूलम्। यदि एकरूपविकलमपि गमकं तदा रूपान्तरविकलस्यापि बाधितसत्प्रतिपक्षादेरपि गमकता। साध्यसाधकताभावान्नैवम्। न हि बाधितो वा सत्प्रतिपक्षो वा हेतुः साध्यं साधयितुमिष्टे। तत्र हेतुमाह - **विशेषेति**। एकरूपविकलस्य विपक्षव्यावृत्तत्वरूपाङ्गविकलस्य केवलान्वयिनः साध्यसाधकत्वम् अबाधितत्वरूपविकलस्य बाधितहेतोर्न साध्यसाधकत्वमित्यत्र नियामकाभावादित्यर्थः । **अन्वयेति** टीका। पञ्चरूपनिश्चयस्य दर्शनात् गमकत्वम्। तथा केवलान्वयिनि केवलव्यतिरेकिणि च नास्तीति कृत्वा तयोः कथं साध्यसाधकत्वमित्यर्थः। **पक्षवृत्तित्वादिति** टीका। पक्षवृत्तिरूपं यदङ्गं तद्विकलस्य स्वरूपासिद्धस्येत्यर्थः। समाधत्ते - **अन्वयेति**। अन्वयव्याप्तिर्व्यतिरेकव्याप्तिर्वा एतदन्यतरनिश्चयेनानुमितिरनुभूयते। तथा च केवलान्वयिनि अन्वयव्याप्तिनिश्चयेन व्यतिरेकिणि व्यतिरेकव्याप्तिनिश्चयेनानुमितिः, न किञ्चिद् बाधकमिति भावः । ननु यत्रोभयव्याप्त्युपस्थितिर्युगपद् वर्तते तत्रोभयोरपि प्रयोजकत्वे कस्या अङ्गीकार इत्यत आह - **युगपदिति** । **व्यतिरेकोपासनेति** । व्यतिरेकव्याप्तेरप्यङ्गीकार इत्यर्थः । **व्यतिरेकश्चेति** । अन्वयव्याप्तिप्रतीतौ विपक्षव्यावृत्तत्वव्यतिरेका उपयुज्यते । किंद्वारा ? विपक्षवृत्तित्वशङ्कानिरासद्वारा । तथा च केवलान्वयिनि स्वतःसिद्धं विपक्षव्यावृत्तत्व(त्वं) शङ्काविरहात् न विपक्षव्यावृत्तरूपस्यानुमानाङ्गस्योपयोगः । व्यतिरेकव्याप्तौ वस्तुगत्या यत्र व्यतिरेकव्याप्तिरेव वर्तते तत्रान्वयव्याप्तेर्ज्ञानं जातं तत्र विपक्षवृत्तित्वशङ्कानिरासद्वारोपयुज्यते । **अत्रेति** । केवलान्वयिनि विपक्षाभावादेव विपक्षवृत्तित्वशङ्का न भवतीति । न विपक्षव्यावृत्तत्वरूपस्य केवलान्वयिन्युपयोग इत्यर्थः । **तत्रैकेति** टीका । अन्वयव्यतिरेकिणि एकतरव्याप्तेरन्वयव्याप्तेर्व्यतिरेकव्याप्तेर्वा निश्चये सति अनुमितिदर्शनात् इति विपक्षव्यावृत्तत्वस्य केवलान्वयिनि नोपयोग इत्यर्थः। ननु अन्वयव्यतिरेकिणि यदा अन्वयव्याप्तेः प्रतीतिर्जायते तत्र विपक्षव्यावृत्तत्वं प्रयोजकं दृष्टमस्तीति कृत्वा केवलान्वयिनि अपि विपक्षव्यावृत्तत्वं विना अन्वयव्याप्तिनिश्चयो न स्यात् इत्याशङ्कते - **नन्विति**। **अन्वयव्याप्तिप्रतीताविति** टीका । वस्तुगत्या व्यतिरेकव्याप्तिरस्ति, प्रतीयते चान्वयव्याप्तिः, तत्र विपक्षवृत्तित्वशङ्कानिरासद्वारा विपक्षव्यावृत्तत्वमुपयुज्यते । **साक्षादिति** । विपक्षव्यावृत्तत्वं [78 B] विपक्षवृत्तित्वशङ्कानिरासद्वारोपयुज्यते, न तु साक्षात् इत्यर्थः । केवलान्वयिग्रन्थः सम्पूर्णः । केवलव्यतिरेकिवाद उच्यते ।

**। इति केवलान्वयिग्रन्थप्रकाशिका ।**

## । केवलव्यतिरेक्यनुमाननिरूपणम् ।

**केवलव्यतिरेकी** त्वसत्सपक्षो यत्र व्यतिरेकसहचारेण व्याप्तिग्रहः । ननु व्यतिरेकी नानुमानं व्याप्तिपक्षधर्मताज्ञानस्य तत्कारणत्वात् अत्र व्यतिरेकसहचारात् तत्र व्याप्तिरन्वयस्य पक्षधर्मता । न च व्याप्तपक्षधर्मत्वं साध्याभावव्यापकाभावप्रतियोगिसत्त्वमुभयमप्यनुमितिप्रयोजकमिति वाच्यम् । अननुगमात् । न चान्यतरत्वं तथा, एकप्रमाणपरिशेषापत्तेः । न च तृणारणिमणिन्यायेनानुमितिविशेषे तद्धेतुत्वमिति वाच्यम् । व्यतिरेकिसाध्येऽनुमितित्वासिद्धेः उभयसिद्धक्लृप्ततत्कारणस्याभावात् । न च साध्याभावव्यापकाभावप्रतियागित्वमेवानुमितिप्रयोजकमिति वाच्यम् । गौरवात् केवलान्वयिन्यभावाच्च । अथ साध्याभावव्यापकाभावप्रतियोगित्वेन साध्यव्याप्यत्वमनुमेयम्, एवं व्यतिरेकव्याप्त्यान्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकीत्युच्यते, तन्न, अन्वयव्याप्तेर्गमकत्वे व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्तेः अन्वयव्याप्त्यनुकूलतया च तदुपन्यासे अन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याप्राप्तकालत्वमिति ।

### । केवलव्यतिरेक्यनुमाननिरूपणम् ।

**केवलव्यतिरेकी असत्सपक्ष** इति । न सत्पक्षो यस्य इत्यसत्सपक्षः, यथा जीवच्छरीरं प्राणादिमत्त्वात् इति अत्र जीवातिरिक्तः कोऽपि साध्यवान् निश्चितो नास्ति । **सिद्ध्यसिद्धीति** । ननु सपक्षः सिद्धो वाऽसिद्धो वा ? यदि सिद्धस्तदा तस्याभावो न सम्भवति । असिद्धश्चेत् तदा कस्याभावः ? सदसद्भ्यामभावो निरूप्यते, न त्वेकेनासतेति । प्रतियोग्यप्रसिद्ध्याऽभावो न सम्भवति इत्याशङ्कायामसत्सपक्ष इत्यर्थमाह - व्यतिरेकसहचारमात्रेण व्याप्तिग्रहः, स एव व्यतिरेकीत्यसत्सपक्ष इत्यर्थः । यथाश्रुते अन्वयव्यतिरेकिण्यपि व्यतिरेकसहचारेणापि व्यतिरेकव्याप्तिर्गृह्यत इति कृत्वा तस्यापि केवलव्यतिरेकित्वं स्यात् । अतो मात्रपदम् । ननु दशाविशेषे व्यतिरेकसहचारमात्रेण धूमे व्यतिरेकव्याप्तिर्गृह्यते तदा केव[लव्यतिरेकिता] धूमादौ इष्टे(ष्टै)वेति भावः । मूले शङ्कते - **नन्विति** । केवलव्यतिरेकी नानुमानम् । अत्र युक्तिमाह - व्याप्तिविशिष्टपक्षधर्मताज्ञानस्यानुमितिकारणत्वात् तच्च प्रकृते न सम्भवति । व्यतिरेकव्याप्तिः कोऽर्थः ? साध्याभावहेत्वभावयोर्व्याप्तिः । पक्षधर्मतान्वयस्य हेतोरेवेति । **तत्रेति** साध्याभावे व्याप्तिः हेतो(तौ) पक्षधर्मता इत्यर्थः । मध्ये शङ्कते - **न चेति** । उभयमप्यनुमितिप्रयोजकमस्तु ।

व्याप्तस्य हेतोः पक्षधर्मता इत्येकम्, द्वितीयं तु साध्याभावव्यापकाभावप्रतियोगित्वम्। यद्धेतोस्तदनुमितिप्रयोजकं प्राणादिमत्त्वस्य हेतोः व्याप्तस्य पक्षधर्मत्वं जीवच्छरीरधर्मत्व(त्वं) समस्तीति प्रथमम्। द्वितीयं तु साध्याभावस्य व्यापकीभूतो योऽभावः हेत्वभावः, कथम् ?, यत्र साध्याभावस्तत्र हेत्वभावः, तत्प्रतियोगित्वं हेतोरेवेति। न च वाच्यमित्याशयः । **अननुगमा**दिति। एवमनुमितिं प्रति एकमनुगतं कारणं नास्ति। कुत्रचिद् व्याप्तपक्षधर्मत्वम्, कुत्रचित् साध्याभावव्यापकाभावप्रतियोगित्वम्। तथा च परस्परव्यभिचारो यत एकैकविरहेऽप्यनुमितिदर्शनादित्यर्थः। **न चे**ति। अन्यतरत्वमेतदुभयान्यान्यत्वम् कारणतावच्छेदकमिति न च वाच्यम्। **एके**ति। इन्द्रियं परामर्शः सादृश्यज्ञानं वाक्यार्थज्ञानं वैतेषामप्यन्यतरत्वेनैव तत्तत्पमां प्रति कारणता स्यात् । ननु प्रमाणचतुष्टयं कारणता तु चतुर्णामप्यन्यतरत्वेनैव रूपेण भविष्यति इत्यर्थः। **एकजातीये**ति टीका। प्रमात्वजात्या चतुर्णामप्येकजातीयत्वादित्यर्थः । शङ्कते - **न चे**ति। यथा तृणारणिमणिस्थले वह्निविशेषे तृणस्य कारणतां अरणेरपि वह्निविशेषे कारणता एवं मणेरपि वह्निविशेषे कारणता तृणत्वेन अरणित्वेन मणित्वेन तथा प्रकृतेऽपि अनुमितिविशेषे व्याप्तपक्षधर्मत्वं प्रयोजकम् अनुमितिविशेषे च साध्याभावव्यापकाभावप्रतियोगित्वं प्रयोजकम् इति न च वाच्यम्। युक्तिमाह - **व्यतिरेकी**ति। तर्हि व्यतिरेक्यनुमितौ अनुमितित्वं न स्यात्। कथमित्यत आह - **उभये**ति। उभयवादिसिद्धं यतः क्लृप्तम् अनुमितिसामान्यकारणं व्याप्तिविशिष्टपक्षधर्मताज्ञानम्, तदभावात् सामान्यकारणाभावेऽनुमितित्वावच्छिन्नकार्यमेव न स्यात्। **न चे**ति। अनुमितिसामान्ये साध्याभावव्यापकाभावप्रतियोगित्वमनुमितिसामान्ये कारणमिति [79 A] न च वाच्यम्। व्याप्तिविशिष्टपक्षधर्मताज्ञानापेक्षयासा(याऽस्य) गुरुत्वम् अभावद्वयगर्भत्वादित्यर्थः । दूषणान्तरमाह - **केवलान्वयिनी**ति । केवलान्वयिनि साध्याभावाप्रसिद्धिरित्यर्थः। **अथे**ति। केवलव्यतिरेकिणि साध्यव्याप्यत्वमनुमेयम्। हेतोः(तुना) केन ? साध्याभावव्यापकाभावप्रतियोगित्वेन। तथा च हेतुः साध्यव्याप्यः साध्याभावव्यापकाभावप्रतियोगित्वात् अन्वयव्यतिरेकिहेतुवत् । **एवमि**ति। व्यतिरेकव्याप्त्या साध्याभावव्यापकाभावप्रतियोगित्वरूपयाऽन्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकी । **वृत्तिमत्त्वेने**ति टीका । यदि साध्याभावव्यापकाभावप्रतियोगित्वेन साध्यव्याप्यत्वमनुमेयं तदा आकाशे व्यभिचारः। कथम् ? साध्याभावस्य व्यापकीभूतोऽभाव आकाशात्यन्ताभावः। यत्र साध्याभावस्तत्राकाशात्यन्ताभाव इति वर्तते। परमाकाशे साध्यव्याप्यत्वं नास्ति। कथम् ?, साध्यव्याप्यत्वं नाम हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यमाकाशस्यावर्ति(वृत्ति)त्वात् सामानाधिकरण्याभावः इत्याशङ्कायां **समाधत्ते** - **वृत्तिमत्त्वेने**ति टीका। तथा चावृत्तिमत्त्वे सति साध्याभावव्यापकाभावप्रतियोगित्वमिति हेत्वर्थः। **एवमि**ति टीका। तथा चान्वयव्यतिरेकतो भेदमाह केवलव्यतिरेकिणः इत्यर्थः। दूषयति - **अन्वये**ति। यद्यन्वयव्याप्तेर्व्यतिरेकिण्यपि गमकतोच्यते तदा व्यतिरेकव्याप्तेरुपन्यासोऽर्थान्तरग्रस्तः । कथम् ? प्रकृते उपयुक्तत्वात् प्रकृतेऽन्वयव्याप्तेरेवोपयुक्तत्वात् । प्रकृतानु[प]युक्तस्योक्तिरर्थान्तरम्। ननु अन्वयव्याप्त्यनुकूला

व्यतिरेकव्याप्तिर्भवति । व्यतिरेकव्याप्त्याऽन्वयव्याप्तिरनुमीयते इति कृत्वा अन्वयव्याप्त्यनुकूला व्यतिरेकव्याप्तिर्भवति इत्यत आह - **अन्वयव्याप्तीति**। यद्यन्वयव्याप्त्यनुकूलत्वेन व्यतिरेकव्याप्तेरुपन्यासः तदा अप्राप्तकालता स्यात् । अनाकाङ्क्षिताभिधानमप्राप्तकालता । प्रकृते वाऽऽकाङ्क्षा अन्वयव्याप्तेस्तस्याः अनभिधानम् अकथनम् इत्यप्राप्तकालतेति । अथ व्यतिरेकव्याप्तिं समर्थयति - **उच्यत** इति ।

**उच्यते। निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते प्रतियोग्यनुयोगिभावस्य नियामकत्वात् अन्वय-व्यतिरेकिवत् । नन्वेवं व्याप्तिग्रह एव पृथिवीतरभिन्नेति भासितं नियतसामानाधिकरण्यरूपत्वाद् व्याप्तेरिति, सत्यम्, गन्धवत्त्वावच्छेदेनेतरभेदस्य साध्यत्वात् । अत एवाचार्यः पक्षतावच्छेदकस्य न हेतुत्वमनुमेने पृथिवीत्वमितरभेदव्याप्यमिति प्रतीतावपि सर्वा पृथिवीतरभिन्नेति पृथिवीविशेष्यकबुद्धेर्व्यतिरेकिसाध्यत्वाच्च ।**

**निरुपाधीति** मूलम् । निरुपाधिको यो व्यतिरेकसहचारस्तेन व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते । अभावयोः सहचारेण भावयोरेव व्याप्तिर्गृह्यते प्रतियोग्यनुयोगिभावस्य नियामकत्वादिति। निरुपाधिकेति पदादाने पृथिवी इतरेभ्यो भिद्यते द्रव्यत्वात् इत्यत्रापि व्यतिरेकसहचारो वर्तते, यथा यत्रेतरभेदाभावस्तत्र द्रव्यत्वाभावः, इति सहचारमात्रेण द्रव्यत्व-इतरभेदयोरपि व्याप्तिग्रहः स्यात् इत्यत उक्तम् - **निरुपाधिकेति**। तत्र च गुणाभावस्यैवोपाधेर्विद्यमानत्वात्, तथाहि व्यतिरेकि(क)व्याप्तौ यत्र व्यापकः द्रयव्यत्वाभावः व्याप्यस्तु इतरभेदाभावः तथा च यत्र द्रव्यत्वाभावस्तत्र गुणाभावः इति वर्तते, परं यत्र इतरभेदाभावस्तत्र गुणाभाव इति नास्ति जलादौ व्यभिचारः, ततो निरुपाधिकेति । तथा चोपाधेर्लक्षणम् - व्यापकव्यापकत्वे सति व्याप्याव्यापकत्वमिति । **निरुपाधीति** मूलस्यार्थमाह - **साध्यसाधनेति** टीका । साध्यसाधनयोर्यो व्यतिरेको तयोर्यत् सहचारज्ञानं तेन साध्यानुमित्यनुकूला अन्वयव्याप्तिरेव गृह्यते, यथाश्रुते तु व्यतिरेकसहचारोऽन्वयव्याप्तिग्राहको [79 B] न भवति किन्तु व्यतिरेकसहचारज्ञानं तद्ग्राहकम्। अथ व्यतिरेकसहचारोऽपि कयोरित्यत्र सम्बन्धापेक्षा स्यात्, अथवाऽन्वयव्याप्तिस्तेन गृह्यते इति या काचिदपि अन्वयव्याप्तिरपि गृह्यतामिति ह्यसङ्गतं स्यात्, इत्यन्यथा व्याख्यातम्। अन्यसहचारज्ञानेन या अन्यानुमितिः सा अनुकूला न भवतीति भावः । यदि अन्वयव्याप्तिम् उपन्यस्य व्यतिरेकस्योपन्यासेऽर्थान्तरता इत्याशङ्कते - **नन्विति** टीका । नियतव्यतिरेकसहचाररूपा या व्याप्तिस्तस्या अन्वयव्याप्तिज्ञानार्थमेवोपन्यासः । तथा च अर्थान्तरता न भवति व्यतिरेकव्याप्तिज्ञानस्यान्वयव्याप्तिज्ञाने उपयुक्तत्वात् । प्रकृतानुपयुक्तस्यैवार्थान्तरत्वादिति भावः । ननु प्रतिवादिनोऽन्वयव्याप्तिज्ञानं कथं भविष्यति ? शब्दाद् यद् ज्ञानं

तदनुमितिजनकं भवति इत्यत आह - **अन्वयव्याप्तिज्ञानमिति**। यतो वादिवाक्यमप्रमाणं परस्येति कृत्वा तस्य मनस्येवान्वयव्याप्तिज्ञानम्, तदनन्तरमनुमितिः, एतदेवाह - **न हीति**। यद्यपि वादिना शब्देनान्वयव्याप्त्युपन्यासः कृतस्तथापि तच्छाब्दं ज्ञानमनुमितिकारणं न भवति। तत्र हेतुमात्र - **वादिवचनस्येति**। फलितार्थमाह - **तथा चेति**। यत्रान्वयसहचारः स्पष्टः स्फुरति तदा तेनैवान्वयव्याप्तिज्ञापनार्थं नियतान्वयसहचाररूपा व्याप्तिरुपदर्श्यते। **तदसम्भव** इति। यत्रान्वयसहचारो न सम्भवति तदर्थमन्वयसहचारनियतव्यतिरेकसहचारज्ञापनार्थं नियत-व्यतिरेकसहचाररूपा व्यतिरेकव्याप्तिर्गृह्यते। अयमर्थः यथा अन्वयव्याप्तिज्ञापनार्थं नियतान्वयसहचाररूपा अन्वयव्याप्तिरुपदर्श्यते तथा व्यतिरेकिण्यपि व्यतिरेकव्याप्तिज्ञापनार्थं [नियत]व्यतिरेकसहचाररूपा व्यतिरेकव्याप्तिः प्रदर्श्यते इत्यर्थः। **वीप्सेति**। यदि नियतव्यतिरेकसहचार एव व्यतिरेकव्याप्तिस्तदा नियमोपन्यासार्थं वीप्सा यो यो धूमवान् इत्यादिका व्यर्था यतः सहचारज्ञानेनैव व्याप्तिज्ञानं जातमिति आशङ्कार्थः। **तस्या अपीति** टीका। वीप्साया अपीत्यर्थः। वीप्साया अपि व्याप्तिग्रहे उपयोगो वर्तते व्यभिचाराभावप्रदर्शनद्वारा इत्यर्थः। **न चैवमिति**। यदि व्यतिरेकसहचारोपन्यासो [व्य]र्थः [अ]न्वयव्याप्तिप्रदर्शनं विना तदा [अ]प्राप्तकालतेत्याशङ्कार्थः। **अलिङ्ग-भावेनेति**। व्यतिरेकसहचारोऽन्वयव्याप्तिग्रहे लिङ्गीभूय कारणं न भवति येनाप्राप्तकालता स्यात्। यदि व्यतिरेक-सहचारेणान्वयव्याप्तेरनुमानं तदा व्यतिरेकसहचारस्य लिङ्गतयोपन्यासः तदा अप्राप्तकालता भवति। एतदेवोप-दर्शयति - **लिङ्गतयेति** टीका। लिङ्गतया यथा ज्ञापको धूमस्तस्य ज्ञाप्यं वह्न्यादि, तद् [धूमम्] उपन्यस्य वह्नेर्यदि उपन्यासः क्रियते तदाऽप्राप्तकालता भवति यतः पर्वतो वह्निमान् इत्यत्र वह्नेः पूर्वमुक्तत्वात्। प्रकृते च व्यतिरेक-सहचारस्य लिङ्गतया नोपयोगः येनाप्राप्तकालता स्यात्। **अत एवेति** टीका। यतो ज्ञाप्यमुपन्यस्य ज्ञापकं नोपन्यस्यते अप्राप्तकालभयात् अत एव। सिद्धान्तोऽप्येतादृशः यत उपाधिज्ञानात् मानसमपि व्यभिचारज्ञानं जायते इति कृत्वा ज्ञाप्यो यो व्यभिचारस्तमुपन्यस्य उपाधिरुपन्यस्यते इति [80 A] यतो लिङ्गविधया व्यभिचारज्ञानमुपाधिज्ञानं नोपयोगि किन्तु औचित्यावर्जितं कदाचिदुचितमिति सम्भवति इति कृत्वोपाध्युपन्यासे अप्राप्तकालता नास्ति इति **न्यायसिद्धान्तः**। शङ्कते - **नन्विति**। त्वयोक्तं व्यतिरेकसहचारेणान्वयव्याप्तिर्गृह्यते इति, तत्र व्यतिरेकसहचारेण यदि अन्वयमात्रव्याप्तिज्ञानं जन्यते इति मतं तदा यत्र अन्वयमात्रसहचारज्ञानेनान्वयव्याप्तिज्ञानं जन्यते तदपेक्षयाऽ-न्यवैलक्षण्यं वैजात्यमवश्यं वाच्यं विलक्षणकारणप्रयोज्यत्वात् कार्यवैलक्षण्यस्येति कृत्वा व्यतिरेकसहचार-जन्यान्वयव्याप्तिज्ञानेऽवश्यं वैलक्षण्यं वाच्यम्। तच्च वैलक्षण्यं विषयकृतं न भवति, विषयस्तु एक एव साध्य-साधनादिः, तत्कृतं वैलक्षण्यं न संभवति इति कृत्वा जातिरूपं वैलक्षण्यं वाच्यम्। तथा चान्वयव्यतिरेक-सहचारजन्यान्वयव्याप्तिज्ञाने काचिद् विलक्षणा जातिरस्ति सा च न सम्भवति। **चाक्षुषत्वादिना सङ्करापत्तेरिति** टीका। यथा यत्र चाक्षुषत्वं नास्ति स्पार्शनव्याप्तिज्ञाने व्यभिचारस्तदुभयमपि चाक्षुषव्याप्तिज्ञाने वर्तते इति सङ्करः। **यदि चेति** टीका। तस्य केवलव्यतिरेकिणः तुल्यविषयतया यदि जातिरूपं वैलक्षण्यमङ्गीक्रियते तदा चाक्षुषतापत्तेर्नैव

जातिसङ्करः। पूर्वमुक्तं व्यतिरेकसहचारेणान्वयव्याप्तिर्गृह्यते, तस्मिन्नन्वयव्याप्तिज्ञाने यदि [? जाति]रूपं वैलक्षण्य-मङ्गीक्रियते तदा जातिसङ्करः साम्प्रतं तु अन्वयव्यतिरेकसहचारज्ञानजन्यान्वयव्यतिरेकव्याप्तिज्ञानतः व्यतिरेक-व्याप्तेर्वैलक्षण्यं चेदङ्गीक्रियते तदा चाक्षुषत्वादिना जातिसङ्करः स्यात्। यथा पूर्वमुक्तं तथैवात्रापि। मध्ये शङ्कते - **न चे**ति टीका। इदानीं वदति केवलव्यतिरेकिव्याप्तिज्ञाने वैलक्षण्यं नास्ति। व्यतिरेकसहचारज्ञानजन्य-व्याप्तिज्ञानापेक्षया जातिरूपं वैलक्षण्यं नास्ति। कुतः ? तदाह - व्यभिचारज्ञानविरोधिसहचारज्ञानत्वेनोभयसहचार-ज्ञानस्य विजातीयत्वाभावात्। तथा चान्वयव्यतिरेकिण्यपि व्यतिरेकसहचारज्ञानजन्यतावच्छेदिका जातिरस्ति केवलव्यतिरेकिण्यपि सैव जातिरस्तीति न वैलक्षण्यमित्याशङ्कार्थः इति न च वाच्यम्। सहचारो वा सहचारज्ञानं वा व्यभिचारज्ञानविरोधि न भवति। कुतः ? सहचारे विद्यमाने तद्ज्ञाने विद्यमानेऽपि धूमादौ व्यभिचारज्ञानं भवति। तथा भ्रमरूपधूमो वह्निव्यभिचारीति भवत्येव। **स्वाधिकरणे**ति। स्वशब्देन हेतुः, तदधिकरणं महानसादि। तन्निष्ठं च व्यभिचारज्ञानविरोधि यत् सहचारज्ञानं तत् तेन द्वयोरन्वयव्यतिरेकयोः सहचारज्ञानयोः कारणत्वम्। एतदेव स्पष्टयति - **यत्रे**ति। यत्र महानसादौ साध्यसाधनयोः वह्निधूमयोः सहचारः अथवा ह्रदादौ तदभावयोः साध्याभावसाधनाभावयोः सहचारग्रहः तत्राधिकरणे हेतोः साध्याभावेन सह यत् सामानाधिकरण्यं स व्यभिचारः, तस्य ज्ञानं तत्र न भवतीति कृत्वा व्यभिचारज्ञानविरोधिनो(तो)भयसहचारज्ञानस्याप्यस्तीति कृत्वा न जातिवैलक्षण्यं येन जातिसङ्करप्रसङ्गो भवेत्। पुनर्वादी केवलव्यतिरेकिदूषणाय शङ्कते - **नन्वि**ति टीका। [80 B] तव मते व्यतिरेकसहचारेणान्वयव्याप्तिज्ञानं जन्यते इति, तत्राशङ्कते - तदन्वयव्याप्तिज्ञानं कीदृशम् ? व्याप्तिविशेषणकं लिङ्गविशेष्यकं - पृथिवीत्वमितरभेदव्याप्यम् अत्र पृथिवीत्वं लिङ्गमिति व्याप्तिविशेषणकं लिङ्गविशेष्यकं - एतादृशं ज्ञानं जन्यते ?, अथवा व्यभिचाराभावो विशेषणीभूतो यत्र एतादृशं सहचारविशेष्यकं यथा पृथिवीत्वमितरभेदाव्यभिचारि सहचरितं चेति व्यभिचाराभावविशेषणकं सहचारविशेष्यकम् ? **तत्पूर्वमि**ति। यदा व्यतिरेकसहचारेणान्वयव्याप्तिज्ञानं जायते तदा तत्र पृथिवीत्वमितरभेदव्याप्यमित्यापादनीयम्। तद्व्याप्तिज्ञानं न सम्भवति। कुतः ? विशेषणज्ञानं विशिष्टज्ञाने कारणमिति कृत्वा। विशेषणज्ञानं व्याप्तिज्ञानम्। न तु पृथिवीत्व-मितरभेदव्याप्यमिति ज्ञानात् पूर्वं व्याप्ति[ज्ञानम्] तत्सामग्र्यभावात् - तत्सामग्री व्यभिचारज्ञानसहचाररूपा तदभावात्। कथं तत्र व्यतिरेकसहचारेण व्याप्तिज्ञानमन्वयव्याप्तिज्ञानम् ? तथा चान्वयव्याप्तिज्ञान(नं) कारणीभूतं यद् व्याप्तिज्ञानं तत् पूर्वं नास्ति अन्वयसहचाराभावात्। दूषणान्तरमप्याह - **लिङ्गेन्द्रिये**ति। लिङ्गं पृथिवीत्वादिकम्, तेन सहेन्द्रियस्य सन्निकर्षो नास्ति। कुतः ? यत्रेतरभेदाभावस्तत्र पृथिवीत्वाभाव इति यदा यत्र व्याप्तिर्गृह्यते तदा तत्र पृथिवीत्वेन समं सन्निकर्षो नास्ति। इतरभेदाभावस्तु जलादौ गृह्यते तत्र पृथिवीत्वं नास्ति इति कृत्वाऽन्वयव्याप्तिज्ञानं न सम्भवति इति नाद्यः पक्षः। **नान्त्य** इति। व्यभिचारा[भाव]विशेषणं(णकं) सहचारविशेष्यकमन्वयव्याप्तिज्ञानमित्यन्त्यः पक्षो न सम्भवति। कथम् ? विशेषणज्ञानमिति विशेषणं व्यभिचारा-

भावः तस्य ज्ञानम्, विशेष्यः सहचारः तेन यदेन्द्रियसन्निकर्षो नास्ति यतो व्यतिरेकसहचारग्रहेऽन्वयसहचारेण सन्निकर्षो नास्ति विशेषणज्ञानं व्यभिचाराभावज्ञानमपि न सम्भवति। यत्र व्यतिरेकसहचारो गृह्यते तत्रान्वय-व्यभिचाराभावज्ञानमपि न सम्भवति इति कृत्वाऽन्वयव्यतिरेकसहचारेणान्वयव्याप्तिज्ञानं जन्यते इति यदुच्यते तत् कथमित्याशङ्कार्थः । **अन्त्येति** । व्यभिचाराभावविशेषणकं सहचारविशेष्यकमन्वयव्याप्तिज्ञानमित्येव पक्षो युक्तः । तत्राह - **युक्तिं तस्येति** । व्यतिरेकसहचारज्ञानस्य इतरसामग्र्यामन्वयव्याप्तिज्ञानसामग्र्यां विद्यमानायां विशेषणज्ञानं व्यभिचाराभावज्ञानं सहचाररूपो यो विशेष्यः तेन सहेन्द्रियसन्निकर्षः इत्याद्यन्वयव्याप्तिज्ञानसामग्री अस्तीति कृत्वा व्यतिरेकसहचारस्यान्वयव्याप्तिग्राहकत्वम्। एतदेवाह - **विशेषणेति**। यदा विशेषणज्ञानादिकं वर्तते तदाऽन्वयव्याप्तिज्ञानमपि कारणीभूतं यद् व्याप्तिज्ञानं तस्माद् व्याप्तिग्रहो यथा पृथिव्यामितरभेदव्याप्य-मित्येवाभिमतमित्यर्थः । **न त्विति**। [81 A] तद्व्यतिरेक अन्वयव्याप्तिज्ञानसामग्रीव्यतिरेके। अन्वयव्याप्तिज्ञानं व्यतिरेकसहचारज्ञानमात्राज्जायते इत्यभिमतोऽर्थो नास्तीत्यर्थः। **तस्येति**। व्यभिचाराभावज्ञानस्य अन्वयसहचार-ज्ञानस्थानेऽभिषिक्तो(षेको)ऽस्ति । यत्र व्यभिचार(रा)भावज्ञानमस्ति तत्रावश्यमन्वयसहचारज्ञानं वर्तते एव इत्यभिषेकः। तथा च निष्प्रत्यूह(हः) व्यतिरेकसहचारेणान्वयव्याप्तिग्रह इत्यर्थः। **अन्यथेति**। यदि अन्वयव्याप्तिग्रहे अन्वयसहचारो नापेक्ष(क्ष्य)ते तदा इतरकारणविरहे विशेषणज्ञानादिविरहे अन्वयसहचारमात्रेण व्याप्तिग्रहो न भवति इति कृत्वाऽन्वयसहचारस्यापि कारणत्वं न स्यात्, वर्तते चान्वयसहचारस्य व्याप्तिग्रहे कारणता। तथा चान्वयव्याप्तिज्ञाने अन्वयसहचारो विशेषणज्ञानमन्वयव्याप्तिज्ञानं विशेषणज्ञानत्वे कारणमागतमेव। **अन्वयेति** । अन्वयव्यतिरेकवत् इति यदुक्तं तदुभयसहचारेणान्वयव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते इति यस्य मतं तन्मताभिप्रायेण । यन्मते व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते तेषां मते व्यतिरेकव्याप्तिर्न गृह्यत एवेति तन्मताभिप्रायेणेदमुक्तमित्यर्थः। पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् इत्यत्र पक्षतावच्छेदकसाध्यसामानाधिकरण्य-मनुमितिफलम्, तच्च पृथिवी इतरभिन्ना इति व्याप्तिग्रहेणैव जातम्, व्याप्तिश्च हेतुसाध्ययोर्नियतसामानाधिकरण्यम् । तथा च व्यतिरेकीकृतस्य व्याप्तिज्ञानेनैव जातत्वात् व्यतिरेकी(कि) विफलमित्याशङ्कते - **नन्विति** मूलम्। अत्र पक्षः पृथिवी, पक्षतावच्छेदकं पृथिवीत्वम्, इतरभेदः साध्यः, तयोः सामानाधिकरण्यमनुमितेः फलम्, व्याप्ति-ग्रहोऽपि पृथिवी इतरभिन्ना इत्येवमाकारकः । यतोऽभावयोः सहचारो भावयोर्व्याप्तिरिति पृथिवीत्वइतरभेदयोः सामानाधिकरण्यं भातमेव, तथा चानुमितेर्वैफल्यमागतमित्याशङ्कार्थः। **सत्यमिति** मूलम्। पृथिवीत्वावच्छेदेने-तरभेदो व्याप्तिग्रहेणैव सिद्धः । पृथिवी इतरभिन्ना इति व्याप्तिग्रहकाले पृथिवीत्व-इतरभेदसामानाधिकरण्यं सिद्धमेव। गन्धवत्त्वावच्छेदेन इतरभेदः सिद्धो नास्ति यतः पृथिवीत्व-इतरभेदयोरेव सामानाधिकरण्यं सिद्धमस्ति परं गन्धवत्त्व-इतरभेदयोः सामानाधिकरण्यं सिद्धं नास्ति यतो गन्धवती पृथिवी इतरभिन्ना इति व्याप्तिग्रहो न जातः तेन पक्षतावच्छेकं गन्धवत्त्वम् तेन समं सामानाधिकरण्यं न सिद्धमिति साध्यते । **अत एवेति** मूलम् । यतः

सिद्धसाधनं भवति अत एव **उदयनाचार्यैः** पक्षतावच्छेदकस्य हेतुत्वं नानुमेने, यः पक्षतावच्छेदकः स हेतुर्न भवतीति भावः। इदानीं प्रकारान्तरेण सिद्धसाधनतां निरस्यति - **पृथिवीत्वमिति**। सिद्धसाधनता उद्देश्यसिद्धौ भवति, प्रकृते चोद्देश्यसिद्धिर्न जाता। यद्यपि पृथिवी[त्व]मितरभेदव्याप्यमिति सिद्धिर्जाता तथापि सर्वा पृथिवी इतरभिन्ना इति प्रतीतिर्न जाता। सर्वा पृथिवी इतरभिन्ना इति उद्देश्या प्रतीतिः सा तु न जातैव। **पृथिवीविशेष्यकेति** मूलम्। सर्वा पृथिवी इतरभिन्ना पृथिवीत्वात् इत्यनुमाने व्यतिरेकिणि सर्वपृथिव्यामितरभेदः न सिद्ध्यति। अत्र पक्षतावच्छेदकं सर्वपृथिवीत्वम्। यद्यपि पृथिवीत्वसामानाधिकरण्येन इतरभेदस्य व्याप्तिग्रहकाले सिद्धिर्जाता तथापि पक्षतावच्छेदकावच्छेदेन इतरभेदेनेतरभेदस्य व्याप्तिग्रहकाले सिद्धिर्न जाता इति कृत्वा उद्देश्य-पृथिवी[प्र]तीत्यसिद्धेः न सिद्धसाधनत्वम्। [81 B] **एवमिति** टीका। एवममुना प्रकारेण गन्धवत्त्वावच्छेदेन इतरभेदः साध्यः इति सिद्धसाधनतापरिहारः कृतः, तत्रास्वरसमाह - **एवमिति**। अन्वयव्याप्तिग्रहे पृथिवीत्व-मितरभेदव्याप्यमिति स्वरूपे गन्धवत्त्वादेरुपस्थितिरेव नास्ति। ततस्तदा पक्षतावच्छेदकान्तरं गन्धवत्त्वं नोपस्थितं किन्तु पृथिवीत्वमेवोपस्थितम्, तदा सिद्धसाधनता भविष्यत्येव इत्यस्वरसादाह - **पृथिवीत्वमिति**। **यथा मितीति** टीका। यथाऽयं वह्नित्वेनानुभवो वह्नित्वाभावविशेष्यको न हेतुः दाहसमर्थत्वादिनू(स्थ)ले व्यतिरेकि-त्वाभाववद्विशेष्यका(को) नेत्यत्र वह्नित्वाभाववद्विशेष्यकत्वाभावरूपाप्रामाण्याभावः साध्योऽभावरूपः, तत्र व्यतिरेकिणा अप्रसिद्धमपि साध्यं सिद्ध्यति यतोऽप्रामाण्याभावस्य कुत्रापि सिद्धिर्नास्ति। **अन्वयेति** टीका। अन्वयव्याप्तिज्ञानजनकं यद्विशेष्यज्ञानं साध्यज्ञानं तद्विरहेऽपि व्यतिरेकव्याप्तिज्ञानादेवानुमित्यङ्गीकारः तन्मतेन प्रकारान्तरमाहेत्याभासार्थः।

**यद्वा व्यतिरेकव्याप्तेरेवान्वयेन गम्य-गमकभावः, साध्याभावव्यापकसाधनाभावा-भावेन साधनेन साध्याभावाभावस्य साध्यस्य साधनात् व्यापकाभावेन व्याप्याभावस्या-वश्यम्भावात्। अथैवं न सानुमितिः क्लृप्तहेतुलिङ्गपरामर्शाभावादन्यथाननुगम इति चेत्। न। अनुमितिमात्रे व्याप्तिज्ञानस्य प्रयोजकत्वात्। न चैवमतिप्रसङ्गः, अनुमितिसामान्य-सामग्र्यां सत्यामप्यनुमितिविशेषसामग्रीविरहादनुमित्यनुत्पत्तेः विशेषसामग्रीसापेक्षाया एव सामान्यसामग्र्या जनकत्वात् अन्वयि-व्यतिरेकिविशेषद्वयसामग्री च नास्त्येव।**

**यद्वेति** मूलम्। व्यतिरेकव्याप्ते(प्ति)र्गमिका अनुमितिर्गम्या। अन्वयो गम्यः। कोऽर्थः ? साध्यानुमितिर्गम्या। तदेव स्पष्टयति - **साध्याभावेति**। साध्याभाव इतरभेदाभावः, तस्य व्यापको योऽभावः पृथिवीत्वाभावः यथा यत्र यत्र इतरभेदाभावः तत्र तत्र पृथिवीत्वाभावः, तस्य पृथिवीत्वस्याभावाभावेन पृथिवीत्वाभावाभावेन पृथिवीत्वेन

पक्षे पृथिव्याम् इतरभेदाभावाभाव इतरभेदः साध्यते, यतः ययोरभावयोः सहचारः तत्प्रतियोगिनोरेव व्याप्तिः। एतदेवाह - व्यापको यः पृथिवीत्वाभावः तस्य योऽभावः पृथिवीत्वं तेन व्याप्यो योऽभावः इतरभेदाभावः तदभावो यदितरभेदस्तदवश्यंभावात् । **तथा चेति** टीका । पूर्वोक्तरूपं व्यभिचारविरोधिसहचारत्वं तेन रूपेण व्यतिरेकसहचारस्य यदा इन्द्रियसन्निकर्षादिकं वर्तते तदा व्यतिरेकसहचारस्य अन्वयव्याप्तिज्ञानं प्रति कारणता, यदा च विशेष्येन्द्रियसन्निकर्षादिकं नास्ति तदा व्यतिरेकसहचारस्य व्यतिरेकव्याप्तिज्ञानं प्रत्येव कारणता। पर्वतो वह्निमान् इत्यादिस्थले पर्वतो विशेष्यः। प्रकृते च पृथिवीत्वं पक्षः विशेष्यम्, तेन सह इन्द्रियसन्निकर्षो नास्ति तदा व्यतिरेकसहचारस्य व्यतिरेकव्याप्तिज्ञानं प्रति कारणतेति । तस्य व्यतिरेकसहचारस्य अनियम एवेति । यतो व्यतिरेकसहचारस्य अन्वयव्याप्तिं प्रत्यपि कारणता व्यतिरेकव्याप्तिं प्रत्यपि कारणता इति नियमो नास्ति । **नन्विति** टीका। यदि नियमः क्रियते व्यतिरेकसहचारस्य व्यतिरेकव्याप्तिं प्रति एव कारणता तदाऽस्वरसो भवति परं नियमो नास्ति। व्यतिरेकव्याप्तेरिति पञ्चम्यन्तं पदम्। तथा चायमर्थः - व्यतिरेकसहचारस्य अन्वयव्याप्तिज्ञानं प्रत्यपि कारणता, तथा चैवमन्वयः साध्यसाधनयोर्गम्यगमकभावः, कुतः ?, व्यतिरेकव्याप्तेः। एवं च यत्राभाव-योर्व्याप्तिः तत्राभावयोर्गम्यगमकभाव इति स्पष्टम् । ननु साध्याभावव्यापकाभावप्रतियोगित्वं व्यतिरेकिणि गमकताप्रयोजकं न भवति। कुतः ? साध्याभावस्य रूपाभावस्य व्यापकीभूतो योऽभावः संयोगाभावः यथा यत्र यत्र [82 A] रूपाभावः तत्र तत्र संयोगाभावः संयोगाभावस्य केवलान्वयित्वात् तत्प्रतियोगित्वं संयोगे वर्तते इति कृत्वा संयोगेन रूपानुमानं स्यात् परं यत्र संयोगः तत्र रूपमिति नास्ति आकाशादौ व्यभिचारात् इत्यत आह - **अत्रेति** । अ[त्र] व्यापकाभावे प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमिति विशेषणं ज्ञातव्यम् । तथा चायमर्थः प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नो यो व्यापकाभावस्तत्प्रतियोगित्वमित्यर्थः पर्यवसन्नः। तथा च संयोगात्यन्ताभावः प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नो न भवति संयोगतदभावयोः समानाधि-करणत्वात्। साध्याभावेऽपीदं विशेषणं देयम्, प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नो यो व्याप्यः। तथा अयं संयोगवान् द्रव्यत्वात् इत्यन्वयव्यतिरेकिणि नाव्याप्तिः, साध्याभावव्यापकाभावे यतोऽत्र साध्याभावः संयोगाभावः तस्य व्यापको योऽभावः द्रव्यत्वाभावस्तत्प्रतियोगित्वं द्रव्यत्वे वर्तते, परमयं संयोगाभावस्य व्यापकीभूतो न भवति द्रव्ये व्यभिचारात्। यतो द्रव्ये संयोगात्यन्ताभावो वर्तते परं द्रव्यत्वाभावो नास्तीति साध्याभावे विशेषणं दातव्यम्। तथा च व्यभिचारो नास्ति। प्रतियोगिव्यधिकरणः संयोगाभावो गुणादौ वर्तते तत्र द्रव्यत्वाभावोऽप्यस्ति इति प्रतियोगित्वं द्रव्यत्वे वर्तते इति हेतुरप्यस्ति साध्यमप्यस्तीति न व्यभिचारः। एतदेवाह - **अन्यथेति**। यदि प्रतियोगिव्यधिकरणेति पदं न दीयते तदा संयोगोना(गेना)पि रूपानुमानं स्यादित्यर्थः । यदि च साध्याभावे प्रतियोगिवैयधिकरण्येति न दीयते तदा द्रव्यत्वेन संयोगानुमानं न स्यात् इत्यर्थः । ननु केवलान्वयिसाध्यके घटोऽभिधेयः प्रमेयत्वात् इत्यत्र अव्याप्तिः साध्याभावस्याप्रसिद्धत्वात् इत्यत आह - **केवलान्वयिसाध्यके** इति

टीका। केवलान्वयिसाध्यकहेतोः केवलान्वयित्वेनैव सङ्ग्राह्यत्वम् न तु व्यतिरेकित्वेन येनाव्याप्तिर्दूषणं स्यात्। तेन साध्याभावव्यापकाभावप्रतियोगित्वस्य अन्वयव्यतिरेकिकेवलव्यतिरेकिसाधारणस्य साध्याभावाप्रसिद्धि-निबन्धनादव्याप्तिर्दूषणं न। यतस्तस्य केवलान्वयित्वेनैव सङ्ग्रहः। **अन्यथेति**। यदि केवलान्वयिनः केवलान्वयित्वेन सङ्ग्राह्यता नोच्यते तदा अनुमानत्रितयबहिर्भावस्तस्य स्यात्, केवलान्वयि तु भवता नोच्यते, व्यतिरेकि तु न भवति साध्याभावाप्रसिद्धेः, अन्वयव्यतिरेकि तु न भवति द्वयोर्लक्षणाभावः। शङ्कते - **नन्विति** टीका। अयं संयोगव्यक्तिविशेषाभाववान् विभागव्यक्तिविशेषाभावात् इत्यनुमानं न स्यात्। कुतः ? व्यतिरेकिणि गमकताप्रयोजकतारूपाभावात्। कथम् ? यो साध्याभावः संयोगव्यक्तिविशेषाभावः स प्रतियोगिव्यधिकरणो नास्ति प्रतियोगिसामानाधिकरण्यनियमात् संयोगाभावस्येति कृत्वा प्रतियोगिव्यधि-करणसाध्याभावव्यापकीभूतप्रतियोग्यसमानाधिकरणो योऽभावस्तत्प्रतियोगित्वरूपं यद्गमकताप्रयोजकं तस्याभावादव्याप्तिरित्याशङ्कार्थः। समाधत्ते - **तस्येति**। [82 B] विभागव्यक्तिविशेषाभावेन यत् संयोगव्यक्ति-विशेषाभावानुमानं तत् केवलान्वयित्वेनैव सङ्ग्राह्यम्। यतः सर्वत्र विभागव्यक्तिविशेषाभावः अथ च संयोगव्यक्तिविशेषाभावः तयोः सत्त्वात्। अतः केवलान्वय्येव सः। ननु व्यतिरेकीवद् गमकताप्रयोजकाभावात् तस्य लक्षा(क्ष्या)भावान्नाव्याप्तिरित्यर्थः। ननु यत्र संयोगव्यक्तिविशेषस्तत्रावश्यं विभागव्यक्तिविशेष इति पूर्वकृतसंयोगाभावानुमानापेक्षया इयं व्यतिरेकव्याप्तिप्रमा भवति। तत्र संयोगाभाव-विभाग(गा)भावयोः कथं साध्यसाधक(न)भावः कुतः ? पूर्वोक्तरीत्या यतस्तत्र साध्याभावव्यापकीभूताभावप्रतियोगित्वम्। अयं संयोगा-भाववान् विभागाभावात् इति अत्र नास्ति। कथम् ? प्रतियोग्यसमानाधिकरणाभावात्। न च तस्य विभागाभावेन संयोगाभावानुमानस्य केवलान्वयित्वमेव भविष्यतीति वाच्यम्। **अन्वयव्याप्तीति** टीका। यदाऽन्वयव्याप्तेः स्फूर्तिर्नास्ति तदा केवलान्वयित्वं न संभवति। तदस्फूर्त्या तस्यागमकत्वात्। चकारस्तूक्तरीत्येत्याद्यपेक्षया दूषणान्तरप्रकाशार्थः। **न चेति**। तस्य विभागाभावस्य हेतोर्गमकत्वमेव नास्ति इत्याशङ्कार्थः यतो व्यतिरेक-व्याप्तिगमकताप्रयोजकाभावात्। अन्वयव्याप्तेश्च स्फुरणमेव नास्ति इत्यतो न विभागव्यक्तिविशेषाभावस्य गमकत्वमिति भावः। **एवमिति**। यत्र वह्न्यभावस्तत्र धूमाभावः इत्यत्र व्यतिरेकव्याप्तिग्रहे धूमस्यापि गमकता स्यात् अन्वयव्याप्त्यस्फुरणात्। अयमर्थः - यत्रा(त्र) विभागाभावेन संयोगा(ग)व्यक्तिविशेषाभावानुमानं क्रियते तत्रागमकत्वेनेष्टापादनं कृतम्, तदा धूमस्याप्यगमकत्वेन कथमिष्टापादनं न क्रियते इत्ययं प्रश्नार्थः। उत्तरयति - **तादृशेति**। साध्याभावव्यापकाभावप्रतियोगित्वस्य रूपादिविरुद्धं[१] यत् संयोगादिकं तत्रातिव्याप्तित्वेनानन्यगत्या गुरुभूतस्यापि प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नस्य गमकत्वे तादृशरूपस्य प्रतियोगिव्यधिकरणेत्यादि-रूपस्य गमकत्वेन विभागाभावेन संयोगा[भावा]नुमानेऽसंभवात्। **तदेति**। अन्वयव्याप्त्यस्फुरणदशायां

१. प्रतौ तु 'रूपादिरूपादिविरुद्धम्' इति पाठः।

विभागाभावस्य संयोगाभावागमकत्वमिष्टमेवेत्यर्थः । तथा चान्वयव्याप्त्यस्फूर्तिदशायां विभागाभावेन संयोगा[भावा]नुमानं न भवत्येवेत्यर्थः । **अत एवेति** । यतः प्रतियोगिवैयाधिकरण्यावच्छेदकावच्छिन्न-साध्याभावव्यापकाभावप्रतियोगित्वमिदं विशेषणं व्यतिरेकिगमकताप्रयोजकम् अत एव धूमानुमाने व्यतिरेक-दशायां साध्याभावप्रतियोगित्वेन यदा ज्ञानं तदे(दै)व व्यतिरेकिणि धूमस्य गमकत्वं नान्यथेति । यदि तादृशज्ञानं नास्ति तदा धूमस्य व्यतिरेकमुखेन न वह्निगमकत्वमित्यर्थः । अत्र चिन्त्यं करोति । **अत्रेति** । भवता यदुक्तं प्रतियोगिव्यधिकरणसाध्याभावव्यापकाभावप्रतियोगित्वं व्यतिरेकिणि गमकताप्रयोजकं तन्न संभवति । कथम् ? तत्राह - **अप्रसिद्धेति** । अप्रसिद्धसाध्यके व्यतिरेकिणि अप्रामाण्याभावसाध्यके व्यतिरीकिणि । अप्रामाण्याभावरूपं यत् साध्यं तत् प्रसिद्धं नास्ति । तत्र व्यतिरेकिणि गमकत्वम् [83 A], व्यतिरेकिणि गमकं भवति प्रतियोगीत्यादि । तत्तु प्रकृते न संभवति । कथम् ? प्रतियोगिनः साध्यस्याप्रसिद्धेः, अतो न गमकत्वमिति चिन्त्यम् । अथाप्रसिद्ध-साध्यकव्यतिरेकिणि उक्तरूपमविकलमिति प्रकारान्तरेण गमकतामाह - **यत्त्विति** । साध्याभावे एतादृशं विशेषणं देयम् - प्रतियोगिव्यधिकरणस्वसमानाधिकरणेत्यादि । प्रतियोगिना समं यो व्यधिकरणः साधना(न)समानाधिकरणो योऽत्यन्ताभावस्तस्य प्रतियोगी घटादिः स अप्रतियोगी यस्य एतादृशो यः साध्याभावः तद्व्यापकीभूतो योऽभावस्त-त्प्रतियोगित्वं हेतोः । एवं च कृते प्रसिद्धि(द्ध)साध्यव्यतिरेकिणि अप्रसिद्धिर्नास्ति । कथम् ? अयं वह्नित्वेन अनुभा(भ)वः इत्यत्र प्रतियोगिव्यधिकरणो यः साधनसमानाधिकरणोऽत्यन्ताभावस्तत्प्रतियोगी घटादिः तद-प्रतियोगि[कः] अप्रामाण्याभावाभावः तद्व्यापको दाहेत्यादिको हेत्वभावो वर्तते इति कृत्वा एतदयु(तदु)क्तरूपं गमकताप्रयोजकम् अप्रसिद्धसाध्यव्यतिरेकिण्यप्यस्ति इति न किञ्चिद् बाधकमिति । दूषयति - **व्यतिरेकीति** । व्यतिरेक्याभासे इत्यत्रापि कदाचिद् व्यतिरेकव्याप्तिज्ञानादनुमितिर्जायते सा न स्यात् उक्तरूपाभावात् । तथाहि प्रतियोगिव्यधिकरणः द्रव्यत्वसमानाधिकरणः संयोगस्यापि अभावो भवति, स प्रतियोगिव्यधिकरणो न भवतीति कृत्वा एतादृशरूपाभावत्वेन व्यतिरेकत्वाभासे कथमनुमितिः, तन्मतं पूर्वोक्तं दुष्टम् । मध्ये शङ्कते - **न चेति** टीका । तत्त्वं गमक(कं) नोच्यते प्रतियोगिव्यधिकरणेत्यादि, परमुक्तरूपं ज्ञानं गमकताप्रयोजकं तच्च प्रमाभ्रमसाधारणमिति । व्यतिरेक्याभासस्थले यद्यपि तद् ज्ञानं प्रमारूपं न संभवति तथापि भ्रमरूपं भविष्यत्येव तथा च द्रव्यत्वाभावः संयोगाभावस्य व्यापकः इति भ्रमो भविष्यतीत्यर्थः । **तत्त्वेनेति** । साध्याभावव्यापकाभावप्रतियोगित्वेन ज्ञानं व्यभिचारज्ञानविरोधि भवति न वा ? यदि भवति तदा व्यतिरेकसहचारमात्रविषयत्वेन गमकं भविष्यति, प्रतियोगिव्यधिकरणेत्यादिनियमः स व्यर्थः स्यात् ।[१] < अत्र चिन्त्यं करोति । **अत्रेति** टीका । यदुक्तं प्रतियोगि-व्यधिकरणसाध्याभावव्यापकाभावप्रतियोगित्वं व्यतिरेकिणि गमकताप्रयोजकमित्युक्तम्, तन्न सम्भवति । कथम् ? तत्राह - **अप्रसिद्धेति** टीका । अप्रसिद्धसाध्यके व्यतिरेकिणि अप्रामाण्याभावसाध्यकव्यतिरेकिणि

---

१. < > अनयोश्चिह्नयोरन्तर्गतः पाठः पुनरावृत्तः किन्तु तस्मिन् पाठान्तराणि सन्ति ।

अप्रामाण्याभावरूपं यत् साध्यं तत् प्रसिद्धं नास्ति, तत्र व्यतिरेकिणि प्रतियोगिन एवाप्रसिद्ध्या प्रतियोगिव्यधिकरणेत्याद्युक्तरूपाभावेन कथं गमकत्वमिति चिन्त्यार्थः। अथाप्रसिद्धसाध्यकव्यतिरेकिणि उक्तरूपमविकलमस्तीति गमकतां प्रकारान्तरेणाह - **यत्त्विति**। साध्याभावे एतद्विशेषणं देयम् - प्रतियोगिव्यधिकरणस्वसमानाधिकरणेत्यादि। प्रतियोगिव्यधिकरणः साधनसमानाधिकरणः अप्रसिद्धे(द्ध)साध्यकव्यतिरेकिणि अप्रसिद्धिर्नास्ति। कथम् ? वह्नित्वेनायमनुभवः इत्यत्र प्रतियोगिव्यधिकरणो [83 B] यः साधनसमानाधिकरणोऽत्यन्ताभावः तत्प्रतियोगी घटादिस्तदप्रतियोगिकोऽप्रामाण्याभावाभावो भवत्येव, तद्व्यापकीभूतो दाहेत्यादिको हेत्वभावो वर्तते एवेति कृत्वा एतदुक्तरूपं गमकताप्रयोजकं व्यतिरेकिण्यप्यस्तीति न किञ्चिद् बाधकम्। दूषयति - **व्यतिरेकीति**। व्यतिरेक्याभासे इदं संयोगि द्रव्यत्वात् इत्यत्र व्यतिरेक्याभासे इत्यत्रापि कदाचिद् व्यतिरेकव्याप्तिज्ञानादनुमितिः जायते सा न स्यात् उक्तरूपाभावात्। तथाहि प्रतियोगिव्यधिकरणः साधनद्रव्यत्वसमानाधिकरणो योऽभावः एवं चेत् तदा द्रव्यत्वसमानाधिकरणसंयोगस्याप्यभावो भवति, स प्रतियोगिव्यधिकरणो न भवतीति कृत्वा तादृशरूपाभावेन व्यतिरेक्याभासे कथमनुमितिः, तन्मतं दुष्टम्। मध्ये शङ्कते - **न चेति**। तत्त्वं गमकं नोच्यते प्रतियोगिव्यधिकरणेत्यादि, परं तज्ज्ञानं गमकताप्रयोजकं तच्च प्रमाभ्रमसाधारणमिति। व्यतिरेक्याभासस्थले यद्यपि तज्ज्ञानं प्रमारूपं न संभवति तथापि भ्रमरूपं भवत्येव। तथा च द्रव्यत्वाभावः संयोगाभावस्य व्यापकः इति भ्रमो भविष्यतीत्यर्थः। **तत्त्वेनेति**। साध्याभावव्यापकाभावप्रतियोगित्वेन ज्ञानं व्यभिचारज्ञानविरोधि भवति न वा ? यदि भवति तदा व्यतिरेकसहचारमात्रविषयत्वेनैव गमकं भविष्यति, प्रतियोगिव्यधिकरणेत्यादिनियमांशो व्यर्थः स्यात् > तथा चेदं पर्यवसितं साध्याभावव्यापकाभावप्रतियोगित्वज्ञानं व्यतिरेकिणः हेतोः गमकताप्रयोजकम्। इदं किमर्थम् ? किन्तु वस्तुगत्या साध्याभावव्यापकाभावप्रतियोगित्वमेव गमकताप्रयोजकम्, गौरवान्न तज्ज्ञानम्। शङ्कते - **अथेति** मूलम्। सा व्यतिरेकव्याप्तिज्ञानजन्याऽनुमितिरेव न भवति। कुतः ? व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपो यो लिङ्गपरामर्शः तस्याभावात्। यथा वह्निव्याप्यधूमवान् इति परामर्शोऽन्वयिनि वर्तते तथा इति ज्ञानं नास्ति। **अन्यथेति**। यदि लिङ्गपरामर्शं विनैव व्यतिरेकव्याप्तिज्ञानमात्रादनुमितिस्तदा अननुगमः। क्वचिद् व्याप्तिज्ञानं कारणं क्वचित् परामर्शः इत्येकमनुमितिकारणं नास्तीति परस्परं व्यभिचार इत्याशङ्कार्थः। **अनुमितीति** मूलम्। अनुमितिमात्रे व्याप्तिज्ञानं साधारणं कारणं वर्तते एव, तथा चाननुगमो नास्तीति भावः। **न चैवमिति**। व्याप्तिज्ञानं चेत् अनुमितिकारणं तदा व्याप्तिज्ञानमात्रादेवानुमितिः स्यात्, परामर्शादेरपेक्षा न स्यात्। न चैवं परामर्शव्यतिरेकेणानुमित्यनुत्पत्तेर्व्याप्तिज्ञानमात्रं तत्र कारणम्। ननु विशेषसामग्रीव्यतिरेकेणापि सामान्यसामग्रीमात्रादेवानुमितिरूपकार्योत्पत्तिरस्तु यथा विशेषचैत्रदण्डव्यतिरेकेणापि दण्डत्वावच्छिन्नाद् दण्डाद् घटोत्पत्तिस्तथा प्रकृतेऽपि व्याप्तिज्ञानमात्रादेव सामान्यसामग्रीतोऽनुमितिः स्यात् इत्यत आह - **विशेषेति**। विशेषसामग्री प्रकृते अन्वयपरामर्शो व्यतिरेकपरामर्शोऽपि स यथा पृथिवी इतरभेदाभावव्याप्यपृथिवीत्वाभाववतीयमिति। [84 A] तथा च यत्र यत्र इतरभेदाभावः

तत्र तत्र पृथिवीत्वाभावो व्यापकः, तदभावः पृथिवीत्वं तद्वतीयमिति व्यतिरेकपरामर्शः, तस्मादपि व्यतिरेकानुमितिर्जायते इति विशेषसामग्री सिद्धा। **अथे**ति टीका। अनुमितिमात्रेऽपि व्याप्तिज्ञानं कारणं न भवतीत्याशङ्कते। **यद्यपी**ति टीका। इतरभेदाभावव्यापकः पृथिवीत्वाभावः। पृथिवीत्ववति(ती) अ(इ)यमिति पक्षधर्मता। तथा च व्यापकताज्ञानादेव व्यतिरेक्यनुमितिर्जायताम् व्याप्तिज्ञानं कारणं न भवतीति सा कथमनुमितिमात्रसामग्रीति शङ्कार्थः। समाधत्ते - **तथापी**ति टीका। **तस्ये**ति टीका। व्यापकताज्ञानस्येत्यर्थः। **व्यतिरेके**ति टीका। यत्र यत्र इतरभेदाभावस्तत्र तत्र पृथिवीत्वाभाव इत्यर्थः। तादृशि(शी) व्यतिरेकव्याप्तिः तद्विषयतया। तथा च यत्रापि व्यापकताज्ञानादप्यनुमितिस्तत्रापि व्याप्तिज्ञानत्वेनैव कारणता। युक्तिमाह - **अन्वये**ति टीका। तथा चान्वयव्याप्तिज्ञानेऽपि व्यापकतायाः प्रविष्टत्वात् तत्रापि व्यापकताज्ञानत्वेनैव कारणत्वमस्तु किमर्थमन्वयव्याप्तिज्ञानस्य कारणत्वम् इति पूर्वपक्षिते तत्रान्वयव्याप्तिज्ञानस्य कारणताया या युक्तिः साऽत्रापि तुल्या। युक्तिस्तु परामर्शग्रन्थे, उक्ता ज्ञेया इत्यर्थः। तथोक्तपर्यन्तं समुदायार्थः। अत्र शङ्कते - **नन्विति**। **अतिप्रसक्तमि**ति टीका। तथा च वह्निसाध्यकधूमहेतुकव्याप्तिज्ञानात् घटानुमितिः स्यात् यथाकथञ्चिद् व्याप्तिज्ञानस्य तत्रापि सत्त्वात् इत्यतिप्रसङ्ग इत्यर्थः। अतिप्रसङ्गनिवारणार्थं व्याप्तिज्ञाने स्व(स्वे)ति विशेषणं देयम्। तथा च वह्निसाध्यकं धूमहेतुकं यद् व्याप्तिज्ञानं तद् न धूमसाध्यकवह्निहेतुकं न वा घटसाध्यकं घटव्याप्यहेतुकमिति परिहारः। नन्वेवमननुगमः, क्वचिद् वह्निसाध्यकधूमहेतुकव्याप्तिज्ञानत्वेन कारणता कुत्रचिद् इतरभेदाभावपृथिवीत्वाभावव्याप्तिज्ञानत्वेनेति चेत्। न। व्यभिचारविरोधित्वेन सर्वव्याप्त्यनुगमः कर्तव्यः। स चानुगमः परामर्शेऽपि कर्तुं शक्यते इत्याशङ्कते - **एवं चे**ति टीका। **परामर्शद्वयस्ये**ति टीका। व्यतिरेक्यन्वयपरामर्शयोः व्यभिचारज्ञानविरोधित्वेनानुग[म] एव। तथा च परामर्शस्यैवानुमितित्वावच्छिन्नं प्रति कारणत्वं पूर्वोक्तेन रूपेणास्तु। तथा च परामर्शस्य तत्तद्विशेषसामग्रीत्वं यत् तदनुपयुक्तमिति भावः। तादृशपरामर्शत्वरूपसामान्यसामग्र्या एव कारणत्वमिति। विरुद्धपर्यन्तं फक्किकार्थः। **समाधत्ते - तथापी**ति टीका। व्यतिरेक्यनुमितौ व्याप्यतावच्छेदकावच्छिन्नाभावविषयत्वं वर्तते। तथा च व्यतिरेक्यनुमित्यन्वयानुमितिरूपफलवैचित्र्यादवश्यं सामग्रीभेदो वाच्यः। ततो व्यतिरेक्यनुमितिरूपफलवैचित्र्यमेतादृशम् - यत्र इतरभेदाभावस्तत्र पृथिवीत्वाभाव इति व्याप्तिज्ञाने इतरभेदाभावो व्याप्यः पृथिवीत्वाभावो व्यापकः तथा च व्याप्यतावच्छेदकम् इतरभेदाभावत्वम् तदवच्छिन्नो य इतरभेदाभावस्तदभावो य इतरभेदस्तद्विषयिणी अनुमितिर्जायते। अन्वयानुमितौ तु अन्वयानुमितिरूपफलवैचित्र्यमेतादृशम् - यत्र पृथिवीत्वं तत्रेतरभेद इति, व्यतिरेक्यनुमित्यनन्तरं साध्यप्रसिद्धौ जा(ज्ञा)तविषयां(या) यत्रानुमितिस्तत्रेतरभेदत्वेन रूपेणेतरभेदा(दो) व्यापकः स एवान्वयानुमितौ विषयो न तु इतरभेदाभावाभावत्वेन। तथा च व्यतिरेक्यनुमितौ इतरभेदाभावाभावत्वेन इतरभेदो विषयः। स एव व्याप्यतावच्छेदकावच्छिन्नाभावविषयत्वमित्यस्य शब्दस्यार्थः। व्यतिरेकव्याप्तौ तु इतरभेदाभावाभावत्वेन इतरभेदो विषय इत्यनुमितेः वैचित्र्यम्। तथा च कार्यवैचित्र्यात् कारण-

वैचित्र्यमवश्यं वाच्यमिति व्यापकतावच्छेदकावच्छिन्नेति इतरभेदत्वमेवान्वयव्याप्तौ व्याकतावच्छेदकम्। ततो व्यतिरेक्यनुमितौ इतरभेदाभावाभाववती इयम् इत्यनुमितिः, अन्वय्यनुमितौ तु इतरभेदवती इयम् इति भावः। एतदेवाह-**फलेति**। व्यतिरेक्यनुमितौ व्याप्यतावच्छेदकावच्छिन्नाभावविषयत्वमित्यत्र संमतिमाह- **अत एवेति** टीका। जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् इत्यत्र यत्र यत्र सात्मकत्वाभावस्तत्र तत्र प्राणादिमत्त्वाभाव इति व्यतिरेकव्याप्तिः, व्यतिरेक्यनुमितिस्तु सात्मकत्वाभावाभाववज्जीवच्छरीरमिति । सात्मकत्वाभाव इत्येतस्य पर्यायो निरात्मकत्वमिति। एतावता सम्मतिव्याजेन व्यतिरेक्यनुमितेर्व्याप्यतावच्छेदकावच्छिन्नाभावविषयत्वं सिद्धमिति तदनुरोधेन विशेषसामग्री व्यतिरेकिपरामर्शरूपाऽवश्यं कल्पनीयेति सिद्धम्। **अतिप्रसङ्ग** इति टीका। **पक्षधर्मतेति** टीका। ह्रदादिपक्षके वह्निनिरूपितधूमहेतुकव्याप्तिज्ञानादप्यनुमितिः स्याद् यत्र धूम(स्तत्र) वह्निरेवं व्याप्तिज्ञानमस्तीत्यर्थः। **अत्रेति** टीका। ह्रदादावित्यर्थः। नन्वन्वय(यि)व्यतिरेकिविशेषद्वयसामग्र्योर्मध्ये यद्येको विशेषो नास्ति एका विशेषसामग्री नास्तीति यावत् तदा अपराऽन्वय(यि)विशेषसामग्री भविष्यतीत्याशङ्क्याह मूले-**अन्वये(यी)**ति। तथा चातिप्रसङ्गस्थलेऽन्वय(यि)विशेषसामग्र्यपि नास्ति व्यतिरेक(कि)विशेषसामग्र्यपि नास्तीत्यर्थः।

**ननु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादिति व्यतिरेकिणि साध्यमप्रसिद्धं तथा च न व्यतिरेकिनिरूपणम्, न वा पक्षत्वम्, न वा लिङ्गजन्यसाध्यविशिष्टतज्ज्ञानं तेषां साध्य-ज्ञानजन्यत्वात्। अथ साध्यं प्रसिद्धं तदा यत्र प्रसिद्धं तत्र हेतोरवगमेऽन्वयित्वम् अनवगमे असाधारण्यम्। किञ्च इतरभेदो न स्वरूपम् अधिकरण-प्रतियोगिनोः पृथिवीजलाद्यो-रनुमानात् प्रागेव सिद्धेः। नापि वैधर्म्यं जलादिनिष्ठात्यन्ताभावप्रतियोगित्वम्, तद्धि पृथिवीत्वादिकं तच्च सिद्धमेव। न च जलादिनिष्ठात्यन्ताभावप्रतियोगित्वेन पृथिवीत्वं न सिद्धमिति वाच्यम्। जलादौ पृथिवीत्वात्यन्ताभावग्रहदशायां पृथिवीत्वेऽपि तत्प्रति-योगित्वग्रहात्। अन्योन्याभावस्तु भेदो यद्यपि साध्यं सम्भवति वैधर्म्यज्ञानसाध्यत्वा-दन्योन्याभावग्रहस्य तथापि जलादिप्रतियोगिकान्योन्याभावस्याप्रसिद्धिः।**

शङ्कते - **नन्विति अप्रसिद्धमिति** मूलम्। सर्वा पृथिवी पक्षीकृता, कुत्रापीतरभेदरूपसाध्यप्रसिद्धिर्नास्तीत्यर्थः। तथा च यदि साध्यमप्रसिद्धं तदा किं दूषणमित्यत आह - **तथा चेति** मूलम्। अभावज्ञाने प्रतियोगिज्ञानस्य कारण-त्वात् ततोऽत्रेतरभेदाप्रसिद्धावितरभेदाभाव इति व्यतिरेकनिरूपणासम्भवात् कथं व्यतिरेकव्याप्तिग्रहः? दूषणान्तर-माह - **न वेति**। व्याचष्टे टीकायां - **सन्देहेति**। यदीतरभेदः प्रसिद्धो नास्ति तदा इतरभेदवतीयं न वेति सन्देहोऽपि

नास्तीति कथं साध्यसन्देहविषयत्वं पक्षत्वमिति पक्षलक्षणम् ? दूषणान्तरमाह - **न वे**ति मूलम्। लिङ्गज्ञानजन्यं यत् साध्यविशिष्टं ज्ञानं तदपि न सम्भवति। कुत इत्याह - **तेषामि**ति मूलम्। साध्यविशिष्टज्ञानानामनुमितिरूपाणां विशेषणरूपं यत् साध्यं तज्ज्ञानजन्यत्वादित्यर्थः । मूले मध्ये शङ्कते - **अथे**ति। **नन्वि**ति आरभ्य पूर्वपक्षिणा साध्याप्रसिद्धौ दूषणान्युक्तानि। अथ पूर्वपक्ष्येव साध्याप्रसिद्धावेव दूषणमाह - **अथे**ति मूलम् । **अनवगमे**ति मूलम् । यत्र साध्यमितरभेदरूपमस्ति तत्र पृथिवीत्वरूपहेतोरनवगमेऽसाधारण्यं यतो निश्चितसाध्यवति यद्धेत्वभावो ज्ञायमानः सोऽसाधारण इति मूलार्थः। अत्राशङ्कते टीका - **नन्वि**ति। वस्तुगत्या सपक्षाद् व्यावृत्तो हेतुरसाधारणो न तु सपक्षेऽज्ञायमानो हेतुरसाधारणः। [85 A] तथा च [स]पक्षाद् व्यावृत्तत्वेन ज्ञायमानो हेतुरसाधारण इत्यर्थः । यदि सपक्षः स्यात् तदा सपक्षाद् व्यावृत्तत्वेन ज्ञानमसाधारण्यं भवति। तच्च नास्तीति कुत्रासाधारण्यमित्यर्थः परा(रि)मा(भा)षार्थः । **इतरभेदे**ति मूलम्। भेदस्त्रिविधः - स्वरूपं १, वैधर्म्यम् २, अन्योन्याभावश्च ३ इति। तन्मध्ये स्वरूपभेदं दूषयति - **अधिकरणे**ति। इतरभेदलक्षणस्वरूपं पृथिवीस्वरूपं जलस्वरूपं च। यथा घटे पटभेदो घटस्वरूपं च। तत्रैकः पटः प्रतियोगी, घटोऽधिकरणम् । तद्वत् प्रकृते भेदलक्षणस्वरूपस्य पृथिवी अधिकरणम्, जलं प्रतियोगि । प्रत्यक्षप्रमाणेन जलपृथिव्योः सिद्धत्वात् सिद्धसाधनं स्यात् । वैधर्म्यरूपं भेदमाशङ्कते - **नापी**ति मूलम्। नन्वेकस्मिन् वैधर्म्यरूपे भेदे उक्ते सति किमर्थं जलादिनिष्ठेत्यादि वैधर्म्यान्तरमुच्यते इत्यत आह - **वैधर्म्ये**ति। तथा चेदं वैधर्म्यमिति अस्यैवेदं विशेषणरूपेण विवरणम् **जलादी**ति। जलादिषु निष्ठो योऽत्यन्ताभावः पृथिवीत्वस्य तस्य प्रतियोगि पृथिवीत्वं तदेव वैधर्म्यं जलादीनां वैधर्म्यरूपो भेद इत्यर्थः। **पृथिवीत्वे**ति टीका। तथा च पृथिवीत्वं हेतुर्जलादीनां वैधर्म्यम्, स तु सिद्ध एवेत्यर्थः। मध्ये शङ्कते - **न चे**ति मूलम्। यथा अन्धस(स्य) स्पर्शनादिनेन्द्रियेण स्वरूपसङ्घट्टग्रहेऽपि शुक्लत्वादिना रूपेण ग्रहणं न भवति तद्वत् शुद्धपृथिवीत्वस्य पृथिव्यां ग्रहेऽपि जलादिनिष्ठात्यन्ताभावप्रतियोगित्वेन ग्रहो नास्ति। अत एव तज्ज्ञानार्थमेव व्यतिरेक्यनुमानमित्याशङ्कार्थः । **जलादावि**ति मूलम्। तथा च यथा घटात्यन्ताभावग्रहे भूतलादौ घटात्यन्ताभावे गृह्यमाणे समानसंवित्संवेद्यतया भासते। यथा चैत्रपुत्रे मैत्र इति ज्ञानं मैत्रे चैत्रपुत्रत्वेन भासमाने चैत्रे पितृत्वमपि समानसंवित्संवेद्यतया भासते। अपरभाननैयत्यमिति समानसंवित्संवेद्यता । तद्वत् प्रकृते जलादौ पृथिवीत्वात्यन्ताभावे भासमाने पृथिवीत्वेऽपि जलादिनिष्ठात्यन्ताभावप्रतियोगित्वं भासत एवेति । तथा च पृथिवीत्वेऽपि जलादिनिष्ठात्यन्ताभावप्रतियोगित्वमपि सिद्धमेवेति किमर्थं व्यतिरेक्यनुमाने तत्साधनमित्यर्थः। **यद्यपी**ति मूलम्। अन्योन्याभावरूपो भेदः साध्यं भवति, तस्यानुमानात् पूर्वमसिद्धत्वात्। तथा च पृथिव्यां जलादिप्रतियोगिकत्रयोदशान्योन्याभावस्यासिद्धत्वात् अनेनानुमानेन साध्य इत्यर्थः। ननु अन्योन्याभावग्रहोऽपि वैधर्म्यग्रहवद् भविष्यतीत्यत आह - **वैधर्म्ये**ति। तथा च वैधर्म्यं पृथिवीत्वम्, तद्ग्रहात् अन्योन्याभावस्याप्यनुमितिर्व्यतिरेकिणा भविष्यतीत्यर्थः। **तथापी**ति मूलम्। जलभेदस्य तेजसि प्रसिद्धत्वात् कथं जलान्योन्या-

भावोऽप्रसिद्ध इत्यत आह टीकायामिति, **तस्येति** टीका। यथाश्रुते जलभेदस्य तेजसि केनापि प्रमाणेन सिद्धत्वात् [अप्रसिद्धिः] असम्भवा स्यात् इत्यत आह - **मिलितेति**। यद्यपि केवलजलस्य भेदः सिद्धो वर्तते तथापि जलादिमिलितत्रयोदशभेदा न सिद्धा इति तदर्थं व्यतिरेकवादो वक्तव्यः। जलादिप्रतियोगिकत्रयोदशान्योन्याभावस्य प्रसिद्धिर्नास्ति। तथा च साध्याप्रसिद्धौ कथं नानुमानमित्यर्थः।

**न च जलादिप्रत्येकान्योन्याभावः साध्यः, असाधारण्यप्रसङ्गात्। अथ पृथिवी तेजोभिन्ना न वेति संशयेन तेजोभिन्नत्वेऽवगते पृथिवी तेजोभिन्ना सती जलादिद्वादशभिन्ना न वेति संशये तेजोभिन्नत्वे सति जलादिद्वादशभिन्नत्वं प्रसिद्धं तदेव साध्यम् एकविशेषणविशिष्टे विशेषणान्तरबुद्धेरेव विशिष्टवैशिष्ट्यज्ञानत्वात्, एवं च संशयप्रसिद्धं साध्यमादाय व्यतिरेकादिनिरूपणम्। यद्वा पृथिवी जलाभिन्ना न वेत्यादि प्रत्येकं त्रयोदशसंशयविषयाणां त्रयोदशान्योन्याभावानां समुदायः[1] पृथिव्यामवगतो व्यतिरेकादिनिरूपकः।**

**न चेति** मूलम्। पृथिवी जलान्योन्याभाववती पृथिवीत्वात् अत्र जलान्योन्याभावस्तु तेजसि प्रसिद्ध इति तदनन्तरं पुनः [85 B] पृथिवी तेजोऽन्योन्याभाववती पृथिवीत्वात् इत्यनेन तेजोऽन्योन्याभावः पृथिव्यां साध्यते इति न साध्याप्रसिद्धिः। न च तत्र तेजसि साध्यप्रसिद्धावन्वयित्वं स्यादिति वाच्यम्। तत्र पृथिवीत्वहेतोरवृत्तित्वात् हेतुसाध्योः सामानाधिकरण्याभावात् नान्वयित्वं तर्हि साध्यवति सपक्षे हेतोर्व्यावृत्तावसाधारण्यमेव स्यात् इत्याह मूले - **असाधारण्येति**। **आचार्येति**। यद्यपीदं **लीलावत्यामस्ति** तथापि कुत्रचिद् **उदयनाचार्योक्त**मपि भविष्यतीति ज्ञेयम्। **अथेति** मूलम्। साध्यप्रसिद्ध्यर्थमाह - अत्र विशिष्टबोधस्य द्वयी गतिः। एका यथा एकविशेषणविशिष्टेऽपरवैशिष्ट्यग्रहः। यथा दण्डी कुण्डली देवदत्तः इत्यत्र कीदृश उल्लेखः?, अयं दण्डी अयं कुण्डली। अत्र दण्डस्य विधेयत्वेऽप्युद्देश्यतावच्छेदकेन देवदत्तेन तु एतत्सम्बन्धवत् प्रतिभाति। द्वितीयस्तु उभयोः समप्राधान्ये ग्रहः यथा देवदत्तो दण्डी कुण्डली। अत्रोभयोर्विशेषणयोर्विधेययोः समप्राधान्येन ग्रहः। अयं द्वितीयो विशिष्टबोधः। प्रकृते अथेति मूले पृथिवी तेजोभिन्ना न वेति संशयेन तेजोभिन्नत्वस्य प्रसिद्धिः। ननु पृथिवी उद्देश्या, तत्र च जलभेदः तेजोभेदः इत्यादयस्त्रयोदशभेदा विशेषणीभूताः, तावद्भेदानां मिलितानां तु प्रसिद्धिर्न जातैवेत्यत आह - **तेजोभिन्नेति**। यद्यपि पूर्वसंशयेन तेजोभिन्ना न वा इत्याकारकेण तेजोभेदमात्रं पृथिव्यां प्रसिद्धं परं त्रयोदशमिलिताः तदा न प्रसिद्धाः तथापि तेजोभिन्ना न वेति संशयोत्तरकाली[ने] तेजोभिन्ना सती जलादिद्वादशभिन्ना न वेति संशये न त्रयोदशानामपि मिलितभेदानामपि प्रसिद्धिरित्यर्थः। **अथेति** टीका। अत्र तेजोभिन्ना सती जला-

---

१. समवायः इति पाठान्तरम्।

दिद्वादशभिन्ना न वेति संशये तेजोभिन्नत्वविशिष्टजलादिद्वादशभिन्नत्वरूपविशेषणस्याज्ञानादिति। तेजोभिन्ना सती जलादिद्वादशभिन्नो न वेति संशयः स्यात्। अयमर्थः। यद्यपि तेजोभेदमात्रज्ञानं वर्तते तच्च विशेषणस्य तेजोभिन्नत्वविशिष्टजलादिद्वादशभेदरूपस्य एकदेशोऽस्ति। तस्य एकदेशस्य ज्ञानमस्ति न तु सम्पूर्णस्य विशेषणविशिष्टस्य ज्ञानमस्ति। तेजोभेदमात्रस्यैव ज्ञानम् न तु जलादिद्वादशभिन्नेति देशस्य। तथा च विशेषणज्ञानाभावात् यः साध्यप्रसिद्ध्यर्थं संशयः आनीयते सोऽप्यनुपपन्न इत्यभिप्रायेण शङ्कते टीकाकारः - **नन्विति**। तेजोभिन्नत्वे सतीत्यादि पृथिव्यादिविशेषणं तत्। उक्तसंशयेन तेजोभिन्ना सती जलादिद्वादशभिन्ना न वेति संशयेनेत्यर्थः। **तत्पूर्वमिति** टीका। तेजोभिन्ना सती जलादिद्वादशभिन्ना न वेति संशयपूर्वकालीन(ने) पृथिवी तेजोभिन्ना न वेति संशये इत्यर्थः। तथा च पृथिवी तेजोभिन्ना न वेति संशये तेजोभेदमात्रमवगतं यद्यपि द्वादशेत्यादिविशेषणांशो न ज्ञातः, ततश्च किमित्यत आह - **तज्जनकेति**। तथा च द्वादशेत्यादिविशेषणज्ञानाभावात् विशिष्टसंशयः कथं स्यादित्यर्थः। **एकेति** मूलम्। अत्र पृथिवीति विशेष्यं भवत्येव परन्तु तेज इत्यारभ्य द्वादशेति पर्यन्तं नैकं विशेषणं किन्तु देवदत्तो दण्डी कुण्डली इति स्थले [86 A] देवदत्तो विशेषणं(ष्यं) दण्डकुण्डले द्वे अपि विशेषणे तद्वत् तेजोभेदो जलभेद इत्यादयस्त्रयोदशभेदा इति त्रयोदशापि पृथिव्या एव विशेषणानि। ननु एकविशेषणवति विशेषणान्तरबुद्धि(द्धे)र्न विशिष्टवैशिष्ट्यबुद्धिः, अन्यथा आच्छादितदण्डवत्यपि पुरुषे दण्डेन्द्रियसन्निकर्षाभावे दण्ड(ण्डा)विषयकं कुण्डलीति जायमानं ज्ञानमपि दण्डविशिष्टवैशिष्ट्यबोधः स्यादित्यत आह - **एकेति** टीका। तथा चाच्छादितदण्डस्थले दण्ड उपस्थितः ज्ञानं नास्ति। एकवैशिष्ट्ये अपरवैशिष्ट्यबोधस्तु एकविशेषणविशिष्टतयोपस्थिते विशेष्ये विशेषणान्तरबुद्धेर्विशिष्टबोधादित्यर्थः। तथा च तेजोरूपमेकं विशेषणं जलादिद्वादशभेदाः अन्यानि विशेषणानि, ततः पृथिवी तेजोभिन्ना न वेति संशयेन तेजोभेदरूपस्य विशेषणस्योपस्थितिः, ततः अनेन संशयेन तेजोभेदविशिष्टतयोपस्थितायां पृथिव्यां जलादिद्वादशभेदरूपाणि यानि विशेषणान्तराणि तेषां वैशिष्ट्यग्रहरूप(पः) तेजोभिन्ना सतीति जलादिद्वादशभिन्ना न वेत्याकारकः संशयो भवत्येवेत्यर्थः। अयं वाक्यार्थः। सर्वे भेदाः पूर्वं तेजोभिन्ना न वेत्याकारकैस्त्रयोदशसंशयैः प्रसिद्धास्ततः त्रयोदशानामपि विशेषणानां ज्ञाने सति एकविशेषणविशिष्टतयोपस्थिते विशेष्ये जलभेदादिरूपविशेषणवैशिष्ट्यग्रह इत्येको विशिष्टबोधः, अथवा पूर्ववत् त्रयोदशसंशयाः त्रयोदशविशेषणानि प्रसिद्धानि तेषां समप्राधान्येन त्रयोदशानामपि वैशिष्ट्यग्रहः। तं द्वितीयं पक्षं यद्वेत्यादिना वदति। **यद्वेति** मूले। पूर्वपक्षे दण्डविशिष्टे कुण्डलविशिष्टान्वयवत् तेजोभेदविशिष्टायां पृथिव्यां जलादित्रयोदशभेदास्तेषां प्रात्यक्षिकरूपेण विशिष्टान्वयबोध इत्युक्तम्। तथा च यद्यपि तेजोभेदो जलादिषु प्रसिद्धो जलभेदस्तेजसि प्रसिद्धः तथापि ऐकाधिकरण्यविशिष्टा न प्रसिद्धाः तथा च एकविशिष्टे अपरवैशिष्ट्यान्वयबोधः। अथवा एकस्मिन् अनेकवैशिष्ट्यान्वयबोधरूपसंशयाभ्यामेकाधिकरणकत्ववद्भेदकूटप्रसिद्धौ सत्यां व्यतिरेकिणा सर्वे भेदाः साध्यन्तेऽतस्ते निश्चिताः न वेति एव मूलम्। **अत्र** (इति टीका)कारः। द्वितीयपक्षे पृथिवीविशेष्यकस्त्रयोदशसंशयः त्रयोदशभेदाः

पृथिव्यां प्रसिद्धाः ते समुदिताः साध्यन्ते । ननु तावद्भेदानां जलादिषु त्रयोदशनिश्चयैर्निश्चयरूपापि त्रयोदशानां भेदानां प्रसिद्धिरस्त्येव किमर्थं मूलकारस्य संशयपर्यन्तधावनमित्यत आह टीका **अत्रे**ति संशयेष्विति शेषः । तदेवाह - **समूहे**ति। प्रात्यक्षिकरूपावच्छिन्नतावद्भेदकोटिकोऽपि एकः संशयोऽपि स्थाणुत्वपुरुषत्वानेककोटिक-संशयवत् यथा स्थाणुर्न वा अयमेकः संशयो द्वितीयस्तु पुरुषो न वेति समूहालम्बनसंशयः अयं स्थाणुपुरुषो न वेत्यादिरूपः तथा प्रकृतेऽपि जलभिन्ना न वेत्यादिकास्त्रयोदशसंशयाः पृथिवी जलेत्यारभ्य समवायान्तपर्यन्तं न वेत्येतादृशः समूहालम्बनरूपः [86 B] संशयो भवत्येव। यदि च त्रयोदशसंशयेष्वेवाग्रहस्तदापि न काऽप्यनुपपत्ति-रित्याह - **यदि चे**ति टीका। पूर्वं जलभेदसंशये च जलभेदवैशिष्ट्यावगतौ जलभिन्नतेजोभिन्ना वायुभिन्ना न वेति संशयेन जलभेदतेजोभेदविशिष्टवायुभेदवैशिष्ट्यमवगम्यते इत्यादि द्वादशसंशयैः पूर्वपूर्वभेदविशिष्टोत्तरोत्तर-विशेषपर्यन्तविशेषभेदवैशिष्ट्यावगतौ समवायभेदसंशयेन त्रयोदशेन एकाधिकरणता तावद्भेदविषयीक्रियते इत्यर्थः। एवं च त्रयोदशेन संशयेन संशयरूपतावद्भेदप्रसिद्धौ सत्यां ततो व्यतिरेक्यादर इत्यर्थः। संशयपर्यन्तानुसरण-प्रयोजनमाह - **ऐकाधिकरण्येने**ति। यद्यपि जलभेदस्तेजसि प्रसिद्धः तेजोभेदो वा जले प्रसिद्धः तथापि एकाधि-करणकास्त्रयोदशभेदाः पृथिवीव्यतिरेकेण न कुत्रापि प्रसिद्धा इत्यर्थः। तथा च पृथिव्यां निश्चयरूपतावद्भेदप्रसिद्धि-र्नास्ति इति कृत्वा संशयरूपतावद्भेदप्रसिद्धौ व्यतिरेक्यादरः तेन च एकाधिकरणताकतावद्भेदनिश्चयः क्रियते इति व्यतिरेकि(की) सार्थकः । पूर्वपूर्वेत्यस्य प्रयोजनमाह - **अन्यथे**ति । यदि जलभेदः पूर्वं प्रसिद्धो नास्ति तदा जलभिन्ना सती तेजोभिन्ना न वेत्युत्तर(रः) जलभेदविशिष्टतेजोभिन्ना न वेति संशयः कथं स्यात् विशेष[ण]ज्ञाना-भावादित्यर्थः । एकाधिकरणेत्यस्य प्रयोजनमाह - **निश्चये**ति । जलादिष्वपि यद्यपि तावद्भेदानां प्रत्येकं प्रसिद्धिरस्ति तथापि एकाधिकरणका जलाद्येकाधिकरणका नास्ति किन्तु नानाधिकरणकेत्यर्थः। एकाधिकरणकापि प्रसिद्धिः किमर्थमित्यत आह - **एकाधिकरणे**ति। तथा च जलादिकं तु प्रत्येकं तावद्भेदवत् भवत्येव, तत्र च पृथिवीत्वं हेतुर्नास्ति इत्यसाधारण्यं भवत्येव। तथाप्येकाधिकरणं तु तावद्भेदवत् न भवति जले जलभेदाभावात् । किन्तु पृथिवी एव जलादिसमुदितभेदवती तत(त्र) तु पृथिवीत्वं वर्तते एवेति नासाधारण्यम् । अथ जलादिषु एकाधिकरणकतावद्भेदरूपं(प)साध्याप्रसिद्धौ अन्यदप्यनुकूलमाह- **जलादि(दी)**ति टीका । जलादि किन्तु तावद्भेदवत् न भवतीति विपक्षो(क्ष)त्वसिद्धौ हेतुव्यावृत्तौ तु तत्र ऐ(ए)काधिकरण्य(ण)कत्रयोदशभेदनिरूपित-व्याप्तिग्रहः सुकरो भवति। यथा यत्र यत्र एकाधिकरणविशिष्टतावद्भेदाभावस्तत्र तत्र पृथिवीत्वाभावः यथा जले । एवं तावद्भेदाभावो जले निश्चितः पृथिवीत्वाभावोऽपि जले निश्चितः, ततः पृथिव्यां त्रयोदशभेदानुमितिर्जायते । जलादेर्विपक्षत्वमुपपादयति - **अन्यथे**ति टीका । यद्यपि तेजसि जलादिभेदो वर्ततेऽतस्तेजसि तेजोभेदाभावे विद्यमानेऽपि जलभेदतेजोभेदप्रतियोगिकसमुदितभेदो नास्ति जलभेदस्य विद्यमानत्वात् । ननु तर्हि जले जलभेदाभावो वर्तते तथा जलस्यापि प्रत्येकभेदसाधने विपक्षत्वं घटत एवेत्यत आह - **प्रत्येके**ति। तथा च यत्र

जलभेदाभावस्तत्र पृथिवीत्वाभावो यथा जले इति व्यतिरेकव्याप्तिग्रहो यद्यपि जले [87 A] भवति तथापि जलभेदस्य तेजसि सपक्षे विद्यमानत्वात् ततः पृथिवीत्वहेत्वो(तो)र्व्यावृत्तौ असाधारण्यं स्यादित्यर्थः। एतदुपसंहरति - **तथा चे**ति टीका। यद्यपि जलतेजोभेदरूपं विशेष्यं वर्तते जलतेजःप्रतियोगिकभेदो वा [विशेष्यं] तिष्ठति तथापि ऐकाधिकरण्यरूपं विशेषणं नास्तीति कृत्वा विशेष(वैशिष्ट्यं) जले नास्ति एकाधिकरणरूपविशेषणाभावात्। देवदत्तवति भूतले दण्डविरहे दण्डविशिष्टाभाववत्। अत्र यद्यपि विशेष्यं जले तेजसि वा तेजोभेदो जलभेदो वा विशेष्यं तिष्ठति तथापि ऐकाधिकरण्यरूपं विशेषणं नास्तीति कृत्वा विशेषणाभावप्रयुक्तो विशिष्टाभाव इत्यर्थः।

**न चैवं पृथिव्यामेव साध्यप्रसिद्धेर्व्यतिरेकिवैयर्थ्यम्, साध्यनिश्चयार्थं व्यतिरेकिप्रवृत्तेः। न चासाधारण्यं, समुदितान्योन्याभावानां साध्यत्वे सपक्षाभावादिति चेत्। न। साध्यनिश्चये हि साध्यव्यतिरेकनिश्चयो भवत्येव साध्यसन्देहे तद्व्यतिरेकसंशयस्य वज्रलेपत्वात् तथा च संशयरूपा साध्यसिद्धिरिति शिष्यबन्धनम्।**

मध्ये शङ्कते - **न चैवमि**ति मूलम्। **साध्ये**ति मूलम्। संशयारूपा तु साध्यप्रसिद्धिः, निश्चयरूपा इतरभेदानुमितिः। व्यतिरेक्यनुमितेः सार्थक्यमित्यर्थः। ननु साध्यवति हेतुव्यावृत्तौ असाधारण्यम्। तथा च साध्यवति सपक्षे हेतुर्वर्तते न वा ? यदि हेतुस्तत्र वर्तते तदा अन्वयित्वम्, यदि न वर्तते तदा असाधारण्यमित्याशङ्कार्थः। उत्तरमाह - **संवलिते**ति मूलम्। न हि साध्यवत्त्वज्ञानमात्रेण सपक्षत्वम्, अपि तु साध्यनिश्चयवत् एव सपक्षत्वम्। पृथिव्यां तु इतरभेदरूपसाध्यनिश्चयो जातो नास्ति। तथा च पृथिव्याः सपक्षत्वाभावादेव न वा अन्वयित्वं न वा असाधारण्यमित्यर्थः। एतावत्पर्यन्तं व्यतिरेकस्थापनम् **आचार्य**मताभिप्रायेणोक्तमाशङ्क्य निराकरोति - **साध्यनिश्चये**ति मूलम्। अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वे सिद्धे अभावनिश्चये प्रतियोगिनिश्चयः कारणम् अभावसन्देहे च प्रतियोगिसन्देहः कारणमित्या[पा]ततः फक्किकार्थः। तथा च यत्रेतरभेदाभावस्तत्र पृथिवीत्वाभाव इत्येतादृशो व्याप्तिनिश्चयो न भवति। कुतः ? इतरभेदाभावनिश्चये इतरभेदनिश्चयस्य कारणत्वात्, स तु जलादौ नास्त्येव जले जलभेदाभावात् पृथिव्यां चेतरभेदस्य सन्दिग्धत्वात्। अतः कुत्रापि साध्यनिश्चयाभावात् साध्यव्यतिरेकनिश्चयो न भवतीत्यर्थः। तथा च सन्देहरूपापि साध्यप्रसिद्धिर्न कुत्रापि उपयुज्यते इत्युक्तं भवतीति। **शिष्यबन्धनं** वञ्चनम्। एतदेव पुनः शिष्यबन्धनमित्याह टीकाकारः - **अत्रे**ति। त्वयोक्तं साध्यसन्देहे विद्यमाने साध्याभावनिश्चयो न जायते इति तदयुक्तम्। तथा न हि यत्र साध्यसन्देहस्तत्रैव साध्याभावनिश्चय इति मयोच्यते किन्तु अधिकरणान्तरे पृथिव्यां साध्यसन्देहेऽपि जलादौ तद्व्यतिरेकनिश्चयो भवत्येव। एतदेवोपपादयति - **एकदेशे**ति। अधिकरणान्तरे साध्यसन्देहोऽधिकरणान्तरे साध्यव्यतिरेकनिश्चयविरोधी न भवत्येव यथा पृथिव्यामितरभेदसन्देहेऽपि जले इतरभेदव्यतिरेकनिश्चयो भवत्येव। जले तु इतर[भेद]सन्देहस्य इतरभेदव्यतिरेक-

निश्चयविरोधित्वं वक्तव्यम्, तच्च नास्ति जले तेजोभेदस्य निश्चितत्वात्। तथा च घटाभावनिश्चयवति भूतले यथा घटपटोभयसन्देहो न भवति एकदेशाभावनिश्चयस्य समुदायसंशयस्य विरोधित्वात्, तद्वत् प्रकृते जले तेजोवाय्वादिभेदस्य निश्चितत्वेन समुदायसंशयस्तु न भवति एकदेशनिश्चयस्य प्रतिबन्धकत्वात्। तथा च पृथिव्यामितरभेदरूपसाध्यसन्देहे विद्यमानेऽपि जले इतरभेदव्यतिरेकनिश्चयो भवत्येवेति व्यतिरेकव्याप्तिग्रहो भविष्यत्येवेत्यर्थः। अथाभावनिश्चयं प्रति प्रतियोगिनिश्चयस्य कारणत्वमित्याशङ्कते - **नन्विति** टीका। [87 B] यदा जले तेजोवाय्वादिभेदनिश्चयो वर्तते तदेत्यर्थः। **तत्रेति** जलादौ इत्यर्थः। तथा चेतरभेदरूपसाध्यनिश्चयः कुत्रापि नास्ति यतो जलादिभेद एव नास्तीति कृत्वा कुत्रापि साध्यनिश्चयो नास्तीति कृत्वा व्याप्तिनिश्चयो न भवतीति भावः। समाधत्ते - **लाघवेनेति**। तथा च प्रतियोगिज्ञानत्वेन च सामान्यतः कार्यकारणभावे सिद्धे तदभावज्ञानत्वेन तत्प्रतियोगिज्ञानत्वेन च विशेषतः कार्यकारणभावे सिद्धे अभावनिश्चयत्वेन प्रतियोगिनिश्चयत्वेन चावान्तरकार्यकारणभावकल्पने प्रमाणाभावात् इत्यर्थः। ननु प्रतियोगिनि प्रतियोगितावच्छेदकसन्देहे प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यभावबुद्धिर्विलक्षणविशिष्टवैशिष्ट्यावगाहिनी नानुभवसिद्धा। यथा दण्डे रक्तिमासन्देहे रक्तो दण्डो नास्ति इत्यभावनिश्चयो नोत्पद्यते इत्यनुभवसिद्धम्। तद्वत् प्रकृते पृथिवीनिष्ठजलादित्रयोदशभेदसन्देहे जलादित्रयोदशभेदाभावनिश्चयोऽपि नानुभवसिद्ध इत्यतोऽनुभवोऽपि तादृशो नास्ति किन्तु जलादित्रयोदशभेदाभावस्यैव निश्चयो जले इत्याह - **पृथिवीति**। तथा च जले जलादिप्रतियोगिकत्रयोदशभेदो नास्ति इति जलनिष्ठजलादित्रयोदशभेदाभावस्यैव जले निश्चयस्तथा च पृथिव्यां जलादित्रयोदशभेदसन्देहे विद्यमानेऽपि त्रयोदशभेदाभावस्य निश्चयोऽनुभवसिद्ध इत्यर्थः। ननु जलादौ जलादिप्रतियोगिकत्रयोदशभेदाभावनिश्चयः प्रत्यक्षेण भवितुं नार्हति। कथम्? भेदांशे त्रयोदशप्रतियोगिकत्वस्य सन्दिग्धत्वात्। तथा च यथा पुरोवर्तिनि स्थाणुत्वसन्देहे विद्यमाने अयं स्थाणुर्गृहे नास्ति इत्यभावप्रत्यक्षानुदयात् प्रमाणान्तरस्यासम्भवात् इत्याशङ्कते - **न चेति मानाभाव** इत्यन्तं शङ्का। तथा पृथिवीनिष्ठभेदे जलादित्रयोदशप्रतियोगित्वसन्देहे विद्यामाने जलं जलादित्रयोदशभेदाभाववत् इति निश्चयो न जायते इति कृत्वा तद्ग्राहकप्रमाणाभाव इति भावः। **समाधत्ते - संशयेति**। जलादौ जलादित्रयोदशभेदाभावनिश्चायकं प्रत्यक्षं मास्तु किन्तु अनुमानमेव भविष्यति, तदनुमानं यथा **जलमिति**। तथा च पृथिव्यां जलादित्रयोदशभेदस्वरूपैव प्रसिद्धिः पूर्वोक्ताचार्यमतनीत्या। तथा च संशयरूपप्रसिद्धौ सत्यां जलं पक्षः, जलादित्रयोदशभेदसमुदायस्याभाववत् इति साध्यम्, हेतुर्यथा तदिति जलादित्रयोदशसमुदायस्य एकदेशो यो जलभेदः तस्यैवाभावात्। यथा घटाभाववति भूतले घटश्चेत् नास्ति तदा घटपटस्तम्भकुम्भादिसमुदायोऽपि नास्ति समुदायाभावस्यापि एकदेशाभावव्यापकत्वात्। तद्वत् प्रकृते जले जलभेदो यदि नास्ति तदा जलभेदतेजोभेदादीनां यः समुदायः सोऽपि नास्तीति। तथा चेयं व्याप्तिः यत् यत् समुदायैकदेशाभाववत् तत् तत् समुदायाभाववत्, यथा घटादिसमुदायैकदेशघटाभाववति घटादिसमुदायाभावः।

अनेन अनुमानेन जलादित्रयोदशभेदाभावो जलादौ अनुमातुं शक्यत इत्यर्थः। तथा च जलादौ जलादित्रयोदशभेदाभावे निश्चिते पृथिवीत्वाभावे च जलादौ निश्चिते व्यतिरेकव्याप्तिग्रहे सति व्यतिरेक्यनुमानं सम्यगेवेति सुष्ठूक्तं सन्देहरूपा साध्यप्रसिद्धिः पृथिव्यामिति प्रघट्टकार्थः। ननु यत्र जलभेदाभावस्तत्र जलादौ त्रयोदशभेदसमुदायाभाव इति विशेषव्याप्तो(प्तौ) दृष्टान्ताभावात्। कथम् ? जलपक्षकानुमानप्रवृत्ति(त्ते)रित्यत आह - **सामान्येति**। [88 A] तथा च यद्यपि विशेषव्याप्तिर्नास्ति तथापि सामान्यव्याप्तिर्यत्तच्छब्दाभ्याम्, दृष्टान्तोऽपि घटादिसमुदायाभाववद्भूतलमिति वर्तत एवेति। ननु सामान्यव्याप्तौ दृष्टान्तान्तरसम्भवेऽपि प्रकृतसाध्यहेत्वोः जलादिभेदसमुदायाभाव-जलभेदाभावायोः दृष्टान्ताभावात् कथमनुमानमित्यत आह - **न हीति अपेक्षेति** पर्यन्तम्। नहीति योजना। यथा चक्षुः पक्षः, रूपवदिति साध्यम्, रूपादिपञ्चसु मध्ये रूपव्यञ्जकेन्द्रियत्वादित्यत्र यत्र यत्र रूपादिपञ्चसु मध्ये रूपव्यञ्जकेन्द्रियत्वं तत्र तत्र रूपवत्त्वमित्यत्र दृष्टान्ताभावः। तथा च सामान्यव्याप्तिरिह यथा रूपादिपञ्चसु मध्ये यदिन्द्रियं यं गुणं गृह्णाति तदिन्द्रियं तद्गुणवत् यथा गन्धग्राहकं गन्धवद् घ्राणमिति। एतदेव दृष्टान्तेन विवृणोति - **यथेति**। यथा तद्गेहं तदा मैत्राभाववत् तदानीं मैत्रवत्तया अनुपलभ्यमानत्वात् अत्र यत् यत् तस्मिन् काले मैत्रवत्तया अनुपलभ्यमानं तत् तत् तदा मैत्राभाववत्। अत्र गतदिवसे सायंकाले मैत्रानुपलब्धिः स्थिता तस्या अनुपलब्धेरहेतोरद्य ग्रहे सति व्याप्तिग्रहो जायते। गतदिवससायंकालस्य मैत्रानुपलम्भस्य चाद्य व्याप्तिग्रहकालेऽभावात् न विशेषव्याप्तौ दृष्टान्तः किन्तु यद्यत्काले यद्वत्तयाऽनुपलभ्यमानं तत्तत्काले तदभाववत्। यथा एतत्काले घटवत्तया अनुपलभ्यमानं भूतलं घटाभाववत् इति सामान्यव्याप्तिः। एवंविधौ पाकानुमानेऽपि द्रष्टव्यम्। यथा इदानीं पाकः चैत्रकृतिसाध्यः इदानीं मत्कृतिं विना असत्त्वे सति मदिष्टसाधनत्वात्। अत्र इदानीं या मत्कृतिस्तस्या अन्यकाले अन्यपुरुषे असम्भवात्। विशेषव्याप्तौ दृष्टान्ताभावात् सामान्यव्याप्तिमूलकमेवानुमानमिति दिक्। यथा दण्डे रक्तत्वसन्देहे रक्तत्वविशिष्टस्य दण्डस्य देवदत्ते वैशिष्ट्याग्रहरूपस्य विशिष्टवैशिष्ट्यबोधस्यासम्भवेऽपि देवदत्ते दण्डो दण्डे रक्तिमा न चेत्येतादृशविशिष्टवैशिष्ट्यबोधे रक्तप्रकारकत्वस्यानुव्यवसायेन विषयीकरणात्। अत्रापि पृथिव्यां त्रयोदशभेदसन्देहे विद्यमानेऽपि त्रयोदशभेदप्रकारकत्रयोदशभेदाभावविशिष्टबोधो विलक्षणो भविष्यतीत्याह - **वस्तुत** इति टीका। प्रत्यक्षमेव तत्र प्रमाणमिति। वस्तुत इत्यारभ्य दुर्लभमित्येत्पर्यन्तं फक्किकार्थः। तथा चेदृशं प्रत्यक्षं जले जलादित्रयोदशभेदसमुदायो नास्तीत्याकारकं प्रत्यक्षमेव। यथा घटसत्त्वे घटप्रत्यक्षं प्रमाणं [तथा] जले जलादित्रयोदशभेदाभावग्राहकं प्रत्यक्षमेव प्रमाणम्। **उक्तसंशयेति**। पृथिवी जलादित्रयोदशभेदवती न वेति संशयानन्तरं त्रयोदशभिन्नत्वं त्रयोदशभिन्नत्वाभावश्चेत्युभयोः प्रतियोगितदभावयोः प्रत्यक्षे रूपनिश्चयविषयत्वमित्यर्थः। ननु घटप्रत्यक्षे घटविषयत्वे घटमहं जानामीत्यनुव्यवसायेन घटप्रकारत्वस्यैव विषयीकरणात् घटप्रत्यक्षे घटो भासताम् प्रकृते तु जले जलादित्रयोदशभेदरूपप्रतियोगिप्रकारकं भेदज्ञानं जायत इत्यत्र प्रमाणं नास्तीत्यत

आह - **तदनुव्यवसायेने**ति । यथा घटप्रत्यक्षानुव्यवसायेन घटप्रकारकत्वस्य विषयीकरणात् यत् घटमहं जानामीत्यनुव्यवसायात् प्राक्कालजायमानं यत् प्रत्यक्षं घटप्रत्यक्षं घटोऽयमित्याकारकमेव सिद्धम् तद्वत् प्रकृते पृथिव्यां जलादित्रयोदशभेदसंशयानन्तरं जले जलप्रत्यक्षानन्तरं च जलादित्रयोदशभेदाभाव[वज्]जलमहं [88 B] जानामीत्यनुव्यवसायेन जलादित्रयोदशभेदप्रतियोगिप्रकारकत्वस्याविषयीकरणात् जलादित्रयोदश-भेदाभाववज्जलमहं जानामीत्यनुव्यवसायप्राक्काले जायमानं यत् प्रत्यक्षं ते(तज्)जलादित्रयोदशभेदप्रतियोगिका-भावविषयकं सिद्धमित्यर्थः । अतोऽयमर्थः सम्पन्नः । त्वयोक्तम् - पृथिव्यां जलादित्रयोदशभेदानां सन्दिग्धत्वात् जलादित्रयोदशभेदरूपप्रतियोगिनिश्चयाभावेऽभावप्रत्यक्षं निश्चयरूपं न सम्भवति प्रतियोगिनिश्चयरूपकारणस्या-भावात् इति **आचार्य**मतोपरि पूर्वपक्षे सति एकं समाधानं यथा प्रतियोगिनिश्चयाभावेऽपि पृथिव्यां सन्देह-रूपप्रतियोगिज्ञाने विद्यमानेऽपि पूर्वोक्तानुमानेन त्रयोदशभेदाभावो निश्चेतुं शक्यते एवेत्येकं समाधानम् । द्वितीयं तु प्रत्यक्षमपि तत्र यथा घटप्रत्यक्षे घटविषयत्वे घटमहं जानामीत्यनुव्यवसायस्तथा जलादित्रयोदशभेदाभाववज्जलं जानामि इत्यनुव्यवसाय एवाभावप्रत्यक्षे जलादित्रयोदशविषयकाभावप्रत्यक्षे जायते, अत्रापि अनुव्यवसाय एव प्रमाणमिति द्वितीयं समाधानम् इति पूर्वोक्तसङ्ग्रहः । एवावत्पर्यन्तं **यज्ञपति उपाध्यायानां** मतम् । **अत्राहुरि**ति **पक्षधरमिश्रा** इति शेषः । पूर्व**माचार्य(र्यैः)** पृथिव्यामितरभेदसाध्यप्रसिद्धिः सन्देहरूपोक्ता । तत्र **चिन्तामणि**कृता सन्देहरूपायां साध्यप्रसिद्धौ सत्यां न जलादौ साध्याभावनिश्चयः यतः साध्याभावनिश्चये साध्यनिश्चयस्य कारणत्वात् इतरभेदसाध्यनिश्चयस्तु पृथिव्यां निश्चितो नास्ति । जलादौ तु इतरत्वमेव न तु इतरभेदः, तथा च साध्यनिश्च-याभावे साध्याभावनिश्चयाभावात् यदि साध्याभावनिश्चयो नास्ति तर्हि [यत्र] साध्याभावस्तत्र हेत्वभाव इति व्याप्तिनिश्चयाभावात्, तथा च व्याप्त्यनिर्णये कथं व्यतिरेक्यवतार इति दूषित**माचार्य**मतम् । तत्र **उपाध्याय-समाधानम्** - यथा सन्देहरूपायां साध्यप्रसिद्धौ सत्यामपि यत्र साध्यसन्देहस्तत्र साध्याभावनिश्चयो मा भवतु संशयस्य प्रतिबन्धकत्वात् । यत्र च जलादौ साध्यसन्देहो नास्ति तत्र पूर्वोक्तानुमानात् जलं जलादीत्यादिरूपादनु[व्यवसायात्] अथवा अनुव्यवसायसाक्षिकप्रत्यक्षप्रमाणात् वा साध्य(ध्या)भावनिश्चयो भविष्यति इति **आचार्य**मतम् **उपाध्यायैः** समर्थितम्, तन्मतं **मिश्रैः** दूष्यते । तथा च **मणिकारो**क्तं दूषणं दृढमित्यर्थः । **यत्तद्भ्यामि**ति टीका । यत् त्वया सामान्यव्याप्तिरुक्ता यथा यत् समुदायैकदेशाभाववत् तत् समुदायाभाववत् यथा समुदायैकदेशघटाभाववति घटपटादिसमुदायाभावः इति तत्र दूषणमाह - यत्तद्घटिता सामान्यव्याप्तिः अनुमानाङ्गं न भवति अनुगतव्याप्यता-वच्छेदकाभावात् । यथा धूमत्वं सर्वेषु धूमेषु अनुगतं जातिरूपं तिष्ठिति य(त)था घटपटादियावद्व्यक्तिषु यत्त्वमेवमनुगतं नास्ति, यत्त्वं नाम तत्तत्स्वरूपं घटत्वपटत्वादिरूपमेव, तथा च घटत्वं पटे नास्ति पटत्वं च घटे नास्तीति कृत्वा यत्त्वं नानुगतम्, तथा च अनुगतव्याप्यतावच्छेदकाभावात् नेयं व्याप्तिः । **उक्तानुमानमि**ति । जलं जलादित्रयोदशभेदसमुदायाभाववत् तदेकदेशाभाववत्त्वात् इति सामान्यव्याप्तिमूलकानुमानं [89 A] न

साध्याभावनिश्चायकम्, यत्त्वस्य अननुगतत्वेन अनुगतव्याप्यतावच्छेदकाभावेन सामान्यव्याप्ति(प्ते)रनुमाना[न]ङ्गत्वात्। ननु तर्हि प्राङ् नास्तितानुमानं न स्यात्। यथा तद्गेहं तदानीं मित्राभाववत् तदानीं तद्वत्तयाऽनुपलभ्यमानत्वात्, यथाऽयं(यथेदं) घटवत्तया अनुपलभ्यमानं गृहम् अद्य घटाभाववत् अत्र घटमैत्रसाधारणगतदिवसकालाद्यतनकाले तत्साधारणं किञ्चिदप्येकमनुगतं यत्त्वं नास्तीति तदपि नान्वय्यनुमानं किन्तु व्यतिरेक्येव तदनुमानम्। कथम्? सामान्यव्याप्तिस्तु अनुमानाङ्गमेव न भवति अनुगतयत्त्वाभावात्। दृष्टान्ताभावेन विशेषान्वयव्याप्तिस्तु न प्रतीयते। इदं गृहं पक्षः गतदिवसीयसायंकालमैत्राभाववत् गतदिवसीयसायंकाले मैत्रवत्तयाऽनुपलभ्यमानत्वात्। यतो गतदिवसीयसायंकाले मैत्रवत्तयाऽनुपलभ्यमानत्वस्य हेतोः पक्षातिरिक्तस्थलेऽन्वयः प्रतीतो नास्ति, तथा चान्वयव्याप्त्यभावे व्यतिरेक्येव यतः सामान्यव्याप्तिरङ्गमेव न भवति यत्त्वस्यानुगतस्याभावात् विशेषव्याप्तौ तु दृष्टान्त एव नास्तीति कृत्वा अन्वयव्याप्त्यप्रतीतौ व्यतिरेक्येव यथा यत्र यत्र मैत्राभावाभावे मैत्रः तत्र मैत्रवत्तया अनुपलभ्यत्वाभावोऽपि यथा मैत्रवत्तयोपलभ्यमानं मैत्रवद्गृहमिति। यदि च विशेषव्याप्तावपि कथञ्चिद् विशेषदृष्टान्तः लब्धः यथा द्वौ मैत्रौ गृहद्वये एककालेऽनुपलब्धौ तत्रापरो दृष्टान्तो भवति तदा विशेषदृष्टान्तस्य लब्धत्वात् अन्वय्येव। तदा सामान्यव्याप्तिर्नास्तीति। ननु विशेषान्वयव्याप्तिरुक्तरूपा न ज्ञाता व्यतिरेकव्याप्तिरपि न ज्ञाता, तदानीं प्राङ् नास्तिताबुद्धिरस्ति, सा तु सामान्यव्याप्तिमूलकैवेत्यत आह - **तदुभयेति**। तथा च यदा विशेषान्वयव्याप्तिर्न ज्ञाता सामान्यव्याप्तिरपि न ज्ञाता तदा प्राङ् नास्तिताबुद्धिरेव नास्त्येवेति एतावतैवोक्तम्। साध्याभावनिश्चयोऽनुमानेन भविष्यतीति **उपाध्यायोक्तं** खण्डितम्। सामान्यव्याप्तिमूलकानुमानाभावात् यदि व्यतिरेकी चेत् तदा पुनस्तत्रापि साध्यसन्देहे साध्याभावानिश्चयात् न व्यतिरेक्यवतारः। अथानुव्यवसायसाक्षिकेण प्रत्यक्षप्रमाणेनैव साध्याभावनिश्चयो भविष्यतीति द्वितीयं कल्पं खण्डयितुमुपन्यस्यति - **यत्त्विति**। **यादृश** इति। यादृशः साध्याभावनिश्चयो व्याप्तिग्राहकः तादृशसाध्याभावांशेऽनुव्यवसायः साक्षी न भवति किन्तु तत्प्रकारकत्वांशे। तथा च जलं तादृशसमुदायाभाववत्तया जानामीत्यनुव्यवसायो यः स साध्याभावांशे निश्चायको नास्ति किन्तु साध्याभावप्रकारकत्वांशे निश्चायकः। ननु जले विशेष्ये साध्याभाववत्त्वांशे यद्यनुव्यवसायो निश्चायको न भवति तर्हि स किमंशे निश्चायक इत्यत आह - **तद्ज्ञानमिति**। तथा च रजतज्ञानवानित्यत्र यथा रजतत्वप्रकारकत्वांशे निश्चायको न तु पुरोवर्तिनि रजतत्वांशे, तथा च पृथिव्यां साध्यसन्देहो विद्यमाने जलेऽपि साध्याभावस्य सन्देहरूपमेव ज्ञानं तथा च सन्देहरूपज्ञानानन्तरं योऽनुव्यवसायः स तत्प्रकारकत्वांशे [89 B] साध्याभावप्रकारकत्वांशे निश्चायको न तु साध्याभावांशे इति कृत्वाऽनुव्यवसायोऽपि न तत्र प्रमाणम्। दूषणान्तरमाह - **वस्तुत** इति। तथा च जलं जलादित्रयोदशभेदसमुदायाभाववत् इत्यनुमाने क्रियमाणे जलादित्रयोदशभेदसमुदायाभावरूपस्य साध्यस्यापि निश्चयरूपा प्रसिद्धिर्नास्ति यतः पृथिव्यां जलादित्रयोदशभेदस्य प्रतियोगिनः सन्दिग्धत्वात् तदभावोऽपि सन्दिग्ध एवेति कृत्वा निश्चयरूपा साध्यप्रसिद्धिरपि नास्ति

इति नोक्तानुमानम् **उपाध्यायकृतम्**। ननु पृथिव्यां भेदभेदाभावस्य संशयरूपप्रसिद्धिर्भविष्यतीत्याशङ्कते - **न चेति**। दूषयति - **भेदेति**। तथा च भेदस्यापि अप्रसिद्धत्वात् [तद]भेदोऽप्यप्रसिद्ध एवेति भेदभेदाभावकोटिकः सन्देहोऽपि पृथिव्यां कथं स्यादित्यर्थः। न च कुत्रचिद् भेदस्य निश्चयो वर्तते। पश्चात् पृथिव्यां सन्देहो भविष्यतीत्यत आह - **प्रसिद्धत्वे वेति**। तथा च यत्रेतरभेदो निश्चितस्तत्रेतरभेदनिश्चयानन्तरं व्यतिरेकव्याप्तिनिश्चयसम्भवे यत्रेतरभेदाभावस्तत्र पृथिवीत्वाभाव इतिरूपे व्यतिरेकव्याप्तिनिश्चयार्थं यज्जलं तद्भेदसमुदायाभाववदित्यनुमानं व्यर्थम्। उपसंहरति - **तस्मादिति**। तथा च संशयस्यैवासम्भवात् संशयरूपा प्रसिद्धिर्न भवतीत्यर्थः। ननु जलभेदस्तेजसि तेजोभेदो जले जलतेजोभेदो वायौ इत्यादि त्रयोदश सुनिश्चिता एव तथा च भेदरूपकोटेरप्रसिद्धिर्नास्ति। न च तर्हि संशयो व्यर्थो भेदस्य निश्चितत्वादि[ति] वाच्यम् ऐकाधिरण्यभेदोपस्थितये संशयानुसरणात् संशयः सार्थक इत्याशङ्कते - **न चेति**। समाधत्ते - **संसर्गेति**। तथा च पृथिव्यां संशये संसर्गमर्यादया ऐकाधिकरण्यभानेऽपि प्रकारत्वेन ऐकाधिकरण्यभानाभावात्। यथा एकत्राधिकरणे त्रयोदशभेदा इति एकाधिकरणप्रकारतया भानं नास्ति। यथा वह्निमानित्यत्र यद्यपि वह्निसंयोगस्य भानं वर्तते तथाप्यत्र व्यापकतावच्छेदकं वह्निसंयोगत्वं तस्य वह्निसंयोगत्वेन रूपेण भानं नास्ति वह्निसंयोगवति तत्रैव तद्भानं तेन रूपेण किन्तु वह्नित्वेन रूपेण वह्नित्वमेव व्यापकतावच्छेदकं तद्वत् प्रकृतेऽपि ऐकाधिकरण्यं यद् व्यापकतावच्छेदकं तेन प्रकारेण तु संशयो नास्तीति संसर्गविधयैव एकाधिकरणत्वं संशये भानमिति समुदायार्थः।

**एतेन पृथिवी जलादिभ्यो भिन्नेति विप्रतिपत्तिरूपवादिवाक्यात् आकाङ्क्षादिमतोऽपूर्वार्थप्रतिपादकात् साध्यप्रसिद्धिरिति परास्तम्। वाक्यादेव पृथिव्यां साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यात्। न च तद्बुद्धौ वादिवाक्यजन्यत्वेनाप्रामाण्यसंशयात् निश्चयेऽपि संशय इति तन्निश्चयार्थं व्यतिरेकीति वाच्यम्। तर्हि संशयप्रसिद्धं साध्यं तस्य च न व्यतिरेकनिश्चायकत्वमित्युक्तत्वात् स्वार्थानुमाने तदभावाच्च। उच्यते घटादावेवेतरसकलभेदस्य प्रत्यक्षतः प्रसिद्धिः घटो न जलादिरिति प्रतीतेः। नन्वयमन्योन्याभावो न प्रत्यक्षः अतीन्द्रियप्रतियोगिकाभावत्वात् परमाणुसंसर्गाभाववत् योग्यानुपलब्धेरभावग्राहकत्वात् नयनोन्मीलनानन्तरं स्तम्भः पिशाचो न भवतीति प्रतीतेर्बाधकबलेन वायुर्वातीतिवत् लिङ्गग्रहोपक्षीणत्वादिति चेत्। न।**

अथ मूलम् **एतेनेति**। पृथिवी जलादिभ्यो भिद्यते इत्येकेन वादिनोक्तम्, अन्येनोक्तं पृथिवी जलादिभ्यो न भिद्यते। इयं विप्रतिपत्तिः। एतस्माद् विप्रतिपत्तिरूपाद् वादिवाक्यात्। ननु वादिवाक्यमात्रात् कथं वाक्यार्थबोधो

मध्यस्थस्येत्यत आह - **आकाङ्क्षादिमत** इति। तथा चाकाङ्क्षायोग्यतासन्निधिसहितात् वाक्यात् अन्वयबोधो भवत्येव। ननु आकाङ्क्षादिमत्त्वमपि वाक्यस्य कुतो भवतीत्यत आह - **अपूर्वे**ति। अपूर्वत्वं तु विधेयान्वयबोधकत्वम्। अत एव गौरश्वः पुरुषो हस्तीत्यादौ क्रियाऽभावात् विधेयार्थबोधकत्वं नास्तीति भावः। तथा चैतस्मादेव वाक्यादेव साध्यप्रसिद्धिर्जाता इतरभेदरूपज्ञानं जातमिति **जीर्णमतम्**। एतद् दूषयति - **अपास्तमि**ति। **वाक्या**दिति मूलम्। तथा च पृथिवी इतरभिन्नेति वाक्यादेव यदि पृथिव्यामितरभेदः सिद्धस्तदा व्यतिरेक्यनुमानं किमर्थम् ?, साध्यप्रसिद्धेर्वाक्यादेव जातत्वात्। शङ्कते - **न चे**ति मूलम्। तथा च पृथिवी इतरभिन्नेति वाक्यात् यद्यपि पृथिव्यामितरभेदो ज्ञातस्तथापि तस्मिन् पृथिवी इतरभिन्नेति अनाप्तो यो वादी तद्वाक्यजन्यत्वेनाप्रामाण्यशङ्काऽस्त्येव यथा इदं मे ज्ञानं जातं प्रमा न वा। तथा च प्रामाण्यसंशयानन्तरं ज्ञाने प्रामाण्यसंशयात् पृथिवी इतरभिन्ना न वेति संशयो जायते, ततो हि संशयरूपसाध्यप्रसिद्धावपि इतरभेदनिश्चयार्थं व्यतिरेक्यनुमानमित्याशङ्कार्थः। **विषय** इति मूलम्। पृथिवी इतरभिन्ना न वेति इतरभेदरूपे विषये सन्देह इत्यर्थः। दूषयति - **न ही**ति। वादिवाक्यात् पृथिवी इतरभिन्नेत्येवेति निश्चयस्तु न तिष्ठत्येव किन्तु संशयः, तथा च संशयरूपा साध्यप्रसिद्धिस्त्वङ्गमेव न भवति यतः साध्यसन्देहे साध्याभावस्यैव सन्देहस्तन्निश्चये निश्चय इति साध्याभावानिश्चये यत्र साध्याभावस्तत्र पृथिवीत्वाभाव इति व्याप्तिनिश्चयो न भवतीति उक्तं पूर्वम्। **तस्ये**ति साध्यसन्देहस्येत्यर्थः। **न व्यतिरेके**ति। साध्याभावनिश्चायकत्वं नास्तीत्यर्थः। ननु यत्र पूर्वं वादिवाक्यात् पृथिवी इतरभिन्ना इति निश्चयो जातः, तदनन्तरं यत्रेतरभेदाभावस्तत्र पृथिवीत्वाभाव इत्युत्कटसामग्री व्याप्तिज्ञानेच्छारूपा, तद्वशात् यत्राप्रामाण्यसंशयोत्तरं विषयसंशयस्तत्र व्यतिरेक्यनुमानं सार्थकमेवेत्यत आह - **स्वार्थमि**ति। यत्र च वादी नास्ति स्वयमेव यदा व्यतिरेक्यनुमानं करोति तत्र तदभावात् वादिवाक्याभावात् इत्यर्थः। तथा च तत्र स्वार्थस्थले वादिवाक्याभावात् साध्यप्रसिद्ध्यभावे व्यतिरेक्यवतारो न स्यादिति भावः। **घटादावि**ति। **आचार्यनी**ता साध्यप्रसिद्धिर्यथा घटादाविति। यथा घटो न जलं न तेज इत्यादिना त्रयोदशप्रतियोगिको भेदः प्रत्यक्षसिद्धः, तत इतरभेदः प्रसिद्धः, ततो घटे इतरभेदप्रसिद्ध्यनन्तरं यत्र यत्र इतरभेदाभावस्तत्र तत्र पृथिवीत्वाभावो यथा जले इति व्यतिरेकी भवत्येव। ननु त्रयोदशसु मध्ये जलं यत् प्रत्यक्षं तस्य भेदोऽपि घटे प्रत्यक्षो भवति, परमतीन्द्रियं यथाऽऽकाशादिकं तद्भेदो घटे कथं प्रत्यक्षः ? कुतोऽतीन्द्रियः ? प्रतियोगिकाभावत्वात्। इत्याशङ्कते - **नन्वि**ति। परमाणुसंसर्गाभावो यथा [न] प्रत्यक्षः। यथा भूतलादौ देशान्तरस्थपरमाणोरत्यन्ताभावः स च न प्रत्यक्षः, तद्वत् घटे आकाशान्योन्याभावोऽपि न प्रत्यक्षः तथा च इतरभेद आकाशभेदो घटेऽप्रत्यक्षः तथा च घटे कथं त्रयोदशभेदः प्रत्यक्षतः प्रसिद्ध इत्युक्तमित्यर्थः। ननु आकाशस्यातीन्द्रियत्वेऽपि योग्यानुपलब्धिसहकारात् भूतलाधिकरणकघटात्यन्ताभावप्रत्यक्षवत् घटाधिकरणकाकाशाद्यन्योन्याभावोऽपि प्रत्यक्षः स्यात् इत्यत [90 B] आह - **योग्ये**ति। तथा च योग्यस्यानुपलब्धिर्योग्यानुपलब्धिः, योग्यत्वं तु स्थलान्तरे प्रत्यक्षत्वम्, तस्य पदार्थस्य याऽनुपलब्धिः तत्सहकारितयेन्द्रियेणाभावो गृह्यते। ननु प्रतियोगिनः अप्रत्यक्षत्वे यदि योग्यानुपलब्धिर्नास्ति तदा स्तम्भः

पिशाचो न भवतीति पिशाचान्योन्याभावोऽपि प्रत्यक्षो न स्यादित्यत आह - **नयनेति**। **बाधकबलेनेति**। योग्यानुपलब्धेरभावग्राहकत्वं घटात्यन्ताभावग्रहे अन्वयव्यतिरेकाभ्यां सिद्धमस्ति। यथा घटः प्रत्यक्षो वर्तते इति कृत्वा तद्ग्राहिकायां सामग्र्यां सत्यामपि घटो यदि नोपलभ्यते तदा घटो नास्तीति प्रतीतिर्भवति। तथा च योग्यानुपलब्धिरेवाभावग्राहिका दृष्टाऽस्ति तथा प्रकृते पिशाचस्यातीन्द्रियत्वेन तत्प्रत्यक्षसामग्री नास्तीति तत्र योग्यानुपलब्धिर्नास्ति। अत्रैवानुकूलं दृष्टान्तमाह - **वायुरिति**। यथा द्रव्यप्रत्यक्षत्वे उद्भूतरूपवत्त्वं प्रयोजकम्, तच्च वायौ नास्ति, अतो वायोः प्रत्यक्षत्वप्रयोजकं नास्ति। अथ वायुर्वाति इति प्रत्यक्षप्रतीतिर्दृश्यते, सा प्रतीतिर्बाधकं यत् प्रत्यक्षत्वप्रयोजकोद्भूतरूपवत्त्वाभावस्तद्बलेनानुमानिक्येव अनुमानरूपो यः स्पर्शस्तद्ग्रहेणो-पक्षीणा वायुत्वानुमापकस्पर्शग्रहविषयिणीत्यर्थः। तथा च स्पर्शः प्रत्यक्षस्तत्र वायोरनुमानम्, तद्वदियमपि प्रतीतिः स्तम्भः पिशाचो न भवतीति प्रतीतिरपि लिङ्गग्रहोपक्षीणा तथा चायं पिशाचाद् भिद्यते चक्रकोटरादिमत्त्वात् अत्र चक्रकोटरत्वेन पिशाचभेदोऽनुमीयते, ततोऽयमन्योन्याभावः प्रत्यक्षो न भवति किन्तु आनुमानिक एवेति। तथा घटे आकाशादीनामतीन्द्रियत्वात् कथमाकाशादिभेदो घटे प्रत्यक्ष इति मूले आशङ्कार्थः। **ऐन्द्रियकस्येति** टीका। प्रत्यक्षस्येत्यर्थः। तथा च कुत्रचित् प्रतियोगिनः प्रत्यक्षस्योपस्थितिर्वक्तव्या सा च नास्तीति कृत्वा योग्यानुप-लब्धिर्नास्तीति टीकार्थः। तेन यथाश्रुते सिद्धान्तेनोक्ता योग्या चासौ अनुपलब्धिश्चेति योग्यानुपलब्धिः सा च वर्तते एवेति कर्मधारयं त्यक्त्वा तत्पुरुषष्टीकाकृता व्याख्यात इति ध्येयम्।

**यो ह्यनुपलम्भोऽधिकरणे प्रतियोगिमत्त्वविरोधी सोऽभावं ग्राहयति न तु योग्या-नुपलब्धिमात्रम् अन्यथा वायौ रूपाभावप्रतीतिवत् जलपरमाणौ पृथिवीत्वाभाव-ग्रहप्रसङ्गात् अधिकरणे प्रतियोगिसत्त्वं च तर्कितं यदि हि स्तम्भः पिशाचः स्यात् स्तम्भवत् उपलभ्येत न पिशाचानुपलम्भः स्यात्।**

**यो हीति** मूलम्। अयमर्थः तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकानुपलब्धिरेतस्यायमर्थः। येन प्रति-योगिसत्त्वेन तर्कितेन प्रतियोग्युपलम्भ आपादयितुं शक्यते तादृशप्रतियोगिनो याऽनुपलब्धिः सा योग्यानुपलब्धिः। यथा चक्षुर्भूतलसंयोगो वर्तते आलोकादिकं च वर्तते *अथ च घटस्मरणमपि विशेषणज्ञानं वर्तते; तत्र भूतले यदि* अत्र घटः स्यात् तदा भूतलवत् उपलभ्येत, नोपलभ्यते, तस्मात् घटो नास्तीति प्रतियोगिसत्त्वं तर्कितम्, तेन तर्कितेन प्रतियोगिसत्त्वेन उपलभ्येत इत्युपा(प)लम्भापादनम्। अत एव तर्कितप्रतियोगिसत्त्वस्य उपलम्भस्य च व्याप्तिः। यथा तत्र तादृशभूतलेन्द्रियसामग्रीसमवधानकाले प्रतियोगिसत्त्वं तत्र उपलम्भो [91 A] भूतलाधिकरणकं घटदर्शनम्। व्यावृत्तिर्यथा प्रतियोगिसत्त्वेनोपलम्भ आपादयितुं न शक्यते। घटाभाववत्यपि भूतले तर्कितेन प्रतियोगिसत्त्वेनोपलम्भ आपादयितुं न शक्यते। कुतः ? अन्धकारे घटाभाववत्यपि भूतले तर्कितेन प्रतियोगि-

सत्त्वेनोपलम्भ आपादयितुं न शक्यते। घटग्राहकालोकरूपसामग्र्यभावात्। अतो यादृशेन तर्कितेन प्रतियोगि-सत्त्वेनोपलम्भ आपादयितुं शक्यते तादृशानुपलब्धिः योग्यानुपलब्धिः, सा च अन्धकारे यादृशमध्ये प्रविष्ट आलोकरूपा सामग्री सा च नास्तीति कृत्वा न तत्र योग्यानुपलब्धिः। अतो यादृशपदं दत्तम्। **य(न) त्विति** मूलम्। न तु योग्यानुपलब्धिमात्रं प्रत्यक्षस्य प्रतियोगिनः अनुपलब्धिमात्रम्। अत्र बाधकमाह - **अन्यथेति**। यदि प्रत्यक्षस्य प्रतियोगिनः अनुपलब्धिमात्रमभावग्राहकं तदा यथा वायौ उद्भूतरूपाभावप्रतीतिर्जायते उद्भूतरूपस्य प्रतियोगिनः स्थलान्तरे प्रत्यक्षत्वात् तद्वत् पृथिवीत्वस्य घटादावपि प्रत्यक्षत्वात् जलपरमाणौ पृथिवीत्व-स्यानुपलब्धिमात्रेण तत्र पृथिवीत्वात्यन्ताभावप्रत्यक्षत्वापत्तिरित्यर्थः। **प्रतियोगीति** टीका। न त्व(नन्व)तीन्द्रियस्य मनःप्रभृतेरन्योन्याभावः प्रत्यक्षो यतो मूलकारोक्तयोग्यानुपलब्धेस्तत्र सत्त्वात्। कथम्? यथा प्रतियोगिनो मनोऽभेदलक्षणस्य सत्त्वेन प्रतियोग्युपलम्भ आपादयितुं शक्यते। कथम्? यदि घटो मनसोऽभिन्नः स्यात् तदा घटत्ववत् मनस्त्ववत्तयाप्युपलभ्येत योग्यव्यक्तिवृत्तिजातेर्योग्यत्वात्। घटव्यक्तियो(र्यो)ग्या सा व्यक्तिर्मनसा सह यदि अभिन्ना तदा मनस्त्वं घटत्ववत् घटवृत्ति एव जातम्, ततो यथा घटत्वं घटे उपलभ्यते तथा मनस्त्वमप्युपलभ्येत इति तर्किताभेदलक्षणप्रतियोगिसत्त्वेनोपलम्भ आपादयितुं शक्यत एवेति यथा मनोऽन्योन्याभावो घटे प्रत्यक्षस्तर्हि मनस्त्वात्यन्ताभावोऽपि घटे प्रत्यक्षः स्यात्। तत्रापि घटे मनस्त्वात्यन्ताभावग्राहिका योग्यानुपलब्धिर्वर्तत एव। कथम्? यदि घटे मनस्त्वजातिः स्यात् तदा घटत्ववदुपलभ्येत योग्यव्यक्तिवृत्तिजातेर्योग्यत्वनियमादित्यत आह - **एवमिति** टीका। तथा मनस्त्वात्यन्ताभावोऽपि घटे प्रत्यक्ष इतीष्टापत्तिरित्यर्थः। यो ह्यनुपलम्भ इत्युक्त्वा योग्या चासौ अनुपलब्धिश्चेति। योग्यत्वं प्रतियोगिनि नान्वेति किन्तु अनुपलम्भ एवेति। तदेव यो ह्यनुपलम्भ इति वदता मूलकृतोक्तम्। एतच्च घटे मनस्त्वात्यन्ताभावग्रहकाले योग्यानुपलब्धिस्वरूपं वर्तते इति कृत्वा सोऽत्यन्ताभावः प्रत्यक्ष एव। तथा च घटादौ अधिकरणे यावन्तोऽतीन्द्रियप्रतियोगिकान्योन्याभावास्ते सर्वेऽपि प्रत्यक्षा एव। तथा च पिशाचान्योन्याभावोऽपि घटे स्तम्भे वा प्रत्यक्ष एव। अतीन्द्रियात्यन्ताभावस्तु घटादौ न प्रत्यक्षः। कथम्? तत्र योग्यानुपलब्धिर्नास्ति। घटे यदि आकाशः परमाणुर्वा स्यात् तदा उपलभ्येत इति वक्तुं न शक्यते आकाशपरमाण्वोरतीन्द्रियत्वात्। न च तयोरन्योन्याभावोऽप्यप्रत्यक्षः स्यात् अतीन्द्रियप्रतियोगिकत्वादिति वाच्यम्। आकाशपरमाण्वादीनामत्यन्ताभावापेक्षया [91 B] अन्योन्याभावग्राहकानुपलब्धेरयमेव विशेषः यथातीन्द्रियात्यन्ताभावे प्रतियोग्युपलम्भापादकसाधकं किमपि नास्ति। कथम्? घटे यदि आकाशः स्यात् तदा उपलभ्येत इति वक्तुं न शक्यते आकाशस्यातीन्द्रियत्वात्। अतीन्द्रियान्योन्याभावस्थले घटो यदि आकाशात्मा स्यात् तदा घटो यथा उद्भूतरूपत्वात् प्रत्यक्षः तद्वत् आकाशोऽपि प्रत्यक्षः स्यात् योग्यव्यक्ति-वृत्तिया(जा)तेयो(र्यो)ग्यत्वात्। कथम्? घटो यदि आकाशात्मा जातः तदा आकाशत्वमपि घटवृत्ति जातम्। तथा च योग्यव्यक्तिवृत्तिजातेर्योग्येवे(ग्यते)ति आकाशत्वमपि घटे प्रत्यक्षमित्याकाशत्वमप्युपलभ्येत घटे इति

कृत्वोपलम्भापादनं कर्तुं शक्यते, अतोऽतीन्द्रियान्योन्याभावः प्रत्यक्षः अतीन्द्रिया[त्यन्ता]भावस्तु न प्रत्यक्षः तत्र बीजमुपा(प)लम्भा[पादना]भावः [उपलम्भापादनं] कर्तुं न शक्यत एवेति । अयमत्र सङ्ग्रहः - जलादित्रयोदशान्योन्याभावा घटे प्रत्यक्षा एवेति सिद्धान्तः । **तद्विषयत्वेने**ति टीका । तर्किते[ना]त्पा(पा)द-[नम]नुपलम्भविषयत्वेनेत्यर्थः । तथा च तादृशानुपलब्धिविषयो योऽभावः स एव योग्य इति भावः । ननु घटे मनोऽन्योन्याभावः प्रत्यक्षो भवतु न तु मनस्त्वात्यन्ताभावः । कथम् ? यदि घटो मनःस्वरूपं स्यात् तदा मनःस्वरूपं प्रतियोगि मनस्त्वं तु जातिः प्रतियोगितावच्छेदकम् । तथा च घटो यदि मनःस्वरूपो जातस्तदा योग्यव्यक्तिवृत्तिर्जातिर्योग्यैवेति कृत्वा मनस्त्ववत्तया मनोऽभिन्नत्वेन घटाभिन्नत्वेन मन उपलभ्येत इति वक्तुं शक्यते । मनस्त्वात्यन्ताभावस्थले योग्यानुपलब्धिर्नास्ति । कुतः ? घटे यदि मनस्त्वं स्यात् तदा मनस्त्वं ता[द्]वत्तया मनस्त्वमुपलभ्येतेति वक्तुं न श[क्य]ते मनस्त्वस्यातीन्द्रियत्वात् नापि योग्यव्यक्तीत्यपि वक्तुं शक्यते अभेदापादनाभावात् इत्यस्वरसात् मनोऽन्योन्याभावो हि भवतु प्रत्यक्षो न तु मनस्त्वात्यन्ताभावः प्रत्यक्ष इत्यत आह - **अन्ये(न्य)त्वे**ति टीका । योग्यानुपलब्धिस्वरूपं विवृणोति । **न हीति** । मूले यो हीति यद् विशेषणं दत्तं वर्तते तस्येदं विवरणम् । **तादृशे**ति टीका । अधिकरणे प्रतियोग्यनुपलम्भमात्रम् अभावग्राहकमिति न हि । कुतः ? बाधकमाह - **प्रतियोगी**ति टीका । यदा घटाभाववति भूतले घटस्मरणं नास्ति तदा घटानुपलम्भे विद्यमानेऽप्यभावग्रहो न जायते इत्यर्थः । तर्हि का दृश्यानुपलब्धिरभावग्राहिका इत्यत आह - **किन्त्वि**ति । अभावग्रहणे यावन्ति कारणानि वर्तन्ते तत्सद्भावे सति योग्यमभावं ग्राहयति सा योग्यानुपलब्धिः । सत्यन्तं तु घटस्मरणं नास्ति तदा घटानुपलम्भे विद्यमानेऽपि घटाभावो न गृह्यते इति सत्यन्तं सार्थकम् । ततः प्रकृतेऽपि मि(इ)त्यत आह - **मनस्त्वे**ति । मनस्त्वात्यन्ताभावस्तु न प्रत्यक्षः, अत्यन्ताभावग्राहिका प्रतियोगियोग्यता तत्र तन्त्रम्, सा च नास्ति मनस अयोग्यत्वात् । एतदेवाह - **योग्ये**ति । स इति मनस्त्वात्यन्ताभाव इत्यर्थः । ननु तर्हि प्रतियोगियोग्यता अन्योन्याभावग्रहेऽपि प्रयोजिकाऽस्तु । तथा च पीतघटाधिकरणे नीलरूपवदन्योन्याभाववत् वायावधिकरणे रूपवदन्योन्याभावस्यापि प्रत्यक्षता स्यात्, प्रतियोगी रूपवान् घटादिः तद(द्)योग्यताया विद्यमानत्वात् इत्यत आह - **रूपवदि**ति । वायावधिकरणे रूपवदन्योन्याभावो न प्रत्यक्षः । कुत इत्यत आह - **अधिकरणे**ति । तथा च अन्योन्याभावग्रहे अधिकरणयोग्यताया एव तन्त्रत्वम् । यत्रान्योन्याभावः [92 A] प्रत्यक्षस्तस्याधिकरणस्यापि योग्यता तन्त्रम् । **अत एवे**ति टीका । अधिकरणे संसर्गाभावग्रहे प्रतियोगियोग्यता अधिकरणयोग्यता तन्त्रम् । तथा च वायो रूपवदन्योन्याभावो न प्रत्यक्ष इति सिद्धम् । नन्वत्र किं विनिगमकमित्यत आह - **अन्तयोश्चे**ति टीका । मनस्त्वात्यन्ताभावः प्रत्यक्षोऽप्रत्यक्षो वा इत्यत्रानुभव एव विनिगमक इत्यर्थः । **न त्वि**ति टीका । **ऐन्द्रियकस्ये**ति टीका । प्रत्यक्षस्यानुपलब्धिस्तन्त्रं न भवति । अन्यथा जलपरमाणौ पृथिवीत्वाभावः प्रत्यक्षः स्यादित्यर्थः । ततो हि प्रत्यक्षानुपलब्धिमात्रं न तन्त्रम् । **नन्वि**ति टीका । तथा च यत्राधिकरणेऽभावोऽत्यन्ताभावोऽन्योन्याभावो

[वा] तिष्ठति तत्र प्रतियोगिसत्त्वमप्रसिद्धं तथा चाभावाधिकरणे प्रतियोगिसत्त्वविरोधिनी या उपलब्धिस्तन्निर्वचनं कथं स्यादित्यर्थः । **अधिकरणेति** मूलम् । तथा च वह्निधूमोभयवति यथा वह्न्यभावे धूमो न स्यादिति यथा तर्करूपमापादनं तद्वत् प्रतियोग्यभाववति प्रतियोगिसत्त्वमापादनरूपं भवत्येवेत्यर्थः । ननु यदीति मूलमसङ्गतम् । स्तम्भो यदि पिशाचः स्यात् तदा स्तम्भवत् उपलभ्येत इत्यत्र तर्के पिशाचस्यातीन्द्रियत्वात् नोपलब्धिः स्तम्भस्य तु प्रत्यक्षत्वात् उपलब्धिः इति स्तम्भवत् इति दृष्टान्तो न सङ्गच्छते इत्यन्यथा व्याचष्टे - **स्तम्भो यदीति** । पिशाचात्मतया पिशाचत्ववत्तया उपलभ्येत । एतदर्थे व्याप्तिमाह - **यो यदात्मतयेति** । यो यदात्मा यत्स्वरूपः स तदात्मतया प्रमाविषयः यथा घटो घटात्मा घटात्मतया प्रमाविषयः न तु स्तम्भः पिशाचात्मा पिशाचात्मतया प्रमाविषयः इत्यत्र दृष्टान्ताभावः तथा च कथं व्याप्तिस्तत्रेत्यत आह - **विशिष्येति** । विशेषाकारेण या व्याप्तिर्यथा यत्र यत्र पिशाचात्मत्वं तत्र तत्र पिशाचात्मतया प्रमाविषयत्वं यथा पिशाचे । यद्यपि पिशाचस्य प्रत्यक्षं नास्ति तथाप्यानुमानिकी प्रमा भवत्येव तत्रेति भावः । अत्रान्योक्तं दूषणं निराचष्टे - **एतेनेति** । ततः पिशाचवत् उपलभ्येत इत्यत्र उपलम्भपरम्, यदि प्रत्यक्षपरं तदा व्याप्त्यसिद्धिः । कथम् ? यत्र यत्र पिशाचात्मत्वं तत्र तत्र पिशाचात्मतया प्रत्यक्षत्वमप्रसिद्धम्, तथा च पिशाचस्यातीन्द्रियत्वात् पिशाचात्मतया प्रत्यक्षत्वं नास्त्येव, अतो व्याप्तिरसिद्धा । यदि उपलम्भपदं ज्ञानमात्रपरं तदा तर्के इष्टापादनम्, स्तम्भस्यापि पिशाचात्मतया ज्ञानं भ्रमरूपं भवत्येवेति । तथा चोपलम्भस्य विद्यमानत्वात् उपलम्भापादनं कर्तुं न युज्यते इति दूषणं केनापि दत्तं तत् परास्तम् । यतो मया प्रत्यक्षोपलम्भपदं परित्यज्य प्रमापदं दत्तम् । **स्तम्भ** इति टीका । यदि स्तम्भे पिशाचतादात्म्यं स्यात् स्तम्भ-तादात्म्यमिवोपलभ्येत यतः स्तम्भे यत्तादात्म्यं तदुपलभ्यते एव यथा स्तम्भे रूपवत्तादात्म्यम् । एतावता स्तम्भे यदि पिशाचतादात्म्यं स्यात् तदा स्तम्भतादात्म्यवत् उपलभ्येत । स्तम्भतादात्म्यं रूपवत्तादात्म्ये प्रसिद्धमस्ति इति कृत्वा तदापादनं कर्तुं शक्यते । अतः पिशाचान्योन्याभावः स्तम्भे प्रत्यक्ष एवेत्याहुः । तथा चैतावता प्रबन्धेनातीन्द्रियान्योन्याभावो(वे) [92 B] योग्यानुपलब्धिरस्ति, अतीन्द्रियात्यन्ताभावस्थले नास्तीत्युक्तं भवति । अत्राशङ्कते - **नन्विति** । त्वयोक्तं यदि घटे मनस्तादात्म्यं स्यात् तदा मनस्त्ववत्तयोपलभ्येत इत्युपलम्भा-पादनं कर्तुं शक्यते इति कृत्वा मनोऽन्योन्याभावग्रहे योग्यानुपलब्धिरस्ति । अतो मनोऽन्योन्याभावो घटे भवतु प्रत्यक्षः परं घटे आकाशान्योन्याभावस्तु कथं प्रत्यक्षः कुतः ? घटे यदि आकाशतादात्म्यं स्यात् तदा आकाशत्व-वत्तयोपलभ्येत इति वक्तुं न शक्यते, आकाशत्वस्य जातित्वाभावेनेष्टापादनासम्भवात् । तथा च योग्यव्यक्ति-वृत्तिजातेर्योग्यत्वमे(मि)ति वक्तुं न शक्यते आकाशत्वस्य जातित्वाभावात् । आकाशतादात्म्यमाकाशत्वं शब्दाश्रयत्वमुपाधिरेव । तथा च घटे यदि आकाशतादात्म्यं स्यात् तदा घटत्ववत् उपलभ्येत इति वक्तुं न शक्यते शब्दाश्रयत्वस्य जातित्वाभावात् तदुपलम्भ आपादयितुं न शक्यते । योग्यव्यक्तीत्यनेनेति घटे कथमा-काशान्योन्याभावः प्रत्यक्षः ?, मनोऽन्योन्याभावस्तु प्रत्यक्षः सङ्गच्छते घटे मनस्त्वस्य जातिमत्त्वादित्याशङ्कार्थः ।

समाधत्ते - **आकाशेति**। तथा च घटो यदि आकाशात्मा स्यात् तदा आकाशवत् उपलभ्येत इदमापादनं कर्तुं शक्यते एव। कुतः ? आकाशघटयोरभेदे घटत्वं यथा नित्यं सदनेकसमवेतं सत् जातिस्तद्वत् आकाशत्वमपि नित्यमनेकसमवेतं सज्जातिर्भवत्येवेत्यागतम्। तथा च घटो यदि आकाशात्मा स्यात् तदा आकाशघटयोरभेदे सति यथा घटत्वं जातिः तद्वत् आकाशत्वमपि नित्यं सदनेकसमवेतं जातिः स्यादिति आकाशत्वस्य जातित्वापादनम्, ततो जातित्वापादने कृते या योग्यव्यक्तिर्जातिः सा योग्यैवेति कृत्वा आकाशत्वस्य घटे उपलम्भापादनं कर्तुं शक्यते एवेति। आकाशान्योन्याभावोऽपि घटे प्रत्यक्ष इति। नन्वाकाशत्वस्य कथं जातित्वापादनम् ? आकाशत्वं हि शब्दाश्रयत्वम्, तच्च सखण्डम्, तत्कथं जातिरूपं सम्भवतीति ? अतः आह - **न हीति**। तथा आकाशत्वस्याखण्डरूपजातित्वे एकव्यक्तिसमवेतत्वमेव बाधकम्। आकाशत्वस्य घटवृत्तित्वे एकव्यक्तिकत्वं यद् बाधकं तद्गतमेव। तथा चैकव्यक्तिकत्वरूपबाधकाभावे कथमाकाशत्वस्य शब्दाश्रयत्वरूपं सखण्डोपाधित्वं किन्तु अखण्डं जातिरेवेत्यर्थः। तथा च यदि आकाशघटयोरभेदस्तथा यथा घटत्वं जातिस्तथा आकाशत्वमपि जातिः, ततस्तदपि घटत्वतुल्या जातिरित्यर्थः। शङ्कते - **यद्यपीति** टीका। घटे आकाशतादात्म्यं स्यात् तदा आकाशत्वमपि जातिः स्यात्, एकव्यक्तिकत्वरूपं यद् बाधकं तद् घटवृत्तित्वेनैव गतं तथाऽत्र सामान्यादिकं नास्ति। कथम् ? घटो यदि सामान्यं विशेषः समवायो वा स्यात् तदा सामान्यवत्तयोपलभ्येत इति वक्तुं न शक्यते सामान्यत्वस्य समवेतत्वाभावात् जातौ जातेरनङ्गीकारात्। नापि विशेषत्वं तस्यापि समवेतत्वाभावात् समवायत्वस्यापि। तथा च सामान्यत्वादेर्जातित्वाभावात् कथं तदुपलम्भापादनं योग्यव्यक्तीत्याद्यभावात्। तथा च सामान्यविशेषसमवायान्योन्याभावः [93 A] कथं प्रत्यक्ष इत्याशङ्कार्थः। समाधत्ते - **तथापीति**। तथा च घटो यदि सामान्यः स्यात् तदा यदेव घटतादात्म्यं तदेव सामान्यतादात्म्यम्, ततो घटव्यक्तिवृत्तित्वेनैव तदुपलम्भः स्यात्, तथा च सामान्ये घटादिव्यक्तिवृत्तित्वं सामान्यतादात्म्यमुपलभ्येत इत्यापादनं कर्तुं शक्यते एवेति। तथा च सामान्यविशेषसमवायतादात्म्येषु घटादिव्यक्तिवृत्तित्वेनैव घटतादात्म्यत्व(त्वात्) तदुपलम्भापादनं कर्तुं शक्यत एवेत्यर्थः। ततः सामान्याद्यन्योन्याभावः प्रत्यक्षसिद्ध इति सिद्धम्।

**न च पृथिवी जलाद् भिद्यते जलावृत्तिधर्मवत्त्वात् तेजोवत् एवमन्येभ्योऽपि भेदसिद्धौ द्वादशभिन्नेति विशेषणं दत्त्वा समवायभेदसाधनादन्वयिन एव पृथिव्यां त्रयोदशभेदसिद्धिरिति किं व्यतिरेकिणेति वाच्यम्। जलादिभिन्ना सती समवायभिन्नेति बुद्धवपि त्रयोदशभिन्नेति बुद्धेर्व्यतिरेकिसाध्यत्वात्। न च घटस्यापि पक्षत्वादंशतः सिद्धसाधनम्, सर्वा पृथिवी इतरभिन्ना इत्युद्देश्यप्रतीतेरभावात्, पक्षतावच्छेदकनानात्वे हि तत्, अत एवानित्ये वाङ्मनसे इत्यत्रानित्या वागिति बुद्धेरुद्देश्यायाः सिद्धत्वादंशतः सिद्धसाधनम्,**

**अन्यथा अनुमानमात्रोच्छेदात् पक्षस्य सिद्धस्यैव साध्यत्वात्।**

अथ मूलव्याख्या। **न चेति**। पृथिवी जलाद् भिद्यते, जलावृत्तिधर्मत्वात्, यत्र यत्र जलावृत्तिधर्मत्वं तत्र तत्र जलाद् भेदः यथा तेजसि जलावृत्तिधर्म उष्णस्पर्शः। तद्वत् तेजसि जलभेदोऽपि वर्तते। तथा च पृथिवी जलादिद्वादशभिन्ना सती प्रान्ते समवायाद् भिद्यते जलाद्यवृत्तिधर्मवत्त्वात् तेजोवत् इति अन्वयव्याप्त्यैव पृथिव्यामितरभेदसिद्धौ किमर्थं व्यतिरेकीति मूलाशङ्कार्थः। समाधत्ते - **जलादीति**। यद्यपि जलादिभिन्ना सती समवायभिन्नेत्येतादृश्यनुमितिरन्वयिनापि संभवति। तथा युगपज्जलादित्रयोदशभिन्नेति बुद्धिर्व्यतिरेकिसाध्या। युगपदित्यस्य व्याख्या समप्राधान्येन समुदितजलादिभेदनिश्चय इत्यर्थः। पुनर्घटे दृष्टान्ते साध्यप्रसिद्धौ पूर्वकृतायामाशङ्कते - **न चेति**। सम्पूर्णपृथिव्याः पक्षत्वे तदन्तःपातित्वात् घटोऽपि पक्ष एवेति सिद्धसाधनम्। समाधत्ते - न पक्षे साध्यसिद्धिमात्रं प्रतिबन्धकम्। कुतः ? द्रव्यत्वेन रूपेण पर्वतीयवह्निसिद्धौ पर्वते वह्न्यनुमानमपि न स्यात्। अत उद्देशीया साध्यसिद्धिः, तदेव सिद्धसाधनं प्रतिबन्धकम्। तथा च सर्वपृथिवीत्वेन पक्षे साध्यसिद्धेरुद्देश्यत्वेन घटे साध्यसिद्धिः, तदेव सिद्धसाधनं प्रतिबन्धकम्। तथा च सर्वपृथिवीत्वेन पक्षे साध्यसिद्धेरुद्देश्यत्वेन घटे साध्यसिद्धावपि आपरमाणु-आभूगोलपर्यन्तं साध्यसिद्धेरभावात् न सिद्धसाधनम्। न हि घटमात्रे साध्यसिद्धिरुद्देश्या। यथेतरभेदो विधेयः, स तु सर्वपृथिव्यामुद्देश्यायां साध्यते। तथा च सर्वपृथिवीरूपोद्देश्ये साध्यसिद्धेरभावेन प्रकृते न सिद्धसाधनं दूषणमिति भावः। तर्हि अंशतः सिद्धसाधनं कुत्र दूषणमित्यत आह - **पक्षेति**। तत् अंशतः सिद्धसाधनं पक्षतावच्छेदकनानात्वे एव भवति। अत्रोदाहरणमाह - **अनित्येति**। अचतुरविचतुरेत्यादिना वाङ्मनसे इति निपात्यते। अनित्ये वाङ्मनसे शरीरसम्बन्धित्वात् प्राणवत् इत्यत्र वाक्त्वावच्छेदेन मनस्त्वावच्छेदेन वाऽनित्यत्वबुद्धेरुद्देश्यतया वाक्त्वावच्छेदेन वाऽनित्यबुद्धेः सिद्धत्वात् मनस्त्वावच्छेदेनानित्यत्वबुद्धेरसिद्धत्वात् एकस्य सिद्धत्वमन्यस्यासिद्धत्वमिति कृत्वा पक्षतावच्छेदकयोर्वाक्त्वमनस्त्वयोर्भिन्नत्वादनित्ये वाङ्मनसे इति अंशतः सिद्धसाधनोदाहरणं स्फुटमेव। प्रकृते तु पृथिवीत्वं घटपरमाणुसाधारणमेकमेव पक्षतावच्छेदकम्, अतो नांशतः सिद्धसाधनम्। **अन्यथेति**। यदि अनुमितिविषयेषु पक्षसाध्यपक्षतावच्छेदकसाध्यतावच्छेदकेषु मध्ये एकस्य विषयस्य सिद्ध्या [93 B] सिद्धसाधनं दोषः स्यात् तदा अनुमानमात्रोच्छेदः स्यात् पर्वतो वह्निमान् इत्यत्रापि पर्वतस्य सिद्धसाधनत्वात्। साध्यतावच्छेदकवह्नित्वस्यापि सिद्धत्वादनुमानमात्रोच्छेदप्रसङ्गः। **साध्यत्वादिति** अनुमितिविषयत्वादित्यर्थः। यथाश्रुते पर्वतस्य साध्यत्वाभावादसम्भव इत्यन्यथा व्याख्यातम्।

इतिपर्यन्तं टीकात्यक्तं मूलं व्यख्यातम्। मूलकारेणोक्तम् - पक्षतावच्छेदकनानात्व एव सिद्धसाधनं दोष इति। तत्र **उपाध्यायेन** दूषणं दीयते - **पक्षतावच्छेदकेति** टीका। पक्षतावच्छेदकैक्यं नानात्वं वा अंशतः सिद्धसाधनेऽप्रयोजकं किन्तूद्देश्यसिद्ध्यसिद्धिभ्यामेव सिद्धसाधनतदभावौ भवतः। तथा च प्रकृते पृथिवी

इतरेभ्यो भिद्यते इत्यत्र सर्वपक्षव्यक्तिषु साध्यसिद्धिरुद्देश्या किं वा क्वचित् पक्षे साध्यसिद्धिरुद्देश्या ? यदि आद्यस्तत्राह - **सर्वपक्षे**ति टीका। समूहालम्बनरूपा सर्वेषु पक्षेषु या साध्यसिद्धिः सैवोद्देश्या। परं क्वचित् पक्षे या साध्यसिद्धिः सा तूद्देश्यैव। [पक्षतावच्छेदकैक्ये] पक्षतावच्छेदकनानात्वे वा नांशतः सिद्धसाधनमित्यत्रापीति पूरणीयं जातायामपीत्यर्थः। तथा च यद्यपि पक्षे क्वचित् साध्यसिद्धिर्जाता तथापि न सिद्धसाधनमित्यर्थः। कुत इत्याह - **तदंशेऽपी**ति टीका। सर्वपक्षांशे उद्देश्यरूपायाः समूहालम्बनसाध्यसिद्धेरजातत्वात् न सिद्धसाधनम्। यदि च क्वचित् पक्षे साध्यसिद्धिरुद्देश्या इति द्वितीयं कल्पमधिकृत्याह - **यदे**ति टीका। **समूहे**ति टीका। कोऽर्थः ? न समूहालम्बनरूपा सर्वपक्षव्यक्तिषु एका साध्यसिद्धिः किन्तु क्वचित्पक्षे यत्रकुत्रचित्पक्षे साध्यसिद्धिरुद्देश्या तदा पक्षतावच्छेदकैक्यं वा भवतु नानात्वं वा भवतु। तथा च क्वचित्पक्षे घटादौ साध्यसिद्धेर्जातत्वेन नांशतः सिद्ध-साधनं किन्तु सम्पूर्णमेव सिद्धसाधनम् एतदेवाह - **यदा समूहे**ति। उपसंहरति - **तथा सती**ति टीका। साध्यसिद्धौ समूहालम्बनरूपायाम् अथवा क्वचित्पक्षे साध्यसिद्धौ इत्युभयत्र इत्यर्थः। **तदि**ति। पूर्णं सिद्धसाधनम् अवर्जनीय-मेव। अथवा पक्षतावच्छेदकैक्ये नानात्वे वोद्देश्यसाध्यसिद्धौ तदिति सम्पूर्णमेव सिद्धसाधनमवर्जनीयमेवे-त्यर्थः। एतदेवोपपादयति - **पक्षतावच्छेदकैक्ये**ति। तथा च पक्षतावच्छेदकैक्येऽपि क्वचित्पक्षे साध्यसिद्धेरुद्देश्याया जातत्वेन पक्षतावच्छेदकैक्येऽपि सम्पूर्णं सद्धसाधनम्। अयमत्र निष्कर्षः - पृथिवी इतरभिन्ना इत्यत्र सर्वा पृथिवी इतरभिन्ना इत्युद्देश्यं किं वा काचित् पृथिवी इतरभिन्ना इत्युद्देश्यम् ? यदि सर्वा पृथिवी इतरभिन्ना इत्युद्देश्यं तदा अंशतो वा सम्पूर्णस्य वा सिद्धसाधनस्य प्रसङ्ग एव नास्ति। सर्वा पृथिवी इतरभिन्ना इत्युद्देश्यसिद्धेरजातत्वात् पक्षतावच्छेदकनानात्वग्रहणं व्यर्थमेव। यदि क्वचित्पक्षे साध्यसिद्धिरुद्देश्या तदा क्वचित्पक्षे घटे साध्यसिद्धेर्जातत्वेन सम्पूर्णमेव सिद्धसाधनमिति किमर्थं पक्षतावच्छेदकनानात्वग्रहणम् इत्युभयथापि ग्रहणमिति **उपाध्यायाः** चिन्त्यं वदन्ति। **उपाध्यायमतं** दूषयति - **अत्र ब्रूम** इति। यत् त्वयोक्तं क्वचित्पक्षे [94 A] साध्यसिद्धेर्जातत्वेन सम्पूर्णं सिद्धसाधनं पक्षतावच्छेदकनानात्वाभावेऽपि जातम्। तथा च कथं व्यतिरेक्यनुमानमिति यदुक्तं तदुक्तं सर्वत्रा(त्र) पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरनुमानं(न)फलं यथा पर्वतत्वसामानाधिकरण्येन। **तदि**ति टीका। तथा च प्रकृते पृथिवीत्वसामानाधिकरण्येनानुमानफलं यथा पर्वतत्वसामानाधिकरण्येन वह्निसिद्धि-रनुमानस्य फलम्। तथा प्रकृतेऽपि पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिश्चेत् स्यात् तदा सम्पूर्णं सिद्धसाधनमेवोक्तव्यतिरेक्यनुमाने जातं नांशतः सिद्धसाधनमिति त्वदुक्तं दूषणं स्यात् परं तदेव नास्तीत्याह - **पक्षते**ति टीका। **तादृशे**ति। पक्षधर्मतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरित्यर्थः। **तदि**ति टीका। तथा च प्रकृते पृथिवी इतरभिन्ना इत्यत्र पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरजातत्वेन व्यतिरेक्यनुमाने सिद्ध-साधनमेव नास्तीत्यर्थः। न तु पक्षतावच्छेदकसामानाधिरण्येन साध्यसिद्धौ सिद्धसाधनम्, किन्तु पक्षे साध्यसिद्धि-मात्रेण सिद्धसाधनम्, तत्तु वर्तत एव घटस्यापि पक्षत्वादित्यत आह - **न ही**ति। **तदि**ति सिद्धसाधनमित्यर्थः।

बाधकमाह - **धूमवत्त्वेनेति**। तथा च यावद्वस्तु धूमवत् तावद्वस्तु वह्निमत् इत्यत्र यद्यपि पर्वतत्वेन रूपेण पर्वते वह्निनिश्चयो नास्ति तथापि यावद्धूमवत् तावद्वह्निमत् इति निश्चये धूमवत्त्वेन प्रकारेण पर्वते वह्निनिश्चयसत्त्वात् किं बहुना वह्निमत्त्वसामान्यलक्षणया प्रत्यासत्त्या वह्निमत्त्वेन रूपेण पर्वतेऽपि वह्निनिश्चयात् पर्वतो वह्निमान् इत्यनुमितिर्न स्यात्। तथा च पक्षे सिद्धसाधनमात्रं दूषणं किन्तु पक्षतावच्छेदकसामानाधिकरण्येन [न] साध्यप्रसिद्धिर्दूषणम्, ततः प्रकृते किमागतमित्यत आह - **तस्मादिति**। तथा च प्रकृते पृथिवी इतरभिन्ना इत्यत्र पक्षतावच्छेदकसामानाधिकरण्येन तदसिद्धेरितरभेदासिद्धेर्नोक्तदोषो न सिद्धसाधनमित्यर्थः। अत्राशङ्कते - **नन्विति**। तथा च पृथिवी इतरभिन्ना इत्यत्र पक्षतावच्छेदकं तदपि घटे वर्तते। इतरभेदोऽपि घटे प्रसिद्धः प्रत्यक्षेण यथा घटो न जलादिकम्। ततो घटे पृथिवीरूपपक्षतावच्छेदकसामानाधिकरण्येनेतरभेदस्य साध्यस्य सिद्धेः सिद्धसाधनं भवत्येवेत्याशङ्कार्थः। समाधत्ते - **सर्वेति**। तथा च पृथिवीत्वमात्रं न पक्षतावच्छेदकं किन्तु सर्वपृथिवीत्वं विशिष्टमेव। घटे साध्यस्य सिद्धावपि सर्वपृथिवीत्वरूपपक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेर्घटादावपि अधिकरणेऽजातत्वेन सिद्धसाधनप्रसङ्गो नेत्यर्थः। न पृथिवीत्वमात्रं पक्षतावच्छेदकं किन्तु सर्वपृथिवीत्वमित्यत्र मूलकारसङ्गतिमाह - **तदिदमिति** टीका। घटादाविति शेषः। **उपाध्यायो**क्ते प्रथमपक्षे यत्र समूहालम्बनरूपा साध्यसिद्धिरुद्देश्या तत्र पक्षतावच्छेदकनानात्वेऽपि क्वचित्पक्षे साध्यसिद्ध्या नांशतः सिद्धसाधनं न वा सम्पूर्णं सिद्धसाधनम् उद्देश्यसिद्धेः घटादावेवाजातत्वात् इत्यत्रेष्टापत्तिरेवेत्याह - **तदिति** टीका। ननु तर्हि पक्षतावच्छेदकनानात्वेऽपि सिद्धसाधनं न दोषो न वा पक्षतावच्छेदकैक्येऽपि, तदा अंशतः सिद्धसाधनं कुत्र दोष इत्यत आह - **सिषाधयिषेति**। अयमर्थः - [94 B] यदा सर्वेषु पर्वतेषु पर्वतत्वरूपपक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिर्जाता पुनर्यत्र पर्वतत्वेन रूपेण चि(चै)त्रस्य पर्वते एव मम वह्न्यनुमितिर्भवतु एतादृशी या सिषाधयिषा तया कृत्वा पक्षतावच्छेदकसामानाधिकरण्येन या साध्यसिद्धिरुद्देश्या सा सिषाधयिषिते पक्षे एव साध्यप्रसिद्धिर्जायते न तु तदितरस्मिन् पर्वतान्तरे, तत्र पर्वतत्वरूपपक्षतावच्छेदकैक्येऽपि अंशतः सिद्धसाधनस्य प्रतिबन्धकत्वात् नानुमितिः। सोंऽशतः सिद्धसाधनस्य विषयः। तथा च पृथिवी इतरभिन्ना इत्यत्र न सिषाधयिषया काञ्चित् पक्षव्यक्तिमादायानुमानं येन अंशतः सिद्धसाधने दूषणं स्यादित्यर्थः।

**न च घटः कथं पक्षः साध्यनिश्चयेन संशय-सिषाधयिषयोरभावादिति वाच्यम्। सर्वा पृथिवी इतरभिन्ना न वेति संशयस्य तत्प्रकारकसिषाधयिषायाश्च सामान्यतो घटविषयत्वात् घटत्वेन विशेषदर्शनं सिद्धिर्वा अतस्तेन रूपेण संशय-सिषाधयिषे न स्तः पृथिवीत्वेन ते भवतः एव धूमवान् वह्निमान् इति धूमवत्त्वेन वह्निनिश्चयेऽपि पर्वते वह्निसंशयवत्। यद्वा सर्वत्वेन रूपेण न पक्षता सर्वत्राविप्रतिपत्तेः घटाद्येकदेशे इतरभेदस्य प्रत्यक्षसिद्धत्वात्**

**तथा चैकदेशे विप्रतिपत्तौ सामान्ये इतरभेदसाधने अर्थान्तरम्, किन्तु सामान्येन पृथिवीत्वेन यावदेव विप्रतिपत्तिविषयस्तावतामेव पक्षता विशेष्याननुगमात्। तर्हि पृथिवी इतरभिन्ना पृथिवीत्वात् घटवत् इति अन्वयिनैवेतरभेदस्य सिद्धत्वात् किं व्यतिरेकिणा, घटसाधारणपक्षत्वेऽप्यभेदानुमानवत् पक्षस्यापि दृष्टान्तत्वाविरोधात् पक्षान्यत्वं हि तत्रातन्त्रम्, किन्तु साध्यवत्तया निश्चितत्वं प्रयोजकम्। न च पृथिवीत्वाग्रहे पूर्वं गृहीतं यत्र साध्यं पश्चात् स्मर्यते तत्र हेतुसाध्यसामानाधिकरण्याग्रहात् व्यतिरेक्यवतार इति वाच्यम्।**

मूले आशङ्कते - **न चेति**। घटः पक्ष एव न भवति। पक्षत्वं हि द्वेधा - साध्यसन्देहत्वेन सिषाधयिषितसाध्यवत्त्वेन वा। आद्ये त्वाह - **साध्यनिश्चयेति**। साध्यसन्देहस्तन्निश्चयेनास्ति परं सिषाधयिषादिस्थले नास्तीत्यत्र हेतुर्मूले अनुक्तोऽपि बोध्यः। यथा पृथिवीत्यनुमानस्यापूर्वत्वात् केनापि रूपेण साध्यस्यानिर्णयात् प्रकारान्तरविषयकसिषाधयिषाया अभावात् इत्याशङ्कार्थः। समाधत्ते - **सर्वेति** मूलम्। यद्यपि घटत्वेन रूपेणेतरभेदस्य निश्चितत्वात् साध्यसन्देहोऽस्ति तथापि पृथिवीत्वेन घटे इतरभेदसन्देहो वर्तत एवेत्यर्थः। न तु विशेषदर्शनं घटत्वेन रूपेण घटे इतरभेदसंशयविरोधि। कुत इत्यत आह - **धूमवान्** इति। यथा धूमवत्त्वावच्छेदेन धूमवति वह्नेर्निर्णये जातेऽपि पर्वते पर्वतत्वेन रूपेण वह्निसंशयो भवति तद्वत् प्रकृते पृथिवीत्वेन रूपेण इतरभेदसंशयो भवत्येवेति मूलम्। व्याख्या। अत्रास्वरसं दत्त्वा उत्तरग्रन्थं योजयति - **न त्विति**। तथा च धूमवत्त्वावच्छेदेन वह्निवह्निमत्त्वनिर्णये सति धूमवत्त्वेन सामान्येन प्रकारेण संशयो न भवति किन्तु धूमवत्त्वापेक्षया एतत्पर्वतत्वं विशेषस्तेन रूपेण संशयो भवतु। कुतः ? सामान्यप्रकार[क]निर्णयस्य सामान्यप्रकार[क]संशयविरोधित्वम्, न तु विशेषप्रकारकसंशयविरोधित्वम्। इदं दृष्टान्तेऽयं पर्वतो वह्निमान् न वेति संशये दृष्टम्। प्रकृते तु वैषम्यम्। कथम् ? विशेषप्रकारकनिर्णयस्य सामान्यप्रकारकसंशयविरोधित्वं नास्ति। धूमवत्त्वावच्छेदेन वह्निनिर्णये जातेऽपि पर्वतत्वेन प्रकारेण वह्निसंशय[स्य] जायमानत्वात्। विशेषप्रकारकनिर्णयस्य सामान्यप्रकारकसंशयविरोधित्वं कथमित्यत आह - **तथा सतीति**। तथा च एतत्पर्वतत्वरूपविशेषप्रकारेण वह्निनिश्चये पर्वतत्वसामान्यप्रकारकसंशयप्रसङ्गात्। तस्माद् विशेषरूपेण घटत्वेन प्रकारेणेतरभेदनिर्णये जाते सति पृथिवीत्वरूपसामान्यप्रकारेण संशयो न भवत्येवेति भावः। ननु विशेषरूपेण निर्णये जातेऽपि सामान्यप्रकारकसंशये किं बाधकम् ? न च एतत्पर्वतत्वेन वह्निनिर्णये पर्वतत्वेन रूपेण वह्निसंशयप्रसङ्ग इति वाच्यम्। पर्वतत्वरूपसामान्यप्रकारकोपस्थितौ [95 A] विशेषग्राहिका सामग्री एतत्त्वस्य ग्राहिका या सामग्री [ए]तत्समावेशात् एतत्त्वमपि भासते इति कृत्वा न पर्वतत्वेन

वह्निसंशयः तथा प्रकृते घटत्वरूपविशेषप्रकारेणेतरभेदनिर्णयेऽपि पृथिवीत्वेन रूपेणेतरभेदसंशयो भवत्येवेति। तथा च विशेषप्रकारकनिर्णयस्य सामान्यप्रकारकसंशयविरोधित्वमित्यत्र किं नियामकमित्यस्वरसादाह - **किञ्चेति। यदवच्छेदेनेति**। यथा पुरुषत्वावच्छेदेन स्थाणुत्वाभावरूपकोटि[क]निश्चये जाते सति यत्र पुरुषज्ञानं तत्र स्थाणुत्वाभावकोटिकसंशयविरोधि दृष्टम्, न तु यदवच्छेदेन यत्र यत्कोटि[क]निश्चयस्तस्यावच्छेदकस्य यत्प्रकारको निर्णयस्तत्प्रकारकतत्कोटिकसंशयविरोधि गौरवात्। तथा च अयमर्थः - यदवच्छेदेन पुरुषत्वावच्छेदेन स्थाणुत्वाभावकोटिकनिर्णये पुरुषत्वं स्थाणुत्वाभावस्य व्यावर्तको धर्मः तथा च यत्र व्यावर्तकस्य धर्मस्य दर्शनं तत्र न व्यावृत्तस्य संशयो यथा स्थाणुत्वाभावव्यापको धर्मः पुरुषत्वं तथा च यत्र पुरुषत्वज्ञानं तत्र स्थाणुत्वाभाव-संशयः, परं तु त्वयोच्यते त(य)त्र पुरुषत्वज्ञानं तत्र पुरुषत्वप्रकारकसंशयो न भवतीति संशयविरोधित्वम् तत्त्वयु-क्तम्। तत्प्रकारकत्वांशो गौरवात् त्याज्यः किन्तु यत्र व्यावर्तकधर्मज्ञानं तत्र न तच्छंशयः स च सामान्ये वा भवतु। तथा च प्रकृते इतरभेदस्य व्यावर्तको धर्मो घटत्वम्, तस्य घटे यज्ज्ञानं तत् स्वशब्देन घटत्वं तस्य व्यावृत्य इतरभेदः तस्य घटत्वरूपविशेषप्रकारेणापि संशयविरोधि घटत्वज्ञानं सामान्यं यः प्रकारः पृथिवीत्वं तत्प्रकारकसंशयस्यापि विरोधि भवत्येवेत्यर्थः। नन्वेवं घटत्वेनेतरभेदनिर्णयेऽपि पृथिवीत्वेनेतरभेदसंशयो जायते इत्येतन्मूलं विरुद्धमित्यत आह - **अत एवेति**। यतः परामर्शग्रन्थे एवमुक्तमस्ति धूमत्वरूपव्याप्तिव्यावर्तकधर्मदर्शने विद्यमानेऽपि धूमत्व-प्रकारको न सन्देहः किन्तु एतद्धूमत्वप्रकारकः सन्देहस्तु भविष्यत्येव। तथा च तच्छंशयनिराकरणार्थं पर्वतवृत्तिधूमो वह्निव्याप्य इति परामर्शः स्वीकार्य एवेति पूर्वपक्षयित्वा यत्र व्यावर्तकधर्मदर्शनं तत्र तत्तत्संशयो न तु व्यावर्तक-धर्मप्रकारकत्वांशोऽपि प्रविष्टव्यो गौरवादिति। तत्र सिद्धान्तितमतम् एव प्रकृते घटत्वरूपव्यावर्तकधर्मदर्शने विद्यमाने विशेषप्रकारको घटत्वप्रकारकः सामान्यप्रकारकः पृथिवीत्वप्रकारको वा न तत्संशयो व्यावर्तकधर्मस्य तत्प्रतिबन्धकत्वादिति अर्थः। मूलकारसम्मतिमाह - **तदिति**। व्याख्यातं प्राक्। तथा च प्रकृते घटे घटत्वज्ञाने विद्यमाने पृथिवीत्वप्रकारकोऽपि नेतरभेदसंशय इत्यस्वरसार्थः। **यद्वेति** मूलम्। पृथिवी इतरभिन्ना इत्यत्र सर्वपृथिवीत्वेन न पक्षता। तत्र हेतुमाह - **सर्वत्राविप्रतिपत्तेः**। सर्वत्राविप्रतिपत्तिः कुतः ? **घटे** इति मूलम्। तथा च पृथिव्येकदेशे घटे इतरभेदस्य प्रत्यक्षसिद्धत्वात् न सर्वपृथिव्यां विप्रतिपत्तिः। ननु सर्वत्राविप्रतिपत्तावपि सामान्येन सर्वपृथिवीत्वेन रूपेण इतरभेदसाधने किं दूषणमित्यत आह - **तथा चेति** मूलम्। तथा च यत्र घटे [95 B] जलादिभेदः सिद्धोऽस्ति तत्र घटादावितरभेदसाधनमाकाङ्क्षितम्, ततः प्रकृतानुपयुक्तघटे इतरभेद-साधनेऽर्थान्तरं स्यात्, तथा च निग्रहः स्यादित्यर्थः। ननु सर्वपृथिवीत्वेन रूपेण न साधनं तर्हि केन रूपेणेतर-भेदसाधनमित्यत आह - **किन्त्विति** मूलम्। सामान्येन पृथिवीत्वेन घटादिकं परित्यज्य यावदेव विप्रतिपत्ति-विषयस्तावत एव पृथिवीत्वेन रूपेणेत्यर्थः। ननु तर्हि पृथिवीत्वेन रूपेण किमर्थं पक्षता ? ये ये पार्थिवाः परमाण्वादयः पदार्थाः विप्रतिपत्तिविषयास्तेषामेव तेन परमाणुत्वद्व्यणुकत्वादिरूपेण पक्षता अस्तु इत्यत आह

- **विशिष्येति** मूलम् । तथा च परमाणुत्वं द्व्यणुके नास्ति द्व्यणुकत्वं च परमाणौ नास्ति इत्येकेन रूपेण पक्षत्वाभावादनुमानमेव न स्यात् किन्तु पृथिवीत्वेन रूपेण घटादिकं परित्यज्य यावदेव विप्रतिपत्तिविषयस्तावत एव पक्षत्वम् । ननु पृथिवीत्वेन पक्षतायां घटादावितरभेदस्य सिद्धत्वात् सिद्धसाधनं स्यादिति मूलमसङ्गत-मित्यन्यथा व्यचष्टे - **घटादावितीति** टीका । तथा च न सिद्धसाधनमित्यर्थः । घटादिभिन्नपृथिवीत्वेन पक्षतेत्यत्र साधकमाह - **अत एवेति** । कार्यं सकर्तृकं कार्यत्वादित्यत्र कार्यत्वं पक्षतावच्छेदकं परित्यज्यादृष्टद्वारिका या जन्यकृतिः, तदजन्यं यजन्यम्, सत्त्वेन रूपेण पक्षता न तु कार्यत्वेन पक्षता, कार्यत्वस्य घटादौ वृत्तित्वेन कुलालादिसिद्धेः सिद्धसाधनं स्यादित्यर्थः । यदि च घटादिकं परित्यज्य पृथिवीत्वेन पक्षता तदेश्वरानुमानेऽपि घटादिकं परित्यज्य कार्यत्वेन रूपेण विप्रतिपत्तिविषयाणामेव क्षित्यादीनामेव पक्षताऽस्तु किमर्थमदृष्टद्वारिकेति पक्षतावच्छेदकनिर्वचने निर्बन्ध इत्याह - **अन्यथेति** टीका । **तावतामिति** क्षित्यादीनामित्यर्थः । तथा च क्षित्यादिकं सकर्तृकमित्यत्र आदिशब्देन जलतेजःप्रमुखं यदि गृह्यते तदा पुरुषायुषपर्यवसानं स्यात्, तथा च क्षितिरेव पक्षः कार्यः, तदा क्षितित्वं पक्षतावच्छेदकं समुद्रे क्षितावनुगतं नास्तीति कृत्वा कार्यत्वं परित्यज्या-दृष्टद्वारिकेत्यनुगतं पक्षतावच्छेदकं कृतं तदंशतः सिद्धसाधनभियैव । न च पक्षतावच्छेदकैक्ये कथमंशतः सिद्धसाधनमित्यत आह-**तथा चेति** । पक्षतावच्छेदकैक्येऽपि सिद्धसाधनं भवत्येव । तथा चांशतः सिद्धसाधनभियैव कार्यत्वांशं परित्यज्यादृष्टद्वारिकेत्यादिना रूपेण पक्षतावच्छेदकनिर्वचनं कृतम् । **न चेत्यास्य वाच्यमित्यन्तार्थः** । अत्र अंशतः सिद्धसाधनभीत्या कार्यत्वं पक्षतावच्छेदकं परित्यज्यादृष्ट[द्वा]रिकेत्यादिपक्षतावच्छेदकनिर्वचनं कृतमिति न किन्तु सम्पूर्णसिद्धसाधनभीत्यैव कृतं पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरेव सिद्धसाधनत्वात् यतः पक्षतावच्छेदकं कार्यत्वं तेन सामानाधिकरण्यं सकर्तृकत्वं घटे प्रसिद्धमिति कृत्वा सिद्धसाधनमेव नांशतः सिद्धसाधनमिति । समाधत्ते - **एतन्मत** इति टीका । अंशतः सिद्धसाधने बाधकमाह - **अन्यथेति** । यद्यंशतः सिद्धसाधनभियैव पक्षतावच्छेदकनिर्वचनं तव [96 A] ते(त)दा [नि]ग्रहः स्यादित्यर्थः । तथा च कार्यं सकर्तृक-मित्यत्र परेण यदि अंशतः सिद्धसाधनमुद्भाव्यते तदा अन्यो वादी वदति - मया कार्यत्वेन रूपेण घटादिकं पक्ष एव न क्रियते किन्तु क्षित्यादिकमेव । अंशतः सिद्धसाधनाभावात् स्थापनावादिन एव विजयः स्यात् न तु अंशतः सिद्धसाधनवादिनः । एतदेवाह - **विजयेनेति** । स्थापनावादी अनुमानवादी जयी भवति इत्यर्थः । व्यतिरेकि-**वैयर्थ्यमाशङ्कते - न हीति** मूलम् । तथा पृथिवी इतरभिन्ना पृथिवीत्वात् इत्यत्र घटे पृथिवीत्वमितरभेदोऽप्यस्तीति अन्वयी भवतु । तथा च घटेतरा पृथिवी पक्षः, पक्षभिन्नो घटः सपक्षः । ननु घटसाधारणी पृथिवीत्वेन रूपेण पक्षता इति प्रथमः पक्षः । ततः तस्मिन् पक्षे घटस्य पक्षान्तर्भूतत्वात् सपक्षो घटो न भवति । तथा च हेतुसाध्ययोरन्वय-व्याप्तौ सपक्षाभावात् व्यतिरेक्येवोचित इत्यभिप्रायेण मूलमपरिपूर्णमिति मूलं संगमयति टीकाकारः - **पूर्वमत इति** टीका । घटसाधारणा पृथिवीत्वेन रूपेण पक्षतेति पूर्वस्मिन् कल्पे इत्यर्थः । पूर्वं पक्षताद्वयं कृतम् - एको घट-

साधारणपृथिवीत्वेन रूपेण, द्वितीयस्तु घटभिन्नपृथिवीत्वेन पक्षता । तन्मध्ये आद्ये पक्षे अभेदानुमानवत् पक्षस्यापि दृष्टान्तत्वं यथा अयमेतदभिन्न एतत्त्वात् एतद्वत् सिषाधयिषया इदमनुमानम् । ननु पक्षभिन्नत्वे सति साध्यनिश्चयवत्त्वं सपक्षत्वम्, तच्च घटे नास्ति, अतो घटः कथं सपक्ष इत्यत आह मूले - **पक्षान्यत्वे सति**। तथा च निश्चितसाध्यवत्त्वमेव सपक्षत्वं न तु पक्षान्यत्वं गौरवादिति भावः । पुनर्व्यतिरेक्यवतारमाशङ्कते - **न चेति**। तथा च पूर्वं यत्र घटे साध्यं इतरभेदरूपं गृहीतं पृथिवीत्वं हेतुर्न गृहीतम् तदा साध्यग्रहकाले हेतुग्रहो नास्ति हेतुग्रहकाले साध्यग्रहो नास्ति। तथा च घटे साध्यग्रहकाले हेतुसाध्ययोः सामानाधिकरण्याग्रहेऽन्वयव्याप्त्यनवतारे व्यतिरेक्यवतारो भविष्यतीत्याशङ्कार्थः ।

**हेतोरेव पक्षतावच्छेदकत्वेन घटे पृथिवीत्वग्रहदशायामितरभेदसामानाधिकरण्यग्रहावश्यम्भावादिति चेत्, सत्यम्, अन्वयितुल्यतया व्यतिरेकिणोऽपि सामर्थ्यादन्वयाप्रतिसन्धानदशायां व्यतिरेक्युपन्यासस्यापर्यनुयोज्यत्वात् तदुक्तम्, आस्तां तावदयं सुहृदुपदेशः, केवलव्यतिरेकिलक्षणं तावन्निर्व्यूढम् । अथवा जलादीनां त्रयोदशान्योन्याभावाः त्रयोदशसु प्रसिद्धाः पृथिव्यां साध्यन्ते, अत एवाकाशे व्यतिरेकिणा जलादिमिलितप्रतियोगिकान्योन्याभावाप्रतीतावपि त्रयोदशान्योन्याभावाः साध्या इति नान्वयित्वासाधारण्ये ।**

समाधत्ते - **हेतोरेवेति**। तथा च पृथिवीत्वं हेतुः पृथिवीत्वमेव पक्षतावच्छेदकम्, तथा च पक्षतावच्छिन्ने पक्षे साध्यग्रहकाले हेतोरवश्यं भासमानत्वात् अन्वयव्याप्तिग्रहो भवत्येवेत्यर्थः । एतदेवाह - **इतरभेदेति**। इतरभेदः साध्यं पक्षतावच्छेदकरूपो यो हेतुः पृथिवीत्वं तयोः सामानाधिकरण्यग्रहावश्यंभावादित्यर्थः। तेन घटदृष्टान्तेनान्वयित्वं भवत्येवेति भावार्थः । **अन्वयेति** मूलम् । तथा च यथा अन्वयिनोऽन्वयव्याप्तिद्वारा अनुमितिजनकत्वं तथा व्यतिरेकि(क)व्याप्तिद्वारा व्यतिरेकिणोऽप्यनुमितिजनकत्वमविरुद्धम्। ननु तर्हि व्यतिरेकव्याप्तिज्ञानकाले साध्यप्रसिद्ध्यनुरोधेनान्वयव्याप्तिस(प्र)तिसन्धानस्यावश्यकत्वात् अन्वय्यवतार एव अस्तु इत्याह मूले - **अन्वयाप्रतीति**। यदा व्यतिरेकव्याप्तिज्ञानकाले साध्यप्रसिद्ध्यनुरोधेनान्वयव्याप्तिप्रतिसन्धानं जातं तदा व्यतिरेक्यादरः इत्यर्थः । ननु इदमेवानुपपन्नम्, व्यतिरेकव्याप्तिग्रहकाले साध्यप्रसिद्ध्यनुरोधेन घटे हेतुसाध्ययोः सामानाधिकरण्यग्रहात् [96 B] अन्वयव्याप्तिप्रतिसन्धानमस्त्येवेति कथमन्वयव्याप्त्यप्रतिसन्धानमित्यत आह - **उक्तगत्येति** टीका । घटे साध्यप्रसिद्ध्यनुरोधगत्या इत्यर्थः । तथा च न केवलं साध्यसामानाधिकरण्यमात्रं व्याप्तिः अपि तु अन्वयाव्यभिचरितसामानाधिकरण्यमात्रम्, ततो घटदृष्टान्ते साध्यप्रसिद्ध्यनुरोधेन साध्यसामानाधिकरण्यग्रहेऽपि अव्यभिचारांशस्याग्रहणात् नान्वयव्याप्तिप्रतिसन्धानमित्यर्थः ।

मूले एतदर्थे द्रव्य**किरणावलीसम्मतिमाह - आस्तामिति निर्व्यूढमिति** । अन्वयव्याप्त्यप्रतिसन्धानदशायां व्यतिरेकव्याप्तिज्ञानस्यानुमितिजनकत्वात् व्यतिरेकी निर्व्यूढ इत्यर्थः । ननु आकाश इतरेभ्यो भिद्यते शब्दवत्त्वात् इत्यत्र आकाशस्यैकदेशाभावात् साध्याप्रसिद्धौ कथं व्यतिरेकित्वमित्यभिप्रायेण **अथवेति** मूले योजयति । **उक्तप्रकारेति** टीका । एकदेशे साध्यप्रसिद्धिप्रकारस्येत्यर्थः । **जलादीति** मूलम् । जलभेदस्तेजसि प्रसिद्धः प्रत्यक्षेण । एवंप्रकारेण प्रात्यक्षिकास्ते ते भेदास्तेषु तेषु प्रसिद्धा इति ते भेदाः अपेक्षाबुद्ध्या यथा अयमेक इति रूपो योऽपेक्षाबुद्धिरूपो विशेषस्तयोपगृहीतास्ते ते समुदिताः भेदाः पृथिव्यां पृथिवीतरप्रतियोगिकाः आकाशेऽपि आकाशेतरप्रतियोगिकाः साध्यन्ते इत्यर्थः । पूर्वकल्पे एकदेशे साध्यप्रसिद्धिरूपे स्वरसमाह - **अत एवेति** मूलम् । यत एव आकाशस्यैकदेशे साध्यप्रसिद्धिर्नास्तीत्यत एवेत्यर्थः । तथा चाकाशपक्षकेऽपि ते ते भेदा जलादिभेदास्तैजसादौ प्रसिद्धा इति न साध्याप्रसिद्धिरिति व्यतिरेकिणा समुदिता आकाशे साध्येतेत्यर्थः । ननु त्रयोदशान्योन्याभावाः त्रयोदशसु जलादिषु कथं प्रसिद्धा जले वाय्वादिभेदसत्त्वेऽपि जलभेदाभावात् इत्यत आह - **एतच्चेति** टीका । तथा यथा घटत्वे सत्त्वेऽपि घटपटौ न स्त इति व्यासज्यवृत्त्यत्यन्ताभावः स्वीक्रियते एकसत्त्वेऽपि द्वित्वावच्छिन्नाभावः तद्वत् प्रकृते पृथिवी इतरभिन्ना पृथिवीत्वात् इत्यत्र जलं वाय्वाकाशादिकं न इति प्रतीत्या द्वादशान्योन्याभावस्य जले सत्त्वेऽपि जलादित्रयोदशभेदाभावो व्यासज्यवृत्तिप्रतियोगिताको जलादित्रयोदशभेदाभावरूपः साध्याभावो जले वर्तते एवेति जलादीनां विपक्षत्वम् । कथम् ? अन्यथा जलादिषु त्रयोदशान्योन्याभावसत्त्वे पक्षत्वेन विपक्षत्वानुपपत्तिः । **तस्मादिति** टीका । व्यासज्यवृत्तिधर्मस्त्रयोदशत्वं तदवच्छिन्नो भेदः प्रतियोगी तदभावो जले द्वादशतेजोवाय्वादिभेदसत्त्वे जलादिप्रतियोगिका ये त्रयोदशत्वावच्छिन्ना भेदास्ते तु न सन्ति, द्वादशभेदसत्त्वे जलभेदस्यासत्त्वात् । ननु यदि जलादौ त्रयोदशान्योन्याभावाः प्रसिद्धास्तदा जलादीनां सपक्षत्वेनान्वयित्वमसाधारण्यं वा स्यादित्यत आह - **अत एवेति** । तथा च एकस्मिन् अधिकरणस्य जलादेर्निश्चितसाध्यवत्त्वाभावात् सपक्षत्वं नास्ति । यत एकमधिकरणं त्रयोदशभेदवत् न भवति । कुत इत्यत आह - **प्रत्येकेति** । तथा च जले निश्चितं साध्यं त्रयोदशत्वरूपं साध्यतावच्छेदकं तदवच्छिन्नो भेदः स चैकस्मिन् कुत्रापि [97 A] जलादौ नास्ति, जलादौ जलभेदाभावात् । प्रत्येकं भेदस्तिष्ठति, स तु न व्यासज्यवृत्तिधर्मावच्छिन्नः । कुत इत्यत आह - **अन्यथेति** । यदि प्रत्येकसत्त्वेऽपि द्वित्वावच्छिन्नं चेत् तदा एकस्मिन् द्वाविति बुद्ध्यापत्तिः । अत्रैव ग्रन्थस्वरसमाह - **अत एवेति** । **तावदिति** । त्रयोदशत्वावच्छिन्नभेदयोगीत्यर्थः । ननु (न तु) प्रत्येकभेदवान् त्रयोदशत्वावच्छिन्नभेदवान् इत्यत आह - **नन्विति (न त्विति)** । कुत इत्यत आह - **साध्यताया** इति । तथा च त्रयोदशत्वरूपो यो व्यासज्यवृत्तिर्धर्मस्तदवच्छिन्ना साध्यता न प्रत्येकं परिसमाप्ता किं[तु] तावत्स्येव त्रयोदशस्वेव, यथा द्वित्वं यद्यपि एकस्मिन्नपि वर्तते तथापि द्वित्वं न एकस्मिन्नेव पर्याप्तं किन्तु द्वयोरेव पर्याप्तम् । ननु तथापि एकत्र कस्मिन्नप्यधिकरणे जले तेजसि वेत्यादौ त्रयोदशभेदरूपसाध्यस्याभावात् साध्याप्रसिद्धेः कथं

व्यतिरेकव्याप्तिग्रहः इत्याशङ्कते - **न चेति**। **साध्यतेति**। त्रयोदशभेदत्वेन इत्यर्थः। समाधत्ते - **भिन्नेति**। यथा चैत्राङ्गने घटो मैत्राङ्गने च पटस्तत्रोभयेन्द्रियसन्निकर्षे सति कस्याङ्गनस्य घटपटोभयाभावानधिकरणत्वेऽपि भिन्नाभिन्नानधिकरणे विद्यमानानां तेषां भिन्नाधिकरणकघटपटयोर्द्वाविति बुद्धिवत् त्रयोदशभेदाभाव इति निरधिकरणकबुद्धिसम्भवात्। अतः सपक्षव्यतिरेकिणाऽपि साध्यप्रसिद्धिः यथा घटत्वपटत्वद्वयोरेकाधिकरण-कत्वासम्भवेऽपि घटत्वपटत्वे द्वे इति बुद्धिः सम्भवति। तद्वत् अत्रापि इति समुदायार्थः। अन्येनोक्तां साध्यप्रसिद्धिं खण्डयति - **यत्त्विति**। **प्रत्येक** इति। यथा च पृथिवी पक्षस्तत्र जलादित्रयोदशभेदाः साध्यन्ते तेषां च न त्रयोदश-भेदत्वेन साध्यता किन्तु प्रत्येकभेदत्वेन तेजोभेदत्वेनेति यावत्। तथा च जलभेदस्तेजसि प्रसिद्धस्तेजोभेदो जले प्रसिद्ध इति न साध्याप्रसिद्धिर्नापि व्यतिरेकव्याप्तिग्रहदुर्भिक्षं तत्र जलभेदा[भा]वस्तत्रेतरभेदाभावः यथा जले इति व्यतिरेकव्याप्तिग्रहः सम्भवति। तथा च व्यतिरेकव्याप्तिग्रहः सुकरः। ननु प्रत्येकव्यतिरेकव्याप्तिभिः प्रत्येकभेदस्य साध्यत्वे प्रत्येकभेदस्य तेजोवाय्वादावधिकरणे विद्यमानत्वात् ततः पृथिवीत्वस्य हेतोर्व्यावृत्त[त्वा]त् असाधारण्यं स्यादित्यत आह - **अनुमितीति**। तथा च यादृशं साध्यमनुमितिविषयो भवति। प्रकृते अनुमितिविषयीभूतं साध्यं मिलितत्रयोदशभेदरूपं तथा[व्या]वृत्त्या हि असाधारण्यं भवति। साध्यवद्व्यावृत्तौ (त्तो) हेतुरसाधारणः इत्यर्थः। मिलिते त्रयोदशभेदरूपसाध्यस्य कुत्रापि प्रसिद्धिर्नास्ति, ततो न साधारण्यमिति भावः। न च साधारणस्य व्याप्ति-ग्रहप्रतिबन्धकत्वेन दूषकत्वं प्रत्येकसाध्यवद्व्यावृत्तत्वज्ञानेन प्रत्येकसाध्यव्यतिरेकव्याप्तिग्रहप्रतिबन्धनात्। प्रत्येकव्याप्त्यग्रहे कथं प्रत्येकव्याप्तिर्मिलितत्रयोदशभेदानुमितिरित्यत आह - **सत्प्रतिपक्षेति**। तथा चासाधारणस्य न व्याप्तिग्रहप्रति[बन्ध]कत्वेन दूषकत्वम्, सत्प्रतिपक्षोत्थापकत्वेन। ततः प्रत्येकसाध्यव्यावृत्तत्वज्ञानेऽपि न व्यभिचारकव्याप्तिग्रहप्रतिबन्धः [97 B] सत्प्रतिपक्षोत्थापकत्वं च प्रकृते नास्ति। सत्प्रतिपक्षश्चैवं पृथिवी त्रयोदशभेदाभाववती पृथिवीत्वादिति सत्प्रतिपक्षः कर्तुं न शक्यते। कुतः ? त्रयोदशभेदरूपसाध्यस्यानुमिति-व्यतिरेकेण ज्ञानाभावात्। तथा च सत्प्रतिपक्षः कर्तुं न शक्यते। अयमत्र सङ्ग्रहः - असाधारणस्य व्याप्तिग्रहप्रतिबन्धकत्वे[न] न दूषकत्वं किन्तु सत्प्रतिपक्षत्वेन। तथा च जलभेदव्यावृत्तत्वज्ञानेन जलभेदाभाववती इत्येव सत्प्रतिपक्षः कर्तव्यः, स च त्रयोदशभेदरूपसाध्यस्य न सम्भवति किन्तु जलादिप्रत्येकभेदस्यैवेति कृत्वा तादृशसाधारण्येन सत्प्रतिपक्षोत्थापनमकिञ्चित्करमेव, ततस्तु त्रयोदशभेदरूपसाध्यस्य [त्रयोदशभेदा]भाववती इत्ययं सत्प्रतिपक्षः कर्तव्यः स च न सम्भवति, किन्तु (कथम् ?), जलमिलितसाध्यवद्व्यावृत्तरूपासाधारण्य-ज्ञानाभावात् साध्याप्रसिद्धेरिति। एतदेव मनसि धृत्वाऽऽह - **अनुमितिविषयेति**। दूषयति - **चिन्त्यमिति**। **तथा चेति**। पृथिवी जलभेदाभाववती तेजोभेदाभाववती इत्यादि प्रत्येकं तद्भेदाभावसाधने इति प्रत्येकं त्रयोदश-[भेदा]भावे साधिते सति त्रयोदशभेदरूपसाध्यस्य सिद्धिः कथं भविष्यति। सर्वे प्रत्येकभेदाभावा यदि साधितास्तदा त्रयोदशभेदरूपं साध्यं न सिद्ध्यति। यथा पर्वतः पर्वतीयवह्न्यभा[व]वांश्चेति सत्प्रतिपक्षेण यथा पर्वते

वह्निसिद्धिर्न भवति तथा प्रत्येकं त्रयोदशभेदाभावाः साधितास्तदा कथं त्रयोदशभेदरूपसाध्यसिद्धिः ?, त्रयोदशभेदाभावज्ञानस्य प्रतिबन्ध[क]त्वात् । ननु मेलकं(क)रूपसाध्यसिद्धौ किं दूषणमित्यत आह - **मू(मे)लकेति**। तथा च मेलको हि न त्रयोदशभेदातिरिक्तः किन्तु त्रयोदशभेदस्वरूपात्मक एव। तथा च यदि प्रत्येकं त्रयोदशभेदाभावाः साधितास्तदा त्रयोदशभेदरूपसाध्यस्य सिद्धिः कथं स्यात् ? तुष्यतु [दुर्जनः] इति न्यायेन भवतु वा मेलकः, तथापि मेलकीभूतसाध्याप्रसिद्धौ कथमनुमानं पृथिवी इतरेभ्यो भिद्यते इति रूपं स्यादिति न किञ्चित्, तद्वत्। **असाधारण** इति टीका। यदा असाधारणो न ज्ञातस्तदा प्रत्येकव्यतिरेकव्याप्तिभिः प्रत्येकं त्रयोदशभेदाः साधयितुं शक्यन्ते एव। ननु तथापि असाधारण्यज्ञानकाले तादृशप्रकारकव्यतिरेक्यनुमाना-सम्भवात् कथमयं पक्ष इत्यत आह - **क्वचिदिति**। तथा च यदा असाधारण्यज्ञानं नास्ति तदा पृथिवी इतरेभ्यो भिद्यते इत्यनुमानं भवत्येवेत्यर्थः। **सर्वेति** टीका। घटाद्येकदेशप्रकार आकाशादिषु न सम्भवतीति। तथाप्रकारमाह - तस्यापि सङ्ग्रहो यथा स्यादित्यर्थः।

**यद्वा जलं तेजःप्रभृतिद्वादशभिन्नप्रतियोगिकान्योन्याभाववत् द्रव्यत्वात् तेजोवत् इत्यनुमानात् त्रयोदशभिन्नस्य सामान्यतः सिद्धौ पृथिव्यां त्रयोदशभिन्नत्वं साध्यम्। न चान्वयित्वमसाधारण्यं वा, पक्षादन्यत्र साध्याप्रसिद्धेः। वस्तुगत्या पृथिव्यामेव साध्य-सिद्धेः किं व्यतिरेकिणेति चेत्। न। पृथिवी त्रयोदशभिन्नेति व्यतिरेकिणं विना अप्रतीतेः।**

**यद्वेति** मूलम्। यथा जलं पक्षः तेजःप्रभृतयो ये द्वादश तद्भिन्नं यद्वस्तु तदन्योन्याभाववत्। एतावत् त्रयोदशभेदो जले सामान्यप्रकारेण सिद्धो न तु त्रयोदशत्वेन रूपेण। अत एव नासाधारण्यम्, त्रयोदशत्वेन रूपेण साध्याप्रसिद्धेरिति। अन्वयित्वमपि नास्ति [98 A] सपक्षाभावात् इत्यत आह - **न चेति**। तथा च पक्षात् पृथिवी-रूपादन्यत्र त्रयोदशरूपसाध्याप्रसिद्धेः। किन्तु साध्यप्रसिद्धिः पक्षे पृथिव्यामेव। अत्राशङ्कते - **वस्तुगत्येति** मूलम्। यदि पृथिव्यामेव त्रयोदशभेदरूपसाध्यस्य सिद्धिस्तदा व्यतिरेक्यनुमानेन किम्? व्यर्थं तदित्याशङ्कार्थः। समाधत्ते - **पृथिवीति**। पृथिवीविशेष्यकत्रयोदशप्रकारकबुद्धेरसम्भवात् पृथिवी त्रयोदशभिन्ना इति पृथिवी-विशेष्यकबुद्धिर्न जाता किन्तु सामान्यत इतरभिन्ना इति जाता। तथा च इदमेव प्रयोजनं यत् पृथिवी-विशेष्यकेतरभेदानुमितिस्तेन क्रियते इति। अत्र टीका शङ्कते - **यद्यपीति**। त्वयोक्तं जलं तेजःप्रभृतिद्वादशभिन्नं तद्वस्तु तद्भेदवदिति। तच्चायुक्तम्। कथम्? द्वादशभिन्नं यद्वस्तु तत्सद्भावपि द्वादशभेदस्य जलेऽसिद्धिरेव। जल-भिन्नं यद्वस्तु तस्य भेदो जले यद्यपि सिद्धस्तथापि तेजःप्रभृति यद् द्वादश तद्भेदस्तु जले न सिद्धः। अयमर्थः - जलभेदः पृथिव्यां सिद्धोऽनेनानुमानेन परं पृथिव्यां तेजःप्रभृतिद्वादशभेदो न सिद्ध इत्याशङ्कार्थः। समाधत्ते - **तथापीति**। अनुमानार्थस्त्वयम् - जलं पक्षः तेजःप्रभृति यद् द्वादशकं तद्भिन्नं यद्वस्तु तन्निष्ठो यो भेदोऽर्थाज्जलस्य

भवत(त्ये)व, एतावता पृथिवी तेजःप्रभृतिद्वादशभिन्ना सिद्धा, जलभेदोऽपि यदि पृथिव्यां सिद्धस्तदा त्रयोदशानामपि भेदानां सामान्यतः सिद्धिर्जातैवेति नाप्रसिद्धः। समाधानान्तरं दूषयति - **अन्ये त्विति**। तेजःप्रभृति यद् द्वादशभिन्नं तत् पक्षः तज्जलभेदवत् इति साध्यं जलनिष्ठभेदप्रतियोगित्वात्। यज्जलनिष्ठभेदप्रतियोगि तज्जलभेदवत्। एतावताऽयमर्थः - द्वादशभेदवद्वस्तुनि यदि जलभेदस्तदा त्रयोदशभेदसिद्धिरेवेति सामान्यतः। एवं च यथा घटभेदवति यदि घटभेदः सिद्धः तदा घटापटोभयभेद एवेति भावः। पुनरपि इतरभेदाः त्रयोदशभेदाः तत्प्रसिद्ध्यर्थं मतान्तरमाह - **यत्त्विति**। अनुमानं(ने) जलं पक्षः तेजःप्रभृति यद् द्वादशभिन्नं वस्तु पृथिवीस्वरूपं तत्प्रतियोगिकान्योन्याभाववत् इदं साध्यं द्रव्यत्वात् तेजोवत् एतस्मिन् अनुमाने तेजःप्रभृतिद्वादशभिन्नं पृथिवीस्वरूपं जातं तस्य भेदो यदि जले तदा जलभेदोऽपि पृथिव्यामिति द्वादशभेदा जलभेदश्चेति त्रयोदशभेदाः सामान्यतः। पृथिवीविशेष्यकत्रयोदशभेदसाध्यकस्तु व्यतिरेकीति सार्थकः। दूषयति - **तत् तुच्छमिति**। **विशेषणेति**। तथा च यत्र विशेषणविशेष्यभावो भिन्नस्तत्र समानसंवित्संवेद्यत्वं नास्त्येव। यथा भूतलवद्घटाभाव इत्यत्र भूतले घटात्यन्ताभावे भासमाने घटे अत्यन्ताभावप्रतियोगित्वं समानसंविद्वेद्यतया भासते एव, परं घटे भतलवृत्तित्वाभावो न भासते, कथम्?, विशेषणविशेष्यभावभेदात् यथा भूतलं घटाभाववत् इत्यत्र भूतलं विशष्यं घटाभावो विशेषणम्। न तु अत्र घटो विशेष्यो भूतलवृत्तित्वाभावो विशेषणम् अनयोर्विशेषणविशेष्यभावाभावात्। भूतलं घटाभाववत् इत्यत्र भूतलविशेष्यकघटाभावविशेषणकविशेषणविशेष्यभावोऽनुभूयते, [98 B] न तु घटविशेष्यकभूतलवृत्तित्वाभावविशेषणकविशेषणविशेष्यभावः। तथा च यथा घटविशेष्यकभूतलवृत्तित्वाभावविशेषणको विशेषणविशेष्यभावो नानुभूयते इति कृत्वा घटे न भूतलवृत्तित्वाभावज्ञानं जायते। तद्वत् जले द्वादशभिन्नप्रतियोगिकान्योन्याभावे भासमानेऽपि द्वादशभिन्ने जलान्योन्याभावो न भासते यतो द्वादशभिन्नविशेष्यकजलभेदविशेषण[क]त्वासम्भवात्। तथा च न द्वादशभिन्ने[1] जलभेदो भासते, तथा च पृथिव्यां जलभेदस्य भानाभावात् न सामान्यतोऽपि त्रयोदशभेदप्रसिद्धिः। **तत्प्रतियोगिके**ति टीका। द्वादशभिन्नप्रतियोगिकेति अर्थः। **तन्निष्ठेति**। जलनिष्ठभेदप्रतियोगित्वं द्वादशभिन्ने भासते, यदा घटे पटभेदो भासते [तदा] पटनिष्ठभेदप्रतियोगित्वमपि घटे भासते। ननु घटेऽपि पटभेदस्तद्वज्जले द्वादशभिन्नप्रतियोगिके भेदे भासमानेऽपि जलनिष्ठभेदप्रतियोगित्वं द्वादशभिन्ने भासते इत्युचितम्, ननु(? न तु) द्वादशभिन्नेऽपि जलभेदवत्त्वं भासते इत्यर्थः। अत्रैवानुरूपं दृष्टान्तमाह - **अत एवेति**। गवये अनुयोगिनि गोसादृश्ये गोसदृशो गवय इति वाक्याद् भासमाने गवयनिष्ठसादृश्यप्रतियोगित्वं गवि भासते। ननु (न तु) गवयप्रतियोगिसादृश्यमपि गवि भासते यथा गवयसदृशो गौरिति प्रतीतेरभावात् गवयसादृश्यं न भासते। **समाने**ति टीका। गोप्रतियोगिकं सादृश्यं चेद् गवये भातं तदा गवयनिष्ठसादृश्यप्रतियोगित्वमपि

---

१. पृथिव्याम् इति प्रतौ टिप्पणी।

गवि भासते ननु (न तु) गवयसादृश्यं गवि भासते। **अन्यथे**ति टीका। **शबरस्वामिभाष्य**कृतो मानसस्य प्रत्यक्षे एवान्तर्भावसम्भवात्। यथा गोसदृशो गवय इति उपमानस्थले गोप्रतियोगिकसादृश्यं गवयनिष्ठं प्रत्यक्षप्रमाणविषयः यतः प्रत्यक्षेण गोप्रतियोगिकसादृश्यं गवये गृह्यते। गवयप्रतियोगिकसादृश्यं गवि उपमानेन गृह्यते इति **मीमांसक**मतम्। तच्च **नैयायिकै**र्दूष्यते। कथम्? गवयप्रतियोगिकसादृश्यं गवि अनुमानेन गृह्यते। **अनुमानं** यथा गौर्गवयसदृशः गवयनिष्ठसादृश्यप्रतियोगिकत्वात् यथा हस्तो हस्तान्तरेण इत्यत्रानुमाने तस्य **शाबरोपमान**-स्यान्तर्भावः क्रियते किमर्थं प्रत्यक्ष एवोपमानस्यान्तर्भावोऽस्तु इत्यर्थः। गोसदृशो गवय इति गोसादृश्यविशिष्ट-प्रत्यक्षे गवये गोप्रतियोगिकसादृश्ये भासमाने गव्यपि गवयप्रतियोगिकसादृश्यं भासते। किंवत्? यथा तेजःप्रभृतिद्वादशभिन्नप्रतियोगिकभेदे जले भासमाने जलप्रतियोगिको भेदोऽपि तेजःप्रभृतिद्वादशभिन्ने वस्तुनि भासते इति त्वयाऽपि स्वीक्रियते। तथा च गवि गवयप्रतियोगिकसादृश्यभानार्थं **नैयायिकै**र्यदनुमानं क्रियते तत् किमर्थम्, पूर्वोक्तरीत्या प्रत्यक्षेणैव तस्य गृहीतत्वात्। अयमर्थनिष्कर्षः - **नैयायिकमते** वाच्यवाचकसम्बन्धग्रहे एवोपमानस्य फलं तदेवोपमितिरूपं फलम्। यथा प्रथमतो नागरिकेण वनेचरं प्रति कीदृग् गवय इति प्रश्नः कृतः, तदनन्तरमारण्यकेनोक्तम् 'गोसदृशो गवयः' इति, [99 A] तस्य वै गोसदृशो हि कश्चिदर्थो गवयशब्दवाच्य इति अतिदेशवाक्यार्थज्ञानं नागरिकस्य जातम्, तदनन्तरं स नागरिको वनं गतः, तत्र तस्य गोसादृश्यविशिष्टप्रत्यक्षं जातम्, तदनन्तरं गोसदृशः पदार्थो गवयशब्दस्यार्थ इत्यतिदेशवाक्यार्थस्मरणं जातम्, तदनन्तरं गवयशब्दवाच्योऽयं पिण्ड इति ज्ञानं जायते। अत्र गवयशब्दवाच्यताग्रहो यः स चोपमितिव्यतिरेकेण न सम्भवति इति गवयत्वावच्छेदेन गवयशब्दवाच्यतां गवयपिण्डे गृह्णाति इति ज्ञानमुपमितिरूपम्। तथा च गवयत्वावच्छेदेन गवयशब्दवाच्यताग्रहो यः स चोपमितिव्यतिरेकेण न सम्भवति इति गवयत्वावच्छेदेन गवयशब्दवाच्यताग्रह एवोपमानस्य फलमिति **न्यायमतम्**। **शबरस्वामिना** त्वेवमुच्यते - 'गोसदृशो गवयः' इति वाक्यश्रवणानन्तरमरण्यगतमात्रस्य नागरिकस्य गोसादृश्यविशिष्टपिण्डप्रत्यक्षानन्तरम् 'एतद्गवयसदृशी मदीया गौः' इति गवि गवयप्रतियोगिकसादृश्यज्ञानम-वोपमारूपमिति तदेवोपमानफलमिति **शबरस्वामि**कृतम्, तच्च **शाबर**मुपमितिरूपं यद् ज्ञानं तत्र **नैयायिकै**रनुमितिरूपमेवोच्यते, अनुमानं तु पूर्वोक्तरीत्या इति। अत्रैतद् ज्ञानं **नैयायिकै**रनुमितिरूपं किमर्थमुच्यते, प्रत्यक्षरूपमेव कुतो न भवति यतो गोसदृशो गवय इति गोसादृश्यविशिष्टपिण्डं प्रत्यक्षं यदि गवये गोप्रतियोगिकं सादृश्यं भातमेवेति प्रत्यक्षेणानुमितेरन्यथासिद्धत्वादित्यर्थः।

**नन्वेवं पृथिवी जलादित्रयोदशभिन्नप्रतियोगिकान्योन्याभाववती द्रव्यत्वादिति पृथिवीभिन्नतद्भिन्नादिसिद्धिः स्यादिति चेत्। न। अप्रयोजकत्वात् प्रकृते चानुभूयमान-जलादिवैधर्म्यस्य पृथिवीत्वशब्दाश्रयत्वादेः अतिरिक्तं विनानुपपत्तेः। नन्वितरभेदो**

**यद्यन्योन्याभावस्तदा भावाद् भेदो न सिद्ध्येत अभावस्याभावान्तराभावात्, यदि च तेन समं स्वरूपभेद एव साध्यः तदननुगमादनुमानाप्रवृत्तिः, भावोऽभावो न भवतीत्यबाधितप्रतीतिबलादभावस्यापि अन्योन्याभावोऽस्तीति केचित्, तन्न, अपसिद्धान्तात्। अनतिप्रसक्ताधिकरणस्वरूपमात्रेणैवाभावप्रतीत्युपपत्तौ चाधिकाभावे मानाभावाच्च इति चेत्। न। इतरभावान्योन्याभावस्य साध्यत्वात्। न चैवमभावादविवेकतादवस्थ्यम्, तेन समं स्वरूपभेदस्यान्वयिना व्यतिरेकिणा वा साध्यत्वात्।**

**नन्विति** मूलम्। पृथिवी जलादित्रयोदशभिन्नं यद् वस्तु अर्थात् पृथिव्येव तत्प्रतियोगिकान्योन्याभाववती द्रव्यत्वादि[ति] हेतुः। यत्र यत्र जलादित्रयोदशभिन्नप्रतियोगिकान्योन्याभावस्तत्र तत्र द्रव्यत्वाभावो यथा जले इति व्यतिरेकिणा जलादित्रयोदशभिन्नं यद् वस्तु पृथिवी तद्भेदोऽपि व्यतिरेकिणा पृथिव्यां सिद्ध्येत व्यतिरेकव्याप्तेस्तुल्यत्वात्। एवं च यदि पृथिवीभेदोऽपि जलादित्रयोदशभिन्ना या पृथिवी तद्भेदोऽपि सिद्धस्तदा पृथिवीभिन्नवस्तुभदोऽपि व्यतिरेक्यनुमानपरम्परया कुतो न सिद्ध्यतीति मूलशङ्कार्थः। समाधत्ते - **अप्रयोजकत्वादिति** मूलम्। तथा च पर्वतो वह्निमान् व्यञ्जनवांश्च धूमात् इत्यत्र वह्निव्यञ्जनोभयसहचारस्य धूमे महानसे तुल्यत्वेऽपि धूमवह्न्योः कार्यकारणभावमूलकः, वह्न्यभावे धूमो न स्यात् इत्यनुकूलतर्कवत् व्यञ्जनाभावे धूमो न स्यात् इत्यनुकूलतर्काभावः, तथा चानुकूलतर्कशून्यत्वमेवाप्रयोजकत्वम्, तद्वत् अत्रापि पृथिवी जलादित्रयोदशप्रतियोगिकान्योन्याभाववती पृथिवीत्वादि[ति]वत् जलादित्रयोदशभिन्नप्रतियोगिकान्योन्याभाववतीत्यत्रापि व्यतिरेकसहचारस्य तुल्यत्वे यथा जलादित्रयोदशभेदवतीत्यत्रानुकूलतर्कोऽस्ति तद्वत् जलादित्रयोदशभिन्नप्रतियोगिकान्योन्याभाववतीत्यत्र अनुकूलतर्को नास्त्येव। तत्र अनुकूलतर्कोऽस्त्येव यथा पृथिवी यदि जलादित्रयोदशभिन्ना न भवेत् तदा जलादिष्वपि गन्धः प्रसज्येत। प्रकृते पृथिवी जलादित्रयोदशभिन्नं यद् वस्तु तद्भिन्ना इत्यत्र किञ्चिद्(कश्चिद्) विपक्षबाधकरूपोऽनुकूलतर्को नास्तीति [99 B] अप्रयोजकता। एतदेवाह - **प्रकृते चेति** मूलम्। अनुभूयमानं जलादिवैधर्म्यं पृथिवीत्वरूपमित्युपलक्षणम्, गन्धोऽपि ग्राह्यः। शब्दाश्रयत्वं वाऽऽकाशे इतरभेदसाधने, विपक्षबाधकस्तर्को यथा यद्याकाशस्त्रयोदशभिन्नो न स्यात् तदा शब्दाश्रयत्वमाकाशे न स्यात्। **अतिरिक्तमिति** मूलम्। जलादिभिन्नवस्तुव्यतिरेकेणेत्यर्थः। शङ्कते - **नन्विति**। इतरभेदो यद्यन्योन्याभावरूपस्तदा भावात् पृथिव्या भेदो न सिद्ध्येत्। कुतः ? यथा घटभेदः पटे पटस्वरूपातिरिक्तो घटान्योन्याभावरूपो भेदातिरिक्तः स्वीक्रियते तद्वत् पृथिव्यामभावस्यापि चतुर्दशस्य भेदोऽन्योन्याभावरूपो जलादित्रयोदशान्योन्याभाववत् अधिकरणातिरिक्तो नास्ति। अयं भावः - यथा पृथिवी जलाद् भिद्यते अत्र यथा जलभेदः पृथिव्यां

जलान्योन्याभावोऽतिरिक्तोऽस्ति, एवं पृथिवी तेजोभिन्ना इत्यत्र तेजोऽन्योन्याभावो यथा पृथिव्यामतिरिक्तोऽस्ति एवं पृथिवी आकाशाद् भिद्यते इत्यत्राकाशान्योन्याभावोऽप्यतिरिक्तः पृथिव्यामस्ति, तद्वत् पृथिवी अभाव-भिन्ना इत्यत्र पृथिव्यामभावभेदोऽन्योन्याभावरूपोऽतिरिक्तः पृथिवीस्वरूपाद् भिन्नो नास्ति। कुतः ? अभाव-प्रतियोगिकातिरिक्ताभावानभ्युपगमात्। यथा घटात्यन्ताभावस्यात्यन्ताभावो घटस्वरूपातिरिक्तो नास्ति तद्वत् अभावस्यापि अतिरिक्तोऽत्यन्ताभावो नास्ति, तद्वत् अभावमात्रस्यान्योन्याभावात्। मध्ये शङ्कते - **यदि चेति** मूलम्। तथाभावादतिरिक्तोऽन्योन्याभावरूपो भेदः पृथिव्यां मास्तु परं स्वरूपभेदो भविष्यति। यथा घटात्यन्ता-भावे पटात्यन्ताभावभेदस्तिष्ठति, स यथाऽतिरिक्तान्योन्याभावरूपो न भवति किन्तु घटात्यन्ताभावस्वरूपं पटात्यन्ताभावस्वरूपमिति स्वरूपात्मक एव भेदस्तद्वत् अभावादपि यो भेदः सोऽपि अभावस्वरूपं पृथिवी-स्वरूपमेवाभावभेदो भविष्यतीति। अभावभेदः न शक्यानुमितिः। पाण्डुस्वरूपात्मक एव साध्यमित्या-शङ्कामध्ये क्षुद्रा शङ्का। तत्र वादी दूषयति - **तदेति** मूलम्। **अननुगमादिति** मूलम्। वस्तुभेदे प्रवृत्तेऽपि शब्दसामान्यभेदतः न शक्यानुमितिः। पाण्डुद्रव्यादि बहु भासते। यथा शब्दसाम्यमात्रेणानुमानं न प्रवर्तते। अनुमानं यथा अयं पुरुषः आलोकाभावः आलोकविरोधी वा तमस्त्वात्। तमःशब्दार्थो यथान्धकारोऽपि तमस्तद्वत्। अत्र यथा तमःशब्दसाम्येऽपि तमस्त्वेन हेतुना आलोकविरोधित्वमनुमानं(तुं) न शक्यते। कुतः ? पुरुषान्धकारोभयनिष्ठस्य तमस्त्वस्यैकस्य वस्तुनोऽभावात्। अथ समुद्रो वह्निमान् पाण्डुद्रव्यात् इत्यत्र पाण्डुद्रव्यशब्दार्थः शङ्खोऽपि भवति धूमोऽपि भवति। तत्रोभयत्र शब्दसाम्येऽपि शङ्खधूमोभयनिष्ठस्य पाण्डुद्रव्यत्वस्य वस्तुनोऽप्येकस्याभावात् यथानुमितिर्न भवति तद्वत् पृथिवी इतरान्योन्याभाववतीत्यत्रापि। इत[र]मध्ये पृ(प्र)विष्टं जलादिकम्। अभावोऽपि चेतरभेदशब्देन जलाद्यन्योन्याभावोऽप्युच्यते अभावेन सह स्वरूपभेदोऽप्युच्यते। तथाप्यतिरिक्तजलाद्यन्योन्याभावपृथिवीस्वरूपात्मकाभावभेदोभयनिष्ठस्य [100 A] पाण्डुद्रव्यत्वस्यानुगतस्यैकस्याभावात् यथान्धकारतमःसंज्ञकपुरुषोभयनिष्ठस्यानुगतस्य तमस्त्वस्याभावात् तद्वत् इतरभिन्नत्वस्यानुगतस्याभावादनुमितिर्न स्यात्। तत्र तमस्त्वत्वं हेतुतावच्छेदकमनुगतं नास्ति अत्र तु साध्यता-वच्छेदकमितरभेदत्वावच्छेदकमनुगतं नास्ति [इ]त्येतावान् परं विशेषः। शङ्कामध्ये कस्यचित् समाधानान्तरं दूषयति - **भाव** इति। यथा घटः पटो न भवति इत्यत्र घटान्योन्याभावो यथा घटेऽतिरिक्तस्तद्वदभावोऽभावो न भवतीति अबाधितप्रतीतिबलादभावोऽन्योन्याभावोऽप्यतिरिक्त एव। अभावस्याप्यभाव इति केचित्, तेषां मतं दूषयति - **अप्रसिद्धान्तादिति** मूलम्। न केवलमपसिद्धान्तमात्रं युक्तिमप्याह - **अनतिप्रसक्तेति**। यथा घटवति घटात्यन्ताभावो नास्तीति प्रतीत्युपपत्तौ अभावस्यातिरिक्तान्योन्याभावकल्पने प्रमाणाभाव इति मूलार्थः। न चेत्यारभ्य पूर्वपक्षः। समाधत्ते - **इतरेति** मूलम्। तथा च पृथिव्यामतिरिक्तस्य जलान्योन्याभावस्य साधने पृथिवी

जलान्योन्याभाववती, पश्चादभावाद् भिद्यते पृथिवी इत्यभावेन सह रूपभेदः साधनीयः, ततः प्रथमतो जलादीनां त्रयोदशानामन्योन्याभावसाधनम् पश्चादनुमानानन्तरं पृथिवी अभावाद् भिद्यते इत्यभावेन सह स्वरूपभेदानुमानम्, तथा चाभावस्यातिरिक्तान्योन्याभावः इति। पृथिवी अभावाद् भिद्यते इति पाश्चात्यमभावभेदानुमानं भवत्येव। तथा चानुमानद्वयम्। पृथिवी जलादिभिन्ना इत्यनुमाने जलादिभेदः जलाद्यन्योन्याभावः साध्यः, पृथिवी अभावाद् भिद्यते इत्यत्राभावेन सह पृथिव्यां स्वरूपभेदः साध्यः। कोऽर्थः ? अभावस्वरूपमिति। स्वरूपद्वयमेवाभासते इत्यर्थः। एतदेव शङ्कोत्तराभ्यां विवृणोति। **न चैवमिति** मूलम्। **एवमिति** मूलम्। एवं शब्दार्थस्तु इतरभावो जलादिकम्, तथा जलादीनामन्योन्याभाव एव चेत् त्वया साध्यते इत्यर्थः। **अभावादिति** मूलम्। अभावप्रतियोगिकस्यातिरिक्तस्यान्योन्याभावस्याभावात् अभावादविवेको भेदज्ञानं तदवस्थमेव व्यतिरेक्यनुमानात् प्रागवस्थावदेवेत्याशङ्कार्थः। उत्तरयति - **तेनेति** मूलम्। न केवलं पृथिवी जलादित्रयोदशान्योन्याभाववती पृथिवीत्वात् इत्यनुमानमात्रेणैव सर्वेतरभेदसाधनं किन्तु भावानामयमितरभेदसाधनप्रकारः। **स्वरूपभेदस्येति** मूलम्। अभावेन सहेत्यर्थः। पृथिवी अभावाद् भिद्यते भावत्वात् जलवत् इति अन्वयिना अथवा पृथिवी अभावाद् भिद्यते पृथिवीत्वात् यत्र यत्र अभावभेदाभावस्तत्र पृथिवीत्वाभावो यथा अभावे इति व्यतिरेक्यनुमानान्तरा[त्] अभावेन सह पृथिव्यां स्वरूपभेदसाधनं सिद्धमिति मूलार्थः। **इतरभावेति** टीका। वक्ष्यमाणोपपत्त्या व्याचष्टे - **इतरेति**। इतरभावप्रतियोगिकतावदन्योन्याभावत्वेन जलादित्रयोदशान्योन्याभावत्वेनेत्यर्थः। तथा च पृथिवीत्वात् इत्यत्र जलादित्रयोदशान्योन्याभाववती पृथिवीत्वेन साध्यतायां त्रयोदशान्योन्याभावत्वावच्छिन्न इतरभेदः अभावेन सह स्वरूपभेदो न भवति। कुतः ? तस्याभावस्वरूपपृथिवीस्वरूपात्मकत्वात्। [100 B] तथा चानेनाभावाद् भेदः पृथिव्यां साधयितुं न शक्यते इति कृत्वा पुनरनुमानान्तरापेक्षा नास्तीत्यर्थः। पूर्वोक्तां यथाश्रुतेऽनुपपत्तिं प्रकाशयन्ति - **यदि चेत**। मूलकारेण यदुक्तं प्रथमतोऽतिरिक्ताभावान्योन्याभावसाधनं पश्चादभावेन सहोक्त-प्रकारेणानुमानान्तरेण भेदः साध्यते इति। **यदि चेति** मूलकारेण यदुक्तं प्रथमतोऽतिरिक्ताभावान्योन्याभावसाधनमिति तत्राप्यनुपपत्तिर्यथा एकेनाप्यनुमानेनोभयभेदः साधयितुं न शक्यते एव। तथाहि - पृथिवी पृथिवीतरभेदवती पृथिवीत्वात् इत्यत्र पृथिवी[तर]त्वरूपो यो धर्मः स जलादिषु वर्तते सोऽभावेऽपि वर्तते पृथिवीतरत्वात् तस्यापि। अतः पृथिवीतरत्वं भावाभावसाधारणो धर्मः। तथा च भावाभावसाधारणधर्मावच्छिन्नप्रतियो[गिताकयोः] अभावयोः भेदः। प्रतियोगि तु जलादिकम् अभावश्च। अधिकरणं पृथिवी। तथा च पृथिव्यां वर्तमानो यो जलादिकम् अभावश्च तदुभयप्रतियोगिकातिरिक्तोऽधिकरणप्रतियोगिस्वरूपातिरिक्तोऽस्त्येकेनाप्यनुमानेन सिद्ध्यति। अथवा पृथिवी जलाद्यन्योन्याभावोऽभावभेदश्चेत्येतदुभयवती। यथा पर्वतो वह्निधूमोभयवान् धूम-व्याप्यत्वात्। धूमव्याप्यस्य धूमसंयोगो महानसात् इत्यत्र यथा एकदैव समूहालम्बनरूपा वह्निधूमोभयानुमितिः

तद्वत् प्रकृतेऽपि पृथिवी अभावप्रतियोगिकस्वरूपभेदो जलाद्यन्योन्याभावश्चेति उभयवतीत्येकदैव उभयभेदयोः समूहालम्बनरूपा एकैवानुमितिर्भविष्यति, किमर्थं मूलकारेणानुमानद्वयम् [उक्तमित्यनु]पपत्तिः। एतत्समाधानं तु वक्ष्यमाणानुपपत्तीत्यादिनोक्तमेव। एतदेव टीकाकारः शङ्कोत्तराभ्यां विवृणोति - **नन्विति**। द्वितीये पक्षे पृथिवी इतरेभ्य इत्यत्र पृथिवीतरभेदत्वमनुगतम् अन्योन्याभावे जलान्योन्यभावेऽथवाऽभावेन सह स्वरूपभेदे एकमनुगतं नास्ति। तथा चाभावेन सह स्वरूपभेदो जलाद्यन्योन्याभावश्चेत्येतत् साधारणानुगतधर्माभावात् कथमभावभेदस्य जलादिभेदस्य चैकेनानुमानेनानुमितिः ? यथाऽयं तमोवान् प्रदेशविशेषवत्त्वात् इत्यत्रान्धकारपुरुषयोस्तमस्त्वेन रूपेणानु(ण नानु)मितिरुभयसाधारण्य(ण)तमस्त्वस्यानुगतस्याभावात् तद्वत् प्रकृतेऽपि पृथिवीतरभेदत्वं जलान्योन्याभावेऽथवाऽभावेन सह स्वरूपभेदेऽनुगतमेकं नास्ति अतः कथमेकानुमितिः ? तस्मात् सुष्ठूक्तम् एकानुमानं मूले तथा चानुपपत्तिः मूले नास्त्येव इति। नन्वित्यारभ्य चेत्पर्यन्तं शङ्कार्थः। समाधत्ते - **भावाभावेति**। यथा नीलघटपीतघटादिषु घटत्वमेकोऽनुगतो धर्मोऽस्ति इति कृत्वा नीलपीतनानाघटप्रतियोगिकघटत्वावच्छिन्नप्रतियोगितावच्छेदकमेक एवाभावः तद्वत् पृथिवीतरत्वं यो धर्मोऽस्ति स जलादिषु त्रयोदशसु भावेष्वपि वर्ततेऽथवाऽभावेष्वपि वर्तते, तथा च भावाभावसाधारणो धर्मः पृथिवीतरत्वं तदवच्छिन्नप्रतियोगिताकोऽप्येक एवाभावोऽतिरिक्तः साध्यते, तथा च भेदो भिन्नो जलादिभेदो भिन्न इत्येवं न साध्यते किन्तु उभयप्रतियोगिक एक एव भेदः, एकमेव चानुमानमिति नानुमानद्वयापेक्षा इत्युक्ता [101 A] अनुपपत्तिः समीचीनैवेति। एतदेवाह - **अतिरिक्तेति**। तथा च प्रतियोगितावच्छेदकभेदेनाभावभेदस्वीकारात्। यथा घटत्वावच्छिन्नप्रतियोगिताकोऽभाव एक एव तद्वत् भावाभाववतीपृथिवीतरत्वं यो धर्मस्तदवच्छिन्नप्रतियोगिताकोऽप्येक एवेति संक्षेपः। **अन्यथेति** टीका। यदि भावाभावसाधारणधर्मावच्छिन्नप्रतियोगिताकोऽतिरिक्तो[ऽ]भावो धर्मो यदि नाङ्गीक्रियते तदेत्यर्थः। इदं कार्यं प्रमेयत्वात् इत्यत्र कार्यं घटादिकमपि भवति ध्वंसोऽपि भवति, तथा च कार्यत्वं भावाभावसाधारणो धर्मः, यदि भावाभावसाधारणधर्मावच्छिन्नप्रतियोगिताकोऽभावोऽतिरिक्तश्चेन्न स्वीक्रियते तदा इदं कार्यं प्रमेयत्वात् इत्यनुमानं व्यभिचारि न स्यात्। कुतः ? यतो हि हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वं हि व्याप्तिर्यथा धूमसमानाधिकरणोऽत्यन्ताभावो घटात्यन्ताभावः, तस्य प्रतियोगितावच्छेदकं घटत्वमेव न तु वह्नित्वम्, पर्वतो धूमवान् वह्नेः इत्यत्र तु तन्नास्ति, वह्निसमानाधिकरणोऽत्यन्ताभावो धूमस्य, तत्प्रतियोगितावच्छेदकमेव धूमत्वम्, अतो न वह्नेः धूमव्याप्तिः घटते। प्रमेयत्वसमानाधिकरणो योऽत्यन्ताभावो घटादीनामेव। ननु कार्यत्वावच्छिन्नस्य कार्यत्वं हि भावाभावसाधारणो धर्मः, भावाभावसाधारणधर्मावच्छिन्नप्रतियोगिताकस्तु अतिरिक्तोऽभावो न स्वीक्रियते, कार्यत्वं तु भावाभावसाधारणो धर्म इति कृत्वा कार्यत्वावच्छिन्नप्रतियोगिताकोऽप्यतिरिक्तोऽभावो नास्ति, तथा च

प्रमेयत्वसमानाधिकरणस्त्वत्यन्ताभावः कार्यत्वावच्छिन्नस्य तु नास्त्येव किन्तु घटपटात्यन्ताभाव एव तस्य प्रतियोगितानवच्छेदकत्वं कार्यत्वं भवत्येवेति कृत्वा तत्र व्याप्तिः स्यादेव। एतदेवाह - **कार्यत्वस्येति**। उपसंहरति- **तस्मादिति**। **आ(अ)कामेनापीति**। यद्यपि अभावमात्रवृत्तिधर्मावच्छिन्नप्रतियोगिकोऽभावो नास्तीत्यकामनार्थः। भावाभावसाधारणो धर्मः कार्यत्वम्, तच्च प्रागभावप्रतियोगित्वम्, तच्च घटध्वंसादिसाधारणम्, तदवच्छिन्नप्रतियोगिताकोऽप्यतिरिक्तोऽभावोऽङ्गीकर्तव्य एव। अन्यथा कार्यत्वसाध्यकव्यभिचारिहेतोः प्रमेयत्वस्यापि कार्यत्वे व्याप्यत्वापत्तिः। यदि च कार्यत्वावच्छिन्नप्रतियोगिताकोऽतिरिक्तोऽभावोऽङ्गीक्रियते तदा प्रमेयत्वसमानाधिकरणोऽत्यन्ताभावः कार्यत्वावच्छिन्नात्यन्ताभाव एव। तत्प्रतियोगितावच्छेदकमेव कार्यत्वं जातमिति तस्य व्यभिचारित्वम्। इदमेव प्रकृते योजयति - **तथेहापीति**। इह पृथिवी इतरान्योन्याभाववती पृथिवीत्वात् इत्यत्र पृथिवीतरत्वं भावाभावसाधारणो धर्मः यतो हि पृथिवीतरत्वं भावेऽप्यभावेऽप्यस्तीति। तदवच्छिन्नान्योन्याभावस्त्वतिरिक्तो भवत्येवेत्यर्थः। तथा च भावाभावप्रतियोगिताकोऽतिरिक्तोऽभावोऽङ्गीक्रियते एव। तेनैकेनानुमानेनैव इतरभेदः साधयितुं शक्यते एवेति। अनुमानं व्यर्थम्, पृथिवीतरत्वमेव भावाभावसाधारणो धर्मो न भवतीत्याशङ्कते - **नन्विति** टीका। पृथिवीतरत्वं [101 B] पृथिवीत्वावच्छिन्नप्रतियोगिताकोऽन्योन्याभाव एव, स च जलादावधिकरणेऽतिरिक्तो वर्तते। अभावे पृथिव्यन्योन्याभावोऽतिरिक्तो नास्ति किन्तु अभावस्वरूपात्मक एव, तथा च कथं पृथिवीतरत्वं पृथिव्यन्योन्याभावरूपं भावाभावसाधारणो धर्म इत्याशङ्कार्थः। तथा च पृथिवीतरत्वं न भावाभावसाधारणो धर्मः। समाधत्ते - **जलादीति** टीका। यद्यपि पृथिवीतरत्वं भावाभावसाधारणो धर्मो मास्तु तथापि जलतेजोवाय्वाकाशकालदिगात्ममनोगुणकर्मसामान्यविशेषसमवायाभावा एतादृशसमूहालम्बनप्रतीतिविशेष्यत्वस्य भावाभावसाधारणधर्मावच्छिन्नप्रतियोगिताकस्यातिरिक्तस्यान्योन्याभावस्य सम्भवात् इत्यर्थः। तथा च तादृशसमूहालम्बनरूपप्रतीतिविशेष्यकत्वावच्छिन्नजलादित्रयोदशभेदाः पृथिव्यनुमानेन साधयितुं शक्यन्त एवेति भावः। पूर्वं जलादित्रयोदशान्योन्याभाव एव साध्यते, पश्चादभावेन सह स्वरूपभेदः साध्यते। एतस्मिन् पक्षे शङ्कते - **न चेति**। **अभावबहिर्भावपक्ष** इति टीका। यदि प्रथमं त्रयोदशान्योन्याभाव एव साध्यते पक्षे इत्यर्थः। पृथिवी जलादित्रयोदशान्योन्याभाववती पृथिवीत्वात् इत्यत्र जलादित्रयोदशान्योन्याभावोऽभावेऽपि वर्तते। ततो हेतोः पृथिवीत्वरूपस्य व्यावर्तनादसाधारण्यम्। हेतु[र]न्यत्र वर्तते तदान्वयित्वमेव स्यादित्याशङ्कार्थः। समाधत्ते - **तस्येति**। अभावस्य [स]पक्षत्वाप्रतिसन्धानदशायां व्यतिरेकित्वसम्भवात्। यथा पूर्वघटे इतरभेदस्य प्रसिद्धौ सत्यां घटे पृथिवीत्वस्य हेतोर्ज्ञानेऽन्वयित्वमेवेत्याशङ्क्य सपक्षत्वाप्रतिसन्धानदशायामेव व्यतिरेकित्वमुक्तम्। तथाभावे जलादित्रयोदशान्योन्याभावस्य निश्चयो न जातः तद्दशायां व्यतिरेकित्वसम्भवात्। पक्षान्तरमाह - **अभावस्येति** टीका। अभावाधिकरणकोऽतिरिक्तोऽभावो नास्ति कथं तस्य सपक्षत्वमित्यर्थः।

यदि च तथाप्रतीतिस्तदा स्वरूपमेव तत् नाभाव इति भावः । **यद्यपीति** टीका । पृथिवी अभावाद् भिद्यते पृथिवीत्वात् इत्यत्राभावभेदेऽनुगतं साध्यतावच्छेदकं नास्ति, अभावभेदस्तु पृथिव्यादिस्वरूपमेव । तथा चाननुगमः। पृथिवीत्वजलत्वादिकं साध्यतावच्छेदकं तदाऽभावभेदतावच्छेदकम्, तच्चाननुगतमेव, अभावभेदो हि साध्यम्, तच्च पृथिवीजलादिस्वरूपमेव। तथा च पृथिवीत्वं यदि साध्यतावच्छेदकं तदाऽभावभेदरूपे जले साध्ये तन्नास्तीति, यदि च जलत्वं तदाऽभावभेदलक्षणपृथिवीस्वरूपे साध्ये जलत्वं नास्ति। तथा च साध्यतावच्छेदकानामननुगतत्वात् साध्याननुगमः। अननुगम इत्युपलक्षणम्। अभावभेदो हि पृथिवीजलादिस्वरूपमेव । यदि च पृथिवीस्वरूपं साध्यते तदा तस्य सिद्धत्वात् सिद्धसाधनम् । यदि च जलस्वरूपं साध्यते तदा तस्य बाधितत्वात् तत्साधनं न सम्भवति इति बोध्यम् । समाधत्ते - **तथापीति** । अभावभिन्नत्वबुद्धिजननयोग्यत्वं पृथिवीजलादिसाधारणमनुगतं साध्यतावच्छेदकमस्ति इत्यभावभेदस्य (102 A) पृथिवीजलादिस्वरूपकृतं स्वरूपमेवाभावभेदः पृथिव्यां साध्यते इत्यर्थः । अत्राभावभिन्नत्वबुद्धिजननयोग्यत्वलक्षणेन साध्यतावच्छेदकस्याननुगतत्वेऽपि अभावभिन्नबुद्धिजननयोग्यत्वमनुगतमस्तीति नोक्तदोषः, तथा चाभावभिन्नबुद्धिजननयोग्यत्वलक्षणेन साध्यतावच्छेदकेनानुगतीकृतं पृथिव्यादिस्वरूपमभावभेदः पृथिव्यां साध्यते इत्यर्थः । अत्राभावभिन्नत्वबुद्धिजननयोग्यत्वलक्षणेन साध्यतावच्छेदकेन यदि पृथिव्यां पृथिवीस्वरूपं साध्यते तदा इदं साध्यम् अन्त्यावयविघटादिभिन्नं यत् परमाण्वाद्याकपालपर्यन्तं तत्र घटते, अन्त्यावयविनि घटादौ न घटते । कथम् ? यथा वह्नित्वेन रूपेण साध्यतावच्छेदकेन पर्वते यथा वह्निः साध्यते तथात्रापि अभावभिन्नबुद्धिजननयोग्यत्वलक्षणेन साध्यतावच्छेदकेन पृथिव्यामेवाभावभेदः साध्यते, तदाऽभावभेदो हि पृथिवीस्वरूपमेव । तथा च पृथिव्यां पृथिवीस्वरूपं पृथिव्यन्तरमन्यदस्तीति साध्यते इति पर्यवसन्नम् । तथा च यदि पृथिव्यामधिकरणे पृथिवीस्वरूपं चेत् साध्यते तदा परमाण्वारभ्य कपालपर्यन्तं घटते तत्र पृथिवीस्वरूपसत्त्वावयवः, परमाणुरूपपृथिव्या द्व्यणुकरूपम् एवमग्रे कपालपर्यन्तं तिष्ठतीति । तत्र पृथिवीस्वरूपं साधयितुं शक्यते, घटे तु अन्त्यावयविनि तत् साधयितुं न शक्यते घटे पृथिव्या(व्य)न्तरस्वरूपात् इत्याशङ्कार्थः । समाधत्ते - **घटादीति**। घटोऽभावभिन्न इत्यबाधिता प्रतीतिस्तिष्ठति तत्र घटेऽभावभेदः । पृथिवीत्वमतिरिक्तं यद्यपि नास्ति तथापि घटस्वरूपमेव घटे वर्तते, न चैवमात्माश्रय इति वाच्यम् । घटत्वेन रूपेण घटे घटस्य वृत्तौ आधारतावच्छेदकाऽऽधेयतावच्छेदकयोर्भेदाभावेनात्माश्रयदोषः तथा च यदि घटे घटत्वेन रूपेण वर्तते तदा आत्माश्रयदोषप्रसङ्गः । घटत्वेन रूपेण घटेऽभावभेदत्वेन रूपेण घटे घटवृत्तौ नात्माश्रय इत्यर्थः । विपक्षे बाधकमाह - **प्रतीतीति** । यदि घटेऽभावभेदो न स्यात् तदा घटोऽभावभिन्न इति प्रतीतिर्न स्यात् इत्यर्थः ।

**अन्ये तु पृथिवीत्वभिन्नधर्मात्यन्ताभाव एव साध्यः जलत्वादिप्रतियोगिकास्ता-**

**वन्तोऽत्यन्ताभावा वा तत्तदसाधारणतत्तद्धर्मात्यन्ताभावयोगो वा एते चाभावा जलत्वं न घटादौ घटादिजलात्यन्ताभाववदिति प्रत्यक्षादेः क्वचित् तत्तद्वैधर्म्यादेव प्रसिद्धा इति नाप्रसिद्धिः। तावतामभावानां वैशिष्ट्यं न प्रसिद्धमिति चेत्, किमेतावता, न हि तावद्वैशिष्ट्यमत्र साध्यते, किन्तु जलत्वादीनां यावन्तोऽभावा इह साध्यास्ते च तत्र तत्र प्रसिद्धा एव तावद्वैशिष्ट्यधीस्तु फलम् अन्यथा सिद्धसाधनात्, मिलितानामपि साध्यत्वे नाप्रसिद्धिः किञ्चिदेकधर्मावच्छेदो हि बलादिवन्मेलकार्थः, स च नासिद्धः।**

मतान्तरमाह - **अन्ये त्विति** मूलं संलग्नम्। तथा चैतन्मते इतरभेदो न साध्यः किन्तु पृथिव्यां पृथिवीत्वभिन्नधर्मात्यन्ताभाव एव साध्यः। अयमेकः पक्षः। पक्षान्तरमाह - **जलत्वादीति**। प्रथमे पक्षे पृथिवीत्वभिन्नधर्मात्यन्ताभावः एवैकं साध्यम्, अत्र जलत्वादयो ये ये नानाधर्मास्तदत्यन्ताभावाः साध्यास्तथा च जलत्वादिचतुर्दशधर्मात्यन्ताभावानां योगो ह्येक एव साध्य इति तृतीयः पक्षः। साध्यप्रसिद्धिमाह - **एते चेति**। पृथिवी पृथिवीत्वभिन्नधर्मात्यन्ताभाववती पृथिवीत्वात् इत्यत्र पृथिवीत्वभिन्नधर्मात्यन्ताभावप्रसिद्धिः घटादौ पृथिव्येकदेशे वर्तते यतो हि पृथिवीत्वभिन्ना धर्मा जलत्वादयस्तदत्यन्ताभावो घटे वर्तते। इति तत्र साध्यप्रसिद्धिरस्ति। एतदेव विवृणोति - **जलत्वमिति** मूलम्। जलत्वं न घटादौ घटादिकं वा [102 B] जलत्वात्यन्ताभाववत् इति प्रतीतिर्वैलक्षण्यात्। पृथिवीत्वभिन्नधर्मात्यन्ताभावो घट एव प्रसिद्ध इति साध्यप्रसिद्धिरित्यर्थः। इति प्रथमसाध्यप्रसिद्धिरुक्ता। द्वितीयसाध्याभिप्रायेण साध्यप्रसिद्धिमाह - **क्वचिदिति** मूलम्। **तत्तद्वैधर्म्यादिति**। जलत्वाद्यत्यन्ताभावो जलवैधर्म्यादेव तेजसि प्रसिद्धः, एवं तेजस्त्वात्यन्ताभावोऽपि तेजोवैधर्म्यात् जले प्रसिद्धः, इत्येवं त्रयोदशानामपि जलत्वादीनां धर्माणामत्यन्ताभावास्तेषु तेषु प्रसिद्धाः इति द्वितीयसाध्यप्रसिद्धिः। द्वितीयसाध्याभिप्रायेण मूले शङ्कते - **तावतामिति** मूलम्। तथा च तावतामभावानां वैशिष्ट्यं यद्यपि तत्र तत्र प्रसिद्धं तथाप्येकं [त]त्र न सिद्धं यतो जलत्वात्यन्ताभाववैशिष्ट्यं तेजसि विद्यते तेजस्त्वात्यन्ताभाववैशिष्ट्यं तेजसि नास्तीत्यादि बोध्यम्। तथा च समुदितात्यन्ताभाववैशिष्ट्यमप्रसिद्धमित्याशङ्का। समाधत्ते - **किमिति** मूलम्। नहि तावदत्यन्ताभावानां वैशिष्ट्यमत्र साध्यते सम्बन्धस्तावतामत्र न साध्यते किन्तु यावन्तोऽत्यन्ताभावाः साध्याः तावन्तोऽत्यन्ताभावाः अप्रसिद्धा एव यतो जले तेजोऽत्यन्ताभाव एवमन्यत्रापि। परमेकत्र सर्वे न साध्यन्ते, ते तु तत्र तत्र प्रसिद्धा एवेति भावः।

अथ टीका। **पृथिवीत्वासमानाधिकरणेति** टीका। पृथिवी पृथिवीत्वभिन्नधर्मात्यन्ताभाववती इत्यत्र पृथिवीत्वभिन्ना धर्मा जलत्वादयः तेषां यदि जलत्वत्वेन रूपेणात्यन्ताभावः साध्यते तदा प्रथमपक्षस्य द्वितीयेन

सहाभेदः। द्वितीयपक्षेऽपि जलत्वत्वेन रूपेणात्यन्ताभावः, अत्रापि जलत्वत्वेन रूपेणात्यन्ताभावः इत्यभेदः। यदि किञ्च पृथिवीत्वभिन्नधर्मत्वावच्छिन्नात्यन्ताभावः साध्यः तदा पृथिव्यां पृथिवीत्वभिन्नधर्मत्वावच्छिन्नो गन्ध एव तिष्ठतीति बाधः, इति मूले यथाश्रुतमेवानुपपत्त्याऽन्यथा व्याचष्टे - **पृथिवीत्वेति**। तथा च पृथिवीत्वेन सहासमानाधिकरणो यो धर्मः तस्य भावः पृथिवीत्वासमानाधिकरणधर्मत्वम्, तेन रूपेण पृथिवीत्वासमानाधिकरणधर्मत्वेन रूपेण पृथिवीत्वासमानाधिकरणधर्मात्यन्ताभावः साध्यः, गन्धस्तु पृथिवीत्वसमानाधिकरण इति न बाध इत्यर्थः। द्वितीयपक्षयोजनार्थं प्रथमकल्पे आभासं ददाति। **आकाशेति** टीका। तथा च आकाशः आकाशत्वासमानाधिकरणधर्मत्वावच्छिन्नात्यन्ताभाववान् शब्दवत्त्वात् इत्यत्र आकाशत्वासमानाधिकरणधर्मत्वावच्छिन्नात्यन्ताभावस्य आकाशैकदेशाभावेनाप्रसिद्ध्या प्रथमकल्पो न घटते इत्यस्वरसः **तत्तदिति**। यदि **योगो वा** इति अस्मिन् साध्ये तृतीयं साध्यं भिन्नं क्रियते तदा तावद्वैशिष्ट्यम् इत्यनेन ग्रन्थेन सह विरोधः। तृतीये मूले उक्तं योगो वा साध्य इति प्रथमत उक्तं न हि तावत् इत्यनेन ग्रन्थेन वैशिष्ट्यं योगरूपं न साध्यत इति पूर्वापरविरोध इत्यत आह - **पक्षतेति** टीका। तथा च मूलकारस्यायमेवाशयः यथा पर्वतीयवह्नित्वेन न साध्यता किन्तु वह्नित्वेन पर्वतीयवह्निसिद्धिस्तु फलम् तद्वत् प्रकृतेऽत्यन्ताभावयोगत्वेन न साध्यता किन्तु तत्तदत्यन्ताभावत्वेनैव सिद्धिस्तु पक्षधर्मताबलात् अत्यन्ताभावयोगस्यैवेति स्पष्टम्। मतान्तरमाह - **अत्रेति** टीका। **जलत्वादिति** टीका। तथा [103 A] च मध्यमे कल्पे जलत्वात्यन्ताभावा एव साध्याः। तृतीये तु यथा पृथिव्यां जलत्वात्यन्ताभावः साध्यते तद्वत् जलत्वनियतो धर्मः स्नेहस्तदत्यन्ताभावोऽपि साध्यते इति द्वितीयकल्पाद् भेदः। **न चाग्रिमग्रन्थविरोध इति वाच्यम्।** **योग** इति टीका। तथा च कल्पे न हीत्यादिम(मे)लग्रन्थः। **वैशिष्ट्यधीस्तु फलमिति ग्रन्थ(न्थे) वैशिष्ट्यं सम्बन्धरूपमुक्तम्**। तथा च वैशिष्ट्यं भिन्नं सम्बन्धमात्रम्। **योगपदार्थस्तु मेलकः**। अयं निष्कर्षः - प्रथमपक्षे पृथिवीत्वासमानाधिकरणधर्मत्वेन रूपेण पृथिवीत्वासमानाधिकरणधर्मात्यन्ताभाव एव साध्यः इत्येकः साध्यः, द्वितीये पक्षे जलत्वात्यन्ताभावस्तेजस्त्वात्यन्ताभाव एव साध्य इत्यादयो भिन्नाः साध्याः इति द्वितीयः पक्षः, तृतीये पक्षे जलत्वव्याप्यस्नेहादीनामपि येऽत्यन्ताभावास्तेषां योगो मेलकः पदार्थान्तरं तदेव साध्यमिति त्रयाणां पक्षाणां भेदः। द्वितीयपक्षाभिप्रायेण मूलकृतोच्यते तावदत्यन्ताभावानां वैशिष्ट्यधीस्तु फलमिति। यथा वह्नित्वेन रूपेण वह्नेः साध्यता वह्निसंसर्गधीस्तु फलं तद्वत् अत्र पूर्वं तावदत्यन्ताभावा एव साध्याः इति द्वितीयः, अत्यन्ताभावसंसर्गधीस्तु फलमित्यभिप्रायेण तावद्वैशिष्ट्यमिति मूलकारेणोक्तम्। **अन्यथेति** मूलम्। यदि तावदत्यन्ताभावसंसर्गधीर्न फलमित्यन्यथाशब्दार्थः तदा सिद्धसाधनम्, यथा वह्नित्वेन रूपेण वह्निसिद्धिर्न फलं किन्तु पर्वतवह्निसंसर्गधीः फलम्। वह्निमात्रज्ञानं यदि फलं तदा वह्निमात्रस्य महानसे सिद्धत्वेन सिद्धसाधनं स्यात्, तद्वत् प्रकृते जलत्वादीनामत्यन्ताभावज्ञानं न फलं किन्तु अत्यन्ता-

भावसंसर्गधीः पृथिव्यामस्ति इति तत्फलम्। जलत्वाद्यत्यन्ताभावानां तेषु तेजोवा[य्वा]द्यधिकरणेषु ज्ञातत्वेन सिद्धसाधनता स्यात्। तस्मात् तावदत्यन्ताभावा एव साध्याः। तावदत्यन्ताभावसंसर्गधीस्तु फलम्। अत्यन्ताभावत्वेन रूपेणात्यन्ताभावा जलत्वादीनां सिद्धा एव परं तेषां संसर्गधीः पृथिव्यां साध्यत इति न सिद्धसाधनमिति भावः। **मिलितानामि**ति मूलम्। मिलितानां त्रयोदशसंख्येत्यादिकं टीकायां व्यक्तम्, तथा च न साध्याप्रसिद्धिः। एतदेवाह - **किञ्चिदि**ति मूलम्। यथा वनं वृक्षमेलकः स च देशविशेषावच्छिन्ना यावन्तो वृक्षास्तावतां वनत्वम्, तद्वत् किञ्चिद्धर्मान्तरावच्छिन्नास्तावन्तोऽत्यन्ताभावा एवात्यन्ताभावमेलकः। यथा किञ्चिद्धर्मान्तरावच्छिन्नघटत्वपटत्वजातय एव जातिमेलकः तद्वत् प्रकृतेऽपि तावदत्यन्ताभावा एव किञ्चिद्धर्मान्तरावच्छिन्नास्तावन्तोऽत्यन्ताभावा एवात्यन्तभावमेलापकः। **स च नाप्रसिद्ध** इति मूलम्। कुतः? भिन्नभिन्नाधिकरणस्थघटपटौ द्वौ इति बुद्ध्या द्वित्वावच्छिन्नघटपटवत् भिन्नाधिकरणस्थानामत्यन्ताभावानामपेक्षाबुद्धिविशेषविषयत्वावच्छिन्नत्वसम्भवेन न मिलितसाध्याप्रसिद्धिः।

**न च हेतोरसाधारण्यम्, तावदभावयोगी ह्यत्र सपक्षो भवति न तु तदेकदेशकतिपयाभाववान् साध्यतायास्तावत्यपर्याप्तेः। यद्वा जलत्वात्यन्ताभावस्तेजस्त्वात्यन्ताभावाधिकरणवृत्तिः अत्यन्ताभावत्वात् घटत्वात्यन्ताभाववत्, एवमत्यन्ताभावान्तरसामानाधिकरण्यमपि तत्र साध्यमिति क्वाप्रसिद्धिः। किञ्चेतरे तावत् प्रसिद्धा एव ते च भेदप्रतियोगिनो मेयत्वादितीतरभेदोऽपि सुग्रह एव।**

अत्राशङ्कते - **न चे**ति मूलम्। निश्चितसाध्यवद्व्यावृत्त्याऽसाधारण्यं स्यात् इत्यर्थः। समाधत्ते - **तावदि**ति मूलम्। तदभावयोगी अत्र सपक्षः। न च तावदभावाः कस्मिंश्चिदप्यधिकरणे प्रसिद्धा येन ततः सपक्षात् पृथिवीत्वस्य हेतोर्व्यवृत्ता(त्या)ऽसाधारण्यं स्यात्। प्रसिद्धिस्तु भिन्नभिन्नाधिकरणस्थानामपि घटपटादीनामेते दश घटपटा इति यथा प्रसिद्धिः तद्वत् भिन्नभिन्नाधिकरणानामपि त्रयोदश एते अत्यन्ताभावा इति बुद्धिसम्भवात् साध्यप्रसिद्धिः। एतदेव विवृणोति - **न त्वि**ति मूलम्। तथा च [103 B] त्रयोदशत्वसङ्ख्यासमानशीलो यो धर्मस्तद्विशिष्टात्यन्ताभाववान् हि सपक्षो न तु कतिपयतदेकदेशाभाववान् सपक्षः। तथा च [अय]मर्थः - मिलिततावदत्यन्ताभाववान् हि सपक्षो न तु किञ्चिदभाववान्, मिलितत्वरूपा या साध्यता तस्यास्तावत्सु अत्यन्ताभावेषु विश्रान्तिः। एतदेवाह - **साध्यताया** इति मूलम्। मिलितास्तावदत्यन्ताभावास्तत्सिद्ध्यर्थं प्रकारान्तरमाह - **यद्वे**ति मूलम्। एवं हि जलत्वात्यन्ताभावतेजस्त्वात्यन्ताभावानामेकाधिकरणे वृत्तित्वं साधनीयम्। तथा चानेनानुमानेन एकाधिकरणेऽपि तावतामत्यन्ताभावानां प्रसिद्धिरागता, पुनरपि साध्यप्रसिद्ध्यर्थं प्रकारान्तरमाह-

*किञ्चेति मूलम्। इतरे जलादयः प्रसिद्धा एव ते च किञ्चिदधिकरणनिष्ठभेदप्रतियोगिनः प्रमेयत्वात् अनेनानुमानेन* सामान्यतः कुत्रापि अधिकरणे तावत्प्रतियोगिकभेदस्य सिद्धौ पृथिवीत्वेन रूपेण पृथिवीविशेष्यकेथ(त)रभेद-सिद्धिरनुमितिरनेनानुमानेन भविष्यत्येवेति।

अथ टीका। उत्तरग्रन्थयोजनार्थं मूले आभासं ददाति। **न त्विति** टीका। यदि जलत्वाद्यत्यन्ताभावः प्रत्येकं साध्यते तथा च पृथिवी जलत्वात्यन्ताभाववती पृथिवीत्वात् इत्यादि तथा च जलत्वात्यन्ताभावस्तेजसि सिद्धोऽस्ति ततः पृथिवीत्वं हेतुर्व्यावृत्तोऽस्ति इति कृत्वाऽसाधारण्यम्। साध्यता प्रत्येकपरिसमाप्ता। अनुमितिस्तु समूहालम्बनरूपा। यथा वह्नित्वेन रूपेण वह्नेः साध्यता, आलोकत्वेनालोकस्य साध्यता, धूमत्वेन रूपेण धूमस्य साध्यता, तेन रूपेण च व्याप्तिग्रहे वह्निधूमालोकवांश्चेति समूहालम्बनरूपाऽनुमितिर्जायते तथा प्रकृतेऽपि प्रत्ये-काभावसाध्यता प्रत्येकाभावस्यैव परिसमाप्ता अनुमितिस्तु समूहालम्बनरूपा यथा पृथिवी जलत्वात्यन्ता-भावेत्यारभ्य समवायत्वात्यन्ताभाववती इत्येवं समूहालम्बनरूपानुमितिसम्भवात्। तथा च प्रत्येकं चेत् साध्यता जलत्वात्यन्ताभावरूपा साध्यवतस्तेजसः सकाशात् पृथिवीत्वस्य हेतोः व्यावृत्त्याऽसाधारण्यं भवति। अथ मिलितत्रयोदशात्यन्ताभावकूटरूपं यद्येकत्र साध्यते तदा दूषणमाह - **अप्रसिद्धिरिति** टीका। एकत्राधिकरणे जलत्वादित्रयोदशात्यन्ताभावा न प्रसिद्धा जले जलत्वात्यन्ताभावाभावात् इत्यर्थः। **अव्यासज्येति** टीका। पूर्वं व्यासज्यवृत्तिप्रतियोगिताकवा(काभा)ववादिमतमवलम्ब्य साध्यप्रसिद्धिरुक्ता अधुना अव्यासज्यवृत्तिप्रतियोगि-ताकाभाववादिमतमवलम्ब्योच्यते इत्यर्थः। **त्रयोदशत्वेति**। अभावेषु जलत्वात्यन्ताभावपर्यन्तं तावत्सु अभावेषु त्रयोदशत्वसङ्ख्या नास्ति अभावे गुणानङ्गीकारात् इति कृत्वा व्याचष्टे - **त्रयोदशत्वेति** टीका। त्रयो-दशत्वसङ्ख्यया समानशीलः त्रयोदशसङ्ख्यासमानशीलः। त्रयोदशत्वसङ्ख्यया सह नियतः अपेक्षाबुद्धिविषय-त्वं धर्मस्तिष्ठत्येव। अयमेकोऽयमेक इत्यपेक्षाबुद्धिविषयत्वमभावेष्वपि वर्तते एवेति भावः। **एतेनेति** टीका। यतोऽव्यासज्यवृत्तिप्रतियोगिताकाभाववादिमतम्। पूर्वं त्रयोदशत्वरूपो व्यासज्यवृत्तिर्धर्मस्तदवच्छिन्नप्रतियोगिता-कोऽभाव इत्युक्तम्, अत्र तु जलत्वात्यन्ताभावस्तु जलत्वावच्छिन्नप्रतियोगिताक एवमन्येष्वपि। अयं व्यासज्य-वृत्तिः। [104 A] तथा चाव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताक एवायमभावः परं तु साध्यतावच्छेदको योऽ-पेक्षाबुद्धिविशेषविषयि(य)त्वं तदवच्छिन्ना(न्नो) अव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभाव एव साध्यते। अत्रानुपपत्तिं प्रकाशयन्ति केचन। अपेक्षाबुद्धिविशेषं विहाय विशिष्टास्ते तेऽत्यन्ताभावास्तेषु तेषु अधिकरणेषु प्रसिद्धास्तथा च तेषां जलादीनां विपक्षत्वं न स्यात्, सपक्षत्वं स्यात्। तथा च पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् इत्यत्र जलादीनां विपक्षत्वं न स्यात्। ततो जलादीनां विपक्षत्वसिद्धये एतादृशं साध्यं कर्तव्यं यथा ऐकाधिकरण्या-वच्छिन्नतादृशापेक्षाबुद्धिविषयत्वविशिष्टाभावानां साध्यता वक्तव्या। तथा च न जलादिषु ऐकाधिकरण्या-

वच्छिन्नतादृशापेक्षाबुद्धिविशेषविषयत्वविशिष्टाभावाः सिद्धाः। तथा च जलत्वात्यन्ताभावमारभ्य समवायात्यन्ताभावपर्यन्तं यावन्तोऽत्यन्ताभावास्तावन्त एकत्राधिकरणे न प्रसिद्धा ज(य)तो जलत्वे जलत्वात्यन्ताभावो नास्ति। एवं ते पृथिवीव्यतिरेकेणान्यत्र न प्रसिद्धा इति साध्याप्रसिद्धिर्दोषो भवति इति दूषणमेतेन निरस्तमित्यन्वयः। कथमित्यत आह - **व्यासज्येति**। अव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावानां साध्यानां साध्यतावच्छेदकं तु व्यासज्यवृत्तिधर्मोऽपेक्षाबुद्धिविशेषविषयत्वमेव यथाऽयं पर्वतो घटत्वावच्छिन्नप्रतियोगिताकाभावघ(प)टत्वावच्छिन्नप्रतियोगिताकाभावोभयवान्। अयमभावो न व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकः किन्तु व्यासज्यवृत्तिधर्मः उभयत्वरूपः साध्यतावच्छेदक एव, तथा च पटत्वाभाववत्यपि घटे पटत्वाभावसत्त्वेऽपि घटत्वाभाव-पटत्वाभावोभयं नास्तीति प्रतीत्या घटत्वावच्छिन्नप्रतियोगिताकाभाव-पटत्वावच्छिन्नप्रतियोगिताकाभावोभयवान् इत्यनुमाने घटस्य यथा विपक्षत्वं तथा प्रकृतेऽपि प्रतियोगितायां व्यासज्यवृत्तिधर्मोऽनवच्छेदकः। तथा च जलादौ तेजस्त्वात्यन्ताभावसत्त्वेऽपि त्रयोदशत्वसङ्ख्यानियततादृशापेक्षाबुद्धिविषयत्वेन रूपेण तादृशास्तावन्तोऽभावा न सन्तीति पूर्वोक्तदृष्टान्तप्रतीत्या जलस्य विपक्षत्वमुपपद्यत एवेत्यर्थः। एतदेवाह - **साध्यतावच्छेदकेति** टीका। तथा च व्यासज्यवृत्तिधर्मः पूर्वोक्तोऽपेक्षाबुद्धिविशेषविषयि(य)त्वं तेन रूपेण तावदत्यन्ताभावानां साध्यानां जलादिष्वसत्त्वेन जलादीनां विपक्षत्वमुपपद्यत एवेत्यर्थः। एतदेवाह - **तदेकदेशेति** टीका। जले एकस्य तेजस्त्वात्यन्ताभावसत्त्वेऽपि पूर्वोक्तेन रूपेण तेजस्त्वात्यन्ताभावो नास्तीति विपक्षत्वं तस्य युक्तमेवेत्यर्थः। अभावेषु व्यासज्यवृत्तिर्धर्मः साध्यतावच्छेदक एव न भवतीत्याशङ्कते - **न चेति** टीका। समाधत्ते - **अभावेति**। यदि त्रयोदशत्वसङ्ख्याव्याप्यः कश्चिद्धर्मश्चेदभावे नास्ति तदाऽभावे सङ्ख्या नास्तीति विशेषदर्शनवतो भावः। त्रयोदशेति तत्र सङ्ख्याभ्रमोऽपि न सम्भवति, अभावे सङ्ख्या नास्तीति विशेषदर्शनस्य प्रतिबन्धकस्य विद्यमानत्वात्। तथा चाभावास्त्रयोदशेति न सम्भवति, प्रतीतिर्निर्विषयिणी स्यात्, इयं प्रतीतिंस्तु सर्वानुभवसिद्धा। तथा च यद्यपि अभावेषु त्रयोदशत्वसङ्ख्या नास्ति तथापि [104 B] त्रयोदशत्वसङ्ख्यासमानशीलस्तादृशापेक्षाबुद्धिविशेषविषयत्वं प्रतीत्यालम्बनमवश्यं स्वीकार्यमेव। अत्राशङ्कते - **न चेति** टीका। तथा चेयं प्रतीतिरव्यासज्यधर्मविषयिण्येव न त्व(तु) व्यासज्यवृत्तिधर्मविषयिणी यतोऽभावास्त्रयोदश इति बुद्धौ अव्यासज्यवृत्तिः प्रमेयत्वादिः कश्चिद्धर्मो भासते न तु व्यासज्यवृत्तिस्त्रयोदशत्वादिरित्याशङ्कार्थः। समाधत्ते - **अव्यासज्येति**। यदि अभावास्त्रयोदश इतीयं प्रतीतिरव्यासज्यवृत्तिधर्ममात्रविषयिणी तदाऽव्याज्यवृत्तिधर्मस्य प्रमेयत्वादेः प्रत्येकाधिकरणे एकस्मिन्नप्यभावे सत्त्वेन तत्रापि त्रयोदशत्वव्यवहारो भवेत् तथा च यथा एकत्र घटे द्वाविति प्रतीतिर्न भवति तद्वत् एकस्मिन्नभावे त्रयोदशेति बुद्धिर्न भवत्येव, यतस्त्रयोदशत्वसङ्ख्या तत्र नास्ति। तथा च [अ]भावास्त्रयोदशेति प्रतीतेः किञ्चिदालम्बनमवश्यं वाच्यम्। तत्तु पूर्वोक्तापेक्षाबुद्धिविशेषविषयत्वं व्यासज्यवृत्तिधर्म एव स्वीकार्यः।

एतदेव व्यतिरेके(क)दृष्टान्तेन विवृणोति - **एकत्रे**ति टीका। यथा एकत्र घटे घट इति प्रतीतिर्जायते तद्वत् एकत्र अभावे त्रयोदशाभावा इति प्रतीतिर्न जायते इत्यर्थः। जलादीनां विपक्षत्वं प्रमाणयति - **अत एवे**ति टीका। यत एव जलादीनां विपक्षत्वम् अत एव जले तेजसि वा न त्रयोदशाभवा इति त्रयोदशत्वसङ्ख्यानियतापेक्षाबुद्धिविशेष-विषयत्वेन रूपेण तावन्तोऽत्यन्ताभावा ये साध्यभूतास्ते जलादौ न सन्ति जले जलत्वाभावाभावात् अतो जलादीनां विपक्षत्वं युक्तमेवेत्यर्थः। उपसंहरति - **तस्मादि**ति टीका। **अकामेनापी**ति टीका। यद्यप्यभावेषु त्रयोदशत्वसङ्ख्या नास्ति तथापि त्रयोदशत्वसङ्ख्यासमनियतस्तथाविधापेक्षाबुद्धिविशेषविषयत्वरूपो धर्मोऽभ्युपेय एवेत्यर्थः। एतावता अपेक्षाबुद्धिविशेषविषयत्वेन रूपेण तावन्तोऽत्यन्ताभावा यदि व्यतिरेकिणा साध्यन्ते तदा निरधिकरणिका साध्यप्रसिद्धिः सम्भवति, जलादीनां विपक्षत्वं सिद्धम्। **साध्यते**ति टीका। तावच्छब्दार्थमाह - **व्यासज्ये**ति टीका। तथा च व्यासज्यवृत्तिधर्मापेक्षेत्यादिरुक्तस्तदवच्छिन्ना या साध्यता सा यावत्सु व्यासज्यवृत्तिधर्मः परिसमाप्तः तावत्स्वेव सा साध्यता परिसमाप्ता इत्यर्थः। उत्तरग्रन्थोपयोगार्थमाह - **ऐकाधिकरण्ये**ति टीका। अयमर्थः - भवतु ऐकाधिकरण्यावच्छिन्नजलत्वात्यन्ताभावादारभ्य समवायत्वा-त्यन्ताभावपर्यन्ते वनादिवत् एकदेशावच्छिन्ना अनेकवृक्षा एव मेलकः पदार्थः तथापि नाप्रसिद्धिरित्यर्थः। **इतरे**ति टीका। यथाश्रुतो हेतुर्वक्ष्यमाणः व्यभिचारि(री)ति अन्यथा व्याचष्टे - **इतरे**ति। इतरनिरूपणेनाधीनं निरूपणं यस्य एवं स इतरनिरूपणाधीननिरूपणक(कः),तेनाविशेषिता प्रतियोगिता यस्य एवंभूत इतरेत्यादिः, एवंभूतश्चासावत्यन्ताभावश्च तत्त्वादित्यर्थः। उदाहरणयोजना यथा - पक्षे जलत्वात्यन्ताभावेऽयं हेतुर्वर्तते यथा जलत्वम् इतरनिरूपणाधीननिरूपणकेन वस्तुना विशेषितं न भवति इति कृत्वा इतरनिरूपणाधीननिरूपणा-विशेषितं प्रतियोगि जलत्वं भवति, तत् जलत्वं जलत्वात्यन्ताभावस्य प्रतियोगि भवत्येवेति। जलत्वात्यन्ता-भावे पक्षेऽयं हेतुर्वर्तत एव। एतद्व्याख्यायां बीजमाह। [104' A[1]] - **तेने**ति टीका। अयमर्थः - यदि अत्यन्ताभावत्वात् इत्येव हेतुः क्रियते तदा यत्र यत्रात्यन्ताभावत्वं तत्र तत्र तेजस्त्वात्यन्ताभावाधिकरण-वृत्तित्वमेवं नास्ति, तेजोऽन्यप्रमेयत्वात्यन्ताभावस्तु तेजोमात्रवृत्तिः तस्य तेजस्त्वात्यन्ताभावाधिकरणवृत्तित्वं नास्ति तेजोभिन्ने पृथिव्यादौ तेजस्त्वात्यन्ताभावाधिकरणे तेजोऽन्यप्रमेयत्वात्यन्ताभावस्यावृत्तेरिति व्यभिचार(रः) विवक्षितव्याख्याने च स न भवति। तथा तेजोऽन्यप्रमेयत्वात्यन्ताभावस्य प्रमेयत्वं प्रतियोगि, तत् इतरनिरूपणा-धीननिरूपणं यत् तेजोऽन्यत्वं तेन विशेषितमेवेति कृत्वा इतरनिरूपणाधीननिरूपणकाविशेषितं प्रतियोगिकत्वं तेजोऽन्यप्रमेयत्वात्यन्ताभावे नास्तीति यथोक्तव्याख्याने न व्यभिचारः। अत्र व्यभिचारवारणे मतान्तराभिमतं व्याख्यानं दूषयति - **यत्त्वि**ति। तथा च तेजोऽन्यप्रमेयत्वात्यन्ताभावेऽभावाविशेषितप्रतियोगिकात्यन्ताभावत्वमेव

1. No. 104 is given to two folios.

नास्ति। तेजोऽन्यप्रमेयत्वात्यन्ताभावस्य प्रतियोगि यत् प्रमेयत्वं तेजोऽन्येन तेजोऽन्योन्याभावेन विशेषितमेव। अयं हेतुर्जलत्वात्यन्ताभावे पक्षे तु वर्तते एवेति कथं जलत्वात्यन्ताभावस्य प्रतियोगि जलत्वं तत् अभावेन न विशेषितमिति वर्णयन्ति केचित्। **तन्नेति** दूषयति। तथापि एतादृशज्ञानविशेष्यत्वाभावे व्यभिचारः। तत् ज्ञानं कीदृशमित्यत आह - **तेजोऽन्येति** टीका। तथा च तेजोऽन्यत् प्रमेयम् इत्याकारकं यद् ज्ञानं तादृशज्ञानविशेष्यत्वाभावे व्यभिचारः। कथम् ? अत्र प्रतियोगि ज्ञानविशेष्यत्वं तच्चाभावेन न विशेषितं किन्तु यथा घटाभावज्ञाने सत्येव घटाभावनिरूपणं तथा तेजोऽन्यत्वज्ञाने तेजोऽन्यप्रमेयत्वं तेन ज्ञानं विशेष्यत्वरूपं यत्प्रतियोगि तन्निरूप्यते न तु ज्ञानविशेष्यत्वरूपः प्रतियोगी अभावेन विशेषितः, तथा च तव अभावाविशेषितप्रतियोगिकाभावत्वं हेतुः तादृशज्ञानविशेष्यत्वाभावे व्यभिचार्येव। प्रतियोग्यां(ग्यं)शेऽभावस्याप्रवेशेनाभावाविशेषितप्रतियोगिकात्यन्ताभावत्वरूपहेतुसत्त्वात् व्यभिचारो भवत्येव। मदीये हेतौ न व्यभिचारः। तेजोऽन्यप्रमेयमिति ज्ञानस्य यन्निरूपणं तत् तेजोऽन्यत्वलक्षणीयभावनिरूपणेन विना न सम्भवतीति मदीयविवक्षायामतो न व्यभिचारः। अन्यकृतं व्याख्यान्तरं दूषयति - **तेजोमात्रेति**। जलत्वात्यन्ताभावस्तेजस्त्वात्यन्ताभावाधिकरणवृत्तिः अत्यन्ताभावत्वात् इत्यस्य व्याख्यानं तेजोमात्रावृत्त्यत्यन्ताभावत्वात् घटत्वात्यन्ताभाववत्। अर्थः - यथा तेजोमात्रेऽवृत्तिर्योऽत्यन्ताभावस्तत्त्वात्। तथा च पूर्वोक्ततेजोऽन्यप्रमेयत्वात्यन्ताभावे न व्यभिचारः। कथम् ? यतस्तेजोऽन्यप्रमेयत्वात्यन्ताभावस्तु तेजोमात्रवृत्तिरेवेति न व्यभिचारः जलत्वात्यन्ताभावोऽपि तेजोमात्रवृत्त्यत्यन्ताभावो [न] भवत्येव वाय्वादावपि तस्य सत्त्वात् इत्यर्थः। **किञ्चेति** इति टीका। ननु मूलकारेण **इतरे तावत् प्रसिद्धा एव** इत्यनेन साध्यप्रसिद्धिरुक्ता, तथा च यत्राधिकरणे इतरभेदः प्रसिद्धः स एव सपक्षस्तत्र पृथिवीत्वरूपहेतुसत्त्वेऽन्वयित्वम्, ततो हेतुव्यावृत्तावसाधारण्यमित्यत आह - **अत्रेति** टीका। तथा च जलादिभेदः प्रसिद्धो वर्तते परं निरधिकरणः प्रसिद्धः, ततो यदि जलभेदस्य यद्यधिकरणे प्रसिद्धिः स्यात् तदा सपक्षः स्यात् निरधिकरणा यतः साध्यप्रसिद्धिः, अतो हि सपक्षाभावान्नान्वयित्वासाधारण्ये इत्यर्थः। ननु निरधिकरणसमुदितभेदप्रसिद्ध्या यदि समुदितभेदसाधनं तदा प्रत्येकभेदस्य जलादिभेदस्यापि निरधिकरणैव प्रसिद्धिरस्तु [104' B] जलभेदप्रतियोगि अत्यन्ताभावप्रतियोगित्वादित्येतावतैव जलभेदस्य निरधिकरणस्य प्रसिद्ध्या प्रत्येकव्याप्तिभिः यथा पृथिवी जलाद् भिद्यते पृथिवी तेजसो भिद्यते इत्यादि प्रत्येकव्याप्तिभिः प्रत्येकजलादिभेदाः साधयितुं शक्यन्त एव। कुतः समुदितभेदसाधनमित्यत आह - **प्रत्येकेति**। तथा च यदि निरधिकरणा जलभेदप्रतियोगीत्यादिरीत्या जलादिभेदाः प्रसिद्धाः तदा प्रत्येकव्याप्तिभिरपि प्रत्येकभेदाः साधयितुं शक्यन्त एवेति इष्टापत्त्या परिहरति - **नासाधारण्यमिति** टीका। एकत्राधिकरणे साध्यप्रसिद्धेरभावात् निरधिकरणैव यतः साध्यप्रसिद्धिरिति ततो यदि अधिकरणे साध्यप्रसिद्धिस्ततो हेतुव्यावृत्त्याऽसाधारण्यं स्यात्, न च तथेति भावः।

**ननु पृथिवी नेतरभेदवती गुरुत्वादिभ्यो जलवदिति प्रतिरोध इति चेत् । न । इतरभेद-निषेधो हीतराभेदः न तु तेजःप्रभृत्यभेदः जल इति दृष्टान्तस्य साध्यवैकल्यात् चतुर्दशा-भेदानां चैकत्र विरोधेनासम्भवात् चतुर्दशभेदानां चैकत्र वृत्तौ न विरोधः । यत्तु साध्यप्रसिद्धौ पृथिवी इतरभिन्ना तत्साध्याधिकरण-पृथिव्यन्यतरत्वात् तदधिकरणवत् पृथिव्यां तत् साध्यमन्वयिन एव सेत्स्यतीति, तन्न, अन्यतरत्वस्यालिङ्गत्वादित्युक्तत्वात्, लिङ्गत्वे वा जलादावपि तत्सिद्धिप्रसङ्गात् । एवं तर्हि पृथिवी जलं पृथिवीत्वात् यन्न जलं तन्न पृथिवी यथा तेज इति सत्प्रतिपक्षोऽस्त्विति चेत् । न । अजलस्य घटादेः प्रत्यक्षत एव पृथिवीत्व-निश्चये व्यतिरेकव्यभिचारादस्य न्यूनत्वात् तदनवधारणे तु सत्प्रतिपक्षत्वमिष्टमेव ।**

अथ सत्प्रतिपक्षं मूले शङ्कते - **नन्विति** मूलम् । पृथिवी नेतरभेदवती गुरुत्वात् जलवत् यत्र गुरुत्वं न तत्र जलभेदः यथा जले इति सत्प्रतिपक्षोऽनुमानम् । प्रतिरोधः सत्प्रतिपक्ष इत्यर्थः । समाधत्ते - **इतरेति** मूलम् । सत्प्रतिपक्षे इतरभेदनिषेधो जलादिभेदनिषेधः । जलादिभेदनिषेधो हि जलादि[अ]भेदः । तथा च पृथिव्यां जलाद्यभेदः साध्यते । न हि जले दृष्टान्ते जलादीनां तेजःप्रभृतीनामभेदः सम्भवति, दृष्टान्ते साध्यवैकल्यात् । एतदेवाह - **न चेति** मूलम् । एतदेव विवृणोति - **चतुर्दशेति** । चतुर्दशत्वं जलेत्यारभ्याभावपर्यन्तं तथा च यद्यपि जले जलाभेदः सम्भवति तथापि न तेजोवाय्वादीनामभेदः सिद्ध्यति, तेषां जलभिन्नत्वात् । **एकत्रेति** मूलम् । एकत्राधिकरणे जलाभेदतेजोऽभेदयोरभावात् । तथा च जले जलाभेदः सम्भवति परं तेजोऽभेदो नास्ति । ननु चतुर्दश(शा)भेदाश्चेत् विरुद्धास्तदा चतुर्दशभेदा अपि परस्परं विरुद्धास्तथा च कथं पृथिव्यां चतुर्दशभेदानां परस्परविरुद्धानामनुमितिरित्यत आह - **चतुर्दशभेदानामिति** मूलम् । तथा चतुर्दशानां येऽभेदास्ते जलत्वतेजस्त्व-वायुत्वाद्यात्मकाः जलत्वतेजस्त्ववायुत्वादीनां गोत्वाश्वत्वादिवत् विरोधात् नैकत्राधिकरणे विद्यमानत्वम् । चतुर्दशभेदा अन्योन्याभावरूपाः, तेषां तु पृथिवीवृत्तौ किमपि बाधकं नास्तीति कृत्वा पृथिव्यां चतुर्दशभेदाः साधयितुं शक्यन्त एवेत्यर्थः । अथेतरभेदरूपसाध्यप्रसिद्ध्यर्थमेव मतान्तरमाशङ्कते - **यत्त्विति** मूलम् । इतर-भेदानुमानं हि न व्यतिरेकिणा किन्तु अन्वयिनैव, तद्यथा पूर्वोक्तरीत्या इतरभेदरूपसाध्यप्रसिद्धौ सत्यामन्वय्येवा-नुमानम् । यथा पृथिवी इतरेभ्यो भिद्यते, हेतुर्यथा पृथिवी अथ च यत्रेतरभेदः प्रसिद्धः तदधिकरणान्यत्वात् । यत्र यत्र पृथिवी तदधिकरणान्यतरत्वं तत्र तत्र इतरभेदः, यथा तदधिकरणं यत्र इतरभेदः प्रसिद्धः तदधिकरणान्यतरत्वात् । यथा पर्वतो वह्निमान् वह्न्यधिकरणं यन्महानसं पर्वतश्च एतदन्यतरत्वात् । अत्र यथा वह्न्यधिकरणं प्रसिद्धं महानसं स च दृष्टान्तः तद्वत् यत्र साध्यम् इतरभेदो हि प्रसिद्धस्तदधिकरणपृथिव्यन्यतरत्वात् इत्यन्वयिनैवेतरभेदसिद्धिः

मूलशङ्कार्थः। दूषयति - **अन्यतरत्वस्येति** मूलम्। यथा पर्वतो [105 A] वह्निमान् धूमालोकान्यान्यत्वात्, अत्र धूमालोकान्यान्यत्वं न लिङ्गं न वा लिङ्गतावच्छेदकं गौरवात्, लाघवात् धूमत्वमेव व्याप्यतावच्छेदकम्, तदा(था) प्रकृते तदधिकरणेत्यत्र पृथिवीत्वमेव हेतुतावच्छेदकं लाघवात्। न तु विशिष्टं हेतुतावच्छेदकं गौरवात्। अत एवाह - **अलिङ्गत्वमिति** मूले। विशिष्टं न लिङ्गं किन्तु पृथिवीत्वमात्रमेव लिङ्गमिति भावः। ननु गुरुभूतमपि भवतु लिङ्गं यथा गौरितरेभ्यो भिद्यते सास्नावत्त्वात् इत्यत्र गोत्वापेक्षया सास्नावत्त्वस्य गुरुत्वात् [वि]शिष्टेन इति अस्य हेतुत्वं वर्तत एवेति। न च यदि गुरुभूतधर्मावच्छेदेनापि व्याप्तिस्तदा पर्वतो वह्निमान् नीलधूमात् इत्यत्रापि नीलहेतुकमप्यनुमानं स्यादिति वाच्यम् स्वार्थानुमाने इष्टापत्तेः, नीलधूमस्यापि स्वार्थानुमाने व्याप्यत्वमेव, यत्र नीलधूमस्तत्र वह्निरिति परार्थानुमाने तु नीलपदमधिकमिति वादिना निगृह्यते इत्यस्वरसादाह - **लिङ्गत्वे वेति** मूलम्। तथा चैतादृशमनुमानमनुकूलतर्कशून्यं न संभवति, यथा पृथिव्यामितरभेदाभावे पृथिवीत्वं न स्यात् पृथिवीत्वस्य जलादिवैधर्म्यरूपत्वात् एवमनुकूलतर्कोऽस्ति। प्रकृते तु पक्षसपक्षान्यतरत्वादितिवदनुकूलतर्को नास्ति। यथा इतरभेदाभावे साध्याधिकरणपृथिव्यन्यतरत्वं न स्यादिति वक्तुं न शक्यते, यथा वह्न्यभावे धूमो न स्यादिति वक्तुं शक्यते तत्प्रयोजककार्यकारणभावस्य विद्यमानत्वात्, परं वह्न्यभावे पाषाणवत्त्वं न स्यादिति वक्तुं न शक्यते तत्प्रयोजककार्यकारणभावादीनां विरहात्। प्रकृते च यथा इतरभेदाभावे हेतुर्न स्यात् इति वक्तुं [न] शक्यते प्रयोजकाभावादित्यर्थः। पुनः सत्प्रतिपक्षान्तरं शङ्कते - **एवमिति** मूलम्। यदि पृथिवीत्वेनेतरभेदानुमानं तदा पृथिवी जलं पृथिवीत्वात् इति पृथिवीत्वेन जलत्वानुमानमपि स्यात् यथा यत्र जलत्वाभावस्तत्र पृथिवीत्वाभावः, तथा [पृथिवी] तेजः। तथा च पृथिवीत्वेन यथा प्रत्येकमितरभेदानुमानं तथा प्रत्येकमितरत्वानुमानमपि स्यात्। यथा पृथिवी तेजः पृथिवीत्वात् इत्यादिकमपि स्यात्, व्यतिरेकसहचारेण तुल्योपस्थितिकत्वादित्याशङ्कार्थः। समाधत्ते - **अजलस्येति** मूलम्। तथा चाजलस्य घटादेः प्रत्यक्षप्रमाणेन पृथिवीत्वनिश्चये जलत्वादीनां च व्यतिरेकनिर्णये व्यभिचारस्य स्फुटत्वेन दुर्बलत्वेन सत्प्रतिपक्षत्वाभावात्। एतदेवाह - **पृथिवीत्वेति**। तथा च व्यभिचारात् न्यूनत्वमिति तुल्योपस्थितिकत्वाभावान्न सत्प्रतिपक्षत्वम्। ननु व्यभिचारास्फुरणदशायां सत्प्रतिपक्षोऽस्तु इत्यत आह - **तदनवतारे चेति**। यदा व्यभिचारो न स्फुरितस्तदा सत्प्रतिपक्षत्वमिष्टमेवेत्यत एव [105 B] सत्प्रतिपक्षस्य दशाविशेषे व्यभिचारास्फुरणदशायामेव दोषत्वमित्यर्थः।

अथ टीका। उत्तरग्रन्थयोजनार्थमाभासमाह - **नन्विति** टीका। यथा मूलकारेणोक्तं पृथिवी पक्षो जलाद्यभिन्ना गुरुत्वात् इत्यत्र पृथिव्यां जलाद्यभेदः साधनीयः, स चाभेदः साधयितुं न शक्यते, तथापि गुरुत्वेन प्रत्येका[भेदसाध्ये] कुतो दृष्टान्तः जलम्। तत्र जलतेजःप्रभृतीनामभेदाभावादिति मूलकारेण सत्प्रतिपक्षो दूषितः। तच्चायुक्तम्। कुतः ? यद्यपि गुरुत्वेन जलतेजःप्रभृत्यभेदः साधयितुं न शक्यते तथापि गुरुत्वेन प्रत्येकाभेदस्तु साधयितुं शक्यत

एव यथा पृथिवी जलाभिन्ना गुरुत्वात् इत्यनेन जलाभेदमात्रं सिद्धम्, एवं लिङ्गान्तरेण तेजसोऽप्यभेदः साधनीयः यथा पृथिवी तेजसोऽभिन्ना जलान्यत्वे सति शुक्लरूपत्वात् इत्यनेन तेजसोऽप्यभेदः साधनीय एवेत्यर्थः। एतदेवाह - **गुरुत्वेने**ति टीका। **लिङ्गान्तरैरि**ति टीका। पृथिवी तेजसोऽभिन्ना जलान्यत्वे सति शुक्लरूपत्वात्, एवं पृथिवी वाय्वभिन्ना शीतोष्णस्पर्शान्यस्पर्शवत्त्वात् इत्यादिना तावन्तोऽभेदाः प्रत्येकं साधनीयाः। दूषणान्तरमप्याहं - **किञ्चे**ति। मूलकृतोक्तम् इतराभेदसङ्गतम्। कुतः ? यत इतरभेदनिषेधो हि इतराभेदः। **किमि**ति। स च जलत्वतेजस्त्वाद्यात्मकः। ततो जलत्वतेजस्त्वादीनि तु एकत्राधिकरणे साधयितुं न शक्यन्ते परस्परं विरुद्धत्वात् इयु(त्यु)क्तं तदप्यसङ्गतम्। कुतः ? यत इतरभेदनिषेधो न इतराभेदः किन्तु भिन्न एव, स चान्यतराभावेऽपि सम्भवत्येव। यथा घटवति भूतले पटव्यतिरेकेण घटपटोभयत्वावच्छिन्नाभावः तद्वत् जलादिषु यद्यपि जलभेदो नास्ति तथापि जलभेदतेजोभेदत्वावच्छिन्नाभावो भविष्यत्येव। तथा चेतरभेदस्य निषेधो व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताको जलेऽपि जलतेजोवाय्वादिभेदत्वावच्छिन्नभेदाभावो जले वर्तत एव हेतुरपि तत्र वर्तत एवेत्यन्वयव्याप्त्या चतुर्दशभेदाभावः पृथिव्यां साधयितुं शक्यत एवेत्येतदेवाह - **अन्यतरे**ति। जले यद्यपि जलभेदो नास्ति तथापि जलभेदतेजोभेदादीनां व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताको जले वर्तत एवेति। अत्रैव दृष्टान्तमाह - **एकसत्त्वेऽपी**ति। यथा एकस्मिन् घटे सत्यपि पटाभावात् द्वयमिह नास्तीति प्रतीत्या द्वित्वावच्छिन्नोऽभावोऽस्ति तद्वत् प्रकृतेऽपि स जलादिसमुदितचतुर्दशभेदत्वावच्छिन्नोऽभावोऽस्त्येवेत्यर्थः। ननु व्यासज्यवृत्तिधर्मावच्छिन्नाभावो **नव्यै**र्न स्वीक्रियते एवेत्यत आह - **अन्यथे**ति। यदि व्यासज्यवृत्तिधर्मावच्छिन्नाभावो न स्वीक्रियते तदा पूर्वं पृथिवी इतरेभ्यो भिद्यते [106 A] इत्यत्र चतुर्दशभेदत्वावच्छिन्नभेदाभावमादाय जले यत् विपक्षमुपपादितं तत् न स्यादित्यर्थः। **प्रत्यक्षे**ति टीका। घटपटादिरूपा पृथिवी न जलं नापि तेज इत्यादि प्रत्येकं भेदस्य पक्षे घटपटादिरूपपृथिव्यां निश्चयेन चतुर्दशाभेदसाधकं यदनुमानम् इदं चतुर्दशाभिन्नं पृथिवीत्वात् इत्यनुमानस्य बाधितत्वान्न सत्प्रतिपक्षत्वमिति भावः। ननु जलेत्यारभ्य समवायपर्यन्तं त्रयोदश पदार्थाः, कथं मूलकारेणोच्यते चतुर्दशेत्यत आह - **अभावेऽपी**ति टीका। यद्यपि जलेत्यारभ्य समवायपर्यन्तं त्रयोदशैव तथाप्यभावमादाय चतुर्दशत्वं बोध्यम्। एतावता चतुर्दशभेदसाधकानुमानस्य किमनुकूलमुक्तमित्यत आह - **प्रमाणसिद्धे**ति टीका। तथा च प्रमाणसिद्धो यः प्रत्येकं चतुर्दशभेदो घटपटादिरूपा पृथिवी न जलं न तेज इत्यादिरूपस्तथा चायमभेदोऽनुकूलं बलं चतुर्दशभेदसाधकानुमानस्य ज्ञेयमित्यर्थः। **लिङ्गत्वे वेती**ति टीका। जलं जलाद् भिद्यते जलभेदाधिकरणान्यतरत्वात्, यत्र यत्र जलभेदाधिकरणान्यतरत्वं तत्र तत्र जलभेदो जलभेदाधिकरणवत्। तथा च अनुकूलतर्कशून्यमनुमानमात्रं चेत् साधकं तदा इदमप्यनुमानं जले जलसाधकं स्यादिति भावः। अत्राशङ्कते - **यद्यपी**ति टीका। तथा च जलं पृथिवीतरजलादिभेदवत् पृथिवीतरजलभेदाधिकरणजलान्यतरत्वात् जलभेदाधिकरणवत्। जलान्यतरत्वादित्युच्यमाने दृष्टान्तासङ्गतिः। केन

सहान्यतरत्वमित्यत उक्तं जलभेदाधिकरणेति । तथापि पृथिवीतरेति पदं हेतुमध्ये प्रविष्टमेव नास्ति किन्तु साध्यशरीरं भवतीति स्वतन्त्रं हेतौ विशेषणम् । तथा च जलमित्यनुमानं बाधादेव तत्र वर्तते जले जलभेदस्य बाधितत्वात् । कथमनेन सत्प्रतिपक्षत्वमित्याशङ्कार्थः । समाधत्ते - **तथापीति** टीका । अन्यतरत्वं नाम साध्याधिकरणं च पक्षश्चेति द्वयभिन्नं यत् तद(द्)भिन्नत्वम् । एतच्च न लिङ्गम्, कथमित्यत आह - **तस्येति** टीका । तथा च पृथिवी इतरेभ्यो भिद्यते पृथिवीतरभेदाधिकरणं च तद्भिन्नभिन्नत्वात् इत्यत्र यदि पृथिवी इतरभेदाधिकरणं तद्भिन्नं तद्भिन्नं यज्जलादिकं तस्य भेदोऽस्मादनुमानात् पूर्वं सिद्ध एव नास्ति । तथा च हेतुः जलादिभेदघटितः साध्यमपि जलादिभेदघटितं मतम् । **सन्दिग्धासिद्ध** इति । पूर्वोक्तप्राय एव दोष इति तात्पर्यम् । **उपलक्षणमिति** । पृथिवी जलं पृथिवीत्वात् इत्यत्र मूलकारेण यत्र जलत्वाभावस्तत्र पृथिवीत्वाभाव इति व्यतिरेकव्याप्तौ घटे व्यभिचारो दत्तः । तत्रोच्यते - अयं व्यभिचारो न भवति । कथम् ? घटादिभिन्नपृथिवीत्वात् इत्येव हेतुः कर्तव्यः, तदा न व्यभिचार इत्यत आह - **उपलक्षणमिति** । तथा च घटादिभिन्नपृथिवीत्वं पक्षमात्रवृत्तित्वात् सपक्षो यो जलादिस्ततोऽपि [106 B] व्यावृत्तत्वाच्चासाधारण एवेत्यर्थः इति प्रथमव्यतिरेक्युदाहरणं समाप्तम् ।

**ननु जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् इच्छादिकार्यवत्त्वाद् वेति व्यतिरेकिणि साध्याप्रसिद्धौ कथं व्यतिरेकादिनिरूपणम्, नैरात्म्यं च घटस्य न प्रत्यक्षवेद्यं तस्य तत्रा-सामर्थ्यात्, नानुमानगम्यं नैरात्म्याप्रतीतावन्वयिनोऽभावात् सात्मकत्वप्रतीतिं विना व्यतिरेकिणोऽनुपपत्तिः । अथेच्छा समवायिकारणजन्या कार्यत्वात् तच्च समवायिकारणं पृथिव्याद्यष्टद्रव्यभिन्नं पृथिव्यादित्वे बाधकसत्त्वादिति पृथिव्यादिभिन्नात्मसिद्धौ तद्वत्त्वं जीवच्छरीरे साध्यत इति चेत्, यदि सात्मकत्वमात्मसंयोगवत्त्वं तदा घटादौ तदस्तीति ततो हेतुव्यावृत्तावसाधारण्यम्, ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्यत्वं सात्मकत्वं शरीरात्मसंयोगस्य ज्ञानकारणत्वात् आत्म-मनसोस्तथात्वेऽप्यकार्यत्वादिति चेत् । न । शरीरादन्यत्रासिद्धेः, तत्र प्रसिद्धौ सिद्धसाधनात् ।**

द्वितीयव्यतिरेक्युदाहरणे शङ्कते - **नन्विति** मूले । जीवदिति । मृतशरीरे बाधवारणाय पक्षविशेषणं जीवदिति । **प्राणादीति** । आदिपदात् तत्संयोगः । **इच्छादीति** । इच्छादिकं कार्यं यस्येत्यर्थः । **साध्याप्रसिद्धाविति** मूलम् । सात्मकत्वं साध्यं जीवच्छरीरात् अन्यत्र(त्रा)प्रसिद्धम्, तथा च कथं व्यतिरेकव्याप्तिग्रहोऽभावग्रहे प्रतियोगिज्ञानापेक्षणात् । व्यतिरेकादि इत्यत्र आदिपदात् सात्मकत्वरूपविशेषणज्ञानाभावे जीवच्छरीरं सात्मकमिति

कथं विशिष्टवैशिष्ट्यबोध इत्यर्थः । ननु सात्मकत्वाप्रसिद्धावपि यत्र नैरात्म्यं तत्र प्राणादिमत्त्वाभाव इति व्यतिरेकव्याप्तिः प्रत्यक्षेण घटादौ गृह्यत एव नैरात्म्यस्य सात्मकत्वा(त्व)प्रतियोगित्वात् इत्यत आह - **नैरात्म्यं चेति** मूलम् । **तच्चेति** । नैरात्म्यं घटादौ न प्रत्यक्षवेद्यम्, हेतुमाह - **तत्रेति** मूलम् । घटादौ यन्नैरात्मयं तत्र नैरात्म्ये **तस्येति** प्रत्यक्षस्यासामर्थ्यात् । कुतः ? यतो नैरात्म्यं बाह्येन्द्रियाप्रत्यक्षात्मादिघटितमूर्तिकं भवति, आत्मा यदि अप्रत्यक्षस्तदा आत्मघटितं नैरात्म्यं कथं प्रत्यक्षम् ? येनेन्द्रियेण यद् वस्तु गृह्यते तद्भावोऽपि तेनेन्द्रियेणैव गृह्यते इति नैरात्म्यमात्माभावरूपं न प्रत्यक्षम् । न तु नैरात्म्यज्ञानम् अनुमानात् भविष्यति यथा घटादि निरात्मकम् अचेतनत्वात् इत्यनुमानगम्यमित्यत आह - **नानुमानेति** मूलम् । अत्रानुमाने सपक्षाभावात् दृष्टान्तेऽपि पटादौ नैरात्म्यं केन प्रमाणेनावधारितम् ? न केनापीति नान्वयित्वमित्यर्थः । नन्वत्र व्यतिरेकव्याप्तिरेव भविष्यति, नैरात्म्याभावः सात्मकत्वं तथात्र यत्र यत्र सात्मकत्वं तत्राचेतनत्वाभावः यथा जीवच्छरीर इत्यत आह - **सात्मकत्वेति** । तथा च सात्मकत्वप्रतीतिं विना नैरात्म्यानुमानमपि न सम्भवति । तथा च सात्मकत्वे प्रतीते नैरात्म्यस्य व्यतिरेकव्याप्तिग्रहः, नैरात्म्ये प्रतीते सात्मकत्वस्य व्यतिरेकव्याप्तिग्रह इत्यन्योन्याश्रयो दोषः । अथ साध्यप्रसिद्धिं शङ्कते - **अथेति** मूलम् । **इच्छेति** मूलम् । असमवायिकारणजन्या कार्यत्वात् । ततः किमित्यत आह - **इच्छाऽसमवायिकारणसिद्धाविति** मूलम्[१] । तथा चेच्छाऽसमवायिकारणस्यात्ममनःसंयोगादेः सिद्धौ तद्वत्त्वं सात्मकत्वं जीवच्छरीरे साध्यत इत्याशङ्कार्थः । दूषयति - **यदीति** मूलम् । भवतु तावदिच्छाऽसमवायि-कारणसिद्धिः तथापि इच्छाऽसमवायिकारणमात्मसंयोगवत्त्वमात्रं वा सात्मकत्वं साध्यते किं वाऽन्यद् वा । आद्ये आह - **तदेति** मूलम् । घटादौ आत्मसंयोगवत्त्वं व्यापकत्वादात्मनस्तिष्ठति तत्र च प्राणादिमत्त्वं हेतुर्न वर्तत इति सपक्षाद् हेतुव्यावृत्तौ असाधारण्यम् । अन्यद् वेति पक्षं दूषयति - **ज्ञानेति** मूलम् । ज्ञानं यत्राधिकरणे वर्तते तत्राधिकरणे [107 A] यो वर्तते स ज्ञानसमानाधिकरणस्तथा च ज्ञानसमानाधिकरणो यो ज्ञानकारणीभूतो यः संयोगस्तदाश्रयत्वे सति कार्यत्वम् एतादृशं सात्मकत्वं घटादौ नास्ति जीवच्छरीरे वर्तते इति योजयति - **शरीरात्मेति** । तथा च शरीरात्मसंयोगो ज्ञानसमानाधिकरणो भवति । ज्ञानाधिकरणे आत्मनि ज्ञानस्य शरीरात्म-संयोगस्यापि विद्यमानत्वात् । तथा च शरीरात्मसंयोगो ज्ञानसमानाधिकरणो भवति ज्ञानकारणं च भवतीति । कार्यपदस्य व्यावृत्तिमाह - **आत्मेति** । तथा च ज्ञानसमानाधिकरण-ज्ञानकारणीभूतः संयोगः आत्ममनः-संयोगस्तदाश्रयत्वमात्मन्यपि वर्तते मनस्यपि वर्तते इति कृत्वा आत्मन्यपि सात्मकत्वं स्यात् अत आह - **कार्यत्वमिति** आशङ्कार्थः । दूषयति - **शरीरेति** । तथा च एतादृशं यत् सात्मकत्वम् - ज्ञानसमानाधिकरण-ज्ञानकारणीभूतसंयोगाश्रयत्वे सति कार्यत्वलक्षणं यत् सात्मकत्वम् - तत् जीवच्छरीरव्यतिरेकेणान्यत्राप्रसिद्धमिति

१. मुद्रितमूले प्रतीकं नोपलभ्यते ।

साध्याप्रसिद्धिरेव दोषः। ननु जीवच्छरीरे एव उक्तरूपसात्मकत्वस्य प्रसिद्धिर्भविष्यति इत्यत आह - **तत्रे**ति मूलम्। तथा च पक्ष एव चेत् साध्यप्रसिद्धिस्तदा सिद्धसाधनमेवेति मूलार्थः।

अथ टीका। **इच्छादी**ति टीका। इच्छादिकार्यं यस्य इत्युक्ते इच्छादिकार्यत्वं मनसि वर्तते सात्मकत्वं च तत्र नास्तीति व्यभिचार इत्यन्यथा व्याचष्टे - **इच्छादी**ति। आदिशब्दाद् ज्ञानसुखादिः। तथा च इच्छाद्यवच्छेदकत्वं शरीरस्यैव, न मनसः। कथम्? मनोऽवच्छेदेन इच्छानुपलब्धेः। मनसो मुक्तात्ममनसो घटादौ अपि वृत्तेर्न तदवच्छेदकत्वम्, शरीरावच्छेदेनैव इच्छोपलब्धेः इत्यर्थः। तत्र **तस्ये**ति पदं व्याचष्टे- **तस्येती**ति। तस्य कुतोऽसामर्थ्यमित्यत आह - **योग्ये**ति। अतीन्द्रिय आत्मा तद्घटिते योग्यानुपलब्धिर्नास्तीति तस्य प्रत्यक्षस्यासामर्थ्यमित्यर्थः। **भावे**ति टीका। कार्यत्वं ध्वंसे वर्तते समवायिकारणजन्यत्वं नास्तीति व्यभिचार इत्यन्यथा व्याचष्टे - **भावकार्यत्वादि**ति। तथा च यत्र भावकार्यत्वं तत्र समवायिकारणजन्यत्वमस्तीति न व्यभिचार इत्यर्थः। **ज्ञानेती**ति टीका। व्यावृत्तिमाह - **ज्ञानेती**ति। ज्ञानसमानाधिकरणपदस्य कृत्यमाह- **घटादेरि**ति टीका। तथा च ज्ञानकारणीभूतो यः संयोग इन्द्रियार्थसन्निकर्षः तदाश्रयत्वं घटेऽपि वर्तते इत्यतो ज्ञानसमानाधिकरणेति, यतो घटेन्द्रियसन्निकर्षो ज्ञानसमानाधिकरणो न भवतीति भावः। अथ ज्ञानकारणीभूतेति पदस्य कृत्यमाह - **आत्मे**ति टीका। तथा च आत्मघटसंयोगो ज्ञानसमानाधिकरणो भवति तदाश्रयत्वे सति कार्यत्वं घटे वर्तते परं ततः प्राणादिमत्त्वहेतुव्यावृत्तौ असाधारण्यमित्यत आह - **ज्ञानकारणीभूतेति प्रथमं संयोगविशेषणम्**। **तादृशे**ति टीका। ज्ञानसमानाधिकरणा ज्ञानकारणीभूता च सत्ता भवति सत्ताया अपि सत्ताज्ञाने कारणत्वात्। आत्मनि सत्ता सत्त्वाच्चेति तद्वत्त्वं घटे वर्तते एवेति पुनरसाधारण्यमत आह - **संयोगे**ति। [107 B] सत्ता न संयोग इति तस्या व्यावृत्तिः। अथ कार्यपदकृत्यमाह - **आत्मे**ति टीका। आत्ममनःसंयोगः ज्ञानकारणीभूतो ज्ञानसमानाधिकरणोऽपि भवति, तदाश्रयत्वमात्मन्यस्ति इति कृत्वा ततो हेतुव्यावृत्त्या(त्ता)वसाधारण्यमित्यत आह - **कार्यत्वपदम्**। आत्मनि नित्यत्वात् कार्यत्वं नास्तीति भावः। अत्राशङ्कते - **न चे**ति टीका। तथा च ज्ञानसमानाधिकरणो ज्ञानकारणीभूतो यः संयोगः तदाश्रयत्वं प्राणेऽपि वर्तते। तदा सात्मकत्वलक्षणस्योक्तस्य प्राणेऽतिप्रसङ्गः इत्याशङ्कार्थः। समाधत्ते - **आत्मे**ति टीका। तथा च प्राणात्मसंयोगस्यान्यथासिद्धतया तत्र ज्ञानकारणीभूतत्वमेव नास्तीति कथमतिप्रसङ्गः? शरीरप्राणसंयोगेन प्राणात्मसंयोगः प्राणमनःसन्निकर्षश्च ज्ञानं प्रति न कारणम् किन्तु अन्यथासिद्धः। तथा च प्रत्यक्षखण्डे प्राणात्मसंयोगः प्राणमनःसन्निकर्षश्च कारणमित्युक्तं तन्मतान्तराभिप्रायेण। ननु शरीरादन्यत्र शरीरावयवेषु सात्मकत्वमप्यस्ति प्राणादिमत्त्वमप्यस्तीति तत्र साध्यप्रसिद्धावन्वयित्वमेव स्यादित्यत आह - **शरीरावयवस्ये**ति। तथा च यदा शरीरावयवस्य सपक्षत्वनिश्चयो नास्ति तस्यां दशायां व्यतिरेकावतारोऽत एव दशाविशेष एव व्यतिरेकत्वमित्यर्थः।

**इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्याभावो घटादौ दृष्टः तद्व्यतिरेकः शरीरे साध्यते इति चेत्। न। इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्य शरीर एव प्रसिद्धेः सिद्धसाधनात्, अन्यथा असिद्धिर्व्यतिरेकाद्यनिरूपणात्। अप्रसिद्धसाध्यसंसर्ग-मिव साध्यमप्रसिद्धं साधयति व्यतिरेकीति चेत्। न। व्यतिरेकाद्यनिरूपणात् असाधारण-धर्मेणाप्रतीतपदार्थानुमाने घटत्वादिनापि स्वेच्छाकल्पितडित्थाद्यनुमानप्रसङ्ग इति।**

अथ मूलम्। **इच्छेति** मूलम्। इच्छाया असमवायिकारणं संयोगः, तदवच्छेदकत्वस्याभावो घटादौ नैरात्म्यं प्रसिद्धं तदभावो जीवच्छरीरे साध्यते इत्याशङ्कार्थः। दूषयति - **इच्छेति** मूलम्। इच्छाऽसमवायिकारणसंयोगा-वच्छेदकत्वं प्रसिद्धमप्रसिद्धं वा ? आद्ये तस्य शरीरे एव प्रसिद्धेः सिद्धसाधनता स्यात्। द्वितीये आह - **अन्यथेति** मूलम्। यदि अप्रसिद्धं साध्यं तदा प्रतियोग्यप्रसिद्धेर्व्यतिरेकानिरूपणात्[१] अनुमानं न स्यादित्यर्थः। ननु नैरात्म्यं भावरूपमेव किञ्चिद् भविष्यति, तथा च तद्रूपव्यतिरेकव्याप्तिज्ञानात् यथाऽयं रसाभाववान् रूपाभाववत्त्वात् इत्यत्र यथा यत्र रसस्तत्र रूपमिति भावरूपव्यतिरेकव्याप्तिज्ञानादप्रसिद्धस्यापि साध्यस्य व्यतिरेक्यनुमितिः अथवा पर्वतो वह्निमान् इत्यत्र पर्वतवह्निसंसर्गोऽप्रसिद्ध एव सिद्ध्यति पूर्वं पर्वतवह्निसंसर्गज्ञानाभावात्। तथा च यथा पर्वतवह्निसंसर्गोऽप्रसिद्धः पक्षे सिद्ध्यति तद्वत् अप्रसिद्धं साध्यमपि व्यतिरेक्यनुमानात् सेत्स्यतीत्याशयेनाशङ्कते - **अप्रसिद्धेति**। दूषयति - **व्यतिरेकेति**। यद्यपि अप्रसिद्धोऽपि साध्यसंसर्गः सिद्ध्यतीत्युचितं तस्य साध्यज्ञाना-धीनत्वात्। ननु साध्यसंसर्गज्ञाने साध्यसंसर्गज्ञानं नापेक्षितं साध्यज्ञानस्यैव साध्यसंसर्गज्ञानेऽपेक्षणात्। तथा च प्रकृते साध्यज्ञाने तु अन्वयव्याप्तिज्ञानं वा व्यतिरेकव्याप्तिज्ञानं [वा] कारणम्। तथा च यत्र प्राणादिमत्त्वं तत्र सात्मकत्वमित्यन्वयव्याप्तिज्ञानं नास्ति प्रतियोगिज्ञानाभावे व्यतिरेकव्याप्तिज्ञानमपि नास्ति। तथा च [108 A] साध्यप्रसिद्ध्यभावे व्यतिरेकाद्यनिरूपणात् व्यतिरेकव्याप्त्यनिरूपणात् साध्यविशिष्टज्ञानरूपा यथा इदं सात्मकम् इत्यनुमितिरपि न भवतीति एतदेवाह - **व्यतिरेकाद्यनिरूपणादिति** मूलम्। दूषणान्तरमाह - **असाधारणेति**। यदि प्राणादिमत्त्वरूपो जीवच्छरीरस्यासाधारणो धर्मः तेन धर्मेणाप्रसिद्धसात्मकत्वानुमाने स्वेच्छाकल्पितमप्रसिद्ध-पदार्थानुमानं घटत्वादिनापि स्यात् यथा घटत्वात् इदम्—इत्यप्रसिद्धडित्थानुमानमपि स्यादिति मूले पूर्वपक्षार्थः।

अथ टीका। **यद्यपीति** टीका। मूलकारेणोक्तम् इच्छाऽसमवायिकारणसंयोगावच्छेदकत्वं शरीरे एव प्रसिद्धं शरीरादन्यत्राप्रसिद्धत्वादिति तदयुक्तम्। सात्मकत्वं तु शरीरावयवेऽपि प्रसिद्धमस्ति ततः कथमुक्तं शरीरादन्यत्राप्रसिद्धमिति। समाधत्ते - **तथापीति** टीका। सात्मकत्वस्य शरीरावयवे प्रसिद्धौ तत्र च हेतुवृत्तौ अन्वयित्वं हेतोरवृत्तौ असाधारण्यमित्याह - **तदिति**।

---

१. व्यतिरेकव्याप्त्यनिरूपणात्। प्रतौ टिप्पणी।

उच्यते। इच्छाऽसमवायिकारणसिद्धाविच्छात्वं संयोगासमवायिकारणकवृत्ति नित्येन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातित्वात् शब्दत्ववत् स चासमवायिकारणं संयोगः किञ्चिदवच्छिन्नः संयोगत्वात् आत्मसंयोगमात्रस्येच्छाजनकत्वेऽतिप्रसङ्गादितीच्छाऽसमवायिकारणसंयोगावच्छेदकत्वं सात्मकत्वं शरीरे साध्यते। यद्वा आत्मनीच्छाधारता महत्संयोगावच्छेद्या जन्यविभुविशेषगुणाधारतात्वात् वाय्वादिसंयोगाद्यवच्छेद्यशब्दाधारत्ववदिति सामान्यतः सिद्धमिच्छाधारताघटकेच्छासमवायिकारणद्रव्यसंयोगवत्त्वं सात्मकत्वम्, अत एव ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्यत्वं वा सात्मकत्वं स्वशरीरे प्राणादिमत्त्वस्य इच्छादिमत्त्वस्य च चेष्टावयवोपचयादिव्याप्यत्वग्रहात् घटादौ चेष्टादिविरहेण प्राणादिमत्त्वेच्छादिमत्त्वविरहानुमानमिच्छादिविरहात् इच्छादिप्रयोजकेच्छाद्याधारताघटकेच्छाद्यसमवायिकारणसंयोगविरहानुमानं कार्याभाववति कारणाभावनियमात्। न च सात्मकत्वं शरीरवृत्ति शरीरे बाधकाभावात् शरीरत्ववदित्यन्वयिनैव साध्यसिद्धेः किं व्यतिरेकिणेति वाच्यम्। शरीरं सात्मकमिति शरीरविशेष्यकबुद्धेर्व्यतिरेकिणं विनानुपपत्तेः उपायान्तरस्योपायान्तरादूषकत्वाच्च। यद्वा चेष्टा संयोगासमवायिकारणिका संस्काराजन्यक्रियात्वादिति चेष्टाया असमवायिकारणसंयोगसिद्धौ प्रयत्नवदात्मसंयोग एव पर्यवस्यति प्रयत्नान्वयव्यतिरेकानुविधायित्वात्, एवं च चेष्टाया असमवायिकारणसंयोगाश्रयत्वे सति शरीरत्वं सात्मकत्वं जीवच्छरीरे साध्यं चेष्टावत्त्वादिति हेतुः चेष्टाविरहश्च घटादौ प्रत्यक्षसिद्धः चेष्टाविरहात् तदसमवायिकारणसंयोगविरहोऽपि सुग्रहः। यद्वा जीवच्छरीरं तदवयवो वा आत्मभिन्नत्वे सति आत्मविशेषगुणकारणभोगानधिकरणावृत्तिसंयोगवत् प्राणान्यत्वे सति ज्ञानकारणीभूतप्राणसंयोगवत्त्वात् यन्नैवं तन्नैवं यथा घटः, आत्मप्राणसंयोगः प्राण-मनःसंयोगो वा शरीर-प्राणसंयोगेनैवासिद्धो[1] न कारणम्, भोगाधारत्वं भोगसमवायिकारणातिरिक्तवृत्ति सकलभोगाधिकरणवृत्तित्वात् प्रमेयत्वादिवत् इति तार्किकरीतिः।

---

१. अन्यथासिद्धः इति मुद्रितपुस्तके।

अथ मूले सिद्धान्तमाह - **इच्छेति**। इच्छाया असमवायिकारणसिद्धौ यथा इच्छा असमवायिकारणजन्या भावकार्यत्वात् घटवत् इति अनुमानेन इच्छाया असमवायिकारणजन्यत्वं सिद्धम्। ततः किमित्यत आह मूले- **इच्छात्वमिति**। इच्छात्वं संयोगासमवायिकारणकवृत्तम्, संयोगोऽसमवायिकारणं यस्य तत् संयोगासमवायि-कारणकम्, तद्वृत्तिहेतुमाह - **नित्येन्द्रियेति**। नित्येन्द्रियग्राह्यो यो विशेषगुणः तद्वृत्तिर्या गुणत्वसाक्षाद्व्याप्या जातिः तद्वत्त्वात् शब्दत्ववत्। यथा शब्दत्वे नित्येन्द्रियग्राह्यो विशेषो गुणः शब्दः तद्वृत्तिर्गुणत्वसाक्षाद्व्याप्यजातिः शब्दत्वं भवति तत्संयोगासमवायिकारणम् आद्यो यो भेरी-आकाशसंयोगः किञ्चिद्व(दव)च्छिन्नः संयोगत्वात् शाखावच्छिन्नकपिसंयोगवत्। अनेन प्रकारेण तस्य संयोगस्य किञ्चिदवच्छेदकं तु वक्तव्यमेव। तच्च किं भविष्यति ? शरीरमेव भविष्यति। तथा च इच्छाऽसमवायिकारणसंयोगावच्छेदकत्वं यत् साध्यं तत् शरीरे *साध्यते, यथा वह्निरूपो धर्मः पर्वते साध्यते तथैव एतादृशः*[१] *शरीरनिष्ठो धर्मः शरीरे साध्यते।*

अथ टीका। ननु प्रथमत इच्छाऽसमवायिकारणसिद्धाविति मूलकारेण किमर्थमुक्तम्, इच्छात्वं संयोगासमवायिकारणकवृत्तीत्येव कुतो नोक्तमित्यत आह टीकाकारः - **इच्छाया** इति। यदा इच्छाया असमवायिकारणमेव सिद्धं नास्ति तावत्पर्यन्तं संयोगासमवायिकारणत्वशङ्काप्रसङ्ग एव नास्तीति युक्तमनुमानात्[२] पूर्वमिच्छाया असमवायिकारणजन्यत्वानुमानमित्यर्थः। इच्छाऽसमवायिकारणसिद्धिः कुत इत्याकाङ्क्षा यां पूरयति मूले - **भावकार्यत्वादितीति**। तथा च प्रथमानुमानम् इच्छा असमवायिकारणजन्या भावकार्यत्वात् घटवत् इति शेषार्थः। ननु मूले इच्छात्वमिति जातिपक्षकानुमानं कथमुक्तम् ? तथा च इच्छा संयोगा-समवायिकारणिका नित्येन्द्रियग्राह्यविशेषगुणत्वात् इत्येव किमिति [108 B] नोक्तमित्यत आह - **व्यक्तिपक्षक** इति टीका। तथा च यदि इच्छा संयोगासमवायिकारणिका नित्येन्द्रियग्राह्यविशेषगुणत्वात् इदं चेदनुमानं क्रियते तदा शब्दाज्जातो यः शब्दस्तत्र व्यभिचारः। कथम् ? तत्र नित्येन्द्रियग्राह्यविशेषगुणत्वं वर्तते परं तत्र संयोगासमवायिकारणकत्वं नास्ति तस्य शब्द एव पूर्वतनोऽसमवायिकारणमिति कृत्वा जातिः पक्षः कृतः। तथा च यत्र यत्र नित्येन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातित्वं तत्र तत्र संयोगासमवायिकारणकवृत्तित्वम् इयं व्याप्तिः शब्दत्वे दृष्टान्ते वर्तते यतस्तत्र नित्येन्द्रियेत्यारभ्य हेतुर्वर्तते, संयोगासमवायिकारणकः प्रथमशब्दस्तद्वृत्तिरपि भवति शब्दत्वजातिः। अथ व्यावृत्तिर्यथा साध्ये संयोगपदत्यागे न प्रकृतसिद्धिः। इच्छा-ऽसमवायिकारणसंयोगावच्छेदकत्वं सात्मकत्वम्, न तु इच्छाऽसमवायिकारणावच्छेदकत्वमात्रम्, तथा चेच्छाऽसमवायिकारणं किञ्चिद्व्याप्यवृत्तिधर्मादिकमपि चेदायाति तदा तस्यावच्छेदकस्यापेक्षैव नास्ति इच्छाऽ-समवायिकारणभूतधर्मस्य व्याप्यवृत्तित्वादवच्छेदकापेक्षैव नास्ति। तथा चेच्छाऽसमवायिकारणसंयोगः सिद्धस्तदा

१ सात्मकत्वमेव। प्रतौ टिप्पणी।                    २. द्वितीयात्। प्रतौ टिप्पणी।

संयोगस्याव्याप्यवृत्तित्वादवश्यमवच्छेदकापेक्षेति संयोगपदं सार्थकं साध्ये, असमवायिपदं संयोगकारणक-वृत्तीत्युक्तौ यद्यपीच्छायाः संयोगः कोऽपि निमित्तकारणं शरीरात्माद्यवृत्तिः सिद्धस्तदवच्छेदकत्वस्य शरीरेऽसम्भ-वादसमवायिकारणावच्छेदकरूपं साध्यं वक्तुं न शक्यते इत्यसमवायीति। अथ हेतौ पदकृत्यं यथा नित्यपदं स्नेहत्वे व्यभिचारवारणाय। यथा स्नेहत्वं त्वगिन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्या जातिर्भवति। तस्या जातेः स्नेहासमवायिकारणकवृत्तित्वमेव, न तु संयोगासमवायिकारणकवृत्तित्वम्, अतो नित्यपदम्। स्नेहत्वं तु नित्येन्द्रियग्राह्यं न भवति किन्तु त्वग्भ्यामेव ग्राह्यं भवति। ननु तथापि स्नेहत्वे व्यभिचारो यथा नित्येन्द्रियं मनस्तद्ग्राह्यत्वात्। अतो व्याचष्टे - **तच्चेति**। तच्च यन्नित्येन्द्रियग्राह्यत्वं तन्नित्यमात्रेन्द्रियग्राह्यत्वमेतत्परं कर्तव्यम्। अन्यथोक्तदोषः स्यात्। ननु नित्येन्द्रियग्राह्या वा विशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्या जातिरित्यन्वयस्तदा विशेषपदं व्यर्थं यत आत्मैकत्वत्वे व्यभिचार एव नास्ति यत आत्मैकत्वत्वस्य नित्यमात्रेन्द्रियग्राह्यत्वेऽपि गुणत्वसाक्षाद्व्याप्यजातित्वमेव नास्ति, यदि च नित्येन्द्रियग्राह्येति विशेषगुणस्य विशेषणं क्रियते तदा विशेषपदानुपादाने सङ्ख्यात्वजातौ व्यभिचारः [109 A] यथा नित्यमात्रेन्द्रियग्राह्यो गुणः आत्मैकत्वं तच्च मनोमात्रग्राह्यं तद्वृत्तिगुणत्वसाक्षाद्व्याप्या जातिः सङ्ख्यात्वं तत्र संयोगासमवायिकारणकवृत्तित्वं नास्ति सङ्ख्याया एव सङ्ख्यायामसमवायिकारणत्वात् इति कृत्वा विशेषपदं सार्थकं भवति अन्यथा तु निरर्थकम्। **पूर्वोक्तरीत्येति**। तस्माद् युक्तं नित्येन्द्रियग्राह्येति विशेषगुणस्यैव विशेषणम्। एतदेवाह - **एतच्चेति** टीका। **अन्यथेति** टीका। यदि गुणविशेषणं न भवति तदा इत्यर्थः। दोषस्तु पूर्वमुक्तः। ननु आत्मैकत्वं प्रत्यक्षं न भवति। तथा च नित्यमात्रे-न्द्रियग्राह्यो गुण आत्मैकत्वं न भवत्येव। कथं गुणविशेषणेऽपि विशेषपदं सार्थकमित्यत आह - **आत्मैकत्वेति** टीका। तथा च येषां मते आत्मैकत्वं प्रत्यक्षं तन्मते सार्थकमित्यर्थः। साक्षात्पदस्य कृत्यमाह - **नित्ये शब्दज-शब्देति**। शब्दजन्यतावच्छेदिका शब्दजशब्दमात्रनिष्ठा एका शब्दत्वावान्तरजातिस्तिष्ठति, तस्यां जातौ व्यभिचारो यतो नित्येन्द्रियग्राह्यविशेषगुणः शब्दः तद्वृत्तिर्गुणत्वावान्तरजातिः शब्दजशब्दमात्रनिष्ठा भवत्येव परं संयोगासमवायिकारणकत्वं नास्त्येव तस्य शब्दासमवायिकारणकत्वात् अत उक्तम् - **साक्षादिति**। सा शब्द[ज]शब्दमात्रवृत्तिर्या जातिः शब्दत्वस्य साक्षाद् व्याप्या न तु गुणत्वस्य साक्षाद् व्याप्या। गुणत्वस्य च शब्दत्वं साक्षाद् व्याप्या जातिः शब्दत्वस्य च या व्याप्या सा गुणत्वस्य परम्परया व्याप्येत्यर्थः। ननु नित्येन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्धर्मत्वात् इत्येवास्तु किं जातिपदेनेत्यत आह - **जातिपदमिति** टीका। तथा च जातित्वेन रूपेण जातेः प्रवेशो नास्ति किन्तु विशेषणांशं जातित्वं परित्यज्य विशेष्या जातिरेव गृह्यते। यदि च जातेर्जातित्वेन रूपेण प्रवेशः स्यात् तदा नित्यत्वे सति समवायसम्बन्धेनानेकधर्मत्वं जातित्वं तत्र च धर्मत्वांशमात्रं ग्राह्यं स्यादितरभागो नित्यादिः व्यर्थः स्यात् धर्ममात्रपरिग्रहात्, यदि च जातिस्वरूपमात्रं गृह्यते

तदा जातेरखण्डत्वात् वैयर्थ्यं न स्यादित्यर्थः । ननु स्वरूपनिर्वचनपरं जातिपदमपि किमर्थमिति चेत् अत आह- **यदि चे**ति टीका । यदि च साक्षाद्व्याप्यत्वस्येदं निर्वचनं तद्व्याप्यत्वे सति तदितराव्याप्यत्वं यथा द्रव्यत्वस्य साक्षाद्व्याप्यं पृथिवीत्वम्, कथम् ?, द्रव्यत्वस्य व्याप्यं पृथिवीत्वं भवति, द्रव्यत्वव्याप्यं यत् जलत्वं तस्या-व्याप्यं पृथिवीत्वं भवति, इदं साक्षाद्व्याप्यत्वस्य लक्षणं क्रियते तदा जातिपदं निरर्थकम् । कुत इति शब्दत्व-शब्दसङ्ख्यान्यतरादौ व्यभिचारो न भवति । शब्दशब्दसङ्ख्यान्यतरत्वस्य गुणत्वसाक्षाद्व्याप्यत्वाभावात् । तद्व्याप्यत्वे सति तद्व्याप्याव्याप्यत्वं नास्ति। तच्छब्देन गुणत्वं गुणत्वस्य व्याप्यं यत् शब्दसङ्ख्यान्यतरत्वं तस्य व्याप्यं शब्दजशब्दसङ्ख्यान्यतरत्वमिति कृत्वा तत् गुणत्वसाक्षाद्व्याप्यत्वं शब्दजशब्दसङ्ख्यान्यतरत्वादाविति । तदा जातिपदं न देयमित्यर्थः । यदि च [109 B] तद्व्याप्यत्वे सति तद्व्याप्यजात्यव्याप्यत्वं तदा शब्दजशब्द-सङ्ख्यान्यतरत्वे व्यभिचारः । कथम् ? शब्दजशब्दसङ्ख्यान्यतरत्वं गुणत्वव्याप्यं भवति परं गुणत्वव्याप्याया अन्यस्याः कस्या अपि जातेर्व्याप्यं न भवति । गुणत्वसाक्षाद्व्याप्या जातिः शब्दत्वमथ च सङ्ख्यात्वम् इति कृत्वा शब्दत्वस्यापि सङ्ख्यात्वस्यापि शब्दजशब्दसङ्ख्यान्यतरत्वं व्याप्यं न भवति इति जातिपदं शब्दजशब्द-सङ्ख्यान्यतरत्वे व्यभिचारवारणाय सार्थकम्। तथा च तत्र नित्येन्द्रियग्राह्यविशेषगुणवद्वृत्तिगुणत्वसाक्षाद्व्याप्यत्वं वर्तते संयोगासमवायिकारणकवृत्तित्वं नास्तीति स्वमतमाह - **इन्द्रियत्वेनेती**ति टीका । नित्येन्द्रियग्राह्यत्व-मिन्द्रियत्वेन रूपेण विवक्षितम् । ननु नित्यमात्रग्राह्यत्वमेव कुतो न विवक्षितमित्यत आह - **नन्वि**ति टीका । ततः किमित्य आह - **एवं चे**ति टीका । नित्येन्द्रियग्राह्यत्वं जातेर्विशेषणं तथा चेन्द्रियत्वेन रूपेण नित्येन्द्रियग्राह्या विशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्या या जातिः । पक्षे इच्छात्वम्, दृष्टान्ते च शब्दत्वमस्त्येवेति । एवं सति विशेषपदमपि सार्थकं जातिपदमपि सार्थकम् । कथम् ? सङ्ख्यात्वे व्यभिचारवारणाय विशेषपदं यथा एकत्वं जातिरिन्द्रियत्त्वेन रूपेण नित्येन्द्रियग्राह्या भवति यत आत्मवृत्तिगुण आत्मैकत्वं तन्मनसा इन्द्रियत्वेन रूपेण ग्रहणयोग्यं भवति, अथ च गुणत्वव्याप्यजातिरपि सङ्ख्यात्वं भवति तत्र सङ्ख्यात्वे संयोगासमवायिकारणक-वृत्तित्वं नास्ति इति व्यभिचारः सङ्ख्यायाः संयोगोऽसमवायिकारणं न भवति घटादौ या एकत्वसङ्ख्या तस्याः कपालैकत्वमसमवायिकारणम् अत उक्तं विशेषपदं सङ्ख्यात्वं तु न विशेषगुणवृत्तीति भावः । जातिपदं च नित्येन्द्रियग्राह्यं यद्विशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यं शब्दसङ्ख्यान्यतरत्वम् इन्द्रियत्वेन रूपेण नित्येन्द्रियं श्रोत्रं तद्ग्राह्यं भवति गुणत्वसाक्षाद्व्याप्यं भवति विशेषगुणवृत्त्यपि भवति शब्दस्य विशेषगुणत्वात् । तत्र व्यभिचार-वारणाय जातिपदं शब्दसङ्ख्यान्यतरत्वस्य जातित्वाभावात् । **जाती**ति टीका । नित्येन्द्रियग्राह्यत्वस्य जाति-विशेषणत्वे न दोषः । **स चेती**ति टीका । ननु असमवायिकारणं संयोगः किञ्चिदवच्छिन्नः इत्यनुपपन्नम् । कुतः ? किञ्चिदवच्छिन्नस्य संयोगस्यासमवायिकारणत्वं यतः संयोगमात्रस्यातिप्रसक्तत्वात्, किञ्चिदवच्छिन्नः स च

संयोगः असमवायिकारणं भवतीति। न तु असमवायिकारणस्य संयोगस्य किञ्चिदवच्छिन्नत्वम्। कथम्? घटे आत्ममनःसंयोगो वर्तते स चात्ममनःसंयोग इच्छादिकं प्रति नासमवायिकारणमिति कृत्वा किञ्चिदवच्छिन्न आत्ममनःसंयोगोऽसमवायिकारणम् तथा च शरीरावच्छिन्न एवावच्छेदकः सिद्धः [110 A]। अनेनानु[मानेन] सामान्यतः प्रसिद्धं सात्मकत्वं व्यतिरेकिणा साध्यते, न च सिद्धस्य कथं साधनमिति वाच्यम्। पूर्वं निरधिकरणिका साध्यसिद्धिरनेन तु जीवच्छरीर एवाधिकरणे व्यतिरेकिणा साध्यते इति हृदयम्।

एवं साध्यान्तरमप्याह - **अत एवेति** मूलम्। **ज्ञानेति** मूलम्। नन्वत्रापि साध्याप्रसिद्धिरिति चेन्न। पूर्वोक्तरीत्या इच्छाधारतावत् ज्ञानाधारता महत्संयोगावच्छेद्या। जन्यविभुविशेषगुणेत्यादिहे[तु]ः, अनेनानुमानेन सामान्यतः प्रसिद्धं साध्यं जीवच्छरीरे व्यतिरेकिणा साध्यते। अत्र व्याप्तिग्रहप्रकारमाह- **स्वेति**। स्वपदेन व्याप्तिग्राहकः पुरुषस्तेन स्वशरीरे प्राणादिमत्त्वस्य इच्छादिमत्त्वस्य च चेष्टावयवोपचयादिव्याप्यत्वग्रहात् कथं ग्रह इत्यत आह- **स्वेति**। स्वशरीरे चेष्टापि तिष्ठति अवयवोपचयोऽपि तिष्ठति, सा चेष्टा स चावयवोपचयः इच्छादिमत्त्वस्य प्राणादिमत्त्वस्य च व्यापको यतो मृतशरीरे चेष्टावयवोपचयाभावात्। तथा च चेष्टावयवोपचयेऽवच्छेदकं प्राणादिमत्त्वमिच्छावत्त्वं च। यदवच्छेदेन यत्तिष्ठति तत्तद्व्याप्यम्। यथा धूमवत्त्वावच्छेदेन वह्निस्तिष्ठति अतो धूमो वह्निव्याप्यः तद्वत् प्राणादिमत्त्वेच्छावत्त्वावच्छेदेन चेत् चेष्टावयवोपचयस्तिष्ठति तदा इच्छादिमत्त्वं प्राणादिमत्त्वं च चेष्टावयवोपचयस्य व्याप्यं तथा च यत्र यत्र प्राणादिमत्त्वं तत्र तत्र चेष्टावयवोपचयः इति व्याप्तिग्रहः। ततः किमित्यत आह - **घटादाविति** मूलम्। तथा च व्यापकाभावे व्याप्याभाव इत्याशयेनाह - **चेष्टेति** मूलम्। घटादौ चेष्टाविरहोऽवयवोपचयविरहश्च प्रत्यक्षसिद्धः। ततो घटचेष्टाविरहेण प्राणादिमत्त्वेच्छादिमत्त्वविरहानुमानं यथा घटो न प्राणादिमान् नेच्छादिमान् च अवयवोपचयाभावात्। अत्र व्यतिरेकव्याप्तिर्यथा यत्र प्राणादिमत्त्वं तत्र तत्र अवयवोपचयः यथा स्वशरीरम् इत्येवं व्यतिरेकव्याप्त्याऽवयवोपचयाभावेन घटादौ प्राणादिमत्त्वेच्छादिमत्त्व-विरहानुमानम्। ततः किमित्यत आह - **इच्छादिविरहादिति** मूलम्। घटादौ इच्छादिमत्त्वविरहात् इच्छादिप्रयोज-केच्छाधारताघटकेच्छाऽसमवायिकारणसंयोगविरहानुमानं सिद्धम्। ननु अनुकूलतर्कविरहात् कथं यथोक्त-संयोगविरहानुमानम् इत्यतः अनुकूलतर्कमाह - **कार्येति** मूलम्। तथा च चेष्टावयवोपचयादिकं कार्यम्, तत् चेत् कार्यं यत्र नास्ति तत्र प्राणादिमत्त्वमिच्छादिमत्त्वं कारणमपि नास्तीत्यर्थः। तथा च कार्याभाव एव कारणाभावज्ञापकः यथा शिलाशकले बीजाभावे अङ्कुराभाव(वः) ज्ञापकः। तथा च चेष्टाकारणं च प्राणादिमत्त्वम्। तथा च यत्र कार्यं नास्ति तत्र कारणमपि नास्ति। यत्र चेष्टारूपं कार्यं नास्ति तत्र प्राणादिमत्त्वरूपं कारणमपि नास्ति यथा घटे तथा च घटे [110 B] प्राणादिमत्त्वेच्छादिमत्त्व(त्त्वा)त्म[म]नःसंयोगोऽसमवायिकारणम्। तथा च कथं मूलकृता असमवायिकारणसंयोगमुद्दिश्य किञ्चिदवच्छिन्नत्वं विधीयते इत्यत आह - **किञ्चिदवच्छिन्न** इति टीका। तथा

च मूले उद्देश्यविधेयभावो विपरीतः कर्तव्यः यथा किञ्चिदवच्छिन्नसंयोगमुद्दिश्यासमवायिकारणत्वं विधीयते। एतदेवाह - **उद्देश्येति** टीका। नन्वत्र किंसाधकमित्यत आह - **एवेति**। यत(त्त)देवोद्देश्यविधेयभावव्यत्यासोऽत एव मूलकारेणाग्रे आत्ममनःसंयोगमात्रस्येच्छाजनकत्वे घटादावतिप्रसङ्ग उक्त इत्यर्थः। आशङ्कते - **न चेति** टीका। तथा चायमर्थः - संयोगः पक्षः, किञ्चिदवच्छिन्नः सन्नसमवायिकारणमिति साध्यम्, संयोगत्वादिति हेतुः कृतः स न सम्भवति संयोगत्वस्य व्यभिचारित्वात्। कथम्? यतः संयोगोऽसमवायिकारणं नास्ति। यथा कारण-कारणसंयोगः सोऽसमवायिकारणं न भवति। यथा दण्डचक्रसंयोगः तत्रासमवायिकारणत्वं नास्ति परं संयोगत्वं वर्तते परं *किञ्चिदवच्छिन्नासमवायिकारणत्वं नास्तीत्याशङ्कार्थः। अथ समाधानं यथा तथा* चैवं हेतुः कर्तव्योऽसमवायिकारणसंयोगत्वात् यथा यत्रासमवायिकारणसंयोगत्वं तत्र तत्र किञ्चिदवच्छिन्नासमवायिकारणत्वं यथा तन्तुसंयोगः तन्त्ववच्छेदेनैवासमवायिकारणं न तु तुर्याद्यवच्छेदेनेति एतदेवाह - **असमवायिकारणसंयोग-त्वादिति** टीका।

अथ पक्षान्तरमाह मूले - **यद्वेति**। **महदिति** मूलम्। महतो यः संयोगस्तेनावच्छेद्या। हेतुमाह - **जन्येति** मूलम्। जन्यो यो विभुविशेषगुणस्तदाधारतात्वात्। दृष्टान्तमाह - **वाय्विति** मूलम्। वायुसंयोगेनावच्छेद्या तद्वत्। अथ आकाशो व्यापकः ततः आकाशत्वावच्छेदेन शब्दाधारता नास्ति, इह शब्दो नेह शब्द इति प्रतीतेः। अत आकाशे शब्दाधारता किञ्चिदवच्छेदेन वर्तते इति वाच्यम्। तथा च तदवच्छेदको वायुसंयोगो यत्रानुकूलस्तत्राकाशे शब्दोऽत एव दूरदेशेऽनुकूलवातावच्छिन्नाकाशाभावान्न शब्दः श्रूयते तद्वत् आत्मादिव्यापकः ततो घटाद्यवच्छिन्ने आत्मनि इच्छाधारता नास्ति इति कृत्वा इच्छाधारता किञ्चिदवच्छिन्ना वक्तव्या, स चावच्छेदकोऽसमवायि-कारणसंयोगः, ततः प्रकृते किमा[या]ता(त)मित्यत आह - **इच्छाधारतेति** मूलम्। इच्छाधारताया घटकीभूता इच्छाधारतामध्ये प्रविष्टा इच्छा, तस्या असमवायिकारणं यो द्रव्यसंयोगः तद्वत्त्वं सात्मकत्वम्। तथा चायमर्थः - जीवच्छरीरं पक्षः, इच्छाधारताघटकेच्छाऽसमवायिकारणद्रव्यसंयोगवत् इति साध्यम्, प्राणादिमत्त्वात् हेतुः। तत्र च साध्यप्रसिद्ध्यर्थं पूर्वानुमानम् यथा इच्छाधारता महत्संयोगावच्छेद्या इत्यादि। आत्मनि इच्छाधारताया महत्संयोगः, शरीरसंयोगविरहाच्च [111 A] सात्मकत्वरूपेच्छाऽसमवायिकारणसंयोगविरहानुमानम् यथा घटो न प्राणादिमान् चेष्टाविरहात्, इत्यनेन प्राणादिमत्त्वविरहानुमानम्, तेन च प्राणादिमत्त्वविरहेण इच्छादि-प्रयोजकेच्छाधारताघटकेच्छाऽसमवायिकारणसंयोगविरहानुमानम्, तथा च घटे सात्मकत्वप्राणादिमत्त्वोभयाभाव-ज्ञाने जाते सति व्यभिचारज्ञानाभावसहकृतव्यतिरेकसहचारज्ञानात् व्यतिरेकव्याप्तिग्रहः सुग्रह एवेत्यर्थः। निरधि-करणकसाध्यप्रसिद्ध्या व्यतिरेकी किमर्थं कर्तव्यः?, अन्वयिनैव वक्ष्यमाणेन शरीरे सात्मकत्वसिद्धिर्भविष्यतीत्या-शङ्कते - **न चेति** मूलम्। तथा च सात्मकत्वं पक्षः शरीरवृत्तीति साध्यम् शरीरवृत्तित्वे बाधकाभावात् शरीरत्ववत्

इत्याशङ्कार्थः। समाधत्ते - **शरीरमिति**। यद्यपि सात्मकत्वविशेष्यिका शरीरवृत्तित्वप्रकारिका बुद्धिरुक्तान्वयिनी भवति तथापि शरीरविशेष्यकसात्मकत्वप्रकारकबुद्ध(द्धेः) व्यतिरेकिसाध्यत्वात्। अयमर्थः - पक्षस्तु विशेष्यत्वेनैव भासते तस्य ज्ञानस्यानुमितावकारणत्वात्। पर्वतो वह्निमान् इति विशिष्टज्ञानरूपानुमितौ साध्यज्ञानस्य विशेषण-ज्ञानत्वेन कारणत्वमस्ति न तु पर्वतरूपविशेष्यज्ञानस्य कारणतेति भावः। समाधानान्तरमाह - **उपायेति** मूलम्। सात्मकत्वसाधने व्यतिरेक्यनुमानमपि भवतु इत्यर्थः।

**यद्वेति** मूलम्। चेष्टा पक्षः, संयोगोऽसमवायिकारणं यस्या इति साध्यम्, संस्कारा[जन्यक्रियात्वादिति] हेतुः। दृष्टान्तमाह - आद्यक्रिया यथा नोदनादाद्यमिषोः कर्मेति **वैशेषिकसूत्रे**। नोदनं मूर्तद्रव्यसंयोगः तस्मादाद्यक्रिया जायते, सोऽसमवायिकारणमेव। तथा च सा आद्यक्रिया यथा संयोगासमवायिकारणिका संस्काराजन्यक्रियापि भवति तद्वत् चेष्टापि संस्काराजन्यक्रिया भवति संयोगासमवायिकारणिकाऽपि भवति। ततः किमित्यत आह - **चेष्टाया** इति। असमवायिकारणं यः संयोगस्तत्सिद्धौ स संयोगः प्रयत्नवदात्मसंयोग एव। अत एव शरीरे क्रिया प्रयत्नवदात्मसंयोगासमवायिकारणिका। कुतः? प्रयत्नान्वयव्यतिरेकानुविधायित्वात्। ननु प्रयत्नान्वयव्यतिरेका-नुविधायित्वमपि चेष्टाऽसमवायिकारणस्य संयोगस्यासिद्धमिति चेत्, न, धावतः प्रयत्नोत्कर्षेण श्वासक्रियाशरीर-क्रियोत्कर्षदर्शनात्। अत एव श्वासादिक्रियायाः प्रयत्नोत्कर्षेणोत्कर्षस्तद्वत् शरीरक्रियाया अपि प्रयत्नोत्कर्षेणोत्कर्ष-दर्शनात् प्रयत्नवदात्मसंयोगासमवायिकारणत्वमिति। अत एव प्राणपञ्चकसंसाररूपश्वासादिक्रियायाः जीवनादृष्ट-जन्यत्वमेवास्तु किं प्रयत्नजन्यत्वेनेत्यपि परास्तम्। धावतः प्रयत्नोत्कर्षेण श्वासोत्कर्षदर्शनात् प्रयत्नजन्यत्वमेव न तु जीवनादृष्टजन्यत्वमिति। ततः किमित्यत [111 B] आह - **एवं चेति** मूलम्। तथा च चेष्टाऽसमवायि-कारणसंयोगाश्रयत्वे सति कार्यत्वं शरीरत्वं सात्मकत्वं जीवच्छरीरे साध्यं मृतशरीरे चातिव्याप्तिवारणाय सत्यन्तम्। हेतुस्तु चेष्टावत्त्वात्। तथा चेष्टाविरहो घटादौ प्रसिद्धः, ततः चेष्टाविरहात् चेष्टाऽसमवायि-कारणसंयोगविरहानुमानं घटेऽस्त्येव, चेष्टाऽसमवायिकारणसंयोगविरहे सिद्धे यत्र यत्र चेष्टाऽसमवायि-कारणसंयोगाश्रयत्वे सति शरीरत्वरूपसात्मकत्वाभावस्तत्र तत्र प्राणादिमत्त्वाभावो यथा घटे इति व्यतिरेक-व्याप्तिज्ञानात् व्यतिरेक्यनुमानं सिद्धमेव। व्यतिरेक्यनुमाने पक्षान्तरमाह - **यद्वेति** मूलम्। जीवच्छरीरं तदवयवो वा पक्षः, साध्यं यथा आत्मभिन्नत्वे सति आत्मविशेषगुणकारणं भोगानधिकरणावृत्तिर्यः संयोगस्तद्वान्, प्राणा-न्यत्वे सति ज्ञानकारणीभूतो यः प्राणसंयोगस्तद्वत्त्वात्, यन्नैवं तन्नैवं यथा घटः। ननु प्राणान्यत्वे सति ज्ञानकारणी-भूतप्राणसंयोगत्वम् आत्म-प्राणसंयोगमादाय प्राणेऽपि वर्तते मनस्यपि वर्तते तत्र भोगानधिकरणावृत्तिसंयोगवत्त्वं नास्ति भोगस्य शरीरात्मोभयमात्रवृत्तित्वात् इत्यत आह - **आत्मप्राणेति** मूलम्। तथा चात्मप्राणसंयोगः प्राण-मनःसंयोगो वा शरीरप्राणसंयोगेनैवासिद्ध इति आत्मविशेषगुणा ज्ञानेच्छादयस्तेषां कारणं न भवति इति न दोषः।

ननु जीवच्छरीरे आत्मविशेषगुणकारणं भोगानधिकरणेऽवृत्तिर्यः संयोगः शरीरात्मसंयोगः तद्वत्त्वं सात्मकत्वं जीवच्छरीरे साध्यते। शरीरात्मसंयोगस्तु भोगानधिकरणं यच्छरीरं तद्वृत्ति एव तथा च भोगानधिकरणावृत्ति न भवतीति कथं शरीरात्मसंयोगमादाय सात्मकत्वं शरीरे साध्यते इत्यत आह - **भोगाधारत्वमिति** मूलम्। आत्मातिरिक्तस्थले शरीरेऽपि भोगो वर्तत इत्याह - भोगाधारत्वं पक्षः, भोगसमवायिकारणम् आत्मा तदतिरिक्तवृत्ति [इति साध्यम्], सकलेति हेतुः। यत्र सकलभोगाधिकरणवृत्तित्वं तत्र भोगसमवायिकारणातिरिक्तवृत्तित्वं यथा प्रमेयत्वे। शरीरं तु भोगं प्रति निमित्तकारणम् आत्मैव समवायिकारणम् इति भोगसमवायिकारणातिरिक्तेऽपि भोगस्तिष्ठत्येव, तथा च शरीरमपि भोगाधिकरणं भवत्येवेति सिद्धं शरीरात्मसंयोगस्य भोगाधिकरणवृत्तित्वम्।

अथ टीका। ननु असमवायिसंयोगस्य किञ्चिदवच्छिन्नत्वे सिद्धेऽपि इच्छाऽसमवायिसंयोगावच्छेदकत्वलक्षणं [112 A] यत् सात्मकत्वं तत् न प्रसिद्धम्, संयोगस्यावच्छेद्यत्वज्ञाने जातेऽपि संयोगावच्छेदकत्वं यत् तत् प्रसिद्धं नास्ति। अथ चेच्छाधारता महत्संयोगावच्छेद्या इत्यत्रानुमानेऽपि इच्छाधारताया महत्संयोगावच्छेद्यत्वं यद्यपि सिद्धं तथापि इच्छाधारतावच्छेदकेच्छाऽसमवायिकारणसंयोगवत्त्वं न प्रसिद्धं संयोगे इच्छाधारताया अवच्छेद्यत्वभानेऽपि संयोगेऽवच्छेदकत्वाभानात् इत्यत आह - **अत्रेति** टीका। तथा चेच्छाधारतायां महत्संयोगावच्छेद्यत्वज्ञाने जाते महत्संयोगेऽपि इच्छाधारतावच्छेदकत्वज्ञानं जायते। कुत इत्यत आह - **समानेति** टीका। यथा इदं संयोगावच्छिन्नमिति ज्ञाने संयोगेऽप्यवच्छेदकत्वज्ञानं जायते यथा एकं यद्यवच्छिन्नं तदा एकमन्यदवच्छेदकमेवेति समानसंवित्संवेद्यतेति भावः। एवम् असमवायिकारणसंयोगेऽपि किञ्चिद्द्रव्यावच्छिन्नत्वज्ञाने विद्यमाने किञ्चित्पदार्थेऽपि संयोगावच्छेदकत्वज्ञानं भविष्यत्येवेच्छा[ऽ]समवायिकारणसंयोगावच्छेदकत्वलक्षणसात्मकत्वप्रसिद्धिर्जातैवेत्यर्थः। ननु मूलकारेणोक्तम् इच्छाधारताघटकेच्छाऽसमवायिकारणसंयोगाधारत्वं सात्मकत्वं सामान्यतः सिद्धमिति अयुक्तम्। साध्यसिद्धौ व्यतिरेक्यनुमानेन किं कर्तव्यमित्यतो व्याचष्टे - **सिद्धसाधनेति** टीका। **सामान्यत** इति टीका। तथा च सामान्यरूपेण निरधिकरणतया सिद्धेऽपि विशेषरूपेण यथा शरीरविशेष्यकेच्छाधारताघटकेच्छाऽसमवायिकारणसंयोगावच्छेदकत्वप्रकारकसाध्यसिद्धिर्व्यतिरेक्यनुमानस्य फलत्वमित्यर्थः सामान्यत इति टीका। अत्र यत एवेति पूरणीयम्। यत एव [सामान्यतः] साध्यसिद्धिर्जाता विशेषाधिकरणरूपेण साध्यसिद्धिर्न जाता अतः सिद्धसाधनावकाशो नास्तीत्यर्थः। ननु शरीरं सात्मकं सात्मकत्वे बाधाभावात्। यत्र यद्वत्त्वे बाधकं नास्ति तत्र तद्वत्त्वं यथा घटे घटत्ववत्त्वे बाधकं नास्तीति घटत्ववत्त्वम् इत्यन्वयिनैव शरीरविशेष्यकबुद्धेरपि सम्भवात् इत्याभासार्थः। **उपायेति**। तथा चानुमितिजनकमन्वयव्याप्तिज्ञानं व्यतिरेकव्याप्तिज्ञानं चेत्युपायद्वयमस्ति। तेनान्वयव्याप्त्यस्फुरणदशायां व्यतिरेकव्याप्तिस्फुरणं व्यतिरेकव्याप्त्यस्फुरणदशायामन्वयव्याप्तिज्ञानं कारणम्। तथा चान्वयव्याप्त्यस्फुरणदशायां व्यतिरेकव्याप्तिस्फुरणं यद्वर्तते तन्न पर्यनुयोज्यम् तन्न

कारणमिति वक्तुं न शक्यत इत्यर्थः । **संस्कारेति** टीका । ननु वेगजन्यक्रियायां व्यभिचारः । कुतः ? तत्र वेग एवासमवायिकारणं संयोगासमवायिकारणत्वरूपं [112 B] साध्यं नास्तीति व्यभिचार इत्यत आह - **संस्कारेति** टीका । ननु वेगजन्यक्रियाव्यभिचारः, वेगोऽपि संस्कारस्तदजन्यक्रियात्वादित्यर्थः । ननु संस्काराजन्यक्रियात्वं गुरुत्वासमवायिकारणकायपतनक्रियायाम् द्रव्य(व)त्वात् यत्राद्यस्पन्दनं जायते सा द्रवत्वासमवायिकारणिका क्रिया भवति न तु संयोगासमवायिकारणिकेत्यत आह - **गुरुत्वेति** टीका । **तेनेति** आद्यपतनादावित्यर्थः । **प्रयत्नेतीति** टीका । ननु प्रयत्नवदात्मसंयोग एव कुतः पर्यवस्यतीत्यत आह - **प्रयत्नेति** टीका । तथा च यदवच्छेदेन चेष्टा तदवच्छेदेन प्रयत्नस्यानुभवसिद्धत्वात् । चेष्टाप्रयत्नयोरपि व्याप्तिस्ततो यः चेष्टाऽसमवायिकारण-संयोगः प्रयत्नवदात्मसंयोगः । प्रयत्नव्याप्या चेष्टा तदसमवायिकारणसंयोगत्वात् । यत्र यत्र चेष्टा तत्र तत्र प्रयत्न इति चेष्टा व्याप्या । ननु शरीरत्वपदं व्यर्थम् इत्यत आह - **सत्यन्तमात्रस्येति** । चेष्टाऽसमवायिकारणसंयोगः प्रयत्नवदात्मसंयोगः, स चात्मन्यप्यस्ति तत्रात्मनि प्राणादिमत्त्वाभावात् ततो हेतुव्यावृत्तावसाधारणमित्यत उक्तं शरीरत्वपदम् । तथा चात्मनि शरीरत्वं नास्तीति नासाधारणमिति भावः । ननु चेष्टावत्त्वं शरीरावयवे व्यभिचारि इदम् । चेष्टा वर्तते परं सत्यन्तविशिष्टं शरीरत्वं तत्र नास्तीति व्यभिचारः इत्यत आह टीकाकारः - **चेष्टावच्छरीरत्वादित्यर्थः** इति । तथा च हेतुरपि तत्र नास्तीति न व्यभिचार इत्यर्थः । **तेनेति** टीका । शरीरावयवेत्युपलक्षणं शरीरावयवावयवेऽङ्गुल्यादौ चेष्टा वर्तते साध्यं च तत्र नास्तीति प्राप्तो व्यभिचारस्तत्र न भवतीत्यर्थः । असमवायिपदं संपातायातं यथा मृतशरीरे चेष्टाकारणसंयोगाश्रयत्वमपि नास्ति । नाडीषु च चेष्टाकारणसंयोगाश्रयत्वं यद्यपि वर्तते तथापि तत्र शरीरत्वं नास्ति इति कृत्वा कुत्रापि नातिव्याप्तिरिति निरर्थकम् असमवायिपदम् । मृतशरीरसंयोगात् घटादौ या क्रिया उत्पद्यते तादृशक्रियाऽसमवायिकारणसंयोगाश्रयत्वे सति शरीरत्वं मृतशरीरेऽपि वर्तते, तत्रापि सात्मकत्वं स्यादित्यतिप्रसङ्गवारणाय साध्ये चेष्टापदम् । केचित् तु मृतशरीराभिघातात् नोदनात् वा यदा जीवच्छरीरे चेष्टा उत्पद्यते मृतशरीरत्यागार्थं तत्र जीवच्छरीरे या चेष्टा उत्पद्यते तत्र तस्याः क्रियायाः प्रयत्नवदात्म-संयोगोऽसमवायिकारणं मृतशरीरसंयोगो निमित्तकारणम् । ननु तत्र नोदनमभिघातो वा असमवायिकारणम् । कुतः ? तस्याः क्रियायाः प्रयत्नवदात्मसंयोगोऽसमवायिकारणं मृतशरीरसंयोगो निमित्तकारणम् अभिघातो(ते) वाऽसमवायिकारणकत्वे च जातिसङ्करप्रसङ्गात् । [113 A] यतस्तस्यां क्रियायामभिघातरूपाऽसमवायिकारण-जन्यतावच्छेदिका एका जातिरस्ति एका च प्रयत्नवदात्मसंयोगासमवायिकारणजन्यतावच्छेदिकाऽपि जातिरस्तीति जातिसङ्करप्रसङ्गात् । किन्तु अभिघातस्य तच्चेष्टां प्रति निमित्तकारणत्वम् । तथा चाभिघातरूपनिमित्तकारण-जन्यतावच्छेदिका प्रयत्नवदात्मसंयोगासमवायिकारणजन्यतावच्छेदिका चैकैव जातिरिति न जातिसङ्करप्रसङ्गः । तथा च चेष्टानिमित्तकारणं यो मृतशरीरसंयोगो जीवच्छरीरे तदाश्रयत्वं जीवच्छरीरे वर्तते इति कृत्वा जीवच्छरीरनिष्ठा

या चेष्टा तस्या निमित्तकारणं यो जीवच्छरीरेण सह मृतशरीरसंयोगस्तदाश्रयत्वे सति शरीरत्वं मृतशरीरे वर्तते तत्रापि सात्मकत्वस्य लक्षणं चेष्टाकारणसंयोगाश्रयत्वे सति शरीरत्वमतिप्रसक्तमिति तद्वारणाय असमवायिपद-मित्याहुः । जीवच्छरीरं तदवयवो वेत्यत्रात्मभिन्नत्वे इत्यस्य प्रयोजनमाह - **एतच्चेति** टीका । तथा चात्मनोऽपि आत्मविशेषगुणकारणभोगानधिकरणावृत्तिसंयोगवत्त्वं विद्यते । अयमाशयः - आत्मविशेषगुणा ज्ञानादयस्तेषां कारणम् अथ च भोगानधिकरणे घटादाववृत्तिः एतादृशो यः संयोगः शरीरात्मसंयोगः तदाश्रयत्वं वर्तते आत्मनि इति कृत्वा ततो हेतुव्यावृत्तावसाधारणो हेतुः स्यादतो हि साध्ये आत्मभिन्नत्वे सति इति विशेषणमित्यर्थः । विशेषगुणपदकृत्यमाह - **भोगानधिकरणावृत्तीत्यत्र तन्मृतशरीरे** इति टीका । यदि आत्मभिन्नत्वे सति गुण-कारणभोगानधिकरणावृत्तिसंयोगवत्त्वं साध्यं क्रियते तदा मृतशरीरे आत्मभिन्नत्वं वर्तते, गुणो मृतशरीरघटविभागस्तं प्रति कारणं भोगोनधिकरणावृत्तिसंयोगः शरीरघटसंयोगः तद्वत्त्वं मृतशरीरेऽपि वर्तते, तत्र हेतुर्नास्ति इत्य-साधारण्यवारणायात्मविशेषगुणकारणेति । अत्र शङ्कते - **न चेति** टीका । तत्र मृतशरीरे चेष्टावत्त्वं हेतुर्यदि व्यावृत्तः तदा मृतशरीरघटसंयोगे भोगानधिकरणावृत्तित्वं नास्ति । यदि च भोगाधिकरणवृत्तित्वलक्षणं भोगानधिकरणावृत्तित्वं मृतशरीरे वर्तते तदा चेष्टावत्त्वमपि हेतुरस्त्येव यतो जीवद्दशायां भोगाधिकरणत्वचेष्टावत्त्वयोः सत्त्वात् । कादा-चित्कं तदुभयमस्तीत्युक्तासाधारण्यं न भवतीत्याशङ्कार्थः । समाधत्ते - **मृतेति** टीका । तथा च मृतशरीरव्यावृत्तमेव चेष्टावत्त्वं हेतुः कर्तव्यः । अयमर्थः - मृतशरीरावृत्तिचेष्टावत्त्वात् अथवा वर्तमानचेष्टावत्त्वात् वेति न दोषः । अन्यथा प्राचीनचेष्टावत्त्वमात्रेण मृतशरीरे साध्या(ध्य)सत्त्वे व्यभिचारः स्यात् साध्यसत्त्वे मृतशरीरेऽपि सात्मकत्वा-नुमानप्रसङ्ग इत्यर्थः । तथा च मृतशरीरे [113 B] आत्मविशेषगुणकारणपदव्यतिरिक्तं साध्यं तिष्ठति । तत्र वर्तमानचेष्टावत्त्वं नास्तीति असाधारण्यवारणायात्मविशेषगुणकारणेति पदम् । अथ विशेषपदकृत्यमाह - **मृतशरीरेति** टीका । मृतशरीरेण सह य आत्मसंयोगस्तस्य जनको यो मृतशरीरावयवात्मसंयोगस्तद्वत्त्वं वर्तते मृतशरीरावयवे, तत्र वर्तमानचेष्टावत्त्वं हेतुर्नास्ति इति असाधारण्यवारणाय विशेषपदम्, मृतशरीरात्मसंयोगस्तु विशेषगुणो न भवति इति तद्व्यावृत्तिः । अथ आत्मपदप्रयोजनमाह - **भेरीति** टीका । भेरीदण्डसंयोगात् यथा शब्दोत्पत्तिः तथा मृतशरीरेण सह मृतशरीरस्य यः संयोगस्तस्मात् यदा शब्दोत्पत्तिर्जायते तत्र मृतशरीरे विशेषगुणो यः शब्दस्तस्य कारणं यो मृतशरीरसंयोगस्तद्वत्त्वं मृतशरीरेऽपि वर्तते आत्मभिन्नत्वमपि अस्ति इति ततो हेतुव्यावृत्तावसाधारण्यं स्यादत आत्मपदम् । तथा च शब्द आकाशस्यैव विशेषगुणो न त्वात्मन इति तद्व्या-वृत्तिः । यद्यपि आत्मपदं दत्तं तथापि तस्मिन् दत्तेऽपि मृतशरीरसंयोगात् मृतशरीरगोचरः साक्षात्कारः कस्यापि जायते । तथा चात्मविशेषगुणो मृतशरीरविषयकः साक्षात्कारस्तज्जनको भवति मृतशरीरसंयोगः स च भोगा-नधिकरणावृत्तिर्भवति मृतशरीरस्यापि पूर्वकालीनभोगाधिकरणत्वात् । तथा च तादृशसंयोगवत्त्वं मृतशरीरे वर्तते

इति कृत्वा तत्रापि सात्मकत्वं स्यादित्याशयेन शङ्कते - **यद्यपी**ति टीका। समाधत्ते - **तथापी**ति टीका। आत्मविशेषगुणो ज्ञानातिरिक्तो बोद्धव्यः, न हि मृतशरीरसंयोगेन ज्ञानातिरिक्तः कोऽप्यात्मविशेषगुणो जन्यते इति कृत्वा न तत्रातिव्याप्तिरित्यर्थः। अत्र विवक्षान्तरमप्याह - **जन्ये**ति टीका। जन्यो य आत्मविशेषगुणस्तत्त्वावच्छिन्नं प्रति कारणत्वं विवक्षितम्। तथा च मृतशरीरसंयोगो जन्यात्मविशेषगुणत्वावच्छिन्नं सर्वं प्रति न कारणम् आत्मगुणेच्छादीनां तेनाजननान्न तत्रातिव्याप्तिरिति भावः। अथ भोगानधिकरणावृत्तीति पदकृत्यमाह - **मनस** इति टीका। तथा चात्ममनःसंयोग आत्मविशेषगुणा ज्ञानादयस्तत्कारणं भवति अथ चात्मविशेषगुणकारण-संयोगवत्त्वमपि तत्रास्ति आत्मभिन्नत्वमपि अस्ति इति कृत्वा मनसि अतिव्याप्तिवारणाय भोगानधिकरणावृत्तीति पदमात्ममनःसंयोगस्तु भोगानधिकरणावृत्तिर्न भवति भोगानधिकरणे मनस्यपि तस्य वृत्तेरित्यर्थः। नन्वत्र भोगाधिकरणवृत्तीति कुतो नोक्तम् ?, नञ्द्वयं किमर्थमित्यत आह- **नञ्द्वयस्ये**ति। तथा चात्मविशेष-गुणकारणमात्ममनःसंयोग एव तद्वत्त्वं वर्तते [114 A] आत्ममनसोरपि आत्ममनःसंयोगो भोगाधिकरणमात्मा तद्वृत्त्यपि, तथा च तादृशात्ममनःसंयोगवत्त्वं वर्तते मनसि, तथा च तत्रातिप्रसङ्गवारणाय भोगानधिकरणावृत्तीति। तथा चात्ममनःसंयोगो यद्यपि भोगाधिकरणवृत्तिर्भवति आत्मनि तस्य वर्तमानत्वात्, तथापि स भोगा[न]धि-करणावृत्तिर्न भवति भोगानधिकरणे मनस्यपि तस्य वर्तमानत्वात्। भोगानधिकरणवृत्तित्वमेवेत्यर्थः। इति **मिश्र**व्याख्यानं दूषयति - **तच्चिन्त्यमि**ति टीका। नञ्द्वयाघटितं सात्मकत्वं साध्यं मनसि वर्तते तत्र चेष्टावत्त्वं नास्तीति ततो हेतुव्यावृत्तावसाधारण्यं स्यादित्युच्यते। तत् किंहेतुमादाय ? यतो मनसि चेष्टावत्त्वं हेतुर्न वर्तते इति तस्य सपक्षान्मनसो व्यावृत्तावसाधारण्यं किमर्थमुच्यते ? तथा च प्राणान्यत्वे सतीत्यादिहेतुव्या-वृत्त्याऽप्यसाधारण्यसम्भवात्। तथा च कथम् ? यतः प्राणान्यत्वे सति ज्ञानकारणीभूतप्राणसंयोगवत्त्वं मनसि नास्ति। कथं नास्ति ? प्राणमनःसंयोगस्य ज्ञानकारणत्वाभावात्, शरीरप्राणसंयोगस्य ज्ञानकारणत्वेऽपि मनसि विद्यमानत्वाभावात्। तथा च प्राणान्यत्वे सति ज्ञानकारणीभूतप्राणसंयोगवत्त्वं हेतुर्मनसो व्यावृत्त इत्यसाधारण्य-सम्भवे चेष्टावत्त्वं हेतुं पूर्वोक्तमनुकृष्यासाधारण्यवर्णना कृता सा किमर्थमिति **मिश्र**व्याख्यादूषणार्थम्। एतदेवाह - **अत्रे**ति टीका। प्रकृतमुपसंहरति - **तस्मादि**ति। तथा च जीवच्छरीरं तदवयवो [वा] आत्मभिन्नत्वे सति आत्मविशेषगुणकारणभोगानधिकरण(णा)वृत्तिसंयोगवत् प्राणान्यत्वे सति ज्ञानकारणीभूतसंयोगवत्त्वादित्यत्र प्राणान्यत्वे सति इत्यादिर्यो हेतुस्तस्य मनसो मृतशरीरात् व्यावर्तनात् तदसाधारण्यं तद्व्यावर्तनायैव भोगानधि-करणेत्यादिपदानि न तु चेष्टावत्त्वहेतुव्यावृत्त्या मनसि मृतशरीरे वा यदसाधारण्यं तद्व्यावर्तनायेति। उत्तरग्रन्थ-योजनार्थमाशङ्कते - **नन्वि**ति टीका। तथा चात्ममनसोः प्राणान्यत्वे सतीत्यादिको हेतुरस्ति, तथा च प्राणमनःसंयोगः प्राणात्मसंयोगश्चेति द्वावपि ज्ञानकारणे, तथा च प्राणान्यत्वे सति ज्ञानकारणीभूतप्राणसंयोगवत्त्वं मनस्यपि वर्तते

सात्मकत्वम् आत्मविशेषेत्यादिरूपं नास्तीति प्रकृतानुमानेऽपि व्यभिचार इत्याशङ्कार्थः । तथा च व्यभिचार-निराकरणात् ममात्मेत्यादि मूलं तत्रोक्तम् । आत्मप्राणसंयोगः प्राणमनःसंयोगो वा एतौ शरीरप्राणसंयोगेनैवा-न्यथासिद्धौ प्राणमनःसंयोगस्य प्राणात्मसंयोगस्य च कारणत्वे प्रमाणाभावादित्युक्तम्, तत्र शरीरप्राणसंयोगेनैव [114 B] कथमन्यथासिद्धिरित्यत आह - **अतिप्रसङ्गभियेति** । शरीरात्ममनोभ्यां प्राणस्य संयोगो हेतुर्वाच्यः । तथा च शरीरावच्छेदेनात्ममनोभ्यां प्राणसंयोगो हेतुर्वाच्यः । तथा च यदवच्छेदेन शरीरावच्छेदेन आत्ममनोभ्यां प्राणस्य संयोगो हेतुः । तथा च लाघवाच्छरीरप्राणसंयोग एव हेतुरस्तु । आत्मविशेषगुणरूपकार्येषु शरीरप्राणसंयोगेन प्राणात्मसंयोगः प्राणमनःसंयोगश्चान्यथासिद्धः यतः प्राणात्मसंयोगः प्राणमनःसंयोगश्च घटाद्यवच्छेदेन न हेतुः किन्तु शरीरावच्छेदेनैव हेतुः । तथा च शरीरप्राणसंयोगेनैवा[न्यथा]सिद्धौ प्राणमनःसंयोगप्राणात्मसंयोगौ कारणे न भवतः । तथा च प्रकृते आत्मविशेषगुणकारणभोगानधिकरणावृत्तिसंयोगः शरीरात्मसंयोग एव कारणं न तौ । तथा च शरीरात्मसंयोगः शरीरे आत्मनि च वर्तते, आत्मा चात्मभिन्नत्वविशेषणेनैव वारितः, उद्धरितं शरीरं तन्मात्रवृत्तित्वं सात्मकत्वं साध्यम् । इदं च जीवच्छरीरमात्रपक्षवृत्ति, अतोऽन्वयसहचाराभावात् व्यतिरेकव्याप्तिरेव । अथ भोगाधारत्वमिति ग्रन्थयोजनार्थमाभासमाह - **नन्विति** टीका । तथा च भोगो नाम सुखदुःखान्यतरसाक्षात्कारः, स चात्ममात्रवृत्तिः, ततः शरीरस्यानात्मतया कथं शरीरस्य भोगाधारत्वमित्याशङ्कार्थ । एतदेवाह - **शरीरस्येति** टीका । तथा च शरीरस्य भोगानधिकरणत्वेन भोगानधिकरणावृत्तिसंयोगवत्त्वं नास्ति किन्तु भोगानधिकरणवृत्ति-संयोगवत्त्वमेव वर्तते इति कथं सात्मकत्वं तत्र तादृशं साध्यत इति भावः । नन्वित्यारभ्य बाधितमिति पर्यन्तं शङ्कार्थः । समाधानग्रन्थं योजयति - **अनात्मनोऽपीति** टीका । भोगाधारत्वमिति मूलेऽनुमानम्, हेतौ सकलाधि-करणवृत्तित्वादित्युक्ते स्वरूपासिद्धिः भोगाधिकरणत्वस्य सकलाधिकरणवृत्तित्वं नास्ति घटादाववृत्तेरिति । तथा च स्वरूपासिद्धिवारणार्थं भोगपदम् । एवं च स्वरूपासिद्धिवारणं विशेषणं व्यर्थं व्यभिचारवारकं विशेषणमेव सार्थकम् । अत्र बीजं यथा यत्साध्यतावच्छेदकावच्छिन्ननिरूपिता यदवच्छिन्ना [1]यन्निष्ठा व्याप्तिर्येन विशेषणेन विना ग्रहीतुं न शक्यते तद्विशेषणं तत्र सार्थकं यथा इदं पक्षः द्रव्यमिति साध्यं गुणकर्मान्यत्वे सति सत्त्वात् इत्यत्र सत्त्वादित्येवोच्यमाने गुणे व्यभिचारः इत्यतो गुणान्यत्वे सतीति तथापि कर्मणि व्यभिचारः तद्वारणाय कर्मान्यत्वे सतीति, अत्र यद्यपि सत्तात्वेन रूपेण सत्ताया जातित्वेन रूपेण द्रव्यत्वस्य [115 A] गुणकर्मान्यत्वरूप-विशेषणाभावेऽपि व्याप्तिर्ग्रहीतुं शक्यत एव यथा [यत्र] सत्ता तत्र जातिरेवं व्याप्तिरस्ति तथा च गुणकर्मान्यत्व-विशेषणाभावेऽपि जातित्वेन रूपेण द्रव्यत्वनिरूपिता सत्तात्वेन रूपेण गुणकर्मान्यत्वविशिष्टसत्तानिष्ठा व्याप्तिर्ग्रहीतुं शक्यत एव तथापि द्रव्यत्वत्वेन रूपेण द्रव्यत्वनिरूपिता गुणकर्मान(न्यं)त्वविशिष्टसत्तात्वावच्छिन्ना या व्याप्तिः

१. यद्धेतु इति प्रतौ टिप्पणी ।

सा गुणकर्मान्यत्वरूपविशेषणाभावे ग्रहीतुं न शक्यते इति कृत्वा व्यभिचारवारकं विशेषणं सार्थकम् । स्वरूपासिद्धिवारकं तु विशेषणं व्यर्थम् । कथम् ? इदं तैजसं रूपादिषु पञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वात् आलोकवत्, अत्र रूपस्यैवाभिव्यञ्जकत्वादित्यत्र रूपमात्रव्यञ्जकत्वादित्यर्थः । तत्र रूपमात्रव्यञ्जकत्वं च रूपव्यञ्जकत्वे सति रूपान्याव्यञ्जकत्वम्, सत्यन्तं चाव्यञ्जके परमाणुपरिमाणादौ व्यभिचारवारणाय । तस्य कस्याप्यव्यञ्जकत्वात् रूपान्याव्यञ्जकत्वमप्यस्तीति रूपव्यञ्जकत्वाभावान्न तत्र व्यभिचारः । अथ रूपव्यञ्जकत्वादित्येवास्तु रूपान्याव्यञ्जकेति पदं किमर्थम् ? मनसि व्यभिचारवारणाय रूपान्याव्यञ्जकत्वं पदम् । अथ रूपव्यञ्जकत्वे सति रूपान्याव्यञ्जकत्वादित्येवास्तु रूपादिपञ्चस्विति हेतौ विशेषणं किमर्थम् ? तथा च तद्व्यतिरेकेण स्वरूपासिद्धिर्भवति । कथम् ? चक्षुषो रूपान्याव्यञ्जकत्वं नास्ति रूपान्यघटादीनामपि तेन व्यञ्जनात् । तदर्थं रूपादिपञ्चस्विति उक्तम् । तथा च स्वरूपासिद्धिवारकमिदं विशेषणं व्यर्थम् । तैजसत्वावच्छिन्नं यत् साध्यं तन्निरूपिता रूपादिषु पञ्चसु मध्ये रूपमात्रव्यञ्जकत्वावच्छिन्ना प्रकृतहेतुनिष्ठा या व्याप्तिः सा रूपादिषु पञ्चस्विति विशेषणव्यतिरेकेणापि ग्रहीतुं शक्यत एव । कथम् ? यत्र यत्र रूपव्यञ्जकत्वे सति रूपान्याव्यञ्जकत्वं तत्र तत्र तैजसत्वमिति व्याप्तौ व्यभिचारः कुत्रापि नास्ति तथा च रूपादीति विशेषणं व्यर्थम् । ननु तथाप्यप्रसिद्धिरेव यतो रूपव्यञ्जकत्वे सति रूपान्याव्यञ्जकत्वमप्रसिद्धम्, यत् रूपव्यञ्जकं तत् रूपत्वस्यापि व्यञ्जकं भवत्येवेति अप्रसिद्धिरेवेति, तथा च व्यभिचारवारकविशेषणवत् अप्रसिद्धिवारकमपि विशेषणं सार्थकम्, पूर्वोक्तयदवच्छिन्नेत्यादिव्याप्तिः अप्रसिद्धिवारकविशेषणं विनाऽप्रसिद्धैवातोऽप्रसिद्धिवारकमपि विशेषणं सार्थकमेवेति चेत्, न, तथापि अप्रसिद्धिवारकविशेषणस्य सार्थकत्वेऽपि स्वरूपासिद्धिवारकविशेषणस्य निरर्थकत्वमेव । यथा प्रत्यक्षखण्डे इन्द्रियलक्षणे शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वमिति, [115 B] अत्र प्राणमनःसंयोगाश्रयत्वं प्राणेऽपि वर्तते तदर्थं ज्ञानकारणेति पदम् । ज्ञानकारणमनःसंयोगाश्रयत्वं शरीरात्मादावप्यस्तीति विशेषगुणानाश्रयत्वे सतीत्युक्तम्, तयोर्विशेषगुणाश्रयत्वात् । तथापि स्वरूपासिद्धिर्यथा चक्षुरादौ विशेषगुणानाश्रयत्वं नास्तीति उद्भूतपदम्, चक्षुष्षु उद्भूतविशेषगुणो नास्त्येव रूपादीनां चक्षुर्निष्ठानामनुद्भूतत्वात् । तथा श्रोत्रेन्द्रियेऽव्याप्तिः, तत्र शब्दः श्रोत्रे उद्भूतविशेषगुण एव भवति । तद्वारणाय शब्देति पदम् । तथा च लक्षणे यदि [अ]व्याप्तिवारकं विशेषणम् लक्षणं नाम केवलव्यतिरेकी हेतुस्तेन यदा अनुमानं क्रियते तदाऽव्याप्तिर्भागासिद्धिर्भवति । यथा प्रकृते चक्षुरादिकं पक्षः, इन्द्रियत्वं साध्यम्, शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वात् [इति हेतुः] । अत्र हेतौ शब्देतरपदानुपादाने श्रोत्रे भागासिद्धिर्भवति तद्वारणाय शब्देतरपदम् । तथा च यत्र यत्र उद्भूतविशेषगुणानाश्रयत्वे ज्ञानकारणमनःसंयोगाश्रयत्वं तत्र तत्र इन्द्रियत्वं यथा चक्षुरादावित्यत्राप्रसिद्धिर्नास्ति व्याप्तिस्तु वर्तते एव, तथा च शब्देतरपदं व्यर्थमेव । शब्देतरपदस्य भागासिद्धिवारकत्वेऽपि यन्निष्ठेत्यादिरुक्ता व्याप्तिः शब्देतरपदाभावेऽपि

ग्रहीतुं शक्यत एवेति। यथा यत्र यत्रोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं तत्र तत्रेन्द्रियत्वं यन्निष्ठा शब्देतरेत्यारभ्य मनःसंयोगाश्रयत्वेत्येतद्धेतुनिष्ठा या व्याप्तिः सा शब्देतरपदाभावेऽपि ग्रहीतुं शक्यत एव, व्यभिचारोऽप्रसिद्धिर्वा कुत्रापि नास्ति। तथा च भागासिद्धिस्वरूपासिद्धिवारकं विशेषणं व्यर्थमेव, तद्वत् प्रकृते आशङ्कते - **न चेति** टीका। भोगाधारत्वं भोगसमवायिकारणातिरिक्तवृत्ति सकलभोगाधिकरणवृत्तित्वात्। अत्र सकलाधिकरणवृत्तित्वादित्युक्ते हेतोः स्वरूपासिद्धिः, भोगाधारत्वरूपे पक्षे सकलाधिकरणवृत्तित्वं नास्ति, अतः स्वरूपासिद्धिवारणार्थं भोगपदम्। तथा च भोगाधारत्वे सकलाधिकरणवृत्तित्वं यद्यपि नास्ति तथापि सकल-भोगाधिकरणवृत्तित्वं वर्तते एव। तथा च स्वरूपासिद्धिवारकं यद् भोगपदं तद् व्यर्थमेव। कथम्? भोगसमवायि-कारणातिरिक्तवृत्तित्वनिरूपिता या सकलभोगाधिकरणवृत्तित्वरूपहेतुनिष्ठा व्याप्तिः सा भोगपदाभावेऽपि ग्रहीतुं शक्यत एव यथा यत्र यत्र सकलाधिकरणवृत्तित्वं तत्र तत्र भोगसमवायिकारणातिरिक्तवृत्तित्व[म्] एवंरूपव्याप्तौ न वाऽप्रसिद्धिर्न वा व्यभिचारः प्रमेयत्वादौ व्याप्तेः प्रसिद्धिर्वर्तते एव इति [116 A] स्वरूपासिद्धिवारकं विशेषणं व्यर्थमेवेत्याशङ्कार्थः। अत्र कस्यचित् समाधानमाह - **व्याप्यतेति** टीका। व्याप्यतावच्छेदकस्य विकाशकं यद् विशेषणं तस्मिन् विशेषणे व्यर्थविशेषणता न भवति इत्यक्षरार्थः। अयमर्थः व्याप्यतावच्छेदकविकाशस्यायमर्थः - येन विशेषणे[न] यद्धेतुतावच्छेदकापेक्षया स्वगर्भहेतुतावच्छेदकस्य बहुवृत्तित्वं सम्पाद्यते तद् विशेषणं व्याप्य-तावच्छेदकविकासकं यथा क्षित्यादिकम् अकर्तृकम् अजन्यत्वात् गगनवत्। यत्र यत्राजन्यत्वं तत्र तत्राकर्तृकत्वमिति व्याप्तिर्गगने वर्तते परंतु क्षित्यादौ पक्षेऽजन्यत्वाभावात् स्वरूपासिद्धम्, तदर्थं हेतौ शरीरपदम्, तथा च शरीराजन्यत्वादिति हेतुः। एवं शरीराजन्यत्वं क्षित्यादौ वर्तते एव। अत्र यद्यपि स्वरूपासिद्धिवारकं विशेषणं पूर्वोक्तरीत्या व्यर्थमिति कृत्वा इदमपि व्यर्थमेवेति वक्तुमुचितं तथापि शरीरपदं व्याप्यतावच्छेदकविकासकं भवति। कथम्? शरीरपदानन्तर्भावेऽजन्यत्वमेव हेतुः, अजन्यत्वं नाम जन्यत्वाभावो हेतुः। शरीरपदे दत्ते शरीराजन्यत्वं नाम शरीरजन्यत्वाभावो हेतुः। तथा च जन्यत्वाभावस्तु केवलं नित्यमात्रवृत्ति, शरीरजन्यत्वाभावस्तु पृथिव्यादिनिष्ठोऽपीति। तथा च शरीरपदेन शरीरजन्यत्वाभावस्य बहुवृत्तित्वरूपो विकाशः क्रियते। अतः शरीरपदं व्याप्याश्रये शरीरजन्यत्वाभावाश्रये विकाशकं भवति। जन्यत्वाभावाश्रया गगनादय एव, शरीरजन्यत्वाभावाश्रया गगनक्षित्यादयो बहवो भवन्ति इति। शरीरपदेन व्याप्याश्रया बहव उपदर्श्यन्त इति शरीरपदं सार्थकं व्याप्या-श्रयविकाशकत्वात्। एतत् समाधानं दूषयति - **तच्चिन्त्यमिति** टीका। **व्याप्यतेति** टीका। व्याप्यतावच्छेदके विशेषणे उक्तरीत्या व्यर्थत्वाभावेऽपि व्याप्याश्रये विशेषणे व्यर्थत्वमस्त्येव। यथा इयं व्यक्तिर्ब्राह्मणदानयोग्या गोत्वव्याप्यधर्मवत्त्वात्। अत्र व्याप्यपदं किमर्थं गोत्वात् इत्येवास्तु। यत्र यत्र गोत्वं तत्र तत्र ब्राह्मणदानविशेषा-र्हत्वमित्यत्राप्रसिद्धिव्यभिचारौ न स्त इति। यद्वा व्याप्यपदस्य व्यर्थत्वेऽपि व्याप्यतावच्छेदकविकासकत्वात्

सार्थकत्वं यथा गोत्वात् इत्युच्यमाने गोत्वत्वं हेतुतावच्छेदकं तेन यत्र गोत्वत्वं गोत्वे वर्तते इति कृत्वा गोत्वमेकैव जातिर्हेतुत्वेनागता, गोत्वव्याप्यवत्त्वादित्युच्यमाने गोत्वव्याप्यत्वं गोत्वेऽपि वर्तते सास्नादिषु बह्वष्वपि वर्तते, तथा च गोत्वत्वापेक्षया गोत्वव्याप्यत्वं हेतुतावच्छेदकं बहुषु व्यक्तिषु वर्तते तत्र व्याप्यपदं सार्थकम्। कथम् ? यतोऽत्र यन्निष्ठा यन्निरूपितेत्यादिव्याप्तिर्गोत्वव्याप्यात् इत्यत्र व्याप्यपदानुपादाने सास्नादिनिष्ठा व्याप्तिर्गोत्वत्वेन ग्रहीतुं न शक्यते [116 B] गोत्वत्वस्य सास्नाद्यवृत्तित्वात् इति कृत्वा व्याप्यतावच्छेदकविकाशो व्याप्यपदेन क्रियते। तद्वत् प्रकृते भोगपदे दत्ते सति व्याप्यतावच्छेदकविकाशो नास्ति। कथं नास्ति ? सकलाधिकरणवृत्तित्वापेक्षया सकलभोगाधिकरणवृत्तित्वं बहुवृत्ति न भवति। कथम् ? यतः सकलभोगाधिकरणवृत्तित्वनिष्ठा या व्याप्तिः सा सकलाधिकरणवृत्तित्वेनापि ग्रहीतुं शक्यते एव, यथा नीलधूमनिष्ठा या व्याप्तिः सा नीलपदव्यतिरेकेणापि धूमत्वेन रूपेण ग्रहीतुं शक्यते एव। तद्वत् भोगपदव्यतिरेकेणापि सकलाधिकरणवृत्तित्वेन व्याप्तिर्ग्रहीतुं शक्यते एव यथा यत्र यत्र सकलाधिकरणवृत्तित्वं तत्र तत्र भोगसमवायिकारणातिरिक्तवृत्तित्वमस्त्येव यथा प्रमेयत्वे। यथा नीलधूमत्वापेक्षया धूमत्वमेव व्याप्यतावच्छेदकविकाशकं भवति तद्वत् सकलभोगाधिकरणवृत्तित्वापेक्षया सकलाधिकरणवृत्तित्वमेव व्याप्यतावच्छेदकविकाशकं भवति। यथा नीलधूमत्वापेक्षया धूमत्वं परमेतावान् विशेषः तत्र व्याप्याश्रयाणां विकाशो नास्ति अत्र तु व्याप्याश्रयाणां सकलाधिकरणवृत्तित्वरूपव्याप्याश्रयापेक्षया सकलभोगाधिकरणवृत्तित्वाश्रयाणां बहुत्वं वर्तते। कथम् ? सकलाधिकरणवृत्तित्वाधिकरणानि तु केवलान्वयिन्येव, सकलभोगाधिकरणवृत्तित्वाधिकरणानि तु आत्मत्वज्ञानादीनि व्यतिरेकिधर्मा अपि भवन्ति इति। स व्याप्याश्रयविकाशोऽनुपयुक्तः। कथम् ? यन्निष्ठा यन्निरूपितेत्यादिव्याप्तौ व्याप्याश्रयविकाशस्यानुपयुक्तत्वात्। एतदेवाह - **व्याप्यतावच्छेदकविकाशेऽपीति** टीका। तथा च व्याप्यतावच्छेदकविकाशकविशेषणे पूर्वोक्तरीत्या व्यर्थत्वाभावेऽपि व्याप्याश्रयविकाशकविशेषणे व्यर्थत्वं वर्तते एवेत्यर्थः। व्याप्यतावच्छेदकविकाशकविशेषणे व्यर्थत्वं नास्ति, तथा व्याप्याश्रयविकाशकविशेषणे व्यर्थत्वमस्तीत्यत्र बीजं नास्तीत्याशङ्कते - **न चेति**। तथा च यथा व्याप्यतावच्छेदकविकाशकविशेषणस्य वैयर्थ्यं नास्ति तथा व्याप्याश्रयविकाशकविशेषणस्या(स्य) वैयर्थ्यं नास्ति। यदि च व्याप्याश्रयविकाशकविशेषणे वैयर्थ्यं तदा व्याप्यतावच्छेदकविकाशकविशेषणेऽपि वैयर्थ्यं स्याद् विनिगमकाभावादित्याशङ्कार्थः। समाधत्ते - **तत्रेति**। इदमेव विनिगमकं यथा यादृशेन विकाशकेन विशेषणेन यन्निष्ठेत्यादिका व्याप्तिर्ग्रहीतुं न शक्यते तदेव विकाशकं विशेषणं सार्थकम्, प्रकृते च व्याप्यतावच्छेदकविशेषणाभावे यन्निष्ठा यन्निरूपितेत्यादिव्याप्तिर्ग्रहीतुं न शक्यते। यथा गोत्वे [117 A] व्याप्यादित्युच्याने व्याप्यपदानुपादाने सास्नादिनिष्ठा व्याप्यिर्ग्रहीतुं न शक्यते इति कृत्वा व्याप्यतावच्छेदकविकाशकविशेषणं व्याप्यपदं सार्थकम्, व्याप्याश्रयविकाशकं तु विशेषणं न सार्थकम्। कुतः ? यथा नीलपदव्यतिरेकेणापि

नीलधूमनिष्ठा व्याप्तिर्धूमत्वेन रूपेण ग्रहीतुं शक्यत एव तद्वत् सकलभोगाधिकरणवृत्तित्वं सकलाधिकरणवृत्तित्वं वा तयोर्मध्ये सकलभोगाधिकरणवृत्तित्वनिष्ठा व्याप्तिः सकलाधिकरणवृत्तित्वत्वेनाधिकरणवृत्तित्वत्वेन वा ग्रहीतुं शक्यत एव । यन्निष्ठेत्यादिनियामकं विनापि केवलं व्याप्याश्रयविकाशकविशेषणस्य व्यर्थत्वं नास्तीत्युच्यते तदा बाधकमाह - **अन्यत्वेति** । पर्वतो वह्निमान् धूमालोकान्यतरत्वात् इत्यत्र धूमेन केवलेन धूमाधिकरणमात्रमेव लभ्यते धूमालोकान्यतराधिकरणं पर्वतापेक्षयाऽयोगोलकादिकमप्यधिकं लभ्यते व्याप्यो धूमोऽपि आलोकोऽपि भवति । तदुभयाश्रयविकाशकत्वात् धूमालोकान्यान्यत्वस्य तदुभयाश्रयविकाशकत्वात् धूमालोकान्यान्यत्वमपि लिङ्गं स्यादिति तथा च व्याप्याश्रयविकाशकेति व्यर्थमेव । सार्थकं तु व्याप्यतावच्छेदकविकाशकमेव विशेषणम् । तर्हि भोगपदं स्वरूपासिद्धिवारकं विशेषणं व्यर्थमित्यत आह - **तस्मादिति** । तथा च यथा इदमकर्तृकं शरीराजन्यत्वात् इत्यत्र जन्यत्वाभावहेतुरस्तु किं शरीरपदेन ? तत्र चोच्यते - जन्यत्वाभावो गगनादौ भिन्नः शरीरजन्यत्वाभावः पृथिव्यां भिन्नः । यथा घटत्वाभावो भिन्नो नीलघटत्वाभावो भिन्नः तद्वत् जन्यत्वाभावो भिन्नः शरीरजन्यत्वाभावो भिन्नः । तथा च यथा घटत्वावच्छिन्नाभावो भिन्नः नीलघटत्वावच्छिन्नाभावो भिन्नः एवं च घटत्वावच्छिन्नाभावात् इति हेतौ क्रियमाणे घटत्वावच्छिन्नाभावत्वेन नीलघटत्वावच्छिन्नाभावनिष्ठा व्याप्तिर्ग्रहीतुं न शक्यते तद्वत् जन्यत्वाभावात् इति हेतौ क्रियमाणे जन्यत्वावच्छिन्नाभावत्वेन शरीरजन्यत्वाभावनिष्ठा व्याप्तिर्ग्रहीतुं न शक्यते । यथा धूमत्वेन आलोकनिष्ठा व्याप्तिर्ग्रहीतुं न शक्यते धूमत्वस्य आलोकावृत्तित्वात् तद्वत् जन्यत्वावच्छिन्नाभावत्वं शरीरजन्यत्वाभाववृत्ति न भवति । यथा धूमत्वेन रूपेण धूमनिष्ठैव व्याप्तिर्ग्रहीतुं शक्यते यतो धूमत्वं धूमे वर्तते धूमनिष्ठा व्याप्तिरपि धूमे वर्तते आलोके नास्तीति न गृह्यते तद्वत् जन्यत्वावच्छिन्नाभावत्वं जन्यत्वावच्छिन्नाभावनिष्ठं परं शरीरजन्यत्वावच्छिन्नाभावनिष्ठं न भवति इति कृत्वा जन्यत्वाभावत्वेन शरीरजन्यत्वाभावनिष्ठा व्याप्तिर्ग्रहीतुं न शक्यते [117 B] तथा च जन्यत्वावच्छिन्नाभावापेक्षया यथा शरीरजन्यत्वाभावोऽखण्डाभावो यत एतन्मध्ये जन्यत्वावच्छिन्नाभावः प्रविष्ट एव नास्ति इति कृत्वाऽखण्डाभाव एव यथा घटत्वमखण्डं तदवच्छिन्नोऽभावोऽप्यखण्डाभाव एव । एवं नीलघटत्वावच्छिन्नप्रतियोगिताकोऽप्यभावोऽखण्डो यतः प्रतियोगितावच्छेदकभेदेनाभावभेदात् । अत्र च प्रतियोगितावच्छेदकं नीलघटत्वं तदवच्छिन्नप्रतियोगिकोऽभावोऽतिरिक्त एव । यथा घटत्वावच्छिन्नाभावोऽखण्ड एव भिन्नः पटत्वावच्छिन्नाभावो यथा भिन्नः तद्वत् नीलघटत्वावच्छिन्नाभावो भिन्नः घटत्वावच्छिन्नाभावो भिन्नः । यथाऽखण्डाभावे न वैयर्थ्यं यथा घटाभावात् इत्युच्यमाने नीलघटत्वावच्छिन्ना व्याप्तिर्ग्रहीतुं न शक्यते एवं धूमप्रागभावात् इत्युक्ते प्रागभावपदं [न] व्यर्थं यतो धूमत्वेन धूमप्रागभावनिष्ठा व्याप्तिर्ग्रहीतुं न शक्यतेऽतो यन्निष्ठेत्युक्तन्यायात् प्रागभावपदं न व्यर्थम् । तद्वत् घटाभावो भिन्नो हेतुर्नीलघटत्वावच्छिन्नाभावो भिन्नो हेतुरिति

घटत्वाभावेन नीलघटत्वाभावनिष्ठा व्याप्तिर्ग्रहीतुं न शक्यते इति नीलपदं सार्थकम्। तद्वत् यथा वा जन्यत्वाभावेन शरीरजन्यत्वाभावनिष्ठा व्याप्तिर्ग्रहीतुं न शक्यते जन्यत्वाभावत्वस्य शरीरजन्यत्वाभावावृत्तित्वात् इति शरीरपदं सार्थकमस्ति यद्यपि स्वरूपासिद्धिवारकं तथापीति ज्ञेयम्। तद्वत् अखण्डाभाववत् अखण्डोपाधावपि न वैयर्थ्यम् यथा सकलाधिकरणवृत्तित्वं भिन्नं सकलभोगाधिकरणवृत्तित्वमुपाधिर्भिन्नः तथा च सकलभोगाधिकरणवृत्तित्वावच्छेदकोऽखण्ड एव धर्मो ग्राह्यः। यथा इदं स्नेहवत् चैत्रमैत्रादीनां पिपासोपशमनहेतुत्वात्। अत्र चैत्रमैत्रादीति पदं न व्यर्थं तस्य हेतुमध्ये प्रवेशाभावात्। हेतुस्तु पिपासोपशमनहेतुतावच्छेदको धर्मस्तु जलत्वादिकोऽखण्ड एव, तस्य मध्ये चैत्रमैत्रपिपासादीनां प्रवेश एव नास्तीति अखण्ड एव धर्मस्तत्सकलभोगाधिकरणवृत्तित्वशब्देन सकलभोगाधिकरणवृत्तितावच्छेदकः कोऽपि[1] अखण्ड एव धर्मस्तन्मध्ये भोगादिपदानां प्रवेश एव नास्ति, ततो हेतुमध्ये भोगादिपदानां प्रवेशाभावात् न वैयर्थ्यमिति सूक्तम् अखण्डोपाधौ न वैयर्थ्यम्। मतान्तरमुत्थापयति - **यत्त्विति**। सकलपदं यत्किञ्चित्सकलपरम्, तथा च यत्किञ्चित्सकलवृत्तित्वं संसार्यात्मत्वे व्यभिचारि तत्र सकलवृत्तित्वं वर्तते, भोगसमवायिकारणातिरिक्तवृत्तित्वं नास्ति तस्य [118 A] भोगाधिरणमात्रवृत्तित्वादिति व्यभिचार इत्यत उक्तं भोगपदमित्यर्थः। दूषयति - **सकलेति**। न हि तव परिभाषामात्रेण सकलपदं यत्किञ्चित्परं भवति। किन्तु अनादिसिद्धप्रयोगानुसारात् सकलपदस्य यावदर्थ एव विश्रान्तिर्न तु कियदेकदेशसकलपरता। तथा च न संसार्यात्मत्वे व्यभिचारवारणार्थं भोगपदम्, तस्य सकलाधिकरणवृत्तिता नास्ति कथं व्यभिचार इत्यतोऽखण्डो[पाधौ] न वैयर्थ्यमित्येव समाधानं सम्यक्। उत्तरग्रन्थस्तार्किकेतिरूपस्तस्य योजनार्थं शङ्कते - **नन्विति** टीका। तथा च भोगाधारत्वं भोगसमवायिकारणातिरिक्तवृत्ति सकलभोगाधिकरणवृत्तित्वात् प्रमेयत्ववत् इत्यत्र भोगानधिकरण(णा)वृत्तित्वमत्वो(थो)पाधिः। तथाहि यत्र भोगेत्यादि साध्यं तत्र तत्र भोगानधिकरण(णा)वृत्तित्वमस्ति यथा प्रमेयत्वे यत्र यत्र सकलेत्यादिहेतुस्तत्र तत्र भोगानधिकरणावृत्तित्वं नास्ति भोगाधारत्वरूपपक्षे व्यभिचारात्। ननु हेतोः साध्यव्याप्यत्वेनोपाधेः साध्याव्यापकत्वाभावात्। यथा पर्वतो धूमवह्निमान् (पर्वतो वह्निमान्) धूमात् इत्यत्र महानसत्वमुपाधिर्न भवति। कुतः ? धूमस्य वह्निव्याप्यत्वेन महानसत्वस्य वह्निव्याप्यधूमाव्यापकत्वेन यत्र धूमस्तत्र महानसत्वं नास्तीति वह्निव्याप्यधूमाव्यापकत्वेन महानसत्वस्य वह्न्यव्यापकत्वं तद्वत् प्रकृते साध्यं भोगेत्यादि तस्य व्याप्यं यत् सकलेत्यादि हेतुः तस्याव्यापकं भवति भोगानधिकरण(णा)वृत्तित्वं यथा यथा(त्र) सकलभोगाधिकरणवृत्तित्वं तत्र भोगानधिकरणावृत्तित्वं नास्ति भोगाधारत्व एव व्यभिचारादिति कृत्वा साध्यव्याप्यहेत्वव्यापकत्वेनोपाधेः साध्याव्यापकत्वात्। तथा चोपाधेरपि साध्याव्यापकत्वान्नायमुपाधिरित्यत आह - **अन्यथेति** टीका। यदि भोगाधारत्वमपि भोगसमवायिकारणातिरिक्तवृत्ति तदा रूपाधारत्वमपि रूप-

१. आख्यातुमशक्यत्वेऽपि तस्य प्रत्याख्यातुमशक्यत्वात् अनिर्वचनीयत्वमेव। इति प्रतौ टिप्पणी।

समवायिकारणातिरिक्तवृत्ति स्यात्, तत्रापि रूपाधारत्वं रूपसमवायिकारणातिरिक्तवृत्ति सकलरूपाधिकरणवृत्तित्वात् प्रमेयत्ववत् इति अनुमानसम्भवात्। तथा च यथा रूपाधारत्वं रूपसमवायिकारणातिरिक्तवृत्ति न भवति तद्वत् भोगधारत्वमपि भोगसमवायिकारणातिरिक्तवृत्ति न भवति इत्याशङ्कार्थः। मूले तार्किकरीतिरित्यनेन किमप्युत्तरं नास्तीत्यतः पूरयति - **तथा चेति**। एवं च शरीरे सुखमिति प्रत्ययवत् वायौ रूपमिति प्रत्ययाभावात् भोगाधारत्वस्यैव भोगसमवायिकारणातिरिक्तं यच्छरीरं तद्वृत्तित्वम्, न तु रूपाधारत्वस्य रूपसमवायिकारणातिरिक्तवृत्तित्वं तथा प्रतीतेरभावात्। इत्यनुकूलतर्कसहकारादेव हेतौः साध्यव्याप्यत्वे उपाधेः साध्याव्यापकत्वादत एव रूपाधारत्वप्रतिबन्द्यपि न भवेत् तत्र हेतोः सकलरूपाधिकरणवृत्तित्वस्य [118 B] रूपसमवायिकारणातिरिक्तवृत्तित्वरूपसाध्यव्याप्यत्वग्राहकानुकूलतर्काभावात् तत्रोपाधी रूपानधिकरणवृत्तित्वं भवत्येव प्रकृतेऽनुकूलोक्ततर्कस्य विद्यमानत्वान्नोपाधिरित्यर्थः। अत एवाह - **तर्केणेति** टीका। शरीरे सुखमिति प्रतीतिरूपतर्केणेत्यर्थः। तथा च यदि सकलभोगाधिकरणवृत्तित्वं भोगसमवायिकारणातिरिक्तवृत्ति न स्यात् तदा शरीरे सुखमिति प्रत्ययो न स्यात्। रूपाधारत्वमित्युक्तप्रतिबन्दी निरस्यति। **अत एवेति** टीका। तत्रैतादृशतर्काभावादिति। यथा भोगासमवायिनि शरीरे सुखमिति प्रत्ययो जायते तद्वत् रूपासमवायिनि आकाशादौ नीलपीतादिप्रत्ययाभावात् न रूपसमवायिकारणातिरिक्तवृत्ति रूपाधारत्वमिति। व्याख्यान्तरमुद्भावयति - **केचित् त्विति** टीका। **संसारीति** टीका। संसार्यात्मत्वे सन्दिग्धव्यभिचारः प्राप्तः तदर्थं तार्किकरीतिरित्युक्तम्। कथम्? संसार्यात्मत्वे भोगसमवायिकारणातिरिक्तवृत्तित्वं नास्ति। कथम्? यतो यावत्संसारी आत्मा तावत् भोगवानेवेत्येव। भोगसमवायिकारणातिरिक्तवृत्तित्वं नास्तीति हेतोः साध्याभाववत्तया निर्णीते हेतोः यदा सकलभोगाधिकरणवृत्तित्वस्य सन्देहो जातस्तदा व्यभिचारोऽपि सन्दिग्धः, अत एवाह - **साध्याभाववत्तयेति** टीका। तथा च साध्याभाववत्तया निर्णीतेऽधिकरणे हेतुसन्देहस्यैव सन्दिग्धव्यभिचारत्वादित्यर्थः। तथा च तार्किकरीतिरित्यनेन किमुक्तमित्यत आह - **तथा चेति** टीका। उक्ततर्कः शरीरे सुखप्रत्ययो न स्यादिति रूपः। तथा च सकलभोगाधिकरणवृत्तित्वस्य भोगसमवायिकारणातिरिक्तवृत्तित्वस्य च व्याप्तिर्यदि न स्यात् तदा शरीरे सुखमिति प्रत्ययो न स्यात्, ततोऽनेनानुकूलतर्केणोक्तव्यभिचारसन्देहे निरस्ते सुकर एव [हेतु]साध्ययोर्व्याप्तिग्रहो भवतीति समाधानान्तरार्थः। इति टीकायां समाप्तो द्वितीयो व्यतिरेकी।

**अथेच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति गुणत्वात् यन्नैवं तन्नैवं यथानाश्रितमष्टद्रव्याश्रितं वेति कथं व्यतिरेकी अष्टद्रव्यातिरिक्तद्रव्यस्य तद्वृत्तित्वस्य चाप्रतीतेर्व्यतिरेकाद्यनिरूपणात्। स्यादेतत् इच्छाया द्रव्याश्रितत्वेऽनुमिते पृथिव्यादौ**

**बाधानवतारदशायां विप्रतिपत्तिवाक्याद् आश्रितत्वादिसाधारणधर्मदर्शनात् वा तद्द्रव्यमष्टद्रव्यातिरिक्तं न वेति सन्देहेनाष्टद्रव्यातिरिक्तद्रव्योपस्थितिः। यद्वा इच्छा अष्ट-द्रव्यातिरिक्ताश्रिता न वेति संशयात् इच्छाया अष्टद्रव्यातिरिक्ताश्रयोपस्थितौ पश्चाद् इच्छाश्रयोऽष्टद्रव्यातिरिक्तद्रव्यं न वेति संशयादष्टद्रव्यातिरिक्तद्रव्योपस्थितिः। अथ वा द्रव्याश्रिता इच्छा अष्टद्रव्यातिरिक्तद्रव्यवृत्तिर्न वेति पूर्ववत् संशयादष्टद्रव्यातिरिक्त-द्रव्यवृत्तित्वं प्रसिद्धमिच्छायाः साध्यते संशयप्रसिद्धमपि साध्यं व्यतिरेकादिनिरूपकं साध्यज्ञानमात्रस्य कारणत्वात्। न चैवं संशयादेव पक्षे साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यम्, निश्चयार्थं तत्प्रवृत्तेरिति। मैवम्।**

अथ तृतीयमाह। मूले **इच्छेति**। अष्टद्रव्यातिरिक्तं यद् द्रव्यं तदाश्रितेति साध्यार्थः हेतौ। अष्टद्रव्येष्वनाश्रितत्वे सति गुणत्वादिति हेतुः। साध्ये द्रव्याश्रितत्वमात्रे उक्ते पृथिव्यादिवृत्तिनी एवेच्छा भविष्यती[त्य]र्थान्तरमित्यतोऽष्ट-द्रव्यातिरिक्तेति पदम्, पृथिव्यादिकं चाष्टद्रव्यमध्य एवास्तीति। अष्टद्रव्यातिरिक्तगुणादिवृत्तित्वेनार्थान्तरवारणाय द्रव्येति पदम्। हतो(तौ) गुणत्वादिति उक्ते रूपादौ व्यभिचारि, गुणत्वं तत्र वर्तते अष्टेत्यादि साध्यं नास्तीति। अष्टद्रव्यानाश्रितेति अवृत्तिनि आकाशे व्यभिचारवारणाय गुणपदम्। व्यतिरेकव्याप्तिमाह - **यत्रैवमिति**। अन्वयव्याप्तिस्तु नास्ति। यत्र यत्र पृथिव्याद्यष्टद्रव्यानाश्रितत्वे गुणत्वं तत्र तत्र अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं कुत्रापि प्रसिद्धं नास्ति, इच्छादीनामात्मविशेषगुणानां पक्षीकृतत्वात्, इति कृत्वा व्यतिरेकव्याप्तौ रूपं दृष्टान्तः। [119 A] **कथमिति** मूलम्। पूर्वपक्षी वदति कथं व्यतिरेकव्याप्तिग्रहः?। कुतो न ग्रह इत्यत आह - अष्टद्रव्याति-रिक्तद्रव्याश्रिता इच्छा इत्यत्र अष्टद्रव्याणि पृथिव्यादीनि तदतिरिक्तं द्रव्यं प्रसिद्धं नास्ति। अथ चाष्टद्रव्यातिरिक्तद्रव्य-वृत्तित्वमपि प्रसिद्धं नास्ति, आत्मनोऽद्याप्यसिद्धिः। महाशङ्कामध्ये शङ्कते - **स्यादेतदिति**। **इच्छेति** मूलम्। अत्र सामान्यत इच्छाया द्रव्याश्रितत्वानुमानात् द्रव्याश्रितत्वं सिद्धम्, ततश्च पृथिव्यादिवृत्तित्वे बाधकानवतारदशायां यदा इच्छायाः पृथिव्यादिवृत्तित्वे बाधकोपस्थितिर्नास्ति तदा विप्रति[पत्ति]वाक्याद् द्रव्याश्रिता इच्छा अष्टद्रव्य-वृत्तिर्न वा अष्टद्रव्यातिरिक्तवृत्तिर्न वेति रूपात्। अथ वा आश्रितत्वं यः साधारणो धर्मो यत आश्रितत्वम् आश्रय-त्वमित्यर्थः। तथा चाश्रयत्वमष्टद्रव्येष्वपि वर्तते अष्टद्रव्यभिन्नेष्वपि गुणादिष्वपि वर्तते तादृशाश्रयत्वस्य साधारणधर्मदर्शनात्। तत इच्छाश्रयो द्रव्यम् अष्टद्रव्यातिरिक्तं न वेति सन्देहात् अष्टद्रव्यातिरिक्तं द्रव्यमुपस्थितं भवति, यथा स्थाणुर्वा पुरुषो वेत्यादिसंशये उच्चत्वादिसाधारणधर्मदर्शनात् स्थाणुर्वा पुरुषो वेत्यादिसंशयो जायते यत उच्चत्वं पुरुषस्थाण्वोः साधारणो धर्मस्तद्वत् आश्रयत्वम् अष्टद्रव्येषु पृथिव्यादिष्वपि वर्तते तदतिरिक्ते

गुणादावपि वर्तते इति साधारणधर्मदर्शनात्। अथ इच्छाश्रयो द्रव्यमष्टद्रव्यातिरिक्तं न वेति सन्देहात् अष्टद्रव्यातिरिक्त-द्रव्यस्योपस्थितिर्जाता, एतावता सन्देहरूपा साध्यप्रसिद्धिर्जाता, पूर्वम् अष्टद्रव्यातिरिक्तद्रव्यस्योपस्थितौ सत्यां तद्द्रव्याश्रितत्वमनुमीयते इच्छायाः। यथा इच्छा अष्टद्रव्यातिरिक्तेत्यादिप्रकारान्तरेणापि साध्यप्रसिद्धिं शङ्कते - **यद्वेति**। इच्छा अष्टद्रव्यातिरिक्ताश्रिता न वा इति संशयात् अष्टद्रव्यातिरिक्ताश्रितत्वं गुणत्वादौ प्रसिद्धं पश्चात् तत् इच्छायाम् अष्टद्रव्यातिरिक्ताश्रितत्वस्य सन्देहो भवत्येवोक्तरूपः, तथा च सन्देहात् उक्तरूपात् अष्टद्रव्यातिरिक्त-स्याश्रयस्योपस्थितिर्जाता, ननु तथाप्यष्टद्रव्यातिरिक्तोपस्थितौ सत्यामपि अष्टद्रव्यातिरिक्तद्रव्योपस्थितिस्तु न जातेत्यत आह - **पश्चादिति** मूलम्। तथा चेच्छाश्रयोऽष्टद्रव्यातिरिक्तो द्रव्यं न वा इति सन्देहात् अष्टद्रव्यातिरिक्त-द्रव्यस्याप्युपस्थितिर्जातैव एतावताऽयमर्थः। देवदत्तो रक्तदण्डवान् न वेति सन्देहो जायते तद्वत् प्रकृतेऽपि पूर्वम् इच्छाश्रयो द्रव्यमष्टद्रव्यातिरिक्तं न वेति सन्देहो द्रव्यविशेष्यकोऽष्टद्रव्यातिरिक्तप्रकारकः इत्येवंरूपात् संशयात् [119 B] अष्टद्रव्यातिरिक्तद्रव्योपस्थितिरिति प्रथमः पक्षः। **यद्वेति** द्वितीयपक्षे इच्छाश्रयो योऽष्टद्रव्यातिरिक्तो धर्मी तद्विशेष्यकद्रव्यत्वप्रकारकसंशयात् अष्टद्रव्यातिरिक्तद्रव्योपस्थितिरिति विशेषः। यथा इच्छाश्रयोऽष्टद्रव्यातिरिक्तं द्रव्यं न वा पूर्वस्मिन् तु इच्छाश्रयो द्रव्यम् अष्टद्रव्यातिरिक्तं न वेति भेदः द्वयोः संशययोरिति। तथा चोक्तसन्देहरूपैव साध्यप्रसिद्धिरिति भावः। ततः किमित्यत आह - **अथ वेति** मूलम्। **पूर्ववदिति** मूलम्। पूर्ववत् सन्देहस्य स्वरूपं यथा इच्छा अष्टद्रव्यातिरिक्तद्रव्यवृत्तिर्न वा इति सन्देहस्वरूपम्, ततोऽपि किमित्यत आह - **अष्टेति**। अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं सन्देहादुक्तरूपात् प्रसिद्धमिच्छायां साध्यते। ननु तथाप्यनुमाने सन्देहरूपा साध्यप्रसिद्धिर्नाङ्गं किन्तु साध्यनिश्चयरूपैव। तथा च साध्यनिश्चयाभावे कथमनुमानमित्यत आह - **संशय-प्रसिद्धमपीति** मूलम्। तथा च संशयप्रसिद्धमपि साध्यं व्यतिरेकव्याप्त्यादिनिरूपकं भवत्येव। न ह्यभावज्ञाने प्रतियोगिनिश्चयत्वेन कारणता किन्तु प्रतियोगिज्ञानत्वेनैव, प्रतियोगिज्ञाने तु सन्देहरूपमपि भवत्येवेति व्यतिरेकव्याप्तिप्रवृत्तिर्भविष्यत्येवेत्यर्थः। अत्राशङ्कते - **न चैवमिति** मूलम्। तथा च संशयरूपा या साध्यप्रसिद्धिः सा पूर्वोक्तरीत्या पक्षमिच्छारूपमादायैव पर्यवसन्ना। कथम्? यतः पूर्ववत् संशयात् अष्टद्रव्यातिरिक्तद्रव्योपस्थितिः पश्चादिच्छा यद् अष्टद्रव्यातिरिक्तं द्रव्यं तदाश्रिता न वा इति सन्देहात्। अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वरूपसाध्य-प्रसिद्धिस्तु पक्षे एव इच्छायामेव संशयरूपा साध्यप्रसिद्धिः, तथा च पक्षे साध्यप्रसिद्धौ अनुमानं व्यर्थमित्याशङ्कार्थः। समाधत्ते - **निश्चयार्थमिति** मूलम्। तथा च यद्यपि पक्षे साध्यसन्देहो जातस्तथापि साध्यनिश्चयस्तु न जात इति साध्यनिश्चयार्थमनुमानमेतदिति स्यादेतदित्यारभ्याशङ्काग्रन्थार्थः।

अथ टीका। **आश्रितत्वादिति** मूले। आश्रितत्वम् अष्टद्रव्यातिरिक्ततद्भिन्नस्य न साधारणो धर्मः, यतोऽष्ट-द्रव्यातिरिक्तस्यात्मादेर्गुणाश्रयत्वं वर्तते न तु गुणाश्रितत्वम् इत्यसम्भवादन्यथा मूलं व्याचष्टे - **आश्रयत्वेति**

टीका। तथा चाश्रयत्वमेव द्रव्यनिष्ठः साधारणो धर्मो वर्तते एव, तेन साधारणधर्मदर्शनेन पश्चात् सन्देहो जायत इति नानुपपत्तिः।

**संशयेन साध्यप्रसिद्धावपि तद्व्यतिरेकनिश्चयासम्भवात् साध्यव्यतिरेक-तद्व्याप्तिनिश्चयस्य साध्यनिश्चयसाध्यत्वात् साध्यसन्देहे तद्व्यतिरेकादिसंशया-वश्यम्भावात्। किञ्च सन्देहोपस्थितसाध्यस्य व्यतिरेकिनिरूपणं न योग्यानुपलम्भात् साध्यनिश्चयं विना योग्यानुपलम्भासम्भवात्। नापि व्यापकाभावात्, साध्यनिश्चयं विना तद्व्यापकत्वनिश्चयाभावात्।**

अथ मूलम्। **संशयेने**ति मूलम्। तथा च संशयरूपा साध्यप्रसिद्धिर्नाङ्गम्। तत्र हेतुर्यथा - **तद्व्यतिरेके**ति। साध्यसंशये सति साध्यव्यतिरेकनिश्चयो न सम्भवति। कुत इत्यत आह - **साध्यव्यतिरेक-तद्व्याप्तिनिश्चयस्ये**ति। साध्यव्यतिरेकश्च साध्यव्यतिरेकव्याप्तिश्च [120 A] साध्यव्यतिरेकतद्व्याप्ती तयोर्निश्चयस्य साध्यनिश्चयाधीनत्वात्। ननु साध्यसन्देहेऽपि साध्यव्यतिरेकनिश्चयो भविष्यतीत्यत आह - **साध्यसन्देहे** इति। तथा च साध्यसन्देहत्वेन साध्यव्यतिरेकसन्देहत्वेन कार्यकारणभावः, साध्यनिश्चयत्वेन साध्यव्यतिरेकनिश्चयत्वेन कार्यकारणभावः। नन्वन्वयव्यतिरेकाभ्यां साध्याभावनिश्चयं साध्यप्रतिज्ञानत्वेनैव कार्यकारणभावोऽस्त्वित्यत आह - **किञ्चे**ति मूलम्। **सन्देहे**ति मूलम्। तथा च सन्देहरूपा साध्यप्रसिद्धिर्योग्यानुपलम्भमादाय न व्यतिरेकनिश्चायिका। कुत इत्यत आह - **साध्यनिश्चयं विने**ति मूलम्। तथा च साध्यनिश्चयं विना योग्यानुपलम्भ एव नास्ति, ततो व्यतिरेक-व्याप्तिनिरूपणं न भवतीत्यर्थः। हेत्वन्तरमाह - **नापी**ति। साध्यव्यापकाभावात् साध्यव्यतिरेकनिश्चयोऽपि न भवति। साध्यव्यापकं साध्यसामग्र्यादिकम्, तदभावादपि न साध्यव्यतिरेकनिश्चयः यतः साध्यः (ध्य) निश्चया-भावेऽपि साध्यव्यापकत्वमपि निर्णेतुं न शक्यते। यतः साध्यव्यापकत्वं नाम साध्यसमानाधिकरणात्यन्ताभावा-प्रतियोगित्वं तथा च साध्यानिर्णये साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमपि कथं निर्णेतुं शक्यम् तथा च प्रकृते साध्यानिर्णये साध्यव्यापकत्वमपि निर्णेतुं न शक्यते। ततः साध्यव्यापकत्वानिर्णये साध्यव्यापका-भावनिर्णयोऽपि न सम्भवतीति न व्यतिरेकव्याप्तिनिर्णयः।

अथ टीका। साध्यनिश्चयाभावयोग्यानुपलब्धिः कथं नास्तीत्यत आह - **तत्तद्व्याप्ये**ति टीका। तथा च योग्यानुपलब्धेर्लक्षणं प्रतियोगिप्रतियोगिव्याप्येतरसकलप्रतियोग्युपलम्भकसमवधाने याऽनुपलब्धिः सा योग्यानु-पलब्धिः। यथा घटाभावनिश्चये प्रतियोगी घटः, घटव्याप्यो घटेन्द्रियसन्निकर्षः, तथा च प्रतियोगी घटः प्रति-योगिव्याप्यो घटेन्द्रियसन्निकर्षः, एतदुभयातिरिक्तयावन्ति घटोपलम्भकानि अधिकरणालोकादीनि तेषां सर्वेषां

समवधाने सति या घटस्यानुपलब्धिः घटादर्शनं सा योग्यानुपलब्धिः। यथा घटग्राहकाणि आलोकचक्षुरिन्द्रियादीनि वर्तन्ते परं घटस्तु नोपलभ्यते इति कृत्वा सा योग्यानुपलब्धिरिति पारिभाषिकी संज्ञा। व्यावृत्तिरत्र यथा अनुपलब्धिरित्युक्ते पृथिवीपरमाणौ जलपरमाणौ जलपरमाणुरूपाभावोऽपि प्रत्यक्षः स्यादनुपलब्धिसत्त्वादित्यत उक्तं प्रतियोगिग्राहकसमवधान इति तत्र च प्रतियोगिनो जलरूपस्यातीन्द्रियत्वात् तत्प्रतियोगिग्राहकसमवधानमेव नास्ति। अथ प्रतियोगिग्राहकसमवधाने सति याऽनुपलब्धिः सा योग्यानुपलब्धिरित्येवास्तु, तर्हि अन्धकारे प्रतियोगिग्राहकशरीरात्मादेः सत्त्वात् या घटानुपलब्धिः साऽपि योग्यानुपलब्धिः [120 B] स्यादित्यत आह - सकलेति। अथ सकलप्रतियोग्युपलम्भकसमवधाने याऽनुपलब्धिः सा योग्यानुपलब्धिः इत्युक्तेऽसम्भवः सकलप्रतियोग्युपलम्भकसमवधानेऽनुपलब्धेरभावात्, अत उक्तम् - **प्रतियोगिप्रतियोगिव्याप्येतरे**ति। तथा च सकलप्रतियोग्युपलम्भकं कीदृशं विवक्षितम्? तथा च प्रतियोगिव्याप्यः प्रतियोगीन्द्रियसन्निकर्षः तस्य सत्त्वेऽनुपलब्धिरेवाप्रसिद्धाऽत आह - **प्रतियोगिव्याप्येतरे**ति। तथा च सकलप्रतियोग्युपलम्भकं कीदृशं विवक्षितम्? प्रतियोगिव्याप्येतरद्विवक्षितम्। तथा च प्रतियोगिव्याप्यः प्रतियोगीन्द्रियसन्निकर्षः तदतिरिक्तसकलप्रतियोग्युपलम्भकसमवधानेऽनुपलब्धिर्भवत्येव। ननु तथाप्यभावग्रहो यत्र जायते तत्र प्रतियोगिव्याप्येतरसकलप्रतियोग्युपलम्भकसमवधानमेव नास्ति प्रतियोगिनोऽभावादित्यसम्भवः स्यादित्यत आह - **प्रतियोगी**ति। तथा च प्रतियोगिप्रतियोगिव्याप्येतरसकलतदुपलम्भकसमवधाने याऽनुपलब्धिः सा योग्यानुपलब्धिरिति सम्पूर्णेऽपि लक्षणे प्रतियोगिप्रतियोगिव्याप्येतरसकलसंशयरूपप्रतियोग्युपलम्भजनकसमवधाने संशयरूप एवोपलम्भो भविष्यति अनुपलम्भ एव न भविष्यतीति। यथा वस्तुगत्या पुरुषत्वाभाववति स्थाणौ पुरुषपुरुषत्वव्याप्येतरसकलानि यानि पुरषत्वस्य प्रतियोगिनः संशयरूपोपलम्भजनकसांशयिकानि तेषां समवधानेऽनुपलब्धिरेव नास्ति। सांशयिकानि संशयसामग्रीरूपाणि, तत्समवधाने संशय एव भविष्यतीत्यतः सकलनिश्चायकसमवधाने इति। तथा च प्रतियोगिव्याप्येतरसकलनिश्चायकसमवधाने याऽनुपलब्धिः सा योग्यानुपलब्धिः, संशयस्थले पुरुषत्वनिश्चायकसामग्र्यभावान्न तत्र पुरुषत्वानुपलम्भः किन्तु तत्र पुरुषत्वोपलम्भ एवेति। एवं चेत् साध्यनिश्चयः कुत्रापि नास्ति, तदा प्रतियोगीत्यादिसकलनिश्चायकैतद्रूपाऽनुपलब्धिरेव नास्ति कथं तत्र साध्याभावनिश्चयः स्यादिति टीकार्थः। **तस्येति** टीका। योग्यानुपलम्भस्य क्वचिदधिकरणान्तरे निश्चायकसद्भावे निश्चयजनकसमवधाने आत्मलाभो योग्यानुपलब्धिलाभः सम्भवति। यदि च कुत्रापि साध्यनिश्चयो न स्यात् तदा साध्यनिश्चयाप्रसिद्धौ साध्यनिश्चायकस्याप्यप्रसिद्धा(द्धिः) नु(अतः) योग्यानुपलब्धिस्वरूपं न सम्भवत्येवेत्यत आह - **अन्यथे**ति। यदि साध्यनिश्चयः कुत्रापि नास्तीत्यन्यथेत्यस्यार्थः। ननु किमर्थं निश्चयघटिता विवक्षा [121 A] कर्तव्या? प्रतियोगितद्व्याप्येतरभ्रमरूपप्रतियोग्युपलम्भजदोषजनकदोषसमवधाने प्रतियोग्यनुपलब्धिरेव नास्ति, दोषे सति

प्रतियोग्युपलम्भ एव जायते। **दोषेतरेति**। सकलप्रतियोग्युपलम्भकेत्यत्र विशेषणं देयम्, तथा च दोषेतरपदेनैव संशायकदोषरूपसंशयसामग्रीवारणे किमर्थं निश्चयघटिता विवक्षा कर्तव्या इत्यस्वरसादाह - **वस्तुत** इति टीका। तथा च तुष्यतु दुर्जनः इति न्यायेन भवतु संशयरूपा साध्यप्रसिद्धिरप्यनुमानाङ्गम्। अन्वयव्यतिरेकाभ्यां साध्यज्ञानत्वेन साध्यप्रसिद्धेरनुमानाङ्गत्वं तथापि संशयरूपापि साध्यप्रसिद्धिर्न सम्भवति। कुतः ? संशयेऽपि उभयकोटिप्रसिद्धिरेव कारणम्, तथा च कोटेः कुत्रापि चेन्निश्चयो नास्ति तदा संशयो न भवत्येव। ननु पूर्वपूर्वसंशयादेव कोटिप्रसिद्धिरुत्तरोत्तरसंशयजनिका भविष्यतीति चेन्न मूलभूतनिश्चयस्य कुत्राप्यभावे निश्चयमूलकपूर्वपूर्वसंशयस्याप्यभावात् मूलभूतनिश्चयसत्त्वे वा निश्चयरूपैव साध्यप्रसिद्धिर्भविष्यति, किमर्थं संशयरूपसाध्यप्रसिद्ध्यनुसरणमित्याह - **सिद्धौ वेति** टीका। तथा च साध्यनिश्चयरूपैव साध्यप्रसिद्धिरङ्गम्, किमर्थं संशयरूपा सेत्यर्थः।

**न च यदीच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता न स्यादष्टानाश्रिता सती द्रव्याश्रिता न स्यात् रूपवदिति साध्यविपर्ययकोटौ प्रतिकूलतर्कसहकृतः साध्यसंशय एव निश्चयकार्यं करोति, अत एवैतादृशसंशयोपस्थितकल्पितडित्थादिसाधनमप्यपास्तम्, तद्विपर्यये प्रतिकूलतर्काभावादिति वाच्यम्। साध्यनिश्चयं विना साध्यव्यतिरेकनिश्चयतन्मूलतर्कानवतारात्, अन्यथा अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वनिरूपणे तर्कोदयस्तर्कोदये च तत्सहकृतसाध्यसंशयस्य साध्यव्यतिरेकनिश्चायकत्वमिति। उच्यते। इच्छाश्रयद्रव्यसिद्धौ पृथिव्यादाविच्छाधारताऽभावे तद्द्रव्यं पृथिव्याद्यष्टद्रव्यभिन्नम् अष्टद्रव्यावृत्तिधर्मवत्त्वात् पृथिव्यादित्वे बाधकसत्त्वात् वा इत्यष्टद्रव्यातिरिक्तद्रव्यसिद्धाविच्छायामष्टद्रव्यातिरिक्तद्रव्यवत्त्वमष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं वा साध्यते साध्यप्रसिद्धिर्द्रव्यत्वे इच्छाविशेष्यकाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रतीतेर्व्यतिरेकिसाध्यत्वात्, तथापीच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् अष्टद्रव्यातिरिक्तद्रव्यत्ववदिति साध्यप्रसिद्ध्यैव दृष्टान्तसिद्धेरन्वयी हेतुः स्यादिति चेत्। न। अन्वयव्याप्त्यप्रतिसन्धाने व्यतिरेकव्याप्तिप्रतिसन्धानदशायां व्यतिरेकिसम्भवात्। न च द्रव्यत्वादेः सपक्षात् व्यावृत्तावसाधारण्यम्, तद्धि साध्य-तदभावोभयसाधकत्वेन सत्प्रतिपक्षोत्थापकतया दोषावहं प्रकृते च न हेतोः साध्याभावसाधकत्वं विपक्षे बाधकाभावात् साध्य-**

**साधकत्वे तत्सत्त्वात्, अत एव यावदेकत्रानुकूलतर्को नावतरति तावदेव दशाविशेषेऽसाधारण्यं दोष इत्युक्तं सुवर्णतैजसत्वसाधकव्यतिरेकिणि शब्दोऽनित्यः शब्दत्वात् इत्यादावपि तथा।**

अथ मूलम्। साध्यप्रसिद्ध्यर्थं प्रकारान्तरमप्याशङ्कते - **न चेति**। इच्छेत्यादि आपादकम्, येनापाद्यते साध्यते तदापादकं साधकम्। अष्टद्रव्यानाश्रितेत्यादि आपाद्यम्। आपाद्ये सत्यन्तम्। तथा इच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता न स्यादित्येवास्तु इत्युच्यमाने रूपादौ व्यभिचारः। कुतः ? रूपादेरष्टद्रव्यातिरिक्तद्रव्याश्रितत्वाभावेऽपि यथाऽष्टद्रव्यातिरिक्तं द्रव्यमात्मा तदाश्रितत्वाभावेऽपि द्रव्यं यत् पृथिव्यादि तदाश्रितत्वस्य विद्यमानत्वात् व्यभिचार इत्यत उक्तं सत्यन्तम्। सत्यन्तमात्र एवोक्ते यत्र यत्र अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वाभावस्तत्र तत्र अष्टद्रव्यानाश्रितत्वाभाव एवं व्याप्तिर्नास्ति रूपत्वादौ व्यभिचारात्। अत उक्तं द्रव्याश्रिता न स्यादिति। रूपत्वादौ तु यद्यप्यष्टद्रव्यानाश्रितत्वाभावो नास्ति तथाप्यष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वाभावस्तु वर्तते। रूपत्वादिकं तु द्रव्याश्रितं न भवत्येवेति, एतावताऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वरूपसाध्यप्रसिद्धिः कथमागतेत्यत आह - **साध्यविपर्ययेति**। प्रकृतानुमानेऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वरूपं यत् साध्यं तस्य विपर्ययोऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वाभावरूपः। तद्रूपा या संशयकोटिर्यथाऽष्टद्रव्यातिरिक्तद्रव्याश्रिता न वेति संशये वह्न्यभावकोटौ प्रतिकूलतर्कस्तिष्ठति। यथा वह्न्यभावे [121 B] धूमो न स्यादिति तर्कवत् प्रकृते इच्छाऽष्टद्रव्यातिरिक्तद्रव्याश्रिता न स्यात् तदा अष्टद्रव्यानाश्रिता सती द्रव्याश्रितापि न स्यात् इति साध्यविपर्ययकोटौ प्रतिकूलस्तर्कोऽयमेव। एतत्सहकृतसाध्यसंशय एव साध्यनिश्चयकार्यं व्याप्तिज्ञानादि करोति। यथा स्थाणुत्वांशे बाधकावतारसहायेन स्थाणुर्वा पुरुषो वेति संशयेनैव यथा निश्चयकार्यं प्रवृत्त्यादिकं भवति तद्वत् प्रकृते साध्याभावांशे उक्तरूपप्रतिकूलतर्कसहकृतेन संशयेनैव साध्यनिश्चयकार्यं व्यतिरेकज्ञानादिकं क्रियते, तथा च साध्यनिश्चयाभावेऽपि उक्तरूपव्यतिरेकव्याप्तिज्ञानादिकं भविष्यतीत्यर्थः। ननु अनयैव रीत्याऽप्रसिद्धडित्थाद्यनुमानमपि स्यादित्यत आह - **अत एवेति** मूलम्। यत एव तर्कसहकृतः संशयोऽपि निश्चयकार्यं करोति अत एवेत्यर्थः। एवं च संशयरूपसाध्यप्रसिद्धिमूलकडित्थाद्यनुमानमपि स्यादित्यर्थः। तथा च यथा संशयमूलकं यथाऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वस्यानुमानं तथा संशयमूलकेनानुमानेन डित्थोऽपि कथं न साध्यत इति भावः। कथमपास्तमित्यतस्तदेव स्पष्टयति - **तद्विपर्ययेति**। डित्थाद्यभावकोटिके संशये यथाऽयं डित्थो न वेति प्रतिकूलतर्को नास्ति डित्थत्वस्य व्याप्यानिर्णयात्। इदमापाततो वस्तुतस्तु डित्थस्याप्रसिद्ध्या डित्थकोटिकः संशय एव न सम्भवति। अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वरूपसाध्यस्य घटका ये पदार्था द्रव्यम् अथाश्रितत्वमित्यादयस्तेषां तु प्रसिद्धिर्वर्तते इत्येवं परं विशेषः।

न चेत्यारभ्याशङ्कार्थः। पूर्वपक्षी दूषयति - **साध्येति** मूलम्। तथा च साध्यनिश्चयाभावे साध्यव्यतिरेकनिश्चयमूलको यथा अष्टद्रव्यातिरिक्तद्रव्याश्रिता न स्यादिति साध्याभावनिश्चयो न स्यादित्यर्थः। ननु उक्ततर्कसहकृतात् संशयादेव साध्यव्यतिरेकनिश्चयो भविष्यतीत्यत आह - **अन्यथेति**। यदि उक्तरूपतर्कसहकृतादेव साध्यव्यतिरेकनिश्चयस्तदा साध्यव्यतिरेकनिश्चये सति व्यतिरेकव्याप्तिज्ञानद्वारा अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वरूपनिरूपणे सति तर्कोदयस्तर्कोदये च सति तर्कसहकृतात् साध्यसंशयात् साध्यव्यतिरेकनिश्चयस्तथा च पूर्वं यदि केनापि प्रकारेण साध्यव्यतिरेकनिश्चयो भवति तदा उक्तरूपस्तर्कोदयस्तर्कोदये च सति साध्यव्यतिरेकनिश्चय इत्यन्योन्याश्रय इत्यर्थः। सिद्धान्ती वदति- **उच्यत** इति। **इच्छाश्रयेति**। इच्छा द्रव्याश्रिता गुणत्वात् इत्यनेन पूर्वमिच्छाया द्रव्याश्रितत्वं सिद्धं तत इच्छा न पृथिव्याश्रिता तदाश्रितत्वे [122 A] बाधकात् बाधकं च घटे इच्छासद्भावे चेष्टा स्यादिति। **तद्द्रव्यमिति** मूलम्। तथा च पृथिव्यादाविच्छाधारताबाधे सति इच्छाश्रयो द्रव्यं पृथिव्याद्यष्टद्रव्यातिरिक्तम् अष्टद्रव्यावृत्तिर्धर्म इच्छा तद्वत्त्वात्। अथवा तद् द्रव्यमिच्छाश्रयरूपं द्रव्यं पृथिव्यादिभिन्नम्, तस्य पृथिवीरूपत्वे बाधकवत्त्वात् इत्यनुमानेनाष्टद्रव्यातिरिक्तद्रव्यसिद्धौ पश्चात् इच्छा अष्टद्रव्यातिरिक्तद्रव्यका अथवा अष्टद्रव्यातिरिक्तद्रव्यवृत्तिरिति साध्यम्। नन्वत्राप्यष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वरूपं साध्यं कुत्रापि न प्रसिद्धमित्यत आह - **साध्यप्रसिद्धिरिति** मूलम्। साध्यस्योक्तरूपस्य सिद्धिर्द्रव्यत्वेऽस्ति न त्विच्छाश्रये द्रव्ये, अष्टद्रव्यातिरिक्तद्रव्यत्वे साध्यमानेऽष्ट-द्रव्यातिरिक्तद्रव्याश्रितत्वमपीच्छायाः सिद्धमेव यथा वह्नेः पर्वतवृत्तित्वे सिद्धे पर्वतस्यापि वह्निमत्त्वं सिद्धमेव। तथा च किमर्थं व्यतिरेक्यादर इत्यत आह - **इच्छेति** मूलम्। तथा च इच्छाविशेष्यकाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्व-प्रकारिका अनुमितिर्व्यतिरेकिसाध्येत्यर्थः। अत्राशङ्कते - **तथापीति** मूलम्। इच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता इत्यत्र पूर्वोक्तरीत्या यदि साध्यप्रसिद्धिस्तदा मूलस्थैतादृशानुमानादेव प्रसिद्धिर्वर्तते, तथा च पूर्वोक्तरीत्या साध्यं यत्र प्रसिद्धं तद् द्रव्यमष्टद्रव्यातिरिक्तमिति पूर्वोक्तानुमानादेव साध्यप्रसिद्धिसम्भवे नाष्टद्रव्यातिरिक्तद्रव्यत्वं दृष्टान्तीकृत्य [अ]न्वयी हे(ए)व हेतुः स्यादित्याशङ्कार्थः। समाधत्ते - **अन्वयव्याप्तीति** मूलम्। तथा चान्वय-व्याप्तिर्यदा न स्फुरति तदैव व्यतिरेक्यनुमानमित्यर्थः। आशङ्कते - **न चेति**। द्रव्यत्वरूपो यः सपक्षस्तत्र हेतुरष्ट-द्रव्यवृत्तित्वमपि द्रव्यत्वे वर्तते अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वमपि वर्तते यथा घटत्वस्य नीलघटवृत्तित्वमप्यस्ति नीलघटातिरिक्तपीतघटादिवृत्तित्वमप्यस्ति इति कृत्वा साध्यं तत्र वर्तते। हेतुरष्टद्रव्यानाश्रितत्वे सति गुणत्वं नास्तीत्यसाधारण इत्याशङ्कार्थः। समाधत्ते - **तद्धीति**। न तदसाधारण्यम्। **साध्येति** मूलम्। साध्यसाध्याभावोभय-साधकं यत् सत्प्रतिपक्षरूपमनुमानं तदुत्थापकतया दूषणं यथा घटो गन्धवान् घटत्वात्। अत्रान्वयव्याप्तिर्नास्ति घटमात्रपक्षीकरणात्। ततो यत्र गन्धवत्त्वाभावस्तत्र घटत्वाभावो यथा जले। अत्र गन्धसाध्यकानुमाने व्यतिरेक-व्याप्त्या गन्धवत्त्वं वा सिद्ध्यति किं वा यत्र गन्ध[ाभाव]स्तत्र घटत्वाभाव इति गन्धाभावसाध्यकव्यतिरेकव्याप्त्या

गन्धाभावो वा सिद्ध्यति। तथा च घटो गन्धवान् घटत्वात् इत्यत्र गन्धगन्धाभावोभयनिरूपितव्यतिरेकव्याप्तिमत्तया घटत्वेन गन्धो वा साधनीयो गन्धाभावो वा साधनीयो यतो नैकस्यापि निश्चयः परस्परप्रतिबन्धात्, अतः [122 B] प्रकृतेऽष्टद्रव्यानाश्रितत्वे सति गुणत्वं हेतुः सपक्षात् द्रव्यत्वात् व्यावृत्तमिति कृत्वा साध्याभावस्य व्यतिरेकव्याप्तिः साध्यम् अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं तदभाववत् रूपादिकमस्तीति विपक्षात् रूपादेर्व्यावृत्तमतः सपक्षात् व्यावृत्तमतः साध्याभावसाधकं विपक्षाच्च रूपादिकात् व्यावृत्तमतः साध्यसाधकं व्यतिरेकव्याप्त्यनुमानमिति प्रकारान्तरेणासाधारणस्य तुल्यबलत्वज्ञानदशायामेव दोषत्वम्। यदि तुल्यबलत्वं नास्ति किञ्चैकत्रानुकूलतर्क एकत्रानुकूलतर्कावतारो नास्ति तदा तुल्यबलत्वज्ञानाभावात् सत्प्रतिपक्षो न भवति। तथा च प्रकृते किमित्यत आह - **प्रकृते चे**ति मूलम्। प्रकृते इच्छाया अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वसाधनेऽनुकूलतर्कोऽस्ति। यथा इच्छा यदि अष्टद्रव्यातिरिक्तद्रव्याश्रिता न स्यात् तदा अष्टद्रव्यानाश्रितत्वे सति गुणोऽपि न स्यात् इति कृत्वा साध्यसाधकोऽनुकूलतर्कोऽस्ति परं साध्य(ध्या)भावसाधकोऽष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वाभावसाधनेऽनुकूलतर्को नास्ति। यथा इच्छा यदि अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वाभाववती न स्यात् तदा अष्टद्रव्यानाश्रितत्वे सति गुणोऽपि न स्यादित्येतादृशोऽनुकूलतर्कः साध्याभावसाधको नास्ति। कुतः ? साध्यसाधने व्यतिरेकव्याप्तिग्रहेऽनुकूलतर्कस्य पृथिव्यादाविच्छाधारत्वे प्रयत्नचेष्टाद्युपलम्भः स्यादिति रूपस्य सत्त्वात्। तथा च यदि पृथिव्यादाविच्छा स्यात् तदा प्रयत्नचेष्टादिकमपि तत्र स्यादिति कृत्वा साध्यसाधकानुमानेऽनुकूलस्तर्कस्तिष्ठति। एतदेवाह - **अत एवे**ति मूलम्। तथा च यदि उभयत्रानुकूलतर्कावतारो दैवाज्जायते ना(नी)रूपै(प ए)व तत्रैकतर[सा]ध्यनिश्चयः। यदि च साध्यांशेऽनुकूलतर्कावतारस्तदा साध्यानुमितिः, अतो ह्येकत्रानुकूलतर्कावतारे एकतरनिश्चय उभयत्र तदवतारेऽसाधारण्यं दूषणमित्यर्थः। ननु तुल्यबलत्वज्ञानदशायामेव सद्धेतोरप्यसाधारण्यं यदि तदाऽसाधारण्यं दशाविशेष एव दोषः स्यात् इत्यनित्यदोषत्वमस्य स्यादिति चेन्न इत्यत आह - **दशाविशेष** इति मूलम्। तथा चेष्टापत्तिरिति भावः। ननु तर्हि तुल्यबलत्वज्ञानदशायां सद्धेतोरपि चेदसाधारण्यं तदा शब्दोऽनित्यः शब्दत्वादिति प्रसिद्धानुमानेऽपि सत्प्रतिपक्षत्वं दोषः स्यात्। कथम् ? साध्यसाध्याभावोभयसाधकव्यतिरेकव्याप्तिग्रहदशायां तुल्यबलत्वज्ञानदशायां यथा यत्रानित्यत्वाभावस्तत्र शब्दत्वाभावो यथा आकाशे इयमनित्यत्वसाधिका व्यतिरेकव्याप्तिः, अनया व्याप्त्या किमनित्यत्वं सिद्ध्यति किं वा यत्र यत्रानित्यत्वं तत्र तत्र शब्दत्वाभावो यथा घटादौ इति कृत्वाऽत्र व्यतिरेकव्याप्तेस्तुल्यबलत्वदशायामयमप्यसाधारणः स्यादित्यत आह - **शब्दोऽनित्य** इति मूलम्। तथा चात्रापीष्टापत्तिरिति तथा शब्दार्थः।

अथ टीका। इच्छा द्रव्याश्रिता इत्यत्र सामान्यतोदृष्टानुमाने भवेत् [123 A] तदा द्रव्यत्वे वृत्तित्वं प्रकारो भवति। आश्रये द्रव्यत्वाश्रयत्वे भासमाने द्रव्यत्वेऽपि आश्रयवृत्तित्वं भासेत समानेति न्यायात्। ननु इच्छा द्रव्या-

श्रिता इत्यनुमाने द्रव्यत्वे वृत्तित्वं कथं प्रकारो न भवतीत्यत आह - **यदि चेति** टीका। इच्छा द्रव्याश्रिता इत्येव चेत् सामान्यतोदृष्टं तदा द्रव्याश्रिता इत्यत्र द्रव्यत्वस्य प्रकारतया द्रव्यत्वाश्रयत्वं द्रव्यवृतित्वलक्षणं वैशिष्ट्यमर्यादया भासते यथा घट इति विशिष्टबोधे घटत्वाश्रयत्वलक्षणं घटवृत्तित्वलक्षणं वैशिष्ट्यमर्यादया संसर्गमर्यादया भासते। ज्ञाने मर्यादा त्रिविधा, यद्भासते तत् प्रकारत्रयेणैव भासते, किञ्चिद् विशेष्यमर्यादया किञ्चित् प्रकारमर्यादया किञ्चित् संसर्गमर्यादया। यथा घटो विशेष्यमर्यादया, घटत्वं प्रकारमर्यादया, घटत्ववैशिष्ट्यं घटत्वाश्रयत्वरूपं संसर्गमर्यादया भासते। संसर्गमर्यादा च तेन रूपेणोल्लेखो नास्ति परं भासते यथा घट इत्युच्यमाने घट इति प्रत्यक्षानन्तरं वा घटत्वसमवाय इत्यस्यापि भानं परं नोल्लेख इति, अन्यथा घटत्वसमवायस्य प्रकारतया भाने घटोऽयमिति व्यवसायानन्तरं घटत्वसमवायं जानामीति बोधः स्यात्। तथा च द्रव्यत्वाश्रयाश्रितेत्यत्र द्रव्यत्वाश्रयत्वत्वस्य द्रव्यवृत्तित्वलक्षणस्य द्रव्यत्वे प्रकारतामर्यादया भानेन द्रव्यत्वे साध्यप्रसिद्धिसम्भवात्। इच्छा द्रव्याश्रिता इत्यनुमाने तु द्रव्यांशे द्रव्यत्वस्य प्रकारतया द्रव्यत्वाश्रयत्वलक्षणं वैशिष्ट्यं संसर्गमर्यादया भासते इति साध्यतावच्छेदकरूपेण द्रव्यवृत्तित्वरूपेण न द्रव्यवृत्तित्वप्रसिद्धिर्द्रव्यत्वे इति कारणात् द्रव्यत्वे साध्यप्रसिद्धिर्मूलकृता योक्ता सा व्यर्था स्यादित्यर्थः। **एवं चेति** टीका। अन्वयिनमित्युपलक्षणम् असाधारण्यमित्यपि द्रष्टव्यम्। तथा च यदि द्रव्यत्वे साध्यप्रसिद्धिरेव नास्ति तदा अष्टद्रव्यातिरिक्तद्रव्यत्वस्य सपक्षत्वाभावात् अन्वयित्वं न भवेत्, न वा द्रव्यत्वमात्रे हेतुव्यावृत्त्याऽसाधारण्यं साध्यस्यैवाप्रसिद्धेरित्यर्थः। ननु यदि इच्छा द्रव्यत्वाश्रयाश्रिता इत्यनुमाने भवतु द्रव्यत्वे द्रव्यवृत्तित्वस्य साध्यस्य प्रसिद्धिः। इच्छा द्रव्याश्रिता इत्यनुमाने तु कथं साध्यप्रसिद्धिर्द्रव्यत्वे यतो द्रव्याश्रिता इत्यत्र द्रव्यत्वाश्रयत्वेन रूपेण द्रव्यत्वाश्रयत्वस्य द्रव्यत्वांशे प्रकारतयाऽभानात्। तथा च साध्यस्य द्रव्यवृत्तित्वस्य कथं द्रव्यत्वे प्रसिद्धिरित्यत आह - **तस्मादिति**। तथा च यथा घटोऽयमिति बोधे घटत्वाश्रयत्वं घटवृत्तित्वलक्षणं घटेऽपि वर्तते यतो घटत्वाश्रयत्वं घटसम्बन्धः स च घटे घटत्वे च संसर्गमर्यादया भासते। ननु घटवृत्तित्वत्वेन प्रकारेण [123 B] घटत्वं तु प्रकारीभूय भासते। घटत्वाश्रयत्वं घटवृत्तित्वलक्षणं घटसम्बन्धरूपं घटवृत्तित्वरूपप्रकारेण घटत्वे भासते, तद्वत् द्रव्याश्रितेत्यनुमाने द्रव्यत्वाश्रयत्वं द्रव्यवृत्तित्वं द्रव्यसम्बन्धरूपं द्रव्यत्वे प्रकारतया यद्यपि न भासते तथापीच्छा द्रव्याश्रिता इत्यनुमाने इच्छायां तु द्रव्यवृत्तित्वं तु प्रकारो भवत्येवेतीच्छायामेव साध्यप्रसिद्धिर्द्रष्टव्येति भावः। **अत एवेति** टीका। यत इच्छायामेव साध्यप्रसिद्धिरत एव इच्छाविशेष्यकप्रतीत्यर्थमेव व्यतिरेक्यवतारः। यथा इच्छा द्रव्याश्रिता इत्यनुमानं तदनन्तरमिच्छाश्रयो द्रव्यम् अष्टद्रव्यातिरिक्तमत्राष्टद्रव्यातिरिक्ते इच्छाश्रयत्वे भासमाने अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वलक्षणं साध्यमिच्छायां प्रकारतया भासते परमिच्छाविशेष्यकाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारतया न भासते किन्तु इच्छाया आश्रयविशेषणत्वात् तत्रेच्छायामाश्रयत्वं नाम अष्टद्रव्यातिरिक्तद्रव्यसम्बन्धः प्रकारतया भासते, अत इच्छा आश्रयस्य

विशेषणतयैव भासते न तु स्वतन्त्रा। अन्यथेति टीका। यदीच्छायां साध्यप्रसिद्धिर्नास्ति तदा इच्छाविशेष्यक-प्रतीत्यर्थमिति किमर्थमुच्यते। तथा चेच्छायां साध्यप्रसिद्धिर्नास्ति तदा इच्छायां साध्यनिश्चयार्थमित्येव व्यतिरेक्यनु-मानमित्येव ब्रूयात् इत्यर्थः।

**अथाष्टद्रव्यबाधानन्तरं इच्छादौ गुणत्वादेवाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं सिद्ध्यति पक्षधर्मताबलात् प्रसिद्धविशेषबाधे सामान्यज्ञानस्य तदितरविशेषविषयत्वनियमात्, अत एवासर्वविषयानित्यज्ञानबाधानन्तरं क्षित्यादौ कार्यत्वेन ज्ञानजन्यत्वं सिद्ध्यन्नित्य-सर्वविषयत्वं ज्ञानस्यादायैव सिद्ध्यति इति चेत्। न। बाधानन्तरं ह्यष्टद्रव्यातिरिक्तद्रव्य-विषयाप्यनुमितिर्द्रव्याश्रितत्वप्रकारिका स्यात् अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारक-त्वनियमात्, न त्वष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारिका तस्य पूर्वमप्रतीतत्वेन प्रकारत्वा-सम्भवादिति तत्प्रकारिकानुमितिर्व्यतिरेकिणैव। अनाद्यनन्तद्व्यणुकादियावत्पक्षी-करणेऽनाद्यनन्ततावदुपादानगोचरापरोक्षज्ञानत्वमेव नित्यसर्वविषयकत्वमेतदन्य-नित्यसर्वविषयत्वं व्यतिरेकिण एव सिद्ध्यति, पक्षधर्मताबलेनापि व्यापकतावच्छेदक-प्रकारेण साध्यसिद्धिर्भवति न तु साध्यगतविशेषप्रकारिका अतिप्रसङ्गात्। नन्वष्टद्रव्या-नाश्रिता इच्छा द्रव्याश्रितेति यदि साध्यते तदा अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वमन्तरेण प्रतिज्ञार्थ एव नोपपद्यते, सत्यम्, एवमप्यष्टद्रव्यानाश्रितेच्छायां द्रव्याश्रितत्वं सिद्ध्यतु तस्याष्टद्रव्यातिरेक्यं कुतः सिद्ध्येत्। अथ सामान्याव्यभिचारमादाय मानान्तरोपनीतं तत्तदन्यत्वमुपजीव्याष्टद्रव्यान्यद्रव्यवृत्तितैवेच्छादेः परिच्छिद्यते ज्ञानान्तरोपस्थापित-विशेषणविशिष्टज्ञानस्य सुरभि चन्दनमित्यादौ दर्शनादिति चेत्। न। मानान्तरान्नियमेनानु-पस्थितेः। ये चेच्छाश्रये पृथिव्यादिभिन्नत्वं न जानन्ति इच्छायाश्च पृथिव्याद्यनाश्रितत्वं न जानन्ति तेषामप्यनुमानादित्यप्याहुः। अथ व्यतिरेकी नानुमानं सर्वत्र प्रमेयत्वादिना सत्प्रतिपक्षग्रस्तत्वादिति चेत्। न। विपक्षबाधकेन व्यतिरेकिणो बलवत्त्वात्।**

अथ मूलम्। प्राचां मतेन शङ्कते - अथेति मूलम्। इच्छायाः पृथिव्यादौ वृत्तित्वे यदा बाधकावतारस्तदा तादृशबाधकावतारसहायेन इच्छा द्रव्याश्रिता गुणत्वात् इत्यनुमानेनैव अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वस्य

प्रसिद्धिर्भवति। यथा द्रव्यं वह्निमत् धूमात् इत्यत्र ह्रदादौ बाधकावतारसहायेनानुमानेनानेन यथा ह्रदातिरिक्तद्रव्यवृत्तित्वं वह्नेः सिद्ध्यति तद्वत् पृथिव्यादाविच्छाया बाधकावतारसहायेन पूर्वोक्तानुमानेन अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं सिद्ध्यत्येव। अत्र नियामकमाह - **पक्षधर्मतेति** मूलम्। यथा पर्वतो वह्निमान् धूमात् इत्यत्र यत्र धूमस्तत्र वह्निरिति व्याप्त्या धूमाधिकरणे वह्निना भवितव्यम्। पर्वते कथं वह्निरत्रोच्यते - **पक्षेति**। यतो धूमस्य पर्वतरूपपक्षस्य धर्मत्वं तदनुरोधेन पर्वतीयवह्निः सिद्ध्यति, तथा प्रकृतेऽपि अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वस्य इच्छायां गुणत्वे पक्षधर्मताबलेन तद्व्याप्त्या साध्यसिद्धिर्भविष्यति इत्यर्थः। ननु पक्षधर्मताबलादपीच्छाया द्रव्याश्रयत्वमात्रं सिद्ध्यतु द्रव्याश्रयत्वस्यैव पक्षधर्मत्वात् कथमष्टद्रव्यातिरिक्तद्रव्याश्रयत्वसिद्धिस्तेन रूपेण व्याप्त्यग्रहादित्यत आह - **प्रसिद्धविशेषेति** मूलम्। [124 A] तथा च इच्छा द्रव्याश्रिता एतस्मिन्ननुमाने अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वसिद्धौ त्रीण्यङ्गानि - व्याप्तिः १, पक्षधर्मता २, विशेषबाधावतार ३ श्चेति। तथा च यत्र गुणत्वं तत्र द्रव्याश्रयत्वमिति व्याप्त्या द्रव्याश्रितत्वमात्रमिच्छायाः सिद्धम्। पक्षधर्मता च द्रव्याश्रितत्वस्य इच्छाया विद्यमानत्वात् इच्छायां द्रव्याश्रितत्वसिद्धिः। विशेषबाधस्तु पृथिव्यादिष्विच्छा नास्तीतिरूपः तेन अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वसिद्धिः। तथैतैस्त्रिभिर्मिलित्वा इच्छायां सामान्यतो(त) इच्छा द्रव्याश्रिता इति दृष्टानुमान एव अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वसिद्धिः। तदेवाह - **प्रसिद्धेति** मूलम्। तथा च पृथिव्यादिषु प्रसिद्धेषु विशेषेषु इच्छाया वृत्तित्वबाधे सामान्यं द्रव्याश्रितत्वमात्रं तज्ज्ञानस्य, तदतिरिक्तं प्रसिद्धविशेषातिरिक्तम् आत्मरूपं विशेषद्रव्यं तद्वृत्तित्वनियमादित्यर्थः। अत्रैव दृष्टान्तमाह - **अत एवेति** मूलम्। यथा क्षितिरुपादानगोचरापरो[क्ष]-ज्ञानजन्या कार्यत्वात् घटवत् इत्यनुमानेऽपरोक्षज्ञानजन्यत्वरूपं सामान्यं सिद्ध्यत् संसार्यपरोक्षज्ञानानामनित्यानामसर्वविषयाणामनाद्यनन्तद्व्यणुकादिपक्षीकरणे जन्यत्वबाधात् अनित्यज्ञानातिरिक्तज्ञानजन्यत्वमेव सिद्ध्यति। अन्यथा नित्यज्ञानजन्यत्वेन सह घटादौ व्याप्तिग्रह एव नास्तीति नित्यज्ञानं न सिद्ध्यत्येवेत्यर्थः। एतदेव स्पष्टयति — **अनित्यज्ञानबाधानन्तरमिति**। तथा च सामान्यतोदृष्टानु[मानेन] द्व्यणुकादिकमपरोक्षज्ञानजन्यमित्यादिरूपेण ज्ञानजन्यत्वं सिद्ध्यत् अनित्यासर्वविषयकज्ञानातिरिक्तज्ञानजन्यत्वमेव सिद्ध्यति, तद्वत् पूर्वोक्तसामान्यतोदृष्टान्तुमानेन अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वसिद्धिर्भविष्यति, ततः पूर्वोक्तसामान्यतो दृष्टानुमानेनैवच्छाया आत्मवृत्तित्वे सिद्धे किं व्यतिरेकिणेत्याशङ्कार्थः। प्राचीनाशङ्कां दूषयति - **बाधानन्तरमिति**। यद्यपि द्रव्यवृत्तिरिति सामान्यतोदृष्टेऽपि ह्रदादिवृत्तित्वबाधेऽपि वस्तुगत्या ह्रदाद्यतिरिक्तद्रव्यवृत्तित्वं द्रव्यवृत्तित्वेनैव प्रकारेण सिद्ध्यति। यथा वा पर्वतो वह्निमान् इत्यत्र अपर्वतीयवह्निबाधे पर्वतीयवह्निरेव सिद्ध्यति वह्नित्वेनैव प्रकारेण स(न) तु पर्वतीयवह्नित्वेन प्रकारेण, तद्वत् वस्तुगत्या प्रसिद्धविशेषबाधसहायेन अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वस्य द्रव्यवृत्तित्वेनैव प्रकारेण सिद्धिर्भवतु न तु अष्टद्रव्यातिरिक्तद्रव्यत्वेन प्रकारेण। ननु प्रसिद्धविशेषबाधसहायेन अष्ट-

द्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारिकैव कुतो नानुमितिरित्यत आह - **अनुमितेरि**ति मूलम्। तथा चानुमितेरयं नियमः - **येन रूपेण साध्यस्य व्यापकताग्रहः तेनैव रूपेण साध्यानुमितिर्न तु प्रकारान्तरेण, यथा वह्नित्वेन रूपेण चेत्** व्यापकताग्रहो वह्नेस्तदा वह्नित्वप्रकारिकैवानुमितिः न तु चन्दनखण्डप्रभववह्नित्वप्रकारिकेति। [124 B] एतदेवाह - **अनुमितेर्व्यापकते**त्यादिना। तथा च प्रकृते अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वेन रूपेण साध्यस्य व्यापकताग्रहाभावात् न सामान्यतोदृष्टानुमाने अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारिकानुमितिः किन्तु द्रव्यवृत्तित्वप्रकारिकानुमितिः। ननु अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वेनापि प्रकारेण द्रव्याश्रितत्वरूपसाध्यस्य व्यापकताग्रहः कुतो न भवति इत्यत आह - **नन्वि**ति मूलम्। तथा इच्छा द्रव्यश्रिता इत्यनुमानात् पूर्वमष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारेण व्यापकताग्रहाभावात् न सामान्यतोदृष्टानुमानेन अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वसिद्धिः किन्तु व्यतिरेकेणैवेत्यर्थः। ननु तर्हि अनाद्यनन्तद्व्यणुकादिपक्षीकरणेऽपि नित्यज्ञानजन्यत्वासिद्धिः पक्षधर्मताबलान्न सिद्ध्येदित्यत आह - **अनादी**ति। तथा चानाद्यनन्तं द्व्यणुकादि। अयमर्थः - अनादित्वं च स्वाश्रयध्वंसव्याप्यप्रागभावप्रतियोगिवृत्तित्वम्। स्वशब्देन द्व्यणुकत्वं तदाश्रयो द्व्यणुकं तस्य यो ध्वंसस्तस्य यो व्याप्यः प्रागभावो यथा(दा) यदा द्व्यणुकप्रागभावस्तदा तदा द्व्यणुकध्वंस इतिरूपस्तत्प्रतियोगि द्व्यणुकं तद्वृत्तित्वम् अनादित्वम्। इदमेव अनादित्वं यदा यदा द्व्यणुकप्रागभावस्तदा तदा द्व्यणुकध्वंस इति रूपम्, तथा चाद्यागामिद्व्यणुकानां प्रागभावस्तदा पूर्वपूर्वोत्पन्नानां द्व्यणुकानां ध्वंस एवेत्यनादित्वम्। अनन्तत्वं चात्र इयत्ताशून्यत्वम् अगणितत्वमित्यर्थः। तथा च अनाद्यनन्तद्व्यणुकाद्युपादानगोचरज्ञानं सिद्ध्यत् एवं नित्यसर्वविषयकमपि सिद्ध्यति। कथम् ? अनादीनां द्व्यणुकानामुपादानानि परमाणवः तद्गोचरं यज्ज्ञानं तज्ज्ञानं न लौकिकप्रत्यासत्तिजन्यं परमाण्वादीनामतीन्द्रियत्वात्, नाप्यलौकिकप्रत्यासत्तिजन्यं तज्ज्ञानं विनिगमकाभावात्। यदि द्व्यणुकोपादानगोचरं ज्ञानं योगजन्यप्रत्यासत्त्या जन्यते योगस्तु **पतञ्जलि**मते चित्तवृत्तिनिरोधः **नैयायिक**मते तु श्रवणमननादिजन्यो यः सकलवस्तुविषयको ज्ञानविशेषो यद्बलेन भूमिस्थो वर्तमानकालवर्ती योगी अतीन्द्रियासन्निकृष्टान् पदार्थान् प्रत्यक्षेण घटवत् पश्यति यथा चक्षुषा सुरभि चन्दनमिति बोधे पूर्वं घ्राणजन्यानुभवस्मरणमेव ज्ञानं सन्निकर्षस्तद्वत् दूरस्थातीतादिपदार्थसाक्षात्काररूपं चाक्षुषमेव ज्ञानं योगस्तत्र सन्निकर्ष इति। तथा च द्व्यणुकाद्युपादानगोचरज्ञानं योगजप्रत्यासत्तिजन्यं न भवति पारम्पर्येण योगिशरीरारम्भ[का]द्व्यणुकोत्पत्तिकाले योगिनामभावात्। न च तत्र योग्यन्तरमेवेति वाच्यम्, तथा चैतद्योगिशरीरारम्भककाले योग्यन्तरं वक्तव्यमिति गौरवं भवतीत्यन्यत्र विस्तरः। तथा च सकलद्व्यणुकोपादानगोचरं यज्ज्ञानमायाति तद् वस्तुगत्या नित्यं सर्वविषयकमेवायाति। [125 A] यथा पर्वते वह्निः पर्वतीयवह्निः न तु पर्वतीयवह्नित्वेन प्रकारेण सिद्ध्यति। एवमनाद्यनन्तद्व्यणुकोपादानगोचरं यज्ज्ञानं तत् नित्यत्वसर्वविषयत्वं विना ज्ञानमेव न सम्भवति इति पक्षधर्म-

ताबलान्नित्यमेव सिद्ध्यतीति दिक्। ननु तज्ज्ञानं नित्यत्वेन सर्वविषयत्वेन च प्रकारेण न सिद्धम् यथा पर्वतीयवह्निः पर्वतीयवह्नित्वेन न सिद्धः किन्तु वह्नित्वेन इत्यत आह - **एतदन्यदि**ति मूलम्। तथा च यत्र पर्वतीयवह्न्यभावस्तत्र पर्वतीयधूमाभाव इति पर्वतीयवह्नेरन्यत्राप्रसिद्ध्या व्यतिरेकिणैव सिद्ध्यति। तथाऽत्रापि यत्र यत्र नित्यसर्वविषयकज्ञानजन्यत्वाभावस्तत्र तत्र कार्यत्वाभाव इति व्यतिरेकिव्याप्त्यैव नित्यत्वेन प्रकारेण तादृशज्ञानसिद्धिः। ननु यथा पक्षधर्मताबलादेव पर्वतीयवह्नित्वेन प्रकारेण पर्वतीयवह्निः सिद्ध्यति तथा प्रकृतेऽपि पक्षधर्मताबलात् अनाद्यनन्तद्व्यणुकोपादानगोचरज्ञानस्य या पक्षधर्मता तिष्ठति सा नित्यसर्वविषयकज्ञानस्यैव वर्तते इति कृत्वा पक्षधर्मताबलेन नित्यसर्वविषयत्वेनैवं प्रकारेण सिद्ध्यति इत्यत आह - **पक्षधर्मते**ति मूलम्। तथा च पक्षधर्मताबलेनापि वस्तुगत्या नित्यसर्वविषयकं तद् ज्ञानं सिद्ध्यति न तु तस्मिन् ज्ञाने नित्यत्वं सर्वविषयत्वं वा प्रकारो यतो नित्यत्वस्य सर्वविषयत्वस्य वा व्यापकतावच्छेदकत्वाभावात्। यथा पर्वतीयवह्नित्वस्य व्यापकतावच्छेदकत्वं नास्ति किन्तु वह्नित्वमेव व्यापकतावच्छेदकं तेन वह्नित्वेनैव रूपेण वह्निः तद्वत् अत्र द्व्यणुकोपादानगोचरज्ञानत्वमेव व्यापकतावच्छेदकम् न तु नित्यसर्वविषयकत्वं व्यापकतावच्छेदकमिति कृत्वा न तेन रूपेण द्व्यणुकोपादानगोचरज्ञानसिद्धिः। एतदेवाह - **नन्विति** मूलम्। ननु व्यापकतावच्छेदकरूपेणापि कुतो न साध्यभानमित्यत आह - **अतिप्रसङ्गादि**ति मूलम्। तथा च व्यापकतानवच्छेदकपर्वतीयवह्नित्वेनापि रूपेण यदि वह्नेर्भानं स्यात् तदा व्यापकतानवच्छेदकचन्दनप्रभववह्नित्वेनापि रूपेण कुतो न वह्नेर्भानमिति अतिप्रसङ्गादित्यर्थः। अत्राशङ्कते - **नन्विति** मूलम्। तथा च इच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रितेति व्यतिरेक्यनुमानं व्यर्थम्। कुतः ? अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं अन्वय्यनुमानादेव सेत्स्यति। कथम् ? अष्टद्रव्यानाश्रिता इच्छा पक्षः, द्रव्याश्रिता इति साध्यम्, गुणत्वादिति हेतुः, रूपवदिति। तथा च अष्टद्रव्यानाश्रितेच्छायां द्रव्याश्रितत्वं चेत् सिद्धं तदा सा अष्टद्रव्यातिरिक्तद्रव्याश्रिता भवत्येवेति। कुतः ? अन्यथा अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वेन विना अष्टद्रव्यानाश्रिता इच्छा द्रव्याश्रिता इति प्रतिज्ञार्थोऽनुपपन्न इत्याशङ्कार्थः। समाधत्ते - **सत्यमिति**। यदि अष्टद्रव्यानाश्रिता इच्छा द्रव्या[श्रिता] इति प्रतिज्ञातार्थः अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं विनाऽनुपपन्नः तदा अ[ष्ट]द्रव्यानाश्रिता इच्छा द्रव्याश्रिता इत्यनुमित्युत्तरकालिकोऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वबोधो [125 B] भवतु। ननु अष्टद्रव्यानाश्रिता इच्छा द्रव्याश्रिता एतस्यामनुमितौ इच्छाश्रयस्य द्रव्यस्य अष्टद्रव्यातिरिक्तत्वं कुतो भासते। पक्षे साध्यसंसर्गमात्रमनुमितिविषयः। तथा च अष्टद्रव्यानाश्रिता इच्छा पक्षः, द्रव्याश्रितेति साध्यम्, तयोः सम्बन्धोऽनुमितेर्विषयः, न त्वन्यत्। तथा चेच्छाश्रयस्य द्रव्यस्य अष्टद्रव्यातिरिक्तत्वं कुतो विषयोऽनुमितेरित्यर्थः। शङ्कते - **अद्येति**। सामान्याव्यभिचारः, सामान्यरूपेण व्याप्तिज्ञानं यथा यत्र धूमस्तत्र वह्निरिति, तद्वत् यत्र गुणत्वं तत्र द्रव्याश्रितत्वम्, एवं सामान्यव्याप्त्या मानान्तरोपनीतम् यथा पृथिव्यादीनामिच्छाश्रयद्रव्यत्वे चेष्टाप्रयत्नोपलम्भः स्यादिति बाधकमानोपनीतम्

अष्टद्रव्यातिरिक्तद्रव्याश्रिततत्वमनुमितौ विषयो भविष्यति किमर्थं व्यतिरेकीत्यर्थः । ननु मानान्तरोपनीतस्य ज्ञानान्तरे भानं कुत्र दृष्टमित्यत आह - **ज्ञानान्तरेति** मूलम् । तथा च सुरभि चन्दनमिति घ्राणजन्यो बोधः, ततो घ्राणेन्द्रियोपनीतं सौरभं यथा चाक्षुषबोधे भासते तद्वत् बाधकप्रमाणोपनीतं पृथिव्याद्यष्टद्रव्यभिन्नत्वं पृथिव्यादौ चेच्छाश्रये चेष्टाप्रसङ्गो बाधकं ज्ञानान्तरेऽनुमितौ भासते यथा इच्छा द्रव्याश्रिता इत्यस्यामनुमितौ भासते किमर्थं व्यतिरेक्यादर इत्यर्थः । समाधत्ते - **मानान्तरेति** । मानान्तरानवतारदशायां व्यतिरेकी भविष्यति । यदा बाधकं पूर्वोक्तं नावतीर्णं तदा व्यतिरेकिणैव साध्यसिद्धिरित्यर्थः । **नैयायिकैकदेशिमतान्तरमाह - ये चेति** । तथा च अष्टद्रव्यानाश्रिता इच्छा द्रव्याश्रिता इत्यत्र इच्छायामष्टद्रव्यानाश्रिततत्वज्ञानं वर्तते परं यदा इच्छाश्रये द्रव्येऽष्टद्रव्यातिरिक्तत्वज्ञानं नास्ति तदा अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वसिद्धये व्यतिरेक्यनुमानं सार्थकमित्यर्थः । **नानुमानमिति** मूलम् । पृथिवी नेतरभिन्ना प्रमेयत्वात् जलवत् इत्यनुमानात् सत्प्रतिपक्ष इत्याशङ्कार्थः । समाधत्ते - **विपक्षेति** । पृथिवी यदीतरभिन्ना न स्यात् तदा पृथिवीत्वमपि न स्यात् । व्याप्तिर्दृढतरं गृहीतत्वात् यत्रेतरभेदाभावस्तत्र पृथिवीत्वाभाव इति यथा जले इति । प्रकृते हेतोर्व्यभिचारित्वं विद्यते इतरभेदाभाववति जले प्रमेयत्वस्य वर्तमानत्वात् जले व्यभिचारिणि दुर्बलत्वमित्यर्थः ।

अथ **मानान्तरादित्यत्र** टीका । यदि अनुमितेः पूर्वं बाधकमानान्तरोपस्थितिश्चेन्नास्ति तदा अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वरूपसाध्यप्रसिद्धिरपि कथं स्यात् । तस्माद् व्यतिरेक्यनुमानात् पूर्वं मानान्तरोपस्थितिस्तथापि मानान्तरोपस्थितस्यापि नानुमितौ भानम् । कुतः ? अनुमितेर्व्यापकतावच्छेदकप्रकारातिरिक्तः प्रकारो न भासते । यथा वह्निमान् इत्यत्र वह्नित्वमेव प्रकारो वह्निमत्त्वं तु संसर्गमर्यादया न तु चन्दनप्रभववह्नित्वं तद्वत् प्रकृते व्यापकतावच्छेदकं यत् द्रव्याश्रिततत्वं तेनैव रूपेण द्रव्याश्रिततत्वानुमितिः न तु अष्टद्रव्यातिरिक्तद्रव्याश्रिततत्वरूपेण तस्य [126 A] व्यापकतानवच्छेदकत्वात् । तथा च यदि मानान्तरोपनीतमेवानुमितौ भासते तदा महान[सा]तिरिक्तत्वम् उष्णस्पर्शवत्त्वादीनामपि पर्वतो वह्निमान् इत्यनुमितौ स्यादित्यर्थः । तथा चानुमितौ मानान्तरोपनीतं न भासते एव प्रत्यक्षमेव तद् भानमिति सिद्धान्त इति भावः इत्यप्याहुरिति मूले यदुक्तं मूलकारेण तद् दुषितं नास्ति परं तत्र सम्प्रतिपन्नताबुद्धिः स्यादित्यत आह - **अपीत्यस्वरसोद्भावनमिति** टीका । अपिशब्दोऽनादरे, तद्बीजं दर्शयति- **यदीति** । यदि इच्छाश्रयद्रव्यस्य अष्टद्रव्यभिन्नत्वेन चेद् ज्ञानं नास्ति तदा साध्यप्रसिद्ध्यभावे व्यतिरेक्यवतारोऽपि कथं स्यात् व्यतिरेकव्याप्तिग्रहाभावात् । तथा च साध्यप्रसिद्ध्यर्थमिच्छाश्रयद्रव्येऽष्टद्रव्यभेदोऽवश्यं ज्ञातव्य इत्यर्थः ।

**अन्ये तु व्यतिरेकिण्यभाव एव साध्यः, स चाप्रसिद्ध एव सिद्ध्यति, यस्याभावस्य व्यापको हेत्वभावो गृहीतस्तस्याभावः पक्षे व्यापकाभावाभावरूपेण हेतुना सिद्ध्यति**

**व्यापकाभाववत्तया ज्ञाते व्याप्याभावज्ञानावश्यम्भावात् ।**

मतान्तरमुपन्यस्यति - **अन्ये त्विति** मूलम् । **व्यतिरेकिणीति** मूलम् । सर्वत्रेति शेषः । तेन सर्वत्र व्यतिरेकिणि अभाव एव साध्यते इत्यर्थः । तेन भावसाध्यकव्यतिरेकिणि साध्याप्रसिद्धौ व्यतिरेकव्याप्तिग्रहासम्भवेन कथं व्यतिरेकित्वमिति दूषणं निरस्तम्, यतोऽस्माकं व्यतिरेक्यनुमानेऽभाव एव साध्यः तस्याप्रसिद्धत्वेऽपि व्यतिरेक-व्याप्तिग्रहः सम्भवति । एतदेवाह - **यस्येति** मूलम् । यस्मिन् अभावसाध्यकव्यतिरेकिणि यस्य भावस्य भाव-पदार्थस्य व्यापकतया हेत्वभावो गृहीतस्तदभावेन हेतुना तादृशभावपदार्थस्याभावः सिद्ध्यति । अत्र नियामकमाह- **व्यापकाभाववत्तयेति** मूलम् । तथा च भावपदार्थस्य व्यापकश्चेत् हेत्वभावस्तदा व्यापकाभावरूपहेतुमत्तया ज्ञाते पक्षे व्याप्याभावज्ञानावश्यंभावात् ।

**तथाहि पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यत्र इतरस्य जलादेर्व्यापकः पृथिवी-त्वाभावो गृहीत इति पृथिवीत्वाभावाभावरूपेण पृथिवीत्वेन पृथिव्यामितरान्योन्या-भावोऽप्रसिद्ध एव सिद्ध्यति प्रतियोगिज्ञानस्य वृत्तत्वात् प्रत्यक्षेण भूतले घटाभाववत् । एवमन्यत्राप्यव्याप्यवृत्तीच्छायाः स्वाश्रयत्वे सिद्धे स्वाश्रये योऽत्यन्ताभावस्तदवच्छेदकं घटादि सर्वं तदवच्छेदेनेच्छानुपलम्भात् जीवच्छरीरं तु न तथा तदवच्छेदेन तदाश्रये इच्छोपलम्भात् । तथा च इच्छात्यन्ताभावाश्रयतावच्छेदकत्वरूपस्य नैरात्म्यस्य घटादौ प्राणादिमत्त्वाभावो व्यापको गृहीत इति जीवच्छरीरे प्राणादिमत्त्वेन इच्छात्यन्ताभावा-श्रयत्वावच्छेदकत्वस्याभावः सात्मकत्वं साध्यते, एवं प्रामाण्यसाधकव्यतिरेकिण्यपि व्यधिकरणप्रकारावच्छिन्नत्वस्य व्यापकः समर्थप्रवृत्तिजनकत्वाभावोऽप्रमायां गृहीतोऽतो विवादाध्यासितानुभवे समर्थप्रवृत्तिजनकत्वेन व्यधिकरणप्रकारा-वच्छिन्नत्वस्याभावः सिद्ध्यति व्यधिकरणप्रकारानवच्छिन्नत्वमेव प्रमात्वम् । ननु साध्याप्रसिद्धौ कथं साध्यविशिष्टज्ञानं विशेषणज्ञानजन्यत्वात् विशिष्टज्ञानस्येति चेत् । न । पक्षे साध्यानुमितिसामग्रीसत्त्वात् पक्षविशेषणकः साध्यविशेष्यक एव प्रत्ययो जायते भूतले घटो नास्तीत्यभावविशेष्यकप्रत्ययवत् तथापि साध्याभावव्यापकाभावा-भावरूपहेतुमत्तया पक्षज्ञानं व्यतिरेकिणि गमकतौपयिकम् । न च साध्यप्रसिद्धिं विनापि**

**तादृशप्रतिसन्धानं सम्भवति, न च वस्तुगत्या यः साध्याभावस्तद्व्यापकाभावप्रतियोगिमत्तया ज्ञानं मृग्यत इति वाच्यम्। व्यतिरेक्याभासानुपपत्तेरिति चेत्। न। योऽभावो यस्य भावस्य व्यापकत्वेन गृहीतः तदभावाभावेन तस्य व्याप्यस्याभावः पक्षे साध्यत इत्यनुगतानतिप्रसक्तस्य गमकतौपयिकत्वात्, अयं च व्यतिरेकिप्रकारः स्वार्थ एव, परं प्रति साध्याप्रसिद्ध्या प्रतिज्ञाद्यसम्भवादिति सर्वं समञ्जसम्।**

## । तत्त्वचिन्तामणौ सम्पूर्णमिदं केवलव्यतिरेक्यनुमानम् ।

एतदेव स्पष्टयति - **तथाहीति** मूलम्। पृथिवीति अत्रेतरभेदः साध्यः, स च जलादिभेद एव, सोऽभाव एव, स च जलादिभेदोऽप्रसिद्ध एव सिद्ध्यति। कथमित्यत आह - **जलादेरिति** मूलम्। तथा यत्र यत्र इतरभेदाभावस्तत्र तत्र पृथिवीत्वाभाव इत्येवंरूपव्यतिरेकव्याप्तिग्रहादरो नास्ति। इतरभेदज्ञानाभावे इतरभेदप्रसिद्धेरपेक्षा स्यात्। तथा च व्याप्तिग्रहोऽभावाभावपुरस्कारेण नास्ति किन्तु व्यतिरेकव्याप्तिग्रहो वस्तुगत्याऽपेक्षितो न तु व्यतिरेकित्वेन रूपेण। यथा पर्वतो धूमाभाववान् वह्न्यभावात् इत्यत्र व्यतिरेकिणि यत्र धूमाभावाभाव तत्र वह्न्यभावाभाव इत्येतादृशव्यतिरेकव्याप्तिग्रहो न कारणं येन भावत्वेन रूपेण धूमाभावाभावज्ञाने धूमाभावरूपसाध्यप्रसिद्धिरपेक्षिता स्यात् किन्तु वस्तुगत्या यो व्यतिरेकस्तस्य व्याप्तिग्रहोऽपेक्षितस्तथा च यत्र धूमस्तत्र वह्निरित्येव व्यतिरेकव्याप्तिग्रहः अत्र धूमाभावप्रसिद्धेरपेक्षैव नास्ति, [126 B] तद्वत् इतरेभ्यो भिद्यते इत्यत्र इतरभेदस्याभावो जलादिकम्, तत्र च रूपद्वयं भावरूपत्वमपि तिष्ठति इतरभेदाभावरूपमपि तिष्ठति। तत्र इतरभेदाभावत्वेन रूपेण जलादिज्ञाने इतरभेदज्ञानापेक्षा। यदा तु भावरूपपुरस्कारेण ज्ञानं जलादिज्ञानं तदा न जलादिभेदा(द)ज्ञानापेक्षा येन जलादिभेदरूपेतरभेदप्रसिद्धेरपेक्षा स्यात्, अभावत्वपुरस्कारेण व्याप्तिग्रहोऽङ्गमेव न भवति किन्तु भावपुरस्कारेण व्याप्तिग्रहोऽङ्गम्। तथा च साध्याप्रसिद्धावपि व्यतिरेकव्याप्तिग्रहो भवत्येव।

एतदेवाह - **जलादेरिति** टीका। पृथिवी जलादिभ्यो भिद्यते इत्यत्र जलादिभेदः साध्यस्तस्य व्यतिरेकव्याप्तिग्रहो यत्र जलं तत्र पृथिवीत्वाभाव इति व्यतिरेकव्याप्तिग्रहो जलादिभेदाप्रसिद्धावपि भवत्येव। न हि जलज्ञाने जलभेदज्ञानस्यापेक्षा अस्ति। तथा च जलादेर्व्यापकः पृथिवीत्वाभावो गृहीतो यथा यत्र जलं तत्र पृथिवीत्वाभाव इति व्यतिरेकव्याप्तिग्रहो वर्तते। तथा च पृथिवीत्वाभावस्य जलादिव्यापकता गृहीता, अतो हि पृथिवीत्वाभावाभावेन पृथिवीत्वेन जलादिभेदोऽप्रसिद्ध एव सिद्ध्यतीत्यर्थः।

ननु जलादिभेदरूपसाध्याप्रसिद्धौ कथं जलादिभेदानुमितिरित्यत आह - **प्रतियोगिज्ञानस्येति** मूलम्। न हि जलभेदज्ञाने जलभेदज्ञानं कारणं किन्तु जलभेदज्ञाने जलरूपप्रतियोगिज्ञानं कारणं तच्च वृत्तमेव यथा यत्र जलं

तत्र पृथिवीत्वाभाव इति ज्ञानं जलज्ञानं भवत्येवेति जलज्ञानं वृत्तमेवेत्यर्थः। दृष्टान्तमाह - **प्रत्यक्षेणे**ति मूलम्। यथा घटाभावज्ञाने घटज्ञानं कारणं न तथा घटाभावाभावज्ञाने घटाभावज्ञानं कारणम्। ननु जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् इत्यत्र का गतिस्तत्राभावसाध्यकत्वाभावात् अत्र तु साध्यप्रसिद्धेरपेक्षा स्यादेवेत्यत आह - **एवमि**ति मूलम्। **अन्यत्रे**ति। जीवच्छरीरं सात्मकं प्राणादिमत्त्वादित्यत्रेत्यर्थः। तथा चात्राप्यभाव एव साध्यस्तत्र च वस्तुगत्या व्यतिरेकव्याप्तिग्रहः कारणं न तु व्यतिरेकत्वेन रूपेण व्यतिरेकव्याप्तिग्रहः कारणं येन साध्यप्रसिद्धेरपेक्षा स्यादित्यर्थः। जीवदित्यादौ व्यतिरेकव्याप्तिग्रहः प्रदर्शयति - **अव्याप्ये**ति मूलम्। इच्छा साश्रया साधिकरणा इति साध्यं गुणत्वात् इत्यत्र इच्छाधिकरणे इच्छाऽव्याप्यवृत्तिः आत्मनो व्यापकत्वात्। सर्वत्र इच्छाकार्यं प्रयत्नचेष्टादिकं नोपलभ्यते इति इच्छाया अव्याप्यवृत्तित्वम्, तथा चाव्याप्यवृत्तित्वं नाम स्वात्यन्ताभावसामानाधिकरण्यम्, तथा चैकत्राधिकरणे प्रतियोगितदभावयोर्विरोधात् अवच्छेदकभेदेन वृत्तिर्वक्तव्या। तत इच्छात्यन्ताभावस्य [127 A] किञ्चिदवच्छेदकं वक्तव्यमेव, तच्च यदवच्छेदेन इच्छाकार्यं प्रयत्नचेष्टादिकं नोपलभ्यते तदेव वक्तव्यम्। यतो घटाद्यवच्छेदेन इच्छा नोपलभ्यते अतो घटादिकमेव इच्छात्यन्ता[भावा]वच्छेदकम्। तथा च इच्छात्यन्ताभावावच्छेदकत्वमेव नैरात्म्यम्, तत्तु भावरूपं घटादिषु सर्वत्र वर्तते, तस्याभावो जीवच्छरीरेऽप्रसिद्ध एव सिद्ध्यति, व्यतिरेकव्याप्तिग्रहस्त्वेवं यत्र यत्र इच्छात्यन्ताभावावच्छेदकत्वं तत्र तत्र प्राणादि(द्य)भावो यथा घटे, अत्र त्विच्छात्यन्ताभावावच्छेदकत्वरूपभावपदार्थज्ञाने नाभावज्ञानापेक्षा भावज्ञानेऽभावज्ञानस्याकारणत्वात् एवं घटादौ व्यतिरेकव्याप्तिग्रहे सति प्राणादिमत्त्वाभावाभावेन प्राणादिमत्त्वेन जीवच्छरीरे इच्छात्यन्ताभावावच्छेदकत्वाभावोऽप्रसिद्ध एव सिद्ध्यति, यथा घटात्यन्ताभावज्ञानसामग्री घटज्ञानमात्रं न तु घटाभावज्ञानं तद्वत् इच्छात्यन्ताभावावच्छेदकत्वाभावज्ञाने इच्छात्यन्ताभावावच्छेदकत्वज्ञानमेव कारणं न त्वन्यत्। एतदेवाह - **तथा चे**ति मूलम्। तथा च जीवच्छरीरे नैरात्म्याभाव एव सात्मकत्वं साध्यते, नैरात्म्यं नाम इच्छात्यन्ताभावाश्रयतावच्छेदकत्वम्, तत् घटादौ दृष्टं तत्र प्राणादिमत्त्वाभावोऽपि दृष्टः। ततो व्याप्तिः इच्छात्यन्ताभावाश्रयतावच्छेदकत्वस्य नैरात्म्यस्य प्राणादिमत्त्वाभावस्य च घटादौ व्याप्तिर्गृहीता, तथा च जीवच्छरीरे प्राणादिमत्त्वाभावो नास्ति यतः प्राणादिमत्त्वाभावो व्यापकः स च जीवच्छरीरे नास्ति, ततः प्राणादिमत्त्वाभावरूपव्यापकस्याभावेन प्राणादिमत्त्वेन प्राणादिमत्त्वाभावस्य व्याप्यो(प्यं) यो(यत्) नैरात्म्यं यथा यत्र यत्र नैरात्म्यं तत्र तत्र प्राणादिमत्त्वाभाव इति नैरात्म्यरूपस्य व्याप्यस्य अभावः सात्मकत्वं सिद्ध्यति यतो व्यापकाभावेऽवश्यं व्याप्याभाव इति न्यायात्। एवमिच्छात्यन्ताभावावच्छेदकत्वं नैरात्म्यं तस्याभावः सात्मकत्वं साध्यं सिद्ध्यतीत्यर्थः। एवं प्रकारं व्यतिरेक्यन्तरेऽपि दर्शयति - **एवमिति** मूलम्। यथा प्रामाण्यसाधकं व्यतिरेक्यनुमानं यथा इदं वह्निज्ञानं पक्षः, वह्नित्वाभाववद्विशेष्यकत्वे सति वह्नित्वप्रकारकं नेति साध्यम्, दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्व-

प्रकारकनिश्चयत्वात्। यन्नैवं तन्नैवं यथा वह्न्यप्रमापदकृत्यं यथा साध्ये वह्नित्वाभाववद्विशेष्यकत्वे सति वह्नित्व-प्रकारकत्वमप्रामाण्यं तदभावः साध्यम्। इदमप्रमाण्याभावरूपं यत् साध्यं प्रामाण्यरूपं तदप्यप्रसिद्धमेव सिद्ध्यति अप्रामाण्याभावरूपसाध्यस्य प्राथमिकाप्रामाण्यग्रहस्थले प्रामाण्यस्याप्रसिद्धत्वात्। अत्राप्रामाण्याभावरूपसाध्यस्य प्रसिद्ध्यभावेऽपि अप्रामाण्याभावस्याभावोऽप्रामाण्यम्, तस्याप्रामाण्यस्य [127 B] दाहसमर्थविषयकप्रयत्न-जनकत्वाभावस्य च व्याप्यव्यापकभावत्वं यथा यत्र यत्र वह्नित्वाभाववद्विशेष्यके सति वह्नित्वप्रकारकत्वं वर्तते तत्र तत्र दाहसमर्थविषयकप्रयत्नजनकत्वाभावो यथा वह्न्यप्रमायां वह्नित्वाभाववान् गुञ्जापुञ्जः तद्विशेष्यकत्वे सति वह्नित्वप्रकारकत्वं वर्तते। यथा गुञ्जापुञ्जे पुरोवर्तिनि अयं वह्निरिति भ्रमः, तत्र वह्नित्वाभाववान् गुञ्जापुञ्जः तद्वि-शेष्यकत्वं वर्तते। अयंशब्दवाच्यो गुञ्जापुञ्ज एवेति, अयं वह्निरिति ज्ञाने वह्नित्वं तत्र प्रकारोऽस्ति परमप्रामाण्याभावः प्रमाण्यं नास्ति। ततो गुञ्जापुञ्जेऽयं वह्निरिति ज्ञाने वह्नित्वाभाववद्विशेष्यकत्वे सति वह्नित्वप्रकारकत्वं वर्तते, दाह-समर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वमपि वर्तते। तथा चानेनानुमानेनाप्रामाण्याभावोऽप्रसिद्ध एव सिद्ध्यतीत्यनुमानार्थः। अथ व्यावृत्तिर्यथा अप्रामाण्याभावः साध्यते तत्राप्रामाण्यं कीदृशं यथा तद्वह्नित्वप्रकार-कमित्येवास्तु तथा वह्नौ सति वह्निज्ञाने वह्निप्रमारूपे वह्नित्वप्रकारकत्वं विद्यते तदेतावत्युक्ते वह्निप्रमारूपं ज्ञानं वह्निभ्रमः स्यादित(ति) उक्तम्। सत्यम्, वह्निप्रमा च वह्नित्वाभाववद्विशेष्यिका न भवति इति तन्निरासः। सत्य-न्तमात्र एवोक्ते वह्नित्वाभाववद्विशेष्यकत्वं यदस्ति तत् गुञ्जापुञ्जविशेष्यकं गुञ्जापुञ्जत्वप्रकारकनिश्चयत्वं वह्निभ्रमे व्यभिचारि। यत एतादृशो हेतुस्तत्रास्ति परं साध्यं वह्नित्वाभाववद्विशेष्यकत्वे सति वह्नित्वप्रकारकत्वाभावलक्षणं साध्यं नास्तीति व्यभिचारः, तद्वारणाय दाहेत्यादिसत्यन्तम्। अथ सत्यन्तमात्रे उक्ते अत्र वह्नित्वमिति ज्ञाने दाहस-मर्थविषयकप्रयत्नजनकत्वं वर्तते यतस्तादृशज्ञानात् वह्निविषयिणी प्रवृत्तिर्जायते परं वह्नित्वाभाववत् यद् वह्नित्वं तद्विशेष्यकत्वात् एतस्योक्तज्ञानस्येति व्यभिचारवारणाय वह्नित्वप्रकारकनिश्चयत्वादित्युक्तम्। उक्तमर्थं योजयति-**व्यधिकरणे**ति मूलम्। व्यधिकरणप्रकारावच्छिन्नत्वं नाम यथा वह्नित्वाभाववद्विशेष्यकत्वे सति वह्नित्व-प्रकारकत्वमप्रामाण्यम्, तस्य व्यापकः समर्थप्रवृत्तिजनकत्वाभावो नाम दाहसमर्थविषयकप्रयत्नजनकत्वाभावः। यथा यत्र यत्र अप्रामाण्यं पूर्वोक्तं साध्यरूपं तत्र तत्र दाहसमर्थविषयकप्रयत्नजनकत्वाभाव इति अप्रमायां दृष्टान्ते गृहीते इति कृत्वा व्यतिरेकव्याप्तिग्रहः। ततः किमित्यत आह - **विवादे**ति मूलम्। विवादाध्यासितोऽनुभवोऽयं [128 A] वह्निरिति ज्ञानम्, तस्मिन्ननुभवे अप्रामाण्यस्य व्यापको यः समर्थप्रवृत्तिजनकत्वाभावः तस्याभावेन समर्थप्रवृत्तिजनकत्वेन व्याप्यं यदप्रामाण्यं तस्याभावः साध्योऽप्रसिद्ध एव सिद्ध्यति व्यापकाभावे व्याप्याभावा-वश्यकत्वनियमात्। नन्वेतावताऽप्रामाण्याभावः सिद्ध्यतु परं प्रामाण्यं कथं सिद्ध्यतीत्यत आह - **व्यधिकरणे**ति **मूलम्**। तथा च यत्र वह्निज्ञानं बालस्य यदा जायते तत्र प्रथममप्रामाण्याभावरूपमेव प्रामाण्यव्यतिरेकिणा

साध्यत इत्यर्थः। अत्राशङ्कते - **नन्विति** मूलम्। तथा चेतरभेदरूपसाध्याप्रसिद्धौ साध्यरूपविशेषणज्ञानाभावेन कथं साध्यविशिष्टज्ञानानुमितिरित्यर्थः। पृथिवी इतरभेदवतीत्यनुमितिर्न स्यादित्यर्थः। समाधत्ते - **पक्षे** इति। तथा मास्तु। साध्यविशेषणकः पक्षविशेष्यको विशिष्टबोधः पृथिवी इतरभेदवतीति विशेषणविशेष्यभावो न किन्तु पक्षविशेषणकसाध्यविशेष्यक एव बोधः यथा पर्वते वह्निरित्यादिवत्, अयमपि यथा पृथिव्यामितरभेदस्तथा च पृथिव्या विशेषणत्वं यत् साक्षात्क्रियान्वयि तद् विशेष्यमितरद् विशेषणं क्रियाश्रययोग्यत्वं यतः पृथिव्यामितरभेदस्तिष्ठति। अत्रास्थानलक्षणक्रियया सह साक्षादितरस्यैवान्वयः। न तु पृथिव्या इति विशेषणमित्यर्थः। अत्रार्थे दृष्टान्तमाह - **भूतले** इति मूलम्। भूतले घटो नास्तीत्यत्राभावविशेष्यकभूतलविशषेणकोऽत्रास्तीति क्रियाया नञर्थेन सहान्वयात् प्रतियोगित्वेन घटो विशेषणं भूतलमधिकरणत्वेन विशेषणं प्रतियोगित्वानुयोगित्वे स्वरूपसम्बन्धविशेषौ प्रतीतिरूपफलबलकल्पः(ल्प्यः) स्वरूपसम्बन्ध इत्यर्थः। **अभावे**ति मूलम्। न हि सर्वत्राभावविशेषणकभूतलविशेष्यक एव बोधः किन्तु प्रत्यक्षे भूतले घटो नास्तीति स्थले भूतलविशेषणकघटाभावविशेष्यकोऽपि बोधो जायते। नियमो नास्ति। भूतलं घटाभाववत् इत्यत्र भूतलमपि विशेष्यम्, तद्वत् अनुमितावपि कदाचित् पक्षविशेषणकसाध्यविशेष्यको बोधः कदाचिच्च पक्षविशेष्यकसाध्यविशेषणकोऽपि बोधो भवति। यत्र च साध्यप्रसिद्धिस्तत्र साध्यविशेषणको बोधः, यत्र साध्यमप्रसिद्धं तत्र साध्यविशेष्यको बोधः इत्युक्तसामग्रीवशात् तादृशबोधवैचित्र्यम्। यदा साध्यं विशेषणत्वेन भासते तदैव साध्यप्रसिद्धिरपेक्ष्या, यदा तु साध्यं विशेष्यं तदा न इति स्पष्टोऽर्थः। शङ्कते - **तथापी**ति मूलम्। तथा च व्यतिरेकानुमितिसामग्री साध्याभावव्यापकाभावाभावरूपः साध्याभावस्य व्यापको योऽभावो [128 B] हेत्वभावो यथा यत्र यत्र साध्याभावस्तत्र तत्र हेत्वभावः इति रूपः तस्याभावो नाम प्रतियोगी हेतुरेव, तद्वान् यः पक्षस्तस्य ज्ञानमनुमितौ कारणम्। तथा च साध्यज्ञानं यदा नास्ति तदा साध्याभावज्ञानमपि नास्ति। अतः साध्याभावव्यापकाभावाभावरूपे हेतुमत्तया पक्षज्ञानाभावेऽनुमितिः कथं स्यादित्याशङ्कार्थः। मध्ये शङ्कते - **न चे**ति। तथा च वस्तुगत्या यः साध्याभावस्तस्य व्यापको योऽभावो हेत्वभावस्तत्प्रतियोगिमत्तया पक्षज्ञानं कारणं न तु साध्याभावत्वेन रूपेण साध्याभावव्यापकाभावप्रतियोगिमत्ताज्ञानं कारणं किन्तु वस्तुगत्या साध्याभावेत्यादि कारणम्। तथा च साध्याभावत्वप्रकारकसाध्याभावज्ञाने एव साध्यज्ञानमेव कारणं न तु वस्तुगत्या साध्याभावज्ञाने साध्यज्ञानं कारणम्। यथा घटाभावाभावत्वेन रूपेण घटज्ञाने घटाभावज्ञानं कारणं न तु घटत्वेन रूपेण घटज्ञाने घटाभावज्ञानं कारणं तद्वत् अत्र भेदाभावत्वेन रूपेण यत्र जलादिज्ञानं तत्र इतरभेदज्ञानापेक्षा यत्र च जलत्वेन रूपेणेतरभेदाभावज्ञानं तत्र नेतरभेदज्ञानापेक्षेत्याशङ्कार्थः। दूषयति मूलं **व्यतिरेक्याभासे**ति। तथा वह्न्यभावत्वेन घटाभावो ज्ञातस्तत्र घटाभावव्यापकाभावप्रतियोगी यो धूमस्तत्प्रतियोगिमत्तया व्यतिरेकिणो भ्रमरूपाऽनुमितिर्न स्यात्। पर्वतो वह्निमान् धूमात् इत्यत्र

व्यतिरेकिणि वह्निप्रतियोगिकत्वेन घटाभाव एव ज्ञातस्तदा घटाभावव्यापकाभावप्रतियोगिधूमवत्त्वज्ञानात् **घटाभावाभवस्य घटस्य या भ्रमरूपाऽनुमितिर्जायते** स्या(सा) न स्यात् । यतो वस्तुगत्या वह्नेरभावो **घटाभावो न भवति** ततो वस्तुगत्या साध्याभावव्यापकाभावप्रतियोगिमत्तया पक्षज्ञानं कारणं न भवतीत्यर्थः । **समाधत्ते - य** इति मूलम् । साध्याभावत्वेन रूपेण साध्याभावस्य अथवा वस्तुगत्याऽपि वा साध्याभावस्य न प्रवेशः किन्तु यत्पदार्थस्य व्यापकत्वेन योऽभावो गृहीतः तदभावाभावेन तत्पदार्थस्य व्याप्यस्याभावः पक्षे सिद्धयति। एवं च सति यथा जलादिव्यापकत्वेन पृथिवीत्वाभावो गृहीतो यत् जलं तत्र पृथिवीत्वाभाव इति कृत्वा पृथिवीत्वाभावाभावेन पृथिवीत्वेन जलादिभेद एव सिद्धयति यथा यज्जलादिकं तत्र तत्र पृथिवीत्वाभाव इति जलादीनां पृथिवीत्वाभावो व्यापकः तत्प्रतियोगिमत्त्वेन पृथिवीत्वेन व्याप्यरूपो यत्पदार्थो जलं तदभाव एव न सिद्धयतीति न साध्याभावत्वेन रूपेण साध्याभावप्रवेशः किन्तु यत्त्वेनैव रूपेण साध्यभावस्य [129 A] प्रवेशः । एतदेवाह - **तस्येति** मूलम् । यस्य तस्येत्यनेन सम्बन्धः । एवं च व्यतिरेक्याभासमपि समर्थयति । **इतीति** मूलम् । तथा च व्यतिरेक्याभासस्थलेऽपि यदि घटाभावव्यापकत्वेन पटादिव्यापकत्वेन वा धूमाभावो गृहीतस्तदा धूमाभावाभावेन धूमेन घटाभावः घटादीनामप्यभाव एव सिद्धयतीति व्यतिरेक्यभावोऽप्युपपन्न एवेति । **अनतिप्रसक्तस्येति** मूलम् । यद्यपि साध्याभावसमानाधिकरणाभावप्रतियोगिमत्त्वं व्यभिचारिणि धूमवान् वह्नेः इत्यत्र धूमाभावसमानाधिकरणो यो वह्न्यभावस्तत्प्रतियोगिमत्त्वं यद्यपि वह्नौ तिष्ठति तथापि धूमाभावव्यापकाभावप्रतियोगित्वं वह्नौ नास्ति । कथम् ? यतो यत्र धूमाभावस्तत्र वह्न्यभाव इति व्याप्तेरभावात् । इति कृत्वा व्यभिचारिणि नातिव्याप्तिः । ननु साध्याप्रसिद्धौ परार्थानुमानं कथं स्यात् यतः साध्याप्रसिद्धौ परं प्रति प्रतिज्ञाद्यसम्भवात् इत्यत आह - **अयं चेति** मूलम् । सर्वोऽप्यप्रसिद्धसाध्यको व्यतिरेकिप्रकारः स स्वार्थानुमानमेव स्वार्थानुमाने पञ्चाव[यव]-प्रयोगाभावात् । स्वयमेव यज्जलादि तत् पृथिवीत्वाभाववदिति व्याप्तिं गृह्णाति, तदा व्यतिरेकी सिद्ध एवेति दिक् ।

अथ टीका । अन्ये त्विति मतं योजयितुं भूमिकामाह - **व्यतिरेकिणीति** टीका । ये च वास्तवं साध्याभावव्यापकाभावप्रतियोगित्वमेव गमकम् । अत्र वास्तवत्वमापाततः किन्तु यस्य व्यापकत्वेन हेत्वभावो गृहीतस्तदभावेन हेतुना तस्याभाव एव सिद्धयतीत्यर्थः । अत्र एवकारः व्यावृत्त्यर्थमाह - **नन्विति** टीका । ननु साध्याभावत्वेन तस्योपस्थितिः येन साध्यप्रसिद्धेरपेक्षा स्यादित्यर्थः । साध्याभावत्वप्रवेशे किं बाधकम् इत्यत आह - **गौरवादिति** टीका । तथा च साध्याभावत्वेन रूपेण साध्याभावव्यापकाभावप्रतियोगिज्ञानं किमर्थं साध्याभावत्वांशप्रवेशे गौरवम् । लाघवात् यद्व्यापकतया हेत्वाभावो गृह्यते तादृशहेत्वभावाभावेन हेतुना तस्याभावः सिद्धयतीति लाघवमित्यर्थः । अत्र प्रथम एवास्वरसबीजमाह - **अभाव एवेति** टीका । मूले यदुक्तं व्यतिरेकिणि अभाव एव सिद्धयतीत्युक्तं(सिद्धयतीति युक्तं) परं भावरूपं साध्यं न भवतीति यदुक्तं तन्न युक्तम्,

कुत इत्यत आह - **वह्न्यभावेति**। तथा च यदा पर्वतो वह्निमान् धूमात् इत्यत्र भावरूपो वह्निः साध्यते यत्र वह्न्यभावस्तत्र धूमाभाव इति व्यतिरेकव्याप्त्या वह्न्यभावव्यापकधूमाभावाभावेन धूमेन वह्न्यभावाभावरूपस्य वह्नेरनुमितिसम्भवे विरोधाभावादित्यर्थः। एवं पूर्वोक्तरीत्या यदि सात्मकत्वरूपसाध्यप्रसिद्धिर्जाता तदा यत्र सात्मकत्वाभावस्तत्र प्राणादिमत्त्वाभावो यथा घटे इति व्यतिरेकव्याप्त्या प्राणादिमत्त्वाभावाभावेन सात्मकत्वाभावाभावरूपसात्मकत्वसिद्धौ विरोधो नास्तीत्याह - **भावरूपसात्मकत्वादेरिति** टीका। ननु तथापि सात्मकत्वरूपसाध्यप्रसिद्ध्यभावे कथं व्यतिरेक्यनुमितिरित्यत आह - **इयानेवेति**। तथा च यत्र यत्र भावरूपसाध्यस्य [129 B] वह्न्यादेर्व्यतिरेक्यनुमितिस्तत्र साध्यप्रसिद्धिरङ्गम्, यत्र चाभावरूपस्याप्रामाण्याभावस्य नैरात्म्याभावस्य च व्यतिरेक्यनुमितिस्तत्र साध्यप्रसिद्धिर्नाङ्गमित्यर्थः। **अत्रेति** भावरूपसाध्यस्य व्यतिरेक्यनुमितावित्यर्थः। **योऽभाव** इति मूलं व्याचष्टे - **यदात्मतयेति** टीका। यदात्मतया येन प्रकारेण गृह्यमाणस्य पदार्थस्य व्यापकतया हीनो यो हेत्वभावस्तेन हेत्वभावाभावेन हेतुना तत्प्रकारावच्छिन्नप्रतियोगिकाभाव एव सिद्ध्यति। कुत इत्यत आह - **तेनेति** टीका। अन्यथा यथाश्रुते सुखस्य दुःखाभावत्वेन प्रकारेण गृहीतस्य व्यापकतया यत्र हेत्वभावः शरीरित्वाभावो गृहीतस्तदभावेन शरीरित्वेन दुःखाभावाभावो दुःखं तद्विशिष्टानुमितिर्न स्यात् किन्तु सुखानुमितिरेव स्यात् येन सुखं भ्रमेण दुःखाभावत्वेन गृहीतं तत्र दुःखानुमितिर्जायते सा न स्यात् किन्तु सुखानुमितिरेव स्यात्। कथम् ?। यथाश्रुतव्याप्तिनियमस्तत्रापि तिष्ठति। तथाहि यत्पदार्थः सुखं तद्व्यापकतया गृहीतो यः दुःखसामग्रीविशेषविशिष्टशरीरित्वाभावो यत्र यत्र सुखं तत्र तत्र दुःखसामग्रीविशेषविशिष्टशरीरित्वाभावो यथा इन्द्रादौ तथा च तेन शरीरित्वाभावाभावेन विशिष्टशरीरित्वेन सुखाभावानुमितिरेव स्यात् न तु दुःखानुमितिः, वस्तुगत्या दुःखानुमितिस्तेन वर्तते सा न स्यात्। यदा च यदात्मतयेति व्याख्यातं तदा तत्प्रकारतया गृहीतस्य पदार्थस्य व्यापकतया गृहीतो हेत्वभावस्तत्र दुःखाभावाभावस्य दुःखस्यैवानुमितिर्जायते न सुखस्य। एवं च यत्र जलत्वत्वेन रूपेण वह्न्यभाव एव गृहीतो यत्र जलत्वं तत्र धूमाभावो यत्प्रकारक एव पदार्थग्रहस्तत्प्रकारिकैव व्याप्तिः तथा च जलत्वत्वेन रूपेण वह्न्यभावव्यापकतया गृहीतो यो धूमाभावस्तदभावेन धूमेन या जलत्वाभावत्वप्रकारिकानुमितिर्भवति साऽनुमितिर्न स्यात् वस्तुगत्या च जलत्वत्वेन प्रकारेण गृहीतस्य वह्न्यभावस्य व्यापकतया गृहीतो यो धूमाभावो यत्र जलत्वं तत्र धूमाभावः कुतः ?, यतो वह्न्यभावस्यैव जलत्वात्मतया गृहीतत्वात्, तत्र या जलत्वाभावानुमितिः सा वर्तत एवेत्यर्थ। अयमर्थः। व्याख्यानबीजमिदमेव। यत्र सुखमेव भ्रमेण दुःखाभावात्मतया गृहीतं सुखे एव दुःखाभावस्य भ्रमो जातस्तद्व्यापकतया गृहीतो यो विशिष्टशरीरित्वाभावो यथाऽयं दुःखवान् विशिष्टशरीरित्वात् यत्र यत्र दुःखाभावस्तत्र दुःखसामग्रीविशिष्टशरीरित्वाभावो यथेन्द्रादौ तथा च एतादृशव्याप्तिज्ञानं यस्य विद्यते तस्य विशिष्टशरीरित्वाभावभावेन विशिष्टशरीरित्वेन या दुःखस्यैवानुमितिर्जायते

सा न स्यात् । कुतः ? यतो वस्तुगत्या सुखव्यापकतया विशिष्टशरीरित्वाभावो गृहीतः । कुतः ? यतः कारणात सुखस्यैव दुःखाभावत्वेन ग्रहणात् । तथा च तत्र सुखस्य व्यापकतया यदि हेत्वभावो गृहीतस्तदा हेत्वभावाभावेन विशिष्टशरीरित्वेन सुखव्यापकत्वेन हेत्वभावो गृहीत इति चेत् [130 A] सुखाभावस्यैवानुमितिः स्यात् न तु दुःखानुमितिः । यदि यदात्मतया गृह्यमाण इति चेत् व्याख्यायते तदा दुःखानुमितिरेव समर्थिता भवति । कथमिति चेत् सुखं दुःखाभावात्मकत्वेन गृहीतं यदा यदात्मकतया गृहीतं तदा तदात्मकतयाऽभावस्यैव सिद्धिरिति । सुखं यदि दुःखात्मतया गृहीतमतो यदात्मकतया गृहीतं तदात्मकतयाऽभावः सिद्ध्यति, तथा च दुःखाभावात्मकतया सुखव्यापकता यदि हेत्वभावे गृहीता तदा दुःखाभावाभावो दुःखं तस्यैवानुमितिः स्यात् । यदा धूमाभावस्य घटात्मकतया वह्न्यभावव्यापकता यदि धूमाभावे गृहीता तदा धूमाभावाभावेन धूमेन घटाभाव एव सिद्ध्यति न तु वह्न्यभाव इति दिक् । एतदेवाह - **अन्यथे**ति । यदि यदात्मकतयेति न व्याख्यायते तदेत्यर्थः । **इतरस्येती**ति टीका । इतरस्य जलादेरित्यत्र यत्र यत्र जलं तत्र पृथिवीत्वाभाव इत्येवं व्याप्यव्यापकभावो नास्ति । संयोगसम्बन्धेन जलं वर्तते पृथिव्याम् तत्र पृथिवीत्वाभावो नास्तीत्यन्याभिप्रयेणाशङ्कते - **नन्वि**ति टीका । तथा च जलादीनां वृत्तिमत्तया कदाचित् केनापि सम्बन्धेन पृथिवीत्वाभावेन व्याप्तिर्भविष्यति परम् आत्मादीनां सर्वथाऽवृत्तित्वात् यत्रात्मा तत्र पृथिवीत्वाभाव इत्येवं नास्ति । आत्मनोऽवृत्तित्वात् व्याप्यव्यापकभावाभावेन कथमात्मादीना-मन्योन्याभावः पृथिव्यां सिद्ध्यति । न चाकाशात्मादीनाम् इह आकाशात्मादीति प्रतीत्या वृत्तिमत्त्ववादिमते व्याप्तिर्भविष्यति यत्रात्मांशस्तत्र पृथिवीत्वाभाव इत्यत आह - **सम्भवे वे**ति । यस्य व्यापकतया हेत्वभावो गृहीतस्तदभावाभावेन हेतुना तदत्यन्ताभाव एव सिद्ध्यति न तु तदन्योन्याभावः, यथा जलत्वव्यापकतया धूमाभावश्चेद् गृहीतस्तदा धूमाभावाभावेन धूमेन जलत्वात्यन्ताभाव एव सिद्ध्यति । यत्र जलत्वं तत्र धूमात्यन्ताभाव इति त्वया या व्याप्तिरुक्ता यद्व्यापकतयेत्यादिना तत्रान्योन्याभावः प्रविष्ट एव नास्ति । तथा चात्मादीनां यदि पृथिवीत्वात्यन्ताभावेन सह व्याप्तिर्गृहीता तदा आत्मादीनामत्यन्ताभाव एव पृथिव्यां सिद्ध्यति, न त्वात्मादीनामन्योन्याभावः पृथिव्यां सिद्ध्यति । यद्यपि पृथिव्यामात्मादीनामन्योन्याभावोऽस्ति तथापि स एतादृशव्याप्तिबलान्न सिद्ध्यति, व्याप्तिमध्येऽभावरूपतयाऽत्यन्ताभावस्यैव प्रवेशात् । यत्र वह्न्यभावस्तत्र धूमाभाव इत्यनया व्याप्त्या वह्न्यभावस्यात्यन्ताभावो वह्निर्यथा सिद्ध्यति तथा घटोऽपि कुतो न सिध्यति ? तत्र च वह्न्यभावाभावरूपतया वह्नेरेव प्रवेशात् वह्निसिद्धिर्न तु पर्वतरूपादीनां तेषां वह्न्यभावाभावरूपत्वा-भावात् । तथा चात्मादीनामत्यन्ताभाव एव पृथिवीत्वाभावाभावेन पृथिवीत्वेन सिद्ध्यतु न तु आत्मादीना-मन्योन्याभाव इति । तथा चात्मादीनामन्योन्याभावस्यासिद्धत्वात् कथं त्रयोदशान्योन्याभावसिद्धिरिति । एतदेवाह [130 B] — **हेत्वभावे**ति टीका । हेत्वभावः पृथिवीत्वाभावस्तद्व्याप्यतया गृहीतस्यात्मादेरत्यन्ताभाव

एव सिद्ध्यति न तु भेदरूपो[ऽन्यो]न्याभावः व्याप्यव्यापकमध्येऽप्रवेशादित्याशङ्कार्थः। समाधत्ते - **अत्राहुरि**ति। जलादिव्यापकतया इत्यत्र जलादिपदं जलादितादात्म्यपरम्, तथा च जलतादात्म्यं जलत्वं यत्र यत्र जलत्वं तत्र तत्र पृथिवीत्वाभावो यथा करकासु। अत्र शङ्का - जलत्वव्यापकतया गृहीतस्य हेत्वभावस्य पृथिवीत्वाभावस्य तदभावेन पृथिवीत्वेन हेतुना जलत्वात्यन्ताभावः पृथिव्यां सिद्ध्येत् न तु जलान्योन्याभावः, जलान्योन्याभावस्य जलत्वात्यन्ताभावरूपत्वाभावादित्याशयेनाशङ्कते - **न चैवमि**ति टीका। तथा च पृथिव्यां जलत्वादीनामत्यन्ताभाव एव सिद्धः न तु जलान्योन्याभावः सिद्ध्येत्। वस्तुगत्याऽन्योन्याभावो भेदपदेन विवक्षित इत्याशङ्कार्थः। समाधत्ते - **यथाही**ति टीका। यथा हेत्वभावव्याप्यतया गृहीतस्य जलत्वस्यात्यन्ताभावः सिद्ध्यति। यदा यत्र यत्र जलत्वं तत्र पृथिवीत्वाभाव इति तदा तदवच्छिन्नो जलत्वावच्छिन्नोऽन्योन्याभावो जलान्योन्याभावोऽपि पृथिव्यां सिद्ध्येत्। एवं चायं नियमः - यत्पदार्थव्याकतया गृहीतो यो हेत्वभावः तदभावेन हेतुना तदत्यन्ताभाववत् तदवच्छिन्नान्योन्याभावोऽपि सिद्ध्यति यथा जलत्वव्यापकतया पृथिवीत्वाभावश्चेद् गृहीतस्तदा पृथिवीत्वा-भावाभावेन पृथिवीत्वेन यः पदार्थो जलत्वरूपो व्याप्यतया गृहीतस्तदवच्छिन्नो जलत्वावच्छिन्नो जलान्योन्याभावोऽपि पृथिव्यां सिद्ध्यति। एतदेवाह - **तथे**ति टीका। ननु मूले उक्तं तदत्यन्ताभाव एव सिद्ध्यतीति, मूलेन सह विरोध इत्यत आह - **एवं चे**ति टीका। मूले अत्यन्ताभाव इति यदुक्तं तदुपलक्षणं तदवच्छिन्नो जलत्वावच्छिन्नोऽन्योन्याभावोऽपि द्रष्टव्यः। ननु तथापि व्यापकाभावेन पृथिवीत्वेन व्याप्यं यज्जलत्वं तदभावज्ञानावश्यंभावादित्यनेन मूलेन सह विरोधो यतो जलत्वरूपव्याप्याभावावश्यंभाव इत्येवोक्तम् न तु व्याप्यावच्छिन्नान्योन्याभाव इत्युक्तमित्यत आह - **व्याप्याभावे**ति टीका। व्याप्याभाव इत्यत्राप्युलक्षणं व्याप्यावच्छिन्नान्योन्याभावोऽपि द्रष्टव्यः। मतान्तरमाह - **केचित्तु** इति। एतन्मते य एव जलत्वात्यन्ताभावः स एव जलान्योन्याभावः। तथा च य एव जलत्वात्यन्ताभावः स एव चेज्जलान्योन्याभावस्तत्सिद्धौ विरोधाभावा-दित्यर्थः। ननु जलत्वात्यन्ताभाव एव जालान्योन्याभावः कथं स्यात् तयोर्भेदादित्यत आह - **जलाद्यन्योन्याभाव** इति टीका। तथा च जलत्वस्य यथा जलत्वात्यन्ताभावेन सह विरोधः तथा जलत्वस्य जलान्योन्याभावेन सह विरोधस्तिष्ठत्येव। यथा यत्र जलत्वं तत्र जलान्योन्याभावरूपो जलभेदो न भवतीति विरोधात्। जलत्वात्यन्ता-भावजलान्योन्याभावयोरन्यूनानतिरिक्तदेशवृत्तित्वनियमात् यत्र यत्र जलत्वात्यन्ताभावस्तत्र तत्र जलान्योन्या-भावोऽवश्यं तिष्ठति तथा चैकेनैव [131 A] जलत्वात्यन्ताभावेनैव जलान्योन्याभावव्यवहारोपपत्तौ जलत्वात्यन्ता-भावातिरिक्तजलान्योन्याभावकल्पने प्रमाणाभावात् यथा यत्र घटत्वात्यन्ताभावस्तत्रावश्यं घटान्योन्याभावोऽस्त्येव यथा कपाले तदुभयसम्भवः। अत्र साधकमाह - **यत्पदार्थे**ति टीका। अयमाशयः - यदन्योन्याभाव[स्य] अत्यन्ताभावरूपत्वं यस्य तस्य तत्पदार्थात्यन्ताभावरूपत्वात्। यथा घटान्योन्याभावस्यात्यन्ताभावरूपत्वं

घटत्वस्य चेत् तर्हि तस्य घटान्योन्याभावस्यापि घटत्वात्यन्ताभावरूपत्वनियमः । अत्रैवोपष्टम्भकमाह - **अत एवेति** । तथा चात्यन्ताभावप्रतियोगिनोः परस्परविरहरूपतानियमः । स नियमो घटान्योन्याभावघटत्वयोरपि तिष्ठत्येव । ततो घटान्योन्याभावो घटत्वात्यन्ताभावाभिन्नः घटत्वविरहरूपत्वात् । तथा च घटत्वविरहो घटान्योन्याभावात्यन्ताभावयोरुभयोरपि भवति । तथा च यत्र यत्र घटत्वविरहरूपत्वं तत्र तत्र घटत्वात्यन्ता-भावाभिन्नत्वं यथा घटत्वात्यन्ताभावे, एवं जलान्योन्याभावोऽपि जलत्वात्यन्ताभावाभिन्नं जलत्वविरहरूपत्वात् जलत्वात्यन्ताभाववत् । अत्र शङ्कते - **न चेति** टीका । तथा च जलान्योन्याभावस्यात्यन्ताभावो जलत्वरूपः, तथा च जलत्वविरहरूपत्वं जलान्योन्याभावेऽसिद्धमेव, ततोऽनेनासिद्धेन हेतुना कथं जलत्वात्यन्ता-भावाभेदसाधनमित्याशङ्कार्थः । समाधत्ते - **अपसिद्धान्तादिति** टीका । अपसिद्धान्तमेव विवृणोति - **अत एवेति** टीका । केवलान्वयिग्रन्थो घटान्योन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्तिरसाधारणो धर्मो घटत्वमेव तथा च घटत्वात्यन्ताभावघटान्योन्याभावयोरेकत्वमेव । अत्रैव साधकान्तरमाह - **एकेनैवेति** टीका । एकेनैव घटत्वात्यन्ताभावेनैव घटान्योन्याभावव्यवहारोपपत्तौ तदतिरिक्तान्योन्याभावकल्पने प्रमाणाभावात् । एतावतोक्तं घटत्वात्यन्ताभावो घटान्योन्याभावश्चैक एवेति । अत्राशङ्कते - **नन्विति** टीका । अयमाशयः । जलत्वात्यन्ता-भावग्राहिका सामग्री भिन्ना जलान्योन्याभावग्राहिका च सामग्री भिन्नाऽवश्यं वक्तव्यैवान्यथा यदि जलत्वात्यन्ताभाव एव चेज्जलान्योन्याभावस्तदा प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानमभावप्रत्यक्षसामग्री यथा घटत्वप्रकारक-घटज्ञानं घटाभावप्रत्यक्षसामग्री तद्वत् । तथा च यदि जलान्योन्याभाव एव जलत्वात्यन्ताभावस्तदाऽत्रापि जलत्वात्यन्ताभावग्रहे जलत्वत्वरूपप्रतियोगितावच्छेदकप्रकारकजलत्वरूपप्रतियोगिज्ञानमभावप्रत्यक्षसामग्री, ततो जलत्वत्वं नाम सकलजलवृत्तित्वे सति जलेतरावृत्तित्वम् । अत्र जलेतरं नाम जलान्योन्याभावः, जलान्योन्याभावो [131 B] नाम जलत्वात्यन्ताभावः, अत्रापि जलत्वात्यन्ताभावज्ञानसमग्री जलत्वत्वप्रकारकं जलत्वज्ञानम्, जलत्वत्वं नामात्रापि सकलजलवृत्तित्वे सति जलेतरावृत्तित्वम्, तथा चात्माश्रयानवस्थे । तथा च जलत्वात्यन्ताभावज्ञाने जलत्वत्वज्ञानमपेक्षितम्, जलत्वत्वं तु जलान्योन्याभावगर्भं न भवति किन्तु जलत्वात्यन्ताभावगर्भमेव, तथा च जलत्वात्यन्ताभावज्ञाने जलत्वात्यन्ताभावज्ञानं कारणमागतमिति कृत्वाऽऽ-त्माश्रयः । तत्राप्यत्यन्ताभावान्तरज्ञानस्यापि कारणत्वेऽनवस्था स्यात् । एतदेवाह - **जलत्वत्वेति** । तथा च जलत्वत्वज्ञानं विना जलत्वात्यन्ताभावो न निरूप्यते, न तस्य जलत्वात्यन्ताभावस्य प्रत्यक्षत्वमित्यर्थः । कुत इत्यत आह - **प्रतियोगितावच्छेदकेति** टीका । यतः कारणात् प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानम-भावप्रत्यक्षे कारणम् । अत्र जलत्वात्यन्ताभावस्य प्रतियोगि जलत्वं प्रतियोगितावच्छेदकं च जलत्वत्वं तथा च जलत्वत्वप्रकारकजलत्वज्ञानस्य जलत्वाभावप्रत्यक्षे हेतुत्वात् । ततः किमित्यत आह - **तच्चेति** टीका । तच्च

जलत्वत्वमित्यर्थः। जलत्वत्वं नाम सकलजलवृत्तित्वे सति जलेतरावृत्तित्वम्। सत्यन्तं करकत्वेऽतिव्याप्तिवारणार्थं तस्यापि जलेतरावृत्तित्वात्। सकलजलवृत्तित्वं प्रमेयत्वेऽतिव्याप्तिस्तद्वारणार्थं जलेतरेत्यादि। ततोऽपि किमित्यत आह - **तदितरत्वमपीति** टीका। तदितरत्वं नाम जलेतरत्वम्, तथा च जलेतरत्वं नाम जलान्योन्याभावत्वम्, तस्य जलत्वात्यन्ताभावातिरिक्तस्य त्वयाऽनङ्गीकारात् जलान्योन्याभावो हि जलत्वात्यन्ताभाव एव। तथा च तादात्म्यं जलस्य जलत्वं तदत्यन्ताभावप्रत्यक्षे जलत्वत्वावच्छिन्नजलत्वज्ञानमपेक्षितम्। तथा च प्रकृते पृथिव्यां जलत्वात्यन्ताभावज्ञाने जलत्वत्वावच्छिन्नजलत्वज्ञानं कारणं जलत्वत्वज्ञाने च जलत्वात्यन्ताभावज्ञानं कारणं यतो जलत्वत्वस्य जलेतरघटितमूर्तिकत्वात् जलेतरत्वस्य जलत्वात्यन्ताभावरूपत्वात्। तथा चान्योन्याश्रयात्माश्रयानवस्थाभिया पूर्वोक्तरीत्या जलान्योन्याभावजलत्वात्यन्ताभावयोर्भेदो वक्तव्य एवेति शङ्काग्रन्थार्थः। समाधत्ते - **अभावस्येति** टीका। जलत्वात्यन्ताभावजलान्योन्याभावयोरवश्यं भेदो वक्तव्यः इत्युक्ते प्राह। न हि प्रतियोगितावच्छेदकप्रकारकयावत्प्रतियोगिज्ञानमभावप्रत्यक्षे कारणं तदा बाधकमाह - **अत एवेति** टीका। घटप्रागभावघटध्वंसयोः परस्परविरहरूपत्वेन परस्परप्रतियोगित्वनियमात् घटध्वंसवति घटप्रागभावो नास्तीति प्रतीतिर्जायते। घटप्रागभावविरहरूपत्वं वर्तते [132 A] घटध्वंसस्य इति कृत्वा घटप्रागभावप्रतियोगित्वमपि वर्तते घटध्वंसस्य तथा च घटप्रागभावस्यापि घटध्वंसनिरूप्यत्वं स्यात्। वस्तुगत्या सिद्धान्ते घटप्रागभावस्य घटोऽपि प्रतियोगी घटध्वंसोऽपि प्रतियोगी यथा घटवति कपाले घटप्रागभावो नास्ति तथा घटध्वंसवत्यापि कपाले घटप्रागभावो नास्तीति प्रतीतिः, एवं च इह कपाले घटो भविष्यतीति घटप्रागभावप्रत्यक्षे घटज्ञानवत् घटध्वंसलक्षणप्रतियोगिनोऽपि ज्ञानं कारणं स्यात्। यावत्प्रतियोगिज्ञानमभावप्रत्यक्षे कारणं तदा घटप्रागभावप्रत्यक्षे घटज्ञानवत् घटध्वंसज्ञानमपि कारणं स्यात् घटध्वंसस्याप्युक्तरीत्या घटप्रागभावस्य प्रतियोगित्वात्। न चैवमिष्टापत्तिरिति वाच्यम्, घटध्वंसाज्ञानदशायामपि केवलं घटत्वप्रकारकघटज्ञानादेव घटो भविष्यतीति घटप्रागभावनिरूपणात्। तथा च यावत्प्रतियोगिज्ञानमभावप्रत्यक्षे न कारणम्, तथा च प्रतियोगितावच्छेदकप्रकारकयत्किञ्चित्प्रतियोगिज्ञानं कारणम् प्रतियोगिज्ञानमात्रस्य कारणत्वे प्रतियोगिज्ञानं घटज्ञानं [त]न्निर्विकल्पकज्ञानादपि घटाभावप्रत्यक्षापत्तिः। अतः प्रतियोगितावच्छेदकप्रकारकं प्रतियोगिज्ञानं कारणम्। तथा च प्रकृते जलान्योन्याभावजलत्वात्यन्ताभावयोरैक्यमेवेति। यदा जलत्वात्यन्ताभावत्वप्रकारकं ज्ञानं जलान्योन्याभावस्य जायते इह जलत्वं नास्तीति रूपं तदा जलत्वलक्षणप्रतियोगिनो ज्ञानमपेक्षितम्, यदा तु तस्यैव जलत्वात्यन्ताभावलक्षणस्य जलान्योन्याभावस्य ज्ञानं जायते यथा इदं जलं न भवतीति रूपं तदा जललक्षणप्रतियोगिज्ञानं कारणं न तु अत्र जलत्वत्वप्रकारकं जलत्वज्ञानमपि कारणम् अभाज्ञानस्य यावन्तः प्रतियोगिनस्तद्ज्ञानजन्यत्वानभ्युपगमात्। एवं च सति जलान्योन्याभावजलत्वात्यन्ताभावावेक एव परं पूर्वोक्तात्मा-

श्रयादिदूषणं न भवत्येव । कथम् ? जलत्वात्यन्ताभावज्ञाने जलत्वत्वप्रकारकं जलत्वज्ञानं कारणं भवतु जलत्वत्वमपि जलेतरावृत्तित्वगर्भं भवतु परं जलेतरत्वं जलान्योन्याभावस्तद्ज्ञानं तु न जलत्वत्वप्रकारक-जलत्वज्ञानमपेक्षते किन्तु जलत्वप्रकारकजलज्ञानमेवापेक्षते, अतोऽत्र जलत्वत्वज्ञानापेक्षाभावात् नात्माश्रयो न वाऽनवस्था । एतदेवाह - **केवलेनापी**ति टीका । यथा घटत्वत्वमध्ये प्रविष्टो यो घटान्योन्याभावस्तद्ज्ञानं केवलं घटत्वप्रकारकघटज्ञानेनैव जायते न तु तत्र [132 B] घटत्वत्वज्ञानं कारणम् । अयमर्थः - घटान्योन्याभावज्ञानं तु न घटत्वत्वज्ञानमपेक्षते केवलं घटत्वप्रकारकघटज्ञानादेव जायते, घटत्वात्यन्ताभावत्वप्रकारकज्ञानं तु घटत्वत्व-ज्ञानमपेक्षते प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानत्वेन तदपेक्षणात् । अत्राशङ्कते - **न चे**ति टीका । यथा त्वयोक्तं घटप्रागभावस्य प्रतियोगी घटः तथा घटध्वंसोऽपि । यद्यप्येवं द्वौ प्रतियोगिनौ भवतस्तथापि यत्किञ्चित्प्रतियोगिनो घटस्यैव ज्ञानं कारणं न तु घटध्वंसरूपप्रतियोगिनोऽपि ज्ञानं कारणम् । इदं तदा स्यात् यदि घटप्रागभावस्यापि घटध्वंसः प्रतियोगी स्यात्, न चैवमस्ति घटप्रागभावस्य प्रतियोगी घटध्वंस एव न भवतीति शङ्कार्थः । समाधत्ते - **अन्येतरे**ति टीका । तथा च प्रागभावप्रध्वंसयोः परस्परविरहरूपत्वं यदि नास्ति यथा घटघटाभावयोः परस्परविरहरूपं नास्ति । तथा घटप्रागभावघटध्वंसयोः परस्परविरहरूपत्वमस्त्येवेति प्रतियोग्यनुयोगिभाव इति तदा घटपटयोः परस्परविरहरूपत्वाभावेन घटकालेऽपि पटसत्त्ववत् घटप्रागभावकालेऽपि घटध्वंससत्त्वापत्तिस्तथा च घटप्रागभावस्य यथा घटः प्रतियोगी तथा घटध्वंसोऽपि घटप्रागभावस्य प्रतियोगी एवं घटध्वंसस्यापि घटप्रागभावः प्रतियोगी । एवं घटप्रागभावस्य नानाप्रतियोगित्वेऽपि घटप्रागभावो घटेनैव निरूप्यते तद्वत् जलभेदस्य जलत्वं प्रतियोगि तथा जलमपीति तेन जलभेदोऽपि यत्किञ्चित्प्रतियोगि जलं तेन निरूप्य एव न तु नानाप्रतियोगिनिरूप्यः । एतदेवाह - **अन्यतरोन्मज्जने**ति टीका । यदि घटप्रागभावस्याभावो घटध्वंसो न भवति तदा घटध्वंसकाले घटप्रागभावोन्मज्जनं स्यात्, अथ घटध्वंसस्याप्यभावो यदि घटप्रागभावो न भवति तदा घटप्रागभावकाले घटध्वंसनोन्मज्जनापत्तिर्घटध्वंस एव तदा स्यात्, तथा चानयोरपि परस्परप्रतियोगित्वमेव । ततः प्रकृते किमागतमित्यत आह - **तथा चे**ति टीका । तथा च तस्य जलादिभेदस्योभयप्रतियोगित्वे उभयं जलत्वं जलं च एतदुभयप्रतियोगित्वेऽपि जलभेदस्तु पूर्वोक्तरीत्या जलेनैव निरूप्यते । कोऽर्थः ? जलभेदज्ञाने जलत्व-प्रकारकं जलज्ञानमेव कारणं न तु जलत्वत्वप्रकारकं जलत्वज्ञानं कारणं येन जलत्वत्वस्य जलभेदघटिततया जलभेदस्यापि जलत्वात्यन्ताभावरूपतया पुनर्जलत्वात्यन्ताभावज्ञानेऽपि जलत्वत्वप्रकारकजलत्वज्ञानस्य कारणतयाऽऽत्माश्रयानवस्थादिकं स्यात् । तथा च जलभेदस्तु [133 A] जलत्वप्रकारकजलज्ञानेनैव निरूप्यते न तु जलत्व[त्व]प्रकारकजलत्वज्ञानेन निरूप्यते इति कृत्वा नानवस्था । ततः सिद्धं जलान्योन्याभावो जलत्वात्यन्ताभावश्चैक एवेति । एतन्मतं दूषयति - **अत्रेदं चिन्त्यमि**ति टीका । चिन्त्यत्वं दर्शयति - **अन्योन्या-**

**भावेति** टीका। तथा च घटपटयोर्भेदे यथा घटत्वप्रकारकप्रतीतिविषयत्वं घटस्य पटत्वप्रकारकप्रतीतिविषयत्वं पटस्येति प्रतीतिवैचित्र्यात् यथा घटपटयोर्भेदस्तथा प्रकृतेऽपि जलान्योन्याभावत्वप्रकारकप्रतीतिविषयत्वं जलान्योन्याभावस्य यथेदं जलं न भवतीति तद्वत् अत्र जलत्वं नास्तीति प्रतीतिविषयत्वं जलत्वात्यन्ताभावस्यापीति प्रतीतिवैचित्र्यमेव जलान्योन्याभावजलत्वात्यन्ताभावयोर्भेदे मानमित्यर्थः। ननु भिन्नप्रकारकप्रतीतिवैचित्र्यं न वस्तुभेदे मानं यतः एकस्यैव घटस्य घटात्यन्ताभावाभावात्मकस्यापि कदाचित् घटत्वप्रकारिका प्रतीतिः कदाचिच्च घटाभावाभावत्वप्रकारिका प्रतीतिः, न चैतादृशप्रतीतिवैचित्र्यमात्रेण घटघटात्यन्ताभावाभावयोर्भेदः, तथा प्रकृतेऽपि उक्तप्रतीतिवैचित्र्येण वस्तुगत्या न भेदोऽनयोरित्यस्वरसादाह - **प्रतियोगिभेदादिति** टीका। तथा च यथा घटात्यन्ताभावपटात्यन्ताभावयोर्भिन्नभिन्नप्रतियोगिनिरूप्यत्वात् भेदस्तद्वत् जलान्योन्याभाव-जलत्वात्यन्ताभावयोरपि जलजलत्वरूपभिन्नभिन्नप्रतियोगिनिरूप्यत्वनियमात् भेद एवेत्यर्थः। ननु यदि भिन्न-प्रतियोगिनिरूप्यत्वमेवा(व) भेदसाधकं तदा घटप्रागभावघटध्वंसघटात्यन्ताभावानामपि भेदो न सिद्ध्येत्। कुतः ? भिन्नभिन्नप्रतियोगिनिरूप्यत्वाभावादित्यत आह - **अपि चेति** टीका। जलान्योन्याभावजलत्वात्यन्ता-भावयोर्विरुद्धधर्माध्यासादवश्यं भेदो यथा घटपटयोर्घटत्वपटत्वरूपविरुद्धधर्माध्यासात् भेदोऽवश्यं तथाऽत्रापि विरुद्धधर्मो जलत्वात्यन्ताभावत्वं जलान्योन्याभावत्वं च, न चैतयोधर्मयोरप्यैक्यमेवेति वाच्यम्। भिन्नभिन्न-पदार्थघटितमूर्तिकत्वेन भेदाद् यथा कम्बुग्रीवत्वं भिन्नो धर्मः कपालजन्यद्रव्यत्वं च भिन्नो धर्मस्तद्वत् प्रकृतेऽपि जलत्वात्यन्ताभावत्वं भिन्नो धर्मो जलान्योन्याभावत्वमपि भिन्नः तथा चानयोर्विरुद्धधर्माध्यासाद्भेद इत्यर्थः। आशङ्कते - **नन्विति**। तथा च यथा एक एव घटो भावव्यवहारेऽपि हेतुर्घटाभावाभावव्यवहारेऽपि हेतुस्तथा च घटाभावाभावत्वं घटत्वं चैकवस्तुवृत्त्येव न चैतौ धर्मौ विरुद्धौ। एतदेवाह - **न चैतावतेति** टीका। घटत्व-प्रकारकप्रतीतिरथ च घटाभावाभावत्वप्रकारिका प्रतीतिः एतावत्प्रतीतिवैचित्र्यमात्रेण न विरुद्धधर्माध्यासः। कुत इत्यत आह - **वस्तुत** इति टीका। वस्तुनो ह्येकस्यैव भावस्य घटत्वप्रकारकप्रतीतिविषयता घटाभावाभावत्व-प्रकारकप्रतीतिविषयताऽपि, ततो भिन्नप्रकारकप्रतीतिविषयत्वेऽपि घटत्वं घटाभावाभावत्वं चैकवृत्त्येव वस्तु-तोऽभिन्नयोर्घटघटात्यन्ताभावाभवयोरेकत्वमेवेति न विरुद्धधर्माध्यास इत्यर्थः। ततः प्रकृते किमित्यत आह - **वस्तुत** इति टीका। तथा च वस्तुत एकस्यैव जलत्वात्यन्ताभावस्य [133 B] जलान्योन्याभावस्य वा उभयव्यवहार[हेतु]त्वं जलान्योन्याभावव्यवहारहेतुत्वं जलत्वात्यन्ताभावव्यवहारहेतुत्वं च भवतु। तथा च न विरुद्धधर्माध्यास इत्यत आह - **न चैतावतेति**। एकस्य वस्तुनो भिन्नप्रकारकप्रतीतिवैचित्र्यमात्रेण न विरुद्धधर्मः, एकस्यैव घटादेर्नानाप्रकारकप्रतीतिविषयत्ववत् एकस्यैव जलत्वात्यन्ताभावस्य जलत्वात्यन्ताभावत्वप्रकारक-प्रतीतिजलान्योन्याभावत्वप्रकारकप्रतीतिवैचित्र्यविषयकत्वेऽप्यैक्यमित्याशङ्कार्थः। समाधत्ते - **इतरेति** टीका।

केन कस्यान्यथासिद्धिः क्रियते ? किं जलत्वात्यन्ताभावेन जलान्योन्याभावस्यान्यथासिद्धिः क्रियते किं वा जलान्योन्याभावेन जलत्वात्यन्ताभावस्यान्यथासिद्धिः क्रियते ? इतरान्योन्याभावो जलान्योन्याभाव इतरात्यन्ताभावो जलत्वात्यन्ताभावः तथा चोभयोर्मध्ये कस्य स्वीकारेण कस्यान्यथासिद्धिकरणम् ? व(अ)तिरिक्तानङ्गीकारे विनिगमनाविरहात्। तथा चोभयोर्भेद एव। अयं निष्कर्षः। त्वया उच्यते - जलत्वात्यन्ताभाव एव जलान्योन्याभावः। मया चोच्यते - जलान्योन्याभाव एव जलत्वात्यन्ताभावः। एवं चैकस्वीकारे विनिगमकं नास्तीत्युभयभेदस्वीकारः। ननु तर्हि घटस्य घटाभावाभावस्यापि भेदोऽस्तु, एकस्वीकारे विनिगमकाभावादित्यत आह - **घटादेश्चेति** टीका। तथा च घटस्यैव घटाभावाभावत्वे विनिगमकमस्ति। कथम् ? भावत्वमेव विनिगमकमस्ति यतो घटघटात्यन्ताभावाभावयोरन्यूनानतिरिक्तदेशता तिष्ठति घटाभावाभावज्ञानकाले घटग्राहकसामग्र्या आवश्यकत्वं च तिष्ठति। एवं च घटेनैव घटाभावाभावव्यवहारोपपत्तौ नातिरिक्तघटाभावाभाववस्तुकल्पना। प्रकृते च धर्मिभेदधर्मात्यन्ताभावयोर्नान्यूनानतिरिक्तदेशवृत्तित्वं नापि उभयग्राहकसामग्र्योरैक्यं यतो जलान्योन्याभावे जलत्वप्रकारकजलज्ञानसाध्यत्वं यथा नेदं जलमिति जलत्वात्यन्ताभावग्रहे च जलत्वत्वप्रकारकं ज्ञानं कारणम्। ततोऽनयोर्ग्रहणे सामग्रीभेद इति स्पष्ट एवानयोर्भेद इत्यर्थः। धर्मिभेदधर्मात्यन्ताभावयोर्न्यूनातिरिक्तदेशवृत्तित्वं विवृणोति - **अत एवेति**। यत एव धर्म्यन्योन्याभावो भिन्नो धर्मात्यन्ताभावो भिन्नः, अत्र जलत्वं नास्ति इदं जलं न भवतीति प्रतीतेः, अत एव। वृक्षः संयोगीत्यत्र वृक्षे संयोगवदन्योन्याभावस्तु नास्ति। धर्मः संयोगस्तद्वान् संयोगी धर्मी, तदन्योन्याभावो नास्ति। वृक्षे संयोगरूपधर्मात्यन्ताभावस्तु वर्तते इति कृत्वा तयोर्न्यूनातिरिक्तदेशवृत्तित्वाद् भेद इति सिद्धः। तथा चानयोर्न्यूनाधिकदेशवृत्तित्वात् कथमभेदः स्यादित्यर्थः। प्रत्यक्षाप्रत्यक्षाभ्यामपि भेदमाह - **पिशाचेति**। तथा च पिशाचान्योन्याभावः प्रत्यक्षः पिशाचत्वात्यन्ताभावोऽप्रत्यक्षः। पूर्वोक्तयुक्त्या पिशाचान्योन्याभावप्रत्यक्षत्वे योग्यानुपलब्धिर्वर्तते। यथा [134 A] स्तम्भो यदि पिशाचात्मा स्यात् तदा स्तम्भवदुपलभ्येतेति, यदि स्तम्भः पिशाचात्मा जातस्तदा पिशाचात्मत्वं स्तम्भवृत्ति स्यात् योग्यव्यक्तिवृत्तिजातेर्योग्यत्वनियमात् इति योग्यानुपलब्धिबलात् पिशाचान्योन्याभावः प्रत्यक्षः पिशाचत्वात्यन्ताभावस्तु न प्रत्यक्षः पिशाचत्वात्यन्ताभावस्य प्रतियोगि पिशाचत्वं प्रतियोगितावच्छेदकं पिशाचत्वत्वं तथा च पिशाचत्वत्वस्य सकलपिशाचवृत्तित्वे सति पिशाचेतरावृत्तित्वं पिशाचत्वत्वस्य जातिरूपत्वाभावेन पिशाचरूपातीन्द्रियघटिक(त)त्वेन च योग्यानुपलब्धेरभावात् इति कृत्वा पिशाचान्योन्याभावः प्रत्यक्षः पिशाचत्वात्यन्ताभावोऽप्रत्यक्ष इति कृत्वा प्रत्यक्षत्वाप्रत्यक्षत्वरूपाभ्यामपि भेदः इत्यर्थः। मतान्तरमाह - **अन्ये त्विति**। **अत्रेति**। तथा च भवतु जलत्वात्यन्ताभावजलान्योन्याभावयोर्भेदः तथापि व्यतिरेकव्याप्त्या जलान्योन्याभाव एव सिद्ध्यति। न तु जलादीनां पृथिवीत्वाभावव्याप्यत्वम्। कथम् ? यथा यत्र जलादौ जलं तत्र पृथिवीत्वाभाव एवं व्याप्तेरभावादित्यत

आह - **अत्र मते** इति। यस्य मते व्यतिरेकिणि अप्रसिद्धमेव साध्यं सिद्ध्यति तन्मते सम्बन्धिसामानाधिकरण्यं न व्याप्तिः किन्तु सम्बन्धिसम्बन्धयोः सामानाधिकरण्यं सम्बन्धिव्याप्तिः यथा यत्र धूमसम्बन्धस्तत्र वह्निसम्बन्ध इति धूमसम्बन्धवह्निसम्बन्धयोः सामानाधिकरण्यं धूमवह्निव्याप्तिः, तथा च यदीयसम्बन्धसमानाधिकरणात्यन्ताभावाप्रतियोगी यदीयः सम्बन्धः तत्सम्बन्धयोः सामानाधिकरण्यं तत्सम्बन्धिनोर्व्याप्तिः यथा धूमसमानाधिकरणात्यन्ताभावाप्रतियोगी वह्निसम्बन्धो भवति वह्निसम्बन्धेन सह धूमसम्बन्धस्य सामानाधिकरण्यं वर्तते यथा एकस्मिन्नधिकरणे महानसादौ धूमसम्बन्धोऽपि तिष्ठति वह्निसम्बन्धोऽपि तिष्ठतीति धूमसम्बन्धवह्निसम्बन्धयोः सामानाधिकरण्यं तदेव धूमवह्न्योर्व्याप्तिः। एतदेवाह - **अस्ति चेति** टीका। ननु धूमसम्बन्धसमानाधिकरणात्यन्ताभावापेक्षया लाघवात् धूमसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमेव व्याप्तिः अस्तु इत्यत आह - **परेणापीति**। यस्य मते धूमवह्निसामानाधिकरण्यमेव व्याप्तिः तस्य मतेऽपि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगित्ववह्निसामानाधिकरण्यमात्रं न व्याप्तिः। कुतः ? यतो व्यभिचारिसाधारण्यापत्तिः। कथम् ? वह्निसमानाधिकरणात्यन्ता[भावा]प्रतियोगी धूमो भवति परम्परासम्बन्धेन। कथम् ? यतो धूमाधिकरणे वह्निर्वर्तते तद्वृत्ति वह्नित्वम् अयोगोलकवह्नावपि तिष्ठति तथा चैतादृशपरम्परासम्बन्धेनायोगोलकेऽपि धूमस्तिष्ठत्येवेति [134 B] कृत्वा व्यभिचारिणि वह्निधूमयोरपि व्याप्तिः स्यात्। तद्वारणार्थं हेतुसमानाधिकरणो ग्राह्यसामानाधिकरण्यप्रविष्टो योऽत्यन्ताभावस्तदप्रतियोगित्वं साध्यस्य विवक्षितम्, तथा ग्राह्यसम्बन्धः संयोगसम्बन्धस्तेन सम्बन्धेन योऽयोगोलके धूमात्यन्ताभावस्तस्याप्रतियोगित्वं धूमस्य नास्ति संयोगसम्बन्धेन धूमात्यन्ताभावप्रतियोगित्व(त्वं) धूमस्येति कृत्वा व्यभिचारिणि नातिप्रसङ्गः। ननु तथापि वह्निसमानाधिकरणो योऽत्यन्ताभावः संयोगसम्बन्धेन वह्निसाम(ग्र्)या वर्तते तत्सामानाधिकरण्यं धूमवह्न्योरपि वह्निसामग्रीद्वारकसम्बन्धेन वर्तते इति कृत्वा वह्नौ धूमव्याप्तिः स्यादित्यतस्तद्वारणाय तत्तत्सम्बन्धावच्छिन्नतत्समानाधिकरणत्वेन सम्बन्धेनात्यन्ताभावाप्रतियोगित्वं तेन सम्बन्धेन तयोः सामानाधिकरण्यं व्याप्तिः, तथा च तत्सम्बन्धावच्छिन्नतत्तत्सामानाधिकरण्यं व्याप्तिः परेणापि वक्तव्यैव, तथा च तत्सम्बन्धावच्छिन्नतत्सम्बन्धिसामानाधिकरण्यं व्याप्तिः यथा संयोगसम्बन्धेन धूमसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं वह्नौ वर्तते इति कृत्वा संयोगसम्बन्धावच्छिन्नधूमवह्न्योः सामानाधिकरण्यमेव व्याप्तिस्तथा हेत्वंशे यः सम्बन्धः साध्यांशे च यः सम्बन्धस्तत्तत्सम्बन्धावच्छिन्नौ यौ सम्बन्धिनौ धूमवह्नी तयोः सामानाधिकरण्यं व्याप्तिः। ततो लाघवात् तत्तत्सम्बन्धो धूमांशसम्बन्धः वह्न्यंशसम्बन्धश्च तयोः सामानाधिकरण्यं व्याप्तिः न तु तत्तत्सम्बन्धिनोरपि गौरवात्। एतदेवाह - **तथा च लाघवादिति** टीका। ततः प्रकृते किमायातमित्यत आह - **तदिहेति** टीका। यत्र जलादितादात्म्यं जलत्वमेव तथा च जलत्वलक्षणो यत्र जलसम्बन्धस्तत्र पृथिवीत्वाभावसम्बन्ध इति सम्बन्धयोः सामानाधिकरण्यमेव जलपृथिवीत्वाभावयोर्व्याप्तिरित्यर्थः। अयमर्थः -

जलादिकं पृथिवीत्वाभावरूपं चेति रूपं यत्सम्बन्धिद्वयं तत्प्रतियोगिकयोः तन्निरूपितयोः तादात्म्यलक्षणसम्बन्ध-पृथिवीत्वाभावप्रतियोगिकरूपसम्बन्धयोर्यत्सामानाधिकरण्यं तद् एव पृथिवीत्वाभावजलयोर्व्याप्तिरित्यर्थः । एतावता यदुक्तं पूर्वं यत्र जलं तत्र पृथिवीत्वाभाव इति व्याप्तिर्नास्ति शिलाशकलादौ व्यभिचारात् । भूतले संयोगसम्बन्धेन जलं वर्तते पृथिवीत्वाभावो नास्तीति कथं व्यापकः पृथिवीत्वाभावो व्याप्यं च जलमिति व्याप्यव्यापकभावः सङ्गच्छते इति शङ्का । तत्रेदमुत्तरम् - जलपृथ्वीत्वाभावयोः सामानाधिकरण्यं व्याप्तिर्न विवक्षिता किन्तु [135 A] जलपृथिवीत्वाभावप्रतियोगिकसम्बन्धयोर्यत् सामानाधिकरण्यं - कथम् ?, यत्र यत्र जलतादात्म्यं तत्र पृथिवीत्वाभावसम्बन्ध इति जलतादात्म्यपृथिवीत्वाभावसम्बन्धयोः सामानाधिकरण्यं - तदेव जलपृथिवीत्वाभावयोर्व्याप्तिरिति तु वर्तते, इदमेव जलपृथिवीत्वाभावयोर्व्याप्तिः, तथा च यत्र जलत्वं तत्र पृथिवीत्वाभाव इति कृत्वा पूर्वोक्तदूषणं न लगतीत्यर्थः । शङ्कते - **न चेति** । तथा च संयोगादिरिव सम्बन्धो न तादात्म्यं सम्बन्ध उभयसम्बन्धिनिष्ठत्वाभावात् सम्बन्धी हीत्यादिन्यायानुपपत्तेः । अतो जलतादात्म्यं सम्बन्धो न भवति । तथा च सम्बन्धसामानाधिरण्यमपि सम्बन्धिनोर्व्याप्तिरिति कथं स्यात् जलतादात्म्यस्य सम्बन्ध-त्वाभावादित्याशङ्कार्थः । समाधत्ते - **अविशिष्टे**ति टीका । सम्बन्धिभिन्नत्वे सति सम्बन्ध्याश्रितत्वं न सम्बन्ध-त्वनियामकं तादात्म्यलक्षणसम्बन्धे स्वरूपसम्बन्धे तदभावात् किन्तु सम्बन्धत्वनियामकं यथा अविशिष्टधी-व्यावृत्तविशिष्टधीनियामकत्वम् । दण्डी पुरुष इति विशिष्टज्ञानम्, विशिष्टज्ञाननियामकत्वं नाम विशिष्टज्ञानजनक-त्वम्, तच्च दण्डी पुरुष इति विशिष्टज्ञानस्य जनकत्वं दण्डपुरुषयोरुभयोरपि तिष्ठतीति दण्डपुरुषयोरपि सम्बन्धत्वं स्यादित्यतोऽविशिष्टधीव्यावृत्तेति पदम् । एतदर्थस्तु विशेषणत्वविशेष्यत्वान(न्व)[य]त्वे सति विशिष्टधी-नियामकत्वं सम्बन्धत्वं ततो दण्डपुरुषयोर्विशेषणत्वविशेष्यत्वात् तत्र नातिव्याप्तिः । यथा दण्डी पुरुष इत्यत्र संयोगलक्षणसम्बन्धे विशेषणत्वविशेष्यत्वेऽपि न स्त इति संयोगस्य सम्बन्धत्वं विशेषणत्वविशेष्य-त्वान्व[य]त्वमजनके पारिमाण्डल्यादौ वर्ततेऽतो विशिष्टधीनियामकपदम् । **अत एवे**ति टीका । यतस्तादात्म्यमपि सम्बन्धः अत एव **न्यायमते** तादात्म्यलक्षणसम्बन्धेन यो रजतारोपः स तादात्म्यारोपः एकं विशिष्टज्ञानम्, समवायसम्बन्धेन रजतत्वारोपो द्वितीयं विशिष्टज्ञानम् । यथा पुरोवर्तिनि शुक्तिशकले रजततादात्म्यलक्षणो यो रजताभेदरूपः सम्बन्धो यथा 'इदं' पदार्थस्य रजतस्य चाभेदलक्षणेन सम्बन्धेन रजताभेदसम्बन्धस्तेन सम्बन्धेन इदं रजतमित्येकं विशिष्टज्ञानं जायते, द्वितीयं च विशिष्टज्ञानं रजतत्वसमवायलक्षणेन सम्बन्धेन भवति । यद्यपि प्रतीतिरिदं रजतमित्येकविशिष्टज्ञानरूपैव भासते तथापि भिन्नविषयकत्वात् विशिष्टप्रतीत्योर्भेदः । यदि च तादात्म्यं सम्बन्ध एव न स्यात् तदा तादात्म्यलक्षणसम्बन्धेनैकस्तादात्म्यारोपोऽपरश्च रजतत्वरूपसमवायलक्षणसम्बन्धेन रजतत्वसमवायारोप इति भेदः कथं स्यादित्यर्थः । तथा च तादात्म्यसम्बन्धस्य यत् सामानाधिकरण्यं सा व्याप्तिर्यत्र

जलतादात्म्यं तत्र पृथिवीत्वाभावसम्बन्ध इति सम्बन्धयोः सामानाधिकरण्यमेव व्याप्तिः। प्रकृते उपसंहरति - तथा चेति टीका। यत्र जलतादात्म्यं तत्र पृथिवीत्वाभाव इति सम्बन्धसामानाधिकरण्यमेव जलपृथिवीत्वाभावयोर्व्याप्तिः, [135 B] तेन न पूर्वोक्तो दोष इति भावः। शङ्कते - **नन्विति** टीका। तादात्म्यमपि सम्बन्धो भवतु। तथा च तादात्म्यसम्बन्धो यस्तादात्म्यसामानाधिकरण्यं जलपृथिवीत्वाभावयोर्व्याप्तिः। ततश्च किमागतमित्यत आह - **तथापीति** टीका। यदभावव्यापकतया गृहीतो हेत्वभावस्तदभावाभावेन हेतुना तदत्यन्ताभावः सिद्ध्यतीत्युक्त-नियामकात् यल(जला)दिव्यापकतया गृहीतस्य पृथिवीत्वाभावस्याभावेन पृथिवीत्वेन जलाद्यत्यन्ताभाव एव पृथिव्यां सिद्ध्येत् न तु जलान्योन्याभावः, तथा च पृथिव्यां जलं नास्तीति अत्यन्ताभावः एव सिद्ध्येत् न तु पृथिवी जलं नेत्यन्योन्याभावः सिद्ध्येत्। कुतोऽत्यन्ताभाव एव पूर्वोक्तनियामके सिद्ध्येदिति चेत्। अन्यथा यत्र वह्न्यभावस्तत्र धूमाभाव इत्यत्रापि धूमाभावाभावेन धूमेन वह्न्यभावस्यात्यन्ताभावो वह्निरेव न सिद्ध्येत् किन्तु वह्न्यभावान्योन्याभाव एव सिद्ध्येत्। पर्वतो वह्न्यभावो न भवतीति सिद्धिर्नास्ति किन्तु पर्वतो वह्न्यभावाभाववान् वह्निमान् इत्येव बुद्धिरस्तीति नान्योन्याभावसिद्धिरित्याशङ्कार्थः। समाधत्ते - **जलादीति**। जलाद्यन्योन्याभावो नाम तादात्म्यावच्छिन्नो जलादिविरहो जलाद्यभाव एव। ततः प्रकृते किमायातमित्यत आह- **यत्सम्बन्धेति** टीका। तथा च यत्सम्बन्धसामानाधिकरण्यं व्याप्तिस्तत्सम्बन्धावच्छिन्नव्याप्याभावस्य व्यापकाभावात् सिद्धिः। यथा यत्पदेन जलम्, तस्य सम्बन्धो जलतादात्म्यम्, तथा च यत्र जलतादात्म्यं तत्र पृथिवीत्वाभावसम्बन्ध इति सम्बन्धयोः सामानाधिकरण्यं व्याप्तिः, तथा च जलतादात्म्यलक्षणसम्बन्धस्य यत्सामानाधिकरण्यं सैव जलपृथिवीत्वाभावयोर्व्याप्तिः, तेन पूर्वोक्तनियामकात् तत्पदेन तादात्म्यलक्षणः सम्बन्धस्तदवच्छिन्नो व्याप्यस्य जलादेर्योऽभावः स एव जलान्योन्याभावः, तथा च पृथिवी जलं न भवतीति प्रतीतिरपि भवति, अयमेव जलान्योन्याभावः। तथा च तादात्म्यसम्बन्धावच्छिन्नो जलादिविरहः स एव जलान्योन्याभावः न तु स जलात्यन्ताभावः। कथम्? जलात्यन्ताभावे तादात्म्यसम्बन्धोऽवच्छेदको न भवति किन्तु अत्यन्ताभावावच्छेदकः संयोगादिरेव। तथा च यत्र वह्न्यभावस्तत्र धूमाभाव इति व्याप्त्या संयोगसम्बन्धेन वह्न्यभावाभावः सिद्ध्यन् वह्न्यत्यन्ताभावस्यात्यन्ताभावो वह्निरेव सिद्ध्यति न तु वह्न्यत्यन्ताभावान्योन्याभावः वह्नेरेव प्रतीतेः न तु पर्वतो वह्न्यभाव इति रूपा प्रतीतिरिति। प्रकृते च तादात्म्यसम्बन्धावच्छिन्नो यो जलादिविरहः स जलान्योन्याभाव एव भवति तादात्म्यस्यान्योन्याभावातिरिक्तस्थले सम्बन्धत्वाभावात्। वह्न्यभावस्थले तादात्म्यसम्बन्धो न भवतीति कृत्वा वह्न्यभावाभावो वह्निरेव सिद्ध्यति। प्रकृते जलस्य तादात्म्य-सम्बन्धावच्छिन्नस्य व्याप्यत्वात् यत्र जलतादात्म्यं तत्र पृथिवीत्वाभावसम्बन्ध इति तादात्म्यसम्बन्धेन यो जलाद्यभावः सिद्ध्यन् स जलाद्यन्योन्याभाव एव सिद्ध्यति न तु जलात्यन्ताभावः। इदं दूषयति - **चिन्त्यमिति**

टीका । चिन्त्यं विवृणोति - **यत्रेति** [136 A] टीका । **यत्र धूमसम्बन्ध** इति । तथा च पूर्वोक्तवादिमते सम्बन्धसामानाधिकरण्यमेव सम्बन्धिव्याप्तिः । तन्मते धूमसम्बन्धवह्निसम्बन्धसामानाधिकरण्यमेव धूमवह्निव्याप्तिरिति पर्यवसन्नम् । तथा च यत्र धूमसम्बन्धस्तत्र वह्निसम्बन्ध इति सम्बन्धसामानाधिकरण्ये धूमः सम्बन्धी विशेषणमुपलक्षणं वा ? आद्यं दूषयति - **आकाशादेरि**ति टीका । तथा चाकाशादीनामितरभेदो न सिद्ध्येत् । यत्र धूमविशिष्टसम्बन्धस्तत्र वह्निविशिष्टसम्बन्ध इतिवत् यत्राकाशविशिष्ट आकाशतादात्म्यलक्षणः सम्बन्धस्तत्र तत्र पृथिवीत्वाभावसम्बन्ध इति वक्तुं न शक्यते यतः आकाशादेरवृत्तितया आकाशविशिष्टमप्रसिद्धम् । यथा धूमादेर्वृत्तिमत्त्वात् धूमविशिष्टं प्रसिद्धमस्तीति कृत्वा यत्र यत्र धूमविशिष्टः सम्बन्धस्तत्र वह्निसम्बन्ध इति वक्तुं शक्यते । तद्वत् आकाशविशिष्टमेव प्रसिद्धमित्यर्थः । एतदेवाह - **न हीति** टीका । हेतुमाह - **आकाशादेरि**ति टीका । ननु भवतु आकाशादीनामपि वृत्तिमत्त्वम् वादिमते नयनाकाशविशिष्टः सम्बन्धस्तत्र पृथिवीत्वाभावसम्बन्धो यथाकाशविशिष्टसम्बन्धः आकाशतादात्म्यलक्षणः सम्बन्ध आकाशे तत्र पृथिवीत्वाभावस्तिष्ठत्येवेत्यत आह- **पूर्वोक्ते**ति टीका । पूर्वोक्तलाघवं सम्बन्धिसामानाधिकरण्यापेक्षया सम्बन्ध्यप्रवेशेन सम्बन्धसामानाधिकरण्यमेव व्याप्तिरिति तत् कथं स्यात् । सम्बन्धिविशिष्टसम्बन्धसामानाधिकरण्यं व्याप्तिरिति उक्तं तदा सम्बन्धे विशेषणतया सम्बन्धिप्रवेश आगत एवेति सम्बन्ध्यप्रवेशेन लाघवमित्युक्तं तन्न सम्भवतीत्यर्थः । उपलक्षणपक्षे दूषयति - **नापीति** । तथा चोपलक्षणपक्षे यथा चैत्रविशिष्टो देवदत्तोऽश्वेनानीत इत्यत्र यथा चैत्रो विशेषणं तदाऽश्वोपरि चैत्रदेवदत्तयोर्भारः, तथा चैत्रोपलक्षित इत्यत्र चैत्रपदमुपलक्षणं चैत्रस्याश्वोपरि भारो नास्ति । अत एव प्रकृतानन्वयि अविद्यमानं व्यावर्तकमुपलक्षणम्, व्यावर्तकमात्रं विशेषणेऽतिव्याप्तम् । यथा दण्डिपुरुषोक्त्या दण्डेन विशेषणेन व्यावृत्तिः क्रियते, अतोऽविद्यमानं पदं दण्डस्तु विद्यमान एव व्यावर्तकः । प्रकृतानन्वयि स्वरूपकथनमात्रम् । वस्तुगत्या यदुपलक्षणं तत् प्रकृतानन्वयि भवति यथा कुरुक्षेत्रमाश्रयते देवदत्त इत्यत्र कुरुषु उपलक्षणेषु देवदत्ताश्रयत्वं नास्ति । यथा देवदत्ताश्रयत्वं क्षेत्रे एव वर्तते न तु कुरुषु कुरूणामविद्यमानत्वात् । उपलक्ष्यतावच्छेदकं क्षेत्रसम्बन्धि तडामा(गा)दिकम् । विशेषणं तु प्रकृतक्रियान्वयि भवति । यथा कुण्डलिनमानयेत्यत्र कुण्डलेऽप्यानयनान्वयः । प्रकृते धूमश्चेदुपलक्षणं तदा यथा धूमोपलक्षितः सम्बन्धस्तत्र वह्निसम्बन्ध इत्यत्र यदि धूम उपलक्षणं तदा व्यभिचारी सम्बन्धो भवति । यथा धूमोपलक्षितः सम्बन्धो धूमे तिष्ठति, तत्र वह्निसंयोगो नास्ति वह्निसंयोगस्य महानसादौ सत्त्वात् । तथा च यत्र [136 B] धूमोपलक्षितः संयोगस्तत्र वह्निसंयोग इत्येवं नियमो नास्ति। महानसे यद्यपि धूमोपलक्षितः संयोगो वर्तते वह्निसंयोगोऽपि वर्तते परं धूमे नास्ति । न च धूमानुयोगिकः सम्बन्धो यत्र तत्र वह्निसंयोगः इति [वाच्यम्] । धूमप्रतियोगिकः सम्बन्धो धूमे नास्ति किन्तु महानसादाविति वाच्यम् । धूमप्रतियोगित्वमपि विशेषणमुपलक्षणं वा ? नाद्यः, गौरवात् सम्बन्धित्वांशप्रतियोगित्वांशयोः

प्रवेशेनातिगौरवग्रस्तत्वात्। न द्वितीयः, धूमोपलक्षितः सम्बन्धो धूमेऽपि तिष्ठतीति यथा पाकक्रियोपलक्षितो देवदत्तेऽपचन्नपि देवदत्तो भवत्येव। तद्वत् धूमप्रतियोगित्वोपलक्षितः सम्बन्धो दण्ड एव वर्तते, तत्र उपलक्षणपक्षे कुण्डलसम्बन्धो नास्ति देवदत्त एव तत्र सत्त्वात्। यत्र धूमप्रतियोगित्वं वस्तुगत्या नास्ति धूमत्वावच्छेदेन धूम-संयोगो नास्ति किन्तु महानसत्वावच्छेदेन वर्तते इत्यर्थः। उपलक्षणपक्षे दूषणान्तरमाह - **किञ्चेति** टीका। दण्डी कुण्डली देवदत्त इत्यत्र यो दण्डो यच्च कुण्डलं देवदत्त एव वर्तते नान्यत्र। तत्र दण्डित्वकुण्डल(लि)त्वयोर्व्याप्तिर्न स्यात्। कथम्? दण्डोपलक्षितः सम्बन्धो दण्ड एव वर्तते तत्र कुण्डलसम्बन्धो नास्ति देवदत्त एव सत्त्वात्। ननु उदाहरणान्तरमिदं किमर्थं पूर्वोदाहरणेनाविशेषात्। यथा यत्र धूमोपलक्षितः सम्बन्धस्तत्र वह्निसम्बन्धो नास्ति, धूम एव धूमोपलक्षितसम्बन्धसत्त्वात्। तद्वत् अत्रापि दण्डोपलक्षितः सम्बन्धो दण्ड एवास्ति तत्र च कुण्डलसम्बन्धो नास्तीत्युदाहरणाविशेष इति चेन्न। धूमस्यापि विरलद्रव्यत्वेन प्रशिथिलद्रव्यत्वेनेति यावत् वह्नेरपि विरलद्रव्यत्वेन धूमेऽपि वह्निसंयोगो भविष्यति। अतो यत्र धूमोपलक्षितः संयोगस्तत्र वह्निसंयोग इति न व्यभिचारस्तदर्थमुदा-हरणान्तरम्। तथा च दण्डस्यापि निबिडद्रव्यत्वेन कुण्डलस्यापि निबिडद्रव्यत्वेन दण्डे कुण्डलसंयोगः कुत्रापि नास्तीति कृत्वा यत्र दण्डोपलक्षितः संयोगो दण्ड वर्तते तस्य द्विष्ठत्वात् तथा कुण्डलसंयोगो दण्डे नास्तीति उक्तमुदाहरणान्तरम्। ननु दण्डकुण्डलयोर्व्याप्तिर्नास्त्येवेत्यत आह - **समानाधिकरणयोरपीति** टीका। तथा च व्यभिचाराभाव इति शेषः। यत्र देवस(द)त्ताको दण्डो यश्च कुण्डलव्याप्तः स दण्डपदेन ग्राह्यः, कुण्डलव्याप्तमेव द्रव्यपदेन ग्राह्यम्। उपसंहरति - **तस्मादिति** टीका। **अनन्यगत्येति** टीका। पूर्वोक्तदूषणैर्विशेषणोपलक्षणा-दिविकल्पैरित्यर्थः। हेतुसाध्यसम्बन्धावच्छिन्नसम्बन्धिसामानाधिकरण्यं व्याप्तिः, हेत्वंशे यः सम्बन्धस्तेन सम्बन्धेन हेतौ साध्यांशे च यः सम्बन्धस्तेन सम्बन्धेन साध्यस्य विवक्षणात्। [137 A] तथा च स्वस्वसम्बन्धा-वच्छिन्नहेतुसाध्ययोः सामानाधिरण्यमेव व्याप्तिः, तेनान्यसम्बन्धावच्छिन्नसामानाधिकरण्ये व्याप्तिर्न भवति। अत एव धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निना सह संयोगसम्बन्धावच्छिन्नवह्नेः सामानाधिकरण्यं धूमे व्याप्तिः न तु धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिसामानाधिकरण्यमात्रम्, धूमसमानाधिकरणात्यन्ताभावा-प्रतियोगिवह्निना सह सामानाधिकरण्यं यद्धूमे वर्तते तद् रासभेनापि सह व्याप्तिः स्यात्, तथा चान्येन सह सामाना-धिकरण्यमन्यस्य व्याप्तिः स्यात्, तन्निरासार्थं येन सह धूमस्य व्याप्तिः स धूमसमानाधिकरणात्यन्ताभावाप्रति-योगिसम्बन्धी विवक्षितः इति कृत्वा रासभस्तु धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिसम्बन्धी न भवतीति न तेन सह व्याप्तिः। तथा धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निलक्षणसम्बन्धिसामानाधिकरण्यं धूमस्य समवायेनापि व्याप्तिः स्यादित्यापादनं स्यादित्यतो येन सम्बन्धेन अर्थात् संयोगेन व्याप्तिरिति कृत्वा संयोगसम्बन्धा-वच्छिन्नवह्निसामानाधिकरण्यमेव, संयोगसम्बन्धेन वह्निव्याप्तिर्धूमस्येत्यर्थः। तस्माज्जलतादात्म्यं जलत्वमेव

व्याप्यं व्यापकं पृथिवीत्वाभावस्तथा च व्यापकाभावेन पृथिवीत्वेन व्याप्यावच्छिन्नान्योन्याभावस्य सिद्धिमुक्त्वा-ऽनेनैव प्रकारेण सर्वत्र व्यापकाभावेन व्याप्याभावो व्यतिरेकिणा सिद्ध्यतीत्युदाहरति - **एवमितीति** टीका। प्रामाण्यसाधकमूले व्याख्यायां प्राग् व्याख्यातम्। **यस्येति** टीका। सुखस्य दुःखाभावात्मकतया गृहीतस्य दुःख-विशिष्टानुमितिसिद्ध्यर्थं व्याचष्टे - **यदात्मकतयेति**। तथा च यदात्मकतया गृह्यमाणस्य पदार्थस्य व्यापकतया गृहीतो योऽभावस्तदभावेन यदात्मतया गृहीतं तस्याभावः सिद्ध्यति। यत्र सुखं तत्र संसार्यात्मत्वाभावः। अत्र सुखमेव दुःखाभावात्मतया यदि गृहीतं तदा दुःखाभावाभावस्य दुःखस्यानुमितिः संसर्यात्मत्वाभावेन यथा शुक्तिर्यदि रजतत्वेन गृहीता तदा इदं रजतं गृहे नास्तीत्युच्यमानेऽथं रजतत्वाभाव एव न तु शुक्तित्वावच्छिन्नाभावः, तद्वत् प्रकृतं सुखं यदि दुःखाभावाभिन्नतया गृहीतं तदा यत्र यत्र संसार्यात्मत्वाभावो यथा घटे इति यतः तन्मते सुखं दुःखाभावरूपत्वेन गृहीतं तथा च यत्र सुखं तत्र संसार्यात्माभावो यथा घटे। यद्यपि घटे सुखं नास्ति तथा सुखं दुःखाभावात्मतया गृहीतमिति कृत्वा दुःखाभावो घटे वर्तते एव तत्र संसर्यात्मत्वाभावोऽपि वर्ततेऽपि। तथा च दुःखाभावाभावस्य दुःखस्यैवानुमितिर्न तु सुखस्येति यदात्मतयेति व्याख्यानेन लब्धम्। **अयं** [137 B] **चेतीति** टीका। तस्याभिप्रायं वर्णयन्ति - **एतेनेति** टीका। यदि अप्रसिद्धसाध्यकव्यतिरेकी स्वार्थानुमानस्थल एव तदा परार्थानुमानस्थले तु व्यतिरेक्यनुमितिप्रकारो निरधिकरणिकैव साध्यप्रसिद्धिरित्यस्मदुक्त एव प्रकारोऽनुसर्तव्यः। तथा चास्मदुक्तः प्रकारः परार्थानुमानसाधारणः स्वार्थानुमानेऽपि द्रष्टव्यः तत् निरधिकरणसाध्यप्रसिद्ध्यैव पूर्वोक्तरीत्या ज्ञेयम्। **अनुशयान्तरमपीति**। यथाऽस्वरसान्तरं तथा च व्यतिरेकिणि अभावसाध्य इत्यनुपपन्नम्, भावसाध्ये वह्न्यादौ यत्र वह्न्यभावस्तत्र धूमाभाव इति व्यतिरेकव्याप्त्या यत्र धूमाभावाभावो धूमस्तत्र वह्न्यभावाभावो वह्निरिति भावसाध्यकेऽपि व्यतिरेक्यनुमानं सुग्रह[म्] इत्येकोऽस्वरसः, द्वितीयश्च यः परार्थानुमानसाधारणः प्रकारोऽस्मदुक्तो निरधिकरणकसाध्यप्रसिद्धिरित्यादिना स एव स्वार्थानुमानेऽप्यस्तु किं व्यतिरेकिण्यभावसाध्यकाप्रसिद्धसाध्यकानुमितिरिति, एतदेवाह - **परार्थेति** टीका। नन्वन्वयी निरूपितो व्यतिरेकी च निरूपितोऽन्वयव्यतिरेकी तु न निरूपित इति कथम्?, तच्चानुमानं त्रिविधमिति प्रतिज्ञेत्यत आह - **अन्वयिनि व्यतिरेकिणि चेति**। तथा च ययैव रीत्याऽन्वयी निरूपितो व्यतिरेकी च निरीपितस्तन्निरूपणरीत्यैवान्वयव्यतिरेक्यपि निरूपितप्राय इति न प्रतिज्ञाविरोध इत्याशयेनाह - **तमुपेक्ष्येति** टीका। व्यतिरेक्यनुमाननिरूपणफलमाह - **अर्थापत्तीति** टीका। तथा च व्यतिरेक्यनुमानेनैवार्थापत्तिरप्यन्यथासिद्धेत्यर्थः।

**। इति व्यतिरेकिग्रन्थः सम्पूर्णः।**

## । अथ अर्थापत्तिः ।

व्यतिरेक्यनुमानसिद्धावर्थापत्तिर्न मानान्तरं तेनैव तदर्थसिद्धेः स्यादेतत् ज्योतिः-शास्त्रात् तत्कथितलिङ्गात् वा देवदत्तस्य शतवर्षजीवित्वमवगतं चरमं शतवर्षजीवी गृह एवेति नियमे प्रत्यक्षेणावगते पश्चाद् योग्यानुपलब्ध्या निश्चितो गृहाभावो जीवननियम-ग्राहकप्रमाणयोर्बलाबलानिरूपणात् बहिःसत्त्वकल्पनं विना नियमद्वयविषयकसंशयं जनयित्वा जीवति न वेति संशयमापाद्य जीवनसंशयापनुत्तये जीवनोपपादकं बहिःसत्त्वं कल्पयतीति यथोक्तसामग्र्यनन्तरं बहिरस्तीति प्रतीतेः तत्रान्वयव्यतिरेकाभ्यां संशयद्वारा गृहाभावः तदुत्पादितनियमद्वयविषयकसंशयो वा करणं जीवनसंशय एव वा, करणे सव्यापारकत्वानियमात्। प्रमाणयोर्विरोधज्ञानं तदाहितसंशयद्वारा करणमिति कश्चित्। तदा जीवित्वस्य लिङ्गविशेषणस्य सन्दिग्धत्वेनानुमानासम्भवादर्थापत्तिर्मानान्तरम्। ननु संशयस्य कल्पकत्वे स्थाणुपुरुषसंशयादपि तदेककोटिनिर्वाहकल्पनापत्तिः, न च प्रमितसंशयः कल्पनाङ्गम्, जीवनस्य तदानीं प्रमितत्वे संशयाभावप्रसङ्गात् जीवित्व-निश्चयेऽनुमानादेव बहिःसत्त्वनिश्चयाच्च, कदाचित् प्रमितत्वे च प्राक्प्रमितपुरुषत्व-स्यान्तरा तत्संशये कल्पना स्यात्। किञ्च जीवनसंशयस्य मृतेऽपि दृष्टत्वान्न व्यभिचारेण बहिःसत्त्वगमकमिति चेत्। न। यथोक्तसामग्रीप्रभवसंशयस्य कल्पनाङ्गत्वात्, अत एव मृत-जनिष्यमाणयोर्गृहाभावनिश्चयो न यथोक्तसंशयमापादयतीति न बहिःसत्त्व-कल्पकः। गृहाभावश्च योग्यानुपलब्धिनिश्चितो न संशय इति। अथ जीवननियमग्राहक-प्रमाणयोर्यदि च तुल्यबलत्वमवगतं क्व तर्हि बहिःसत्त्वकल्पना विशेषदर्शनविरहात्, कल्पने वा प्रमितजीवननिर्वाहकबहिःसत्त्ववत् गृहनियमनिर्वाहकमरणस्याप्युचितत्वेन तत्कल्पनापि स्यात् जीवनमरणयोः संशयाविशेषात्। अथ तयोरेकं बलीयोऽपरमबलं तदैकेनापरस्य बाध एवेति न संशयः, तस्मात् यत्र शतवर्षजीवित्वमवधारितं गृहाभावश्च निश्चितः तत्र बहिःसत्त्वकल्पनं न तु जीवनसंशये, एवं च देवदत्तो बहिः सन् जीवित्वे

सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वादिति व्यतिरेकिणा बहिःसत्त्वज्ञानेनार्थपत्त्या लिङ्गविशेषणजीवित्वसंशये बहिःसत्त्वकल्पना च नास्त्येव। किञ्च गृहाभावनिश्चयः प्रमाणद्वयविषयसंशयं जनयित्वा जीवनसंशयमापाद्य बहिःसत्त्वं कल्पयतीति न युक्तम्, न हि यत एव यत्संशयः स एव तन्निश्चयाय प्रभवति, अन्यथा अतिप्रसङ्गात्। मैवम्। यथोक्तसामग्रीजनितसंशयवान् एवं तर्कयति योग्यानुपलब्धिगृहीतो गृहाभाव इति तन्निश्चयः सुदृढ इति जीवननियमग्राहकयोरेकं बाध्यं विरुद्धयोरप्रमाणत्वात् तदिह मरणं कल्पयित्वा जीवनग्राहकं बाध्यतां नो वा बहिःसत्त्वं कल्पयित्वा गृहनियमग्राहकं तत्र बहिःसत्त्वकल्पने गृहनियमग्राहकमात्रबाधा, मरणकल्पने तु शतवर्षजीवी देवदत्तः शतवर्षजीवी गृह एवेति नियमद्वयस्यापि बाधा स्यात्, तदुक्तं जीवनबाधे तन्नियम-बाधस्यावश्यकत्वादिति। किञ्च अद्य जीवति श्वो जीविष्यतीत्यादिबहुतरक्षणलव-मुहूर्तादिसमयोपाधिनियतं जीवनमुपलब्धमिति तद्बाधे बहुतरव्याप्तिबाधः, देवदत्त-तदवयवगृहसत्त्वव्याप्तिश्चाल्पा तथा अभावस्वरूपमरणापेक्षया बहिःसत्त्वस्य भावस्य लघुत्वम्, यदि च गृहान्योन्याभावाश्रयबहिःपदार्थवृत्तिसंयोगाश्रयत्वं बहिःसत्त्वमिति तदपेक्षया मरणमेव लघु, तथापि मरणापेक्षया जीवनमात्रं लघ्विति तदेव कल्पयितु-मर्हम्। ततोऽर्थापत्तिकल्पितं जीवित्वमुपजीव्यानुमानादपि बहिःसत्त्वज्ञानं भविष्य-तीत्येतावत् तर्कसहकृतो यथोक्तसामग्रीप्रभवः संशयो बहिःसत्त्वं कल्पयति। न च वाच्यं तर्काणां विपर्ययापर्यवसायित्वे आभासत्वम्, तत्पर्यवसाने च तदेवानुमान-मेतत्तर्कसहायं बहिःसत्त्वमनुमापयिष्यतीति यतो लाघव-गौरवतर्काणां विपर्ययापर्य-वसायिनामेव प्रमाणसहकारित्वम् अत एव प्रत्यक्षशब्दादावपि सहकारी सः। न च तस्यां दशायामेव प्रमाणान्तरमस्ति, ततोऽर्थापत्तिसहकारित्वं तर्कस्य। ननु स्वकारणा-धीनस्वभावविशेषात् तर्कानुगृहीतयथोक्तसंशयस्य यदि बहिःसत्त्वप्रमापकत्वं तदा मृते गृहस्थिते वा तादृशसंशयात् यत्र बहिःसत्त्वकल्पना सापि प्रमा स्यादिति चेत्। न।

**यथाहि प्रमापकस्येन्द्रियस्य दोषेण प्रमाशक्तितिरोधानात् ऐन्द्रियकभ्रमः तथा यथोक्त-संशयस्यापि दोषेण प्रमाशक्तितिरोधानात् अग्रहरूपभ्रमसम्भवात् परोक्षज्ञानानां जनक-ज्ञानाविभ्रमत्वे यथार्थत्वनियम इति चेत्, सत्यं प्रकृतेऽपि जीवनगृहाभावनियमग्राहक-प्रमाणयोरन्यतराभासत्वनाभासत्वसम्भवात्। यद्वा दोषाभावसहकृतस्य यथोक्तसंश-यस्य बहिःसत्त्वप्रमापकत्वमिति। उच्यते अनयोरेकं बाध्यं विरुद्धार्थग्राहकत्वादिति।**

## । अर्थापत्तिनिरूपणम् ।

**प्राभाकरः** शङ्कते - **स्यादेतदिति** मूलम्। अर्थापत्तिसहितानि चत्वारि[1] इति **प्राभाकराः**। **भाट्टानाम**-भावस्यापि प्रमाणत्वात् षट् प्रमाणानीति। **ज्योतिरिति** मूलम्। दवदत्तस्य शतवर्षजीवित्वं निर्णीतम्। अथवा ज्योतिःशास्त्रकथितलिङ्गात् ग्रहलग्रादिरू[पा]त् रेखोपरेखादिकाद्वा शतवर्षजीवित्वं ज्योतिःशास्त्ररूपप्रमाणेना-वगतम्, पश्चात् शतवर्षजीवित्वग्रहानन्तरं गृहे एव तिष्ठतीति प्रत्यक्षेण गृहीतं बहुशः, तथा च ज्योतिःशास्त्रात् शतवर्षजीवित्वं गृहीतं प्रत्यक्षप्रमाणेन जीवित्वविशिष्टस्य गृहसत्त्वनियमोऽप्यवधारित इति स्थिते सति। **पश्चादिति** मूलम्। उभाभ्यां प्रमाणाभ्यां तथार्थनिर्णयानन्तरं येनैव निर्णीतः स देवदत्तगृहे गतो देवदत्तश्च गृहे न दृष्ट इति कृत्वा योग्यानुपलब्ध्या निश्चितो गृहाभावः - तदनन्तरं योग्यानुपलब्ध्याऽभावस्तु निश्चित इति, तथा च पूर्वप्रमाणयोर्बहिःसत्त्वकल्पनं विना विरोधज्ञाने जाते सति विचारयति यथोभयमपि पूर्वोक्तं प्रमाणं बलवत् केनापि कस्यापि बाधः कर्तुं न [138 A] शक्यत इत्युभयोर्बलवत्त्वं तथा चैकं सबलमेकं दुर्बलमिति निर्णयः कर्तुं न शक्यते इति कृत्वा प्रमाणद्वयस्य विषयो नियमद्वयं तद्विषयकः संशयो जायते यथा देवदत्तः शतवर्षजीवी न वा अथवा जीवी गृहे एव न वा इति नियमद्वयविषयकः संशयो जायते, तदनन्तरं जीवनसंशयं जनयित्वा जीवनसंशयापनोदार्थं जीवनोपपादकं बहिःसत्त्वं कल्पयति, तथा च तस्य पुरुषस्य देवदत्तविषयकं बहिःसत्त्वज्ञानं जायते, तद्व[द्य]त् बहिःसत्त्वज्ञानं तदर्थापत्तिप्रमाणफलमिति **प्राभाकराः**। एतदेवाह - **यथोक्तसाम्ग्र्य-नन्तरमिति** मूलम्। यथोक्तसामग्री यथा पूर्वं ज्योतिःशास्त्रेण शतवर्षजीवित्वमवगतं पश्चात् तन्निर्णयानन्तरं जीवी देवदत्तो गृहे एवेति प्रत्यक्षेण गृहसत्त्वनिर्णयो जातः पश्चाद् योग्यानुपलब्ध्याऽभावो निर्णीत इत्यादि यथोक्तसामग्रीत्यर्थः। एतादृशयथोक्तसाम्ग्र्यनन्तरं बहिरस्तीति प्रतीतिरनुभवसिद्धा भवति तदेव बहिःसत्त्व-ज्ञानमर्थापत्तिप्रमाणफलमित्यर्थः। अर्थापतिप्रमाणफलं तद् ज्ञानं बहिःसत्त्वज्ञानं चेत् तदा किं करणं को व्यापार इत्यत आह - **तत्रेति** मूलम्। तत्र बहिःसत्त्वज्ञाने इत्यर्थः। **संशयद्वारेति**। तथा च संशयो व्यापारः,

१. पञ्च

गृहाभावः करणम् । पूर्वं देवदत्तविषयकं गृहाभावज्ञानं जायते, पश्चात् शतवर्षजीव्येव न वा गृहे एव न वेति संशयः समूहालम्बनरूपो व्यापारः । फलं तु बहिःसत्त्वकल्पनं बहिःसत्त्वनिश्चयः इति । तथा च बहिःसत्त्वप्रमाकरणमर्थापत्तिरूपमेव प्रमाणमित्यर्थः । अथाविलम्बेन क्रियोत्पादकं करणमित्याशयेनाह - **नियमद्वयेति** । तथा चोक्तनियमद्वयविषयकः संशय एव करणम् । ननु एतस्य व्यापाराभावात् कथं करणत्वमित्यत आह - **करण** इति मूलम् । तथा च न व्यापारवत्त्वं करणत्वं किन्तु अविलम्बेन क्रियोत्पादकत्वमेव करणत्वम्, तथा च नियमद्वयसंशयस्यापि अविलम्बेन बहिःसत्त्वज्ञानोत्पादकत्वात् करणत्वं सम्भवत्येव । तथा च करणलक्षणमविलम्बेन कार्योत्पादकत्वं न तु व्यापारवत्त्वमिति सिद्धम् । व्यापारवत्करणत्वमिति मताभिप्रायेणाह - **प्रमाणयोरिति** । ज्योतिःशास्त्रं प्रमाणं नियमग्राहकं च प्रमाणमित्यनयोर्विरोधज्ञानं यद् गृहाभावनिश्चयानन्तरं जायते तदेव करणम्, विरोधज्ञानोत्तरकालीनो यः संशयो नियमद्वयविषयकः स व्यापारः, फलं तु बहिःसत्त्वज्ञानमेवेति व्यापारवत्करणत्वमपि सम्भवति । अत्र मतरीतिरेतादृशी यथा **नैयायिक**मते [1]ज्ञायमानकरणतावादिमते ज्ञायमानं धूमादिकमेव करणम्, केषाञ्चिन्मते व्याप्तिमत्तया धूमज्ञानमेव करणम्, केषाञ्चिच्च मते चरमकारणं परामर्शः [138 B] स एव करणं न तु धूमज्ञानम् । तद्वत् अत्र मतत्रयेऽपि ज्ञायमानकरणतावादिनां मते ज्ञायमानो गृहाभावः करणम्, ज्ञानकरणत्ववादिनां मते प्रमाणयोर्विरोधज्ञानमेव करणम्, चरमकारणत्ववादिनां मते नियमद्वयविषयकः संशयः करणमिति न्यायोक्तमतवदत्रापि व्यवस्था । ननु बहिःसत्त्वज्ञानमनुमानादेव भविष्यति यथा देवदत्तो बहिरस्ति जीवित्वे सति गृहेऽसत्त्वात् यो बहिर्नास्ति स जीवित्वे सति गृहे सन् इति व्यतिरेकी अनेनैव बहिःसत्त्वज्ञानं भविष्यतीत्यत आह - **तदेति** मूलम् । तथा च व्यतिरेक्यनुमानेनानुमितिस्तदा स्यात् यदि लिङ्गनिश्चयः स्यात् । जीवित्वरूपस्य लिङ्गविशेषणस्य निश्चयो नास्ति । कुतः ? प्रमाणयोर्विरोधज्ञानानन्तरं प्रमाणयोर्बलाबलानिरूपणात् जीवित्वस्यापि सन्देहो गृहसत्त्वस्यापि सन्देहः, तथा च लिङ्गस्य सिन्दग्धत्वात् कथं बहिःसत्त्वानुमितिर्भवतीत्यर्थः । पूर्वोक्तप्रणालीमविद्वान् शङ्कते - **नन्विति** । **संशयस्येति** मूलम् । शतवर्षजीवी न वा इति संशयसामान्यमेव यदि कोटिनिश्चायकं तदा, यथा शतवर्षजीव्येव न वा गृह एव न वा इति संशयात् बहिःसत्त्वं निर्णीयते तदा, बहिःसत्त्वनिश्चयप्रमां प्रति संशयः प्रमाणं चेत् तदा, स्थाणुपुरुषसंशयोऽपि प्रमाणं स्यात् संशयत्वाविशेषात् । तस्मादपि संशयात् स्थाणुपुरुषयोरेकतरनिश्चयः स्यात् संशयत्वाविशेषादित्यापाद्यते । मध्ये शङ्कते - **न चेति** । स्थाणुपुरुषसंशयस्तु प्रमितसंशयो न भवतीति न तस्य प्रमाणत्वमित्याशङ्कार्थः । दूषयति - **जीवनस्येति** । यदि त्वयोच्यते *जीवनसंशयो बहिःसत्त्वनिश्चायकः स चेत् करणं प्रमितसंशयश्च प्रमितस्य जीवित्वस्यैव संशयो वक्तव्यः*, तथा

१. स्वरूपसन् धूमः करणं न भवति किन्तु ज्ञायमानः, ज्ञानं तदवच्छेदकम् इति प्रतौ टिप्पणी ।

च जीवित्वं यदि प्रमितं तदा स जीवति न वेति जीवित्वस्य संशय एवानुपपन्नो न हि निश्चितस्य पदार्थस्य संशयः सम्भवति, तथा च जीवितसंशयः प्रति(प्रमित)संशयः स्थाणुपुरुषसंशयोऽप्रति(ऽप्रमित)संशय इत्यनयोर्विशेषात्। दूषणान्तरमप्याह - **जीवित्व** इति। यदि जीवित्वं प्रमितं निश्चितं तदा देवदत्तो बहिरस्ति जीवित्वे सति गृहेऽसत्त्वादित्यत्रानुमानेनैव बहिःसत्त्वसिद्धेः किमर्थापत्त्या इत्यर्थः। ननु यदाकदाचित् प्रमितत्वमपेक्षितं न तु तस्मिन् काले इति चेत् तदा पुरुषत्वमपि यदाकदाचित् प्रमितं वर्तते एवेति तस्यापि पुरुषत्वसंश[यस]याप्येककोटिनिश्चायकत्वं स्यात्, तथा च प्रमितसंशयः कल्पनाङ्गं न भवतीत्युक्तम्। दूषणान्तरमाह - **किञ्चेति** मूलम्। यदि शतवर्षजीवी न वेति संशयस्य बहिःसत्त्वनिश्चायकत्वं तदा मृतेऽपि देवदत्ते जीवनसंशयस्य दृष्टत्वात् वस्तुगत्या मृतोऽस्ति तत्रापि जीवति न वेति संशयस्य सत्त्वात् बहिःसत्त्वस्य व्यभिचारीति स संशयः यत्र बहिःसत्त्वं नास्ति। तथा च कल्प्यकल्पकयोरयं व्यभिचारो वक्तव्यः यथा यत्र कल्पकं तत्रावश्यं कल्प्यं यत्र [139 A] धूमस्तत्र वह्निरवश्यं कल्प्यः, तद्वत् प्रकृते मृते जीवनसंशयस्तिष्ठति बहिःसत्त्वं कल्प्यं नास्तीति व्यभिचारः। समाधत्ते **प्राभाकरः - यथोक्तेति** मूलम्। तथा च न केवलं जीवनसंशयमात्रं किन्तु यथोक्तसामग्रीप्रभवः संशयः कल्पको बहिःसत्त्वस्य। तथाहि यथोक्तसंशयो नाम नियमद्वया(य)संशयाहितो जीवनसंशयः। नियमद्वयं च शतवर्षजीव्येव देवदत्तः इत्येको नियमः, द्वितीयो यथा जीवी देवदत्तो गृह एवेति रूपः। तद् नियमद्वयं ज्योतिःशास्त्रप्रत्यक्षप्रमाणाभ्यां गृहीतम्, तद्ग्रहणानन्तरं पश्चाद् गृहगतेन योग्यानुपलब्ध्या गृहाभावो निश्चितः। पश्चात् योग्यानुपलब्ध्या गृहाभावस्तु निश्चितो वर्तते। तथा च गृहनिष्ठात्यन्ताभावप्रतियोगिनो देवदत्तस्य बहिःसत्त्वं यावत्पर्यन्तं कल्पितं नास्ति तावत्पर्यन्तं गृहनिष्ठात्यन्ताभावप्रतियोगिनि देवदत्ते यदि गृहसत्त्वनियमश्चेत् तर्हि शतवर्षजीवीत्वमनुपपन्नं किन्तु मरणमेव, यदि च शतवर्षजीवित्वनियमस्तदा गृहसत्त्वनियमोऽनुपपन्नः किन्तु बहिःसत्त्वमेव भविष्यति इति द्वयोर्विरुद्धत्वज्ञानात् बलाबलत्वज्ञानविरहदशायां शतवर्षजीव्येव न वा जीवी गृह एव न वेति समूहालम्बनरूपः संशयो जायते, तेन संशयेन बहिःसत्त्वं कल्प्यते निश्चीयते। अत एव पूर्वोक्तदोषो मृते जीवनसंशयो बहिःसत्त्वकल्पनव्यभिचारीतिरूपो न लगति इत्याह - **अत एवेति** मूलम्। अयमाशयः - न हि बहिःसत्त्वाव्यभिचारित्वेन ज्ञातस्य संशयस्य बहिःसत्त्वकल्पनाङ्गत्वं किन्तु यथोक्तसामग्रीप्रभवसंशयस्य बहिःसत्त्वकल्पकत्वं लाघवात्। वस्तुगत्या मृते यथोक्तसंशयो नास्तीति कृत्वा बहिःसत्त्वं न कल्प्यते। यदि च तत्रापि यथोक्तसंशयस्तदा तत्रापि बहिःसत्त्वकल्पना भ्रमरूपा भवत्येव। यथा धूलिपटले व्याप्त्यादिमत्तया धूमत्वप्रकारकज्ञानमेव नास्तीति वह्न्यनुमितिस्तेन नोत्पद्यते। यदि च धूलिपटलेऽपि व्याप्त्यादिमत्तया धूमत्वप्रकारकं ज्ञानं तदा भ्रमरूपा वह्न्यनुमितिर्जायते। तद्वत् वस्तुगत्या मृते यथोक्तः संशय एव नास्ति तेन न बहिःसत्त्वकल्पनम्, यदि वा

अस्ति तदा भ्रमरूपं बहिःसत्त्वकल्पनमर्थापत्त्यैव । एतेन स्थाणुपुरुषसंशयस्याप्येकतरनिश्चायकत्वं संशयत्वाविशेषादित्यपास्तम् । स्थाणुपुरुषसंशयस्य संशयत्वाविशेषेऽपि पूर्वोक्तयथोक्तसंशयत्वाभावान्नैकतरकल्पकत्वमित्यग्रे वक्ष्यमाणत्वात् । एतदेवाह - **न यथोक्तेति** मूलम् । तथा च मृतस्थले यथोक्तः तादृशसामग्रीप्रभवः संशयो नास्तीति न बहिःसत्त्वकल्पनम् । उपलक्षणमेतत् । यदि च नियमद्वयसामग्रीप्रभवः संशयो वर्तते तदा लाघवाख्यतर्कसहकारिवशात् बहिःसत्त्वज्ञानं भ्रमरूपं भवत्येवेति । ननु गृहाभावः करणम्, संशयो व्यापारः, बहिःसत्त्वज्ञानं फलमिति त्वयोक्तं तर्हि निश्चितो गृहाभावः करणम्; गृहाभावस्य निश्चय एव नास्ति यतो नियमद्वयग्राहकविरोधेन [139 B] गृहाभाव एव सन्दिग्धो यथा ज्योतिःशास्त्रेण मया शतवर्षजीवित्वमेव निर्णीतं प्रत्यक्षेण प्रमाणेन च गृहसत्त्वमपि निर्णीतं तथा च विरोधिद्वयस्य विद्यमानत्वात् गृहाभावनिश्चयो भवितुं नार्हतीत्याशङ्क्याह - **गृहाभावश्चेति** मूलम् । तथा च योग्यानुपलब्धिरूपबलवत्सहकारिवशात् गृहाभावनिश्चयो भवत्येव । नियमद्वयज्ञानं प्रतिबन्धकमेव न भवतीति भावः । शङ्कते - **अथेति** मूलम् । जीवनग्राहकं ज्योतिःशास्त्रं नियमग्राहकं च प्रत्यक्षम् अनयोस्तुल्यबलत्वमवगतम्, यदि तुल्यबलत्वमवगतं तदा बहिःसत्त्वकल्पनैव न स्यात् । पूर्वोक्तोभयोर्मध्ये एकतरस्मिन् विशेषदर्शनविरहात् । यथा एकस्मिन् धर्मिणि पुरोवर्तिनि स्थाणुत्वव्याप्यवक्रकोटरादिदर्शनत्वमपि जातं पुरुषत्वव्याप्यकरादिमत्त्वदर्शनमपि भ्रमरूपं जातं तदोभयोस्तुल्यबलत्वज्ञाने एकतरनिर्णयो न भवति तद्वत् प्रकृते उभयोस्तुल्यबलत्वज्ञाने विशेषदर्शनविरहात् एकतरनिश्चयो न जायते, तथा च बहिःसत्त्वकल्पनं न भवतीति । अथ यदि विशेषदर्शनविरहेऽपि उभयोः ज्योतिःशास्त्रनियमग्राहकप्रमाणयोरेकतरस्य बलवत्त्वरूपविशेषदर्शनाभावे चेत् बहिःसत्त्वकल्पना तदा जीवननिर्वाहकबहिःसत्त्वकल्पनवत् गृहसत्त्वनियमनिर्वाहकमरणस्याप्युचितत्वेन ज्योतिःशास्त्रस्याप्रमाणत्वेन मरणकल्पनापि स्यादित्युभयोरविशेषात् कथं बहिःसत्त्वं कल्पनीयमिति भावः । अत्रैवानुकूलतर्कमाह - **जीवनेति** मूलम् । बहिःसत्त्वमरणयोः संशयस्य कल्पकत्वेनाविशेषादित्यर्थः । तथा च शतवर्षजीवी न वा शतवर्षजीवी गृहे न वेति संशयात् यथा बहिःसत्त्वं कल्प्यते तथा मरणमेव कुतो न कल्प्यते, तथा च ज्योतिःशास्त्रमपि बाध्यं स्यादित्यर्थः । एवमनयोस्तुल्यबलत्वं नावगतं किञ्चैकत्र प्रबलत्वमपरत्र दुर्बलत्वमिति पक्षं दूषयति - **अथेति** मूलम् । एकं बलवत् द्वयोर्मध्येऽपरं दुर्बलं तदा तु संशय एव न भवत्येकस्य निश्चयात् । तदा च संशय एव चेन्नास्ति संशयस्य बहिःसत्त्वकल्पकत्वं गतम् । एतदेवोपसंहरति - **तस्मादिति** मूलम् । ज्योतिःशास्त्रेण शतवर्षजीविता यदि निश्चिता गृहाभावश्च प्रत्यक्षेण निश्चितः तत्रैव बहिःसत्त्वकल्पनं वक्तव्यम्, तत्र बहिःसत्त्वज्ञाने संशयः करणं भवितुं नार्हति । कुतः ? एकेन ज्योतिःशास्त्रेण बलवत्प्रमाणेन जीवित्वस्य निश्चयात् जीवनसंशय एव नास्तीति संशयाभावे संशयस्य प्रमाणता एव न भवतीति । ननु बहिःसत्त्वज्ञानान्यथानुपपत्त्या [140 A]

एव जीवनसंशयः करणं कल्पनीयमित्यत आह - **एवं चेति** मूलम्। तथा च न जीवनसंशयः करणमनुमानेनैव बहिःसत्त्वकल्पनं भविष्यतीति भावः। अनुमानमाह - **देवदत्त** इति मूलम्। देवदत्तः पक्षः, बहिःसत्त्वमिति साध्यम्, जीवित्वे सतीति विशेषणम्, मृतदशायामपि गृहनिष्ठात्यन्ताभावप्रतियोगित्वाभावः। यथा मृते बहिःसत्त्वाभावोऽपि वर्तते [तथा] जीवित्वविशिष्ट(ष्टे) गृहा(ह)सत्त्वाभावोऽपि वर्तते इति व्यतिरेकिणैव बहिःसत्त्वज्ञानं भविष्यति नार्थापत्त्या। ननु लिङ्गविशेषणं यज्जीवित्वं तन्निश्चयविरहदशायामपि बहिःसत्त्वज्ञानं वर्तते इति कृत्वा बहिःसत्त्वज्ञानं प्रति नानुमानं प्रमाणं लिङ्गस्य सन्दिग्धत्वात् इत्यत आह - **जीवित्वसंशय** इति मूलम्। तथा च जीवित्वसंशयदशायां बहिःसत्त्वनिश्चयो नास्ति यदा च जीवित्वनिश्चयस्तदैव [1]बहिःसत्त्वकल्पनेति बहिःसत्त्वज्ञानं प्रत्यनुमानमेव प्रमाणम्। अर्थापत्तौ दूषणान्तरमाह- **किञ्चेति** मूलम्। यदि च गृहाभावनिश्चयः करणं तदापि बहिःसत्त्वज्ञानं प्रति करणत्वं तस्यानुपपन्नमित्याह- **प्रमाणद्वयेति** मूलम्। तथा च गृहाभावनिश्चयेन प्रमाणद्वयविषयकः संशयो जनयितव्यः, प्रमाणद्वयविषयकसंशयेन जीवनसंशयः कर्तव्यः, ततस्तत्संशयानन्तरं बहिःसत्त्वकल्पनं तच्चायुक्तमित्याह - **न हीति** मूलम्। यत एव निश्चितात् गृहाभावात् पश्चात् प्रमाणद्वयविषयकसंशयात् जीवी न वा गृहे बहिर्वा इति जीवनबहिःसत्त्व-विषयकः संशयो जायते। तथा च बहिःसत्त्वे संशयकारणीभूतस्य गृहाभावनिश्चयस्य संशयजनकत्वे न बहिःसत्त्वरूपनिश्चयजनकत्वं यतः संशयसामग्रीतो निश्चयजनिका काचित् सामग्र्यधिका वक्तव्या, न हि यया सामग्र्या संशयस्तयैव तन्निश्चयः, अन्यथा निश्चयस्य संशयात्मकतैव स्यादित्यर्थः। **अन्यथाऽतिप्रसङ्गादिति** मूलम्। यदि संशयसामग्रीत एव निश्चयः स्यात् तदा विशेषदर्शनविरहेऽपि स्थाणुपुरुषसंशयसामग्रीतोऽपि स्थाणुपुरुषयोरेकतरनिश्चयः स्यादित्यतिप्रसङ्ग इत्यर्थः। **प्राभाकरः** समाधत्ते - **मैवमिति**। मया केवलं संशयमात्रान्न निश्चय इत्युच्यते किन्तु तर्कसहकारिवशात् संशयेन बहिःसत्त्वनिश्चयो जन्यते। एतदेवाह - **यथोक्तेति** मूलम्। यादृशतर्कसहकारिवशात् संशयेन बहिःसत्त्वनिश्चयो जन्यते तादृशं तर्कमुदाहरति योग्या-नुपलब्धीत्यारभ्य न भविष्यतीत्यन्तेन ग्रन्थेन। अत एव अग्रे वदिष्यति - **एतावत् तर्कसहकृत** इति। तथा च यथोक्तसंशये सति यत्र बहिःसत्त्वनिश्चयो जायते तत्र कीदृशस्तर्को यस्य बहिःसत्त्वनिश्चयो [140 B] जायते, तस्यावतरति योग्यानुपलब्ध्यादि। अस्ति इदं च प्रमाणद्वयं विरुद्धम्, ततो विरुद्धयोः प्रमाणत्वं नास्तीत्ये-कस्याप्रमाणत्वं वक्तव्यम्। तत्र किमप्रमाणमित्याह - **तदिहेति** मूलम्। पुरुषस्य तर्कस्फुरणमाह - **योग्यानु-पलब्ध्येति**। यथोक्तसंशयानन्तरं पुरुषस्य मनस्येवं विचारो भवति। यथाहि गृहाभावस्तु मया निश्चितो मरणं कल्पयित्वा जीवनग्राहकं ज्योतिःशास्त्रं बाध्यतां किं वा बहिःसत्त्वं कल्पयित्वा गृहसत्त्वनियमग्राहकं यत्

१. ज्योतिःप्रामाण्यावधारणे एव इति प्रतौ टिप्पणी।

प्रत्यक्षप्रमाणं तत् बाध्यताम्, अनयोर्बाधने कुत्र लाघवं कुत्र गौरवमिति विमर्शे तत्रैव बाधकल्पनमुचितं यस्मिन् कल्पिते सति उभयोर्बाधो न भवति किन्तु एकस्यैव बाधः, उभयबाधकल्पनापेक्षया एकत्र बाधकल्पने लाघवमुभयत्र बाधकल्पने गौरवमिति, एवं बहिःसत्त्वे कल्पिते गृहसत्त्वनियमग्राहकं यत् प्रत्यक्षप्रमाणं तस्यैव बाधो भवेत्, मरणकल्पने तु शतवर्षजीवी देवदत्तः शतवर्षजीवी गृह एवेति नियमद्वयं बाधितं स्यात् । एको नियमः शतवर्षजीव्येवेति रूपो द्वितीयस्तु नियमः शतवर्षजीवी गृह एवेति रूपः, अतो यदि मरणं कल्पितं तदा शतवर्षजीव्येवेति नियमो भग्नः शतवर्षजीवी गृह एवेत्यपि द्वितीयोऽपि नियमो भग्नः यतः शतवर्षजीवित्वस्योभयत्रापि प्रवेशः, तथा च नियमद्वयं मरणकल्पने बाधितं स्यादिति । तदिहेत्यारभ्य नियमद्वयस्यापि बाधः स्यादित्येतावत्पर्यन्तं ग्रन्थार्थः सम्पन्नः । अत्रार्थे संमतिमाह - **तदुक्तमि**ति मूलम् । **जीवनबाधे**ति मूलम् । तथा च मरणकल्पने नियमद्वयस्य बाधः स्यात्, शतवर्षजीव्येवेति एको नियमः शतवर्षजीवित्वविशिष्टो गृह एवेति द्वितीयो नियमः, इति नियमद्वयस्यापि बाधः स्यादित्यर्थः । मरणकल्पने दूषणान्तरमाह - **किञ्चे**ति । अद्य जीवतीत्यादिना मरणकल्पने बहूनां व्याप्तीनां बाधः स्यादित्याह - **अद्ये**ति **मूलम्** । अद्य जीवतीत्यत्र अद्यतनो दिवसः । श्वो जीविष्यतीत्यनेन श्वस्तनो दिवसः । एवं प्रहर-काल-घटिका-मेष-निमेषादिबहुतरक्षण-लव-मुहूर्तसमयोपाधिव्याप्त्या जीवनमुपलब्धम् । तथा च ज्योतिःशास्त्रादेतादृशी व्याप्तिर्गृहीतास्ति । यदा यदाऽद्यतनो दिवसस्तदा तदा देवदत्तस्य जीवित्वम्, यदा यदा श्वस्तनो दिवसस्तदा तदा देवदत्तस्य जीवित्वमित्यादि बोद्धव्यम् । तथा च जीवनबाधे मरणकल्पने तावतीनां व्याप्तीनां बाधः स्यादिति बहुव्याप्तिबाधः । एतदेवाह - **तद्बाधे** इति । जीवनबाधे इत्यर्थः । अद्यतनेत्यादिबहुतरव्याप्तिबाधः स्यादित्यर्थः । जीवनग्राहकप्रमाणबाधापेक्षया गृहसत्त्वग्राहकप्रमाणबाधे [141 A] लाघवमाह - **देवदत्ते**ति मूलम् । तथा च जीवनग्राहकप्रमाणबाधे शतवत्सरपर्यन्तं तावत्कालोपाध्याद्यगणितजीवनव्याप्तिबाधः स्यात् । गृहसत्त्वनियमप्रमाणबाधे तु देवदत्तगृहसत्त्वनियमो देवदत्तावयवगृहसत्त्वनियमश्चेति द्वयमेव बाधितं न त्वगणितव्याप्तिबाधः, तथा च यदा यदा देवदत्तस्तदा तदा गृह एवेत्येकः, यदा यदा देवदत्तावयवा हस्तादयस्तदा तदा गृह एवेति द्वितीयो नियमः इति लाघवम् । युक्त्यन्तरमप्याह - **तथे**ति । तथाऽभावरूपमरणापेक्षया भावरूपं बहिःसत्त्वमेव लघु । अभावस्य प्रतियोगीज्ञानाधीनज्ञानत्वेन विलम्बोपस्थितिकत्वादितिभावः । अत्राशङ्कते - **यदि चे**ति मूलम् । बहिःसत्त्वनिर्वचनं यथा **गृहे**ति । गृहस्यान्योन्याभावो यथा आपणादि गृहं नेति । बहिरिति स्वरूपकथनमात्रम् । वस्तुगत्याऽन्योन्याभावाश्रया ये पदार्थास्ते सर्वेऽपि बहिःशब्दवाच्याः । गृहशब्देन गृहान्तर्वर्ति यावत् तावत् विवक्षितम् । तथा च प्रतियोगिको योऽन्योन्याभावस्तदाश्रया ये पदार्थास्तद्वृत्तिः संयोगोऽर्थात् पुरुषादेस्तदाश्रयत्वं बहिःसत्त्वं तद् गुरुभूतम् अनेकपदार्थतावत्संयोगाश्रयघटितत्वात् । तदपेक्षया प्रतियोगि-

ज्ञाना(न)मात्राधीनज्ञानाभावो लघुरेवेत्याशङ्कार्थः । समाधत्ते - **तथापीति** । मरणापेक्षया जीवनमात्रं लघु इति तस्यैव कल्पना योग्या । कथमिति जीवनकल्पनेऽल्पबाधः मरणकल्पने पूर्वोक्तबहुतरव्याप्तिबाधः । बहिः-सत्त्वकल्पने तु व्याप्तिद्वयस्यैव बाध इति भावः । तथा च गृहाभावज्ञानानन्तरं विरोधज्ञाने जाते सति प्रमाण-द्वयसन्देहात् नियमद्वयसन्देहे लाघवाख्यतर्कसहकारिवशात् अर्थापत्तिप्रमाणेनैव जीवित्वं कल्पयति । एवं सति स पुरुषो यथा लाघवाख्यतर्कसहकारिवशात् जीवित्वं कल्पयति । एवं सति मया **प्राभाकरेण** यदि पुरुषस्य बहिःसत्त्वज्ञानं जायते तदपि तादृशार्थापत्त्या लाघवाख्यतर्कसहकारिवशात् जायते इति **नैयायिकं** प्रत्येवं साध्यते । यत् चैत्रपुरुषस्य बहिःसत्त्वज्ञानं जायते तदर्थापत्त्यैव जायते । इदं यत् तत् तर्कसहकृतयाऽर्था-पत्त्यैव जायते । अयमत्राशयः । **प्राभाकरेण नैयायिकं** प्रत्युच्यते - चैत्रस्य पूर्वोक्तसंशयानन्तरं यद् देवदत्त-विषयकं बहिःसत्त्वज्ञानं जायते तदर्थापत्त्यैव जायते । अर्थापत्त्या कथं तज्जायते ? तत्र चैत्रस्य देवदत्तबहिःसत्त्व-ज्ञाने पूर्वोक्ततर्कसहकृता यादृशी प्रणाली तत्कथनेन, तामेव निरूपयति पूर्वोक्तयोग्यानुपलब्ध्येत्यारभ्य एतावत्तर्कपर्यन्तम् । अत्र प्रणाली कीदृशी तर्कश्च कीदृश इत्युच्यते । प्रणाली यथा देवदत्तः शतवर्षजीव्येवेत्येको नियमः शतवर्षजीवी गृह एवेत्यपरो नियमः इति नियमद्वयदर्शनानन्तरं पश्चात् योग्यानुपलब्ध्या गृहाभावो निश्चितः [141 B], तदनन्तरमुभयोः प्रमाणयोर्विरोधज्ञाने जाते सति पश्चाद् इदं वा प्रमाणमिदं वेति प्रमाणद्वयविषयकः संशयः, तदनन्तरं शतवर्षजीव्येव न वेति गृह एव न वा इति सन्देहो जायते, सन्देहे जाते सति विरुद्धग्राहक-योरुभयोः स्थाणुत्वग्राहक-पुरुषत्वग्राहकयोरिव विरुद्धयोः प्रमाणत्वं नास्ति इति कृत्वा कस्य बाधः कर्तव्यो जीवनग्राहकस्य वा बाधो गृहसत्त्वग्राहकस्य वा बाधः इत्युभयप्रमाणयोर्बाधे प्रसक्ते तर्कावतारः यदि जीवन-ग्राहकस्य बाधः कल्प्यते तदा गृहसत्त्वनियमग्राहकस्यापि बाधः स्यात् जीवित्वरूपविशेषणबाधेन विशिष्टस्यापि बाधात् । यदि गृहसत्त्वनियमग्राहकं बाधितं तदा गृहसत्त्वनियमग्राहकस्यैव बाधः न तु जीवनग्राहकस्येति । अथ च जीवनग्राहकप्रमाणस्य विषयो जीवित्वं गृहनियमग्राहकस्य विषयो गृहसत्त्वम्, तथा च बहिःसत्त्वे कल्पिते गृहसत्त्व[ग्राहक]स्य बाधः मरणे कल्पिते जीवनग्राहकस्य बाधो गृहसत्त्वग्राहकस्यापि बाधः इति गौरवं पूर्वमुक्तम् । अथ च बहिःसत्त्वापेक्षया मरणं गुरुभूतम् अभावघटितत्वात् । मरणकल्पने बहुतरव्याप्ति-बाधोऽपि स्यात् । बहिःसत्त्वं कल्पयित्वा संशयोऽपनेतव्यः किं वा जीवित्वं कल्पयित्वा जीवित्वलिङ्गकानुमानेन बहिःसत्त्वं कल्पयेत् । तस्य पुरुषस्य मनस्येवं वर्तते - येन प्रमाणेन लाघवाख्यतर्कसहकारिवशात् जीवित्वं कल्पितं वर्तते तेनैव प्रमाणेन लाघवाख्यतर्कसहकारिवशात् बहिःसत्त्वं कल्पयति, किमर्थं जीवित्वं कल्पयित्वा जीवित्वलिङ्गकानुमानेन बहिःसत्त्वं कल्पनीयम्, तस्मात् लाघवाद् बहिःसत्त्वमेव कल्पयितुमुचितम् । एतावान् यस्तर्कः पुरुषस्यावतरति यस्य बहिःसत्त्वज्ञानं कल्पयितुमुचितम् । एतदेव **प्राभाकरो नैयायिकं** प्रत्युपसंहरति

- **एतावत्तर्के**ति मूलम् । तथा च यथोक्तसंशयोऽर्थापत्तिरूपः करणम्, बहिःसत्त्वज्ञानं फलम्, निर्व्यापारस्यापि करणत्वात् इति सिद्धम् । अत्र शङ्कते - **न चे**ति । तर्काश्चेत् विपर्ययापर्यवसायिनः तदाऽसत्तर्का एव । यथा पर्वतो वह्निमान् धूमात् इत्यत्र धूमोऽस्तु वह्निर्मास्तु इत्यप्रयोजकत्वाशङ्कायां तर्को दीयते यथा वह्न्यभावे धूमो न स्यादिति । एतस्य तर्कस्य ह्रदादावधिकरणेऽसत्तर्कत्वम् यदि ह्रदेऽधिकरणे उच्यते वह्न्यभावे धूमो न स्यादिति तदा वादिन इष्टापत्तिः । अतस्तस्य विपर्ययापर्यवसायित्वम्, धूमो नास्तीति तर्कस्तस्य विपर्ययो धूमो वर्तते इति रूपः तस्य ह्रदादावधिकरणेऽभावात् विपर्ययापर्यवसायित्वं तर्कस्य वर्तते च । धूम इत्येवं रूपं विपर्ययपर्यवसानं पर्वत एव कर्तुं शक्यते परं ह्रदे कर्तुं न शक्यते इति ह्रदे स विपर्ययापर्यवसायीति [142 A] असत्तर्कः । एवं प्रकृतेऽपि अयं पूर्वोक्तस्तर्को यदि विपर्ययापर्यवसायी तदाऽसत्तर्क एव, यदि च विपर्य[य]पर्यवसायी तदा तदेव व्यतिरेक्यनुमानम्, तस्मादेव बहिःसत्त्वज्ञानं भविष्यति किमर्थापत्त्या । इदमेव विकल्पद्वयेनाह - **विपर्ययापर्यवसायित्व** इति मूलम् । तदुक्तं व्याप्तिस्तर्काप्रतिहतिरवसानं विपर्यये । व्याप्तिर्याऽस्ति सा तर्कस्याप्रतिहतिस्तया तर्कस्य घातः कर्तुं न शक्यते । तस्य तर्कस्य विपर्यये पर्यवसानं विपर्ययो वर्तते इति । विपर्ययस्य सिद्धवत् कार्य एव पर्यवसानमिति । इदमेवापेक्षितम् । यदि तर्के विपर्ययपर्यवसानं नास्ति तदा सोऽसत्तर्क एव । तथा च विपर्ययापर्यवसायित्वं प्रथमः पक्षः । द्वितीयस्तु विपर्ययपर्यवसायित्वम् । तत्राह - **तत्पर्यवसान** इति । समाधत्ते - **यत** इति । यतो विपक्षबाधकतर्कस्यैव विपर्ययपर्यवसानम् । नन्वन्येषां तर्काणां लाघवगौरवतर्काणां विपर्ययापर्यवसायिनामेव सत्तर्कत्वम् । अत्रैव युक्तिमाह - **अत एवे**ति । यतो लाघवगौरवाख्यस्तर्को विपर्ययापर्यवसाय्येव सत्तर्कः अत एव प्रत्यक्षे कारणताप्रत्यक्षे शब्दे शाब्दबोधस्थलेऽपि यत्र तर्कः सहकारी तत्र विपर्ययापर्यवसाय्येव तर्कः । यथा प्रत्यक्षे कारणताग्रहे दण्डाभावाभावत्वेन दण्डत्वेन वा कारणताग्रहस्तत्र लाघवाख्यतर्कसहकारित्वात्, दण्डत्वेन वा कारणताग्रहस्तत्र साध्यहेत्वाद्यभावात् । कुत्र विपर्ययापर्यवसायित्वं शाब्दबोधे ? गङ्गायां घोष इत्यादौ इति, अत्र सन्निहितस्य घोषस्य गङ्गाधारत्वं वक्तव्यम् असन्निहितस्य वा ? लाघवात् सन्निहितस्यैवेति । विपर्ययापर्यवसायी लाघवाख्यतर्को भिन्न एवेति । तथा च तस्य विपर्ययापर्यवसायित्वेऽपि सत्तर्कत्वं सिद्धम् । एवं प्रकृतेऽपि विपर्ययापर्यवसायिनोऽपि लाघवाख्यस्य तर्कस्य सत्तर्कत्वमेव । ननु एतादृशतर्कसहकृतात् प्रमाणान्तरादेव बहिःसत्त्वज्ञानं भविष्यति किमर्थापत्त्येत्यत आह - **न चे**ति । यदा संशये सति तर्कावतारो भवति तस्यां दशायां प्रमाणान्तरं तु नास्त्येव प्रत्यक्षानुमानाद्यभावात् अर्थापत्तिप्रमाणस्यैव तर्कः सहकारीत्यर्थापत्तिरेव तत्र प्रमाणम् । **नैयायिकः** शङ्कते - **नन्वि**ति । **स्वकारणे**ति । स्वकारणेति स्वशब्देन संशयः, तस्य कारणानि गृहाभावनिश्चयानन्तरं प्रमाणद्वयविरोधज्ञानादीनि, तत्स्वभावविशेषादुत्पन्नस्य संशयस्य तर्केण पूर्वोक्तप्रणालिकारूपेणो[प]क्त(कृत)स्य

ना(वा)नुगृहीतस्य सहकृतस्य यदि बहिःसत्त्वप्रमाजनकत्वं तदा दूषणमाह - **मृत** इति। वस्तुगत्या मृतोऽस्ति गृहस्थितो वाऽस्ति, योग्यानुपलब्ध्या च तस्य गृहाभावो निश्चितस्तदा संशये पूर्वोक्ते सति पूर्वोक्ततर्कसहकारि-वशात् बहिःसत्त्वकल्पना वर्तते साऽपि प्रमा स्यात् सामग्रीतुल्यत्वात्। तदा मृते गृहस्थिते वा बहिःसत्त्वज्ञानं प्रमा स्यात् इत्याशङ्कार्थः। [142 B] समाधत्ते - **यथे**ति। चक्षुरिन्द्रियात् घटज्ञानं प्रमा जायते, यदा दोषो नास्ति तदा तज्ज्ञानं प्रमारूपम्, दोषसद्भावे तु तज्ज्ञानं भ्रमरूपम्, तद्वत् अत्रापि यदा दोषो नास्ति बहिःसत्त्वज्ञानं प्रमारूपं जायते, सति दोषे तु भ्रमरूपम्। यस्तु मृतो गृहस्थितो वा तस्य बहिःसत्त्वज्ञानं येन दोषेण मृते शत-वर्षजीवित्वज्ञानं भ्रमरूपं जातमस्ति तेनैव दोषेण बहिःसत्त्वज्ञानं संशयरूपार्थापत्तिसहकारिणा भ्रमरूपं जन्यते। एतदेवाह - **प्रमापकस्ये**ति। प्रमापकस्येति प्रमाजनकस्येन्द्रियस्य यथा दोषेण कृत्वा प्रमाजनकशक्तितिरोधानं जायते ततश्चैन्द्रियको भ्रमो जायते तथाऽर्थापत्तिरूपो यो यथोक्तसंशयः तस्मात् संशयात् दोषसहकृतात् बहिःसत्त्वज्ञानं प्रमाजनकशक्तितिरोधानात् भ्रमरूपं जायत इत्यर्थः। ननु बहिःसत्त्वज्ञानं कथं भ्रमरूपं तन्मते भ्रमाभावादित्यत आह - **अग्रहे**ति। तथा च यद्यपि **प्राभाकर**मते व्यधिकरणप्रकारको भ्रमो नास्ति तथापि असंसर्गाग्रहरूपो भ्रमस्तन्मतेऽपि तिष्ठत्येव। यथेदं रजतमित्यत्र चक्षुरिन्द्रियेण सारूप्यं वा शुक्तित्वाग्रहो वा दोषस्तत्सहकारिवशात् शुक्तौ रजतविषयको भ्रमो जन्यते। यत्र चासंसर्गाग्रहो यथा शुक्तौ रजतत्वस्यासंसर्गोऽस्ति तस्याग्रहोऽज्ञानम् अयमेव भ्रमः स यदा नास्ति तत्र रजते रजतप्रमा जायते। तेषां मते विद्यमानासंसर्गाग्रहस्यैव भ्रमत्वात्। शुक्तौ रजतत्वासंसर्गो विद्यमानोऽस्ति तस्याग्रह एव भ्रमः। यदा दोषो नास्ति तदा भ्रमो नास्ति किन्तु [1]प्रमैवार्थाद(द्) [शु]त्या(क्त्या) जायते। यदा तु दोषोऽस्ति तदाऽसंसर्गाग्रह इति। अत्राशङ्कते - **परोक्षे**ति। तथा च परोक्षज्ञानानाम् अनुमित्युपमितिशब्दज्ञानानां जनकज्ञानस्य यथार्थत्वे यथार्थत्वनियमोऽयथार्थत्वे चायथार्थत्वनियमः, तथा च लाघवज्ञानस्य प्रमारूपत्वेन इदं परोक्षज्ञानं यद् वस्तुगत्या मृते बहिःस्थिते वा बहिःसत्त्वज्ञानं तदपि प्रमारूपं स्यादित्याशङ्कार्थः। समाधत्ते - **प्रकृतेऽपी**ति। अत्रापि कारणीभूतज्ञानस्य जीवनग्राहकनियमग्राहकरूपस्यापि भ्रमरूपत्वात् इति कारणीभूतज्ञानस्य भ्रमत्वे कार्यीभूतज्ञानस्यापि भ्रमत्वमेव सिद्धम्। **यद्वे**ति। दोषाभावसहकृतः संशयो बहिःसत्त्वप्रमापकः। प्रकृते च मरणाज्ञानरूपो दोषस्तिष्ठतीति न बहिःसत्त्वज्ञानं प्रमेत्यर्थः। सिद्धान्तमाह - **अनयो**रिति। जीवनग्राहकं प्रमाणं शतवर्षजीवित्वग्राहकं प्रमाणं ज्योतिःशास्त्रं नियमग्राहकं च प्रमाणं प्रत्यक्षम् अनयोर्मध्ये एकं बाध्यं विरुद्धार्थग्राहकत्वात् स्थाणुत्वग्राहक-पुरुषत्वग्राहकप्रमाणवत् इति सामान्यतोदृष्टानुमानम्। तथा चानयोर्मध्ये एकं बाध्यम्। अतः परं किं बाध्यं तदर्थं तर्कावतारो यथा जीवनग्राहकबाधे उभयोः बाधः, गृहनियमग्राहकबाधे तु एकस्यैव प्रत्यक्षस्य बाधः।

१. प्रमैवार्थाद(प)त्त्या जायते (?)।

तथा च लाघवाख्यतर्कसहकारात् [143 A] या बाध्यत्वानुमितिः सामान्यरूपा सा गृहनियमग्राहकमेव प्रमाणं विषयीकरोति । तथा चानयोरेकं बाध्यमित्यनुमित्या नियमग्राहकबाधे विषयीकृते सति जीवित्वे निश्चिते योग्यानुपलब्ध्या च गृहाभावे निश्चिते सति अनुमानादेव बहिःसत्त्वज्ञानं जायते । अनुमानं यथा देवदत्तो बहिरस्ति जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वात् । अत्र गृहनिष्ठात्यन्ताभावस्तु योग्यानुपलब्धि-सहकृतादेव निश्चितः, जीवित्वं तु नियमग्राहकप्रमाणबाधे सति ज्योतिःशास्त्रादेवेति हेतुमध्ये विशेषण-विशेष्ययोर्निर्णये सति हेतुर्निश्चित एवेति ।

अथ टीकाव्याख्या । **ज्योतिरि**ति टीका । ज्योतिःशास्त्रात् देवदत्तस्य चैत्रेण शतवर्षजीवित्वमवधारितम् । अत्रानुपपत्तिर्यथा न हि ज्योतिःशास्त्रे देवदत्तनामपुरस्कारेण शतवर्षजीवित्वमुक्तमस्ति किन्तु तादृशग्रहविशेषा यज्जन्मनि स शतवर्षजीवीति व्याप्तिग्रहमात्रमित्यनुपपत्तिमाह - **यद्यपी**ति । समाधत्ते - **तथापी**ति । ज्योतिः-शास्त्रवित्पुरुषो ज्योतिःशास्त्रपदेन कथं लब्ध इत्यत आह - ज्योतिःशास्त्रं ज्ञेयतया यस्येत्यर्थात् । तथा चाय-मर्थात् तादृशात् पुरुषाच्चैत्रेण देवदत्तस्य शतवर्षजीवित्वमवधारितमित्यर्थः । मतान्तरमाह - **एतदस्वरसादि**ति । योग्यानुपलब्धेः गृहाभावं प्रति करणत्वानुपपत्तिः किन्तु गृहाभावनिश्चयं प्रत्येव तस्याः करणत्वमिति यथाश्रुते-ऽनुपपत्त्याऽन्यथा व्याचष्टे - **गृहाभावनिश्चये**ति टीका । **नियमद्वये**ति टीका । शतवर्षजीवीत्येको नियमो जीवी गृह एवेत्यपरो नियम इत्यर्थः । मतान्तरमाह - **तत्कथिते**ति टीका । देवदत्तः शतवर्षजीवी एवेत्येको नियमो ज्योतिःशास्त्रात् द्वितीयस्तु जीवी गृह एवेति नियमः प्रत्यक्षादिति पूर्वमते व्याख्यातम् । अत्र मते तु तत्कथितेत्यत्र ज्योतिःशास्त्रकथितं लिङ्गं रेखोपरेखादिकम्, तत्र शतवर्षजीवित्वस्य व्याप्तिरूपो नियमो यथा यस्य हस्ते तादृशरेखोपरेखादिकं स शतवर्षजीवीत्येको नियमः, प्रत्यक्षप्रमाणेन गृह एवेत्यपरो नियम इत्यर्थः । अयं भावः - पूर्वमतव्याख्याने एतद्देवदत्तस्य शतवर्षजीवित्वस्य नियमो विज्ञपुरुषादवगतः, एतद्व्याख्याने तु शतवर्षजीवित्वव्याप्यं यद् रेखोपरेखादिकं तेन सह देवदत्तस्य नियमो यथाऽयं देवदत्तः स शतवर्षजीवित्व-व्याप्यरेखोपरेखादिमानेवेति व्याप्तिरूपः । ननु स्थाणुपुरुषसंशयादपि एककोटिनिश्चयः स्यादिति मूलमनुपपन्नम् । न हि संशयसामान्यस्य कल्पकत्वमुच्यते किन्तु यथोक्तसंशयस्यैव, तथा च स्थाणुपुरुषसंशयात् कथमेकतर-कोटिनिश्चय इति [न] मूलमनुपपन्नमित्यत [143 B] आह - **आशयमविद्वानि**ति टीका । तथा पूर्वोक्तयथोक्त-संशयस्यैव येन कल्पकत्वं नावधारितं तस्यैवेयमाशङ्केत्यर्थः । आशयमिति स्पष्टम् । ननु गृहाभावस्य विरोधि-ग्राहकाभावेन सन्देहप्रसक्तिरेव नास्ति यथा यदा स्थाणुत्वग्राहकं पुरुषत्वग्राहकं च यत्र, तत्र स्थाणुत्वसंशय-विरोधिग्राहकसमवधानात् । तथा प्रकृतेऽपि गृहाभावविरोधिग्राहकाभावात् कथं गृहाभावसंशय इत्यतोऽन्यथा व्याचष्टे - **न त्वि**ति टीका । तथा चात्र गृहाभावस्य विरोधी गृहसत्त्वनियमग्राहकं प्रत्यक्षम्, तदेव विरोधिग्राहक-

मस्तीति न गृहाभावसन्देहोऽनुपपन्नः, तथा च सन्देहनिराकरणार्थं मूलकृता यदुक्तं गृहाभावसंशयनिराकरणार्थं तद् युक्तमेव । टीकायां यद् देवदत्तेति धृतं देवतद(तद् देवदत्ता)वयवेत्यत्र ग्रन्थस्थं ज्ञेयम् । ननु जीवनबाधे बहुतरव्याप्तिबाधः कथमित्यत आह - **जीवनबाध** इति । तथा च यदि जीवित्वं बाधितं तदा जीवित्वघटिता वर्षक्षणलवादिघटिताः सर्वा व्याप्तयो बाधिता इत्यर्थः । इदमेवाह - **तासामपी**ति टीका । **तर्कान्तरमि**ति टीका । पूर्वमुक्तो य[स्त]र्को यथा देवदत्तगृहसत्त्वतदवयवव्याप्तिरल्पा, शतवर्षजीवनव्याप्तिर्बह्वीति तद्बाधो न युक्त इत्येकस्तर्कः । तस्मिन् तर्केऽभावरूपमरणापेक्षेत्यनुपयुक्तमित्यतस्तर्कान्तरमाहेत्यर्थः । ननु ततोऽर्थापत्ति-कल्पितं जीवित्वमुपजीव्यानुमानाद् बहिःसत्त्वज्ञानमिति ग्रन्थेन **प्राभाकरस्योक्तिर्नैयायिकं** प्रति । तत्र एतावत्-तर्कसहकृत उपसंहारोऽनुचितः । किञ्च बहिःसत्त्वज्ञानार्थमेवार्थापत्तिः स्वीक्रियते न तु जीवित्वज्ञानार्थम्, तथा च जीवित्वज्ञानार्थमर्थापत्तिस्वीकारोपवर्णने **प्राभाकर**स्यापसिद्धान्तो यतो जीवित्वज्ञानं ज्योतिःशास्त्रादेवेत्यतो व्याचष्टे - **मरणे**ति टीका । एतावत्तर्कसहकृतेत्यस्य ग्रन्थस्य ततोऽर्थापत्तिकल्पितजीवित्वमिति नोपक्रमो येन पूर्वोक्तं दूषणं स्यात् । किन्तु योग्यानुपलब्धिनिश्चितो गृहाभाव इत्यारभ्य बहिःसत्त्वज्ञानं भविष्यतीतिपर्यन्तं तर्कशरीरमेव, तत्तर्कस्वरूपमेवैतावच्छब्देन परामृश्यते, एतदेवाह - **तेने**ति टीका । तथा च एतावत्तर्कसहकृतः संशयो बहिःसत्त्वं कल्पयतीति नोपक्रमोपसंहारविरोधः । **अत्र देवदत्ते**ति टीका । ननु जीवननियमग्राहक-मानयोरन्यतराभासत्वेन चेत् बहिःसत्त्वज्ञानमाभासरूपं तदा बहिःसत्त्वप्रमा कुत्रापि न स्यात् । यत्र शतवर्षजीवी बहिःस्थितो वर्तते तत्र गृहनियमग्राहकस्याभासरूपत्वात् बहिःसत्त्वज्ञानं प्रमा न स्यादित्यतो व्याचष्टे - **अत्रे**ति टीका । अत्र जीवननियमग्राहकप्रमाणयोर्मध्ये यन्नियमग्राहकं प्रमाणं [144 A] तत् गृहे नास्तीत्येवं रूपं न तु गृह एवेत्यादिरूपम् । अत एव वस्तुगत्या जीवी गृहे वर्तते तत्र गृहाभावज्ञानानन्तरं यद् बहिःसत्त्वज्ञानं तद् भ्रमरूपमेव, न तु गृह एवेति नियमग्राहकस्य भ्रमरूपत्वे बहिःसत्त्वज्ञानस्य भ्रमरूपत्वं सम्भवति । यदि गृह एवेति ज्ञानं भ्रमरूपं तदा बहिःसत्त्वज्ञानं प्रमारूपमेवोत्पद्यते इति कृत्वा गृहे देवदत्ताभावग्राहकं यत् प्रमाणं तदेव नियमग्राहकम् एतदेवाह - **तथा सती**ति टीका । यदि गृहनियमग्राहकस्याभासत्वेन बहिःसत्त्व-ज्ञानस्याभासत्वं तदा बहिःसत्त्वप्रमा कुत्रापि न स्यात् येन यत्र बहिःसत्त्वप्रमा तत्र गृहसत्त्वग्राहकस्याभासत्वम्, तस्मान्नियमग्राहकशब्देन गृहेऽभावग्राहकं यत् प्रमाणं तदेव विवक्षितम् । तस्याभासत्वेन बहिःसत्त्वज्ञानमपि भ्रमरूपमेवेत्यर्थः । अथ यद्वेतीति ग्रन्थेन पूर्वापेक्षया भेदमाह - **पूर्वमि**ति टीका । तथा च पूर्वं प्रमां प्रति दोषाभावो न कारणं किन्तु अतिरोहितप्रमाजनकशक्तिकस्य प्रमाकरणस्य प्रमाहेतुत्वमित्युक्तम्, यत्र गृहाभावग्राहकमाभासरूपं तत्र बहिःसत्त्वप्रमां प्रति करणस्य शक्तितिरोधानमेवेति प्रागुक्तम्, इदानीं तु दोषाभावस्यैव प्रमां प्रति हेतुत्वं यद्वेत्यादिना ग्रन्थेनाह । **यद्विरहा**दिति टीका । दोषाभावविरहात् प्रमाविरह

इत्यर्थः । तथा च पूर्वपक्षाद् भेदो जातः । सिद्धान्तग्रन्थफक्किका **प्रमाणत्वेति** । प्रमाणद्वयं निरूपयति- **अत्रेति** टीका । शतवर्षजीवित्वग्राहकमेकं प्रमाणम्, द्वितीयं च गृहनियमग्राहकं प्रत्यक्षं प्रमाणमिति प्रमाणत्वाभिमते द्वे । ननु जीवित्वबाधे देवदत्तः शतवर्षजीवीत्येतस्य बाधो भवतु परंतु गृहनियमग्राहकस्य कथं बाध इत्यत आह - **शतवर्षजीवीति** टीका । तथा च गृहनियमग्राहकं यत् प्रमाणं तत् कीदृशम् ? शतवर्षजीवी गृह एवेत्येवं रूपम् । तथा च शतवर्षजीवित्वरूपविशेषणस्य बाधे विशिष्टबाध आवश्यक इति भावः ।

**सामान्यतोदृष्टादेव तर्कसहकृताद् गृहनियमग्राहकबाधे लिङ्गविशेषणजीवित्वनिश्चयेऽनुमानात् बहिःसत्त्वसिद्धिः, तथा च जीवनप्रमाणबाधे गृहनियमप्रमाणोत्थापितलिङ्गेन मरणानुमानात् प्रमाणत्वाभिमतयोर्द्वयोरपि बाधा स्यात्, गृहनियमग्राहकमानबाधे च निष्परिपन्थिजीवनप्रमाणात् लिङ्गविशेषणजीवित्वनिश्चये बहिःसत्त्वानुमानादेकप्रमाणबाधैवेत्यादितर्कसहकृतात् सामान्यतोदृष्टादेवानयोरेकं बाध्यमिति जायमानानुमितिः परम्परामरणज्ञापकं विषयीकरोति न तु बहिःसत्त्वपरम्परासाधकं जीवनप्रमाणम्, तथा च सामान्यतोदृष्टादेव गृहनियमग्राहकबाधे जीवनप्रमाणात् लिङ्गविशेषणजीवित्वनिश्चयेऽनुमानादेव बहिःसत्त्वज्ञानमिति किमर्थापत्त्या । ननु बहिःसत्त्वज्ञानं विना जीवी गृह एवेत्यस्य ब्रह्मणाऽपि बाधितुमशक्यत्वात् प्रथमं बहिःसत्त्वज्ञानं न तु गृहनियमग्राहकबाधानन्तरं तत् येन निष्परिपन्थिजीवनग्राहकात् जवित्वनिश्चयेऽनुमानं स्यात्, न प्राथमिकबहिःसत्त्वज्ञानमर्थापत्तिं विना । न च गृहनियमग्राहिणि तुल्यबले जागरूके कथमर्थापत्त्यापि बहिःसत्त्वज्ञानमिति वाच्यम् । तर्कसहकारेणार्थापत्तेर्बलवत्त्वात् बहिःसत्त्वज्ञानमुत्पाद्य गृहनियमग्राहकमानबाधादिति चेत् । न । तर्कसहकारेण सामान्यतोदृष्टस्य बलवत्त्वेन गृहनियमग्राहकबाधसम्भवात् ।**

अथ मूलव्याख्या । गृहनियमग्राहकबाधे उभयोर्बाधः कथं न भवति जीवनग्राहकबाधे तूभयोर्बाध इत्यत आह - **गृहनियम** इति मूलम् । तथा च गृहनियमग्राहकमानबाधे सति गृहाभावग्राहकप्रमाणात् गृहाभावो निश्चितः जीवनग्राहकप्रमाणात् तु जीवित्वं निश्चितम्, तेन जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वेन हेतुना वह्निःसत्त्वज्ञाने सति जीवनग्राहकं प्रमाणं संरक्षितमेव, तथा चोभयबाध(धो) [न] इत्यर्थः । ततः किमित्यत

आह - **तर्कसहकृतादि**ति मूलम्। प्रमाणमाह - **सामान्यत** इति। अनयोरेकं बाध्यं विरुद्धार्थग्राहकत्वादिति सामान्यतोदृष्टमित्यर्थः। तथा च समान्यतोदृष्टमितीयं [144 B] जायमाना याऽनुमितिः सा परम्परया मरणज्ञापकं विषयीकरोति। परम्परा यथा गृहे एवेत्यादिकं यदि प्रत्यक्षप्रमाणं तदा गृहे एव स्थितस्य गृहादर्शनमनुपपन्नम्, तथा च देवदत्तो मृतो बहिरसत्त्वे सति गृहासत्त्वात् अनेनानुमानेन मरणमनुमीयते। तथा चानयोरेकं बाध्यं विरुद्धार्थत्वात् इति बाध्यत्वानुमितिः परम्परया विषयीक्रियते यतः प्रत्यक्षेणापि मरणं साक्षान्न विषयीक्रियते किन्तु देवदत्तो बहिरसत्त्वे सति गृहासत्त्वादित्यत्र मानद्वारा एव प्रत्यक्षं मरणं विषयीकरोति। एतावता प्रत्यक्षस्य परम्परया मरणज्ञापकतेत्युक्तम्। तथा च बाध्यत्वानुमितिः प्रत्यक्षमेव मरणज्ञापकमेव बाध्यत्वेन साधयति न तु ज्योतिःशास्त्रम्। उक्तमर्थमुपसंहरति - **तथा चे**ति मूलम्। गृहनियमग्राहकं(क)बाधे सति जीवनग्राहक-प्रमाणाज्ज्योतिःशास्त्राल्लिङ्गविशेषणं यज्जीवित्वं तस्य निश्चये सति, ततः किमित्यत आह - **अनुमानादि**ति मूलम्। अनुमानं तु अग्रे दर्शयिष्यति। शङ्कते - **नन्वि**ति। अनुमानाद् बहिःसत्त्वज्ञानं न भवतीति प्रतिज्ञा। तत्र हेतुर्यथा अनुमानं तदा प्रवर्तते परम्परया मरणज्ञापकं यत् प्रत्यक्षं तस्य बाधे सति अनुमानं भवति देवदत्तो बहिरस्तीत्यादिकम्। प्रत्यक्षस्य मरणज्ञापकस्य यो बाधः स तु बहिःसत्त्वज्ञानेन विना न भवति। कुतः ? यतो जीविनो गृहासत्त्वं बहिःसत्त्वेन विनाऽनुपपन्नमित्यनुपपत्त्या बहिःसत्त्वे निश्चिते ततो बहिःसत्त्वविरोधिगृहनियम-ग्राहकं प्रत्यक्षं तदेव बाध्यते। अयं भावः - आदौ यद् बहिःसत्त्वज्ञानं तदर्थापत्त्या भवतीत्यर्थापत्तिः प्रमाणं सिद्धमित्यर्थः, प्रथमतः प्रत्यक्षस्य बाधो न भवति विरुद्धयोस्तुल्यत्वेन जागरूकत्वात्, यदा तुल्यबल-योर्जागरूकत्वं तदा चैकस्य प्रत्यक्षस्य बाधो नास्ति, एतद्बाधाभावे कथमनुमानात् पूर्वमेव बहिःसत्त्वज्ञानं भवतीत्यर्थः। एतदेवाह - **बहिरित्यारभ्याशक्यत्वादि**तिपर्यन्तं मूलम्। ततः किमित्यत आह - **प्रथममि**ति। अर्थापत्त्यैवेति शेषः। परमतं निराकरोति - **नन्वि**ति मूलम्। ततः किमित्यत आह - **येने**ति मूलम्। गृह-नियमग्राहकप्रत्यक्षप्रमाणबाधानन्तरमनुमानान्न बहिःसत्त्वज्ञानम् उभयप्रमाणयोर्विरुद्धयोर्बलाबलानिरूपणात् प्रत्यक्षस्य बाध एव नास्ति, यतो बहिःसत्त्वज्ञानेनैव प्रत्यक्षस्य बाधः कर्तव्यः प्रथमतो बहिःसत्त्वज्ञान-मर्थापत्त्यैवेति भावः। अत्र **नैयायिकः** शङ्कते - **न चे**ति। तथा चार्थापत्त्यापि बहिःसत्त्वज्ञानं कथं कर्तव्यं विरोधिप्रमाणस्य गृहनियमग्राहकस्य जागरूकत्वात्। एवमर्थापत्त्यापि प्रथममनुमानात् बहिःसत्त्वज्ञानं [145 A] कर्तुं न शक्यते एवेति त्वत्पक्षेऽपि तुल्यो दोष इति वाच्यमित्यन्तेनान्वयः। समाधत्ते - **तर्के**ति मूलम्। यद्यपि विरुद्धे जागरूके प्रमाणे विद्यमानेऽर्थापत्तेः प्रबलत्वं नास्ति तथापि तर्कसहकारेणार्थापत्तेर्बलवत्त्वम्, तर्को यथा मरणं वा कल्पनीयं बहिःसत्त्वं वा कल्पनीयमित्यादिलाघवरूपः इति। लाघवाख्यतर्कसहकृतयाऽर्थापत्त्या बहिःसत्त्वज्ञानं भविष्यतीत्यर्थापत्तिः प्रमाणमित्याशङ्कार्थः। **नैयायिकः** समाधत्ते - **तर्के**ति मूलम्। यदि

तर्कसहकृताया आर्थापत्तेः प्रबलत्वं तदा सामान्यतोदृष्टानुमानस्यानयोर्मध्ये एकं बाध्यमित्यस्यापि कथं न प्रबलता, तथा च तर्कसहकृतं सामान्यतोदृष्टमेवानुमानं प्रबलं मरणकल्पनापेक्षया जीवनकल्पने लाघवमिति नियमग्राहकं प्रत्यक्षं तर्केण बाधितमिति कथमर्थापत्तिः प्रथममेव बहिःसत्त्वसाधकम्।

**तस्मात् यथोक्तसंशयदशायां जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति तर्कानन्तरमेव बहिःसत्त्वज्ञानमित्यविवादम्, तत्र कल्पनीयप्रमाणाभावे यथोक्तसंशये तर्कस्य न सहकारित्वं गौरवात् किन्तु नियमग्राहकबाधद्वारा बहिःसत्त्वपरम्परासाधके सामान्यतोदृष्टे लाघवात्। न च सामान्यतोदृष्टावतार एवात्र नास्तीति वाच्यम्। अनिर्धारितैकबाधप्राप्तौ ह्येकबाधानुकूलकल्पनायां विनिगमकस्तर्को भवति, न चैकबाधप्राप्तिः सामान्यतोदृष्टं विना। किञ्च विरोधज्ञानानन्तरमेकमप्रमाणमिति यदि धीर्नास्ति तदा प्रामाण्यसंशयो न स्यात् न स्याच्च जीवनसंशयः द्वयोरपि जीवनमरणनिश्चायकत्वात्।**

उपसंहरति - **तस्मादिति** मूलम्। **यथोक्तेति** मूलम्। जीवति न वेति संशयदशायामित्यर्थः। तर्कस्वरूपं विवृणोति - **जीवनबाधे** इति मूलम्। जीवनबाधे प्रत्यक्षप्रमाणबाधस्यावश्यकत्वादिति भावः, विशेषणबाधे विशिष्टबाधादिति। तर्कस्वरूपं विधेयमाह - **बहिःसत्त्वज्ञानमिति** मूलम्। तथा च **नैयायिकप्राभाकर**पक्षयोरुभयोरपीदमेव सम्मतम्। जीवति न वेति सन्देहानन्तरमुक्ततर्कावतारे सति तर्कानन्तरमेव बहिःसत्त्वज्ञानमित्यविवादम्, तथा च न केवलं तर्कमात्रादेव बहिःसत्त्वज्ञानं तर्कस्य स्वयमप्रमाणत्वेन प्रमाणसहकारित्वात्। तथा च यस्य सहकारी तर्कः तादृशं प्रमाणं किञ्चिद् वक्तव्यम्। तच्च प्रमाणं न संशयरूपाऽर्थापत्तिः यत उक्तम् - **संशयः करणमिति**। तत्सहकारी तर्को न भवति संशयस्य तर्कः सहकारी न भवति, यतः क्लृप्तकल्पनीययोर्मध्ये क्लृप्तस्यैव बलवत्त्वं यतः संशयस्यादावर्थापत्तिरूपप्रमाणत्वं कल्पनीयम्। स यद्यपि स्वयं प्रमा न भवति तथापि प्रमाकरणत्वेन कल्पनीय(यः) त्वयेति कल्पनीयता तस्य, अनुमानस्य तु प्रामाण्यमुभयवादिसिद्धत्वात् क्लृप्तमेव, इति लाघवादनुमानमेव बहिःसत्त्वज्ञाने प्रमाणम्। एतदेवाह - **किन्त्विति** मूलम्। सामान्यतोदृष्टे एव तर्कस्य सहकारित्वं क्लृप्तत्वादित्यर्थः। हेतुरत्र लाघवादिति ज्ञेयः। मध्ये शङ्कते - **न चेति**। विरुद्धप्रमाणयोर्जागरूकत्वात् सामान्यतोदृष्टावतार एव नास्ति, कस्य बाधः कर्तव्य उभयोर्जागरूकत्वादित्यर्थः। समाधत्ते- **अनिर्धारितेति** मूलम्। तथा चोभयोर्विरुद्धत्वज्ञानानन्तरमेकबाधत्वप्रसक्तौ सत्यां तर्क एव विनिगमकः। तथा च तर्कसहकारिवशात् प्रबलेन सामान्यतोदृष्टानुमानेनावश्यं मरणज्ञापकं यत् प्रत्यक्षं तस्यैव बाध्यत्वानुमितिर्जायत इत्यर्थः। नन्वेकबाधप्राप्तिरपि कुत इत्यत आह - **न चेति** मूलम्। तथा च [145 B] सामान्यतोदृष्टानु-

मानमावश्यकमित्यनुमित्यनन्तरं तर्कसहकारिवशात् प्रत्यक्षमेव बाध्यते इत्यर्थः । दूषणान्तरमाह - **किञ्चेति** । तथा च विरोधज्ञानानन्तरमेकमप्रमाणमेकं बाध्यमिति धीर्नास्ति यदि तदा विरोधज्ञानानन्तरमिदं वा प्रमाणमिदं वेति प्रामाण्यसंशयो न स्यात्, प्रामाण्यसंशयाभावे च जीवनसंशयोऽपि न स्यादित्याह - **न स्याच्चेति** मूलम् । तत्र हेतुमाह - **द्वयोरपीति** मूलम् । तथा च द्वयोः प्रमाणत्वे जीवनग्राहकप्रमाणेन जीवनं प्रमापितम्, मरणज्ञापकप्रमाणेन प्रत्यक्षेण मरणं प्रमापितम्, तत उभयोरपि निश्चय एव स्यान्नैव संशयः स्यादित्यर्थः ।

**अथैकमनयोरप्रमाणमिति ज्ञानं जनयित्वा सामान्यतोदृष्टस्य पर्यवसितत्वात् तज्जनितनियमद्वयसंशयाहितजीवनसंशयानन्तरं तर्कावतारे बहिरस्तीति ज्ञानं जायमानं संशयस्य कारणत्वं व्यवस्थापयतीति चेत् । न । यदेव हि विरुद्धार्थग्राहकत्वं तर्कविनाकृतमनिर्धारितैकाप्रामाण्यानुमितिमजीजनत् तदेव तर्कसहकृतं पुनरनुसन्धीयमानं गृहनियमग्राहकप्रमाणमित्यनुमितिं बहिःसत्त्वज्ञानानुकूलां जनयति सहकारिवैचित्र्येणैकस्यापि विचित्रफलजनकत्वात् । न च जीवनसंशयानन्तरं तदनुसन्धानमसिद्धं गृहनियमग्राहकस्य जीवनग्राहकविरुद्धार्थग्राहकत्वं विना बहिःसत्त्वकल्पनेऽप्यबाधप्रसङ्गात् ।**

अत्राशङ्कते - **अथेति** मूलम् । अनयोरेकमप्रमाणमिति ज्ञानं सामान्यतोदृष्टानुमानेन जनयित्वा एतावता सामान्यतोदृष्टानुमानं पर्यवसन्नम् । एवं च सति प्रामाण्यसंशयोऽप्युपपन्नो जीवनसंशयोऽप्युपपन्नः । तथा च तर्कसहकारिवशात् सामान्यतोदृष्टानुमानजनितनियमद्वयसंशयाहितः संशयो यो जीवनसंशयस्तदनन्तरं जायमानं बहिःसत्त्वज्ञानम्, संशयस्य करणत्वे सिद्धे बहिःसत्त्वप्रमाकरणत्वमपि सिद्धं भविष्यतीत्याशङ्कार्थः । समाधत्ते- **यदेवेति** मूलम् । यदेव सामान्यतोदृष्टानुमानं तर्करहितं सत् अनिर्धारितैकाप्रामाण्यानुमितिं जनयति तदेव तर्कसहकारिवशात् निर्धारितैकाप्रामाण्यानुमितिमपि जनयिष्यति, किमर्थमर्थापत्तिप्रमाणकल्पनम् । एतदेवाह- **गृहनियमग्राहकेति** मूलम् । नन्वेकस्यैवानुमानस्य कदाचिद् निर्धारितैकाप्रामाण्यस्यानुमितिजनकत्वं यथा इदमनयोरप्रमाणं विरुद्धार्थग्राहकत्वात् । अत्रानिर्धारितैकाप्रामाण्यस्यानुमितिरेतस्मादेवानुमानात् पुनः कथं निर्धारितैकाप्रामाण्यानुमितिर्भविष्यतीत्यत आह - **सहकारिवैचित्र्येणेति** मूलम् । तथा च सामान्यतोदृष्टानुमानस्यैव प्रथमं तर्कासहकृतस्यानिर्धारितैकाप्रामाण्यानुमितिजनकत्वं पश्चात् तर्कसहकारात् निर्धारितैकाप्रामाण्यानुमितिजनकता यथा चक्षुषा एव दोषसहकारात् अप्रमा गुणसहकारात् च प्रमा इति सामग्रीवैचित्र्येणोभयोरप्युपपत्तिः । आशङ्कते - **न चेति** मूलम् । यदि जीवनसंशयानन्तरं सामान्यतोदृष्टानुसन्धानं स्यात् तदा तर्कसहकारिवशात् गृहनियमग्राहकप्रमाणबाध्यता स्यात् तदेवानुसन्धानमेव नास्तीत्याशङ्कार्थः ।

समाधत्ते - **गृहनियमेति** मूलम्। तथा च जीवनसंशयानन्तरं बहिःसत्त्वकल्पने विलम्बस्तु दृश्यते, तस्मान्मध्ये किञ्चिद् विलम्बकारणं वक्तव्यम्। तच्च विरुद्धार्थग्राहकत्वरूपसामान्यतोदृष्टानुसन्धानरूपम्, तेनैव मध्ये विलम्ब इत्यवश्यं वक्तव्यम्। अत एव बाधप्रसङ्गादित्यत्र यथाश्रुतमबाधोऽनुपपन्नः, यतः तर्कसहकारिवशात् गृहनियम-ग्राहकस्य बाधो भविष्यतीति यथाश्रुतमबाधप्रसङ्गादित्यनुपपन्नमिति कृत्वाऽबाधप्रसङ्गादित्यर्थोऽविलम्ब-प्रसङ्गादित्यर्थः [146 A] सम्पन्नः।

**अथ यदि पर्यवसन्नमपि प्रमाणं पुनरनुसन्धीयमानं सहकारिविशेषात् फलान्तरजनकं तदेच्छा द्रव्याश्रिता कार्यत्वादिति सामान्यतोदृष्टद्रव्याश्रितत्वानुमितौ पश्चाद् अष्टद्रव्य-वृत्तित्वबाधे व्यतिरेकिणा आत्मसिद्धिरिति भज्येत अष्टद्रव्यवृत्तित्वबाधसहकृतात् सामान्यतोदृष्टादेव पुनरनुसन्धीयमानात् तत्सिद्धेरिति चेत्। न। अनुमितेर्व्यापकता-वच्छेदकप्रकारकत्वनियमेन तत्प्रकारकबुद्धेर्व्यतिरेकिसाध्यत्वात् व्यतिरेकिणोऽप्यन्यत्र सामर्थ्यावधारणेनोपायान्तरस्यादोषाच्च। अपि च देवदत्तो जीवनमरणान्यतरप्रतियोगी प्राणित्वात् मद्वत् इति सामान्यतोदृष्टं लाघवसहकारेण जीवनप्रतियोगित्वं विषयीकरोति तथा च लिङ्गविशेषणनिश्चयादनुमानादेव बहिःसत्त्वसिद्धिः।**

**मीमांसकः** शङ्कते - **अथेति**। यदि एकवारं सामान्यतोदृष्टानुमानं पर्यवसन्नं पश्चात् तर्कसहकारिवशात् पुनस्तदेवानुसन्धीयमानं चेत् विशेषानुमितिजनकं तदेत्यर्थः। दूषणमाह - **इच्छेति** मूलम्। यथा इच्छा द्रव्याश्रिता गुणत्वात् कार्यत्वात् वा इत्यत्र एकवारं सामान्यकारेण इच्छाया द्रव्याश्रितत्वानुमितिर्जाता तदनन्तर-मिच्छाया अष्टद्रव्यवृत्तित्वबाधे व्यतिरेक्यनुमानेन अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वाभावस्तत्र तत्र अष्टद्रव्या-नाश्रितत्वे सति गुणत्वाभावो यथा रूपादौ इति या व्यतिरेक्यनुमानेनाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वसिद्धिरुक्ता सा विरुध्येतेत्यर्थः। कुत इत्यत आह - **अष्टद्रव्येति** मूलम्। तथा च इच्छायां सामान्यतोदृष्टानुमानादेव द्रव्या-श्रितत्वसिद्धौ सत्यां अष्टद्रव्यवृत्तित्वबाधे पुनरनुसन्धीयमानात् तस्मादेव सामान्यतोदृष्टानुमानेनाष्टद्रव्यवृत्तित्व-बाधसहकारिवशात् अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वसिद्धिर्भवति। तथापि साऽनुमितिरष्टद्रव्यातिरिक्तद्रव्यवृत्तित्व-प्रकारिका न भवति किन्तु द्रव्याश्रितत्वप्रकारिका, यथा वह्न्यनुमितौ यद्यपि पर्वतीयवह्निरेव भासते परं वह्नित्वेनैव प्रकारेण भासते न तु पर्वतीयवह्नित्वेन प्रकारेणेति। तथा चाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वेन प्रकारेणाष्ट-द्रव्यातिरिक्तद्रव्यवृत्तित्वसिद्धये व्यतिरेक्यादरः। एवं च प्रकृतेऽपि पुनरनुसन्धीयमानात् सामान्यतोदृष्टानुमानात्

गृहनियमग्राहकबाध्यत्वानुमितिरेव भवति न तु गृहनियमग्राहकबाध्यत्वप्रकारिका, अत्र तु गृहनियमग्राहक-बाध्यत्वानुमितिरेवोद्देश्या न तु गृहनियमग्राहकबाध्यत्वप्रकारिका। तथा च गृहनियमग्राहकबाध्यत्वानुमिति-स्तर्कसहकारादेव भविष्यति। तथा चात्र विशेषमात्रविषयिणी अनुमितिरुद्देश्या न तु गृहनियमग्राहकबाध्यत्व-प्रकारिका। व्यतिरेकिस्थले तु तत्प्रकारिका विशेषानुमितिरुद्देश्येति व्यतिरेक्यादर इति भावः। प्रकारान्तरेणापि व्यतिरेकिणं समर्थयति। **व्यतिरेकिणोऽपी**ति मूलम्। तथा चान्यत्र पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् इत्यत्र व्यतिरेकिणः सावकाशत्वात् विशेषबाधसहकारिवशात् सामान्यतोदृष्टादपि सिद्धिर्व्यतिरेक्यनुमानादपि अष्ट-द्रव्येत्यादिसिद्धिः। न हि एकेनोपायेन सिद्धमित्युपायान्तरेणासिद्धमिति नियमः। अन्यथा धूमेन वह्न्यनुमितौ जातायामालोकेन वह्न्यनुमितिर्न स्यात् इत्यर्थः। अर्थापत्तिस्वीकारेण दूषणान्तरमाह - **अपि चे**ति मूलम्। देवदत्तो जीवनमरणान्यतरप्रतियोगी अन्यतरसम्बन्धी प्राणित्वात् इति सामान्यतोदृष्टमनुमानमेव तर्कसह-कारिवशात् जीवनप्रतियोगित्वमेव विषयीकरोति। ततः किमित्यत आह - **तथा चे**ति। लिङ्गविशेषणं जीवित्वे सति। [146 B] गृहनिष्ठात्यन्ताभावप्रतियोगित्वं हेतुः। तत्र च विशेषणं जीवित्वम्, तस्य निश्चये सति इत्यर्थः। **अनुमानादि**ति। अनुमानं यथा देवदत्तो बहिरस्ति जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वात् इत्यनुमानात् बहिःसत्त्वसिद्धिरित्यर्थः।

**अथ लाघवसाचिव्यात् सामान्यतोदृष्टस्यापि विशेषविषयत्वात् नियमग्राहक-प्रमाणोत्थापितलिङ्गकमरणानुमानेन जीवनग्राहकस्यैव सत्प्रतिपक्षत्वम् एकेनापि भूय-सामपि प्रतिबन्धसम्भवात्। न च तर्कात् सामान्यतोदृष्टस्य बलवत्त्वम्, व्याप्ति-पक्ष-धर्मते हि बलं तच्च तुल्यमेव ज्ञातं लाघवाख्यतर्कस्य विशेषमात्रपर्यवसायकत्वेन व्याप्तिग्राहकत्वस्य तुल्यत्वादिति चेत्, तर्हि पक्षधर्मताबलात् विशेषसिद्धिः क्वापि न स्यात् सर्वत्र सामान्यमुखप्रवृत्तप्रमाणस्य विशेषपर्यवसानेऽन्यसाधर्म्येण सत्प्रतिपक्ष-सम्भवात्, अप्रयोजकत्वान्न विपरीतसाधनमिति तुल्यं नियमग्राहकस्याप्रयोजकत्वात् जीवनग्राहकस्य तु सामान्यतोदृष्टस्य ज्योतिःशास्त्रात् यथार्थत्वमेव विपक्षबाधकं व्याप्तिग्राहकमस्ति, तस्मात् सामान्यमुखप्रवृत्तस्य सहकारिविशेषात् विशेषपरस्यानु-मानस्य तद्विशेषविलक्षणग्राहकप्रमाणेन सत्प्रतिपक्षत्वम्। न च प्रमाणविरोधेनास्य तर्को न सहकारीति वाच्यम्।**

अत्र शङ्कते - **अथेति**। तथा च पूर्वोक्तलाघवसहकारिवशात् सामान्यतोदृष्टं यज्जीवनमरणान्यतरप्रतियोगित्वरूपं तत्र विशेषो नाम जीवित्वं यदि विषयः तदा नियमग्राहकं यन्मानं प्रत्यक्षं तदुत्थापितं यल्लिङ्गम्, यथा देवदत्तो मरणप्रतियोगी गृहनिष्ठात्यन्ताभावप्रतियोगित्वात् इत्यनुमानेन जीवनग्राहकं यदनुमानं तत् सामान्यतोदृष्टम्। अस्यानुमानस्यानेन सत्प्रतिपक्षत्वम्। ननु जीवनग्राहकाणां ज्योतिःशास्त्रकथितलिङ्गानां सामान्यतोदृष्टप्रभृतीनां सत्त्वात् कथमेकेन गृहनियमग्राहकमानोत्थापितमरणा(ण)लिङ्गकानुमानेन सत्प्रतिपक्षत्वं स्यादित्यत आह - **एकेनेति** मूलम्। तथा च एकेनापि मरणलिङ्गकानुमानेन जीवनानुमानानां जीवनग्राहकानुमानानां सत्प्रतिपक्षत्वं सम्भवति, शतमपि अन्धानां न पश्यतीति न्यायात्। यथा एकेनापि चक्षुष्मता सर्वेऽन्धास्तिरस्रि(स्क्रि)यन्ते तद्वदित्यर्थः। आशङ्कते - **न चेति**। तुल्यबलत्वे हि सत्प्रतिपक्षत्वं स्यात्। प्रकृते च तुल्यबलत्वमेव नास्ति। कुतः ? तर्कसाचिव्यात्। सामान्यतोदृष्टस्य जीवनमरणान्यतरप्रतियोगीत्यादिरूपस्याधिकबलत्वेन कथं सत्प्रतिपक्षः स्यात्। तथा चानयोस्तुल्यबलत्वज्ञानाभावात् कथं सत्प्रतिपक्षत्वं स्यादित्याशङ्कार्थः। समाधत्ते **प्राभाकरः - व्याप्तीति**। यत् त्वयोक्तं सामान्यतोदृष्टानुमानं प्रबलं तत्रोच्यते - किं बलम्, व्याप्तिपक्षधर्मताज्ञानं हि बलम्, तच्चोभयत्राविशिष्टं जीवनग्राहकप्रमाणेष्वपि तद् वर्तते मरणग्राहकेऽपि वर्तते इति समानबलत्वमुभयोरिति। **नैयायिकः** समाधत्ते - **तर्हीति**। व्याप्तिपक्षधर्मते हि बलं यदि सामान्यमुखे प्रवृत्तानुमानस्य विशेषविषयत्वे अन्यसाधर्म्येण सत्प्रतिपक्षत्वं तर्हि पर्वतो वह्निमान् धूमात् इत्यत्रापि पर्वतीयवह्निसिद्धिर्न स्यात्, पर्वतो वह्निमान् धूमात् इत्यत्रापि पक्षधर्मताबलात् पर्वतीयवह्निसिद्धिर्जायते सा न स्यात्। कुतः ? यतः पर्वतः पर्वतीयवह्न्यभाववान् धूमात् महानसवत् इत्यनेन अनुमानेन विशेषसिद्धिपर्यवसन्नस्य पर्वतो पर्वतीयवह्न्यभाववान् इत्यस्य सत्प्रतिपक्षत्वं स्यात्, पर्वतो वह्निमान् इति यत् सामान्यतोदृष्टमनुमानं पर्वतीयवह्निसाधकम् अस्यापि सत्प्रतिपक्षेऽनुमानमात्रोच्छेदप्रसङ्गादित्यर्थः। **अन्यसाधर्म्येणेति** मूलम्। अन्यः पर्वतीयवह्न्यभाववान् महानसादिस्तेन सह साधर्म्यं धूमवत्त्वलक्षणं यतस्तत् पर्वतीयवह्निमत्यपि वर्तते पर्वतीयवह्न्यभाववत्यपि [147 A] वर्तते इत्यर्थः। तथा चानुमानमात्रोच्छेदप्रसङ्गः स्यात्। नन्वनुमानमात्रोच्छेदो न भवति, यथा पर्वतो वह्निमान् धूमात् इत्यत्र पर्वतीयवह्निसाधने पर्वतः पर्वतीयवह्न्यभाववान् धूमात् इति सत्प्रतिपक्षो न भवति। कुतः ? यदग्रेतनमनुमानं तदप्रयोजकं पर्वतीयधूमस्य पक्षधर्मतात्वात् पर्वतीयवह्नेरपि पक्षधर्मतात्वात्, ततः सामान्यतोदृष्टानुमानं प्रथमं प्रबलं द्वितीयानुमानमप्रयोजकत्वात् दुर्बलमिति न सत्प्रतिपक्ष इत्याशङ्कते - **अप्रयोजकत्वादिति**। समाधत्ते - **तुल्यमिति**। तथा चात्रापि तद्वत् मरणसाधकानुमानस्याप्रयोजकत्वात् दुर्बलत्वमित्यर्थः। तुल्यशब्दार्थमेव विवृणोति - **नियमग्राहकस्येति**। नियमग्राहकस्य प्रत्यक्षस्याप्रयोजकत्वात्। गृहनिष्ठात्यन्ताभावप्रतियोगित्वमस्तु मरणप्रतियोगित्वं मास्तु इत्यप्रयोजकमित्यर्थः। ननु जीवनग्राहकेऽपि प्रथमेऽप्रयोजकत्वमस्तु इत्यत आह - **जीवनग्राहकस्येति**।

तथा च सामान्यतोदृष्टानुमानस्य जीवनमरणान्यतरप्रतियोगीत्यादिरूपस्य ज्योतिःशास्त्रस्य यथार्थत्वमेव विपक्ष-बाधकम्, तस्य विद्यमानत्वात् पूर्वस्याप्रयोजकत्वं नास्तीत्यर्थः। तथा च ज्योतिःशास्त्रयथार्थत्वलक्षणस्य विपक्षबाधकस्य विद्यमानत्वात् व्याप्तिग्राहकं सामान्यतोदृष्टानुमानेऽप्यस्तीति उपसंहरति-**तस्मादिति**। व्याख्यातमेव, यथा पर्वतो वह्निमान् इति सामान्यमुखप्रवृत्तमनुमानम्। अथवा इच्छा द्रव्याश्रिता गुणत्वादिति वा सहकारिविशेषवशात् पृथिव्यादौ इच्छासत्त्वे बाधसहकारिवशात् विशेषपरस्याष्टद्रव्यातिरिक्तद्रव्य-वृत्तित्वरूपविशेषपरस्यानुमानस्य तद्विशेषविलक्षणो नाम अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वविशेषस्तस्माद्विलक्षणो यो विशेषोऽष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वाभावः तल्लक्षणो विशेषस्तत्साधकं गुणत्वादित्यादिलक्षणेन प्रमाणेन तत्सत्प्रतिपक्षत्वमित्यर्थः। सामान्यतोदृष्टानुमाने लाघवाख्यतर्कस्य सहकारिविशेषसमवधानस्य विद्यमानत्वात् सामान्यतोदृष्टानुमानस्य बलवत्त्वमित्यर्थः। शङ्कते - **न चेति**। **प्रमाणेति**। अस्य सामान्यतोदृष्टस्य गृहनियम-ग्राहकप्रमाणविरोधेन तर्कोऽपि सामान्यतोदृष्टानुमानस्य न सहकारी, तर्को ह्यविरुद्धे सहकारी। सामान्यतोदृष्टं गृहनियमग्राहकेण विरुद्धमिति कृत्वा न तत्र तर्कः सहकारीत्याशङ्कार्थः।

**तर्कानवतारे विशेषपरत्वाभावेनाविरोधात् तदवतारे तदधिकबलत्वादेव अन्यथा तर्कानवतारे सत्प्रतिपक्षस्य तदवतारेऽपि तत्त्वं न निवर्तते। किञ्चैवमर्थापत्तावपि तद्विरोधेन न सहकारी स्यात्। यदुक्तं मरणकल्पने शतवर्षावच्छिन्नजीवी गृह एवेत्यस्यापि बाध इति तत्र विशिष्टबाधो न विशेष्यबाधात् मरणेऽपि जीवी गृह एवेत्यस्य विशेष्यस्याबाधात् किन्तु विशेषणबाधात् स च शतवर्षजीवित्वबाध एव। विशेषणा-भावायत्तो विशिष्टाभावोऽप्यस्तीति चेत्। न। विशेष्यवति विशिष्टाभावस्य केवल-विशेषणाभावात्मकत्वात् विशिष्टस्यातिरिक्तस्यानभ्युपगमात्।**

समाधत्ते - **तर्कानवतारेति**। सामान्यतोदृष्टानुमानस्य गृहनियमग्राहकेण प्रत्यक्षेण सह विरोधस्तदा स्यात् यदि जीवनमरणयोर्मध्ये विशेषो जीवनं सामान्यतोदृष्टानुमानस्य तत्परता जीवनपरता स्यात्। यदि जीवनपरता स्यात् तदा गृहनियमग्राहकेण विरोधः स्यात्। यावत्पर्यन्तं [147 B] तर्कावतारो नास्ति तावत्पर्यन्तं विशेष-परत्वमेव नास्ति जीवनमरणयोर्मध्ये मरणेन सह नियमग्राहकस्य विरोधाभावात्। तथा च विशेषपरतायामेव विरोधः, तर्कात् पूर्वं विशेषपरतैव नास्ति इति कृत्वा विरोधाभावेन सामान्यतोदृष्टानुमानस्य तर्कः सहकारी भवत्येवेत्यर्थः। ननु तर्कसहकारिवशात् सामान्यतोदृष्टस्य विशेषपरतायां जीवनपरतायां गृहनियमग्राहकेण विरोधो भविष्यतीत्यत आह - **तदवतार** इति। तथा च तर्कसहकारिवशात् सामान्यतोदृष्टस्य विशेषपरत्वे सिद्धे

तस्य सामान्यतोदृष्टस्य तर्कसहकारिवशादधिकबलत्वेन गृहनियमग्राहकस्य दुर्बलत्वेन जातोऽपि विरोधोऽप्रयोजक इति सामान्यतोदृष्टस्य प्रबलत्वेन जीवने प्रमिते जीवननिश्चये च जीवित्वघटित्व(त)लिङ्गनिश्चये बहिःसत्त्वज्ञानमनुमानादेव भविष्यतीति किमर्थापत्त्येत्यभिप्रायः । ननु व्याप्तिपक्षधर्मताज्ञानमात्रं हि बलम्, तच्चोभयोस्तुल्यम्, तर्कस्तु बलमेव न भवतीति कथं सामान्यतोदृष्टानुमानस्याधिकबलत्वमित्यत आह - **अन्यथेति**। यदि तर्को बलं न भवति तदा तर्कानवतारदशायां पर्वतो वह्निमान् धूमात् इति पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् इति उभयोरपि व्याप्तिपक्षधर्मताज्ञाने समाने सत्प्रतिपक्षे सिद्धे तर्कावतारे सति पूर्वानुमानस्य सत्प्रतिपक्षत्वं न निवर्तेत, तर्कस्तु बलमेव तव मतेन न भवति, तथा चाधिकबलाभावे सत्प्रतिपक्षत्वं कदापि न निवर्तेतेत्यर्थः । दूषणान्तरमाह - **किञ्चेति**। यदि सामान्यतोदृष्टानुमाने गृहनियमग्राहकविरोधेन तर्को न सहकारी तदा तव प्रमाणमर्थापत्तिस्तत्रापि सत्तर्कः सहकारी न स्यात् । वस्तुगत्या त्वयापि तर्कसहकारिवशात् अर्थापत्त्या बहिःसत्त्वं निश्चीयते । तथा च तर्कोऽपि बलमेव स्वयं सामान्यतोदृष्टानुमाने, मरणापेक्षया जीवनस्य लघुभूतत्वात् जीवनमेव कल्पयितुमुचितमिति तर्कः सहकारी सामान्यतोदृष्टानुमानस्योक्तः । परेण तु जीवनकल्पने एकस्यैव गृहनियमग्राहकस्यैव बाधः स्यात्, मरणकल्पने तु जीवनग्राहकस्य ज्योतिःशास्त्रस्य मरणज्ञापकस्य गृहनियमग्राहकस्य प्रत्यक्षप्रमाणस्यापि बाधः स्यादिति द्वयोरपि बाध इति नियमद्वयबाधापेक्षया एकनियमबाध एवोचित इति यस्तर्को उक्तो **मीमांसकेन** तं तर्कं दूषयति - **मरणकल्पने** इति । तथा च मरणकल्पने जीवित्वग्राहकस्यापि बाधः अथ च शतवर्षजीवी गृह एवेत्यस्यापि बाध इति द्वयबाधे गौरवमिति यदुक्तं **मीमांसकेने**त्यर्थः । तथा च जीवित्वज्ञानमर्थापत्त्या, तयैव बहिःसत्त्वमपि, मध्ये जीवित्वकल्पना किमर्थम् ? येन प्रमाणेन जीवित्वं कल्पनीयं तेनैव [148 A] बहिःसत्त्वं कल्पनीयमित्यादि य उक्तः तर्क इति भावः । **नैयायिकः** वदति - स तु तर्क एव न भवति । कथम् ? शतवर्षजीवित्वविशिष्टबाधो यद्यपि जातस्तथापि गृहनियमग्राहकं यद् विशेष्यग्राहकं यथा जीवी गृह एवेति तस्य मरणकल्पनेऽपि बाधो नास्ति, मरणकल्पनेऽपि यदा जीवी स्यात् तदा गृह एवेति नियमस्याबाधनात्, मरणकल्पने शतवर्षजीवित्वरूपविशेषणस्यैव बाधात् । ननु विशेषणबाधेऽपि विशिष्टस्यैव बाधो भविष्यतीत्यत आह - **स चेति**। स विशेषणबाध एव परं जीवी गृह एवेति विशेष्यस्य बाधो न भवतीत्यर्थः । ननु यथा दण्डाभावे दण्डविशिष्टपुरुषाभावस्तथा प्रकृतेऽपि शतवर्षजीवित्वरूपविशेषणबाधात् शतवर्षजीवी गृह एवेति विशिष्टस्यापि बाधो भविष्यतीत्याशङ्कते - **विशेषणाभावायत्तेति** । **समाधत्ते - विशेष्येति** । तथा च यत्रापि देवदत्तवति दण्डाभावस्तत्रापि न दण्डविशिष्टदेवदत्ताभावः किन्तु दण्डरूपं यद् विशेषणं तदभावमात्रं न तु विशिष्टाभाव इत्यर्थः । ननु विशेषणवत् विशिष्टमपि विशेष्यातिरिक्तं स्यात् तद्बाधोऽपि विशेषणबाधात् भविष्यतीत्यत आह - **विशिष्टेति**। **नैयायिकेन** विशेषणं विशेष्यं च एतद्द्वयव्यतिरिक्तविशिष्टं नाङ्गीक्रियते ।

**अन्ये तु शतवर्षजीवी देवदत्तो जीवी गृह एव, गृहे नास्तीति प्रमाणेषु द्वयोरविरोधेऽपि तृतीयमादाय विरोधज्ञानमस्ति, तत्र जीवी गृह एवेत्यप्रमाणघटितप्रमाणद्वयविरोध-ज्ञानजनिताप्रामाण्यसंशयाहितजीवनसंशयात् प्रमाणयोरविरोधोपपादकमप्रमाण-विरोधि बहिःसत्त्वं कल्प्यते, यथोक्तसंशयस्यायमेव स्वभावो यद् वस्तुगत्या अप्रमाणं तद्विरोधि कल्पयति, विरोधघटकस्य वस्तुगत्या अप्रमाणत्वमेव विनिगमकत्वमिति, तत् तुच्छम् अप्रमाणस्यापि प्रमाणत्वेन ज्ञानात्, तर्कादिभिर्विशेषदर्शनं विना यथोक्त-संशयानन्तरं बहिरस्तीति ज्ञानमसिद्धम्, अतो न फलबलेन तथार्थापत्तिकल्पनम्।**

अर्थापत्तौ मतान्तरमाह - **अन्ये त्विति**। अन्ये **मीमांसकैकदेशिनः** इत्यर्थः। ते प्रकारान्तरेणार्थापत्तिं साधयन्ति। तथाहि शतवर्षजीवी देवदत्त इत्येको नियमः, पश्चात् प्रत्यक्षेण जीवी गृह एवेति द्वितीयो नियमः। ततो गृहे नास्तीति तृतीयं प्रत्यक्षमभावग्राहकं प्रमाणम्। आद्ययोः द्वयोरभावग्राहकप्रमाणप्रवृत्तेः पूर्वमविरोधे सति तृतीयाभावग्राहकप्रमाणप्रवृत्त्यनन्तरं विरोधि(ध)ज्ञानमस्ति आद्ययोः अत एवाभावज्ञानानन्तरमेव द्वयोः शतवर्षजीवित्वगृहसत्त्वयोविरोधि(ध)ज्ञानमुत्पद्यते। ततः किमित्यत आह - **तत्रेति**। तथा च जीवी गृह एवेति अत्र वस्तुगत्या द्वयोः प्रमाणत्वं नास्तीति यत एकमप्रमाणमेवेति अप्रमाणघटितमेवेत्यर्थः। तथा अप्रमाणघटितं यत् प्रमाणद्वयं तयोर्यद् विरोधज्ञानं तज्जनितो योऽप्रामाण्यसंशयः पूर्वोक्तद्वयविषयकः तदाहितो यो जीवनसंशयः तस्माज्जीवनसंशयापनोदाय प्रमाणयोर्द्वयोरविरोधापादकमेकस्याप्रामाण्ये विरोधस्तु गत एवेति कृत्वाऽविरोधापादकमप्रमाणविरोधि बहिःसत्त्वं कल्प्यते। ननु संशयस्योभयत्राविशेषात् यथा गृहसत्त्वविरोधि बहिःसत्त्वं कल्प्यते तथा जीवित्वविरोधि मरणमपि कुतो न कल्प्येतेत्यत आह - **यथोक्तेति**। तथा च यथोक्तसंशयस्यायमेव स्वभावो [148 B] यद् वस्तुगत्या अप्रमाणं तद्विरोध्येव कल्पयति। वस्तुगत्याऽप्रमाणं च गृहनियमग्राहकमेवोत्तरकाले बाधात्। ततः वस्तुगत्याऽप्रमाणं यन्नियमग्राहकं तद्विरोधि यद् बहिःसत्त्वं तदेव कल्प्यते। ननु तत्रापि संशयस्य यथोक्तस्वभावे किं नियामकमित्यत आह - **विरोधि(ध)घटकस्येति**। तथा च विरोधि(ध)घटकस्य वास्तवं यदप्रमाणत्वं तदेव संशयेन बहिःसत्त्वकल्पनायां विनिगमकम्। तथा च पूर्वमताद् एतस्मिन् मतेऽयमेव भेदः। तथाहि - **पूर्वमीमांसक**मते गृहाभावज्ञानं करणम्, संशयो व्यापारः, तर्कादिसहकारिवशात् बहिःसत्त्वज्ञानं फलम्। अत्र मते तु संशयोऽप्रमाणसंशयाहितो जीवनसंशय एकं(व) व(क)रणं करणस्य व्यापारवत्त्वानियमात्। बहिःसत्त्वज्ञानं फलम्। बहिःसत्त्वकल्पनायां च नियामकं तर्कादिकं न सहकारी किन्तु वस्तुगत्या गृहनियमग्राहकस्याऽप्रमाणत्वज्ञानं तदेव नियामकमित्यनयोर्भेदः। पूर्वमते तर्कः

सहकारी अत्र मते तर्कः सहकारी नेति भेदः । एतद् दूषयति - **तत् तुच्छमिति । अप्रमाणस्यापीति** । यत्र वस्तुगत्या जीवित्वग्राहकमप्रमाणं तत्र गृहनियमग्राहकं प्रमाणमेव । एवं च सति जीवित्वग्राहकं यदि वस्तु-गत्याऽप्रमाणं तस्य प्रमाणत्वेन ज्ञानात् ज्योतिःशास्त्रस्य प्रमाणत्वेन ज्ञानात्, वस्तुगत्या प्रमाणं गृहनियमग्राहकं तस्य अप्रमाणत्वेन ज्ञानात् या बहिःसत्त्वकल्पना जायते सा चार्थापत्त्या न स्यात् । कुतः ? यतः संशयस्यायमेव स्वभावो यद् वस्तुगत्याऽप्रमाणं तद् विरोध्येव कल्प्यते । प्रकृते च यदा जीवनग्राहकस्याप्रमाणत्वादप्रमाण-विरोधिमरणमेव कल्पनीयम् न तु प्रमाणविरोधिबहिःसत्त्वम् । कल्प्यते तन्न स्यात् च कल्प्यते । वस्तुगत्या च बहिःसत्त्वं नास्ति, कल्प्यते सा कल्पना स्यात् इति भावः । ननु बहिःसत्त्वकल्पनायां वस्तुगत्या अप्रमाणत्वं न नियामकं किन्तु पूर्वोक्ततर्कादिकं विशेषदर्शनमेव नियामकम् । तथा च लाघवाख्यतर्कसहकारिवशात् यत्रापि जीवनग्राहकंमप्रमाणं तत्रापि लाघवाख्यतर्कसहकारिवशात् बहिःसत्त्वमेव कल्प्यताम् इत्यत आह - **तर्कादीति** । तथा च संशये यदि तर्कः सहकारी तदा पूर्वमताभेदः । पूर्वमतं च दूषितमेव । एतदेवाह - **यथोक्तेति** । तथा च तर्कव्यतिरेकेण बहिःसत्त्वज्ञानं च नास्त्येव(वं) च तर्क(कः) संशयस्य सहकारी किमर्थं किन्तु सामान्यतोदृष्टानुमानस्यैव सहकारी भवतु । सामान्यतोदृष्टानुभानं तु अनयोरेकं बाध्यम् विरुद्धार्थग्राहकत्वात् इति रूपम् । तथा चानेनैव तर्कसहकारिवशात् बहिःसत्त्वज्ञानं भविष्यतीति बहिःसत्त्वज्ञानरूपफलानुरोधात् नार्थापत्तिः प्रमाणम्, एतदेवोपसंहरति - **अतो नेति** । फलबलेन बहिःसत्त्वज्ञानरूपफलानुरोधेनत्यर्थः ।

**किञ्च, मृते गृहस्थिते बहिःस्थिते तादृशसंशयादेव बहिःसत्त्वं गृहसत्त्वं मरणं च कल्प्येत कस्यचित् क्वचित् वस्तुगत्या अप्रमाणत्वात् अर्थापत्त्याभासश्चैवं न स्यात् । स्यादेतत् मा भूत् संशयः करणमर्थापत्तावनुपपत्तिस्तु स्यात्, तथाहि जीवी देवदत्तो गृहे नास्तीति ज्ञाने सति बहिःसत्त्वं विना जीवतो गृहासत्त्वमनुपपन्नमिति ज्ञानानन्तरं बहिरस्ति इति धीरस्ति, तत्रान्वयव्यतिरेकाभ्यामनुपपत्तिज्ञानं करणम् । न च देवदत्तो वहिरस्ति विद्यमानत्वे सति गृहासत्त्वात् घटवत् इत्यनुमानात् विद्यमानत्वे सति यत्र यन्नास्ति तदन्यदेशे तदस्ति यथा गृह एव कोणेऽसन्नहं मध्ये तिष्ठामीति व्याप्तिप्रभवानुमानाद्वा बहिःसत्त्वसिद्धेः किमर्थापत्त्येति वाच्यम् । हेतुसाध्ययोः सहचाराज्ञानदशायामनुप-पत्तिज्ञानेऽपि बहिःसत्त्वज्ञानात् सामान्यतो व्याप्तिश्चानुमाने उपसंहर्तुमशक्येति तदन्यदेशसिद्धिरर्थापत्त्यैव ।**

दूषणान्तरमाह - **किञ्चेति**। वस्तुगत्या देवदत्तो मृतोऽस्ति [149 A], अथवा वस्तुगत्या गृहस्थितोऽस्ति, अथवा वस्तुगत्या यत्र बहिःस्थितोऽस्ति तत्र। देवदत्ते मृते वस्तुगत्या मृते जीवनग्राहकं वस्तुगत्याऽप्रमाणं तद्विरोधि मरणमेव कल्पयेत्, यतः संशयस्यायं स्वभावो यद् वस्तुगत्याऽप्रमाणं तद्विरोध्येव कल्प्यते, अत्र च मृते जीवनग्राहकमप्रमाणमिति कृत्वा तद्विरोधि मरणमेव कल्पयेत् न बहिःसत्त्वमित्यर्थः। एवं च गृहस्थिते गृहे नास्तीत्यप्रमाणम्, ततश्च तद्विरोधि गृहे नास्तीति यदप्रमाणं तद्विरोधि गृहसत्त्वमेव कल्पयेत् न तु बहिःसत्त्वम्। अत्र च बहिःस्थिते गृहनियमग्राहकमप्रमाणं तद्विरोधिबहिःसत्त्वकल्पनापादने न किञ्चिदपि **प्राभाकरस्यानिष्टं** तथापि दृष्टान्तविधया इदं बोद्धव्यम्। यथा वस्तुगत्या बहिःस्थिते गृहनियमग्राहकस्याप्रमाणत्वात् गृहनियम-ग्राहकविरोधि बहिःसत्त्वं कल्प्यते एवं वस्तुगत्या मृते जीवनग्राहकं यदप्रमाणं तद्विरोधि मरणमेव कल्पयेत् न बहिःसत्त्वम्। एवं वस्तुगत्या गृहस्थिते गृहाभावग्राहकमप्रमाणम्, तत्र च गृहसत्त्वमेव कल्पयेत् न बहिःसत्त्वं कल्पयेदित्यर्थः। नन्वत्रेष्टापत्तिरित्येत[द्] आह - **अर्थापत्त्याभासश्चेति**। यदि वस्तुगत्या मृते मरणमेव गृहस्थिते च गृहसत्त्वमेव कल्प्यते तत्र मृते गृहस्थिते वा बहिःसत्त्वकल्पनां विनाऽर्थापत्त्याभासो न स्यात् तथा चाबहिःस्थिते एव बहिःसत्त्वकल्पनायामर्थापत्त्याभासः स च न स्यादित्यर्थः। **मीमांसकः** मतान्तरमाशङ्कते - **स्यादेतदिति**। तथा च पूर्वोक्तदूषणैः संशयः करणं मा भूत्, अनुपपत्तिस्तु बहिःसत्त्वज्ञानं प्रति करणं भवतु इत्यन्वयः। अनुपपत्तिमेव प्रकटयति - **तथाहीति**। तथा च बहिःसत्त्वज्ञानं विना जीविनो गृहासत्त्वमनुपपन्नमिति ज्ञानानन्तरं बहिःसत्त्वज्ञानं तु जायते। ततः किमित्यत आह - **तत्रेति**। यदनन्तरं यत् जायते तत्र तदन्वयव्यतिरेकाभ्यां तत्करणम्। बहिःसत्त्वेन विना जीविनो गृहासत्त्वमनुपपन्नमित्यनुपपत्तिज्ञानं करणम्, बहिःसत्त्वज्ञानं फलम्। अत्राशङ्कते - **न चेति**। देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वात् इत्यनुमानम्। व्याप्तिं दर्शयति - **विद्यमानत्वे** इति। उपसंहरति - **किमर्थापत्त्येति**। समाधत्ते - **हेतुसाध्ययोरिति**। तथा चानुमाने हेतुसाध्ययोः सहचारज्ञानमपेक्षितम्। अत्र च यत्र यत्र विद्यमानत्वे सति देवदत्तगृहासत्त्वं तत्र तत्र बहिःसत्त्वमित्ये-तादृशसहचाराज्ञानदशायामपि उक्तानुपपत्तिज्ञानात् बहिःसत्त्वज्ञानं जायते एवेति अनुपपत्तिज्ञानं करणम्। किञ्च, नात्र विशेषतो व्याप्तिः देवदत्तबहिःसत्त्वस्य पूर्वमज्ञातत्वात्। न च सामान्यतो व्याप्तिः उपसंहारे उपयुज्यते इत्याह - **सामान्यत** इति। तथा चेयं सामान्यव्याप्तिरेव यथा यत्र यदा यन्नास्ति तदा तदन्यदेशे तदस्तीति रूपा। एतस्याः कुत्रापि नोपयोग इति [149 B] व्यतिरेकिग्रन्थे स्थापितम्।

**ननु जीविनो गृहासत्त्वमनुपपन्नं किं देवदत्तबहिःसत्त्वं विना उत बहिःसत्त्वमात्रं विना ? नाद्यः प्रथमं देवदत्तबहिःसत्त्वाप्रतीतौ तेन विनेदमनुपपन्नमिति ज्ञानाभावात्,**

**प्रतीतौ वा किमर्थापत्त्या, अर्थापत्तित एव तत्प्रतीतावन्योन्याश्रयः, तदुक्तं यतोऽन्यत्वं तत्सिद्धेरग्रे तदसिद्धेरिति । नान्त्यः । अन्यदीयबहिःसत्त्वज्ञानं विनानुपपत्त्यभावात् बहिःसत्त्वमात्रसिद्धावपि देवदत्तबहिःसत्त्वासिद्धेश्चेति चेत् । न । सामान्येन हि विनानुपपत्तिज्ञानं कारणं सामान्याकारेण विशेषज्ञानं फलम्, तथाहि जीविनो बहिःसत्त्वं विना गृहासत्त्वमनुपपन्नमिति ज्ञानं यस्य गृहासत्त्वमनुपपन्नं तत्र बहिःसत्त्वं कल्पयति नान्यत्र देवदत्तश्च तथेति सिद्धे देवदत्ते बहिःसत्त्वं कल्प्यत इति देवदत्तबहिःसत्त्वं पर्यवस्यति, न तु तेन रूपेण कल्पना न वा तेन विनानुपपत्तिज्ञानं कारणम्, यथा वह्निमात्रव्याप्तात् धूमात् पर्वते वह्निसिद्धिरेव पर्वतीयवह्निसिद्धिर्न तु पर्वतीयत्वेनैव धूमात् तत्सिद्धिः तेन रूपेण व्यापकत्वाग्रहात् ।**

शङ्कते - **नन्विति**। अनुपपत्तिं विकल्प्य दूषयति - **किमिति**। किं गृहासत्त्वमनुपपन्नं देवदत्तबहिःसत्त्वं विना उत बहिःसत्त्वमात्रं विना। **प्रथममिति**। अनुपपत्तिज्ञानात् पूर्वं देवदत्तबहिःसत्त्वज्ञानं नास्ति, यदि च तद्ज्ञानं वर्तते तदाऽर्थापत्तिर्निरर्थिकेत्यर्थः। न चानुपपत्तेरेव बहिःसत्त्वज्ञाने जाते सति पश्चात् बहिःसत्त्वं विना गृहासत्त्वमनुपपन्नमिति ज्ञानमनुपपत्तिज्ञानम्, तस्माच्च बहिःसत्त्वज्ञानमित्याशङ्क्य निराकरोति - **अर्थापत्तित एवेति**। तथा चान्योन्याश्रयः, यथा बहिःसत्त्वज्ञानादनुपपत्तिज्ञानम् अनुपपत्तिज्ञानाच्च बहिःसत्त्वज्ञानमिति। अत्रैव खण्डनसम्मतिमाह - **यतः** इति। यतो बहिःसत्त्वं विना देवदत्तबहिःसत्त्वं विना इत्यर्थः। अन्यत्वं नाम अनुपपत्तिः। एतावता यतोऽन्यत्वमित्यस्यार्थो व्याख्यातः। **तत्सिद्धेरिति**। तत्सिद्धेः बहिःसत्त्वसिद्धेरित्यर्थः। अग्रे प्रथमत इत्यर्थः। तदसिद्धेः जीविनो गृहासत्त्वमनुपपन्नमित्यनुपपत्तेरसिद्धेरित्यर्थः। अयं स्पष्टोऽर्थो यथा यतोऽन्यत्वमित्यनेन बहिःसत्त्वज्ञानं विना देवदत्तगृहासत्त्वमनुपपन्नमिति अनुपपत्तिर्न सम्भवति। तथा च बहिःसत्त्वज्ञानं चेत् पूर्वं भवति तदैव बहिःसत्त्वं विना जीविनो गृहासत्त्वमनुपपन्नमिति वक्तुं शक्यते इति यतो स्वत्वस्ये(सत्त्वस्यै)तस्यार्थो जातः। एतादृशानुपपत्तेः पूर्वं तु बहिःसत्त्वज्ञानमेवासिद्धमिति कारणात् तदप्यनुपपत्त्यैव वक्तव्यमिति तत्सिद्धेरित्यस्यार्थः। तथा चानुपपत्त्या बहिःसत्त्वज्ञानं बहिःसत्त्वज्ञानाच्चानुपपत्तिज्ञानमित्यन्योन्याश्रय एवेत्यर्थः। अथ द्वितीयं पक्षं दूषयति - **अन्यदीयेति**। तथा च अन्यस्य बहिःसत्त्वं विना देवदत्तगृहासत्त्वमनुपपन्नमिति वक्तुं न शक्यते, यतोऽन्यस्य बहिःसत्त्वं विनाऽपि देवदत्तस्य गृहासत्त्वमनुपपन्नमिति नास्त्येव। तथा च बहिःसत्त्वसिद्धावपि देवदत्तबहिःसत्त्वज्ञानं त्वनुमानादेव भविष्यतीति। नन्वित्यारभ्य **नैयायिक**शङ्का अनुपपत्तिकरणतावादिनं

प्रति। **मीमांसकः** समाधत्ते - **सामान्येन हीति**। तथा च सामान्यतो बहिःसत्त्वं विना जीविनो गृहासत्त्वमनुमे(मै)वेति सामान्यतोऽनुपपत्तिज्ञानं करणम्, तस्माच्च जीविनो देवदत्तस्य गृहासत्त्वानुपपत्त्या देवदत्तबहिःसत्त्वज्ञानं फलम्, तथा च सामान्यतोऽनुपपत्त्या यत्र गृहासत्त्वं तत्र बहिःसत्त्वं पर्यवसन्नम्। तथाहीत्यारभ्य पर्यवस्यतीति प्रघट्टकार्थः। निष्कर्षस्तु उक्तसामान्यतोऽनुपपत्तिज्ञानात् विशेषसिद्धिर्देवदत्तबहिःसत्त्वसिद्धिः फलमिति भावः। अत्रैव दृष्टान्तमाह - **यथेति**। वह्निमात्रव्याप्तात् धूमात् पर्वतीयवह्निसिद्धिः। न तु पर्वतीयवह्नित्वेन रूपेण पर्वतीयधूमत्वेन च रूपेण व्याप्तिज्ञानम्। व्याप्तिज्ञानं तु सामान्यतो धूमत्ववह्नित्वरूपेणैव।

**अथोपपादकाभाववत्युपपाद्याभावनियमोऽनुपपत्तिर्न त्वभावमात्रमतिप्रसङ्गात्, एवं च व्यतिरेकव्याप्तिमत उपपाद्यात् व्यतिरेक्यनुमानमुद्रयैव साध्यसिद्धेः किमर्थापत्त्या, तथाहि देवदत्तो बहिः सन् जीवित्वे सति गृहासत्त्वात् यन्नैवं तन्नैवं यथा मृतो गृहस्थितो वा। न चान्यव्याप्त्या अन्यस्य गमकत्वे अतिप्रसङ्गः साध्याभावव्यापकाभावप्रतियोगित्वस्य नियामकत्वात्। न चार्थापत्तौ स्वरूपसती व्याप्तिर्लिङ्गं नानुमान इति वाच्यम्। अनुपपत्तेर्ज्ञानं विना कल्पनानुदयात् अर्थापत्त्याभासानवकाशाच्च। मैवम्। तत्र हि व्यतिरेकव्याप्तिरन्वयस्य पक्षधर्मत्वमिति व्याप्तिधीजन्यमपि बहिःसत्त्वज्ञानं नानुमितिः तस्या व्याप्तपक्षधर्मताज्ञानजन्यतानियमात्।**

**नैयायिकः** शङ्कते - **अथेति**। तथा चोपपादकाभाववति उपपाद्याभावनियमोऽनुपपत्तिः। उपपादकं तत् येन कृत्वा यदुपपद्यते, [150 A] यथाऽनुपपन्नं गृहासत्त्वं बहिःसत्त्वेनोपपद्यते अतो बहिःसत्त्वमुपपादकम्। इयमेवानुपपत्तिर्न त्वभावमात्रम्। उपपादकाभावे उपपाद्याभावनियम एवानुपपत्तिरिति, न तु यस्य कस्यचिद् व्यतिरेके यस्य कस्यचिद् व्यतिरेक इति अतिप्रसङ्गादिति। देवदत्तबहिःसत्त्वव्यतिरेकेण चैत्रगृहासत्त्वमप्यनुपपन्नं स्यादित्यतिप्रसङ्ग इत्यर्थः। ततः किमित्यत आह - **एवं चेति**। तथा च इयमेव व्यतिरेकव्याप्तिः यथा उपपादकं व्यापकम् उपपाद्यं व्याप्यम्, तथा च व्यापकाभावे व्याप्याभाव एव व्यतिरेकव्याप्तिः। तथा च व्यतिरेकव्याप्तिमुद्रयैव उपपाद्यात् गृहासत्त्वात् उपपादकस्य बहिःसत्त्वस्य सिद्धिर्भविष्यति, किमर्थापत्त्या इत्याशङ्कार्थः। व्यतिरेक्यनुमानं दर्शयति - **तथाहीति**। अनुमाने **मीमांसकः** शङ्कते - अभावे व्याप्तिः यथा यत्र यत्र बहिःसत्त्वं नास्ति तत्र तत्र जीवित्वे सति गृहासत्त्वमपि नास्ति यथा मृते गृहस्थिते वा। इयं व्याप्तिरभावे पक्षधर्मता तु गृहासत्त्वस्य, तेन यत्र व्याप्तिस्तत्र पक्षधर्मता इति नास्ति। तथा चान्यत्र यदि व्याप्तिरन्यत्र पक्षधर्मता चेत् गमिका तदा अतिप्रसङ्गो यथा

वह्निधूमव्याप्तिज्ञानात् व्याप्तिर्वर्तते धूमो(मे) पक्षधर्मता च घटेऽपि तिष्ठति तथा च धूमो वह्निव्याप्यो घटवांश्च पर्वत इति ज्ञानादप्यनुमितिः स्यादित्यर्थः। समाधत्ते **नैयायिकः - साध्याभावे**ति। व्यतिरेकिणि व्याप्तिविशिष्टस्य पक्षधर्मता न नियामिका किन्तु साध्याभावव्यापकाभावप्रतियोगित्वमेव नियामकं यथा यत्र यत्र इतरभेदाभावः तत्र पृथिवीत्वाभाव इति। तथा च इतरभेदाभावव्यापकाभावप्रतियोगि पृथिवीत्वमिति ज्ञानात् यथाऽनुमिति-स्तथाऽत्रापि। अत्र **प्राभाकरः** शङ्कते - **न चे**ति। तथा चानुमाने व्याप्तिज्ञा(र्ज्ञा)नम् अर्थापत्तौ तु स्वरूपसती। अनुमानादर्थापत्तेरयं विशेषः। अनुमाने व्याप्तिर्ज्ञातैव हेतुः अर्थापत्तौ तु स्वरूपसती अज्ञातैवोपयुज्यते इति। तथा चाज्ञातव्याप्तिबलात् यत्र साध्यज्ञानं सा अर्थापत्तिः। **नैयायिकः** समाधत्ते - **अनुपपत्ते**रिति। यस्य मते अर्थापत्तिः प्रमाणं तन्मतेऽपि अनुपपत्तेर्ज्ञानं विना कल्पना नास्ति। तथा चानुपपत्तिर्व्यतिरेकव्याप्तिरेव, ततो व्यतिरेक-व्याप्तिज्ञानद्वाराऽनुमितिरेव बहिःसत्त्वविषयिणीति। विपक्षे बाधकमाह - **अर्थापत्त्याभासे**ति। यदि अनुपपत्तिज्ञानं कारणं नास्ति तदाऽर्थापत्त्याभासोऽपि न स्यात्, यतोऽनुपपत्तिभ्रमादेवार्थापत्तिभ्रमः यथा धूमभ्रमात् वह्निभ्रमः, यदि चानुपपत्तिज्ञानं नास्ति तदा अर्थापत्तिभ्रमो न स्यात्। तस्मादनुपपत्तिर्ज्ञातैवोपयुज्यते, अनुपपत्तिज्ञानं च व्यतिरेकव्याप्ति[ज्ञानम्], तदा अनुमानमेव प्रमाणम्। **मीमांसकः** समाधत्ते [150 B] - **मैवमि**ति। **तत्र ही**ति। व्यतिरेक्यनुमाने व्यतिरेके(कः)व्याप्तिः अन्वयिहेतोः पक्षधर्मत्वम्, [तत्र] पक्षधर्मे व्याप्तिर्नास्ति इति कृत्वा व्यतिरेकी(कि) प्रमाणं न भवति। तथा च व्यतिरेकव्याप्तिजन्यमपि बहिःसत्त्वज्ञानं नानुमितिः किन्तु अर्थापत्तिरेव। **तस्या** इति अनुमितेः इत्यर्थः। व्याप्तिविशिष्टे या पक्षधर्मता तस्या यद् ज्ञानं तज्जन्यत्वात्। इयं तु न व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्या। व्याप्तिव्यतिरेके तत्र पक्षधर्मतात्वा(र्मत्वा)भावात्।

**न च साध्याभावव्यापकाभावप्रतियोगित्वेन पक्षधर्मस्य ज्ञानमनुमितिप्रयोजकं तच्चेहाप्यस्तीति वाच्यम्। केवलान्वयिनि तदसम्भवात् तदपेक्षया साध्यव्याप्यत्वज्ञानस्य लघुत्वाच्च। अथ व्यतिरेकसहचारात् हेतोरेव व्याप्तिर्गृह्यते एवं चान्वयस्य व्यतिरेकस्य उभयस्य वा सहचारात् व्याप्तिग्रहत्रैविध्येऽनुमानत्रैविध्यम्, अत एव धूमो दशाविशेषेऽन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति चेत्, अस्तु तावदेवं तथापि जीविदेवदत्ताभावो गृहे वर्तमानो न बहिःसत्त्वे लिङ्गं देवदत्तावृत्तित्वात् बहिःसत्त्वगृहनिष्ठाभावयोर्व्यधि-करणत्वेन नियतसामानाधिकरण्यरूपव्याप्त्यभावाच्च, उपरि सविता भूमेरालोकवत्त्वात् इति अत्र भूमेरुपरिसन्निहितसवितृकत्वेनानुमानात्।**

**नैयायिकः** शङ्कते - **साध्याभावेति**। साध्याभावस्य व्यापको योऽभावो हेत्वभावस्तस्य प्रतियोगित्वेन पक्षधर्मस्य ज्ञानमनुमितिप्रयोजकम्। तच्च प्रकृतेऽप्यस्तीति। तथा च साध्याभावव्यापकाभावप्रतियोगित्वेन यत् पक्षधर्मताज्ञानं तदेवानुमितिप्रयोजकं तच्च बहिःसत्त्वज्ञानेऽप्यस्तीति कृत्वा बहिःसत्त्वज्ञानमप्यनुमितिरूपमेव। दूषयति - **केवलान्वयिनीति**। प्रमेयत्वादौ साध्याभाव एवाप्रसिद्धः इति कृत्वा तदनुमितिप्रयोजकं न भवति किन्तु व्याप्तिविशिष्टे(ष्ट)पक्षधर्मताज्ञानमेवेत्यर्थः। ननु केवलान्वयिनि अन्यैव सामग्री भविष्यतीत्यत आह - **तदपेक्षयेति**। तथा च साध्याभावव्यापकाभावप्रतियोगित्वज्ञानापेक्षया साध्यव्याप्यत्वे(त्व)ज्ञानस्य लघुत्वात् साध्यव्याप्यत्वज्ञानमेवानुमितौ कारणमस्तु इत्यर्थः। अत्र शङ्कते - **अथेति**। तथा च पृथिवी इतरभेदवती पृथिवीत्वात् इत्यत्र यत्र इतरभेदाभावस्तत्र पृथिवीत्वाभाव इति व्यतिरेकसहचारात् पृथिवीत्वमितरभेदव्याप्यमिति व्यतिरेकसहाचारादन्वयव्याप्तिज्ञानं जायते। तथा च भवतु त्वदुक्तरीत्या साध्यव्याप्यत्वज्ञानमेव कारणं तच्च व्यतिरेकिणि वर्तते एवेति व्यतिरेकी(कि) प्रमाणं भविष्यतीति। ननु व्यतिरेकिणि चेत् अन्वयव्याप्तिरेव गृह्यते तदा अनुमानत्रैविध्यमेव न स्यात्, यतो व्यतिरेकिण्यपि अन्वयव्याप्तिरस्ति तेनान्वय्येवायं स्यादित्यत आह - **एवं चेति**। तथा चान्वयसहचारात् यत्रान्वयव्याप्तिज्ञानं सोऽन्वयी, यत्र च व्यतिरेकसहचारात् यत्रान्वयव्याप्तिज्ञानं स व्यतिरेकी यथा यत्र यत्र इतरभेदाभावस्तत्र पृथिवीत्वाभाव इत्येतस्माद् व्यतिरेकसहचारात् पृथिवीत्वमितरभेदव्याप्यमित्यन्वयव्याप्तिबुद्धिर्भवति स व्यतिरेकी, यत्र वाऽन्वयव्यतिरेकसहचाराभ्यामुभाभ्याम् अन्वयव्याप्तिग्रहः सोऽन्वयव्यतिरेकीति त्रैविध्ये नानुपपत्तिरित्यर्थः। ननु यदा धूमेऽन्वयव्याप्तिज्ञानदशायां केवलान्वयित्वं व्यतिरेकसहचारज्ञानदशायां केवलव्यतिरेकित्वं स्यात् तथा चान्वयव्यतिरेकी न स्यादित्यत आह - **अत एवेति**। तथा च यदा [151 A] धूमेऽन्वयमात्रसहचार उपस्थितस्तदा धूमोऽन्वयी, यदा च व्यतिरेकसहचारमात्रमुपस्थितं तदा व्यतिरेकी, यदा चोभयसहचारोपस्थितिस्तदाऽन्वयव्यतिरेकीतीष्टापत्तिरित्यर्थः। **मीमांसकः** समाधत्ते - **अस्त्विति**। तथा च जीविदेवदत्ताभावो बहिःसत्त्वं नानुमापयति। यथा देवदत्तो बहिरस्ति यतो जीविनो देवदत्तस्य गृहेऽभाव इत्यनुमाने हेतुसाध्ययोर्वैयधिकरण्यं देवदत्ताभावो गृहे बहिःसत्त्वं तु देवदत्ते इति। तथा च हेतोर्देवदत्तरूपपक्षावृत्तित्वान्न बहिःसत्त्वं साधयति। एतदेव विवृणोति - **बहिःसत्त्वे** इति। तथा च हेतुसाध्ययोर्व्यधिकरणत्वे किं दूषणमित्यत आह - **नियतेति**। हेतुसाध्ययोर्नियतसामानाधिकरण्यरूपा व्याप्तिर्नास्तीति तदभावेऽनुमितिः कथं स्यादित्यर्थः। ननु उपरि सविता [भूमे]रालोकवत्त्वात् इत्यादौ हेतुसाध्ययोर्व्यधिकरणत्वेऽप्यनुमितिर्दृष्टा। **उपरीति**। तथा चालोकवत्त्वं हेतुर्भूमौ वर्तते सवितृरूपं साध्यं भूमेरूर्ध्वम्, कथं सामानाधिकरण्यमित्यत आह - **उपरीति**। तथा चात्र उपरि न सवितृत्वं साध्यं किन्तु सन्निहितसवितृकत्वं साध्यम्। तथा च भूमेरालोकवत्त्वस्य सन्निहितसवितृकत्वस्य च सामानाधिकरण्यं वर्तते एवेत्यर्थः। तथा च

गृहनिष्ठात्यन्ताभावस्य अथ च बहिःसत्त्वस्य च व्यधिकरणत्वात् कथमनुमितिः स्यादित्यर्थः।

**नापि गृहनिष्ठाभावप्रतियोगित्वम्, तत्प्रतियोगित्वस्य देवदत्तधर्मतया तदसन्निकर्षे प्रत्यक्षेण ज्ञातुमशक्यत्वात्। अत एव विशेष्यासन्निकर्षात् तृतीयलिङ्गपरामर्शोऽपि न प्रत्यक्षेण। न च व्यतिरेकव्याप्ति-गृहनिष्ठाभावयोर्ज्ञानं सहकार्यासाद्य मनसैव जन्यत इति वाच्यम्। सहाकारिण एव मानान्तरत्वप्रसङ्गात्। अथ व्याप्तिज्ञानानन्तरं स्मर्यमाण-धूमात् कथमनुमितिः उक्तन्यायेन तत्रापि लङ्गपरामर्शाभावादिति चेत्, न कथञ्चित्, कथं तर्हि वह्निज्ञानं पक्षधर्मधूमस्मृतिसहितात् धूमो वह्निं विना नास्तीत्यनुपपत्तिज्ञानादिति गृहाण, अत एव दृश्यमानो धूमो वह्निं विनानुपपन्न इति यदा ज्ञायते तदार्थापत्तिरेवं यदा त्वनुपपत्तिज्ञानं विना व्याप्यत्वेन प्रतिसन्धीयते तदानुमानं त्वयापि तत्र त्रिविधानुमानस्वी-कारात्। तस्माद् व्यतिरेकव्याप्तिमुपजीव्य जीविदेवदत्ताभावो बहिःसत्त्वं कल्पयति।**

अत्राशङ्कते - **नापीति**। समाधानम् - **स(त)त्प्रतियोगित्वेत्यादिना**। तथा च गृहनिष्ठात्यन्ताभाव-प्रतियोगित्वमपि हेतुर्न। कुत इत्यत आह - **तत्प्रतियोगित्वेति**। तथा च गृहनिष्ठात्यन्ताभावप्रतियोगित्वं देवदत्तनिष्ठो धर्मः। देवदत्तस्य तु बहिर्विद्यमानत्वेन तदसन्निकर्षात् पक्षे हेतोर्ज्ञानं न सम्भवति, कथमनुमानमिति भावः। न केवलं हेतुज्ञानं न सम्भवति किन्तु तृतीयलिङ्गपरामर्शोऽपि दुर्ग्रह इत्याह - **अत एवेति**। यत एव देवदत्तवृत्तिप्रतियोगित्वं देवदत्तरूपविशेष्यासन्निकर्षे दुर्ग्रहः(हम्) अत एव। देवदत्तरूपविशेष्यासन्निकर्षे तृतीयलिङ्गपरामर्शं चोपपादयति **न चेत्यनेन नैयायिकः**। यथा यत्र यत्र बहिःसत्त्वाभावस्तत्र तत्र जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वाभावो यथा मृते गृहस्थिते वेति व्यतिरेकव्याप्तिः। तत एनां व्याप्तिस्मृतिं सहकारिणीमासाद्य स्मृत्युपनीते देवदत्ते स्मृत्युपनीतपर्वतवत् मनसैव तृतीयलिङ्गपरामर्शो भविष्यतीत्याशङ्कार्थः। समाधत्ते **मीमांसकः - सहकारिणेति**। तथा च देवदत्तस्मरणस्य व्याप्तिस्मरणस्य च प्रमाणान्तरत्वप्रसङ्गः स्यात् यदसाधारणेत्यादिनेत्यर्थः। **नैयायिकः** शङ्कते - **अथेति**। यदि च मनसः सहकारिणः प्रमाणान्तरत्वप्रसङ्गभयेन [151 B] स्मृत्युपनीते परामर्शो मानसो न भवेत् ततः स्मर्यमाणधूमात् कथमनुमितिः स्यात्। यथा स पर्वतो वह्निव्याप्यधूमवान् इति रूपात् परामर्शात् - वस्तुगत्या महानसे व्याप्तिर्गृहीता सा स्मृता पर्वतेऽपि धूमः स्मृतः ततः पर्वतः स वह्निव्याप्यधूमवान् इति रूपात् - अनुमितिर्भवत्येवेत्यर्थः, सा च न स्यात्। कुत इत्यत आह - **उक्तन्यायेति**। व्याप्तिस्मरणस्य प्रमाणान्तरत्वप्रसङ्गभयेन परामर्शो न स्यात् तदभावान्नानुमितिरिति भावः।

**प्राभाकरः** समाधत्ते - **न कथञ्चिदिति**। स्मृत्युपनीते पर्वतस्थलेऽनुमानात् वह्निज्ञानं न जायत एवेत्यर्थः। तत्र कथं वह्निज्ञानमित्याह - **कथं तर्हीति** आशङ्का। समाधानं यथाह - **पक्षधर्मेति**। तथा च पक्षे धर्मो यो धूमः स वह्निं विनाऽनुपपन्न इत्यनुपपत्तिज्ञानादेव स्मर्यमाणधूमस्थलेऽनुमितिः। तथा च तत्रानुपपत्तिरेवार्थापत्तिरेव प्रमाणम्, तथा च पूर्वं धूमस्मरणं तदनन्तरमनुपपत्तिज्ञानं तदेव व्यापाररूपमेव प्रमाणमित्यर्थः। एवं च सन्निकृष्टधूमस्थलेऽपि पर्वतो वह्निमान् इत्यादौ सन्निकृष्टो धूमो वह्निं विनाऽनुपपन्न इति यत्र ज्ञानं तत्राप्यनुपपत्तिरेव प्रमाणं नानुमानं व्याप्तिस्मरणाभावेऽप्यनुपपत्तिमात्रादेव वह्निज्ञानस्य जायमानत्वात्। ननु तर्हि कुत्रानुमानं प्रमाणं भविष्यतीत्यत आह - **यदा त्विति**। यदा धूमादिकं लिङ्गमनुपपत्तिज्ञानं विना व्याप्यत्वेन प्रतिसन्धीयते तदाऽनुमानं प्रमाणम्। यथा [1]तव मते एकस्यैव धूमस्यान्वयव्याप्त्यप्रतिसन्धानदशायां केवलव्यतिरेकित्वं तद्वत् प्रकृतेऽपि व्याप्त्यप्रतिसन्धानदशायामर्थापत्तिः प्रमाणमिति **प्राभाकरमतसंक्षेपः**। **प्राभाकरः** उपसंहरति - **तस्मादिति**। तथा च व्यतिरेकव्याप्तिरेवानुपपत्तिस्तामुपजीव्य तत्सहकारात् देवदत्ताभावो ज्ञायमानो बहिःसत्त्वं कल्पयति। तथा च देवदत्ताभावः करणम्, अनुपपत्तिः व्यापारः, बहिःसत्त्वज्ञानं फलमिति निष्कर्षः।

**उच्यते। देवदत्तासन्निकर्षेऽपि तस्य गृहनिष्ठाभावप्रतियोगित्वं प्रत्यक्षेण गृह्यते तथाहि गृहे देवदत्तस्याभाव इति प्रत्यक्षं देवदत्तं षष्ठ्यर्थं चाभावसम्बन्धं प्रतियोगित्वलक्षणं गोचरयति सम्बन्धज्ञानस्य सम्बन्धिद्वयविषयत्वात्, प्रतियोगिना सममभावस्य सम्बन्धान्तराभावात् गृहनिष्ठाभावप्रतियोगित्वे च प्रत्यक्षोपस्थिते स्मृतव्याप्तिवैशिष्ट्यमपि प्रत्यक्षेण सुग्रहम्। न च देवदत्तविशेष्यकं बहिःसत्त्वव्याप्यगृहनिष्ठाभावप्रतियोगित्वज्ञानं नास्तीति वाच्यम्। पक्षवृत्तिलिङ्गपरामर्शमात्रस्यानुमितिजनकत्वात् अधिकस्य गौरवपराहतत्वात्। अथवा अनतिप्रसक्तसहकारिवशात् मनसैव स्मृतदेवदत्तविशेष्यकस्तृतीयलिङ्गपरामर्शः यथा च न सहकारि मानान्तरं यथोपपादितमधस्तात्। ननु मयूरः पर्वतेतरे न नृत्यति नृत्यति चेति ज्ञानानन्तरं पर्वते नृत्यतीति ज्ञानमस्ति, न च व्यतिरेकिणस्तत् सम्भवति, पर्वतनृत्यस्य साध्यस्याप्रतीतौ व्यतिरेकव्याप्त्यनिरूपणात्।**

**नैयायिकः** सिद्धान्तयति - **उच्यते** इति। देवदत्तो बहिरस्ति जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वात् इत्यनुमाने परामर्शं समर्थयति - **देवदत्तेति**। तथा च देवदत्तेन यद्यपीन्द्रियसन्निकर्षो नास्ति तथापि

---

१. नैयायिकमते।

गृहनिष्ठात्यन्ताभावप्रतियोगित्वस्य ज्ञानं सम्भवत्येव। एतदेवाह - **तथाही**ति। देवदत्तेति। गृहे देवदत्तस्याभाव इति अभावप्रत्यक्षं यदा जायते तदाऽभावेऽनुयोगित्वं देव[दत्ते] प्रतियोगित्वं प्रत्यक्षेण भासते, तथा चाभावप्रत्यक्षे प्रतियोग्यनुयोगिभावसम्बन्धोऽपि भासते, ततः स सम्बन्धः सम्बन्धिप्रत्यक्षं विना न भासते, तथा च देवदत्तस्याभाव इत्यत्र [152 A] षष्ठ्यर्थः प्रतियोगित्वं प्रथमार्थोऽनुयोगित्वम्, तथा च प्रतियोगित्वानुयोगित्वलक्षणसम्बन्धज्ञानं सम्बन्धिद्वयविषयकम्, सम्बन्धिनौ च देवदत्तोऽभावश्चेति, तेन सम्बन्धे भासमानेऽवश्यं सम्बन्धी भासते, ततो देवदत्तोऽप्यवश्यं प्रत्यक्षेणैव भासते। समाधानान्तरमाह - **प्रतियोगिने**ति। प्रतियोगी देवदत्तः, तेन सह अभावस्य अन्यत् सम्बन्धान्तरं नास्ति, प्रतियोगित्वमेव सम्बन्धः, तच्च देवदत्तस्य स्वरूपमेव। तथा च प्रतियोगित्वप्रत्यक्षेऽवश्यं देवदत्तप्रत्यक्षं भवत्येव। तथा च देवदत्तेन सह यद्यपि सन्निकर्षो नास्ति तथापि देवदत्तप्रत्यक्षं स्मृत्युपनीत-देवदत्तस्मरणवशात् ज़ायते। एव(वं) च देवदत्तप्रत्यक्षमानीतम्, तत्र चोपनय एव सन्निकर्ष इत्युक्तम्। अथ परामर्शमानयति - **गृहनिष्ठेति**। तथा च देवदत्ते इन्द्रियासन्निकर्षेऽपि पूर्वोक्तरीत्या गृहनिष्ठात्यन्ताभावप्रतियोगित्वे प्रत्यक्षेणोपस्थिते स्मृतव्याप्तेर्वैशिष्ट्यमपि हेतौ गृहीतुं शक्यत एव यथा धूमो वह्निव्याप्यः तद्वत् गृहनिष्ठात्यन्ताभावप्रतियोगित्वं बहिःसत्त्वव्याप्यमिति परामर्शरूपं ज्ञानं देवदत्तेन सह इन्द्रिय(या)सन्निकर्षेऽपि भवत्येव। अत्राशङ्कते - **न चे**ति। उपनीतस्य स्मृत्युपनीतस्य देवदत्तस्य विशेषणत्वेन भानात्। यथा स्मृत्युपनीतं सर्वत्र विशेषणत्वेनैव भासते परं न विशेष्यत्वेनेति नियमः। यथा चक्षुषा सुरभि चन्दनमिति ज्ञाने सौरभं विशेषणत्वेन भासते न तु विशेष्यत्वेन; घ्राणेन्द्रियेण जन्ये लौकिकबोधे सौरभं विशेष्यत्वेन भासते यथा चन्दने सौरभमिति यतः चन्दनं तत्र स्मृत्युपनीतं घ्राणेन्द्रियेण न गृह्यते इति कृत्वा चन्दनं विशेषणत्वेनैव भासते। घ्राणेन्द्रियजन्ये बोधे तु सौरभं विशेष्यत्वेनैव भासते तद्योग्यत्वात्। एवं देवदत्ताभावज्ञानकाले देवदत्तस्य स्मृत्युपनीतस्य विशेषणत्वेन भानात् यथा गृहे देवदत्तस्याभावो बहिःसत्त्वव्याप्यः इत्येव परामर्शो भविष्यति परंतु बहिःसत्त्वव्याप्यगृहनिष्ठात्यन्ताभावप्रतियोगित्ववान् देवदत्त इति देवदत्तविशेष्यकप्रत्यक्षं न सम्भवतीत्याशङ्कार्थः। समाधत्ते - **पक्षवृत्ती**ति। न हि पक्षविशेष्यकपरामर्शेऽनुमितिकारणमस्माभिरुच्यते किन्तु पक्षे व्याप्यवैशिष्ट्यावगाहिज्ञानत्वेन परामर्शस्य कारणत्वम् तत्तु देवदत्तस्य विशेषणत्वेन भानेऽपि सम्भवत्येवेत्यर्थः। ननु अन्वय-व्यतिरेकाभ्यां पक्षविशेष्यक एव परामर्शः कारणमित्यत आह - **अधिकस्ये**ति। लाघवात् विशेषणविशेष्य-साधारणपक्षविषयकव्याप्यवैशिष्ट्यावगाहिज्ञानत्वेनैव कारणत्वं न तु पक्षविशेष्यव्याप्यवैशिष्ट्यावगाहिज्ञानत्वेन कारणता। तत्र हेतुर्गौरवेति। भवतु वा पक्षविशेष्यकः परामर्शः कारणं तथापि नानुपपत्तिरिति आह - **अथवे**ति। अयमाशयः - बाह्येन्द्रियजन्ये बोधे उपनीतं विशेषणत्वेनैव भासते इति नियमः। मानसे बोधे तु उपनीतं विशेषणत्वेन [152 B] भासते विशेष्यत्वेनापि भासते। तथा चानतिप्रसक्तं यत् सहकारि व्याप्तिस्मरणं तत्

सहकारिवशात् मनसैव स्मृतदेवदत्तविशेष्यकोऽपि तृतीयलिङ्गपरामर्शो भवतीति नानुपपत्तिः। मनसा व्याप्तिस्मरणसहकारिवशात् देवदत्तो बहिःसत्त्वव्याप्यगृहनिष्ठात्यन्ताभावप्रतियोगित्ववान् अयमिति मानसो देवदत्तविशेष्यकः परामर्शो भविष्यत्येव। यथा घटमहं जानामीत्यत्र घटज्ञानवान् अहमिति ज्ञानविषयो घटश्चेति मानसे बोधे घटस्य विशेषणत्वं विशेष्यत्वमपि तद्वत् देवदत्ते स्मृत्युपनीयवशात् देवदत्तविशेष्यकोऽपि मानसः परामर्शो भविष्यत्येव। एतावता देवदत्तविशेष्यकोऽपि तृतीयलिङ्गपरामर्शः समर्थितः। ननु तर्हि स्मृतिरूपोपनयस्य प्रमाणान्तरत्वं स्यादित्यत आह - **यथेति**। यथा उपनयस्य प्रमाणान्तरत्वं न सम्भवति तथोपपादितम् अधस्तात् पूर्वं परामर्शग्रन्थे उपपादितम्। तथाहि उपनयस्य प्रमाणान्तरत्वभयेन यदि उपनयो मनसः सहकारी न भवेत् तथा(दा) बाह्यपदार्थानां घटादीनां मानसे बोधे अनुव्यवसाये भानं न स्यात् तेषामपि प्रमाणान्तरत्वं स्यात्, तथा च बाह्येन्द्रियजन्यबोधे एव मनसः सहकारिणः प्रमाणान्तरत्वं न तु मानसे बोधे। अन्यथा भवन्मतेऽपि घटादीनामनुव्यवसाये भानं न स्यात् तेषामपि मनसः सहकारित्वात् इत्यत्र विस्तर इति। **प्राभाकरैकदेशिना**-मर्थापत्तिसाधकान्तरमवतारयति - **नन्विति**। तथा च एतादृशज्ञानानन्तरं पर्वतनृत्यज्ञानजनकं यत् प्रमाणं सैवार्थापत्तिः। अत्राशङ्क्य निराकरोति - **न चेति**। इदं ज्ञानं व्यतिरेकिणैव भविष्यति इत्याशङ्कां निराकरोति - **पर्वतेति**। यथानुमानम् मयूरः पर्वते नृत्यति पर्वतेतरस्मिन्ननृत्यत्वे सति नृत्यसम्बन्धित्वात् इत्यत्रानुमाने व्यतिरेकिणि पर्वतमयूरनृत्यरूपसाध्यस्याप्रसिद्धौ व्यतिरेक्यनुमानानवकाशात्। एतदेवाह - **व्यतिरेकव्याप्त्येति**। अनिरूपणादज्ञानादित्यर्थः।

**न च पर्वतनृत्याप्रसिद्धौ तेन विनानुपपत्तिप्रतिसन्धानमपि नेति कथमर्थापत्तिरपीति वाच्यम्। अधिकरणं विनानुपपद्यमानं नृत्यं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेतरमधिकरणं कल्पयतीति चेत्। न। मयूरनृत्यं साधिकरणं नृत्यत्वात् इति सामान्यतोदृष्टं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेतरं पर्वतमधिकरणमादाय नृत्यज्ञानं जनयति। यद्वा पर्वतेतरे न नृत्यतीति शब्देन नृत्याभावबोधानन्तरं मयूरो नृत्यतीति शब्दाज्जायमानं ज्ञानं पर्वतनृत्यं गोचरयति प्रसिद्धविशेषबाधसहकृतसामान्यज्ञानजनकप्रमाणस्य प्रसिद्धेतरं पर्वतमधिकरणविशेषमादाय ज्ञानजनकत्वनियमात्। अत एवानित्यज्ञानबाधानन्तरं क्षित्यादौ ज्ञानजन्यत्वं सिद्धनित्यत्वमादायैव सिद्ध्यतीत्याचार्याः। यद्वा मयूरनृत्यं पर्वताधिकरणकं पर्वतेतरानधिकरणत्वे सति साधिकरणत्वात् पर्वतत्ववत् इति अन्वय-**

**व्यतिरेकी, अथवा यः सम्भावितत्तदितरा(?र)वृत्तिः सन् तदतिरिक्तवृत्तिर्न भवति स तद्वृत्तिर्भवतीति सामान्यतो यत्तदर्थान्तर्भावेन व्याप्त्या नृत्यस्य पर्वतवृत्तित्वं सिद्ध्यति । एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रापि अप्रसिद्धरात्रिभोजनसाध्यपीनत्वज्ञानं रात्रिभोजनमादाय सिद्ध्यति ।**

अत्राशङ्कते **नैयायिकः - न चेति** । तथा च यथाऽस्मन्मते पर्वतनृत्यरूपसाध्याप्रसिद्धौ व्यतिरेक्यनुमानं न सम्भवति तथा तव मतेऽपि पर्वतमयूरनृत्येन विना पर्वतेतरे न नृत्यति चेति ज्ञानमनुपपन्नमित्यनुपपत्तिज्ञानमपि कथं स्यात् पर्वतमयूरनृत्यस्याप्रसिद्धत्वात् । समाधत्ते **प्राभाकरः - अधिकरणेति** । न हि अनुपपत्तिज्ञाने पर्वतमयूरनृत्यं विषयः किन्तु नृत्यमात्रम्, तथा चैवमनुपपत्तिः इदं नृत्यमधिकरणेन विनाऽनुपपद्यमानमधिकरणं कल्पयति । ततः प्रसिद्धबाधसहकारिवशात् अप्रसिद्धं पर्वतरूपाधिकरणमादायैव नृत्यज्ञानं भविष्यतीत्यर्थः । एतदेवाह - **प्रसिद्धेतरमिति**। प्रसिद्धेतरमधिकरणं पर्वतलक्षणमित्यर्थः। **नैयायिकः** समाधत्ते - **मयूरनृत्यमिति** । तथा चानुमानादस्मादेव पर्वतनृत्यज्ञानं [153 A] भविष्यति। यदि च प्रसिद्धाधिकरणबाधा अर्थापत्तौ सहकारी उच्यते तदा प्रसिद्धाधिकरण[बाध]सहकारिवशादप्रसिद्धपर्वतनृत्यज्ञानमनुमानेनैव भविष्यति यथा इच्छा द्रव्याश्रिता गुणत्वात् इत्यत्र प्रसिद्धपृथिव्यादिबाधसहकारिवशादप्रसिद्धात्माधिकरणमादायैव ज्ञानं भविष्यति । अथवा पर्वतमयूरनृत्यज्ञानं नानुमानिकं किन्तु शाब्दमेवेत्यत आह - **यद्वेति** । यथा गामानयेति शब्दोच्चारानन्तरं चैत्रादिपरकीयगवानयनं तु बाधितमिति बाधसहकारिवशात् यद् गवानयनज्ञानं तद् देवदत्तीयगवानयनज्ञानमेव जायते, तद्वत् अत्रापि पर्वतेतरे न नृत्यतीति शब्देन पर्वतेतरस्मिन् नृत्याभावज्ञानं तज्ज्ञानानन्तरं च नृत्यतीति शब्दाच्च यज्ज्ञानं जायते तन्नृत्यविशेषं पर्वतनृत्यमादायैव भविष्यति। ननु नृत्यतीति नृत्यसामान्यवाचकशब्देन कथं पर्वतनृत्यस्य ज्ञानम् ?, न हि सामान्यशब्देन विशेषविषयकं ज्ञानमित्यत आह - **विशेषबाधेति**। तथा च विशेषबाधसहकारिवशात् सामान्यशब्दस्यापि विशेषबोधजनकत्वमित्यर्थः। न केवलमियं रीतिः शब्दप्रमाणे एव किन्तु अनुमानेऽपीत्याह - **अत एवेति** । यथा क्षित्यादिकमुपादानगोचरापरोक्षज्ञानजन्यं कार्यत्वात् इत्यनुमानेऽनित्यस्यासर्वविषयकस्य ज्ञानस्यातीतानागतकोटिकोटिपरमाणुद्व्यणुकादिक्षित्युपादानविषयकत्वा-सम्भवेन बाधितत्वात् या ज्ञानजन्यत्वानुमितिः सा नित्यसर्वविषयकज्ञानमादायैव सिद्ध्यति, प्रमाणानामयं स्वभावः यथा इतरबाधसहकारिवशात् सामान्यज्ञानजनकेन विशेषज्ञानमवश्यं जननीयम् । एतदेवाह - **नित्यत्वमादायैवेति**। आचार्या **उदयनाचार्याः कुसुमाञ्जलौ**। तदभावाऽऽवेदकप्रमाणसद्भावादिति तृतीय-विप्रतिपत्तौ एतदर्थो यथा तस्य ईश्वरस्य योऽभावस्तस्याऽऽवेदकं प्रमाणमनुपलब्धिस्तद्भावादित्यर्थः। तथा च

यदि ईश्वरोऽस्ति तदा उपलभ्येत, नोपलभ्यते, तस्मान्नास्ति इत्यनुपलब्ध्या ईश्वरो नास्ति इति **मीमांसकेन** तृतीयविप्रतिपत्तौ पूर्वपक्षिते सति इदमनुमानम् यथा क्षित्यादिकं सकर्तृकमित्युक्तमनुमानम्। तथा चायमर्थः - यद्यनुपलब्धिमात्रेण वस्तु नास्ति तदा गृहान्निर्गते **चार्वाक**वराके सति तमपश्यन्तस्तत्पुत्रकलत्रादयो रोदनं कुर्युः, तेनानुपलब्धिमात्रं न वस्त्वभावसाधकं किन्तु योग्यानुपलब्धिमात्रम्, सा चातीन्द्रिये ईश्वरादौ कुतः योग्यानुपलब्धिः ? सा चातीन्द्रिये नास्ति। ततोऽनुमानेनेश्वरः सिद्ध इत्याहु**राचार्याः**। अत्रान्वयव्यतिरेकिणमपि समर्थयति - **पर्वत(? मयूर)नृत्य**मिति। हेतौ सत्यन्तं पर्वतेतरवृत्तिनि [153 B] महानसीयघटादौ व्यभिचारवारणाय - आकाशे पर्वतेतरानधिकरणत्वं वर्तते परं तत्र पर्वताधिकरणत्वं नास्तीति व्यभिचारः तद्वारणाय - साधिकरणपदम्। दृष्टान्तः पर्वतत्ववत् इति अयम् अन्वयव्यतिरेकी। तथा चानेनानुमानेन मयूरनृत्यस्य पर्वताधिकरणवृत्तित्वं सिद्धं किमर्थापत्त्या। अथ विशेषानुमानमुक्त्वा सामान्यतोदृष्टव्याप्त्यापि मयूरनृत्यस्य पर्वताधिकरणवृत्तित्वं साधयति - **अथवे**ति। तच्च तदितरच्च तत्तदितरयोर्वृत्तिः सम्भावितः सन् यस्तत्तदितरवृत्तिः स सम्भावितततत्तदितरवृत्तिः। एतावता वृत्तिमत्त्वे सतीति पर्यवसन्नम्। तथा च यो वृत्तिमान् तदतिरिक्तवृत्तिमान् न भवति स तद्वृत्तिरिति सामान्यव्याप्तिः। तथा च सामान्यतो यत्तदर्थान्तर्भावगर्भितव्याप्त्यैव मयूरनृत्यस्य पर्वतवृत्तित्वं सिद्ध्यतीति। एतदेवाह - **सामान्यत** इति। विषयान्तरानुरोधेनाप्यर्थापत्तिर्न प्रमाणमित्याह - **एवं पीन** इति। पीन इति वाक्यं कुतोऽपि श्रुतम् अथवा स्वयं दृष्टम्। श्रुतार्थस्यान्वयानुपपत्तिः, दृष्टार्थस्य चानुपपत्तिमात्रम्। तत्र रात्रिभोजनज्ञानानुरोधेनानुपपत्तिः प्रमाणमिति ये वर्णयन्ति तत्राप्यनुपपत्तिज्ञानं न स्वतन्त्रं प्रमाणं किन्तु प्रकारान्तरेण - भोजनसाध्यं यत् पीनत्वं तद् दिवाभोजनादिना न सम्भवति दृष्टं वर्तते दिवा न भुङ्क्त इति दिनभोजनस्य बाधात् इति कृत्वा पीनत्वं भोजनसाध्यत्वं सिद्ध्यत् रात्रिभोजनसाध्यत्वमादायैव पर्यवस्यतीति रात्रिभोजनस्याप्रसिद्धत्वेऽपि वस्तुतो रात्रिभोजनसाध्यत्वं पीनत्वे पर्यवस्यति, यथा इच्छायामष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वस्याप्रसिद्धत्वेऽपीच्छायां पृथिव्याद्याश्रितत्वबाधात् द्रव्यवृत्तित्वं सिद्ध्यत् आत्मवृत्तित्वमादायैव पर्यवसन्नं भवतीति नार्थापत्तिः प्रमाणम्। तथा अनुमानमेव यथा इदं पीनत्वं भोजनसाध्यं पीनत्वात् दिवाभोजिचैत्रपीनत्ववत्। अत्र तु दृष्टान्ते दिवाभोजनं सिद्धम् तत्तु देवदत्तपीनत्वेऽदर्शनात् बाधितम् इति कृत्वा प्रसिद्धबाधसहकृतात् सामान्यतोदृष्टानुमानादेव रात्रिभोजनसाध्यत्वं सिद्ध्यति।

**अथ केऽपि यथा अभोजी पीन इत्यत्रायोग्यताज्ञानं तथा पीनो दिवा न भङ्क्ते इत्यत्रापि दिवाभोजनस्य बाधात् योग्यताघटकरात्रिभोजनस्याप्रतीतेः, अतो योग्यताघटकोपस्थितिं विना अन्वयमलभमानमिदं वाक्यं योग्यताघटकरात्रिभोजनोपपादकं**

**रात्रौ भुङ्क्ते इति वाक्यं कल्पयित्वा तेन सहान्वयबोधं जनयति। न चैवं लाघवात् रात्रि-भोजनमेव कल्पयितुं युक्तम्, शाब्दी हि आकाङ्क्षा शब्देनैव प्रपूर्यत इति न्यायेन शब्दोपस्थापितमादाय शब्दस्यान्वयबोधजनकत्वात् । एवं च श्रूयमाणशब्दस्या-न्वयबोधकत्वं योग्यताघटकोपस्थापकेन शब्देन विनानुपपद्यमानं तं कल्पयित्वा यत्रान्वयबोधं जनयति तत्र श्रुतार्थापत्तिः ।**

अत्र **श्रुतार्थापत्तिप्रमाणवादी** शङ्कते - **अथेति** । तथा च यत्रान्वयानुपपत्त्या शब्दः कल्प्यते सा श्रुतार्थापत्तिः, यत्रानुपपत्त्याऽर्थः कल्प्यते सा दृष्टार्थापत्तिः । तथाहि - **केऽपीति** । श्रुतं वाक्यम् अभोजी पीन इति, अत्रान्वयानुपपत्तिः यथा अभोजी पीन एव न भवतीति । तथा पीनो दिवा न भुङ्क्ते इत्यत्रापि अनुपपत्तिरेव पीनत्वस्य भोजनसाध्यत्वात् । दिवाऽभोजीति पदात् दिवाभोजनं बाधितम् । पीनत्वेन सह दिवाऽभोजित्वस्यान्वयो न भवतीति अयोग्यत्वात् इति कृत्वाऽन्वयबो(बा)धे योग्यताघटकयोग्यताऽप्रतीतिः । अयोग्यतयाऽन्वयानुपपत्तिरेव [154 A] । ततः किमित्यत आह - **अतो योग्यतेति** मूलम् । तथा च योग्यताघटकोपस्थितिं विनाऽन्वयबोधो न भवतीति योग्यताघटकोपस्थितिरवश्यमपेक्षिता । रात्रिभोजनमेव योग्यताघटकमिति कृत्वा रात्रिभोजनप्रतिवाक्यं कल्पनीयम्, तेन पीनो देवदत्तो दिवा न भुङ्क्ते किन्तु रात्रौ भुङ्क्ते इत्य(ध्या)हारे कृतेऽन्वयबाधो न भवतीत्यर्थः । अत्राशङ्कते - **न चेति** । तथा च रात्रिभोजनरूपोऽर्थ एव कल्पनीयः किमर्थं वाक्यं कल्पनीयमित्याशङ्कार्थः । **शाब्दीति** । तेन शाब्दे बोधे शब्दोपस्थापित एवार्थो भासते न तु प्रत्यक्षादिनोपस्थितोऽर्थो भासते, अन्यथा प्रत्ये(त्यक्षे)ण कलायादिकेषु पदार्थेषूपस्थितेषु पचतीत्युक्ते कलायं पचतीत्यन्वयबोधः स्यात् न चैवम् । अन्वयबोधस्तु कलायपदोच्चार एव भवतीति । शाब्दी शब्दजन्या या आकाङ्क्षा जिज्ञासा शब्दनिष्ठस्तात्पर्यविशेषः शब्देनैव सा पूर्यते शब्देनैव निवर्तते । तेन शब्द एव रात्रिभोजनपदाद(पदमे)व कल्प्यते इत्यर्थः । एतस्या अर्थापत्तेः श्रुतार्थापत्तित्वं विवृणोति - **एवं चेति** । श्रूयमाणशब्दस्तु एतावानेव पीनो दिवा न भुङ्क्ते । योग्यता-घटकोपस्थापकशब्दस्तु रात्रौ भुङ्क्ते इति रूपः । तेन शब्देन विनाऽनुपपद्यमानोऽन्वयस्तं कल्पयति । ततः श्रुतशब्देन विनाऽनुपपत्तिः श्रुतार्थापत्तिरित्यर्थः ।

**द्वारमित्यादौ पिधेहीति शब्दकल्पनं श्रुतार्थापत्तिरेव । शब्दश्च यद्यपि श्रूयमाणो बाधितस्तथाप्यभिप्रायस्थः कल्प्यते यथा गुरुमते स्वर्गकामो यजेतेत्यत्र साक्षात् साधनताबाधे परम्पराघटकस्यानुपस्थित्या परम्परासाधनताज्ञानविरहो योग्यताज्ञाना-**

**भावात् प्रसिद्धपदसामानाधिकरण्यानुपपत्तिरिति योग्यताज्ञानाय परम्परासाधनता-घटकमपूर्वं लिङादिवाच्यं कल्पयति, ततः स्वर्गसाधनं याग इति ज्ञानं जायते अन्यथा अपूर्वमपि वाच्यं न स्यादिति। उच्यते। बाधकप्रमाणाभावोऽन्वयविरोधिरूपविरहो वा योग्यता, अतो दिवा अभोजने रात्रिभोजनाप्रतीतावपि भोजनसाध्यपीनत्वात् दिवा न भुङ्क्ते इति शब्दात् धीरुत्पद्यते न प्रतीत्यनुपपत्तिः किन्तु प्रतीतानुपपत्त्या रात्रिभोजनं कल्प्यते अत एवापूर्वमपि न वाच्यमिति वक्ष्यते, तस्मान्नार्थापत्तिरनुमानादतिरिच्यत इति।**

ननु कल्पनापि वस्तुविषयिणी, तथा च रात्रौ भुङ्क्तेऽयं शब्द उच्चारित एव नास्ति, यदि चोच्चारितः स्यात् श्रोत्रा चेन्न श्रुतः तत्र श्रोत्रा शब्दः कल्पनीय इत्यत आह - **शब्द** इति। रात्रौ भुङ्क्ते इति शब्दो यद्यपि वक्त्रा नोच्चारितः तथाप्यभिप्रायस्थः शब्दो वर्तते स श्रोत्रा कल्प्यते। अत्र स्वमतानुरोधेन **प्राभाकरः** योग्यतावच्छेदक-रूपेणोपस्थितिं विना नान्वयबोध इत्यत्र संमतिमाह - **यथेति**। यजेतेत्यत्र इष्टसाधनत्वा(त्व)ज्ञानं प्रवर्तकम्। इष्टसाधनत्वं यागे बाधितम्। इष्टसाधनत्वं साक्षाद् वा परम्परया वा। नाद्यः, कालान्तरभाविनि फले यागस्य ध्वस्तत्वात्। न द्वितीयः, परम्पराघटक(का)पूर्वोपस्थितिं विना परम्परयापीष्टसाधनतान्वयबोधो न भवति। तथा च परम्पराघटकापूर्वस्योपस्थितिर्वक्तव्या। परम्पराघटकं यदपूर्वं तदुपस्थितिं विना परम्परयापीष्टसाधनतान्वयबोधो न भवति। परम्पराघटकं यदपूर्वं तदुपस्थितिं विना प्रसिद्धं पदं यत् यजिपदं तेन सहेष्टसाधनत्वस्यान्वयबोध एव न भवति इति कृत्वा लिङ्पदस्य वाच्यमपूर्वमेव कल्प्यते। [154 B] तथा च अयमर्थः - लिङ्त्वेन रूपेणापूर्वे शक्तिः **नैयायिक**मतानुरोधेनेष्टसाधनत्वे शक्तिः, तथा च यदा इष्टसाधनत्वे शक्तिः इष्टसाधनं शक्तं तदा अपूर्वोपस्थितिर्नास्ति इति कृत्वा अपूर्वमपि लिङादिवाच्यं कल्प्यते। **नैयायिकप्राभाकर**योरयमेव विशेषः - **नैयायिके**नोच्यते लिङर्थ इष्टसाधनत्वम्, अपूर्वं त्वनुमानेन कल्प्यते। चिरध्वस्तयागो न(ना)पूर्वमेव वाच्यम्, यथा यजेतेत्यत्र यागविषयकं[1] कार्यम् अपूर्वम्, यागेन सहापूर्वस्यान्वयबोधो जातः, न तु तावन्मात्रेण प्रवृत्तिरतोऽपूर्वान्वयबोधानन्तरं परम्परया इष्टसाधनत्वबोधस्ततः प्रवृत्तिरिति तयोर्भेदः। तथा च एतावता प्रबन्धेन लिङादिवाच्यं यदि अपूर्वं जातं तदा योग्यतावच्छेदकरूपेणापूर्वस्योपस्थितिर्जाता पश्चाद् योग्यतावच्छेदके उपस्थिते योग्यं यदिष्टसाधनत्वं तस्याप्यन्वयो भवतीत्यर्थः। ततः सर्वत्र शाब्दे बोधे श्रुतार्थान्वयानुपपत्त्यनुरोधात् योग्यतोपस्थापकः रात्रौ भुङ्क्ते इति शब्दोऽवश्यं कल्पनीय इतीयमेव श्रुतार्थापत्तिः। **समाधत्ते नैयायिकः - उच्यते** इति। यदुक्तं त्वयाऽयोग्यतयाऽन्वय एव न भवतीति अन्वयबोधाय योग्यताघटकोपस्थितये रात्रौ भुङ्क्ते

१. विषयकत्वं जन्यत्वम्। प्रतौ टिप्पणी।

इति शब्दोऽवश्यं कल्पनीय इति तत्राह - **अयोग्यतैव नास्ति**। तथाहि योग्यतालक्षणमाह यथा - **बाधके**ति। एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभावो योग्यता। इयं योग्यता अग्निना सिञ्चेत् इत्यत्र नास्ति यथा एकपदार्थसंसर्गः सेकसंसर्गः तस्यापरपदार्थो योऽग्निस्तन्निष्ठोऽत्यन्ताभावः सेकसंसर्गस्य तत्प्रतियोगित्वं सेकसंसर्गेऽस्ति इति कृत्वा तत्र योग्यता नास्ति। जलेन सिञ्चेत् इत्यत्र सेकसंसर्गस्यापरपदार्थो जलपदार्थस्तन्निष्ठा-त्यन्ताभावप्रतियोगित्वाभावो वर्तते इति कृत्वा योग्यतास्तीति बाधकप्रमाणाभावार्थः। बाधकप्रमाणं नाम सेकसंसर्गबाधकप्रमाणं जले नास्तीति तत्र योग्यताऽस्ति। **आचार्यमते**नाह - अन्वयविरोधिरूपविरहो वा योग्यता। अस्यार्थो यथा पदार्थानां परस्परं योऽन्वयस्तद्विरोधि यद् रूपं तद्विरहः। अग्निना सिञ्चेत् इत्यत्र सेक-संसर्गान्वयविरोधि रूपम् अग्नित्वं तद्विरहो नास्ति। जलेन सिञ्चेत् इत्यत्र सेकसंसर्गविरोधि रूपं [? अग्नित्वं तद्विरहो वर्तत एव इति योग्यता अस्त्येव। तथा च पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र दिवाभोजनाभावान्वय]विरोधि रूपं पीनत्वमेवात्रास्ति अतो योग्यता नास्ति। दिवाऽभोजी पीन इत्यत्र दिवाऽभोजनान्वयविरोधि पीनत्वं न भवति। कथम्? सामान्यावच्छिन्नाभाव एव प्रकृतसंसर्गविरोधी न तु विशेषाभावः। सामान्याकारेण प्रकृतपदार्थसंसर्गविरोधी। तथा च भोजनसामान्यसाध्ये पीनत्वे दिवाऽभोजनरूपविशेषाभावान्वये विरोधि रूपं किमपि नास्तीति भोजनविशेषाभावान्वयो दिवाभोजनरूपविशेषाभावान्वयो भवतीति। तथा च दिवाऽभोजी पीन इत्यत्र वाक्ये भोजनसामान्याभावस्याप्रतीयमानत्वात् भोजनविशेषाभावान्वयो दिवाभोजनरूपविशेषा-भावान्वयो बाधकं नास्तीति दिवाऽभोजी पीन इत्यत्र वाक्यात् बोध उत्पद्यते एव अयोग्यताया [155 A] अभावात् इति कृत्वा न प्रतीत्यनुपपत्तिः। ननु यदि अयोग्यताज्ञानाभावे प्रतीत्यनुपपत्तिर्नास्ति तदा रात्रौ भुङ्क्ते इति रात्रिभोजनकल्पनापि न स्यादित्यत आह - **किन्त्विति**। यद्यपि दिवाऽभोजी पीन इत्यत्र पीनत्व-प्रतीतेर्दिवा(ऽ)भोजिनोऽनुपपत्तिर्नास्ति तथापि दिवा अभोजिनः प्रतीयमानं यत् पीनत्वं तत् एकविशेषो दिवाभोजनं तस्य बाधे इतरस्यापि भोजनविशेषस्य यदि बाधः स्यात् तदा पीनत्वं नोत्प(पप)द्यतैवेति प्रतीतपीनत्वानुपपत्त्या रात्रिभोजनं कल्प्यते इति त्वया यदुक्तं प्रतीतेरनुपपत्त्या योग्यताघटकशब्द उपस्थाप्य इति तदयुक्तम्। योग्यतायाः सत्त्वात् प्रतीत्यनुपपत्तिरेव नास्तीति भावः। एवं दृष्टान्तोऽपि न सङ्गच्छत इत्याह - **अत एवेति**। यथा यागे साक्षात्साधनत्वबाधेऽपि साधनत्वसामान्यबाधो नास्ति। यदि साधनत्वसामान्यान्वये बाधः स्यात् तदा अपूर्वं वाच्यं स्यात्। तथा च अपूर्वं कल्प्यमेव, न तु लिङादिवाच्यम्। ननु प्रतीतपीनत्वानुपपत्तिरे-वार्थापत्तिर्भविष्यतीत्यत आह - **तस्मादिति**। सा च व्यतिरेक्यनुमानमेव यथा देवदत्तो रात्रौ भुङ्क्ते दिवाऽभोजित्वे सति पीनत्वात् इति व्यतिरेक्यनुमानादेव रात्रिभोजनसिद्धिः इत्यर्थः। इत्यर्थापत्तिमूलवादे व्याख्यानम्।

**। इत्यर्थापत्तिनिरूपणं समाप्तम्।**

## । अवयवनिरूपणम् ।

### (अवयवप्रकरणे प्रतिज्ञानिरूपणम् च)

**तथा अनुमानं परार्थं न्यायसाध्यमिति, न्यायः तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनय-निगमनानि निरूप्यन्ते । तत्र न समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यं न्यायः, अत्रैव वाक्येऽतिव्याप्तेः, किन्तु अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनक-वाक्यं न्यायः । प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते तेन च विशिष्टवैशिष्ट्यावगाहि मानान्तरमुत्थाप्यते तेन च चरमपरामर्श उत्पाद्यत इति न्याय-जन्यशाब्दज्ञानस्य परामर्शप्रयोजकता ।**

#### । अवयवनिरूपणम् ।

प्रसङ्गादाह - **तथेति** । अनुमानं स्मृतमेवास्ति प्रसक्तत्वात् । तस्योपेक्षानर्हत्वात् प्रसङ्ग एव सङ्गतिः । **परार्थमिति** मूलम् । परं बोधयितुमित्यर्थः । स्वार्थबोधे तु शब्दप्रयोगानपेक्षणात् प्रत्यक्षेण व्याप्तिविशिष्टपक्ष-धर्मताज्ञानादेवानुमितिः । प्रतिवादिम(न)सु(स्तु) व्याप्तिविशिष्टपक्षधर्मताज्ञानं नास्तीति कृत्वा तस्य व्याप्तिविशिष्ट-पक्षधर्मताप्रतिपादनायाः(य) पञ्चावयवानुमानवाक्यप्रयोगः क्रियते इत्यर्थः । **न्यायेति** । न्यायः पञ्चावयवानुमान-वाक्यम् । तत्साध्यं परार्थानुमानम् ।

ननु न्यायसाध्यत्वे न्यायावयवनिरूपणं किमर्थमित्यत आह - **[न्यायसाध्य]मिति** टीका । तथा च न्यायसाध्यं न्यायावयवसाध्यं चेति । न्यायावयवोपयोगं मूलकृदेवाग्रे वक्ष्यतीति ।

न्यायलक्षणमाह - **समस्तेति** मूलम् । समस्तानि यानि रूपाणि पक्षधर्मत्वादीनि तैरुपपन्नं सहितं यल्लिङ्गं तत्प्रतिपादकं वाक्यं स न्यायस्तत्र लिङ्गप्रतिपादकवाक्यमात्रं हेत्ववयवे धूमादित्यादिरूपे गतम् अत आह - **समस्तरूपोपपन्नेति** । लिङ्गविशेषणं समस्तपदं च पुनर्हेत्ववयवेऽतिव्याप्तिवारणार्थम् । दूषयति - **अत्रेति** । समस्तरूपोपपन्ने लिङ्गप्रतिपादके आप्तवाक्ये अतिव्याप्तिः यथा पर्वतो वह्निव्याप्यधूमवान् अयमिति वाक्येऽति-व्याप्तिः । तथाहि धूमवान् इति वाक्यं समस्तरूपोपपन्नं यत् लिङ्गं धूमस्तत्प्रतिपादकं वाक्यं भवति परं न्यायो न भवति आप्तवाक्यत्वात् । यदि वादिवाक्यं प्रतिज्ञाद्यवयवप्रतिपादकं स्यात् तदा न्यायः स्यात् । न्यायलक्षणे सिद्धान्तमाह - **किन्त्विति** । **अनुमितीति** [155 B] । अनुमितेः चरमकारणं यो लिङ्गपरामर्शस्तत्प्रयोजकं तज्जनकज्ञानजनकत्वम् एवंभूतं यत् शाब्दज्ञानं तज्जनकं वाक्यमित्यर्थः । ननु न्यायजन्यशाब्दज्ञानस्य

पञ्चावयवरूपोपपन्नवादिवाक्यस्य अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकत्वं कथमित्यत आह - **प्रतिज्ञादी**ति मूलम्। व्यावृत्तिर्यथा शाब्दज्ञानजनकवाक्यमित्युच्यमाने वह्निव्याप्यधूमवान् चायमिति आप्तवाक्येऽतिव्याप्तिः यतोऽस्मात् वाक्यात् यत् शाब्दज्ञानं जायते तच्छाब्दज्ञानजनकं वाक्यं तत् भवति। तत्रातिव्याप्तिवारणार्थमनुमिति-चरमकारणलिङ्गपरामर्शप्रयोजकेति पदम्। पूर्वोक्तवाक्याज्जायमानं यत् शाब्दज्ञानं तत् अनुमितिचरमकारणलिङ्ग-परामर्शप्रयोजकं न भवति किन्तु अनुमितिचरमकारणलिङ्गपरामर्शरूपमेवेति परामर्शप्रयोजकशाब्दज्ञानजनकं न भवतीति तत्र नातिव्याप्तिः। लिङ्गपरामर्शजनकं वाक्यं न्याय इत्युच्यमाने न्यायवाक्येऽसम्भवः, तथाहि कथं तर्हि तस्मादेव वादिवाक्यादाहत्यानुमितिचरमकारणलिङ्गपरामर्श उत्पद्यते किन्तु न्यायजन्यशाब्दज्ञानानन्तरं किञ्चिद् विशिष्टवैशिष्ट्यावगाहि मानसमेकं ज्ञानं जायते। पञ्चावयवरूपे(पं) तत् वाक्यमनुमितिचरमकारणलिङ्गपरामर्शजनकं न भवति किन्तु न्यायजन्यं शाब्दज्ञानं प्रथमतस्तदनन्तरं विशिष्टवैशिष्ट्यावगाहि मानसं ज्ञानमुत्पद्यते तदनन्तरं चरमकारणं लिङ्गपरामर्श उत्पद्यते। तथा च न्यायवाक्यस्य शाब्दज्ञानजनकत्वं वर्तते परम् अनुमिति-चरमकारणलिङ्गपरामर्शजनकत्वं नास्ति किन्तु अनुमितिचरमकारणलिङ्गपरामर्शजनकत्वं साक्षान्मानसज्ञानस्यैव, अतोऽसम्भववारणायं प्रयोजकपदम्। तथा चानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकत्वं तु पञ्चावयववाक्य-रूपन्यायस्य वर्तत एव जनकस्य प्रयोजकत्वात्। ततोऽयमर्थः अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकं यत् शाब्दज्ञानं तज्जनकत्वं तु न्यायवाक्यस्य तिष्ठत्येवेति। लक्षणमेव मूले योजयति - **प्रतिज्ञादी**ति मूलम्। प्रतिज्ञादि-पञ्चवाक्यैः स्वस्वखण्डवाक्यार्थद्वारा महावाक्यार्थज्ञानमुत्पाद्यते, यथा पर्वतीयवह्निज्ञानकारणीभूतज्ञानविषयो धूमो वह्निव्याप्योऽबाधितविषयोऽसत्प्रतिपक्षश्चेति न्यायजन्यवाक्यार्थज्ञानं शाब्दज्ञानं जायते। ततः किमित्यत आह - **तेन चे**ति मूलम्। न्यायजन्यवाक्यार्थज्ञानेनेत्यर्थः। **विशिष्टवैशिष्ट्ये**ति। न्यायजन्यवाक्यार्थ-ज्ञानस्यानाप्तोक्तवाक्यजन्यत्वेनाप्रामाण्यशङ्काकवलिततया प्रयोजनाक्षमतया निरूपितमानसनिश्चयरूपं ज्ञानं वक्तव्यम्, तदेव वैशिष्ट्यावगाहि मानान्तरं यथा धूमवान् वह्निः, अत्र धूमविशिष्टे वह्निवैशिष्ट्यम् एतादृशं मानसं ज्ञानं तेन [156 A] च तृतीयलिङ्गपरामर्शो जन्यते यथा वह्निव्याप्यधूमवानयमिति।

अथ टीका। प्रतिज्ञादिग्रन्थो योजयितुमाह - **उदाहरणे**ति टीका। **बौद्धानां** मते उदाहरणोपनयरूपमवयव-द्वयम्। तथाहि यो धूमवान् स वह्निमान् यथा महानसम् इत्युदाहरणवाक्यम् तथा चायमित्युपनयः इति सम्पूर्णस्तेषां मते न्यायः। अन्यमतमाह - **मीमांसके**ति। तथा च पर्वतो वह्निमान् धूमात् यो यो धूमवान् स वह्निमान् यथा महानसम् इति प्रतिज्ञाहेतूदाहरणरूपमवयवत्रयमेव न्यायः [इति **मीमांसकमतम्**]। उपलक्षणमेतत्। संशय-प्रयोजन-पक्षपरिग्रह-मतव्यवस्था-ऽभिमतपरिषन्निश्चयाः। एवं तेषां मते दशावयवा अपि। तथाहि पर्वतो वह्निमान् न वेति तटस्थस्य संशयः १। पर्वते वह्निसिद्ध्या संशयनिवृत्तिः प्रयोजनम् २। पर्वते वह्निमत्त्वं मदीयः

पक्षः [इति पक्षपरिग्रहः] ३ । मतव्यवस्थावयवो यथा अन्वयी, व्यतिरेकी, अन्वयव्यतिरेकी चेति त्रयमपि प्रमाणमिति त्रिभिरपि साध्यं साधनीयम् ४ । उभयशास्त्रज्ञानवती परिषत् [तन्]निश्चयोऽपि ५ । एवं मतान्तरेण दशापि । तन्निराकरणाय मूले प्रतिज्ञादीनामेवोद्देशः कृत इत्याह - **तन्निरासमिति** टीका । ननु **बौद्धमत**मेवास्तु किं पञ्चभिरवयवैरित्यत आह - **पञ्चानामपी**ति । तथा च यथा यथा यस्य यस्योपयोगस्तथा तथा तन्निरूपणप्रस्ताव एव वक्ष्यते इत्यर्थः । ननु लिङ्गपरामर्शस्य चरमकारणत्वमेव नास्तीति । परामर्शोत्तरं सति प्रतिबन्धके बाधादिरूपेऽनुमितिर्न जायते तेन प्रतिबन्धकाभावस्याप्यपेक्षत्वं यतः परामर्शानन्तरमनुमितिरूपमेव ज्ञानं जायते न तु किञ्चिदन्यत् ज्ञानान्तरम्, प्रतिबन्धकाभावस्तु ज्ञातो न कारणं स्वरूपसन्नेव स कारणम् । स इति परामर्श एव चरमकारणम् । ननु अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकं यत् शाब्दज्ञानं प्रतिज्ञावाक्यजन्यज्ञानं तज्जनकत्वं वर्तते प्रतिज्ञावाक्यस्येत्यतिव्याप्तिरित्यत आह - **प्रयोजकत्वमिति** । प्रयोजकत्वं तु जनकज्ञानजनकत्वं न तु जनकजनकजनकज्ञानजनकत्वम् । प्रतिज्ञावाक्यं तु परामर्शजनकं मानसज्ञानं तज्जनकं शाब्दज्ञानं तस्य च जनकं यत् प्रतिज्ञावाक्यजन्यं शाब्दज्ञानमित्युक्तरूपप्रयोजकत्वाभावात् नातिव्याप्तिः । वक्ष्यमाणवाक्यावयवेऽतिव्याप्तिवारणाय व्याचष्टे - **शाब्दज्ञानपदं चेति** टीका । वाक्यावयवस्तु प्रतिज्ञादिरूपः, स चरमकारणलिङ्गपरामर्शापेक्षया न्यूनविषयकमेव येन प्रतिज्ञावाक्यात् पर्वते वह्निवैशिष्ट्यं ज्ञानमात्रं जायते, चरमकारणपरामर्शे तु व्याप्त्यादिवैशिष्ट्यमपि भासते इति कृत्वा प्रतिज्ञादिवाक्यस्य न्यूनविषयत्वमेव । सत्यन्तप्रयोजनमाह - **वह्नीति** । तथा च वह्निव्याप्यधूमवान् अयम् इत्याप्तवाक्यादाहत्य लिङ्गपरामर्श एवोत्पद्यते न तु मध्ये तस्य मानसज्ञानमन्यत् । तथा चाप्तवाक्येऽनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकत्वमेव नास्ति यत आहत्याप्रामाण्यशङ्काशून्यात् तस्मादाप्तवाक्यात् अनुमितिचरमकारणलिङ्गपरामर्श एवोत्पद्यते । न तु यथाऽनाप्तवाक्यात् [156 B] मध्ये मानसं ज्ञानं विशिष्टवैशिष्ट्यमन्यदप्युत्पद्यते प्रतिवादिनः तद्वदत्र नास्तीत्यर्थः । प्रयोजकपदस्य कृत्यमाह - **परामर्शजनकेति** टीका । प्रयोजकपदं विनाऽसम्भवः । असम्भवमेव दर्शयति - **न हीति** । तथा चानुमितिचरमकारणलिङ्गपरामर्शजनकं मानसं ज्ञानं विशिष्टवैशिष्ट्यावगाहि मानसं ज्ञानं तज्जनकं तु न्यायवाक्ये(क्यं) न सम्भवति । न्यायवाक्यस्य शाब्दज्ञानमात्रजनकत्वमेव न तु मानसज्ञानजनकत्वम् । प्रयोजकत्वं तूक्तरीत्या सम्भवत्येव । एतदेवाह - **तस्येति** टीका । विशिष्टवैशिष्ट्यज्ञानस्य मानसत्वात् मनोजन्यत्वात् इत्यर्थः । तथा च जनकजनकेति कृते नासम्भवः, अनुमितिचरमकारणस्य लिङ्गपरामर्शस्य जनकं विशिष्टवैशिष्ट्यावगाहि ज्ञानं मानसं ज्ञानं तस्य जनकं शाब्दज्ञानम्, पञ्चावयवात्मकं न्यायवाक्यं तेन न्यायवाक्यजन्यशाब्दज्ञानस्य प्रयोजकत्वेन नासम्भवः । प्रयोजकत्वं नाम जनकज्ञानजनकत्वम् । अत्र जनकजनकमित्येवास्तु । तथा सति पूर्वोक्ते वह्निव्याप्यधूमवान् इति रूपे आप्तवाक्येऽतिव्याप्तिः । आप्तवाक्येन शाब्दज्ञानमुत्पादितम्, तेन संस्कार उत्पादितस्तेन संस्कारेण स्मृतिरूपश्चरमः परामर्शः

उत्पादितस्तेन चानुमितिस्तथा चानुमितिचरमकारणं यो लिङ्गपरामर्शः स्मृतिरूपः परामर्शः तज्जनकः संस्कारः तज्जनकं यत् शाब्दज्ञानं तज्जनकमाप्तवाक्यं भवति। तत्रातिव्याप्तिनिरासाय प्रयोजकलक्षणे ज्ञानपदम्। अथानुमितिकारणलिङ्गपरामर्शेत्यस्य पदस्य कृत्यमाह - **अनुमितिचरमकारणे**ति टीका। आप्तवाक्यजन्यशाब्दज्ञानस्यापि यत्किञ्चित् ज्ञानप्रयोजकत्वं तिष्ठत्येव। तथाहि - चैत्रलक्षणस्याप्तस्य वाक्यात् मैत्रस्य शाब्दज्ञानम्, तस्माच्छाब्दज्ञानात् अनुव्यवसायो यथा अहं पर्वतं वह्निव्याप्यत्वेन जानामीति, तस्माच्चानुव्यवसायात् प्रामाण्यसंशयः, तत्र संशये शाब्दज्ञानस्य मैत्रशाब्दज्ञानस्य प्रयोजकत्वं तिष्ठत्येव। तदर्थमनुमितिचरमकारणलिङ्गपरामर्शेति पदम्। यद्यपि संशयप्रयोजकता शाब्दज्ञानस्य तिष्ठति तथापि तस्यानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकत्वं संशयं प्रति तस्य प्रयोजकत्वात्। ननु लिङ्गपरामर्शपदं व्यर्थमित्यत आह - **लिङ्गपरामर्शपदं चे**ति टीका। स्वरूपकथनं तु लिङ्गपरामर्शातिरिक्तमन्यदनुमितिचरमकारणं नास्तीति बोधनाय। अन्यथाऽनुमितिचरमकारणं किमित्याकाङ्क्षायां स्वरूपावेदनपरं परमतिव्याप्त्यादिदोषवारणाय नास्तीत्यर्थः। अथ शाब्दज्ञानपदस्य कृत्यमाह - **अनुमिती**ति टीका। अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकजनकमित्युच्यमाने पर्वतो वह्निव्याप्यधूमवान् अयमिति सम्पूर्णं वाक्यं तस्यैकोऽवयवो वह्निव्याप्यधूमवान् इति रूप एतस्याप्येकोऽवयवो वह्निव्याप्य इत्यन्तस्तथा च वह्निव्याप्य इत्यंशेन व्याप्तिज्ञानं [157 A] जन्यते तेन व्याप्तिज्ञानेन विशेषणज्ञानमर्यादया धूमविशेष्यकव्याप्तिविशेषणं व्याप्तिविशिष्टधूमज्ञानं जन्यते तेन च व्याप्तिविशिष्टधूमज्ञानेन व्याप्तिविशिष्टधूमविशेषणपर्वतविशेष्यकं लिङ्गपरामर्शरूपं वह्निव्याप्यधूमवान् अयमित्याकारकं ज्ञानं जन्यते तथा च वह्निव्याप्तिरिति प्रथमं ज्ञानं ततो वह्निव्याप्यधूमवान् इति द्वितीयं ज्ञानं ततो वह्निव्याप्यधूमवान् पर्वत इति तृतीयं ज्ञानम् इति तृतीयं ज्ञानं प्रति द्वितीयज्ञानद्वारा पथमं ज्ञानं प्रयोजकं भवत्येवेति तन्निरासाय शाब्दज्ञानपदम्। ननु वह्निव्याप्य इत्यस्मात् शब्दाज्जायमानं यज्ज्ञानं तदपि शाब्दज्ञानं भवत्येवेत्यत आह - **तदर्थस्त्वि**ति टीका। **उक्त एवे**ति। अनुमितिचरमकारणं यो लिङ्गपरामर्शस्तदपेक्षया यन्न्यूनविषयकं न भवति। अयमत्र भावः - तथा च वह्निव्याप्य इत्यंशेऽतिव्याप्तिर्न भवेत्। एतस्माज्जायमानं यत् शाब्दज्ञानं तद् वह्निव्याप्यधूमवान् इति ज्ञानापेक्षया न्यूनविषयकमेव। प्रथमं व्याप्तिज्ञानं भासते। अत्र व्याप्तिपक्षधर्मता इत्येते समुदिता भासन्ते इति पूर्वज्ञानं न्यूनविषयकम्, अन्यूनविषयं न भवति इति तद्वद्व्याप्तिज्ञानम्। वाक्यपदस्य कृत्यमाह - **आत्मादावि**ति टीका। आत्मादौ अनुमितीत्यारभ्य ज्ञानजनकान्तत्वं तिष्ठति परं तत्र[1] वाक्यत्वं नास्तीति तद्वद्व्यावृत्तिः। **मिश्र**माह - **अन्ये त्वि**ति टीका। अनुमितिचरमकारणं यो लिङ्गपरामर्शः तज्जनकं यद् व्याप्तिज्ञानं तज्जनकं यद् योग्यताज्ञानम् अन्वये विषयाबाधलक्षणम्, तज्जनकत्वं कुत्रेत्यत आह - **तादृशे**ति। तादृशोऽनुमितिचरमकारणं यो लिङ्गपरामर्शस्तज्जनकं यद् ज्ञानं व्याप्ति-

---

१. आत्मादौ।

ज्ञानं तज्जनकं यद् योग्यताज्ञानं तज्जनकं नायमाभास इति यद् ज्ञानम्। नायमाभास इति अयं भ्रमो न किन्तु प्रमैव एतज्जनकं यन्नायमाभास इति कण्टकोद्धाररूपं वाक्यं तत्रातिव्याप्तिः कथमित्यत आह - **व्याप्त्यादीति**। तथा चोक्तपरामर्शस्य जनकं यद् व्यप्त्यादिवैशिष्ट्यज्ञानं तज्जनकं यद् योग्यताज्ञानं तज्जनके वाक्येऽतिव्याप्तिस्तन्निरासाय शाब्दज्ञानपदम्। न च दत्तेऽपि शाब्दज्ञानपदे तद्दोषतादवस्थ्यं कण्टकोद्धाररूपवाक्याज्जायमानमपि ज्ञानं शाब्दज्ञानं भवत्येवेति। **न चे**ति टीकास्थपूर्वपक्षार्थः। उत्तरमाह - **शाब्दे**ति। तस्य योग्यताज्ञानस्य शाब्द-ज्ञानजनकत्वेन नास्ति किन्तु योग्यताज्ञानत्वेनैवेति न तत्रातिव्याप्तिरित्यर्थः। एतदेवाह - **न चे**ति टीका। शाब्दज्ञानपदे दत्ते सति लक्ष्ये योजयति। **न्यायजन्ये**ति टीका। तथा च न्यायजन्यज्ञानस्यानुमितिचरमकारणलिङ्ग-परामर्शं [157 B] प्रति जनकत्वं नाम प्रयोजकं तत्तु शाब्दज्ञानत्वेनैवेति अर्थः। कण्टकोद्धारवाक्ये तु योग्य-ताज्ञानत्वेनैवेति न तत्रातिव्याप्तिरिति भावः। ननु वह्निव्याप्यधूमवान् अयमित्याप्तवाक्येऽतिव्याप्तिं निराकरोति - **वाद्युक्ते**ति टीका। तथा चोक्ता याऽनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकता तिष्ठति आप्तवाक्ये त्वप्रामाण्यशङ्काया अभावेन तस्माद् वाक्यादाहत्य[1] लिङ्गपरामर्शस्यैवोत्पत्तेरिति न तस्य प्रयोजकतेति न तत्रातिव्याप्तिरित्यर्थः। **मिश्र** एव वाक्यपदप्रयोजनमाह - **आप्ते**ति टीका। आप्तोक्ते वह्निव्याप्यधूमवान् अयमिति महावाक्यं तस्यावयवो वह्निव्याप्य[धूम]वान् इति रूपस्तस्याप्यवयवो वह्निव्याप्य इति रूपस्तज्जनकेंऽशेऽतिव्याप्तिस्तद्वारणाय वाक्यपदम्। न च तदपि वह्निव्याप्येति पदद्वयरूपत्वाद् वाक्यं भवत्येवेत्यत आह - **महावाक्यपरमि**ति। तथा वाक्यपदं महावाक्यपरम्। अन्ये त्वित्यारभ्य आहुः पर्यन्तं **मिश्रमतम्**। अत्राशङ्कते - **न चे**ति। न चेत्यारभ्य न्यायभिन्न-पर्यन्तमित्यन्वयः। तथा च यथा पर्वतो वह्निमान् इति सम्पूर्णावयवं न्यायवाक्यं तत्समानार्थकमेवेदमपरं वाक्यं पर्वतेऽग्निर्धूमो यत इत्यादि तत्रातिव्याप्तिः। तथाहि - यथा वादिना यत् न्यायवाक्यं प्रयोक्तव्यं तथेदमपि न्यायभिन्नमिदमेव वाक्यं प्रयुक्तम् तत्समानार्थकत्वात् तत्र तत्रातिव्याप्तिस्तत्र न्यायव्यवहाराभावात्। इति पूर्व-पक्षः। समाधत्ते - **तादृशे**ति टीका। तथा च तत्र वाक्ये लक्षणमेव नास्तीत्याह - **तादृशे**ति टीका। कथम्? यतस्तस्मादनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानमेव नोत्पद्यते किन्तु शाब्दज्ञानानन्तरं विचार-व्याकुलीभावेन मानसज्ञानानुत्पत्तेः परामर्शोऽपि न भवतीत्यर्थः। व्याकुलीभावमेव विवृणोति - **सर्वतान्त्रिके**ति टीका। नन्वस्य सर्वतान्त्रिकविरुद्धत्वे किं दूषणमित्यत आह - **अनभ्यस्तत्वेने**ति। तथा च सर्वैस्तान्त्रिकैः पर्वतो वह्निमान् इत्यादिरेव प्रयोगः क्रियते न त्वन्यथेति। तेन तत्राभ्यासो नास्तीत्यर्थः। व्याकुलीभावेऽपि किमित्यत आह - **सर्वसम्प्रदाये**ति टीका। तथा च सर्वसम्प्रदायसम्मतप्रयोगं परित्यज्यानेन सभापण्डितमानिना कथं प्रयोगान्तरं कृतमित्यत्र बीजगवेषणे एव व्यग्रता। ततः किमित्यत आह - **विशिष्टवैशिष्ट्ये**ति। तेन तत्र

---

१. साक्षात्।

व्यग्रत्वात् मानसं विशिष्टवैशिष्ट्यज्ञानं नोत्पद्यते तदभावे च कथं चरमः परामर्श इति न तत्रातिव्याप्तिरित्यर्थः। न्यायलक्षणं मूलकृता यत् योजितं प्रतिज्ञादीत्यादिग्रन्थेन [158 A] तत्रस्थने(स्थेन) न चेति पदे आशङ्कते - **न चेति**। तथा च प्रथमतो न्यायजन्यं शाब्दज्ञानं तदनन्तरमेव चरमः परामर्श उत्पद्यतां किं मध्ये मानसज्ञाने-नेत्याशङ्कार्थः। समाधत्ते - **तस्येति**। तस्य वादिवाक्यस्यानाप्तोक्तत्वेनाप्रामाण्यशङ्काकवलितेन परामर्शोऽसमर्थत्वमित्यर्थः। मध्ये मानसज्ञानास्वीकारे बाधकमाह - **अन्यथेति**। यदि मध्ये मानसं ज्ञानं न स्वीक्रियते तदा शाब्दज्ञानोत्तरं चरमो लिङ्गपरामर्शोऽपि किमर्थं स्वीक्रियते शाब्दज्ञानरूपपरामर्शादेवानुमित्युत्पत्तेः आप्तवाक्यजन्यज्ञानवत् इति। उपसंहरति - **तस्मादिति**। तथा च प्रतिवाक्यजन्यज्ञानस्याप्रामाण्यशङ्काकवलितत्वेन स्वयं युक्त्या यावत्पर्यन्तं धूमविशिष्टे वह्निवैशिष्ट्यं गृहीतं नास्ति तावत्पर्यन्तं चरमः परामर्शो नोत्पद्यते। तेन मध्ये मानसं ज्ञानं स्वीकर्तव्यमेव। ननु मानसज्ञानमेवास्तु किं चरमपरामर्शेनेत्यत आह - **तेनेति** टीका। तथा च मध्ये यद् मानसं ज्ञानं तद् व्याप्तिपक्षधर्मतोभयविषयकं न भवति किन्तु धूमविशिष्टे वह्निवैशिष्ट्यावगाहिज्ञानमात्रम्, परामर्शरूपं तु ज्ञानं व्याप्तिपक्षधर्मतामात्रविषयकम्। न त्वेवमप्रामाण्यशङ्काकवलितं श्रुतिवादिवाक्यम्। न्यायजन्यज्ञानजनकं यद् वाक्यं तद् निरर्थकं स्यात्, न्यायजन्यज्ञानस्याप्रामाण्यशङ्काकवलितत्वात् इत्यत आ[ह] - **तद्वाक्यस्येति** टीका। न्यायवाक्यस्य न व्यर्थता। तत्र हेतुमाह - **पदार्थमात्रोपस्थापकत्वेनेति**। तथा च परामर्शजनकीभूतं यद् मानसं ज्ञानं तत्र विशेषणीभूता ये पदार्था वह्निधूमादयस्तदुपस्थापकत्वेन तस्य न्यायवाक्यस्य सार्थकत्वात्। न तु तद्वाक्यस्य वाक्यार्थज्ञानद्वारोपयोगो नास्तीति वदन्ति। अत्रैव **टीकाकार**व्याख्यानं प्रकटयति - **अन्ये त्विति**। मानान्तरमुत्थाप्यते इत्यस्य व्याख्यानान्तरमाह - **अन्ये त्विति**। मानान्तरं मनोलक्षणम्। **उत्थाप्यते** इत्यस्य व्याख्यानमाह - स्वात्मसहकारिरूपसम्पन्नीक्रियत इत्यर्थः। स्वशब्देन श(शा)ब्दं ज्ञानं तदेवात्मा स एवार्थः तद्रूपो यः पदार्थः शाब्दज्ञानलक्षणः तत्सम्पन्नीक्रियते तत्स्वरूपयोग्यं क्रियते। एतावताऽयमर्थः। पूर्वं यत् शाब्दज्ञानं तद् मानसज्ञानं विना शाब्दबोधजनकं न भवति स्वरूपायोग्यत्वात्। किन्तु मानसे ज्ञाने जाते तस्य स्वरूपयोग्यताऽतो मानसं ज्ञानमङ्गीकर्तव्यमित्येका व्याख्या। ऋजवस्तु मानान्तरं मनोलक्षणमुत्थाप्यते, मन एव यथा परामर्शे सहकारि भवति तथा न्यायजन्यशाब्दज्ञानेन क्रियते, ततो मानसं ज्ञानं मध्ये किमर्थं स्वीक्रियते मन एव चरमलिङ्गपरामर्शमुत्पादयिष्यतीति [158 B] एतन्मते मानसं ज्ञानं मध्ये नास्तीति ज्ञेयम्। आहुरित्यस्वरसबीजं यथा न्यायजन्यज्ञानस्याप्रामाण्यशङ्काकवलितत्वात् न्यायजन्यशाब्दज्ञानमकिञ्चित्करमेव जातमिति मानसज्ञान-स्वीकारे कुतो मानान्तरं मनोलक्षणमुत्थाप्यत इति व्याख्या किमर्थं स्वीक्रियत इत्यर्थः। अवयवलक्षणमाह मूले **अनुमितीति**। अनुमितिचरमकारणीभूतो यो लिङ्गपरामर्शः तत्प्रयोजकं यत् शाब्दज्ञानं न्यायजन्यशाब्दज्ञानमिति यावत् तज्जनकं यत् शाब्दज्ञानम् अवयववाक्यजन्यं शाब्दज्ञानं तज्जनकं यद् वाक्यं सोऽवयव इत्यर्थः। तथाहि

- पर्वतो वह्निमान् इत्येतादृशे प्रतिज्ञारूपेऽवयवे वर्तते। पूर्वोक्तन्यायलक्षणोक्तरीत्याऽनुमितिचरमकारणलिङ्ग-परामर्शप्रयोजकं यत् शाब्दज्ञानं न्यायजन्यं शाब्दज्ञानं तज्जनकं यत् शाब्दज्ञानं तत् प्रतिज्ञावाक्यजन्यमपि भवतीत्येवं हेत्वाद्यवयवजन्यानि पञ्च शाब्दज्ञानानि भवन्ति तज्जनकत्वं पञ्चावयवेषु वर्तते इति लक्षणसङ्गतिः। लाघवादाह - **न्यायजन्यज्ञानपरमिति**। तथा च लाघवाद् न्यायजन्यज्ञानजनकं यत् शाब्दज्ञानं प्रतिज्ञावाक्यादि-शाब्दज्ञानं तज्जनकत्वं पञ्चस्वपि वाक्येषु वर्तत इति एतावदेव लक्षणं सुस्थम्। न्यायजन्यशाब्दज्ञानजनकशाब्दज्ञान-जनकपदकृत्यं यथा शाब्दज्ञानजनकं वाक्यम् अवयवी इत्येवास्तु, तदा न्यायबहिर्भूते आप्तवाक्येऽतिव्याप्तिः तद्वारणाय न्यायजन्यशाब्दज्ञानजनकेति पदम्। एतदेवाह - **न्यायबहिर्भूतमिति** टीका। अत्राशङ्कते - **न चेति**। तथा च न्यायजन्यशाब्दज्ञानस्य जनकं यथाऽवयववाक्यजन्यं शाब्दज्ञानं जनकं भवति तथाऽवयवावयवजन्यमपि शाब्दज्ञानं भवत्येव। तथा च न्यायजन्यं शाब्दज्ञानम् अवयवावयवजन्यं शाब्दज्ञानं तज्जनकत्वं त्ववयवावयवेऽपि वर्तत एवेति कृत्वा तत्रातिव्याप्तिरित्याशङ्कार्थः। समाधत्ते - **तस्येति**। तस्यावयवावयववाक्यस्य न्यायजन्यज्ञान-जनकेति। तथा न्यायजन्यं यत् शाब्दज्ञानं सम्पूर्णन्यायजन्यं तज्जन्यं यत् शाब्दज्ञानम् अवयवजन्यं शाब्दज्ञानं तज्जन्यं यत् शाब्दज्ञानम् अवयवावयवजन्यं शाब्दज्ञानं तज्जनकत्वम् अवयवावयवे वर्तते न तु न्यायजन्यशाब्द-ज्ञानजनकशाब्दजनकत्वम्। यतः प्रथमतोऽवयवावयवजन्यं वाक्यार्थज्ञानं तदनन्तरमवयवजन्यं वाक्यार्थज्ञानं तदनन्तरं महावाक्यजन्यं शाब्दज्ञानं पर्वतीयवह्निज्ञानकारणीभूतज्ञानविषयो धूमो वह्निव्याप्योऽबाधितविषयोऽ-सत्प्रतिपक्षश्चेति [159 A] महावाक्यजन्यो बोधः तज्जनकत्वं तु अवयवजन्ये वाक्यार्थबोधे वर्तते, न तु अवयवावयवजन्ये वाक्यार्थबोधे तस्यावयवावयवजन्यवाक्यार्थः(र्थ)बोधस्यावयववाक्यार्थबोधेनान्यथा-सिद्धत्वादित्यर्थः। अतिव्याप्त्यन्तरमपि निराकरोति - **अत एवेति** टीका। **कण्टकोद्धार** इति। नायमाभासः इति कण्टकोद्धारवाक्यम्। अनेनापि कण्टकोद्धारवाक्येनाबाधितत्त्वज्ञानं शाब्दरूपं तदेव च योग्यताज्ञानमित्याहुः। **तस्यापीति**। कण्टकोद्धाररूपवाक्यस्य न्यायजन्यं यद् ज्ञानं महावाक्यजन्यं ज्ञानं तज्जनकं यद् व्याप्तिज्ञानं तज्जनकं यद् योग्यताज्ञानं तजनकत्वं कण्टकोद्धारस्यापि वर्तत इति परं कण्टकोद्धारवाक्यस्य न्यायजन्यं यद् ज्ञानं तज्जनकं यद् व्याप्तिज्ञानं तज्जनकत्वं नास्ति किन्तु योग्यताज्ञानजनकत्वमेव तस्येति न तत्रातिव्याप्तिः। ननु अनुमिति-चरमकारणलिङ्गपरामर्शप्रयोजकशाब्देत्यत्र शाब्दपदम् अथवा न्यायजन्यज्ञानजनकशाब्दज्ञानजनकवाक्यत्व-मवयवत्वमित्यत्रापि शाब्दपदं व्यर्थम्। कुतः ? वाक्येन न्यायजन्यज्ञानजनकमुत्पादनीयं तत् तु शाब्दातिरिक्तमिति शाब्दपदं व्यर्थमित्यत आह - **सम्पातायातमिति** टीका। सम्पातः करणापाटवं तेन भ्रमादुक्तं व्यर्थमित्यर्थः। अथ वाक्यपदव्यावृत्तिमाह - **आत्मादाविति**। आत्मादीनां सर्वज्ञानजनकत्वात् तत्रातिव्याप्तिः तद्वारणार्थं वाक्य-पदम्। आत्मनि तु वाक्यत्वं नास्तीति नातिव्याप्तिः। ननु तावत्पदेभ्यो यावन्ति पदानि सम्पूर्णे न्यायवाक्ये वर्तन्ते

तावत्पदेभ्य एकदैव तावत्पदार्थस्मृतौ सत्याम् एकदैव वाक्यार्थबोधो जायते। तत्र चावयववाक्यार्थबोधस्य खण्डवाक्यार्थबोधस्य महावाक्यार्थबोधेऽपेक्षैव नास्ति। तथा चावयवलक्षणमसम्भवग्रस्तम्। कुतः ? अवयव-वाक्यार्थबोधस्य महावाक्यार्थबोधे कारणत्वाभावादित्यत आह - **एतच्चेति** टीका। तथा च [1]यन्मतेऽवान्तर-वाक्यार्थज्ञानं महावाक्यार्थज्ञाने कारणमस्ति तन्मते इदं लक्षणं योजनीयम्। अन्यथा बाधकमाह - **यदि चेति** टीका। तावत्संस्कारमेलकात् यदि तावतां पदानां समूहालम्बनरूपा स्मृतिस्तदनन्तरम् एकदैव महावाक्यार्थबोध-स्तदा खण्डवाक्यार्थज्ञानस्य महावाक्यार्थज्ञाने कारणत्वाभावात्। उक्तलक्षणेऽवयवलक्षणेऽसम्भव एव स्यादित्यर्थः।

**अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्य-त्वमवयवत्वम्। अत एव वह्निव्याप्यधूमवान् अयम् इति वाक्ये तदवयवे च न न्याय-तदवयवलक्षणातिव्याप्तिः तेन परामर्शस्य तदवयवेन परामर्शजनकस्य जननात्। यत् तु संक्षेपतः परामर्शप्रयोजकवाक्यत्वेन विशेषाभावात् सोऽपि न्याय ऐवति, तन्न, कथायामाकाङ्क्षाक्रमेणाभिधानमिति प्रथमं विशिष्टवैशिष्ट्ये आकाङ्क्षा नास्तीति तद-भिधाने निग्रहादिति वक्ष्यते। अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्तिः आकाङ्क्षाविरहस्तुल्य एव। अन्ये तु पञ्चावयववाक्यात् विजातीयमेव शाब्दज्ञानमुत्पद्यते इति तद्धीजनकवाक्यत्वं न्यायत्वम्, एवं प्रतिज्ञाद्यवयवादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्धीजनकशब्दत्वमेव तत्तल्लक्षणमिति, तन्न, ज्ञानविशेषजनकत्वं तत्तज्ज्ञानजनकत्वं वा न्याये प्रतिज्ञादौ चानतिप्रसक्तमनुगतरूपमन्तरेण दुर्निरूपमिति तत्स्वीकारे तस्यैव लक्षणत्वात् अन्यथा जातिसङ्करप्रसङ्गः। तत्र प्रतिज्ञा न साध्यनिर्देशः साध्यपदेऽतिव्याप्तेः किन्तु उद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सति उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यम्।**

मूले **अत एवेति**। वह्निव्याप्यधूमवान् इति आप्तवाक्ये न्यायलक्षणस्य नातिव्याप्तिः। **तदवयवे इति**। वह्निव्याप्यधूमवान् इत्येतस्य योऽवयवो वह्निव्याप्यधूम इत्यादिरूपः तत्र तदवयवलक्षणस्यातिव्याप्तिर्नास्ति। कुतः ? न्यायलक्षणस्यानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकत्वघटितत्वात् नातिव्याप्तिः। अवयवलक्षणस्य

१. मणिकारमते। प्रतौ टिप्पणी।

तु न्यायघटितत्वात् नाप्तवाक्यावयवेऽतिव्याप्तिरित्यर्थः। कुत इत्यत आह - **तेन चेति** मूलम्। तेनाप्तवाक्येनेत्यर्थः। [159 B]। आप्तवाक्येन वह्निव्याप्यधूमवान् चायम् इतिरूपेण साक्षादेव वह्निव्याप्यधूमवान् अयम् इति ज्ञानं शाब्दबोधात्मकं जायते। **तदवयवेनेति** मूलम्। आप्तवाक्यावयवेन परामर्शजनकं व्याप्तिज्ञानं जन्यते। तथा च एकत्राप्तवाक्येऽनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वाभावात् यतः तेन साक्षादेव परामर्शो जन्यते न तु तस्य परामर्शप्रयोजकत्वम्, अपरत्राप्तवाक्यावयवे साक्षात् परामर्शजनकं यद् व्याप्तिज्ञानं तज्जननात् नातिव्याप्तिरित्यर्थः। मतान्तरमाशङ्क्य दूषयति - **यत् त्विति**। तथा चाप्तवाक्यमपि न्याय एवेति तद्वारणाय। यत् प्रयोजकत्वं [तत्] जनकजनकमात्रनिष्ठमेव न तु जनकनिष्ठम्, तेन यत् त्विति पक्षे प्रयोजकत्वं जनकेऽपि तिष्ठतु जनकजनकेऽपि तिष्ठतु। न्यायवाक्ये लिङ्गपरामर्शजनकं यद् मानसं ज्ञानं तज्जनकं यत् शाब्दं ज्ञानं तज्जनकत्वं तु न्यायवाक्यस्यास्ति। आप्तवाक्यस्य साक्षात् लिङ्गपरामर्शजनकत्वमादाय प्रयोजकत्वम्, तेन मानसं ज्ञानं न जन्यते इत्येव विशेषः, तथा च सोऽपि वह्निव्याप्यधूमवान् इत्येवमाकारः शब्दः सोऽपि न्याय एवेति न तत्रातिव्याप्तिः प्रयोजकपदेन कारणकारणमात्रस्याविवक्षणात् कारणत्वस्यापि विवक्षणात्। तद् दूषयति - **कथायामिति**। तथा च कथायां विवादे आकाङ्क्षाक्रमेण यावदेव वादिनोऽपेक्षितं तावदेव वक्तव्यम्, तेन पर्वतो वह्निमान् इति प्रतिज्ञावाक्यानन्तरं हेतुरेवाकाङ्क्षितः स एव वक्तव्यः। आप्तवाक्यस्थले तु क्रम ईदृशो नास्ति वादस्थले तु क्रमो वर्तते। आप्तेन तु प्रथमत एव वह्निव्याप्यधूमवान् इत्युच्यते इति कृत्वा वादिवाक्यमेव न्यायस्तथाविधाऽऽकाङ्क्षावत्त्वात्। एतदेवाह - **प्रथ[म]मिति**। तथा च वादिवाक्ये प्रतिज्ञानन्तरं हेतोरेवाकाङ्क्षा न तु व्याप्तिविशिष्टस्य पक्षधर्मत्वबोधनार्थमु[प]नयाकाङ्क्षा वह्निव्याप्यधूमवान् चायम् इत्युपनयाकाङ्क्षा। प्रथममिति उदाहरणवाक्यात् पूर्वमित्यर्थः। विशिष्टवैशिष्ट्ये उपनयरूपे धूमः पर्वतस्य विशेषणत्वं तस्य धूमस्य विशेषणं वह्निव्याप्तिरिति विशिष्टवैशिष्ट्यं तत्राकाङ्क्षा प्रथमं नास्तीत्यन्वयः। प्रतिज्ञादिवाक्यात् पूर्वमेवं यदि आप्तवाक्यवत् विशिष्टवैशिष्ट्यरूपोपनयप्रयोगः क्रियते तदा बाधकमाह - **तदभिधान** इति मूलम्। प्रथमत एवोपनयाभिधाने निग्रहात् वादिनो निग्रहो भवेत्। आप्तवाक्ये तु अयं नियमो नास्ति किन्तु तत्र प्रथमतो वह्निव्याप्यधूमवान् अयम् इत्येव प्रयोगः क्रियते। ननु लाघवात् परामर्शप्रयोजकवाक्यत्वेनैव न्यायत्वमस्तु न तु परामर्शजनकजनक-शाब्दज्ञानजनकत्वेनेत्यत आह - **अन्यथेति** मूलम्। यत्र प्रतिज्ञादिक्रमस्तत्रैव तान्त्रिकाणां न्याय इति व्यवहारः। यदि च तान्त्रिकव्यवहारमनादृत्य केवलं लाघवमाश्रित्य परामर्शप्रयोजकवाक्यत्वेन [160 A] न्यायता तदा वाक्यत्वमपि परित्यज्य परामर्शजनकत्वमात्रेण चक्षुरादीनामपि न्यायताऽस्तु इत्यर्थः। आप्तवाक्यापेक्षया चक्षुरादौ आकाङ्क्षाविरहे कोऽपि विशेषो नास्ति। तथा च प्रतिज्ञादिक्रमाभावात् चक्षुरादिकं यथा न न्यायस्तथा आप्तवाक्यमपि न न्याय इति प्रघट्टकार्थः। मतान्तरमाह - **अन्ये त्विति** मूलम्। आप्तवाक्यस्य न्यायत्वव्यावृत्त्यर्थमेव

विवक्षामाह - **पञ्चावयवे**ति । आप्तवाक्याद् विजातीयमेव शाब्दज्ञानमुत्पद्यते । एवं पञ्चावयववाक्यादपि विजातीयं शाब्दज्ञानमुत्पद्यते । एवं च शृङ्गग्राहिकान्यायेन विजातीयशाब्दज्ञानविशेषजनकवाक्यत्वमेव न्यायत्वम् । तथा च यथा न्यायवाक्यात् विजातीयं शाब्दज्ञानमुत्पद्यते तथा आप्तवाक्यात् नोत्पद्यते किन्तु आप्तवाक्यात् विजातीयमेव शाब्दज्ञानमुत्पद्यते यथाऽनुभवसिद्धविलक्षणमधुरत्वावान्तरजातिविशेषवद्रसजनकत्वमिक्ष्वादौ शर्करादौ तु तद्विलक्षण एव रसः, एवं चाप्तवाक्ये नातिव्याप्तिः । यथा न्यायवाक्यस्य विलक्षणशाब्दज्ञानविशेषजनकत्वं वर्तते तथा आप्तवाक्ये नास्तीति न तत्रातिव्याप्तिरिति भावः । एवं न्यायलक्षणोक्तरीत्या प्रतिज्ञादिलक्षणान्यप्याह - **प्रतिज्ञादी**ति मूलम् । यथा पर्वतो वह्निमान् इति आप्तोक्तवाक्यापेक्षया प्रतिज्ञावाक्यस्यापि विजातीयशाब्दज्ञानजनकत्वं तदाप्तवाक्येऽपि नातिव्याप्तिः । एवं पञ्चभिरवयवैः पञ्च विलक्षणानि ज्ञानान्युत्पाद्यन्ते, तत्तद्ज्ञानविशेषजनकत्वं तत्तदवयवत्वम् । **तद्धी**ति । परस्परविक्षणधीजनकशब्दत्वमेव अवयवत्वम् । दूषयति - **तत्रेति मूलम् । ज्ञानविशेषे**ति । तथा च न्यायवाक्ये विलक्षणज्ञानजनकतावच्छेदकात् ज्ञाने ज्ञानविशेषजनकत्वं ग्रहीतुं न शक्यते । कथम् ? न्यायवाक्ये विलक्षणशाब्दज्ञानविशेषजनकता न्यायवाक्यत्वेन रूपेण ग्रहीतुं न शक्यते येन न्यायवाक्यत्वस्यैवेदं निर्वचनम् । नापि वाक्यत्वेन तस्य न्यायवाक्यातिरिक्ताप्तवाक्यादावपि वृत्ति[म]दतिप्रसङ्गः । नापि तत्तद्वाक्यत्वेन तत्तन्न्यायवाक्यत्वं यद्यप्याप्तवाक्ये नास्ति तथापि तत्सर्वेषु न्यायवाक्येष्वेकं नास्तीति नावच्छेदकम्, एवं प्रतिज्ञादिवाक्येष्वपि जनकता ग्रहीतुं न शक्यते इत्यर्थः । एतदेवाह - **न्याये** इति मूलम् । न्याये न्यायवाक्ये प्रतिज्ञादौ चावयवे । **अनतिप्रसक्त**मिति । वाक्यत्वं त्वतिप्रसक्तमित्यर्थः । **अनुगतरूप**मिति । तत्तद्वाक्यत्वम् एतद्वाक्यत्वमित्यादिरूपं त्वननुगतमिति नावच्छेदकमित्यर्थः । ननु तत्तच्छाब्दज्ञानविशेषजनकतावच्छेदको जातिविशेषो न्यायवाक्ये एवं प्रतिज्ञादिवाक्येष्वपि तथाविधो जातिविशेषो भविष्यतीति तेनैव तज्जनकताग्रहो भविष्यतीत्यत [160 B] आह - **अन्यथे**ति मूलम् । जातिसङ्करो यथा चैत्रशरीरप्रयोज्यशब्दनिष्ठजातिविशेषेण सह सङ्करः । यत्र यत्र चैत्रशरीरप्रयोज्यशब्दनिष्ठो जातिविशेषस्तत्र तत्र न्यायत्वं नास्ति । यत्र यत्र न्यायत्वं तत्र तत्र चैत्रशरीरप्रयोज्यशब्दनिष्ठो जातिविशष एवं नास्ति । मैत्रन्यायवाक्ये न्यायत्वं तिष्ठतीति तत्र चैत्रशरीरेत्यादि नास्ति । उभयमपि चैत्रन्यायवाक्येऽप्यस्तीति सङ्करः अतोऽस्मदुक्त[म्] एवानुमितिचरमकारणेत्यादिन्यायलक्षणं समीचीनम् । अथ न्यायलक्षणमुक्त्वा प्रतिज्ञालक्षणमाह - **तत्रे**ति मूलम् । प्राचीनकृतं प्रतिज्ञालक्षणं दूषयति - **साध्यनिर्देशे**ति । साध्यप्रतिपादकशब्द इति भावः । दूषयति - **साध्ये**ति । तथा च वह्निमान् इति साध्यप्रतिपादकपदेऽतिव्याप्तिः । प्रतिज्ञालक्षणे सिद्धान्तमाह - **उद्देश्ये**ति । उद्देश्यानुमितिहेतुभूतो यो लिङ्गपरामर्शस्तत्प्रयोजकं यद् वाक्यार्थज्ञानं न्यायजन्यवाक्यार्थज्ञानं तज्जनकत्वे सति अथ चोद्देश्या याऽनुमितिस्तदन्यूनानतिरिक्तविषयकं यत् शाब्दज्ञानं तज्जनकं यद् वाक्यं सा प्रतिज्ञेत्यर्थः । इदं लक्षणं पर्वतो

वह्निमान् इत्येतस्यां प्रतिज्ञायां वर्तते । तथाहि इदं प्रतिज्ञावाक्यम्, तत् हि पर्वते वह्निवैशिष्ट्यावगाहिनी याऽनुमितिः यथा पर्वते वह्निरिति तद्धेतुभूतो यो लिङ्गपरामर्शः वह्निव्याप्यधूमवान् चायम् इति रूपः तस्य कारणं मानसं ज्ञानं तस्य कारणं महावाक्यार्थज्ञानमिति प्रयोजकत्वं तज्जनकं भवति प्रतिज्ञावाक्यम् । कथम् ? प्रतिज्ञावाक्यार्थज्ञानद्वारा न्यायजन्यवाक्यार्थबोधे न्यायजन्यवाक्यस्य कारणत्वात् । अथ चोद्देश्या याऽनुमितिः पर्वते वह्निवैशिष्ट्यावगाहिनी तदन्यूनानतिरिक्तविषयकं[1] यत् शाब्दज्ञानं तज्जनकं भवति प्रतिज्ञावाक्यम् । शेषं टीकायाम् ।

पूर्वं यत् त्विति ग्रन्थे मूले उक्तं परामर्शप्रयोजकवाक्यत्वेनाप्तवाक्यमपि न्यायोऽस्तु तदनुपपन्नं प्रयोजकत्वं जनकजनकत्वं न तु जनकत्वम् । तथा च आप्तवाक्यं जनकमेव, तस्मादाहत्य वाक्यार्थबोध एव भवति न तु मध्ये मानसं ज्ञानमिति तेन लिङ्गपरामर्शप्रयोजकत्वमेवाप्तवाक्ये नास्ति कथमाप्तवाक्यं न्याय एवेति मूलं सङ्गच्छते इत्यत आह टीकायाम् - **प्रयोजकत्वमि**ति । तथा चैतन्मते प्रयोजकत्वं जनकेऽपि तिष्ठति जनकजनकेऽपि तिष्ठति । तत आप्तवाक्यमपि परामर्शजनकत्वेन परामर्शप्रयोजकमिति तदपि न्यायत्वेन लक्ष्यमिति । ननु मूले उक्त(म्) अन्यथा चक्षुरादेरपि न्यायत्वापत्तिरिति तदयुक्तम् । चक्षुरादौ परामर्शजनकत्वेऽपि परामर्शजनकवाक्यत्वाभावादित्यत आह - **वाक्यत्वास्यापी**ति टीका । परामर्शप्रयोजकवाक्यत्वं न्यायत्वमित्यत्र वाक्यत्वं किमर्थं प्रवेशनीयम्, [161 A] परामर्शप्रयोजकत्वेनैव न्यायत्वमस्तु विनिगमकाभावादित्यर्थः । ननु चक्षुरादौ आकाङ्क्षादिकं नास्तीति किन्तु तत्स्वरूपसदेव परामर्शहेतुः आप्तवाक्ये तु आकाङ्क्षादिकं तिष्ठति इत्येवं वैषम्यादाप्तवाक्यं न्यायो न तु चक्षुरादिकमित्यत आह - **विशिष्टवैशिष्ट्ये**ति टीका । प्रतिज्ञावाक्यानन्तरं हेतोरेवाकाङ्क्षा न तु व्याप्तिविशिष्टस्य हेतोः पक्षे वैशिष्ट्याकाङ्क्षा । तथा च न्यायत्वप्रयोजिका इयमेवाकाङ्क्षा, विशिष्टवैशिष्ट्ये या आकाङ्क्षा सा तु प्रथमतः चक्षुरादावपि नास्ति आप्तवाक्येऽपि नास्ति उभयं न न्याय इत्यर्थः । अन्यथेत्यस्य मूलस्य परामृश्यमाह- **जाती**ति टीका । तथा चानुगतः कार्यकारणभावो यः स एव जातिस्वीकारे बीजं यथा दण्डत्वेन घटत्वेनानुगतो वर्तते इति कृत्वा तद् द्वयं जातिर्दण्डत्वं [घटत्वं] च न तु घटपटोभयसाधारणा एका काचन, इतरव्यावृत्ता स्तम्भादिव्यावृत्ता जातिर्नास्ति, अतो घटपटोभयसाधारणः कार्यकारणभावो नास्तीति कृत्वा नैका जातिः । तद्वत् अत्रापि सर्वेषु न्यायवाक्येषु तज्जन्यबोधेषु चानुगतः कार्यकारणभावो नास्ति इति कृत्वा जातिर्नास्ति । अनुगतकार्यकारणाभावे यदि जातिः स्यात् तदा जातिसङ्करप्रसङ्गः यथा भूतत्वमूर्तत्वयोः । यतो भूतत्वम् अनुगतकार्यस्य कारणतावच्छेदकं न भवति अनुगतकारणस्य कार्यतावच्छेदकमपि न भवति इति कृत्वा भूतत्वं

१. अनुमितिरपि पर्वते वह्निवैशिष्ट्यावगाहिनीति प्रतिज्ञावाक्यात् जायमानो बोधोऽपि पर्वते वह्निवैशिष्ट्यावगाहीति अन्यूनानतिरिक्तविषयकः तथा चानुमितिरन्यूनानतिरिक्तविषयिका । प्रतौ टिप्पणी ।

न जातिः । यदि चानुगतकार्यकारणभावाभावेऽपि जातिस्तदा भूतत्वमपि मूर्तत्वेन सह परस्परविरहसमानाधिकरण-जातिद्वयसमावेशलक्षणा जातिः स्यात् । तथा च सङ्करे सति जातिर्न भवति । सङ्करे दूषकताबीजमिदमेव । सास्नाजन्यां गोव्यक्तिं विहाय यदि गोत्वमन्यत्राश्वादिव्यक्तौ तिष्ठति तदा गोत्वस्य जातित्वमेव न सिद्ध्यति । जातिर्हि सा सिद्ध्यति याऽनुगतकार्यकारणभावबलात् सिद्ध्यति । यदि च गोत्वं गोव्यक्तिं विहाय सुणर्वगवि[१] तिष्ठति तदा सास्नात्वेन गोत्वेन कार्यकारणभावबलात् गोत्वं जातिः सिद्ध्यति । गोत्वं यदि सास्नादिजन्यव्यक्तिं विहायापि तिष्ठति तदा सास्नाद्यनुगतः कार्यकारणभाव एव न सिद्ध्येत् इति कृत्वा गोत्वं जातिरेव न सिद्ध्येत् । इदमेव जातिसङ्करबीजम् । गोत्वं जातिः सास्नाद्यनुगतकारणता जन्यतावच्छेदकत्वेनायाति । यदि गोत्वे पृथिवीत्वेन सह ज़ातिसङ्करस्तदा गोत्वं पृथिवीं विहाय सुवर्णगवि चेत् तिष्ठति तदा सास्नाजन्यतावच्छेदकत्वमेव जातिः यत्र च सास्नाजन्यता नास्ति तत्रापि गोत्वस्य विद्यमानत्वात् । व्यभिचारिणः कारणत्वाभावात् गोत्वस्य जातित्वमेव व्याहतं स्यात् । प्रतिज्ञालक्षणे सत्यन्तप्रयोजनमाह - **अत्रेति** । न्यायेऽप्रविष्टं न्यायबहिर्भूतमित्यर्थः । तथा च न्यायबहिर्भूतं [161 B] यत् प्रतिज्ञासमानाकारम् आप्तवाक्यं पर्वतो वह्निमान् इत्यादिरूपं तत्रातिव्याप्तिः तद्वारणाय सत्यन्तम् । उद्देश्यानुमित्यन्यूनातिरिक्तविषयकं यत् शाब्दज्ञानं तज्जनकत्वम् आप्तवाक्येऽपि तिष्ठतीति । उद्देश्यानुमितिरपि पर्वते वह्निवैशिष्ट्यावगाहिनी । आप्तवाक्या[द्] जायमानो बोधोऽपि पर्वते वह्निवैशिष्ट्यावगाहीति कृत्वाऽतिव्याप्तिः तद्वारणाय सत्यन्तम् । तथा चाप्तवाक्ये उद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थ-ज्ञानजनकत्वं नास्ति किन्तु उद्देश्यानुमितिहेतुलिङ्गपरामर्शजनकवाक्यार्थज्ञानजनकत्वमेव वर्तते न तु प्रयोजकत्वम् । ननु सत्यन्ते वाक्यार्थपदं व्यर्थमित्यत आह - **वाक्यार्थपदमिति** टीका । सम्पातायातं व्यर्थमित्यर्थः । प्रथमोद्देश्यपदव्यावृत्तिमाह - **न्यायान्तरेति** टीका । यत्र चैत्रमैत्रौ विवादिनौ तयोः कथायां चैत्रेणोक्तम् पर्वतो वह्निमान् इति । अपरत्र देवदत्तयज्ञदत्तयोः चैत्रमैत्रौ त्वाप्तौ । तत् कथायां सा प्रतिज्ञा न भवति, देवदत्तयज्ञदत्तौ प्रति चैत्रमैत्रयोरनाप्तत्वाभावात् । तथा च तद्वारणाय प्रथमोद्देश्यपदम् । तेन चैत्रमैत्रयोर्या प्रतिज्ञा सा देवदत्तयज्ञदत्तौ प्रति चेत् आपाद्यते तदा उद्देश्यानुमिति इत्याद्यं दलं नास्ति । चैत्रमैत्रौ प्रति या प्रतिज्ञा तस्याः प्रतिज्ञायाः देवदत्तयज्ञदत्तयोर्या उद्देश्यानुमितिस्तद्धे[तु]भूतेत्यादि दलमेव नास्ति । कथम् ? न हि चैत्रेणोच्चारिता पर्वतो वह्निमान् इति प्रतिज्ञा सा स्ववाक्यार्थज्ञानद्वारा देवदत्तयज्ञदत्तयोर्महावाक्यार्थज्ञानमुत्पादयति । महावाक्यार्थज्ञानेन च मानसं विशिष्ट-वैशिष्ट्यावगाहि ज्ञानं तेन चानुमितिहेतुचरमलिङ्गपरामर्श इति अयं क्रमस्तदा स्यात् यदि देवदत्तयज्ञदत्तयोः चै[त्र]मै[त्रौ] अनाप्तौ स्याताम्, तत् तु नास्ति इति न तत्रातिव्याप्तिः । द्वितीयोद्देश्यपदस्य व्यावृत्त्यमाह - **पर्वत** इति टीका । चैत्रमैत्रयोर्विवादः पर्वतो वह्निमान् इत्यादिर्जायते । यत्र च देवदत्तयज्ञदत्तौ प्रति यो धूमवान् सोऽग्निमान्

१. सुवर्णगवे । ''गोरतद्धितलुकि'' इति टचि सिद्ध्यति ।

धूमवानिति पक्षः । प्रतिज्ञाक्रममादाय यत्र न्यायप्रवृत्तिः तत्र पर्वतो वह्निमान् इति क्रममादाय न्यायप्रवृत्तिः । यो धूमवान् सोऽग्निमान् इति उदाहरणवाक्यं चैत्रमैत्रौ प्रति प्रतिज्ञा स्यात्, चैत्रमैत्रयोरुद्देश्याऽनुमितिः पर्वते वह्निरिति, उद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वम् उदाहरणवाक्ये चैत्रमैत्रयोरुदाहरणवाक्ये वर्तते । अनुमितीत्याद्युत्तरदलमपि तत्र वर्तते । कथम् ? यद्यपि पर्वतो वह्निमान् इत्युद्देश्यानुमितिस्तदन्यूनानतिरिक्त-वृत्तिताविषयता उदाहरणवाक्ये नास्ति यतस्तत्र धूमोऽपि भासते तथापि चैत्रमैत्रयोरनुद्देश्यायां देवदत्तयज्ञदत्तयोः कथायामनुमितिर्यो धूमवान् स वह्निमान् इत्यादिरूपा [162 A] अनुमितिस्तदन्यूनानतिरिक्तविषयता एतस्यो-दाहरणस्य वर्तते, इदमुदाहरणं चैत्रमैत्रयोः प्रतिज्ञा स्यात् । तदर्थं द्वितीयमुद्देश्यपदम् । तथा च यस्यां कथायां प्रतिज्ञात्वमापादनीयं तस्यां कथायां या उद्देश्यानुमितिः पर्वतो वह्निमान् इत्यादिरूपा तदन्यूनानतिरिक्तविषयता एतस्योदाहरणवाक्यस्य नास्ति किन्तु अनुद्देश्या याऽनुमितिः यो यो धूमवान् सोऽग्निमान् इति रूपा तदन्यूना-नतिरिक्तविषयत्वमेव तिष्ठति इति कृत्वा उदाहरणावाक्ये नातिव्याप्तिः । एतदेवाह - **अग्रेऽपी**ति टीका । तथा चोद्देश्यानुमितिपरम्पराप्रयोजकन्यायवाक्यान्तर्गतोदाहरणस्य यो धूमवान् स वह्निमान् इत्यादिरूपस्य यो धूमवान् स वह्निमान् इत्याद्यनुमित्यन्यूनानतिरिक्तविषयकत्वं यद्यपि वर्तते तथापि उद्देश्यानुमितिरेवेयं न भवति । उद्देश्या-नुमितिस्तु पर्वतो वह्निमान् इत्येव न तु धूमवान् वह्निमान् इतिरूपा । तथा चोद्देश्यपदेनैव तद्वारणम् । ननु उद्देश्यपदे दत्तेऽपि असम्भवः । कथम् ? धूमवत्त्वाद् वह्निमान् इति उद्देश्यानुमितिः, एत[द]न्यूनानतिरिक्तवृत्तिता प्रतिज्ञायां नास्ति । लिङ्गोपहितलैङ्गिकभानं धूमवत्त्वाद् वह्निमान् इति रूपम् । तत्र प्रतिज्ञावाक्यजन्ये बोधे लिङ्गं न भासते यतो वह्निमान् इत्येव प्रतिज्ञावाक्यम् । ततोऽनुमित्यपेक्षया न्यूनविषयत्वं प्रतिज्ञावाक्यजन्यबोधस्येत्यसम्भव इत्यत आह - **लिङ्गाभानपक्षे** इति टीका । तथा च [1]यन्मते लिङ्गोपहितलि(लै)ङ्गिकभानपक्षो नास्ति तन्मते । **चिन्तामणिकार**मते उद्देश्यानुमित्यन्यूनानति[रिक्त]विषयकत्वं प्रतिज्ञावाक्यस्य वर्तते एवेति कृत्वा नासम्भव इति । **एतदर्थमि**ति टीका । न्यायान्तरस्थप्रतिज्ञाया यो धूमवान् स वह्नि[मानि]त्यादिरूपायाः पर्वतो वह्निमान् इत्यादिन्याये प्रतिज्ञात्वं मा भूदित्यर्थः । तथा च यो धूमवान् स वह्निमान् इति प्रकृतन्याये उदाहरणवाक्यम् न्यायान्तरे चेदं प्रतिज्ञावाक्यम् । प्रकृतन्याये यो धूमवान् स वह्निमान् इत्युदाहरणवाक्यस्य प्रतिज्ञात्वं स्यात्, यो धूमवान् सो वह्नि[मानि]त्याद्यनुमितिस्तदनुमित्यन्यूनानतिरिक्तविषयता तिष्ठति । प्रकृतानुमितिरुद्देश्यानुमितिः पर्वतो वह्निमान् इत्यादिका । तदनुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वमुदाहरणवाक्यस्यास्ति इति अतिव्याप्तिवारणार्थं द्वितीयमुद्देश्यपदम् । तथाहि चैत्रमैत्रयोर्वादे उद्देश्यानुमितिः पर्वतो वह्निमान् इति रूपा । देवदत्तयज्ञदत्तयोर्विवादे प्रतिज्ञावाक्यं यो धूमवान् सोऽग्निमान् इति वह्निव्याप्यत्वात् । तस्मात् धूमवान् वह्निमान्

१. वाचस्पतिमते । प्रतौ टिप्पणी ।

इति अनुमितिवाक्यम् एतदनुमित्यपेक्षया चैत्रोदाहरणवाक्यम् अन्यूनानतिरिक्तविषयकं भवतीति प्रतिज्ञालक्षण-मुदाहरणवाक्येऽतिव्याप्तमिति स्पष्टोऽर्थः। तद्वारणायोत्तरदलस्थमुद्देश्यपदम्।[162 B] नन्वनुमितौ लिङ्गभानपक्षे तु असम्भवः। कथम् ? उद्देश्यानुमितिन्यूनविषयत्वमेव प्रतिज्ञावाक्यस्येत्यत आह - **तद्भानपक्ष** इति। अनुमितौ लिङ्गभानपक्षे तु असम्भववारणार्थमुद्देश्यपदम्। ननु तथाप्युद्देश्यपदे दत्तेऽपि पुनरसम्भवः तथाहि लिङ्गोपहि-तलैङ्गिकभानपक्षे इत्यर्थः। **यद्विषयत्वेनेति** टीका। तथा च यादृशे विषयांशेऽनुमितेरुद्देश्यत्वं तादृशांशेऽनुमितेरन्यू-नानतिरिक्तविषयकत्वं विवक्षितमस्ति। तथा च धूमवत्त्वांशेऽनुमितेरुद्देश्यत्वं नास्ति किन्तु पर्वतवह्न्यंश एव। तथा चाग्रिमदले यद्युद्देश्यपदं त्यज्यते तदाऽसम्भव एव। यतो लिङ्गोपहितलैङ्गिकभानपक्षे प्रतिज्ञावाक्यजन्यबोधस्य धूमवत्त्वात् पर्वतो वह्निमान् इत्येवंरूपा या अनुमितिस्तदपेक्षयाऽपि न्यूनविषयत्वं वर्तते तदर्थमुद्देश्यपदम्। तथा च धूमवत्त्वांशेऽनुमितेरुद्देश्यत्वमेव नास्ति किन्तु पर्वतवह्न्यंश एव। तथा च पर्वतवह्न्यंशे याऽनुमितिस्तदपेक्षया प्रतिज्ञावाक्यस्यान्यूनानतिरिक्तविषयकत्वमेवास्ति, एवमसम्भवो निरस्तः। एवं लिङ्गोपहितलैङ्गिकभानपक्षा-पक्षाभ्याम् अग्रिमोद्देश्यपदस्य व्यावृत्तिरुक्ता। अन्यूनपदस्य कृत्यमाह - **प्रतिज्ञेति** टीका। पर्वत इत्यस्मिन् भागे वा वह्निमान् इत्यस्मिंन् भागे वा अतिव्याप्तिः। यथा - प्रतिज्ञावाक्यार्थबोधद्वारा सत्यन्तं तिष्ठति अनुमित्यपेक्षयाऽ-नतिरिक्तविषयताऽपि तिष्ठति, अनुमितौ पर्वतोऽपि भासते वह्निरपि भासते, अत्र खण्डे वाक्ये एकत्र वह्निर्भासते एकत्र पर्वत एव भासते इति कृत्वा यावन्तोऽत्र भासन्ते तावन्तोऽनुमितावा[व]श्यं भासते(न्ते) इति कृत्वाऽन्यूनपदम्, प्रतिज्ञैकदेशस्तु न्यून एवानुमित्यपेक्षया। अत्राशङ्कते - **न चेति**। तथा च अनतिरिक्तपदं व्यर्थम् अवयवान्तराणा-मुदाहरणादीनामन्यूनपदेनैव वारणात्। प्रतिज्ञायामधिकं पर्वतोऽपि भासते। तच्च कस्मिन्नप्यवयवान्तरे न भासत इत्याशङ्कार्थः। समाधत्ते - **यत्रेति** टीका। यत्र यत्र पृथिवीतरभिन्नत्वाभावस्तत्र तत्र पृथिवीत्वाभाव इत्युदाहरणवाक्ये पृथिवीत्वस्य पक्षतावच्छेदकस्यापि भानात्। तत्रोदाहरणवाक्ये प्रतिज्ञावाक्यापेक्षयाऽन्यूनविषयत्वं तिष्ठति तत्र पक्षतावच्छेदकस्यापि भानात् इति तत्रोदाहरणैकदेशे यत्र पृथिवीतरभिन्नत्वाभाव इत्यादौ अतिव्याप्तिः। एतद् दूषयति - **तत्रेति**। प्रतिज्ञावाक्यजन्ये बोधे पृथिवी इतरेभ्यो भिद्यते इति रूपे पृथिवीत्वस्य इतरभेदस्य च सामानाधिकरण्यं भासते। उदाहरणैकदेशेऽभावस्य इतरभिन्नत्वं विशेषणम्, इतरभेदे च पृथिवीविशेषणम्, पृथिव्या च पृथिवीत्वं विशेषणम्, न तु एकस्मिन् विशेष्ये पृथिव्याम् इतरभेदः पृथिवीत्वं च विशेषणम् उदाहरणैकदेशजन्ये बोधे भासते येन तदुभयसामानाधिकरण्यबोधः स्यात्। तथा चोदाहरणैकदेशे पृथिवीत्वेतर-भेदसामानाधिकरण्यस्याभानात् *[163 A] प्रतिज्ञावाक्यजन्यबोधापेक्षया न्यूनत्वात् न तत्रातिव्याप्तिरिति भावः।* स्वयं समाधत्ते - **यदि चेति** टीका। तस्माद् वह्निमान् अयम् इत्याकारकं निगमनम्। तत्र निगमनेऽतिव्याप्तिरिति तद्वारणार्थम् अनतिरिक्तपदम्। अनतिरिक्तविषयत्वमुपपादयति - **अयमिति**। तथा चायमिति सर्वनाम भवति

सर्वनाम्नो बुद्धिस्थवाचकत्वम्। तथा च येन रूपेण बुद्धिस्थता तत्प्रकारकोपस्थितिः क्रियते तथा च पर्वतत्ववह्न्योः सामानाधिकरण्यं निगमने भासते तेन प्रतिज्ञाजन्यबोधापेक्षया निगमनस्यान्यूनविषयत्वं भवतीति कृत्वा निगमनेऽतिव्याप्तिः तद्वारणाय अनतिरिक्तपदम्। प्रतिज्ञावाक्यापेक्षया निगमनवाक्ये वह्निव्याप्यधूमवत्त्वादि-कमप्यधिकं भासते इति न निगमनेऽतिव्याप्तिः। ननु तथापि तस्माद् वह्निमान् इत्यत्र निगमनवाक्यस्थं तस्मादित्यंशं परित्यज्य वह्निमान् अयम् इति निगमनैकदेशेऽतिव्याप्तिस्तदवस्थैवेत्यत आह - **एवं चेति**। एतन्मते अनतिरिक्तपदं येन प्रक्षिप्तं तन्मते निगमनावयवान्यत्वे सतीत्यपि विशेषणं दातव्यम्। तेन निगमनैकदेशे नातिव्याप्तिः। अथ प्रतिज्ञालक्षणे उत्तरदलस्थशाब्दपदप्रयोजनमाह - **न चेति** शङ्क्यम्। अत्र कस्यचित् समाधानमाह - **घटशब्देति** टीका। घटशब्दो गुणः द्रव्यकर्मान्यत्वे सति सत्त्वात्। अत्र घटशब्दो गुण इति प्रतिज्ञावाक्यम्, पञ्चम्यन्तं हेतुः। यत्र यत्र द्रव्यकर्मान्यत्वे सति सत्त्वं तत्र तत्र गुणत्वं यथा यदा घटशब्द गुण इत्ययमेव दृष्टान्तः कृतस्तदा प्रतिज्ञा-वाक्यमेव दृष्टान्तो जातः, तत्रोदाहरणैकदेशे प्रतिज्ञालक्षणस्यातिव्याप्तिः, दृष्टान्तवाक्यं प्रतिज्ञावाक्यसमाना-कारकमिति तदा तत्राति(नि)वारकत्वात्। कथं शाब्दपदेन तद्वारणमित्यत आह - **न हीति** टीका। **तस्येति** टीका। **तस्येति** घटशब्दो गुण इति प्रतिज्ञावाक्यरूपदृष्टान्तस्य यदनुमितीत्यादि अनुमितिहेतुलिङ्गपरामर्श-प्रयोजकवाक्यार्थज्ञानजनकत्वं यत् तत् शाब्दज्ञानजनकत्वेन नास्ति। न हि प्रतिज्ञारूपेण दृष्टान्तेन स्ववाक्यार्थज्ञानं जनयित्वा पश्चाद् उदाहरणजन्यबोधद्वारा परम्परयाऽनुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानं जन्यते। **स्व-ज्ञानत्वेनेति**। घटशब्दो गुण इति प्रतिज्ञावाक्यरूपदृष्टान्तस्य स्वज्ञानं दृष्टान्तस्य ज्ञानमात्रं न्यायजन्यमहावाक्यार्थबोधं प्रति स्वरूपसत्स्वज्ञानेनैवोपयुक्तम् न तु स्ववाक्यार्थबोधद्वारा। तथा च शाब्दपदे दत्तेऽनुमितिहेतुलिङ्गपरामर्श-प्रयोजकशाब्दज्ञानजनकता या सा अनुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानत्वेन न किन्तु स्वज्ञानत्वेन [163 B] यथा ध्वन्यात्मकशब्दस्य ज्ञानमात्रमुपयुक्तं तथा एतस्यापि ज्ञानमात्रमुपयुक्तं न तु एतद्वाक्यार्थज्ञानमुपयुक्तम्। एतदेवाह - **विवक्षितं त्विति** टीका। शाब्दज्ञानत्वेन रूपेण अनुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञान-जनकत्वेन उद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वं विवक्षितमित्यर्थः। दूषयति - **तस्येति**। प्रतिज्ञात्वेन सङ्ग्राह्यत्वात् यत्र प्रतिज्ञारूप एव दृष्टान्तः कृतस्तत्र सा प्रतिज्ञा भवत्येवेति कृत्वा तद्व्यावृत्त्यर्थं शाब्दपदं न देयमेव। ततः शाब्दपदं व्यर्थम्। उपसंहरति - **तस्मादिति** टीका। सम्पातायातं शाब्दपदं पूर्वं व्याख्यातम्। अथ प्रतिज्ञालक्षणे वाक्यपदप्रयोजनमाह - **पक्ष** इति। पक्षवाचकं पदं साध्यवाचकं च पदम्। तत्र साध्यवाचके पदेऽतिव्याप्तिः। पक्षवाचकं पदं पर्वत इति पदम्। साध्यवाचकं पदं वह्निरिति। प्रतिज्ञालक्षणस्थं पूर्वदलमप्यस्ति उत्तरदलमप्यस्ति। तथा च प्रतिज्ञाजन्ये बोधे स्वार्थज्ञानद्वारा वाक्यार्थबोधं प्रति उद्देश्यानु-मित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वं तिष्ठति परं प्रतिज्ञैकदेशे प्रतिज्ञात्वं नास्तीति अतिव्याप्तिवारणाय

वाक्यपदम् । न च तदपि प्रकृतिप्रत्ययाभ्यां मिलित्वा वाक्यं भवत्येवेति अत आह - **तथा चेति** । तादृशज्ञानं पक्षतावच्छेदकसाध्यसामानाधिकरण्यावगाहि ज्ञानं पदसमुदायः । अथवा पूर्वोक्तोद्देश्यानुमितीत्यारभ्य शाब्दज्ञानपर्यन्तं तत्तादृशज्ञानमित्यर्थः । ननु वाक्यपदेन पदसमुदायत्वं कथं लब्धमित्यत आह - **वाक्यपदस्येति** टीका । वाक्यपदस्य पदसमुदायवाचकत्वादित्यर्थः । अत्राशङ्कते - **न चेति** । पर्वतो वह्निमान् धूमात् इत्यत्र वह्निं प्रति धूमस्य न कारकत्वं वह्नेर्धूमाजन्यत्वात् नापि ज्ञापकत्वं करणत्वशक्तायाः पञ्चम्या ज्ञापकत्वे लक्षणापत्तेः । न चेष्टापत्तिः सुब्विभक्तौ लक्षणानङ्गीकारात् । तत्रापि लक्षणाङ्गीकारे व्यत्ययानुशासनवैयर्थ्यं स्यात् । तथा च पञ्चम्यनन्विता स्यादिति कृत्वा प्रतिज्ञायां ज्ञातव्यत्वलक्षणा, तेन पर्वतो वह्निमान् इत्यस्य कोऽर्थः ? वह्निमत्तया ज्ञातव्यः पर्वतः । तथा च प्रतिज्ञाजन्ये बोधे वह्निज्ञानं भासते । अनुमितौ वह्निज्ञानं न भासते किन्तु वह्निरेव भासते । ततः प्रतिज्ञावाक्यजन्यस्य बोधस्यानुमित्यन्यूनानतिरिक्तविषयता नास्ति किन्तु अनुमित्यपेक्षयाऽधिकविषयता तथा चासम्भव इत्याशङ्कार्थः । समाधत्ते - **वह्निमानिति** । वह्निमान् इत्यस्य हेत्वन्वयानुपपत्त्या हेतुत्वप्रतिपादक-पञ्चमीविभक्त्यर्थान्वयानुपपत्त्या ज्ञातव्यत्वलक्षणया वाक्यार्थबोधात् पूर्वमन्वयानुपपत्तिप्राक्कालीन-मुख्यार्थबोधमादायानुमित्यन्यूनानतिरिक्तविषयता प्रतिज्ञावाक्यस्योपपादनीया । [164 A] यथा लक्षणास्थले बोधद्वयम् - एकः प्राथमिकः शक्यार्थबोधः , तदनन्तरं लाक्षणिको बोधः । यथा यष्टीः प्रवेशयेत्यत्र यष्टीनां प्रवेशनान्वयबोधः शक्यार्थान्वयबोधः, तदनन्तरं पाकपदार्थोपस्थित्यनन्तरं निष्पन्ने पाके यष्टीनामनन्वयात् यष्टिपदस्य यष्टिधरे लक्षणा । तथा च यष्टिधरान् प्रवेशय इति द्वितीयोऽन्वयबोधः । तदनन्तरं प्रविष्टयष्टिधरप्रयोजनकः पाक इति तृतीयोऽन्वयबोधः । तद्वत् अत्रापि पर्वतो वह्निमान् एतस्माद् वाक्यात् प्रथमतः पर्वतवह्निवैशिष्ट्यावगाहि ज्ञानं शक्यो बोधः । तदनन्तरं वह्निज्ञानं प्रति पञ्चम्यन्तधूमपदप्रतिपाद्यधूमनिष्ठहेतुत्वान्वयबोधस्तृतीयः[1] । तथा च वह्निज्ञानं(ने) धूमः कारणमिति यावत् । इति बोधप्रक्रिया । तथा च प्रतिज्ञाजन्यद्वितीयबोधमादाय न लक्षणं योजनीयं किन्तु प्राथमिकबोधमादायैव लक्षणं योजनीयमिति नासम्भवः । एतदेवाह - **प्राक्कालिकमुख्यार्थान्वयबोधेति** टीका । मतान्तरमाह - **केचित् त्विति** । तथा च प्रतिज्ञावाक्ये ज्ञानलक्षणैव नास्ति । ननु तर्हि पञ्चम्यन्त-हेतुत्वान्वयानुपपत्तिरिति चेन्न, हेतुत्वमपि न पञ्चम्याः शक्योऽर्थः, अपादाने पञ्चमीत्यनुशासनात् इत्यवधिः पञ्चम्याः शक्योऽर्थः । तथा चात्रावधित्वमनुपपन्नमिति कृत्वा ज्ञापकत्वे लक्षणा । न चैवं व्यत्ययानुशासनवैयर्थ्यं स्यात् इति वाच्यम् । अन्यविभक्तेरननुशिष्टान्यविभक्त्यर्थे लक्षणा नास्ति । एतत् प्रतिपादनार्थं व्यत्ययानुशासनमपि सार्थकमिति इत्याहुरित्यस्यार्थः । शङ्कते - **नन्विति** । प्रति[ज्ञा]लक्षणे शङ्क्यम् । सर्वं प्रमेयम् इत्यत्र प्रतिज्ञा भवति परमत्र प्रतिज्ञालक्षणं न वर्तते । तथाहि अनुमित्यन्यूनानतिरिक्तविषयकेत्यत्र तादृशं शाब्दज्ञानं विवक्षितम् ।

---

१. द्वितीयान्वयबोधप्रतिपादकं वाक्यं प्रतौ नास्ति ।

प्रकृते चानुमितिविषयः सर्वं प्रमेयमिति तदपेक्षयाऽधिको विषयोऽप्रसिद्धः सर्वप्रमेयातिरिक्तस्य वस्तुनोऽप्रसिद्धेः। तथा चातिरिक्तविषयाप्रसिद्ध्या प्रतिज्ञालक्षणमस्यां प्रतिज्ञायामव्याप्तमित्याशङ्कार्थः। मध्ये शङ्कते - **न चे**ति। तथा च तत्र विवाद एव नास्ति। यत्र विवादस्तत्रैव न्यायप्रवृत्तिः। ततोऽत्र न्यायप्रवृत्तेरभावात् कथं प्रतिज्ञात्वम्। समाधत्ते - **अनुमित्सया ही**ति। तथा चानुमित्सयाऽपि न्यायावतारे प्रतिज्ञात्वं सम्भवत्येव। अनुमित्सया कुत्रापि न्यायप्रवृत्तिर्न दृष्टेत्यस्वरसादाह - **भिन्ने**ति। यदि च सर्वं प्रमेयमित्यत्र सर्वथा संशय एव नास्ति तदा बाधकमाह- **अन्यथे**ति टीका। केवलान्वयिहेतुलक्षणं केवलान्वयिसाध्यकहेतुलक्षणमग्रेतनं विरुध्येत। [164 B] यदि केवलान्वयिसाध्यस्थले संशय एव नास्ति तदा तत्साध्यकं केवलान्वयिसाध्यहेतुकरणं तद्विरुध्येत। भिन्नप्रकारक-संशयमुपपादयति - **सत्त्वमि**ति। सर्वप्रमेयत्वस्य सर्ववृत्तित्वनिश्चये सर्वविशेष्यकप्रमेयत्वप्रकारकः सन्देहो मा भूत्, किन्तु प्रमेयत्वे सर्वपदार्थवृत्तित्वं वर्तते न वेति सन्देहो भवत्येव। तथा च भिन्नप्रकारकसन्देहेनापि विवादे न्यायप्रवृत्तौ प्रतिज्ञाकरणं सम्भवत्येवेति तत्राव्याप्तिः। अव्याप्त्यन्तरमप्याह - **सत्त्वमि**ति टीका। तथा च सत्त्वं सर्वपदार्थवृत्ति। सर्वपदार्थवृत्तित्वं साध्यं केवलान्वयि न भवति। सर्वपदार्थवृत्तित्वस्याप्रसिद्ध्या लक्षणा-व्याप्तिरिति भावः। प्रतिज्ञालक्षणे सिद्धान्तमाह - **अनुमिती**ति टीका। अनुमित्यन्यूनानतिरिक्तस्येति कोऽर्थः ? अनुमितिविषयतासमव्याप्तविषयकत्वे सतीति विशेषणमनुमित्यन्यूनानतिरिक्तपदस्थाने दातव्यम्। अयमर्थः - तथा चोद्देश्यानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वे सति उद्देश्यानुमितिविषयतासमव्याप्त-विषयकशाब्दज्ञानजनकत्वं प्रतिज्ञालक्षणम्। सत्यन्तम् आप्तवाक्ये पर्वतो वह्निमान् इति रूपेऽतिव्याप्तिवारणाय। आप्तवाक्ये उक्तरूपे सत्यन्तं नास्ति। तत्राहत्यैव चरमकारणपरामर्श उत्पद्यते। मध्ये मानसं ज्ञानं नोत्पद्यते इति न तत्र प्रयोजकत्वमिति भावः। आप्तवाक्येऽनुमितिविषयता पक्षस्य साध्यस्य चास्ति तत्समव्याप्ता विषयता वर्तते, पर्वतो वह्निमान् इत्येतस्माद् वाक्याज्जायमानं यत् शाब्दज्ञानं तत्रापि आप्तवाक्यशाब्दज्ञानजनकत्वं वर्तते। सा विषयता पर्वतेऽप्यस्ति वह्नावप्यस्तीति आप्तवाक्येऽस्तीति परं तत्र सत्यन्तत्वाभावान्नातिव्याप्तिः। उत्तरमूलं योजयति - **यद्वे**ति टीका। समव्याप्तविषयताकत्वपक्षेऽप्यस्वरसं दर्शयति - **प्रतिज्ञायामि**ति। तथा च पर्वतो वह्निमान् इति प्रतिज्ञायामनुमित्या सह समविषयताकत्वमपि नास्ति। तथाहि पर्वतो वह्निमान् इति प्रतिज्ञायां मतुबर्थः सम्बन्धः। तथा च मतुबर्थो वह्निसम्बन्धः, स च पदार्थस्तस्यापि संसर्गः संसर्गमर्यादया भासते। अनुमितौ च पर्वते वह्निसंसर्गमात्रमेव भासते न तु अनुमितौ वह्निसंसर्गसंसर्गः, यतोऽनुमितौ वह्निः प्रकारत्वेन भासते पर्वतो विशेष्यत्वेन भासते पर्वतवह्निसंसर्गस्तु संसर्गमर्यादया भासते। एतदेवाह - **अनुमितौ त्वि**ति टीका। तद्भाने संसर्गसंसर्गभाने इत्यर्थः। अनुमितौ तु संसर्ग एव भासते न तु संसर्गसंसर्गः। अनुमितौ पक्षसाध्यसंसर्ग एव भासते न तु पक्षसाध्यसंसर्गसंसर्गस्यापि भानमिति भावः। उपसंहरति - **अनतिरिक्ते**ति टीका

[165 A]। अनुमित्यपेक्षया प्रतिज्ञावाक्यार्थजन्ये बोधेऽतिरिक्तविषयकत्वमेव, पक्षसाध्यसंसर्गस्यापि प्रतिज्ञा-वाक्येऽतिरिक्तस्यापि भानात्। अत्रापि सत्यन्तप्रयोजनमाह - **न्यायप्रविष्टेति**। पर्वतो वह्निमान् इति उदासीनवाक्ये आप्तवाक्ये लिङ्गाविषयकशाब्दज्ञानजनकत्वं वर्तते परन्तु न्यायजन्यवाक्यार्थज्ञानजनकत्वं नास्तीति नाप्तवाक्येऽतिव्याप्तिः । अवयवान्तरे हेत्ववयवादौ अतिव्याप्तिवारणाय लिङ्गाविषयकेति हेत्वाद्यवयववाक्यं लिङ्गविषयकमेवेति न तत्रातिव्याप्तिः। ननु प्रतिज्ञालक्षणे शाब्दपदं व्यर्थमित्यत आह - **स्पष्टार्थमिति** टीका। तथा च शाब्दपदस्य न तथाविधं प्रयोजनमित्यर्थः । ननु तथापि प्रतिज्ञैकदेशे पर्वत इत्यंशेऽतिव्याप्तिः यतो न्यायजन्यं यद् वाक्यार्थज्ञानं तज्जनकत्वं प्रतिज्ञैकदेशेऽप्यस्तीति कृत्वा तत्रातिव्याप्तिवारणाय वाक्यपदम्। ननु प्रतिज्ञैकदेशोऽपि वाक्यं भवत्येवेत्यत आह - **वाक्यपदमिति** टीका। अवयवावयवव्यतिरिक्तत्वे सतीत्यर्थः। प्रतिज्ञैकदेशस्तु अवयवावयव एवेति न तत्रातिव्याप्तिः। वक्ष्यमाणदोषभिया व्याचष्टे - **लिङ्गाविषयकज्ञानजनकत्वं चेति** टीका। लिङ्गाविषयकज्ञानजनकत्वमित्येतस्यायमर्थः - लिङ्गविषयकज्ञानजनकत्वनियतो योऽवयवस्तदन्यत्वे सतीत्यर्थः। तेन हेत्वाद्यवयवे तु लिङ्गविषयकज्ञानजनकत्वनियतत्वमेव वर्तते इति न तत्रातिव्याप्तिः। ननु तथापि स दोषो वक्ष्यमाणदोषस्तदवस्थ एवेत्यत आह - **तेनेति** टीका। तेन हेत्वाद्यवयवचतुष्टयान्यत्वं लिङ्गाविषयकेति पदस्यार्थः । उक्तदोषमनुवदति - **अन्यथेति** टीका । यत्र प्रतिज्ञायां पृथिवी इतरेभ्यो भिद्यते इत्येवंरूपायां पृथिवीत्वमेव हेतुः पृथिवीत्वमेव पक्षतावच्छेदकम् । तस्यां प्रतिज्ञायां लिङ्गाविषयकत्वं नास्ति किन्तु लिङ्गा(ङ्ग)विषयकत्वमेवास्तीति कृत्वाऽव्याप्तिः। अत्राशङ्कते - **न चेति लिङ्गतेति**। पृथिवी इतरेभ्यो भिद्यते इति प्रतिज्ञायां पृथिवीत्वं लिङ्गं यद्यपि पक्षतावच्छेदकविधया भासते तथापि लिङ्गतावच्छेदकरूपेण तु न भासते। हेत्वाद्यवयवे तु पृथिवीत्वादित्यादौ हेतुतावच्छेदकरूपेण पृथिवीत्वादित्युच्यमाने पृथिवीत्वत्वेन रूपेण पृथिवीत्वं भासते। प्रतिज्ञावाक्ये तु शुद्धं पृथिवीत्वं भासते न तु पृथिवीत्वत्वेन रूपेण। ततस्तत्र नातिव्याप्तिरित्याशङ्कार्थः। समाधत्ते - **धूमकालादेरिति**। यत्र धूमकालीनः पर्वतः पक्ष इत्यत्र धूमकाल एव पक्षतावच्छेदकः कृतस्तत्र धूमत्वेनैव रूपेण धूमोऽपि भासते। तथा च तत्र हेतुतावच्छेदकरूपेण पृथिवीत्वं भासते। प्रतिज्ञावाक्ये तु शुद्धं पृथिवीत्वं भासते । प्रतिज्ञावाक्ये तु [लिङ्गविषयकत्वं] नास्ति किन्तु लिङ्गाविषयकत्वमेवेति प्रतिज्ञावाक्ये पुनरव्याप्तिरेवेत्यर्थः। तस्मात् उद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वे [165 B] सति लिङ्ग-विषयकत्वज्ञानजनकत्वनियतावयवान्यत्वं प्रतिज्ञात्वम्। तथा च प्रतिज्ञावाक्येऽव्याप्तिर्न भवति यतः प्रतिज्ञा-रूपोऽवयवो लिङ्गविषयकत्वनियतावयवभिन्नो भवत्येव लिङ्गविषयकत्वनियता अवयवा हेत्वादयस्तद्भिन्नत्व-मस्त्येवेति। अत्राशङ्कते - **न चेति** टीका। **विवक्षितेऽपीति** टीका। विवक्षितं लिङ्गविषयकत्वज्ञानजनकत्वनिय-तावयवान्यत्वम् इति, विवक्षितेऽपि लिङ्गविषयकत्वज्ञानजनकत्वनियमो यः हेत्वादितत्तदवयवव्यक्त्यवच्छेदेन

विवक्षितः किंवा हेत्ववयवत्वाद्यवच्छेदेन वा। आद्ये आह - **तादृशेति** टीका। तादृशी या प्रतिज्ञा इत्यादि। धूमकालीनः पर्वतो वह्निमान् इत्यादिप्रतिज्ञायामेतत्प्रतिज्ञाद्यवच्छेदेन लिङ्गविषयकज्ञानजनकत्वमेव वर्तते इति कृत्वा तदन्यत्वं नास्तीति प्रतिज्ञायामव्याप्तिः। द्वितीयमुट्टङ्क्य दूषयति - **अथेति** टीका। यदि हेत्ववयवत्वाद्यवच्छेदेन लिङ्गविषयकज्ञानजनकत्वनियतत्वं विवक्षितं तथा च धूमकालीनेत्येतत्प्रतिज्ञाव्यक्त्यवच्छेदेन लिङ्गविषयकज्ञान-जनकत्वनियतत्वं वर्तते तथापि पर्वतो वह्निमान् इत्यादिप्रतिज्ञायां लिङ्गविषयकत्वेत्यादि नास्ति। अतः प्रतिज्ञात्वावच्छेदेन तन्नास्तीति कृत्वा नाव्याप्तिः एवं चेत् तर्हि यथाश्रुतमेवास्तु। तथाहि लिङ्गविषयकज्ञान-जनकतावच्छेदकं यदवयवत्वं तद्वत्त्वं प्रतिज्ञात्वमिति तथा चैतत् सर्वस्यां प्रतिज्ञायां वर्तते, कथम् ? लिङ्गविषयक-ज्ञानजनकतावच्छेदकं प्रतिज्ञात्वम्, तद्वत्त्वं तु धूमकालीनेत्यादिप्रतिज्ञायामप्यस्ति इति भावः। दूषयति - **प्रतिज्ञात्वस्येति**। प्रतिज्ञात्वस्यैव लक्ष्यतावच्छेदकत्वेनैव तदपरिचये लक्ष्यतावच्छेदकापरिचये प्रतिज्ञात्वा-वच्छेदेन लिङ्गविषयकज्ञानजनकत्वमेव ग्रहीतुं न शक्यते यत आदौ प्रतिज्ञात्वमेव न ज्ञातं तदा कथं प्रतिज्ञात्वा-वच्छेदेन लिङ्गविषयकज्ञानजनकत्वं ग्राह्यं तथा चान्योन्याश्रयो भविष्यति। यतः प्रतिज्ञात्वे ज्ञाते प्रतिज्ञात्वा-वच्छेदेन लिङ्गविषयकज्ञानजनकतावच्छेदकत्वग्रहः तस्मिन् च लिङ्गविषयकज्ञानजनकतावच्छेदकत्वग्रहे सति च एतद्घटितप्रतिज्ञात्वम् इति प्रतिज्ञात्वग्रहः इत्यन्योन्याश्रयः। ननु विवक्षितेऽपि लिङ्गविषयकज्ञानजनकत्व-नियतावयवान्यत्वरूपेऽन्योन्याश्रयो भविष्यति, यतो हेत्ववयवत्वे ज्ञाते सति हेत्ववयवत्वावच्छेदेन लिङ्ग-विषयकज्ञानजनकत्वनियमो ग्राह्यः तस्मिंश्च गृहीते तद्घटितं लिङ्गविषयकज्ञानजनकत्वनियतावयवान्यत्वं प्रतिज्ञात्वं तद्भिन्नत्वं प्रतिज्ञावयवभिन्नत्वं च हेत्ववयवत्वादिकमित्यन्योन्याश्रयमित्यत आह - **हेत्ववयवादेस्त्विति** टीका। हेतुरूपो हेतुवचनरूपो धूमवान् इति रूपो योऽवयवस्तदादेः, तथा च लिङ्गविषयकज्ञानजनकत्वं हेत्ववयवत्वावच्छेदेन ग्राह्यम्। एवमुदाहरणाद्यवयवत्वाद्यवच्छेदेन लिङ्गविषयकत्वं यथा यो यो धूमवान् स वह्निमान् इति। हेत्ववयवत्वं च न प्रतिज्ञाघटितम्। कथम् ? यदि [166 A] प्रतिज्ञेतरावयवत्वं हेत्वाद्यव-यवमित्युच्यते तदा प्रतिज्ञाघटितं स्यात्, तथा न कृतम्, अतो न प्रतिज्ञाघटितम्, किन्तु अग्रे तेषां लक्षणं प्रतिज्ञाद्य-घटितमेव करिष्यति किन्तु पञ्चम्यन्तेत्यादिनैवाग्रे ज्ञानं भविष्यतीति भावः। एतदेवाह - **लक्षणान्तर-प्रमितत्वेनेति**। लक्षणान्तरं पञ्चम्यन्तेत्यादि। तदवच्छेदेन हेत्ववयवत्वावच्छेदेनैव लिङ्गविषयकज्ञान-जनकत्वं सुग्रहमेव।

**अन्यूनानतिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणं तेनोदाहरणा-दिव्युदासः, निगमनं च न परामर्शहेतुः।**

अथ मूलम् । **अन्यूनानतिरिक्तेति** मूलम् । उत्तरदले उद्देश्यानुमित्यन्यूनानतिरिक्तेत्यादिदले उद्देश्यानुमित्यन्यूनानतिरिक्तेत्यंशं परित्यज्य लिङ्गाविषयकशाब्दज्ञानजनकत्वमेव लक्षणम् । लिङ्गं विषयो न विद्यते यस्मिन् तल्लिङ्गाविषयकम् । एवम्भूतं यत् शाब्दज्ञानं पर्वतो वह्निमान् इत्येवरूपं तज्जनकं यद् वाक्यम् । अन्येषां हेत्वाद्यवयवानां लिङ्गविषयकशाब्दज्ञानजनकत्वात् सर्वत्र प्रतिज्ञातिरिक्तस्थले लिङ्गविषयकत्वमेवेति नातिव्याप्तिः । आप्तवाक्येऽतिव्याप्तिवारणाय पूर्वोक्तमुद्देश्यादि सत्यन्तमत्र लक्षणे विशेषणं ग्राह्यमेव ।

लिङ्गाविषयकस्येत्यस्य प्रयोजनमाह - **तेनेति** टीका । लिङ्गाविषयकपदेनेत्यर्थः । उदाहरणादिवाक्यं तु लिङ्गविषयकशाब्दज्ञानजनकमेवेति न तत्रातिव्याप्तिः । ननु निगमनैकदेशे तस्माद् वह्निमान् इत्यंशे लिङ्गाविषयकशाब्दज्ञानजनकत्वं वर्ततेऽतो हि तत्रातिव्याप्तिरित्यत आह - **निगमनं चेति** मूले । चकारः कटाक्षे । तथा च यत्र निगमनं सम्पूर्णमपि न परामर्शहेतुः कुतस्तदेकदेशः परामर्शहेतुरित्यर्थः । तथा चोद्देश्यानुमितिहेतुभूतो यः परामर्शः उपनयजन्यः परामर्शो वह्निव्याप्यधूमवांश्चायमिति रूपः तज्जनकत्वं निगमनस्य नास्ति कुतो निगमनावयवस्य तज्जनकत्वम् ? तथाहि - प्रतिज्ञाहेतूदाहरणोपनयैर्मिलित्वा एकमनुमितिरूपं हेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानमुत्पाद्यते । वह्निव्याप्यधूमवांश्चायमित्येतादृशपरामर्शजनकीभूतं शाब्दज्ञानमुत्पाद्यते । तदनन्तरं निगमनेनानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानमुत्पाद्यते यथाऽबाधिताऽसत्प्रतिपक्षि वह्निव्याप्यधूमवान् अयम् इति चरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानं जन्यते तथा च निगमनेऽनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वं वर्तते परमनुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वं नास्ति । यतः तेन चरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानमेव जन्यते न तु अनुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानम् । तेन निगमने नातिव्याप्तिरिति भावः ।

**अबाधितासत्प्रतिपक्षितत्वज्ञानजनकत्वात् । हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा । लिङ्गाविषयक-लिङ्गिविषयकज्ञानजनकन्यायावयववाक्यत्वं वा इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात् । प्रतिज्ञात्वं जातिः अनुगताननतिप्रसक्ततान्त्रिकव्यवहारादिति केचित्, तन्न, देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गात्, प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं वाक्यं प्रतिज्ञेत्यपि न, तज्ज्ञानजनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्यानुसरणीयत्वात् । एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञाना-**

**वृत्तिजातियोगिज्ञानजनकवाक्यं प्रतिज्ञेति निरस्तम्। ननु प्रतिज्ञा न साधनाङ्गं विप्रतिपत्तेः पक्षपरिग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेत्, न, विप्रतिपत्त्यग्रे हि समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनो वाकाङ्क्षायां शब्दानित्यत्वं साध्यम्, न च साध्यनिर्देशं विना हेतुवाक्यं निष्प्रतियोगिकमन्वयं बोधयितुमीष्टे। न च वादिवाक्येऽनुपस्थितमपि योग्यतया अन्वेति, अतिप्रसङ्गात्। न च विप्रतिपत्तितः साध्योपस्थितिः, तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरितत्वात् परविप्रतिपत्तिं समयबन्धं च विना स्थापनाया अभावात् विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण पर्यवसिततया निराकाङ्क्षत्वाच्च, आवृत्तौ तु सैव प्रतिज्ञा। न चावयवान्तरात् हेत्वन्वययोग्या साध्योपस्थितिः, नाप्यवयवान्तरेणाक्षेपात्, साध्यान्वये तदभिधानं तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात्। तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेहाक्षेपः। अन्ये तु शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा किन्तु विशिष्टे, विशिष्टं तु विशेषणं साध्यमनभिधाय न शक्याभिधानम्। न च वस्तुतो यत् साध्यं तत्र प्रमाणं वदेति मध्यस्थनियोगः, वादिद्वयमध्ये तदसम्भवात् तस्मात् साध्याभिधानं विना न हेतोराकाङ्क्षा, न वान्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति।**

कुत इत्यत आह - **अबाधितेति** मूलम्। [166 B] तथा चाबाधितासत्प्रतिपक्षितत्वज्ञानमेव विनिगमनेनोत्पद्यते, तेनाबाधिताऽसत्प्रतिपक्षितत्वविषयकं यद् वह्निव्याप्यपक्षधर्मत्वज्ञानं तदेव चरमलिङ्गपरामर्शः। प्रतिज्ञाया लक्षणान्तरमाह - **हेत्वभिधानेति**। हेत्वभिधानप्रयोजिका या जिज्ञासा तज्जनकं यद् वाक्यं भवति तत्त्वम्। कुत इति कुतो हेतोरिति एतादृशी या हेत्वभिधानप्रयोजिका जिज्ञासा तज्जनकत्वं वर्तते। अत्र हेत्वभिधानप्रयोजिका जिज्ञासा तज्जनकत्वं वर्तते। अत्र हत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वम्। अत्र वाक्यपदमवयववाक्यपरम्। वाक्यत्वमुदाहरणाद्यवयवेष्वतिव्याप्तमतो हेत्वभिधानेत्यादि। हेत्वभिधानप्रयोजकजिज्ञासाजनकत्वमात्रमुदासीनवाक्येऽतिव्याप्तमतो वाक्यपदमवयववाक्यपरं तदिति। प्रतिज्ञाया लक्षणान्तरमाह - **लिङ्गाविषयकेति** मूलम्। तथा च लिङ्गाविषयकज्ञानजनको यो न्यायावयवः स प्रतिज्ञा। न्यायावयवत्वमात्र-

मुदाहरणादावप्यस्ति, अतो लिङ्गाविषयकेति । लिङ्गाविषयकज्ञानजनकत्वमात्रमुदासीने घटम् आनय इति आप्तवाक्येऽतिव्याप्तम्, अतो न्यायावयवेति पदम् । अवयवान्तरेऽतिव्याप्तिं निरस्यति - **इतरावयवानामिति** मूलम् । हेत्वाद्यवयवानामित्यर्थः । तथा च हेत्वाद्यवयवानां लिङ्गविषयकज्ञानजनकत्वात् नातिव्याप्तिस्तत्रेत्यर्थः । मतान्तरमाह - **प्रतिज्ञात्वमिति** मूलम् । प्रतिज्ञात्वजातिमती प्रतिज्ञेति लक्षणं भवति। प्रतिज्ञात्वं च शब्दत्वावान्तर-जातिविशेषः । एतज्जातिसाधकमाह - **अनुगतेति** । यथा सर्वासु गोव्यक्तिषु ऐन्द्रियगवाकारानुगतव्यवहारात् गोत्वं जातिस्तथा सर्वासु प्रतिज्ञासु 'प्रतिज्ञा' 'प्रतिज्ञा' इत्यनुगतैन्द्रियकव्यवहारात् प्रतिज्ञात्वमपि जातिरेव । **ऐन्द्रियकेति** पदम् । अन्यथा पृथिवीत्वं परमाणुसाधारणी जातिरपि आनुमानिकानुगतव्यवहारादेव सिद्ध्येत् । तेनानुमानिकानुगतव्यवहारमात्रेणैव यदि पृथिवीत्वं जातिः सिद्ध्येत् तदा किमर्थं गन्धसमवायिकारणता-वच्छेदकत्वेन पृथिवीत्वजातिसाधनम् व्यर्थं स्यात् इत्यतोऽऽनुमानिकोऽनुगतव्यवहारो जातिसाधको न भवतीत्यत ऐन्द्रियकानुगतव्यवहारो जातिसाधक इत्युक्तम् । दूषयति - **देवदत्तप्रभवत्वादीति** मूलम् । तथा च प्रतिज्ञात्वं न जातिः देवदत्तप्रभवत्वेन सङ्करात् । तथाहि - देवदत्तशरीरप्रयोज्या या शब्दनिष्ठा विलक्षणा जातिर्यादृशजाति-विशिष्टशब्देन देवदत्तीयत्वादिकमनुमानं क्रियते अयं शब्दो देवदत्तीयो विजातीयशब्दत्वात् विजातीयशब्दः शरीरजन्य इति कृत्वा देवदत्तशब्दनिष्ठा या जातिः सा देवदत्तशरीरप्रयोज्या इति कृत्वा तया सह सङ्करः । तथाहि - यत्र यत्र देवदत्तशरीरप्रयोज्या जातिस्तत्र तत्र प्रतिज्ञात्वमेव नास्ति । उदासीने घटम् आनय इति देवदत्तीयवाक्ये देवदत्तशरीरप्रयोज्या जातिस्तिष्ठति, प्रतिज्ञात्वं नास्ति । यत्र यत्र प्रतिज्ञात्वं तत्र तत्र देवदत्तशरीरप्रयोज्या [167 A] जातिरेवं नास्ति, चैत्रप्रतिज्ञायां देवदत्तशरीरप्रयोज्या जातिर्नास्ति । उभयं च देवदत्तप्रतिज्ञायामस्तीति सङ्करः । एतदेवाह - **जातीति** मूलम् । मतान्तरे प्रतिज्ञालक्षणं दूषयति - **प्रतिज्ञाजन्यमिति** मूलम् । तथा च प्रतिज्ञावाक्यात् विजातीयमेव शाब्दज्ञानमुत्पद्यते तथा च तादृशं प्रतिज्ञावाक्याद् यद् ज्ञानं तदेव विजातीयं ज्ञानम्, तादृशविजातीयज्ञानविशेषजनकवाक्यं प्रतिज्ञा । ज्ञानविशेषे प्रतिज्ञाजन्यतावच्छेदिकाऽनुगता जातिस्तदा स्यात् यदि प्रतिज्ञा-ज्ञानविशेषयोरनुगतकार्यकारणभावः स्यात् । प्रतिज्ञायां यदाऽनुगतं रूपं नास्ति तदा प्रतिज्ञा-ज्ञानविशेषयोः कथं कार्यकारणभावः स्यात् । तथा च कार्यकारणभावाभावे ज्ञानविशेषजनकं वाक्यं प्रतिज्ञेति कथं स्यात् । एतदेवाह - **तज्ज्ञानजनकत्वमिति** मूलम् । प्रतिज्ञावाक्यादेर्यद् विजातीयं ज्ञानमुत्पद्यते तद् ज्ञानं प्रति या प्रतिज्ञावाक्यानां सर्वेषां जनकता साऽप्यनुगतरूपं सर्वासु प्रतिज्ञासु यावत्पर्यन्तं नास्ति तावत्पर्यन्तं जनकताज्ञानमपि न सम्भवतीति प्रतिज्ञावाक्येषु अनुगतरूपमपि न सम्भवति ज्ञानविशेषजनकत्वज्ञानमपि न सम्भवतीति विजातीयज्ञानविशेषजनकत्वरूपं लक्षणमशुद्धमित्यर्थः । तथा च लक्षणमपि न सम्भवति लक्षण-ज्ञानमपि न सम्भवतीत्यर्थः । एतदेवाह - **उक्तस्यैवेति** मूलम् । पूर्वमुक्तं न्याये प्रतिज्ञादौ वाऽनतिप्रसक्तेनेत्यनेन

ग्रन्थेनेत्यर्थः। मतान्तरमाशङ्क्य दूषयति - **एतेने**ति मूलम्। **शब्द** इति मूलम्। **लिङ्गी**ति मूलम्। लिङ्गिधीपराणि। लिङ्गिशब्देन साध्यम्। तथा च पक्षे साध्यवत्ताप्रतिपादकानि वाक्यानि प्रतिज्ञावाक्यानि तज्जन्यं यद् ज्ञानं तद्वृत्तिः एवम्भूता अथ च कृतकत्वादीनि हेतूदाहरणोपनयनिगमनादिवाक्यानि तज्जन्यज्ञानावृत्तिर्या जातिः अथ चाप्तवाक्यजन्यज्ञानावृत्तिरित्यपि बोध्यम्। तादृशी या जातिः तद्वद् यद् ज्ञानं तज्जनकं यद् वाक्यं सा प्रतिज्ञा। एतेन तदपि निरस्तमित्यन्वयः। पूर्वोक्तमेव दूषणम्। तथाहि विजातीयज्ञानविशेषजनकत्वं सर्वासु प्रतिज्ञास्वनुगतरूपमन्तरेण न सम्भवति। तज्ज्ञानमपि न सम्भवति। न च प्रतिज्ञात्वं जातिरनुगतं रूपमिति वाच्यं जातिसङ्करोक्तेः। उपाधिरपि ज्ञानविशेषजनकत्वं स चात्र न सम्भवति। अनुगतरूपमन्तरेण ज्ञानविशेषजनकत्वं यदनुगतरूपं तन्न सम्भवतीति निरासार्थः। अत्राशङ्कते - **नन्वि**ति मूलम्। प्रतिज्ञा न साधनाङ्गम् न न्यायाङ्गमित्यर्थः। कुतः ? ननु यदि प्रतिज्ञा न साधनाङ्गं तदा हेत्वाकाङ्क्षा कथं भविष्यतीत्यत आह - **विप्रतिपत्ते**रिति मूलम्। तथा च विप्रतिपत्तिर्विरुद्धार्थप्रतिपादकं वाक्यं शब्दो नित्यो न वेत्यादिरूपम्। तया विप्रतिपत्त्या एकोऽनित्यत्वपक्षोऽपरो नित्यत्वपक्षस्तत्परिग्रहे सति तत्र तस्मिन् एकपक्षपरिग्रहे प्रमाणाकाङ्क्षायां हेत्वभिधानमेवोचितम्। तथा च हेत्वादयश्चत्वार एव न्यायावयवाः सन्तु न प्रतिज्ञेत्याशङ्कार्थः [167 B]। समाधत्ते - **विप्रतिपत्ती**ति। न केवलं विप्रतिपत्त्यनन्तरमेव कथा प्रवर्तते किन्तु विप्रतिपत्त्यनं[तरं] समयबन्धानन्तरम्। समयबन्ध ईदृशो मयाऽनित्यत्वं साधनीयं त्वया नित्यत्वं साधनीयमिति। समयबन्धे जाते सति तदनन्तरं मध्यस्थस्यापि यद् वाक्यं शब्देऽनित्यत्वं साधय इति रूपमिति। मध्यस्थवाक्यानन्तरं वादिना शब्दानित्यत्वं साधनीयम्। तत्र यदि साध्यपक्षनिर्देशं विनापि हेतुवाक्यस्य प्रयोगः क्रियते तदा हेतुवाक्यं निराकाङ्क्षम् अन्वयबोधासमर्थमिति कृत्वाऽवश्यं पूर्वं पक्षे साध्यनिर्देशरूपा प्रतिज्ञा कर्तव्या, अन्यथा तया विना अनाकाङ्क्षिताभिधानेऽनित्यत्वसाधकवादिनो निग्रह एव भविष्यतीति प्रतिज्ञाऽपि साधनाङ्गम्। **निष्प्रतियोगी**ति मूलम्। अन्वयप्रतियोग्युपस्थितिं विनान्वयबोधासमर्थमित्यर्थः। अत्र शङ्कते - **न चे**ति मूलम्। तथा च वादिवाक्ये हेतुवाक्ये परस्य प्रतिवादिनोऽनुपस्थिता(तम)पि पक्षसाध्यादिकं योग्यतयाऽन्वेति इति न च वाच्यमित्यन्वयः। समाधत्ते - **अतिप्रसङ्गा**दिति मूलम्। यदि प्रतिवादिनो वादिवाक्याज्जायमाने ज्ञानेऽनुपस्थितमपि योग्यतयाऽन्वेति तदाऽतिप्रसङ्गः। तथाहि - यदि प्रतिज्ञावाक्यं न प्रयोक्तव्यं तदा हेत्वादिवाक्यान्यपि न प्रयोक्तव्यानि, केवलं निगमनमेव प्रयोक्तव्यम्, हेत्वादिवाक्यानां योऽर्थः सोऽनुपस्थित एव योग्यतया निगमनार्थेऽन्वेष्यति किं हेत्वादिवाक्यप्रयोगेणेत्यतिप्रसङ्गः। तथा च यदि प्रतिवादिनोऽनाप्तत्वेन वाक्यादनुपस्थितार्थो नान्वेतीति हेत्वादिप्रयोगः कर्तव्यस्तदा प्रतिज्ञाप्रयोगोऽपि कर्तव्य इति तुल्यम्। शङ्कते - **न चे**ति मूलम्। तथा च विप्रतिपत्त्या शब्दानित्यत्वोपस्थितौ सत्यां तत्र हेत्वाकाङ्क्षायां प्रतिज्ञावाक्यं विनाऽपि हेतुप्रयोगो भविष्यति किं प्रतिज्ञावाक्येनेत्याशङ्कार्थः।

समाधत्ते - **प्रतिवादीति**। तथा च शब्दोऽनित्य इति वादिवाक्यम् अथ च शब्दो नित्य इति प्रतिवादिवाक्यम् अथ च शब्देऽनित्यत्वं साधय इति मध्यस्थस्य वाक्यम् इत्येतादृशैर्वाक्यैर्विप्रतिपत्तिवाक्यस्य व्यवहितत्वात् तज्जन्योपस्थितिर्न हेतुवाक्यार्थान्वयबोधसमर्था। ननु समयबन्धा(न्धम्) अथ च मध्यस्थवाक्यं विनापि कथा प्रवर्तताम्। तथा च व्यवधानाभावात् विप्रतिपत्तिवाक्योपस्थित एवार्थो हेतुवाक्यार्थेन सहान्वेष्यतीत्यत आह - **परविप्रतिपत्तीति**। तथा च समयबन्धमध्यस्थवाक्यैर्विना स्थापनैव नास्ति। यदि चैकस्य नित्यत्वपक्षोऽथ चान्यस्यानित्यत्वपक्षस्तदनन्तरं मध्यस्थस्य सन्देहस्तदनन्तरं मध्यस्थो वदति अनित्यत्वे प्रमाणं वद इति। मध्यस्थप्रमाणाकाङ्क्षायां शब्दानित्यत्वं साधय इति शब्दानित्यत्वं स्थाप्यम्। एवं च यदि तादृशमध्यस्थ-वाक्यप्रमाणाकाङ्क्षे यदि न स्तस्तदा स्थापनैव नास्तीति स्थापनाया एवाभावात् कथं न्यायावतारः। दूषणान्तरमाह - **विप्रतिपत्तीति** मूलम्। तथा च विप्रतिपत्तिवाक्यं [168 A] पक्षपरिग्रहमात्रेण निराकाङ्क्षं न हेत्वाद्यन्वययोग्यम्। एतदेवाह - **पक्षेति** मूलम्। **पर्यवसिततयेति** मूलम्। तथा च वाक्यस्यापर्यवसाने सति आकाङ्क्षावाक्यस्य पर्यवसाने तु निराकाङ्क्षमेव। अत एवाभिधानाऽपर्यवसानम् आकाङ्क्षा इति आकाङ्क्षालक्षणमुक्तम्। एतावता प्रतिज्ञाऽपि साधनाङ्गमित्युक्तं भवति। ननु मध्यस्थस्य प्रमाणाकाङ्क्षायां सत्यां पूर्वोक्तविप्रति[पत्ति]वाक्य-स्याऽऽवृत्तिः कर्तव्या यथा शब्दोऽनित्यः। तथा च आवृत्ते वाक्योपस्थितेऽर्थे हेत्वन्वयो भविष्यति किं प्रतिज्ञा-वाक्येनेत्यत आह - **आवृत्तौ त्विति**। यदि विप्रतिपत्त्येकदेशस्य शब्दोऽनित्य इत्यस्य आवृत्तिः क्रियते तदा इयमावृत्तिरेव प्रतिज्ञा, इति सिद्धं प्रतिज्ञापि साधनाङ्गमिति। **न चेति** मूलम्। ननु अवयवान्तरादेव हेत्वन्वययोग्या साध्योपस्थितिर्भविष्यतीत्याशङ्कां निराकरोति - **न चेति**। तथा च हेत्वन्वययोग्यसाध्योपस्थितिर्नास्ति अवयवान्तरे साध्यस्य विधेयत्वाभावात्। विधेयतया साध्योपस्थितिः पर्वतो वह्निमान् इति रूपा, सैव हेत्वन्वययोग्या, न चैतादृशं विधानमवयवान्तरेऽस्तीति भावः। न त्ववयवान्तरात् हेत्वादेः साध्यस्य आक्षेपो भविष्यतीत्यत आह - **नापीति** मूलम्। हेतुरूपावयवेन तदाक्षेपः सापेक्षो न भवति। कुतः ? तथा सति अन्योन्याश्रय इत्याह - **साध्यान्वयेति** मूलम्। साध्यान्वये सति कुतः साध्यमत्रेत्याकाङ्क्षायां हेतोरभिधानम्, हेत्वभिधाने च हेतोरन्वये च हेत्ववयवात् साध्याक्षेप इत्यन्योन्याश्रय इत्यर्थः। उपसंहरति - **तस्मादिति** मूलम्। आक्षेपोऽनुपपत्तिः। अप्रतीतानुपपत्तिः प्रतीतानुपपत्तिर्वा। आद्यार्थस्तु ज्ञानमेव न जायते इति कृत्वा आक्षेपः। द्वितीयार्थस्तु ज्ञातस्य पदार्थस्य याऽनुपपत्तिः सा प्रतीतानुपपत्तिः। इदमुभयमत्र नास्ति। साध्योपस्थितिं विना हेत्वभिधाने आकाङ्क्षा नास्ति इति कृत्वा साध्यानुपस्थितौ हेत्वन्वय एव नास्तीति हेत्वन्वये प्रतीतानुपपत्तिरपि नास्ति। नापि हेतुः प्रतीतो यतो हेत्वभिधाने आकाङ्क्षैव नास्ति इति कृत्वाप्रतीतानुपपत्तिरपि नास्ति। तस्माद् हेत्ववयवात् साध्याक्षेपो नास्तीति कृत्वाऽवयवान्तरेण आक्षेपात् साध्योपस्थितिर्न सम्भवति किन्तु प्रतिज्ञावाक्य एव सम्भवति इत्याशयः।

मध्यस्थनियोगादेव प्रतिज्ञावाक्यात् साध्योपस्थितिं विना न हेत्वन्वयो भविष्यतीत्यतो हेत्वन्वयार्थं प्रतिज्ञावाक्यात् साध्योपस्थितिरवश्यं वक्तव्येति ये वदन्ति तन्मतमाह - **अन्ये त्विति** मूलम् । तथा च मध्यस्थस्य कीदृशो नियोगः ? त्वं प्रमाणमत्र वद इत्येतावन्मात्रं न नियोगः, किन्तु शब्दानित्यत्वे प्रमाणं वद इत्येतादृशो नियोगः। तथा च साध्यविशिष्टे पक्षे प्रमाणं वद इति तेन [168 B] शब्दानित्यत्वविशिष्टे प्रमाणे मध्यस्थस्य प्रश्नः। यदि विशिष्टेऽनुयोगस्तदा विशिष्टमभिधेयम्। यदि विशेषणमनभिहितं तदा केवलं विशेष्यप्रमाणम्, तन्मात्राभिधानेन कथं विशिष्टाभिधानं स्यात्। तथा च विशेषणं यत् शब्दानित्यत्वरूपं तदप्यभिधेयम्। तथा च यद् विशेषणस्याभिधानं स्यै(तदे)व प्रतिज्ञा इत्यर्थः। अयमर्थः। यदि प्रतिज्ञा न स्वीक्रियते तदा मध्यस्थनियोगानुरोधेन यदभिधानं तदेव न स्यादित्यवश्यं प्रतिज्ञास्वीकारः इति। अत्राशङ्कते - **न चेति** मूलम्। तथा च शब्दानित्यत्वे प्रमाणं वद इत्येतादृशो मध्यस्थस्य नियोगो नास्ति किन्तु वस्तुगत्या यत् साध्यं तत्र प्रमाणं वद इति मध्यस्थनियोगः। तथा च यत्र वादिनोर्विवादस्तत्र किं वस्तु किमवस्तु इति वस्तुविवेकाभावात् वस्तुतो यत् साध्यं तत्र प्रमाणं वद इति मध्यस्थस्य नियोग एव न सम्भवति यतस्तस्य मध्य[स्थ]स्य एकस्य वस्तुत्वनिश्चयो नास्ति। उपसंहरति - **तस्मादिति** मूलम्। साध्यस्याभिधानं पर्वतो वह्निमान् इति साध्यशब्दप्रयोगो यदि न क्रियते तदा हेतोराकाङ्क्षैव नास्तीति हेतोरन्वयबोधकत्वमेव न स्यात्, इति प्रतिज्ञापि साधनाङ्गं न्यायाङ्गमिति प्रतिज्ञारूपोऽवयवः सिद्ध इत्यर्थः।

अथ टीका। ननु निगमनस्य परामर्शहेतुत्वेऽपि अनुमित्यपेक्षया वह्निव्याप्यो धूमोऽपि भासते, तस्मादित्यनेनेत्यधिकविषयत्वात् तत्रोत्तरदलेनानुमित्यन्यूनानतिरिक्तदलेनैव निगमने नातिव्याप्तिः, अतो निगमनं च न परामर्शहेतुरिति ग्रन्थो व्यर्थ इत्यत आह - **चकार** इति टीका। अप्यर्थ इति। तथा चानुमित्यन्यूनानतिरिक्तेत्यत्रानतिरिक्तपदेनैव निगमनेऽतिव्याप्तिर्निराकृता तथापि पूर्वदलेनापि निगमनेऽतिव्याप्तिनिरासः। अयं भावः - यथा निगमनेऽतिव्याप्तिरुत्तरदलेन वार्यते तथा पूर्वदलेनापि वार्यते इत्याहुः - **निगमनमिति** टीका। एतदेवाह - **तथा च सत्यन्तेनापीति**। तथा चोद्देश्यानुमितीत्यादि सत्यन्तेनापि निगमनेऽतिव्याप्तिर्निरस्ता। ननु निगमनस्यापि परामर्शहेतुत्वमस्त्येव अन्यथाऽवयवलक्षणम् अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वरूपं न स्यात्। तव मते निगमनस्य परामर्शहेतुत्वाभावादित्याशङ्क्याह - **न चैतदिति** टीका। एतत् निगमनस्य परामर्शहेतुत्वमसिद्धमिति न च वाच्यम्। अत्र प्रतिज्ञालक्षणेऽनुमितिहेतुत्वं यत् परामर्शहेतुत्वमुक्तम्, स कीदृशः परामर्शः ? उपनयजन्यो विवक्षितो यथा वह्निव्याप्यधूमवांश्चायमिति। तथा चोपनयजन्यपरामर्शं प्रति प्रतिज्ञाहेतूदाहरणोपनयानां कारणत्वं वर्तते परं निगमनस्य कारणत्वं नास्ति। कुत इत्यत आह - **तथा चेति** टीका। निगमनस्य उदीच्यत्वेन प्रतिज्ञादिचतुष्टयानन्तरोत्पत्तिकत्वेन निगमनस्य न कारणता उपनयजन्यपरामर्शं

प्रति [169 A]। ननु तर्हि प्रतिज्ञायाः कथमुद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वमित्याह - **प्रतिज्ञायाश्चेति** । तथा नु प्रतिज्ञाया हेत्वाकाङ्क्षोत्थापनद्वारा उद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्द-ज्ञानजनकत्वम् न तु निगमनस्य। ननु तर्हि निगमनस्य क्वोपयोग इत्यत आह - **अवयवलक्षणे चे**ति टीका। तथा चावयवलक्षणे यत् परामर्शपदं तच्चरमकारणपरामर्शपरम्, स च अबाधितासत्प्रतिपक्षत्वविशिष्टः परामर्शो हि चरमकारणपरामर्शः, तेन चरमः परामर्शोऽबाधितासत्प्रतिपक्षविशिष्टः धूमवांश्चायम् इतिरूपः । अयं भावः - उपनये वह्निव्याप्यधूमवत्त्वज्ञानमात्रं जातम्, न तु वह्निव्याप्यधूमवत्त्वज्ञानमात्रादनुमितिः किन्तु अबाधितासत्प्रति-पक्षत्वविशिष्ट[म्] एव चरमकारणं ततोऽबाधितासत्प्रतिपक्षप्रतिपादनद्वारा निगमनस्य चरमकारणलिङ्गपरामर्श-प्रयोजकत्वेनावयवत्वमिति भावः। तथा चावयवलक्षणं चरमकारणपरामर्शघटितम्, चरमकारणपरामर्शप्रयोजकता चाबाधितत्वज्ञानद्वारा निगमनस्य तिष्ठत्येवेति कृत्वाऽवयवलक्षणं तत्र वृत(त्त)मेव। प्रतिज्ञालक्षणं तूद्देश्यानुमिती-त्यादिकमुपनयजन्यपरामर्शघटितम् इति उपनयजन्यपरामर्शे तु निगमनस्य जनकता नास्ति, तस्योत्तरकालिकत्वेना-काङ्क्षोत्थापनद्वारापि नोपनयजन्यपरामर्शं प्रति कारणत्वं न तत्र प्रतिज्ञालक्षणातिव्याप्तिः अनुमितिहेतुलिङ्गपरामर्श-प्रयोजकत्वाभावात्। एतदेवाह - **अत एवे**ति टीका। यतो निगमने उपनयजन्यपरामर्शहेतुत्वं नास्ति इति कृत्वा प्रतिज्ञालक्षणं तत्र न वर्ततेऽत एव निगमनेऽवयवलक्षणयोजनार्थं च परामर्शमात्रं परित्यज्य चरमकारणपरामर्शघटितं कृतमवयवलक्षणम् । ननु प्रतिज्ञालक्षणं हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं पर्वतो वह्निमान् इति आप्तवाक्येऽतिव्याप्तमित्यत आह - **हेत्विति** टीका। **हेत्ववयवेति** टीका। तथा च हेतुरूपो योऽवयवस्तदभिधान-प्रयोजिका या जिज्ञासा तज्जनकं यद् वाक्यं सा प्रतिज्ञा, आप्तवाक्यं तु हेत्ववयवाभिधानप्रयोजकजिज्ञासाजनकं न भवति किन्तु तस्मात् पर्वते वह्निमत्त्वबोध एव न तु तत्र हेत्वाकाङ्क्षा इति भावः । प्रतिज्ञालक्षणस्य आप्तवाक्येऽतिव्याप्तिवारणार्थं प्रकारान्तरमाह - **यद्वे**ति टीका। तथा चोक्तप्रतिज्ञालक्षणे वाक्यपदमवयवपरं तथा च यद्यपि आप्तवाक्ये हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वमस्त्येव परंतु जिज्ञासाजनकावयवत्वं तस्य नास्ति इति कृत्वा न तत्रातिव्याप्तिरित्यर्थः । ननु पृथिवी इतरेभ्यो भिद्यते, धूमकालीनः पर्वतो वह्निमान् इति प्रतिज्ञायां तथाप्यव्याप्तिः लिङ्गाविषयकत्वं नास्तीत्यत आह - **अत्रापी**ति टीका। लिङ्गाविषयकलिङ्गी(ङ्गि)-[विषयक]ज्ञानजनकन्यायावयववाक्यत्वं प्रतिज्ञात्वमित्यत्रापि प्रतिज्ञालक्षणे नञ्व्यत्यासः नञ्युत्तरज्ञेयः [169 B]। तथा च लिङ्गविषयकज्ञानजनकत्वनियतावयवान्यन्यायावयवत्वम्, तदन्यार्थो नञ्, तेन नाव्याप्तिरुक्तप्रतिज्ञाया-मित्यर्थः। ननु क्वचित् पुस्तके न्यायावयवपदं नास्ति किन्तु वाक्यपदमेव श्रूयते। लिङ्गविषयकज्ञानजनकनियता-वयवान्यलिङ्गिधीपरवाक्यत्वमित्येव लक्षणम्। तथा च पर्वतो वह्निमान् इति आप्तवाक्येऽतिव्याप्तिरित्यत आह- **यदि चे**ति टीका। यदि च न्यायावयवपदमत्र नास्ति केवलं वाक्यपदमेव तर्हि वाक्यपदमेव न्यायावयवपरं

कर्तव्यम्, तेनाप्तवाक्ये नातिव्याप्तिः । ननु लिङ्गाविषयकेति अत्र लिङ्गिपदं किमर्थम् ? लिङ्गविषयकज्ञान-जनकत्वनियतावयवान्यत्वं लिङ्गिज्ञानजनकन्यायावयवत्वमित्येवास्तु । वर्तते च लिङ्गाविषयकलिङ्गिज्ञानेत्यादि इत्यत आह - **लिङ्गिपदं चे**ति । तथा च प्रायः पुस्तकेषु नास्ति । यदि कुत्राप्यस्ति तदेतन्निष्फलमेवेत्यर्थः । ननु प्रतिज्ञात्वं जातिरिति ग्रन्थः पुनरुक्तः, तत्तद्धीजनकत्वं प्रतिज्ञात्वम् विजातीयज्ञानविशेषजनकवाक्यत्वं प्रतिज्ञात्वमिति ग्रन्थेन पुनरुक्तमित्यत आह - **पूर्वमि**ति टीका । पूर्वं विजातीयज्ञानेति मते तत्रापि विजातीयज्ञान-विशेषजनकत्वं लक्षणम् अत्रापि प्रतिज्ञाजन्यं विजातीयं ज्ञानं तज्ज्ञानविशेषजनकवाक्यत्वं प्रतिज्ञात्वमित्यत्र पुनरुक्तमित्यर्थः । समाधत्ते - **निर्बीजमि**ति । पूर्वं प्रतिज्ञाजन्ये ज्ञाने जातिविशेषो वर्तत इत्यत्र बीजं नोक्तम्, इदानीं तु तत्र बीजमुच्यते व्यवहारादिति ग्रन्थेनेत्याह - **बीजपूर्वकं परमतमि**ति टीका । ननु एतेनापि इत्यादिग्रन्थेन यद् विजातीयज्ञानजनकं वाक्यं प्रतिज्ञेति लक्षणम्, तत्पूर्वं प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति ग्रन्थेनोक्तमेव । तथा च येन तल्लक्षणं कृतं न चेदं लक्षणं कृतमिति तस्य पुनर्दूषणं किमर्थमित्यत आह - **भास्करमत** इति टीका । पूर्वमन्यस्य ग्रन्थकारस्य लक्षणम्, इदं तु **भास्करस्ये**ति । **भेद** इति वक्तृभेदात् न दूषणपौनरुक्त्यम् । ननु वक्तृभेदमात्रं भेदेन दूषणोपन्यासे न प्रयोजकं किन्तु प्रमेयभेद एवेति । स चेह नास्त्येवेति कथं भेदेन दूषणोपन्यास इति शङ्कते - **यद्यपी**ति टीका । समाधत्ते - **तथापी**ति टीका । **उपाधिभेद** इति टीका । पूर्वं विजातीयज्ञान-जनकवाक्यत्वं प्रतिज्ञात्वमुक्तम्, इदानीं तु विशेषाकारेण शब्दोऽनित्य इति लिङ्गिधीपरं साध्यधीपरं यद् वाक्यं तज्जन्यज्ञानवृत्ति । अथ च कृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिजातियोगिज्ञानजनकं यद् वाक्यं सा प्रतिज्ञा । पूर्वं प्रतीकमात्रोक्तौ लिङ्गिधीपरवाक्यजन्यं ज्ञानं तद्वृत्तिजातियोगिज्ञानजनकं वाक्यमित्युक्तौ लिङ्गिधीपरवाक्यं प्रतिज्ञावाक्यं पर्वतो वह्निमान् इत्येतादृशं तद्वाक्यजन्यं ज्ञानं तद्वृत्तिर्या जातिर्ज्ञानत्वरूपा जातिस्तद्योगि यद् ज्ञानं हेतुवाक्यजन्यं ज्ञानं तज्जनकं वाक्यं हेतुवाक्यमिति तत्रातिव्याप्तिस्तद्वारणार्थं कृतकत्वादित्यादिवाक्यजन्यज्ञाना-वृत्तीत्याद्युक्तम् [170 A], ज्ञानत्वरूपा या जातिः सा कृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिर्न भवति तेन तन्निरासः । अथ कृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिजातियोगि यद् ज्ञानं शुकोदीरिते घटमानय इति वाक्येऽति-व्याप्तिवारणार्थम् । लिङ्गिधीत्यादिपदं शुकोदीरितं यद् वाक्यं घटमानय इति वाक्यं तज्जन्यं यद् ज्ञानं तद्वृत्तिर्या जातिः सा लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिर्न भवति इति न तत्रातिप्रसङ्ग इत्यर्थः । **उपाधिभेदादि**ति टीका । तथा च पूर्वे विजातीयज्ञानविशेषजनकं वाक्यं प्रतिज्ञेति सामान्यत उक्तम्, साम्प्रतमुक्तरूपो विशेषो यथा लिङ्गिधीत्यादिरुक्तरूपः, तथा चायमेवोपाधिभेद इत्यर्थः । मूलं योजयति - **आवृत्तौ त्वि**ति टीका । शब्दोऽनित्यो न वेत्यादिरूपाया विप्रतिपत्तेरावृत्तिर्यदि क्रियते सैव प्रतिज्ञा, तथा च प्रतिज्ञैव साधनाङ्गमित्यागतम् । वक्ष्यमाणास्वरसादाह - **इदमि**ति टीका । वक्ष्यमाणास्वरसमाह - **वस्तुत** इति टीका । तथा च प्रतिज्ञावाक्ये

हेतुत्वान्वयानुपपत्त्या ज्ञाने लक्षणा वर्तते, विप्रतिपत्तिवाक्ये तु लक्षणा नास्ति इति कृत्वा विप्रति[पत्ति]वाक्येन प्रतिज्ञाया नान्यथासिद्धिः । एवं विप्रतिपत्तिवाक्यात् प्रतिज्ञा भिन्ना एव सिद्धेत्यर्थः । एतदेवाह - **विप्रतिपत्तौ त्विति** टीका । तथा च विप्रतिपत्तौ न ज्ञाने लक्षणा इति कृत्वा न तया तदन्यथासिद्धिः । अत्राशङ्कते - **न चेति** । साध्ये प्रमाणाकाङ्क्षायां वह्नौ प्रमाणाकाङ्क्षायां धूमादिति प्रयोगे धूमस्य हेतुत्वं वह्नौ न सम्भवतीति कृत्वा धूमादिति पञ्चम्या ज्ञापकत्वे लक्षणा । तथा च प्रतिज्ञायां ज्ञानलक्षणां विनापि धूमादिति पञ्चम्या ज्ञापकत्वलक्षणया एवान्वयबोधोपपत्तौ प्रतिज्ञायां ज्ञानलक्षणायां मानाभावादित्यर्थः । समाधत्ते - **ज्ञानलक्षणापीति** टीका । तथा च प्रतिज्ञायां ज्ञानलक्षणयैवोपपत्तौ हेतुत्वशक्तायाः पञ्चम्या ज्ञापकत्वेऽपि चेत् शक्तिस्तदा नानार्थत्वकल्पनागौरवं स्यात् । यदि च ज्ञापकत्वे लक्षणा स्यात् तदा सुपृविभक्तौ लक्षणाभावादिति पञ्चम्या हेतुत्वमेवार्थः तच्च हेतुत्वं वह्निं प्रति अनुपपन्नमिति प्रतिज्ञायामेव लक्षणा यथा पर्वतो वह्निमत्तया ज्ञातव्य इति । **तदभिधानमिती**ति । तत्शब्देन किं परामृश्यत इत्यत आह - **अवयवान्तराभिधानमि**ति टीका । हेत्ववयवाभिधानमित्यर्थः । अन्ये त्विति मतेऽस्वरसमाह - **अन्ये त्विती**ति टीका । अस्वरसबीजमाह - **शब्दानित्यत्वे**ति टीका । तथा च शब्दानित्यत्वे प्रमाणं वद इति मध्यस्थस्यानुयोगे प्रमाणमात्रे नाकाङ्क्षा किन्तु व्यावर्तकं यदनित्यत्वं तेन व्यावर्तनाय यत् प्रमाणं तथा च अनित्यत्वव्यावर्तकव्यावृत्त्यं यत् प्रमाणं तत्राकाङ्क्षा मध्यस्थस्येत्यर्थः । एतावता शब्दानित्यत्वनिर्देशेन विना विशिष्टनिर्देशो न सम्भवतीति शब्दानित्यत्वरूपविशेषणस्य निर्देशोऽवश्यं वक्तव्यः । स च प्रतिज्ञारूप एवेति प्रतिज्ञासाधनाङ्गम्, इदमस्वरसग्रस्तम् । यदि शब्दानित्यत्वं व्यावर्तकं यतः शब्दानित्यत्वसाधकप्रमाणस्य इतरप्रमाणापेक्षया [170 B] व्यावर्तकत्वम्, व्यावर्तकं विशेषणमेव चेत् तदा विशेषस्य निर्देशेन विना विशिष्टनिर्देशो न सम्भवतीति विशेषस्यापि निर्देश आवश्यकः । यदा च शब्दानित्यत्वमुपलक्षणं तदा व्यावर्तकत्वमुपलक्षणं भवत्येव ततस्तन्निर्देशेन विनापि उपलक्षणीयस्य निर्देशः सम्भवति ततः शब्दानित्यत्वस्य निर्देश आवश्यको नायातीति कृत्वा शब्दानित्यत्वे विशेषणत्वं पूर्वोक्तहेतुत्वान्वयानुपपत्त्या ग्राह्यम्, ततः सैव युक्तिरस्तु, तथा च हेत्वन्वयानुपपत्तिरेव प्रतिज्ञासाधिका । **अत एवे**ति टीका । यतो हेतुत्वान्वयानुपपत्त्या साकाङ्क्षं हेतुवाक्यं केन सहान्वयं बोधयिष्यतीति साध्याभिधानमवश्यं वक्तव्यमेवेत्याह उपसंहारे तस्मादिति ग्रन्थेनेत्यर्थः ।

**। प्रतिज्ञानिरूपणं समाप्तम् ।**

## । अवयवप्रकरणे हेतुनिरूपणम् ।

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचितम्, अन्यथाऽनाकाङ्क्षिताभिधाने निग्रहापत्तेः, लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः । हेतुत्वं चानुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम् । हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं वा । उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा । साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा । प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा । पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा । हेतुपदेन ज्ञाने लक्षणा, अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्थानन्वयात् तथैवाकाङ्क्षानिवृत्तेः । अनुमितिहेतुज्ञानकारणधूमवत्त्वादितिशब्दजन्यज्ञानवृत्तिप्रतिज्ञादिजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यत्वं हेतुत्वमित्यन्ये । जातिं विना केन रूपेण ज्ञानस्यानुमितिजनकत्वं वाक्यविशेषजन्यत्वस्यापि जन्यतावच्छेदकरूपापरिचये दुर्ग्रहादित्यपरे । अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वमन्वयिहेतुत्वम् । एतदेव व्यतिरेकव्याप्त्यभिधायकपदप्रक्षेपाद् व्यतिरेकिहेतुत्वम् । अन्वयव्यतिरेकोदाहरणाकाङ्क्षाप्रयोजकतथाभूतावयवत्वमन्वयव्यतिरेकि हेतुत्वम् । यद्वा पक्ष-सपक्षसतो विपक्षासतो हेतुवचनमन्वयव्यतिरेकि । अत्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरणपक्षसपक्षसद्धेतुवचनं केवलान्वयि । यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारणसाध्याविषयकशाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतुविभक्तिमच्छब्दत्वमन्वयिहेतुत्वम् । एतदेवाप्रतीतान्वयसाध्यसाधनेतिविशेषणाद् व्यतिरेकिहेतुलक्षणम् ।

अथ मूलम् । ननु प्रतिज्ञानन्तरं हेत्ववयवः किमर्थं वक्तव्य इत्याकाङ्क्षायां मूले आह - साध्यनिर्देशानन्तरमिति

मूलम् । साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां हेतुत्वप्रतिपादकविभक्तिमत् यत् लिङ्गं तद्वचनमेवोचितम् । तद्वैपरीत्ये बाधकमाह - **अन्यथेति**। प्रमाणाकाङ्क्षायां प्रमाणमेव वक्तव्यं न तूदाहरणादि यतोऽनाकाङ्क्षिताभिधाने निग्रहः स्यादित्यर्थः। ननु हेतुत्वप्रतिपादकविभक्तिवचनेनापि नाकाङ्क्षानिवृत्तिरित्यत आह - **लोक** इति मूलम् । तथा च प्रमाणाकाङ्क्षायां हेतुत्वप्रतिपादकविभक्तिवचनेनैवाकाङ्क्षानिवृत्तिरित्यर्थः। उपसंहरति - **प्रतिज्ञानन्तरमिति** मूलम्। वाक्यं सावधारणमिति न्यायात् हेतोरेवोपन्यासः। हेत्ववयवलक्षणमाह - **अनुमितीति** मूलम्। अनुमितिकारणीभूतो यो लिङ्गपरामर्शस्तत्प्रयोजकं यत् शाब्दज्ञानं तस्य कारणीभूता एवंरूपा या साध्याविषयकशाब्दधीस्तज्जनको यो हेतुविभक्तिमच्छब्दः तत्त्वम् । पूर्वदलेऽनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणेत्यनेन न्यायजन्यशाब्दज्ञानकारणेत्यर्थः सम्पन्नः। अत्र साध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वमित्युच्यमाने आप्तोक्तधूमादिति वाक्ये विवादाभावादवयवत्वाभावेनातिव्याप्तिरतोऽनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणेति पदम्। आप्तोक्तधूमादिति वाक्यजन्या या शाब्दधीः सा न्यायजन्यशाब्दज्ञानकारणं नेति तद्व्युदासः। प्रतिज्ञायामतिव्याप्तिवारणार्थं साध्येत्यादिकमुत्तरदलम्। शेषं टीकायाम्। लक्षणान्तरमाह - **हेतुत्वेति** मूलम्। हेतुत्वप्रतिपादिका या विभक्तिः पञ्चमी तद्वान् यो न्यायावयवः। न्यायावयवत्वमात्रं प्रतिज्ञायामतिव्याप्तमतो हेतुत्वप्रतिपादकेति । हेतुत्वप्रतिपादकविभक्तिमत्त्वमात्रं धूमादित्याप्तवाक्येऽतिव्याप्तमत आह - **न्यायावयवेति** पदम्। लक्षणान्तरमाह - **उदाहरणेति**। उदाहरणप्रयोजिका या आकाङ्क्षा तज्जनकं यत् शाब्दज्ञानं तज्जनको योऽवयवस्तत्त्वम्। शाब्दज्ञानजनकावयवत्वमात्रं प्रतिज्ञायामतिव्याप्तम् अत उदाहरणेत्यादि [171 A]। प्रतिज्ञावाक्यं तूदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकं न भवति किन्तु तद्धेत्वाकाङ्क्षेत्यादिकं भवतीति तद्व्युदासः। हेतोर्लक्षणान्तरमाह - **साध्याविषयकेति** मूलम्। साध्याविषयकं यद् ज्ञानं तज्जनको यो हेतुः पञ्चम्यन्तोऽनुमितिपरशब्दस्तत्त्वम्। अनुमितिपरशब्दत्वमवयवत्वमित्यर्थः, तेनाप्तवाक्यनिरासः। साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तशब्दत्वमित्युच्यमाने आप्तोक्तधूमादिति वाक्येऽतिव्याप्तिः, अतो अनुमितिपरशब्दत्वम्, तथा चैतदवयवत्वं विवक्षितमाप्तवाक्यस्यावयवत्वाभावान्न तत्रातिव्याप्तिः । हेतुपञ्चम्यन्तानुमितिपरशब्दत्वमित्युच्यमाने निगमनेऽतिव्याप्तिर्धूमाद् वह्निमान् इति रूपे, अतस्तद्वारणाय साध्याविषयेति पदं निगमनस्य तु साध्यविषयकज्ञानजनकत्वात्। हेतोर्लक्षणान्तरमाह - **प्रतिज्ञेति** मूलम्। प्रतिज्ञावाक्यधीजन्या या कारणाकाङ्क्षा तस्या निवर्तकं यद् ज्ञानं - धूमादित्येतद्वाक्यजन्येन ज्ञानेन कुत इति कारणाकाङ्क्षा निवर्तत इति धूमादितिहेतुविभक्तिमद्वाक्यं प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्तकं यद् ज्ञानं - तज्जनकं भवति । हेतुविभक्तिमद्वाक्यमित्युच्यमाने धूमादित्याप्तवाक्येऽतिव्याप्तिः, तद्वारणाय प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्तकज्ञानजनकमित्युक्तम्, आप्तवाक्यं तु प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्तकं न

भवतीति न तत्रातिव्याप्तिः । प्रतिज्ञावाक्यधीजन्यकारणाज्ञानिवर्तकत्वमात्रं धूमो यत इति हेत्ववयवशब्दे प्रथमेति । अथ लक्षणान्तरमाह - **पञ्चम्यन्तेति** मूलम् । पञ्चम्यन्तं यद् लाक्षणिकपदवत् यदनुमितिपरं वाक्यं तत्त्वं वा । अनुमितिपरवाक्यत्वमित्यक्तावुदाहरणेति । अतः पञ्चम्यन्तेति । तथा च पञ्चम्यन्तं धूमादिति पञ्चम्यन्तं लाक्षणिकं पदं भवति अनुमितिपरशब्दानामवयवोऽपि भवति । ननु हेतुपदे लाक्षणिकपदत्वं कथमित्याह - **हेतुपदे चेति** मूलम् । ज्ञानलक्षणा तथा च धूमात् धूमज्ञानादित्यर्थः । ननु प्रतिज्ञायां ज्ञानलक्षणाश्रयणात् ततो वह्निज्ञानं प्रति धूमादेर्हेतुत्वं सम्भवत्येवेत्याह - **अन्यथेति** । तथा च वह्निज्ञानं प्रति धूमादेर्न हेतुत्वम् अतीतानागतवह्निस्थले धूमाद्यभावेऽपि धूमज्ञानाद् वह्निज्ञानं जायत इति कृत्वा वह्निज्ञानं प्रति धूमस्य हेतुत्वं नास्ति किन्तु धूमज्ञानस्य । तथा च धूमज्ञानस्य वह्निज्ञानं प्रति हेतुत्वात् धूमस्य च हेतुत्वाभावाच्च धूमपदेन धूमज्ञाने लक्षणा । एतदेवाह - **तथैवेति** मूलम् । मतान्तरे हेतुलक्षणमाह - **अनुमितीति** मूलम् । अनुमितिहेतुर्यद् ज्ञानं परामर्शरूपं तस्य कारणम् । अथ च धूमवत्त्वादिति शब्दजन्यज्ञानवृत्ति । अथ च प्रतिज्ञादिजन्यज्ञानावृत्तिरेव या जातिस्तद्योगि यद् ज्ञानं तज्जनकं यद् वाक्यं स हेत्ववयव [171 B] इति केचित् । प्रतिज्ञादिवारणार्थं प्रतिज्ञादिजन्यज्ञानावृत्तिरित्युक्तम् । अनुमितीत्यादि पूर्वविशेषणं शुकाद्युदीरित घटमानय इति वाक्येऽतिव्याप्तिवारणाय । इदं लक्षणं धूमादिति हेत्ववयवे वर्तते तथाहि - धूमादिति वाक्यजन्यं ज्ञानम्, तत्र ज्ञानेऽनुमितिहेतुज्ञानं लिङ्गपरामर्शरूपम्, तस्य कारणं ज्ञानम्, तत्पुनः कीदृशम् ?, वक्ष्यमाणविशेषणविशिष्टा या जातिस्तद्योगि, वक्ष्यमाणविशेषणानि यथा धूमवत्त्वादिति शब्दजन्यज्ञानवृत्तीत्येकं विशेषणं प्रतिज्ञादिजन्यज्ञानावृत्तीति द्वितीयं विशेषणम् एतादृशविशेषणविशिष्टा या जातिर्धूमादिति वाक्यजन्यज्ञानवृत्तिस्तद्योगि यद् ज्ञानं शाब्दज्ञानं तज्जनकं यद् वाक्यं धूमादिति प्रकृतिप्रत्ययसमूहरूपं स हेत्ववयव इत्यर्थः । तथा च विजातीयज्ञानविशेषजनकं वाक्यं हेत्ववयव इति पर्यवसन्नम् । एतदपरे दूषयन्ति इत्याह - **जातिं विनेति** मूलम् । तथा च तादृशविजातीयज्ञानं प्रति हेत्ववयववाक्यस्य केन रूपेण कारणत्वं ग्राह्यम् ? न तावद्धेत्ववयवत्वं किञ्चिदनुगतो धर्मोऽस्ति येन तेन रूपेण कारणता ग्राह्या स्यात् । जातिस्तु न भवति । कुतः ? अनुगतरूपेण जनकत्वाग्रहे जनकतावच्छेदकरूपेणापि जातिर्न सिद्ध्यति । तथा च हेत्ववयववाक्यजन्यज्ञानस्यानुमितिहेतुज्ञानं प्रत्यप्यनुगतरूपेण कारणत्वं ग्रहीतुं न शक्यते । अथ च तादृशज्ञानं प्रति जनकतावच्छेदकानुगतरूपाभावात् हेत्ववयवरूपवाक्यविशेषस्यापि जनकत्वं ग्रहीतुं न शक्यते । तथा च विजातीयज्ञानविशेषजनकवाक्यत्वं हेत्ववयवलक्षणं न सम्भवतीति भावः । सामान्यहेत्ववयवलक्षणानन्तरम् अन्वयिहेत्ववयवलक्षणमाह - **अन्वयव्याप्तीति** मूलम् । तथा चान्वयव्याप्त्यभिधायको योऽवयव उदाहरणरूपोऽवयवस्तदभिधानप्रयोजकं यद् ज्ञानं हेतुवाक्यजन्यं ज्ञानं तज्जनको हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवः सोऽन्वयिहेत्ववयव इत्यर्थः । हेतुत्वप्रतिपादकविभक्ति-

मन्यायावयवमित्युक्ते निगमनेऽतिव्याप्तिः निगमनस्यापि तस्मात् तथेति हेतुत्वप्रतिपादकविभक्तिमन्यायावयवत्वं वर्ततेऽतस्ततो[ऽतिव्याप्तिवारणार्थं] व्याप्त्यभि[धायकाव]यवाभिधानप्रयोजकज्ञानजनकेति पदम् । तावच्च व्यतिरेकिणि हेतौ गतमतोऽन्वयेति पदम् । अन्वयहेत्ववयमुक्त्वा व्यतिरेकिहेत्ववयवलक्षणमाह - **[व्यतिरेके**ति । तदनन्तरमन्वयव्यतिरेकिहेत्ववयवलक्षणमाह] - **अन्वये**ति । अन्वयोदाहरणं यत्र धूमस्तत्र वह्निर्यथा महानसम् । व्यतिरेकोदाहरणं यत्र वह्न्यभावस्तत्र धूमाभावो यथा महाह्रद इति । एतद्द्वयोदाहरणस्य या आकाङ्क्षा तत्प्रयोजकं यद् ज्ञानं हेतुवाक्यार्थज्ञानं तज्जनकहेतुत्वप्रतिपादकविभक्तिमन्यायावयवो [172 A] यः सोऽन्वयव्यतिरेकिहेत्ववयवः । व्यावृत्तिः पूर्ववत् । अन्वयव्यतिरेकिणो लक्षणान्तरमाह - **यद्वे**ति । पक्षे सपक्षे च विद्यमानस्य विपक्षेऽविद्यमानस्य हेतोर्यद् वचनं सोऽन्वयव्यतिरेकिहेत्ववयव इत्यर्थः । अत्रापि न्यायावयवत्वमिति पूरणीयम् । तेनोदासीनाप्तवाक्यधूमादिति रूपे ना[तिव्याप्]तिः । व्यतिरेकिहेत्ववयवेऽतिव्याप्तिवारणार्थं पक्षसपक्षसत इति पदम् । केवलान्वयिनि अतिव्याप्तिवारणार्थं विपक्षासत इति पदम् । पक्षसपक्षसतोऽन्वयव्यतिरेकिहेत्ववयव इत्युक्तेऽसम्भवः, न हि धूमादि हेत्ववयवः किन्तु धूमादिवचनमिति, [एत]दर्थं हेतुवचनपदम् । अथ केवलान्वयिहेत्ववयवलक्षणमाह - **अत्यन्ताभावाप्रतियोगी**ति । तथा चात्यन्ताभावाप्रतियोगि यत् साध्यं तेन सह समानाधिकरण एवम्भूतो यः पक्षे सन् एवंभूतो यो हेतुस्तस्य वचनं केवलान्वयी हेत्ववयव इत्यर्थः । व्यतिरेकिहेत्ववयवेऽतिव्याप्तिवारणार्थम् अत्यन्ताभावाप्रतियोगिपदम् । अत्यन्ताभावाप्रतियोगि यत् साध्यं तेन सह समानाधिकरण एवम्भूतो यः पक्षे विद्यमानो हेतुस्तद्वचनम् । अत्र समानाधिकरणपदत्यागेऽयं ज्ञानवान् शरीरित्वादित्यत्र समवायसम्बन्धेन केवलान्वयिता स्यात् । विषयतासम्बन्धेनात्यन्ताभावाप्रतियोगि साध्यं ज्ञानं तत्कः शरीरित्वं हेतुर्भवति । पक्षे विद्यमानोऽपि भवति । तस्य साध्यांशे समवायसम्बन्धेन केवलान्वयिता स्यात् अतः साध्येन सह समानाधिकरणेति । तथा च येन सम्बन्धेन साध्यस्यात्यन्ता[भावा]प्रतियोगित्वं तेन सम्बन्धेन तस्य हेतोः तत्साध्यककेवलान्वयित्वलाभार्थं समानाधिकरणपदम् । स्वरूपासिद्धिवारणार्थं पक्षवृत्तिपदं तथाहि - ह्रदोऽभिधेयवान् धूमात् इत्यत्यन्ताभावाप्रतियोगिसाध्यकरणहेतुवचनं भवति परं केवलान्वयी हेतुर्न भवतीति पक्षसत्त्वपदम् । केवलान्वयिनो लक्षणान्तरमाह - **यद्वे**ति मूलम् । अनुमितिकारणीभूतपरामर्शप्रयोजकं यच्छाब्दज्ञानं तस्य कारणं यत् साध्याविषयकशाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतुविभक्तिमच्छब्दत्वम् । शब्दोऽभिधेयः प्रमेयत्वादिति हेतुवचनम् अनुमितिकारणीभूतपरामर्शप्रयोजकं यत् शाब्दज्ञानं न्यायजन्यशाब्दज्ञानं तस्य कारणं भवति अथ च साध्याविषयिका या शाब्दधीः प्रमेयत्वादिति रूपा यत्र साध्यं विषयो न भवतीति यावत् तज्जनकं यत्प्रतीतान्वयसाध्यसाधनवाचको यो हेतुविभक्तिमच्छब्दस्तत्त्वम् । उदासीनाप्तवाक्ये प्रमेयत्वादित्यादावतिव्याप्तिवारणाय कारणेत्यन्तम्, निगमनेऽतिव्याप्तिवारणार्थं [172 B] साध्याविषयकशाब्दधीजनकेति

पदम्, अन्वयिनः प्रमेयत्वादेर्व्यतिरेकित्वभ्रमदशायामतिव्याप्तिवारणार्थं प्रतीतान्वयेति पदम् । तथा च केवलान्वयिनो व्यतिरेक(कि)त्वभ्रमदशायां प्रतीतान्वयं साध्यं नास्तीति नातिव्याप्तिः । शेषं टीकायाम् । अथ व्यतिरेकिहेत्ववयवलक्षणमाह - **एतदेवेति** मूलम् । अनुमितिकारणीभूतशाब्दज्ञानकारणसाध्याविषयकशाब्दधी-जनकाऽप्रतीतान्वयसाध्यसाधनवाचकहेतुविभक्तिमच्छब्दत्वम् । केवलान्वयिनि अतिव्याप्तिवारणाय अप्रतीता-न्वयेति, केवलान्वयिनि साध्यसाधनयोऽ(र)प्रतीतान्वयो नास्ति व्यतिरेकिणि तु अप्रतीतान्वय एव अन्वयव्याप्त्य-भावात् अप्रतीतान्वय एव ।

अथ टीकाव्याख्या । **हेतुत्वं चेति** इति टीका । **न्याया[प्र]विष्टेति** टीका । न्यायाप्रविष्टमुदासीनवाक्यमित्यर्थः । तत्रातिव्याप्तिवारणार्थं कारणेत्यन्तम् । तथा चोदासीनवाक्यमनुमितिकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणं न भवतीति न तत्रातिव्याप्तिः । साध्याविषयकेति पदस्य कृत्यमाह - **तस्मादिति** टीका । तस्मात् तथेति निगमनेऽ-तिव्याप्तिवारणाय साध्याविषयकेति पदम्, निगमने तु साध्यविषयकज्ञानजनकत्वम् । [? ननु कस्मिंश्चित् हेतावपि साध्यविषयकज्ञानजनकत्वमस्ति किन्तु साध्याविषयकज्ञानजनकत्वं] नास्ति इति अव्याप्तिरत आह - **अत्र चेति** टीका । तथा च साध्यतावच्छेदकप्रकारेण साध्याविषयकत्वं विवक्षितम् । प्रमेयत्वं तु यद्यपि साध्यविषयकज्ञानजनकं भवति तथापि साध्यतावच्छेदकप्रकारेण साध्यविषयकज्ञानजनकं न भवति यतः प्रमेयमध्ये प्रमेयत्वेन रूपेणाभिधेयं भासते परमभिधेयत्वेन रूपेण न भासते इति । **तेनेति** टीका । इदं प्रमेयं घटत्वात् अत्र घटत्वादिति हेतौ साध्या-विषयकज्ञानजनकत्वं नास्ति । साध्यं प्रमेयम्, तच्च घटत्वं भवत्येव, तेन घटत्वे साध्यविषयकज्ञानजनकत्वमेवेति हेतौ लक्षणाव्याप्तिः । साध्यतावच्छेदकप्रकारेणेति विवक्षायां घटत्वादिति हेतुविषयकज्ञाने प्रमेयत्वेन रूपेण साध्यं न भासते किन्तु घटत्वत्वेन रूपेण प्रमेयत्वमपि भासतेऽतो नाव्याप्तिरित्यर्थः । अत्राशङ्कते - **न चैवमिति** टीका । वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र हेत्ववयवस्य साध्याविषयकज्ञानजनकत्वं नास्ति । यतः प्रत्यक्षत्वरूपं यत् साध्यं तद्विषयकज्ञानजनकत्वमेव, हेतुमध्येऽपि प्रत्यक्षपदप्रवेशात् इत्याशङ्कार्थः । समाधत्ते - **साध्यविषयकेति** टीका । तथा साध्यविषयकशाब्दधीजनकत्वनियतावयवभिन्नत्वं विवक्षितं तथा च वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र साध्यविषयकशाब्दधीजनकत्वनियतावयवाः [173 A] प्रतिज्ञोदाहरणो-पनयनिगमनरूपाः यत्र साध्यमपि विषयीभूय भासते प्रत्यक्षस्पर्शाश्रयत्वे एतच्चतुष्टयावयवभिन्नत्वं तु वर्तत एवेति तत्र नाव्याप्तिः । अथ हेतुविभक्तिमदिति पदस्य कृत्यमाह - **यो य** इति टीका । यो यो धूमवान् इत्युदाहरणस्यैकदेशो यो धूमवान् इति रूपः ततोऽतिव्याप्तिवारणार्थं हेतुविभक्तिमदिति पदम् । तदर्थस्तु हेतुत्वप्रतिपादकविभक्तिमत्त्वम्, अन्यथा तृतीया-पञ्चमीउभयसङ्ग्रहो न स्यादिति भावः । उदाहरणैकदेशे तु हेतुविभक्तिमत्त्वं नास्तीति भावः । अथ शाब्दपदस्य कृत्यमाह - **सामान्यवत्त्वे सतीति** टीका । शब्दे गुणः सामान्यवत्त्वे सति अस्मदादिबाह्यकरण-

प्रत्यक्षत्वात् इत्यत्रान्त्यदलेऽतिव्याप्तिः, तत्रापि हेतुमद्विभक्तिमत्त्वं वर्तते परं हेत्ववयवत्वं नास्ति। सम्पूर्ण एव हेतुरतः शाब्दपदम्। तथा च शब्दपदेन तस्य कथमतिव्याप्तिवारणाय अत आह - **तथा चे**ति टीका। ततः शब्दाधिक्यादर्थाधिक्यमिति न्यायेन यावच्छब्दावच्छेदेन हेतुत्वप्रतिपादकविभक्तिसमभिव्याहारस्तावदवच्छिन्न-शब्दत्वं विवक्षितम्। तत्प्रकृते उक्ते विशिष्टे हेतौ योजयति - **प्रकृते चे**ति टीका। तथा च सतिसप्तमीबलात् विशिष्टे चेत् हेतुत्वमन्वेति तदा हेतुत्वप्रतिपादिका या विभक्तिः पञ्चमी सा तस्याः समभिव्याहारो विशिष्टप्रतिपादकशब्द एव विभक्तेः समभिव्याहारः सतिसप्तम्या विशिष्टमेवोपस्थाप्यते। अन्यथा हेतुप्रतिपादकविभक्तिमच्छब्दत्वमन्त्य-भागे उक्तरूपे तिष्ठत्येवेत्यतिव्याप्तिः स्यात्, यथाक्ते तु न सम्भवत्येवेत्यर्थः। ननु हेतुत्वप्रतिपादकविभक्ति-मन्न्यायावयवत्वं हेत्ववयवत्वमित्युक्तेऽपि अस्मदादीति अन्तिमभागेऽतिव्याप्तिस्तदवस्थैवेति अतो व्याचष्टे - **न्यायावयवत्वावच्छेदके**ति टीका। तथा च न्यायावयवत्वावच्छेदकावच्छेदेन हेतुत्वप्रतिपादकविभक्तिमत्त्वं विवक्षितमन्तिमभागे तु पूर्वोक्ते तावन्मात्रन्यायावयवत्वं न विभक्तिसमभिव्याहारस्यावच्छेदकं किन्तु सम्पूर्ण-न्यायावयवत्वमेव तत्रावच्छेदकम्। यतस्तावन्मात्र एव विभक्त्यर्थस्य हेतुत्वस्यान्वय इति न तत्रातिव्याप्तिः। अथ निगमनेऽपि नातिव्याप्तिरित्याह - **तस्मादि**ति टीका। तस्माद् वह्निमानिति निगमनेऽपि हेतुत्वप्रतिपादक-विभक्तिमन्न्यायावयवत्वमस्त्येवेत्यतिव्याप्तिर्न स्यात्। कुतः ? निगमनरूपावयवत्वावच्छेदेन हेतुविभक्ति-समभिव्याहारो नास्ति किन्तु निगमनं विशिष्टमेव ततस्तदवच्छेदेन हेतुमद्विभक्तिसमभिव्याहारो नास्ति किन्तु तस्मादित्यंशावच्छेदेनैवेति न तत्रातिव्याप्तिः। ननूदाहरणेत्यग्रिमहेतुलक्षणेऽवयवपदमग्रिमं व्यर्थमित्यत आह - **व्याप्ती**ति टीका। उदाहरणपदेन व्याप्त्यभिधायकोऽवयवो ग्राह्यः। एतद्व्याख्यानबीजमाह - **उदाहरणे**ति टीका। तथा च यदि उदाहरणरूपावयवप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकत्वमात्रे उक्ते सति [173 B] आप्तवाक्ये धूमा[द्वह्नि]मान् इत्येवंरूपेऽतिव्याप्तिवारणार्थम् अवयवपदं दत्तं तद् व्यर्थं स्यात्। तत्रोदाहरणरूपावयवाभिधान-प्रयोजकाकाङ्क्षाजनकज्ञानजनकत्वमेव नास्तीत्यवयवपदं व्यर्थं स्यादित्यर्थः। ननु हेतोः साध्यविषयकज्ञानजनक-त्वात् यतो हेतुना साध्यानुमितिः क्रियते कथं साध्याविषयकज्ञानजनकत्वं स्यादित्यत आह - **अत्रे**ति टीका। साध्याविषयकेति हेतुलक्षणे जनकेत्यन्तं शब्दविशेषणं तथा च साध्याविषयकज्ञानजनको यो हेतुः पञ्चम्यन्ता-(न्तोऽ)नुमितिपरः शब्दः स हेत्ववयवः। तथा च साध्याविषयकत्वं हेतोर्विशेषणं नास्ति तेन नोक्तदोषः। साध्या-विषयकज्ञानजनकेत्यस्य कृत्यमाह - **तस्मादि**ति टीका। निगमने तस्या(स्मा)दित्यंशे साध्यविषयकज्ञानजनकत्वात् यतः सर्वनाम्नो बुद्धिस्थवाचकात् बुद्धिस्थस्तु वह्निव्याप्यः धूम एव तच्छब्देन वह्निव्याप्यः धूम एव परामृश्यतेऽत-स्तदंशे निगमने साध्यविषयकज्ञानजनकत्वात् नातिव्याप्तिः। ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयात् इत्यत्र साध्या-विषयकज्ञानजनकत्वं नास्तीत्यव्याप्तिरित्यत आह - **तदर्थत्वे**ति टीका। तथा च साध्यविषयकज्ञानजनकनियता-

वयवभिन्नत्वपर्यवसन्नोऽर्थः। अथ हेतुपञ्चम्येति पदस्य कृत्यमाह - **उदाहरणे**ति टीका। यो धूमवान् स वह्निमान् इत्युदाहरणेऽतिव्याप्तिवारणाय हेतुपञ्चम्यन्तेति पदम्। तथा चोक्तोदाहरणवाक्ये हेतुपञ्चम्यन्तत्वं नास्तीति नातिव्याप्तिः। अनुमितिपरेति पदस्य कृत्यमाह - **उदासीनवाक्ये**ति टीका। तथा चाप्तवाक्ये धूमादितिरूपे साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तत्वं वर्तते परं हेत्ववयवत्वं तत्र नास्तीति अतिव्याप्तिस्ततस्तद्वारणायानुमिति-परशब्दत्वं न्यायावयवत्वमित्यर्थः। ननु अनुमितिपरशब्द इत्यनेन न्यायावयवत्वमुच्यते तथा चोदाहरणांशे यो धूमवान् इत्यंशे न्यायावयवत्वमेव नास्ति इति कृत्वा हेतुपञ्चम्यन्तपदं व्यर्थमित्यत आह - **न्यायप्रविष्टे**ति टीका। तथा चानुमितिपरशब्दस्यार्थे न्यायप्रविष्टवाक्यत्वमित्यर्थः, एवं तेनोदाहरणे न्यायप्रविष्टवाक्यत्वं वर्तत एवेत्यति-व्याप्तिवारणार्थं हेतुपञ्चम्यन्तेति पदम्। अथवा हेतुपञ्चम्यन्तपदवैयर्थ्यास्वरसादाह - **यद्वे**ति टीका। तथा च लक्षणद्वये तात्पर्यम्। तथाहि - लक्षणद्वयमेव विवृणोति। **तथा चे**ति टीका। तथा च साध्याविषयकज्ञान-जनकन्यायावयवत्वमित्येकं लक्षणम्। हेतुपञ्चम्यन्ते न्यायावयवत्वमिति द्वितीयम्। प्रथमलक्षणे न्यायावयवत्वमात्रं प्रतिज्ञायामतिव्याप्तमत आह - साध्याविषयकज्ञानजनकेति पदम्। साध्याविषयकज्ञानजनकत्वं प्रतिज्ञायां नास्ति, तस्याः साध्यविषयकत्वात्। साध्याविषयकज्ञानजनकत्वमात्रमुदासीनवाक्येऽतिव्याप्तमत आह - न्यायावयवत्वपदम्। द्वितीयलक्षणं न्यायावयवत्वमात्रं [174 A] प्रतिज्ञायामतिव्याप्तमत आह - हेतुपञ्चम्यन्तेति। तावन्मात्रं हेतुपञ्चम्यन्तमात्रमुदासीनवाक्येऽतिव्याप्तमत आह - न्यायावयवत्वपदम्। ननु पूर्वोक्तलक्षणेन मूलोक्तेन सदेहं पुनरुक्तमित्यत आह - **पूर्वमि**ति टीका। तथा च पूर्वमूललक्षणे हेतुपञ्चम्यन्तत्वं नोक्तम् अत्र तु हेतुपञ्चम्यन्तत्वमुक्तम् इति भेदः। ननु प्रतिज्ञेत्यादिमूललक्षणे उदासीनवाक्येऽतिव्याप्तिवारणं कथं स्यादित्यत आह - **उदासीनस्ये**ति टीका। तथा च यद्यपि उदासीनवाक्ये हेतुविभक्तिमद्वाक्यत्वं वर्तते तथापि प्रतिज्ञावाक्यजन्या या धीः तज्जन्या या कारणाकाङ्क्षा नाम हेत्वाकाङ्क्षा तन्निवर्तकज्ञानजनकत्वं नास्तीति न तत्रोदासीनवाक्येऽतिव्याप्तिः। अत्र लक्षणे उत्तरदलस्य कृत्यमाह - **सामान्यवत्त्वे सती**ति टीका। तथा च सामान्यवत्त्वे सतीति हेत्ववयवावयवेत्यत आह - **परम्परये**ति टीका। परम्परा यथा सामान्यवत्त्वे सतीति विशेषणज्ञानात् पञ्चम्यन्तत्वरूपविशिष्टज्ञानम्, तेन विशिष्टज्ञानेनोक्ताकाङ्क्षानिवृत्तिरिति विशेषणज्ञानस्यापि उक्ताकाङ्क्षानिवर्तकत्वमस्त्येवेति कृत्वा तत्रातिव्याप्तिः तद्वारणार्थं हेतुविभक्तिमत्त्वं विशेषणम्। ननु तथापि सामान्यवत्त्वे सतीति हेत्ववयवावयवे हेतुविभक्ति-मत्समभिव्याहृतत्वं वर्तत एवेत्यत आह - **हेतुत्वे**ति टीका। तथा च हेतुत्वेनान्वितो य एकार्थो विशिष्टोऽर्थः तत्प्रतिपादकवाक्यत्वमित्यर्थः। एतत् कथं हेत्ववयवावयवे नास्तीत्यत आह - **हेत्ववयवे**ति टीका। सामान्यवत्त्वे सतीत्येवंरूपस्य तथात्वाभावात् हेतुत्वान्वितैकार्थावच्छिन्नवाक्यत्वाभावादित्यर्थः। हेतुत्वान्वितै-कार्थावच्छिन्नवाक्यत्वं तु विशिष्ट एवेति भावः। एतदेव विवृणोति - **सामान्यवत्त्वे सती**ति टीका।

**सप्तमीबलादि**ति टीका। यत्र सतिसप्तमीमहिम्ना यत्र सतिसप्तमी भवति तत्र विशिष्ट एवार्थो भवति यथा दण्डे सति कुण्डलवान् समागतः इत्यत्र दण्डविशिष्टः कुण्डलवान् आगत इति विशिष्टप्रत्यय एव भवति तद्वत् अत्रापि सामान्यवत्त्वविशिष्टास्मदादिबाह्यकरणत्वरूपो यो विशिष्टेऽर्थः तत्रैव पञ्चम्यर्थविभक्त्यर्थस्यान्वयः। **विशेष्यमात्र** इति टीका। बाह्यप्रत्यक्षत्वमात्रे इत्यर्थः। मतान्तरमुत्थाप्य दूषयति - **यत्त्विति**। प्रतिज्ञावाक्यधीजन्यकारणा-काङ्क्षानिवर्तकज्ञानजनकत्वमात्रे धूमो यत इत्यनवयवरूपे वाक्येऽतिव्याप्तिवारणार्थं हेतुविभक्तिमदिति पदम्। कथमनेन तद्वारणमित्यत आह - **न हीति** टीका। तथा च न हि पञ्चम्यन्तमात्रेण तत्राकाङ्क्षानिवृत्तिः किन्तु प्रथमान्तपञ्चम्यन्ताभ्यामेवाकाङ्क्षानिवृत्तिः। तथा हि धूम इत्युक्तेऽप्याकाङ्क्षा न निवर्तते। यत इति पञ्चम्यन्ते शक्तेऽपि नाकाङ्क्षानिवृत्तिरत उभाभ्यामेवैताभ्यामाकाङ्क्षानिवृत्तिः। तथा च हेत्ववयवे [174 B] केवलपञ्चम्यन्त-मात्रेणाकाङ्क्षानिवृत्तिरनवयववाक्ये तु द्वाभ्यामेवेति तन्निरासः। दूषयति - **तस्येति** टीका। धूमो यत इति वाक्यं हेत्ववयवरूपं न भवति चेत् तदा पूर्वदलमेव नास्ति। न हि उदासीनेनानेन वाक्येन प्रतिज्ञावाक्यधीजन्यकारणा-काङ्क्षानिवर्तकज्ञानजनकत्वं नास्ति तथा च तत्र पूर्वदलाभावादेव तत्र नातिव्याप्तिः। **अवयवत्वे चे**ति टीका। तथा च धूमो यत इति वाक्यस्य यदि ह(हे)त्ववयवरूपत्वं तदा तद्वारणमेव न सम्भवति तस्य लक्ष्यत्वादेव। लक्षणान्तरमाचष्टे - **पञ्चम्यन्ते**ति टीका। तथा च पञ्चम्यन्त१लाक्षणिकपदवत्२अनुमितिपरवाक्य३त्वमिति लक्षणे तृतीयपदस्य कृत्यमाह - **न्याये**ति टीका। तथा च न्यायाप्रविष्टहेतुसदृशवाक्ये उदासीनवाक्येऽति-व्याप्तिवारणायानुमितिपरेति पदम्। तेन कथं तद्वारणमित्यत आह - **न्यायप्रविष्टे**ति। तथा चोदासीनवाक्यं न्यायप्रविष्टं न भवतीति भावः। लाक्षणिकपदस्य कृत्यमाह - **निगमने**ति मूलम्। निगमने तस्मात् वह्निमान् इति रूपे लाक्षणिकपदत्वं नास्ति। ननु तत्रापि वक्ष्यमाणानुपपत्त्या लिङ्गस्याहेतुत्वरूपया तस्मादिति तच्छब्देऽपि ज्ञानलक्षणाऽवश्यं वक्तव्या। यथा वह्निज्ञानं प्रति धूमादिति अर्थस्य हेतुत्वं नास्ति किन्तु धूमज्ञानस्येति धूपमदस्य धूमज्ञाने लक्षणा तद्वत् तस्मादिति शब्दार्थेऽपि वह्निज्ञानं प्रति हेतुत्वमनुपपन्नमिति कृत्वा तत्रापि लक्षणाऽवश्यं वक्तव्येत्यत आह - **सर्वनाम्नश्चे**ति टीका। तथा च धूमपदेन धूमज्ञानं लक्षणयोपस्थाप्यते धूमपदस्य धूमे शक्तत्वात् धूमज्ञाने लक्षणैव परं तत्पदस्य बुद्धिस्थवाचकतया बुद्धिस्थे शक्तिस्तथा धूमज्ञानमपि बुद्धिस्थमिति कृत्वा तत्पदेन धूमवत् धूमज्ञानमपि शक्त्यैवोपस्थापितं तथा च तत्र लक्षणा नास्ति कथं लक्षणावत्पदत्वं निगमने इति कृत्वा तत्र नातिव्याप्तिः। एतदेवाह - **लक्षणाया** इति टीका। पञ्चम्यन्तेति पदस्य कृत्यमाह - **प्रतिज्ञाया** इति टीका। तथा च पर्वतो वह्निमान् इति प्रतिज्ञायां लाक्षणिकानुमितिपरशब्दत्वं वर्तते यतः पर्वतो वह्निमान् वह्निमत्तया ज्ञातव्य इत्यत्रापि ज्ञानलक्षणाऽस्त्येव तन्निरासाय पञ्चम्यन्तेति। तथा च प्रतिज्ञावाक्ये पञ्चम्यन्तत्वं नास्तीति न तत्रातिव्याप्तिः। शङ्कते - **न चे**ति। **तत्रे**ति टीका। प्रतिज्ञायाम्। तथा च प्रतिज्ञायां लक्षणाया अभावेन

लाक्षणिकपदवत्त्वमेव नास्ति कथं तत्रातिव्याप्तिरित्याशङ्कार्थः। समाधत्ते - **साध्यस्येति** टीका। तथा च साध्यस्य वह्नेर्हेतुवाक्यार्थेन सह जन्यजनकभावलक्षणो यो वाक्यार्थः स न सम्भवति तथा च धूमादिति पञ्चम्या अर्थो जनकत्वं तन्निरूपकत्वं वह्नौ नान्वितम्। कुत [175 A] इत्यत आह - **तस्येति** टीका। साध्यस्य वह्नेरित्यर्थः। तदकार्यत्वात् धूमाकार्यत्वात् इत्यर्थः। **उपाध्यायमतमाह - अत्राहुरिति** टीका। **न हीति** टीका। न हि पञ्चम्याः कारकत्वम् अर्थः किन्तु ज्ञापकत्वम्। तथा च प्रतिज्ञार्थस्तु लक्षणं(णां) विना शक्यार्थ एव। पञ्चम्यर्थस्तु ज्ञापकत्वम्, तच्च तत्र वह्नौ अन्वितं भविष्यत्येव, तेन हेतावेव लक्षणा, प्रतिज्ञावाक्ये लक्षणा नास्ति। तथा च लाक्षणिकपदवत्त्वं प्रतिज्ञायां नास्तीति न तत्रातिव्याप्तिः, तेन पञ्चम्यन्तपदं व्यर्थमेव। एतदेवाह - **साध्येति** टीका। तथा च साध्यनिर्देशानन्तरं न कारणमात्रस्याकाङ्क्षा किन्तु प्रमाणस्याकाङ्क्षा, यथा पर्वतो वह्निमान् कुतः प्रमाणादिति प्रमाणाकाङ्क्षायां धूमात् इति हेतुवाक्यस्य प्रयोगात्। पञ्चम्या ज्ञापकत्वमेव प्रतिपाद्यते, यथा वह्नेः धूमो ज्ञापक इति। तथा च धूमपदलक्षणया प्रकृत्योपस्थापितो धूमः, प्रत्ययः पञ्चमीङसिस्तयोपस्थापितं ज्ञापकत्वं तत्र साध्यस्य विषयत्वेन ज्ञाप्यत्वेन ज्ञानविषयत्वेनेति यावत्। तथा च प्रतिज्ञायां न साध्यपदे वह्न्यादिरूपे ज्ञाने लक्षणा। अत्रैवोपोद्बलकं प्राह - **अत एवेति** टीका। यतः पञ्चम्या ज्ञापकत्व एव लक्षणा अत एव पञ्चम्या विभक्त्या ज्ञापकत्वमुपस्थाप्यते। यदि च प्रतिज्ञायां साध्यपदे ज्ञानलक्षणा स्यात् तदा दोषमाह - **उद्देश्येति** टीका। यदि च प्रतिज्ञायां साध्ये ज्ञानलक्षणा स्यात् तदा उद्देश्यानुमितीत्यादि पूर्वोक्तं प्रतिज्ञालक्षणं न स्यात्। अनुमितिस्तु पक्षतावच्छेदकसाध्यसामानाधिकरण्यावगाहिनी पर्वतो वह्निमान् इति रूपा। प्रतिज्ञायामधिकं ज्ञानं च तव मतेऽधिकं भासते इति कृत्वा अनुमित्यन्यूनानतिरिक्तता नास्ति किन्तु अधिकमपि ज्ञानं भासते, ततः प्रतिज्ञालक्षणं **गङ्गेश**कृतमयुक्तं स्यात्। एतदेवाह - **अन्यथेति** टीका। तथा च प्रतिज्ञायां साध्यज्ञानमपि भासते, अनुमितौ तु साध्यज्ञानं न भासते किन्तु साध्यमेव भासते। तथा चातिरिक्तविषयत्वमेव जातम्, अतः प्रतिज्ञायां साध्ये ज्ञानलक्षणा नास्ति **इत्युपाध्यायाः**। **यज्ञपत्युपाध्याया** वदन्ति - तथा च पञ्चम्यर्थो ज्ञापकत्वम्, तथा च हेतुवाक्य एव ज्ञापकत्वे पञ्चम्या लक्षणा। ननु प्रतिज्ञायां साध्ये ज्ञानलक्षणेत्युक्तम्। एतन्मतं दूषयति - **अत्र वदन्तीति** टीका। पञ्चम्या ज्ञापकत्वे शक्तिर्वा लक्षणा वा। तत्र नान्त्य इत्याह - **सुबिति** टीका। सुब्विभक्तौ लक्षणा नास्ति, अन्यथा व्यत्ययानुशासनवैयर्थ्यं स्यात्। यथा "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" [पाणिनिसूत्र १.४.३४] श्लाघादेरी(ज्ञी)प्स्यमानोऽर्थः सम्प्रदानं स्यात्। एवं "स्पृहेरीप्सितः" [पाणिनिसूत्र १.४.३६] अत्रापि स्पृहेरीप्सितोऽर्थः सम्प्रदानं स्यात्। इत्यत्र कर्मत्वबोधनार्थं चतुर्थी प्रोक्ता वस्तुगत्या सम्प्रदानत्वं नास्ति इति कृत्वा सम्प्रदानसंज्ञायां कृतायां सम्प्रदानसंज्ञा प्रयोजनचतुर्थी विहिता तथा च यदि सुब्विभक्तौ लक्षणा स्यात् तदा **पाणिने**स्तत्रानुशासने लक्षणानियमो न स्यात्। तथाहि द्वितीयायाः [175 B] शक्योऽर्थः कर्मत्वम्, चतुर्थ्याः

शक्योऽर्थः सम्प्रदानम्, द्वितीया सम्प्रदानत्वं बोधयितुमसमर्था, चतुर्थी कर्मत्वं बोधयितुमसमर्था । यदि च द्वितीयया शक्यार्थातिरिक्तं सम्प्रदानत्वं लक्षणया बोधयितुं शक्यते एवं चतुर्थ्याऽपि सम्प्रदानातिरिक्तं कर्मत्वं बोधयितुं शक्यते तर्हि सर्वाभिर्विभक्तिभिः स्वस्वशक्यार्थान् विहाय सर्वेऽर्थाः सर्वाभिर्विभक्तिभिः लक्षणया प्रतिपादयितुं शक्यन्त एवेति **पाणिने**स्तासां तासां कासाञ्चिद् विभक्तीनां शक्यार्थं विहाय कस्मिंश्चिदेवार्थविशेषे लक्षणया प्रतिपादनार्थं विभक्तिविशेषविधानं स्यात् । तस्मात् गोपी कृष्णाय इत्यत्र चतुर्थीलक्षणया कर्मत्वं बोध्यतोऽयं नियमो न स्यात् । सर्वत्र प्रातिपदिकलक्षणयेव सुब्विभक्तिलक्षणयाऽपि ते तेऽर्थाः उपस्थिता भविष्यन्तीति तत्तत्सूत्रे लक्षणानियमोऽनर्थः स्यात् । तस्मात् **पाणिने**र्यत्र लक्षणयाऽनुशासनं तत्रैव विभक्तौ लक्षणा । तथा च **पाणिनि**ना पञ्चम्या ज्ञापकत्वमर्थो लाक्षणिकः कुत्राप्युक्तो नास्ति तादृशानुशासनाभावात् । अनुशासनाभावेऽपि यदि लक्षणा स्यात् तदा लक्षणानियमानुशासनं व्यर्थं स्यात् । ततः पञ्चम्या ज्ञापकत्वे लक्षणा नास्तीति । अथ पञ्चम्या ज्ञापकत्वं शक्य एवार्थोऽस्तु इत्यत आह - **एकार्थत्वे**ति । तथा चान्याय्यं चानेकार्थत्वमिति **जैमिनीयसूत्रेण** विरोधः । एतदर्थो यथा एकस्य शब्दस्य प्रयोजनव्यतिरेकेणानेकार्थत्वं न सम्भवति । एकार्थत्वे सम्भवत्यनेकार्थत्वायोगात् । तथा च पञ्चम्या ज्ञापकत्वं शक्योऽर्थो न भवति, हेतुत्वमेव शक्योऽर्थः । नन्वेवं प्रतिज्ञायां साध्ये ज्ञानलक्षणा स्वीक्रियते तदा पूर्वोक्तमुद्देश्येत्यादि प्रतिज्ञालक्षणं दुष्टं स्यात् इत्यत आह - **प्रतिज्ञालक्षणमि**ति टीका । तथा च प्रतिज्ञायां ज्ञानलक्षणासत्त्वेऽपि लाक्षणिकबोधात् पूर्वं यः वाक्यार्थबोधस्तमादायैव प्रतिज्ञालक्षणं ज्ञेयं पर्वते वह्निरित्येव, लक्षणापक्षे तु पर्वतो वह्निमत्तया ज्ञातव्य इति । मतान्तरमाशङ्क्याह - **यत्त्वि**ति टीका । यदि च प्रतिज्ञायां ज्ञानलक्षणा नास्ति तदा हेत्ववयवलक्षणे पञ्चम्यन्त-लाक्षणिकपदवदनुमितिपरशब्दत्वमित्यत्र पञ्चम्यन्तपदं व्यर्थं स्यात् लाक्षणिकपदवदनुमितिपरशब्दत्वमित्येवास्तु पञ्चम्यन्तपदं व्यर्थम् । प्रतिज्ञायामतिव्याप्तिर्नास्ति तत्र लाक्षणिकपदत्वाभावात् । अतः पञ्चम्यन्तपदं व्यर्थं स्यादित्यर्थः । अत्राशङ्कते - **न चे**ति टीका । पर्युदासनञ् अन्योन्याभाव एव । यथाऽसुरा अविद्या इत्यादौ । अत्रासुरा इत्युच्यमाने सुराणामत्यन्ताभावो न प्रतीयते किन्तु सुरविरुद्धा एव, ब्राह्मणोऽब्राह्मणभिन्नः, एवं समस्तो नञ् स पर्युदासः । असमस्तस्तु निषेधवाचकः यथा चैत्रो न पचतीत्यादि । तथा प्रकृते लाक्षणिकपदवद[वा]यवान्तरे यद् उदाहरणं तत्रातिव्याप्तिवारणार्थं हेतुलक्षणे पञ्चम्यन्तपदम् । तथाहि - अयं [176 A] स्नानसन्ध्याद्ययोग्यः अपठितवेदत्वात् अब्राह्मणवत् इत्यत्र उदाहरणे अब्राह्मणवदिति यत् पदं तल्लाक्षणिकपदवदनुमितिपरः शब्दो भवति । कथम् ? यतोऽत्र ब्राह्मणभेदो नञर्थः, स तु शक्यः, तद्वान् लक्ष्योऽर्थः शूद्रादिः । तथा च पर्युदासनञ्पदं लाक्षणिकपदम्, तद्वदुदाहरणम्, तत्रातिव्याप्तिवारणार्थं पञ्चम्यन्तपदम् । दूषयति - **लाक्षणिके**ति टीका । तथा च हेत्ववयवलक्षणं न केवलं लाक्षणिकपदवदनुमितिपरशब्दत्वं किन्तु लाक्षणिकपदनियतानुमितिपरशब्दत्वं

हेत्ववयवत्वम्। तथा च पर्युदासनञादिलाक्षणिकपदवदवयवान्तरे पूर्वोक्तोदाहरणे तादृशलाक्षणिकपदनियतानुमितिपरशब्दत्वं नास्तीति न तत्रातिव्याप्तिः। नन्वेवं लाक्षणिकपदनियतानुमितिपरशब्दत्वमेव हेत्ववयवत्वं कुतः इत्यत आह - **अन्यथेति** टीका। अन्यथा यदि लाक्षणिकपदनियतानुमितिपरशब्दत्वं हेत्ववयवत्वमेवं विवक्षा न क्रियते तदा पञ्चम्यन्तपदे दत्तेऽपि उदाहरणविशेषेऽतिव्याप्तिः स्यादेव। तथाहि पर्वतो वह्निमान् धूमात् इत्यनुमानमेकम्, अनुमानान्तरं यथा शब्दो गुणः सामान्यवत्त्वे सति अस्मदादिबाह्यकरणप्रत्यक्षत्वात् धूमादिति हेत्ववयवशब्दवत् इत्युदाहरणावयवेऽतिव्याप्तेः वज्रलेपत्वात्। अत्राशङ्कते - **न चेति** टीका। **धूमवत्त्वादिति**। हेत्ववयवो यत्र दृष्टान्तत्वेनोपादीयते तत्रातिव्याप्तिर्न भवति इत्याह - **प्रकृतेति** टीका। प्रकृतसाध्येति। प्रकृतं यत्र यत् साध्यं तत्प्रतियोगिकं यत् हेतुपञ्चम्यन्तं लाक्षणिकपदवत् अनुमितिपरशब्दत्वम्, यत्र च धूमादिति हेत्ववयवो दृष्टान्तत्वेनोपादीयते तत्र प्रकृतसाध्यप्रतियोगिको धूमादिति हेतुर्न भवति। प्रकृतसाध्यं गुणत्वं तत्प्रतियोगिकं हेतुपञ्चम्यन्तं न भवतीति न तत्रातिव्याप्तिरित्यर्थः। दूषयति - **तत्प्रतियोगिकेति** टीका। घटशब्दो गुणः द्रव्यकर्मान्यत्वे सति सत्त्वात्। यत्र यत्र द्रव्यकर्मान्यत्वे सति सत्त्वं तत्र तत्र गुणत्वं यथा द्रव्यकर्मान्यत्वे सति सत्त्वादिति हेत्ववयववत् इत्यत्र हेत्ववयव एव दृष्टान्तत्वेनोपादीयते। ततोऽत्रातिव्याप्तिः स्यादेव, लाक्षणिकपदवत्प्रकृतसाध्यप्रतियोगिकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वमस्त्येव, तस्मात् लाक्षणिकपदवत्त्वेन लाक्षणिकपदवह्नि(ह्निः) यत(तः) [तद्वा]त्त्वमेव वक्तव्यम्। तेन न तथाविधोदाहरणेऽतिव्याप्तिः। तथा च यदि प्रतिज्ञायां लक्षणा नास्ति तदाऽवयवान्तरस्य लाक्षणिकपदनियतत्वाभावात् तेनैवातिव्याप्तिवारणे पञ्चम्यन्तपदं व्यर्थं स्यादित्यभिप्रायः ततः प्रतिज्ञायामपि साध्यज्ञानलक्षणा अवश्यं वक्तव्या इत्युक्तम्। दूषयति - **तत्रेति**। पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरशब्दत्वमित्येव यथाश्रुतं युक्तमित्याह - **उदाहरणेति** टीका। तेन घटशब्दो गुण इत्यादौ हेत्ववयव एव यत्र दृष्टान्तत्वेनोपादीयते तत्र उदाहरणांशविषयीभूतस्य द्रव्यकर्मान्यत्वे सति सत्त्वात् इत्यंशस्य हेत्ववयवत्वे इष्टापत्तिः, एतावानंशो हेत्ववयवो भवत्येवेति। न चैवं द्रव्यकर्मान्यत्वे [176 B] सति सत्त्वादिति शब्दवदित्येतस्य सम्पूर्णस्य पञ्चम्यन्तत्वमस्तीति। पञ्चम्यन्तत्वाभावान्न तस्य हेत्ववयवत्वप्रसक्तिरित्यर्थः। एतदेवाह - **नियमविवक्षाया** इति टीका। नियमविवक्षा तु क्रियते उदाहरणांशेऽतिव्याप्तिवारणाय। पञ्चम्यन्तो यदि हेत्ववयवः तदा तस्य हेत्ववयवत्वमेवेति न तत्रातिव्याप्तिरिति नियमविवक्षा व्यर्था। उत्तरग्रन्थं योजयति - **हेतुपदेनेति** टीका। तथा च हेतुपदेन धूमपदेन धूमज्ञाने लक्षणा, तथा च धूमादिति धूमज्ञानादित्यर्थः। ननु मूले लिङ्गस्याहेतुत्वादित्युक्तम्, तस्याहेतुत्वं कुत इत्यत आह - **अतीतादाविति** टीका। अतीतो धूमो हेतुः, तत्र वह्निज्ञानं प्रति धूमस्य हेतुत्वाभावात् हेतुत्वप्रतिपादिका पञ्चमी अनन्विता स्यात्, तस्माद् यस्य वह्निज्ञानं प्रति हेतुत्वं सम्भवति तत्रैव लक्षणा, धूमज्ञानस्य तु वह्निज्ञानं प्रति हेतुत्वं सम्भवति, ततस्तत्र ज्ञानलक्षणा इति सिद्धम्।

अत्राशङ्कते - **न चे**ति टीका। तथा च धूमपदस्य ज्ञाने लक्षणा किमर्थं कर्तव्या ? शब्दप्रयोगा(गः) स्वाधीनः, तथा च धूमादिति [कृ]त्वा धूमज्ञाने लक्षणा वक्तव्या, ततस्तदपेक्षया धूमज्ञानादिति शब्दप्रयोग एव कार्य इत्याशङ्कार्थः। समाधत्ते - **कटमि**ति टीका। कटं करोति इतिवत् निरूढलक्षणया ज्ञानलाभात् धूमज्ञानलाभात्। यथा कटं करोति इत्यत्र कृधातुना कृतेरुपस्थितिः, कृतेराश्रयत्वं न कटेऽस्ति कटस्यासिद्धत्वात्, कृतेस्तु सिद्धविषयत्वम् असिद्धोत्पादकत्वं तथा च सिद्धविषयिण्या कृत्याऽसिद्धमुत्पाद्यते। यथा कपालविषयकमपरोक्षज्ञानं कुलालस्य पूर्वमुत्पद्यते। तदनन्तरं घटविषयिणी चिकीर्षोत्पद्यते कपालेन घटं साधयामीति। तदनन्तरं कपालविषयकः प्रयत्नः कुलाले उत्पद्यते। येन कपालग्रहणं करोति स कपालविषयकः प्रयत्नः। तेन प्रयत्नेन घटः उत्पाद्यते, स चासिद्ध उत्पाद्यते। तथा च कपालविषयिण्या कृत्या घट उत्पाद्यते। एवं कटावयवविषयिण्या कृत्या कटोऽसिद्ध उत्पाद्यते। कृतिविषयता कटावयवे तिष्ठति परं न कटे, तेन कटं करोतीति प्रयोगः स्यात्। ननु कटं करोतीति प्रयोगः ततो यथाऽत्र निरूढलक्षणयाऽयं प्रयोगः, निरूढलक्षणा च प्रयोजनशून्या लक्षणाऽनादितात्पर्यमूलका यत्र सावधिकं तात्पर्यं नास्ति। सदाऽयमेव प्रयोगः यथा कर्मणि कुशलः इत्यत्र निरूढलक्षणा व्यङ्ग्यप्रयोजनाभावात्। अत एव निरूढशक्तितुल्या मुख्यार्थस्य कटस्य बाधात् कटावयवे लक्षणा। ततः प्रकृते धूमे हेतुत्वस्य बाधितत्वात् धूमज्ञाने निरूढलक्षणा। **उपाध्याय**मतमाशङ्कते - **नन्वि**ति टीका। धूमपदे यदि ज्ञानलक्षणा तदा वृत्तिद्वयविरोधः। तथाहि लक्षणया एकस्मादेव धूमपदात् धूमज्ञानस्योपस्थितिः शक्त्या च धूमपदात् धूमस्योपस्थितिः। तथा च सकृदुच्चरितपदस्य सकृदर्थप्रत्यायकत्वनियमात् एकेन एकदा धूमपदेन शक्त्या धूमस्यैवोपस्थितिः कर्तव्या न तु लक्षणया [177 A] धूमज्ञानस्याप्युपस्थितिः, एवं लक्षणया यदा धूमज्ञानस्योपस्थितिः क्रियते तदा न शक्त्या धूमस्योपस्थितिः। तत्र युगपद् एकदा वृत्तिद्वयविरोधः शक्ति-लक्षणारूपवृत्तिद्वयविरोधः। एवं तर्हि धूमपदे निरूढलक्षणया यदि धूमज्ञानमुपस्थितं तदा धूमोपस्थितिः शक्त्या न स्यात्। ननु मास्तु तदा धूमस्योपस्थितिर्धूमज्ञानस्यैवोपस्थितिसम्भवादित्यत आह - **तथा चे**ति टीका। अनुपस्थिते धूम(मे) व्याप्याकाङ्क्षा न स्यात् यथा धूमो व्याप्य इत्याकाङ्क्षा न स्यात् किन्तु धूमज्ञानमेवोपस्थितमिति कृत्वा धूमज्ञान एव गमकत्वाकाङ्क्षा स्यात्। एवं धूमज्ञानस्योपस्थितत्वात् शक्त्या धूमस्यानुपस्थितत्वात् तत्रोदाहरणवाक्येन व्याप्त्यादिकं न प्रदर्श्येत। तदा धूमज्ञान(ने) व्याप्त्युपदर्शकत्वं स्यात्। तथा च व्याप्त्यादिकं धूमा(म)ज्ञान एव प्रदर्श्येत। ननु धूमपदात् यदि निरूढलक्षणया धूमज्ञानमुपस्थितं तदा ज्ञाने वह्निनिरूपितव्याप्त्याद्यभावात् धूमपदेन ज्ञानविशेषणत्वेनोपस्थिते धूमे एव व्याप्त्यन्वयो भविष्यति सविशेषणे हीति न्यायात्। तथाहि वह्निनिरूपितं व्याप्त्यादिकमुदाहरणवाक्येन प्रतिपाद्यमानं धूमपदेनोपस्थिते धूमज्ञाने ज्ञानरूपे विशेष्ये व्याप्त्यादिकं बाधितमिति कृत्वा विशेषणे धूमे एव व्याप्त्यादिकमन्वितं भविष्यतीति नोक्तदोष इत्यस्वरसादाह - **किञ्चे**ति

टीका। **अवयवेने**ति टीका। यावत:(न्त:) पञ्चावयवा: तैरेकमनुमितिजनकं किञ्चिद् ज्ञानमुत्पादनीयम् तथा च धूमादिति हेतुवाक्येनानुमितिजनकं ज्ञानमुत्पादनीयम्। अनुमितिजनकं च ज्ञानं धूमज्ञानमेव न तु धूमज्ञानज्ञानं धूमज्ञानज्ञानस्यानुमित्यजनकत्वात्। ननु तर्हि धूमस्य वह्न्यनुमितिं प्रत्यजनकत्वात् पञ्चम्युपस्थापितहेतुत्वस्य धूमेऽन्वयो न स्यात् इत्यत आह - **तस्मादि**ति टीका। **धूमस्य लिङ्गस्यानुमित्यजनकतापक्षेऽपी**ति टीका। अपिशब्देन प्राचां मते अनुमितित्वावच्छिन्नं प्रति लिङ्गमेव करणं तस्य ज्ञानं च न व्यापार इति मते लिङ्गे पञ्चम्यर्थो हेतुत्वमप्युपपद्यत एव। मास्तु वा लिङ्गस्य कारणत्वम् अतीतादौ व्यभिचारात्, तथापि पञ्चम्यर्थ: कारणत्वं न भवत्येव किन्तु धूमादिति पदं धूमे शक्तमेव न तु धूमज्ञाने, धूमज्ञाने लाक्षणिकम्। पञ्चम्यर्थस्तु अनुमितिजनकज्ञान-विषयत्वलक्षण: स च धूमो(मे)ऽन्वितो भविष्यत्येवेति। धूमादिति पदं धूमे शक्तमेव न तु लाक्षणिकम्। प्रयोजक-त्वमात्रे वा पञ्चमी। अनुमितिजनकज्ञानं धूमज्ञानम्, धूमज्ञानस्य पूर्वानुभवद्वारा धूम: कारणम्, धूमेन धूमानुभव उत्पादित:, तेन पूर्वानुभवेन धूमे धूमपदस्य शक्तिग्रह उत्पादित:, तेन सङ्केतग्रहेण धूमपदात् धूमस्मरणमुत्पादितम्, तदेव धूमज्ञानमिति कृत्वा धूमो वह्निज्ञानं प्रति प्रयोजको भवत्येव, तथा च धूमपदं धूमे शक्तमेव, प्रयोजकत्वे च पञ्चमीति किमर्थं धूमज्ञाने लक्षणा **इत्युपाध्यायमतं** मूलोपरि दूषकम्। अत्र **मिश्रमत**माह - **अत्र वदन्ती**ति। यदि त्वयोच्यते युगपद्वृत्तिद्वयविरोधभयात् धूमपदेन धूमज्ञानमेवोपस्थितं न तु धूम: तदा पाकात् रक्तम् इत्यनन्वितं स्यात् रक्तपदस्य [177 B] रक्तरूपविशिष्टद्रव्यवाचकत्वात्, तदा रक्तपदस्य रूपे शक्तत्वात्। यदि च रक्तपदेन रक्तं द्रव्यमुपस्थितं तदा द्रव्ये पाकस्य हेतुत्वासम्भवात् पाकादिति पञ्चमी अनन्विता स्यात्। पाकेन तु रक्तं रूपमेव जन्यते। न चैवं रक्तपदेन रूपमेवोपस्थाप्यते न तु द्रव्यं तर्हि कमानयामीति प्रश्ने पाकाद् रक्तं तमानय इत्युत्तरात् द्रव्यस्यैवानयनात् रूपे आनयनासम्भवात्। पाकाद् रक्तमित्यनन्वितं वाक्यं स्यात्। रक्तरूपस्यानुपस्थितत्वात् पाकादिति हेत्वन्वयो न स्यादित्यर्थ:। लक्षणया एतदेवाह - **वृत्तिद्वये**ति टीका। तथा च रक्तपदेन द्रव्यमुपस्थापितम्, शक्त्या च रूपस्योपस्थितिर्न भवति, युगपद्वृत्तिद्वयविरोधात्। अनुपस्थिते च तस्मिन् पाकादिति पञ्चम्यर्थहेतुत्वान्वयो न स्यात्। ननु रक्तपदं रूपे शक्तमेवेत्यत आह --**अभेदे**ति टीका। तथा च यथा नीलो घट इत्यत्र नीलपदं नील-वदभिन्ने उपचरितं तथा रक्तपदमपि द्रव्ये उपचरितमित्यर्थ:। अपिशब्देन उपचाराभावेऽपि लुप्तमतुपा द्रव्यस्यैव बोधनात् इति भाव:। तथा च रक्तमित्यत्र लक्षणया द्रव्यस्य बोधनात्। पाकस्य द्रव्ये हेतुत्वान्वयासम्भवात् पाकादित्यनन्वितं स्यादिति भाव:। ननु रक्तविशिष्टस्य द्रव्यस्योपस्थापनात् विशेषणत्वेनोपस्थिते रक्तरूपे पाकस्य हेतुत्वान्वयो भविष्यतीत्यत आह - **निराकाङ्क्षत्वादि**ति टीका। रूपं तु द्रव्यान्वयेनैव निराकाङ्क्षम्, रूपे आकाङ्क्षा नास्तीति अनन्वयस्तदवस्थ एवेत्यर्थ:। [1]प्रतिबन्द्या समाधत्ते - **यदि चे**ति टीका। यदि रूपस्य

१. यथा पाकादित्यत्रान्वयस्तथाऽत्रापीति प्रतिबन्दी। प्रतौ टिप्पणी।

तटस्थतया ज्ञानान्तरेण प्रधानतयोपस्थिते रक्तरूपे आकाङ्क्षा अथवा यद्वी(द्धि) येन विना न भासते तद्बोधस्य तद्बोधनियमात्। तथा च रक्तरूपवत उपस्थितिः रक्तरूपेण विना न सम्भवति इति कृत्वा रक्तरूपेऽप्याकाङ्क्षा, तदा पञ्चम्यर्थो हेतुत्वमन्वितं भविष्यत्येवेति, तदा प्रकृतेऽपि तुल्यम्। तथाहि धूमज्ञानस्योपस्थितिर्धूमेन विना न सम्भवतीति धूमस्याप्युपस्थितिर्वर्तत एव धूमेऽप्याकाङ्क्षावशाद् व्याप्त्याद्यन्वयो भविष्यत्येव। यद्वी(द्धि) येन विनेति न्यायं प्रकृते योजयति - **तद्विषयकज्ञानस्ये**ति टीका। धूमविषयकज्ञानस्य तन्निरूपणाधीननिरूपणत्वेन धूमनिरूपणाधीननिरूपणत्वेन धूमज्ञानाधीनज्ञानत्वेन धूमज्ञानोपस्थितावश्यं धूम उपस्थितो भवत्येव। तथा चोपस्थिते धूमे पञ्चम्यर्थहेतुत्वान्वयो भविष्यत्येव। तेन च व्याप्त्याद्यन्वयोऽपि धूमे भविष्यत्येव। अत्रैवोपोद्बलकमाह - **अत एवे**ति टीका। बहुव्रीहिसमासे लम्बकर्णमानय इत्यादौ न केवलमन्यपदार्थलक्षणया शुद्धस्यान्यपदार्थस्य भानं किन्तु लम्बकर्णयोरप्युपस्थित्या [178 A] लम्बकर्णविशिष्टव्यक्तिभानम्, तथा प्रकृतेऽपि धूमसम्बन्धिज्ञानभाने धूमोपस्थितिरवश्यं वाच्या। उपस्थितायां च धूमव्यक्तौ व्याप्त्याद्यन्वयो भविष्यतीत्यर्थः। अत्राशङ्कते - **नन्वि**ति टीका। यद्यपि धूमपदेन धूमज्ञानमुपस्थितं विशेषणतया धूमोऽप्युपस्थितस्तथापि धूमस्य ज्ञानविशेषणत्वान्न गमकत्वान्वयः स्यात्, धूमे गमकत्वान्वयो न स्यात्। किन्तु धूमज्ञानस्यैव विशेषणस्य निराकाङ्क्षत्वाद् विशेष्यमेव साकाङ्क्षं धूमज्ञानमेव साकाङ्क्षम्। यथा दण्डी आगत इत्यत्र आगमनान्वयो देवदत्त एव न तु दण्डे तद्वत् धूमज्ञान एवाकाङ्क्षा न तु धूमे इत्याशङ्कार्थः। उत्तरमाह - **इष्टापत्ते**रिति टीका। गमकत्वं यदि ज्ञानजनकत्वमात्रं तदा तत्रैव धूमज्ञाने एव वह्निज्ञानजनकत्वं वर्तते, अतो धूमज्ञान(ने) गमकत्वाकाङ्क्षा। ननु तर्हि यो यो धूमवान् इत्युदाहरणं व्यर्थं स्यात् इत्यत आह - **तथा चे**ति टीका। तथा च कथं धूमज्ञानस्य गमकत्वमिति, व्याप्यधूमविषयतयेति, योग्यतया भासमाने ज्ञाने सति, तच्च धूमे व्याप्तिप्रदर्शनं विना न सम्भवतीति व्याप्तिप्रदर्शनार्थमुदाहरणमपि सङ्गच्छते। न तु गमके व्याप्त्याकाङ्क्षा, गमकं तु धूमज्ञानमेवेति कृत्वा धूमज्ञान(ने) व्याप्तिः प्रदर्शनीया स्यात् न तु धूमे इत्यत आह - **अस्तु वे**ति टीका। अस्तु वा धूमरूपे लिङ्ग एव गमकत्वाकाङ्क्षा। ननु विशेषणत्वेनोपस्थिते धूमे कथं गमकत्वाकाङ्क्षा स्यादित्यत आह - **तथा चे**ति। तथा च क्वचिद् विशेषणत्वेनोपस्थितेऽपि आकाङ्क्षा वर्तते एव। यथा स्वर्गात् ध्वस्तः इत्यत्र विशेषणत्वेनोपस्थितस्य स्वर्गस्यापि ध्वंसान्वयस्तथा प्रकृते विशेषणत्वेनोपस्थिते धूमे गमकत्वा[न्वयो] भविष्यतीत्यर्थः। परोक्तं खण्डयति - **यथोक्तमि**ति टीका। तथा च पूर्वमुक्तं पञ्चमी हेतुतायां न किन्तु ज्ञापकत्वे पञ्चमी इति तद् दूषयति - **हेतुत्वशक्ताया** इति टीका। धूमादिति पञ्चमी हेतुत्वे शक्ता, तस्या यदि ज्ञापकत्वे शक्तिस्तदा पञ्चम्या नानार्थता स्यात्। लक्षणायां तु सुब्विभक्तौ लक्षणा नास्तीति दोषः। एतदेवाह - **सुबि**ति टीका। **तदि**ति। लक्षणानुपपत्तेः पूर्वोक्तव्यत्ययानुशासनवैयर्थ्यादिति भावः। ननु ज्ञापकत्वे पञ्चम्याः शक्तिरेवास्तु इत्यत आह - **नानार्थे**ति टीका। तथा च पञ्चम्या हेतुत्वमप्यर्थो

ज्ञापकत्वमप्यर्थ इति नानार्थत्वम्, नानार्थत्वकल्पने प्रमाणाभावात्। तथा च "अन्याय्यं चानेकार्थत्वम्" इति **जैमिनीयसूत्र**विरोधः। अस्यार्थो यथा एकार्थत्वे सम्भवति अनेकार्थकल्पनम् अन्याय्यमित्यर्थः। उभयत्र सम्बन्धकल्पनागौरवं स्यात्। तथा एकेनैव सम्बन्धेनोपपत्तौ नानासम्बन्धकल्पने प्रमाणाभावः। सैन्धवमानय इत्यादिस्थले नानार्थत्वं वर्तते [178 B]। तत्र अन्याय्यं चानेकार्थत्वमिति दूषणं न लगति। कुतः? सैन्धवपदाद् यदा अश्वत्वप्रकारको बोधो भवति तदा लवणबोधानन्तरमेव भवतीत्ययं नियमो नास्ति, अथवा यदा लवणत्वप्रकारको बोधो भवति तदा अश्वत्वप्रकारकबोधानन्तरमेव भवतीत्ययं नियमो नास्तीति तत्र द्वयोस्तुल्यबोधात् विनिगमकाभावात् अनेकार्थत्वम्। गङ्गापदादौ तु न नानार्थत्वम्। गङ्गापदवाच्यप्रवाहबोधानन्तरमेव तीरबोधात् लक्षणयैवोपपत्तौ नानार्थकल्पने प्रमाणाभाव इति भावः। अत्र तु न वा सुब्विभक्तौ लक्षणा न वा नानार्थकल्पने प्रमाणमिति भावः। न तु हेतुत्वानुपपत्तिरेव नानार्थत्वे लक्षणायां वा मानमित्यत आह - **उक्तेनैवे**ति टीका। प्रतिज्ञायां ज्ञानलक्षणयैवोपपत्तेः पञ्चम्यर्थहेतुत्वान्वयोपपत्तेः किमर्थं नानार्थत्वकल्पनमिति भावः। अत्राशङ्कते - **न चे**ति टीका। तत्त्वज्ञानान्निःश्रेयसाधिगमः इत्यत्र तत्त्वज्ञानशब्देन शास्त्रम्, शास्त्रस्य च मोक्षहेतुत्वाभावात् यथा प्रयोजकत्वे पञ्चमी तथा धूमादितीयमपि प्रयोजकत्वे पञ्चम्यस्तु। यथा ज्ञानं प्रति श्रवणादि कारणम्, श्रवणादिकं [प्रति] पदार्थतत्त्वज्ञानं कारणम्, पदार्थतत्त्वज्ञानं प्रति साधर्म्यवैधर्म्यज्ञानं कारणम्, साधर्म्यवैधर्म्यज्ञानं प्रति शास्त्रं कारणमिति कारणकारणत्वेन प्रयोजकत्वम्, तद्वत् प्रकृते वह्निज्ञानं प्रति धूमज्ञानं कारणम्, धूमज्ञानं स्मरणरूपं प्रति पूर्वानुभूतधूमप्रत्यक्षं कारणम्, धूमप्रत्यक्षं [प्रति] विषयत्वेन धूमः कारणमिति प्रयोजकत्वे पञ्चमी भवतु इत्याशङ्कार्थः। समाधत्ते - **अनन्यथे**ति टीका। तथा च तत्त्वज्ञानान्निःश्रेयसाधिगमः इत्यत्रापि न प्रयोजकत्वे पञ्चमी किन्तु हेतुत्वे एव, हेतुत्वं नाम अनन्यथासिद्धनियतपूर्वत्वम्। तथा चानन्यथासिद्धत्वांशं विहायोद्व(द्ध)रितो योंऽशो नियतपूर्वत्वमात्रं तावदेवान्वेति नानन्यथासिद्धत्वम्, शास्त्रं तु मोक्षं प्रत्यन्यथासिद्धं तत्त्वज्ञानेन। न च व्यापारेण व्यापारोऽनन्यथा[सिद्ध] इति वाच्यम्। तत्त्वज्ञानं तु शास्त्रस्य व्यापारो न भवति किन्तु श्रवणादीनामेव तत्त्वज्ञानं व्यापारः। तादृशपरम्परयैवान्तरितत्वाच्छास्त्रमन्यथासिद्धम्। अयं भावः - पञ्चम्याः शक्तिरनन्यथासिद्धनियतपूर्ववर्तित्वे, तत्र विशेषणांशोऽनन्यथासिद्धत्वभागस्तं विहाय विशेष्यांशो यो नियतपूर्ववर्तित्वभागस्तस्यैवान्वयात्। यथा गौरनित्य इत्यत्र गोशब्दार्थो गोत्वविशिष्टो गौः परं गोत्वांशं परित्यज्य विशेष्यमात्रस्यैव गोव्यक्तेः स्वरूपस्य यथाऽनित्यत्वेन सहान्वयस्तथा प्रकृतेऽपि अनन्यथांशं परित्यज्य नियतपूर्ववर्तित्वेन सहान्वयः पञ्चम्यर्थस्य इत्यर्थः। अत्राशङ्कते - **न चे**ति टीका। तथा च [179 A] पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति व्युत्पत्तेः। तेन पदार्थोऽनन्यथासिद्धनियतपूर्ववृत्तित्वरूपो विशिष्टोऽस्ति। तस्यैकदेशो नियतपूर्ववृत्तित्वम्, तेन सह कथमन्वयः स्यात्? अत एव गौर्नित्या इत्यत्र गोत्वस्य नित्यत्वेऽपि नित्यत्वेन सह गोत्वस्य

नान्वयः, पदार्थैकदेशत्वात् तस्य। तत्र यथा लक्षणा। तथाहि - गौर्नित्या इत्यत्र गोत्वेन सह नित्यत्वस्य नान्वय एकदेशत्वात्। गोत्वविशिष्टगोव्यक्त्या सह नित्यत्वस्यान्वयो न भवति, बाधात्। तथा च गौर्नित्या इत्यत्र गोत्वस्य गोपदात् पदार्थैकदेशत्वोपस्थितिर्मा भूत् किन्तु पदार्थत्वेनोपस्थितिर्भवतु, लक्षणया गोत्वबोधात् तद्वत् प्रकृतेऽपि नियतपूर्ववर्तित्वं पदार्थैकदेशस्तेन सह धूमस्य नान्वयः, एकदेशत्वात्। अतोऽनन्वय एवेत्याशङ्कार्थः। समाधत्ते - **विशेषणांशे** इति टीका। तथा च न पदार्थैकदेशत्वमात्रमनन्वये प्रयोजकं किन्तु निराकाङ्क्षत्वमेव। अत एव गौर्नित्या इत्यत्र गोत्वं गोव्यक्तिविशेषणमिति कृत्वा विशेषणत्वेनैव निराकाङ्क्षम्, अतो नित्यत्वेन सह नान्वितम्। गोत्वस्य नित्यत्वेन सह नान्वयः किन्तु स्वातन्त्र्येण गोपदात् गोत्वोपस्थितिर्लक्षणयैव। लक्षणया प्राधान्येन गोत्वं चेत् उपस्थितं तदा नित्यत्वेन सहान्वयो भवत्येव। प्रकृते च नियतपूर्ववर्तित्वस्य विशेष्यत्वात् विशेष्यं तु सदा साकाङ्क्षमेवेति कृत्वा साकाङ्क्षेण विशेष्येण नियतपूर्ववर्तित्वेन सहान्वयो भविष्यत्येव। अत एव गौरनित्या इत्यत्र गोव्यक्तेरेकदेशत्वेऽपि न लक्षणा विशेष्यस्य गोव्यक्तेः साकाङ्क्षत्वात्। **अन्यान्वितत्वेने**ति टीका। यथा गौर्नित्या इत्यत्र गोत्वस्य गोव्यक्त्यन्वितत्वेन विशेषणतया नित्यत्वेन सह निराकाङ्क्षं गोत्वमिति कृत्वा तत्र गोत्वे आकाङ्क्षोत्थापनाय तत्राप्याकाङ्क्षा स्यात् इति आकाङ्क्षा तु स्वातन्त्र्योपस्थितिं विना न सम्भवति, स्वातन्त्र्योपस्थितिस्तु लक्षणां विना न सम्भवतीति स्वातन्त्र्योपस्थितये गोपदे लक्षणा स्वीक्रियते। न तु साकाङ्क्षे विशेष्यभागे गौरनित्या इत्यादौ लक्षणा, गोव्यक्तेर्विशेष्यतयोपस्थितत्वेन साकाङ्क्षत्वात्। तथा च गोव्यक्तेरेकदेशत्वेऽपि विशेष्यतयोपस्थितत्वात् न गौरनित्या इत्यत्र लक्षणा। तद्वत् प्रकृतेऽपि नियतपूर्ववर्तित्वस्य विशेष्यतयोपस्थितत्वात् पदार्थै[क]देशत्वेऽपि साकाङ्क्षतया नियतपूर्ववर्तित्वरूपविशेष्यभागेन सह धूमस्य हेतोरन्वयो भविष्यत्येवेत्यर्थः। ननु गौरनित्या इत्यत्र गोत्वं विशेषणं भवति गोव्यक्त्याश्रितत्वात्। तथा च गोव्यक्तिर्विशेष्या, गोत्वं विशेषणम्। तेन गोव्यक्तेरेकदेशत्वेऽपि विशेष्यतया साकाङ्क्षत्वात् भवतु अनित्यत्वान्वयः। प्रकृते च तत्त्वज्ञानादित्यत्र पञ्चम्यर्थोऽनन्यथासिद्धनियतपूर्ववर्तित्वम्। तत्रानन्यथासिद्धत्वं विशेषणं नियतपूर्ववर्तित्वं विशेष्यमीदृशनियमे प्रमाणाभावात्। नियतपूर्ववर्तित्वे सति अनन्यथासिद्धत्वमत्र अनन्यथासिद्धत्वस्य विशेष्यत्वात् नियतपूर्ववर्तित्वस्य विशेषणत्वमित्यपि वक्तुं [179 B] शक्यते एव इति विशेषणत्वेनोपस्थितस्य नियतपूर्ववर्तित्वस्य निराकाङ्क्षत्वेन कथं शास्त्रेणान्वयः स्यादित्यस्वरसादाह - **अस्तु वे**ति टीका। **तदनुरोधादि**ति टीका। तत्त्वज्ञानान्निःश्रेयसाधिगमः इत्यत्र तत्त्वज्ञानादिति पञ्चम्यनुरोधात् नियतपूर्ववर्तित्वमात्र एव पञ्चम्याः शक्तिः। **तथापी**ति टीका। यद्यपि नियतपूर्ववर्तित्वे शक्तिः तथापि धूमादिति पञ्चम्यर्थस्य नियतपूर्ववर्तित्वस्य धूमे अनन्वयात्, अतीतधूमादौ व्यभिचारात्। उक्तज्ञापकत्वे लक्षणायां सुब्विभक्तौ इत्युक्तदोषप्रसङ्गात्। ज्ञापकत्वेऽपि पञ्चम्याः शक्तौ नानार्थत्वं स्यात्, नानार्थत्वे तु प्रमाणाभावादित्यत आह -

**उक्तेति** टीका। तथा चोक्तप्रयोजकत्वस्य पञ्चम्यर्थे प्रमाणाभाव इत्यर्थः। मतान्तरमाह - **यत्त्विति** टीका। तथा च धूमपद एव लक्षणा। विभक्तौ लक्षणा नास्ति किन्तु प्रातिपदिके धूमपद एव लक्षणा। तथा च धूमपदादेव धूमज्ञानं धूमविशिष्टज्ञानमुपस्थितम्, धूमोऽप्युपस्थितो धूमज्ञानमप्युपस्थितम्, तथा च पञ्चम्यर्थो ज्ञान एवान्वितो भविष्यति। उदाहरणप्रतिपाद्या व्याप्तिस्तु गमकत्वाकाङ्क्षायां धूमेऽन्विता भविष्यति। यथा गङ्गायां घोषः इत्यत्र यथा प्रवाहविशिष्टतीरस्य विशिष्टलक्षणयैव तीरस्योपस्थितिः तद्वत् अत्रापि विशिष्टलक्षणया धूमविशिष्टज्ञानोपस्थितिरिति धूमपदे लक्षणा इति इदं मतं दूषयति - **तथा चेति** टीका। यथा धूमपदात् धूमविशिष्टज्ञानोपस्थितिः तथा गङ्गापदादपि प्रवाहविशिष्टतीरोपस्थितिः स्यादित्यत्रेष्टापत्तिः स्यात्, तथा च यथा नेष्टापत्तिः तथा लक्षणावसरे वक्ष्यते इत्यत आह - **तत्रेति** टीका। **अन्येति**। यन्मतं तन्मतदूषणार्थं जातिं विनेति यन्मूलं तद् योजयति - **अनन्तरोक्तेति** टीका। अनन्तरोक्तेऽन्येषां मते परैर्या युक्तिरुक्ता तां दर्शयति जातिं विनेति ग्रन्थेन। तथा च हेतुवाक्यजन्ये ज्ञाने तथाविधजातिविशेषस्याज्ञाने वाक्यविशेष्यजन्यत्वमपि कथं ग्राह्यम्? यावत्पर्यन्तं वाक्ये जनकतावच्छेदकरूपं ज्ञानं नास्ति तावत्पर्यन्तं जनकत्वमपि ग्रहीतुं न शक्यते। ननु हेतुवाक्ये धर्मविशेष एव जनकतावच्छेदकः स्यात् इत्यत आह - **अत्रेति** टीका। अत्र मतेऽस्वरसोऽयम्। यदि हेतुवाक्ये जनकतावच्छेदको धर्मविशेषस्तिष्ठति तदा स एव हेतुलक्षणमस्तु। यदि च जनकतावच्छेदको धर्मविशेषो नास्ति तदा जनकत्वमपि दुर्ग्र[ह]मित्यस्वरसः पूर्वमते इत्यर्थः। अन्वयहेत्ववयवलक्षणे जनकान्तपदव्यावृत्तिमाह - **अत्रेति** टीका। हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वमित्युच्यमाने व्यतिरेकिहेत्ववयवेऽतिव्याप्तिः, तन्निरासार्थमन्वयव्याप्तीत्यारभ्य जनकेतिपर्यन्तं व्यतिरेकिहेत्ववयवस्यान्वयेति ज्ञानजनकत्वं नास्तीति नातिव्याप्तिः। हेतुत्वप्रतिपादकविभक्तिमत्पदस्य [180 A] कृत्यमाह - **प्रतिज्ञायामिति** टीका। प्रतिज्ञायामपि हेत्ववयववाक्यार्थबोधद्वारा अपि अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकत्वं वर्तत इत्यतिव्याप्तिवारणाय हेतुत्वप्रतिपादकविभक्तिमदिति पदम्। ननु द्वितीयदलेऽवयवपदं व्यर्थम्, उदासीनवाक्येऽतिव्याप्तिवारणं तु प्रथमावयवपदेनैव भवति। तथाहि उदासीनवाक्येऽवयवाभिधानप्रयोजकज्ञानजनकत्वं नास्तीति द्वितीयावयवपदं व्यर्थमित्यत आह - **अत्रेति** टीका। तथा च नोभयावयवघटितमिदं लक्षणं किन्तु प्रत्येकावयवपदघटितं लक्षणद्वयं बोद्धव्यम्। तथा हि एकं तु अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमद्वाक्यत्वम्, द्वितीयं तु अन्वयव्याप्त्यभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वमिति। तथा च द्वितीयमवयवपदं न व्यर्थमिति भावः। अत्राशङ्कते - **नन्विति** टीका। अन्वयेत्यादि मूलोक्तं लक्षणम् अन्वयव्यतिरेकिणि हेतावतिव्याप्तम्। तत्राप्यन्वयव्याप्तिर्वर्तते इति कृत्वा अन्वयव्याप्त्यभिधायकावयवाभिधान[प्रयोजक]ज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमत्त्वम् अन्वयव्यतिरेकि-

हेत्ववयवेऽस्तीत्यतिव्याप्तम् । मध्ये शङ्कते - **न चे**ति टीका । अन्वयव्याप्तिमात्राभिधायकत्वं विवक्षितमिति न वाच्यमित्यन्वयः । दूषयति - **केवलान्वयी**ति टीका । केवलान्वयिहेतौ मात्रपदघटितलक्षणस्याप्रसिद्धिः । कथम् ? अन्वयव्याप्तिमात्राभिधायकत्वमित्यस्य कोऽर्थः ? अन्वयवयाप्त्याभिधायकत्वे सति अन्वयव्याप्तीतर-व्याप्त्यनभिधायकत्वम् । तथा च केवलान्वयिनि अन्वयव्याप्तीतरा या व्याप्तिस्तस्या अप्रसिद्धे(द्धिः) । एतदेवाह - **केवलान्वयी**ति टीका । तथा च केवलान्वयिनि मात्रपदव्यावृत्त्या या व्यतिरेकव्याप्तिस्तस्या अप्रसिद्धिरित्यर्थः । समाधत्ते - **अन्वये**ति टीका । तथा चान्वयव्याप्तिस्थाने यदि मात्रपदं दीयते तदा अप्रसिद्धिः, यदि चावयवपदस्थाने मात्रपदं दीयते तदा नाप्रसिद्धिरित्यर्थः । आशयमविद्वान् शङ्कते - **न चैवमि**ति टीका । यथा केवलान्वयिनि व्यतिरेकव्याप्तिरप्रसिद्धा तथा व्यतिरेकव्याप्त्यभिधायकोऽप्यप्रसिद्ध एव । व्यतिरेकव्याप्तिरपि नास्ति तदभिधायकोऽवयवोऽपि नास्ति । समाधत्ते - **व्यतिरेके**ति टीका । यद्यपि व्यतिरेकव्याप्तिरप्रसिद्धा तथापि विशेषादर्शनदशायाम् अभिधेयत्वस्य केवलान्वयित्वाज्ञानदशायां यत्राभिधेयत्वाभावस्तत्र प्रमेयत्वाभाव इति व्यतिरेकव्याप्त्यभिधायकावयवप्रसिद्धेः । ननु व्यतिरेकव्याप्त्यप्रसिद्धौ व्यतिरेकव्याप्त्यभिधायकोऽवयवः कथं प्रसिद्ध इत्यत आह [180 B] - **तत्प्रतीतिजनकस्यैवे**ति टीका । यद्यपि व्यतिरेकव्याप्तिः अप्रसिद्धा तथापि विशेषा[दर्शन]दशायां केवलान्वयिनि व्यतिरेकव्याप्तिभ्रमो भवत्येव, तद्भ्रमे जाते सति व्यतिरेकव्याप्त्यभिधाय-कोऽवयवः प्रसिद्ध एवेति न लक्षणेऽप्रसिद्धिः । मतान्तरमाह - **दशाविशेष** इति टीका । तथा चान्वयव्यतिरेकिणि हेतौ यदा अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं तदानीमन्वय्यवयवत्वेनान्वयव्यतिरेकी हेतुरन्वय्यवयवत्वेन सङ्ग्राह्य एवेत्याहुः । आहुरित्यनेनास्वरसो यथा यदाऽन्वयव्यतिरेकिणि अन्वयव्याप्त्यभिधानं जातं व्यतिरेकव्याप्त्यभिधानमपि जातं तस्यां दशायाम् उक्तलक्षणं वर्तते, तथा चान्वयव्यतिरेकित्वेन जातः स केवलान्वयित्वेन लक्ष्यः स्यात् । उक्तलक्षणमन्वयेत्यादि तत्र वर्तते एवेति । मध्ये शङ्कते - **न चे**ति टीका । तथा च केवलान्वयिनि संशयाभावात् संशयमूलको न्यायावतारो नास्ति । अभिधेयत्वादेः संशयाभावात् न्यायावतार एव नास्तीति केवलान्वय्यनुमानं परार्थं न भवतीति शङ्कार्थः । समाधत्ते - **अनुमित्सये**ति टीका । न हि सर्वत्र सन्देह(हा)धी[ना] न्याया(य)प्रवृत्तिः अपि तु अनुमित्साधीनापि सा । अत एव निश्चितेऽपि करिणि चित्कारादिनाऽनुमित्सया न्यायप्रवृत्तिः । न चैवं सिद्धसाधनमिति वाच्यम् । सिषाधयिषा-विरहसहकृतसिद्धेः प्रतिबन्धकत्वेन सिषाधयिषायां सिषाधयिषाविरहसहकृतसिद्ध्यभावरूपपक्षताया विद्यमान-त्वात् अवश्यमनुमितिर्भवत्येव । तथा चानुमित्सयापि अनुमानसम्भवादिति भावः । अन्वयव्यतिरेकोदाहरणेति मूलं स्फुटत्वादुपेक्ष्य पक्षसपक्षेति मूलं व्याकरोति - **पक्षादि**रिति । पक्षे सतः सपक्षे च सतो विपक्षे चासत एवंभूत-स्यार्थस्य प्रतिपादको हेत्ववयवोऽन्वयव्यतिरेकी । ननु ह्रदो वह्निमान् धूमात् इत्यत्र स्वरूपासिद्धः पक्षे हेतोरविद्य-

[मान]त्वात्। अयम् अन्वयव्यतिरेकी हेत्ववयवो भवत्येवेति पक्षपदं व्यर्थमित्यत आह - **अत्र चे**ति टीका। अत्र लक्षणे सद्धेतुविषयक एव हेत्ववयवः सङ्ग्राह्यः इति स्वरूपासिद्धिवारणाय पक्षपदम्। **एतच्चे**ति टीका। व्यतिरेकिणि अतिव्याप्तिवारणाय सपक्षसत इति। ननु पक्षे सत् सपक्षे सत् विपक्षाद् व्यावर्तमान एवंभूतहेतुत्वप्रतिपादकविभक्तिमन्यायावयव इति मूलोक्ते प्रोच्यमाने गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वात् अयमपि हेत्ववयवः स्यात्। पृथिवीत्वं पक्षे विद्यमानः सपक्षे पटादावपि विद्यमानः विपक्षाज्जलादेर्व्यावृत्तत्वादतोऽत्रातिव्याप्तिः, तद्वारणायाह - **अबाधितत्वादी**ति [181 A]। आदिपदात् असत्प्रतिपक्षत्वपरिग्रहः। सपक्षसत इति पदस्य कृत्यमाह - **असाधारणे**ति टीका। असाधारणहेत्ववयवे पक्षे सत्त्वं विपक्षाद् व्यावृत्तिरस्तीत्यतिव्याप्तिः, तथाहि - घटो घटरूपवान् घटत्वात् इत्यत्रायं पक्षे वर्तमानो भवति विपक्षात् पटादेर्व्यावर्तमान इति कृत्वाऽयमपि हेत्ववयवः स्यात् इत्यत आह - **सपक्षे सत** इति। व्यतिरेकिणि असाधारणे सपक्षे सत्त्वमेव नास्तीति व्यतिरेकिपरिहारः। अथ विपक्षासत इति पदस्य कृत्यमाह - **व्यभिचारीत्यादि** टीका। तथा च व्यभिचारी पर्वतो धूमवान् वह्नेः इत्ययं पक्षे विद्यमानः सपक्षे सन्नपि भवति, एवं विरुद्धपदं न लगति। केवलान्वयिनि शब्दोऽभिधेयः प्रमेयत्वात् इत्यत्रातिव्याप्तिवारणाय विपक्षासत इति। केवलान्वयिनि तु विपक्षाभावान्नातिव्याप्तिः। व्यभिचारिणि वह्न्यादौ विपक्षे विद्यमानेऽपि विपक्षेऽसत्त्वं नास्ति किन्तु अयोगोलकेऽपि विद्यमानत्वात् अतिव्याप्तिर्न भवतीत्यर्थः। ननु स्वरूपासिद्धसाधारणो हेत्ववयवः किमर्थं वार्यते इत्यत आह - **एवं चेदि**ति टीका। एवं हेत्वाभाव(सः) साधारणो हेत्ववयवो वारणीय एव। एवं चेन्न व्याख्यायते तदा वारणीया हेत्ववयवा व्यभिचार्यादयः ते विपक्षासत इति पदेनैव वारिता इति प्रथम(मे) [लक्षणे] पक्ष इति पदं द्वितीयलक्षणे च पक्षसपक्षपदं व्यर्थमेवापद्येतेति भावः स्वरूपासिद्धस्य सङ्गृहीतत्वात्। ननु अनुमितिकारणीभूतेत्यादिलक्षणं पर्वतो वह्निमान् धूमात् इत्यन्वयव्यतिरेकिणि गतम्। कथम्? अनुमितिकारणीभूतो यः परामर्शस्तस्य प्रयोजकं यत् शाब्दज्ञानं न्यायजन्यं शाब्दज्ञानं तस्य कारणं यत्साध्याविषयका शाब्दधीस्तस्या जनकम् एवंभूतं प्रतीतान्वयं यत्साध्यसाधनवाचकहेतुविभक्तिमच्छब्दो धूमादिति भवति, यदान्वयव्याप्तिमात्रमेव ज्ञानं तद्दशायामन्वयव्यतिरेकिण्यतिव्याप्तिरित्यत आह - **दशाविशेष** इति टीका। तथा च दशाविशेषेऽन्वयव्याप्तिमात्रज्ञानदशायामपि अन्वयव्यतिरेकी अपि हेतुरन्वयी हेत्ववयवो भवत्येवेति सोऽपि लक्ष्य एवेत्यर्थः। अनुमितीत्यारभ्य शाब्दज्ञानकारणेति पदस्य कृत्यमाह - **उदासीने**ति। उदासीनान्वयिहेतुप्रतिपादकवाक्यवारणाय, तत्र पूर्वोक्तरीत्याऽनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारणत्वमेव नास्ति इति कृत्वा न तत्रातिव्याप्तिः। साध्याविषयकेति पदस्य कृत्यमाह - **तस्मादि**ति। निगमने साध्याविषयकशाब्दधीजनकत्वं नास्ति, तेन न तत्रातिव्याप्तिः। ननु साध्याविषयकज्ञानजनकमित्येवास्तु, शाब्दपदं किमर्थमित्यत आह - **शाब्दपदमि**ति टीका। सम्पातायाताम्। तथा च वाक्याज्जन्यं यद् ज्ञानं तत्

[181 B] शाब्दमेवेति शाब्दपदमकिञ्चित्करमित्यर्थः । प्रतीत्या(ता)न्वयेति पदस्य कृत्यमाह - **केवल-व्यतिरेकिणीति** टीका । तथा च केवलव्यतिरेकिणि सर्वमनुमितीत्यारभ्य लक्षणं विद्यते इत्यतिव्याप्तिः स्यात्, अतः प्रतीत्या(ता)न्वयपदम्, व्यतिरेकिणि प्रतीत्या(ता)न्वयत्वाभावान्नातिव्याप्तिरिति भावः । ननु अन्वयव्य-तिरेकिव्याप्तिप्रतिसन्धानदशायामन्वयव्यतिरेकी अलक्ष्यो भवति । तत्र प्रतीत्या(ता)न्वयत्वं वर्तत इत्यत आह - **प्रतीतान्वयमात्रेति** । तथा चान्वयव्यतिरेकव्याप्त्युपस्थितिदशायां प्रतीत्या(ता)न्वयमात्रत्वं नास्ति व्यतिरेकस्यापि सत्त्वात् इत्यतो मात्रपदम् । एतदेव व्याचष्टे - **प्रतीतेति** टीका । प्रतीतान्वयं यत् साध्यं यस्य साधनस्य तद्वाचकविभक्तिमत्त्वम्, अन्यथा घट इतरेभ्यो भिद्यते घटत्वात् इति व्यतिरेकिणि घटत्वस्य हेतोः पक्ष एवान्वयस्य प्रतीयमानत्वात् व्यतिरेकिण्यतिव्याप्तिः स्यात्, अतो व्याख्यातं प्रतीतान्वयं यत्साध्यमिति, व्यतिरेकिणि तु साध्यं प्रतीतान्वयमेव नास्तीति न तत्रातिव्याप्तिः । हेतुविभक्तिमदिति पदस्य कृत्यमाह - **यो य** इति । यो यो धूमवान् इत्युदाहरणांशे अनुमितीत्यारभ्य प्रतीत्या(ता)न्वयपर्यन्तं सर्वं वर्तते परं हेतुविभक्तिमत्त्वं नास्तीति भावः । ननु वक्ष्यमाणं व्यतिरेकिलक्षणम् अन्वयव्यतिरेकिणि अतिव्याप्तमत आह - **दशाविशेष** इति टीका । तथा च यदि अन्वयव्यतिरेकिणि व्यतिरेकि(क)व्याप्तिमात्रप्रतिसन्धानं तदाऽन्वयव्यतिरेकी केवलव्यतिरेकी भवत्येवेत्यर्थः । **एतदेवेति** । तथा चान्वयेति पदं परित्यज्य व्यतिरेकपदं दत्त्वा पूर्वोक्तमेव लक्षणं व्यतिरेकिहेत्ववयवलक्षणं द्रष्टव्यम् ।

**कथायां धूमादित्येव प्रयोक्तव्यम्, न तु धूमवत्त्वादिति मतुपो व्यर्थत्वात् । सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकं विशेष्यविभक्त्युपस्थापितहेतुत्वेन सामान्य-वत्त्वस्य विभक्त्यन्तरावरुद्धस्यानन्वयादिति केचित् । तन्न । सतिसप्तमीबलात् सामान्य-वत्त्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः, न ह्ययमर्थोऽस्मान्नावगम्यते इति ।**

ननु कथायां धूमवत्त्वात् इति एव प्राचीनानां प्रयोगः । तत्र मतुब्ग्रहणं किमर्थमित्याह - **कथायामिति** मूलम् । इष्टापत्त्या मतुब् व्यर्थ एवेति इष्टापत्त्या परिहृतम् । तथा च धूमात् इत्येव प्रयोगः कर्तव्यः, न तु धूमवत्त्वादिति, मतुपो व्यर्थत्वात् इत्यर्थः । ननु शब्दोऽनित्यः सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वात् घटवत् इत्यत्रानित्यत्व-साधकानुमानं न स्यात् । कथम् ? सप्तम्यन्तपञ्चम्यन्तयोः विरुद्धविभक्त्यन्तावरुद्धयोर्नाभेदान्वय इति । तथा च यत् सामान्यवत् तद् बाह्यकरणप्रत्यक्षमित्यन्वयो न भवति विरुद्धविभक्त्यवरुद्धत्वात् इत्याशङ्कायां केषाञ्चित् मतमाह - **सामान्यवत्त्वे सतीति** मूलम् । तथा च सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादिति हेतुर्न भवत्येव ।

कुत इत्यत आह - **विशेष्येति** मूलम् । विशेष्यविभक्तिः पञ्चमी, तयोपस्थापितं यद्धेतुत्वं तेन सह सप्तमीविभक्त्यन्तरेणावरुद्धस्य सामान्यवत्त्वस्यानन्वयात्। तर्हि अनित्यत्वसाधकोऽयं हेतुर्न भवति किन्तु शब्दोऽनित्यः बाह्यकरणप्रत्यक्षसामान्यवत्त्वात् । प्रत्यक्षता च यत्र यत्र हेतुरयं तत्तदधिकरणान्तर्भावेन बोद्धव्या । तथा च बाह्यकरणप्रत्यक्षं यद्रूपत्वं तद्वत्त्वं वर्तते जलपरमाणुरूपे, तत्र रूपे हेतुर्वर्तते साध्यमनित्यत्वं नास्तीति व्यभिचारः स्यात्, स न भवति। कथम् ? यतः स्ववृत्ति यद्बाह्यकरणप्रत्यक्षं सामान्यं तद्वत्त्वात् । तथा च जलपरमाणुरूपे [182 A] व्यभिचारो न भवति। तत्र स्ववृत्ति जलपरमाणुरूपवृत्ति यद्बाह्यकरणप्रत्यक्षं सामान्यं तद्वत्त्वं नास्तीति । अयमर्थः - स्वाधिकरणविषयकं यद्बाह्यकरणप्रत्यक्षं तद्विषयं यत् सामान्यं तद्वत्त्वात् जलपरमाणुरूपे जलपरमाणुरूपाधिकरणविषयकबाह्यकरणजन्ये(न्यं) यत्प्रत्यक्षं तद्विषयत्वं नास्तीति न व्यभिचारः । न तु पूर्वोक्तः सप्तम्यन्तविशेषणघटितो हेतुः कर्तव्यः, तस्यापार्थकत्वात् । कथमपार्थकत्वम् ? अनन्वयिपदजातमपार्थका[त्व]मित्याहुः केचित् प्राञ्चः । तद् दूषयति - **तत्रेति** मूलम् । **सप्तमीति** मूलम् । तथा च सतिसप्तमीबलात् सामान्यवत्त्वसमानाधिकरणबाह्यकरणप्रत्यक्षत्वं लभ्यते इति कृत्वा सामान्यवत्त्वस्य बाह्यकरणग्राह्यत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे पदार्थे उभयोर्विशेषणयोरन्वयात् । अयमर्थः - बाह्यकरणग्राह्यत्वसामान्यवत्त्वयोरुभयोः सम्बन्धवत्त्वादित्येव हेतुः, तथा च सामान्यवत्त्वबाह्यकरणग्राह्यत्वोभयसामानाधिकरण्यवत्त्वात् । नन्विदं व्युत्पत्तिविरुद्धमित्यत आह - **तथैवेति** मूलम् । तथा च सतिसप्तमीमहिम्ना सप्तम्यर्थेन सह सामानाधिकरण्यं लभ्यते, सतिसप्तम्या सामानाधिकरण्यमेवोपस्थाप्यते । यथा स्वाश्रये सति तदुत्तरतृतीयक्षणवृत्तिसंशयविषयत्वादित्यत्र सतिसप्तमीमहिम्ना स्वाश्रयसमानाधिकरणतृतीयक्षणवृत्तिसंशयविषयत्वादित्यर्थः तथाऽत्रापीत्यर्थः । ननु व्युत्पत्तिरप्रामाणिक्येवेत्यत आह - **न हीति** मूलम् । तथा च यत्र सतिसप्तमी श्रूयते तत्र सामानाधिकरण्यं सप्तम्यवरुद्धस्यान्यविभक्त्यवरुद्धस्य च लभ्यते । अयं बोधोऽनुभवसिद्धो भवतीत्यर्थः । तथा चानुभवसिद्धबोधानुभवेन व्युत्पत्तिरपि तथैव कल्प्यते यथा तुल्यविभक्तिकस्थलेऽभेदान्वयबोधस्यानुभवसिद्धत्वात् तुल्यविभक्तिकयोरभेदान्वयबोध इति व्युत्पत्तिरित्यर्थः । इति हेत्ववयवग्रन्थार्थो मूले ।

अथ टीका । व्यर्थत्वादित्यत्र केषाञ्चिद् व्याख्यानं दूषयितुमुपन्यस्यति - ननु पक्षधर्मताबोधनार्थमेव मतुप्प्रयोगो भविष्यति इत्यत आह - **पक्षधर्मताया** इति टीका । तथा च पक्षधर्मतायास्तदानीं गमकत्वाकाङ्क्षाकालेऽनाकाङ्क्षितत्वेन व्यर्थत्वम् । ननु तर्हि **मीमांसकैर्धू**मवत्त्वादिति कथं प्रयुज्यते इत्यत आह - **मीमांसकवदिति** । तथा च [182 B] **मीमांसकानां** मते उपनयो नास्तीति कृत्वा तेषां पक्षधर्मताबोधनार्थं मतुप्प्रयोगः, तद्वत् अत्र मतुप्प्रयोगो न कर्तव्यः, आकाङ्क्षानुसारेणैव शब्दाभिधानम्, न हि हेतौ व्याप्तिमनभिधाय कस्यापि पक्षधर्मताकाङ्क्षा भवति, तथा चानाकाङ्क्षिताभिधाने निग्रहो भवतीत्येतदेवाह - **अनाकाङ्क्षि-**

**ताभिधानमि**ति टीका । **व्यर्थविशेष(ष्य)त्वादि**ति टीका । एतदेव विवृणोति - **धूममात्रे**ति टीका । धूममात्रस्यैव व्याप्यत्वेन तत्सम्बन्धस्य गुरुत्वात् । यथा धूमात् इत्यस्यैव व्याप्यत्वसम्भवे नीलधूमस्य गुरुत्वेन व्याप्यत्वं नास्ति तद्वत् धूमस्यैव व्याप्यत्वेन धूमसम्बन्धस्य व्याप्यत्वे गौरवमित्यर्थः । धूमवत्त्वात् इत्यस्य कोऽर्थः ? धूमसम्बन्धात् । अत्र सम्बन्धो विशेष्यः, धूमो विशेषणम्, इति विशेष्यं व्यर्थम् । केचित् तु इत्यनेनोक्तं मतं दूषयति - **तन्ने**ति टीका । **धूमवदि**ति टीका । तथा च यथा धूमो व्याप्यः तथा धूमसम्बन्धस्यापि वह्निव्याप्यत्वमस्ति । यथा आलोको वह्निव्याप्यस्तद्वत् धूमधूमसम्बन्धयोरपि वह्निव्याप्यत्वात् व्यर्थविशेष्यत्वं नास्ति । कथं नास्तीत्यत आह - **सामानाधिकरणे(ण्ये)**ति टीका । यत्र एकस्मिन् धर्मिणि हेतौ विशेष्ये लघुगुरु-धर्मद्वयसमावेशे लघुधर्मपुरस्कारेणैव व्याप्तिः, न तु गुरुधर्मपुरस्कारेण व्याप्तिः, यथा पर्वतो वह्निमान् धूमाभावाभावात् इति अत्र एकस्मिन्नेव धूमे धूमत्वमपि वर्तते धूमाभावाभावत्वमपि वर्तते, तत्र धूमत्वमेव लघुधर्मः, तदवच्छेदक-पुरस्कारेणैव व्याप्तिर्न तु धूमाभावाभावपुरस्कारेण गौरवात् । यत्र तु एकस्मिन् धर्मिणि अवच्छेदकद्वयसमावेशो नास्ति तत्र व्यर्थविशषेष्यत्वं नास्ति, यथा धूमात् धूमप्रागभावात् इति अत्र धूमत्वं धूमप्रागभावत्वं च एकस्मिन् धर्मिणि विद्यमानं न भवति । तथा च धूमत्वपुरस्कारेण धूमनिष्ठा व्याप्तिर्यद्यपि ग्रहीतुं शक्यते तथापि धूमप्राग-भावनिष्ठा व्याप्तिर्धूमत्वेन ग्रहीतुं न शक्यते धूमत्वस्य धूमप्रागभावावृत्तित्वात् । तथा च धूमप्रागभावनिष्ठा व्याप्तिः प्रागभावपदव्यतिरेकेण ग्रहीतुं न शक्यते । ततो यथा प्रागभावपदं सार्थकं व्यर्थविशेष्यत्वं नास्ति तद्वत् धूम-सम्बन्धनिष्ठा व्याप्तिः सा धूमत्वेन ग्रहीतुं न शक्यते इति कृत्वा धूमसम्बन्धेनैव ग्रहीतुं शक्यते तेन व्यर्थविशेष्यत्वं नास्ति । एतदेवाह - **अन्यतरलाघवस्ये**ति टीका । धर्मद्वयसमावेशेऽन्यतरलाघवमित्यर्थः । **तद्बीजत्वादि**ति टीका । व्यर्थविशेष्यत्वबीजत्वादित्यर्थः । अत्र शङ्कते - **न चैवमि**ति टीका । तथा च त्वया यदुक्तम् अनाकाङ्क्षिताभिधाने निग्रहादिति तदपि न युक्तम् । कुतः ? अनाकाङ्क्षिताभिधानं न भवति यतः पक्षधर्मता-प्रतिपादनार्थं मतुप्प्रयोगः क्रियते तदा अनाकाङ्क्षिताभिधानेऽर्थान्तरं भवति, किन्तु पक्षधर्मताप्रतिपादनार्थं मतुप्प्रयोगो न कृतः किन्तु धूमवत् धूमसम्बन्धोऽपि हेतुरिति तद्बोधनार्थं मया मतुप्प्रयोगः कृतः, तथा च नार्थान्तरं धूमसम्बन्धस्यापि हेतुत्वात् । तथा चानाकाङ्क्षिताभिधानं नास्ति, तदभावात् व्यर्थविशेष्यत्वं नास्तीति तवापि दोषस्तद्व्याख्याने तदवस्थ एव । एतदेवाह - **विशिष्टे**ति । धूमविशिष्टः सम्बन्धो हेतुरित्यर्थः । तथा च पक्षधर्मताप्रतिपादनं नास्ति किन्तु धूमवत् धूमसम्बन्धो यो हेतुस्तत्प्रतिपादनमेवेति नानाकाङ्क्षिताभिधानमिति परेण धूमवत्त्वादिति प्रयोगवादिना समाधानकरणसम्भवादित्याशङ्कार्थः । परिहरति - **उदाहरणे**ति । तथा च यदि धूमसम्बन्धरूपहेतुप्रतिपादनार्थं मतुप्प्रयोगस्तदा यत्र यत्र धूमसम्बन्धस्तत्र वह्निरित्युदाहरणं स्यात् [183 A] एवं धूमसम्बन्धवान् अयमित्युपनयः स्यात् तथा चोदाहरणोपनयाभ्यामेवं निर्णीयते धूम एव हेतुर्न तु धूमसम्बन्ध

इति। तथा च यत्र धूमस्तत्र वह्नि[रित्युदाहरणम्] उपनयश्च धूमवांश्चायमिति द्वाभ्यामेवं निर्णीयते धूम एव हेतुर्न तु धूमसम्बन्ध इति। धूमवत्त्वं चेत् हेतुस्तदा कीदृशमुदाहरणं युज्यत इत्यत आह - **किन्तु यत्रे**ति टीका। धूमवत्त्वस्य हेतुत्वे यत्र धूमवत्त्वमित्युदाहरणं स्यात्, न चैवमुदाहरणमेवमुपनयोऽपि धूमवत्त्ववांश्चायमिति न, तस्माद् धूममात्रस्यैव हेतुत्वं तत्र धूमसम्बन्धाभिधाने पक्षधर्मताया अनाकाङ्क्षितत्वात्। तत्र च पक्षधर्मताप्रतिपादनार्थं यो मुतप् स व्यर्थ एव स्यादित्यर्थः। इदं मतं दूषयति - **एवं ही**ति टीका। यदि धूममात्रं येषां मते हेतुः तदा धूमवांश्चायम् इत्युपनयो न युज्यते किन्तु वह्निव्याप्यधूम इत्येवोपनयः स्यात्। तथा चोपनये मतुप्प्रयोगो व्यर्थ इत्याकूतम्। यदि चानादिसिद्धकथककसम्प्रदायानुरोधात् तत्रेति उपनये धूमवांश्चायमित्येव प्रयोगः तदा हेतुरपि धूमवत्त्वात् इति प्रयुज्यतां कथकसम्प्रदायानुरोधात्। तथा च धूमवत्त्वादित्यपि प्रयोगः स्यादेवेति हृदयम्। **एवमि**ति टीका। पर्वतो वह्निमान् अत्रापि मतुप्प्रयोगो व्यर्थः, अत्र पर्वते वह्निः इत्येव प्रयोगः स्यात्, यथा प्रतिज्ञायां साध्यांशे कथकसम्प्रदायानुरोधात् यदि मतुप्प्रयोगस्तदा हेत्वंशे तथा प्रयोगः कथं न स्यादित्यर्थः। **सप्तमी**ति टीका। सामान्यवत्त्वे सतीति सतिसप्तमीबलादित्यर्थः। ननु विभक्त्यन्तरावरुद्धे पदद्वये कथमन्वयः स्यात् इत्यतो व्याचष्टे - **विरुद्धार्थके**ति टीका। तथा च विभक्त्यन्तमात्रमन्वयत्वेऽप्रयोजकं किन्तु विरुद्धार्थ-विभक्तिकत्वम्, प्रकृते च सप्तमी विरुद्धार्थिका न भवति किन्तु सतिसप्तमीमहिम्ना उभयसामानाधिकरण्यमेव लभ्यते। तथा च सामान्यवत्त्वसामानाधिकरण्यं यत् बाह्यकरणप्रत्यक्षं तत्त्वादित्यर्थः। एकत्र शब्दे एतद्द्वयस्य विद्यमानत्वादिति भावः। इति हेतुग्रन्थटीकाव्याख्याग्रन्थः।

**। अवयवप्रकरणे हेतुनिरूपणं समाप्तम्।**

## । अवयवप्रकरणे उदाहरणनिरूपणम् ।

**हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्तिपक्षधर्मतयोरुपदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनायोदाहरणम्। तच्चानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनक-व्याप्यत्वाभिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनकशब्दत्वमुदाहरणत्वम् सामान्यलक्षणे। साध्यसाधनसम्बन्धबोधकत्वं साध्याभावसाधनाभावसम्बन्धबोधकत्वं च विशेषलक्षणद्वयम् ।**

### । अथ उदाहरणग्रन्थः ।

अथ मूलम् । **हेताविति** मूलम् । धूमादिति हेतुवुक्ते सति कथमस्य गमकत्वं साधयसाधकत्वं कथं स्यादित्याकाङ्क्षायां यतोऽयं व्याप्तः पक्षधर्मः इति व्याप्तिपक्षधर्मतयोरुभयोरपि प्रदर्शनम्। ननु उभयोः प्रदर्शनप्राप्तौ पक्षधर्मतैव कथं नादौ प्रदर्श्यत इति **व्याप्तेरिति**। पक्षधर्मो धूमो विशेष्यः, तत्र व्याप्तिर्विशेषणम्। तथाहि - व्याप्तिः पक्षधर्मे वर्तते इति कृत्वेति भावः । तथा च व्याप्यस्य धूमस्य पक्षधर्मताप्रदर्शनं युक्तम् यथा वह्निव्याप्यवान् अयमिति । तथा च व्याप्तिविशिष्टपक्षधर्मताप्रदर्शनं तत्र व्याप्तेर्विशेषणत्वेन प्रथमोपस्थिततत्वात् । व्याप्ति-प्रदर्शनायोदाहरणमित्यर्थः। **तच्चेति** मूलम्। उदाहरणमित्यर्थः। उदाहरणस्य लक्षणमाह - **अनुमितीति** मूलम् । अनुमितिहेतुर्यो लिङ्गपरामर्शस्तत्परं तदर्थप्रतिपादकं यद् वाक्यं वह्निव्याप्यधूमवानितिरूपं तज्जन्यं यज्ज्ञानं न्यायवाक्यजन्यं ज्ञानं [183 B] शाब्दबोधस्तज्जनकं यद् व्याप्यत्वाभिमतवन्निष्ठनियतव्यापकत्वाभिमत-सम्बन्धबोधजनकशब्दत्वम् यथा यत्र धूमस्तत्र वह्निरिति यथा महानसमित्युदाहरणम् । तत्र व्याप्यत्वाभिमतो धूमः, तद्वत् महानसम्, तन्निष्ठो यो नियतव्यापकत्वाभिमतो वह्निस्तत्सम्बन्धबोधजनकशब्दत्वमुदाहरणत्वम्। पदकृत्यं यथा। उदासीनवाक्ये यत्र धूमस्तत्र वह्निरिति रूपेऽतिव्याप्तिवारणाय जनकपर्यन्तम्। उदासीनवाक्यं तु अनुमितिजनकं न भवति इति न तत्रातिव्याप्तिः। व्याप्यत्वाभिमतेत्यादिकमवयवान्तरे प्रतिज्ञादावतिव्याप्तिवारणाय । शेषं टीकायां बोध्यम्। अन्वय्युदाहरणलक्षणमाह - **साध्यसाधनेति** मूलम्। व्याप्यत्वाभिमतेति पदं त्यक्त्वा साधनत्वाभिमतेति पदं दातव्यम्। तथा चानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनकसाधनत्वाभिमतवन्निष्ठ-नियतसाध्यत्वाभिमतसम्बन्धबोधजनकशब्दत्वम् अन्वयित्वमिति पर्यवसन्नम्। यथा शब्दोऽभिधेयः प्रमेयत्वात् इति अत्र यत्र प्रमेयत्वं तत्राभिधेयत्वमिति न्यायवाक्यजन्यज्ञानजनकत्वमत्रवाक्ये वर्तते, अथ च साधनत्वाभिमतं प्रमेयत्वं साध्यत्वाभिमतमभिधेयत्वम् अनयोर्यः सम्बन्धस्तद्बोधजनकशब्दत्वं वर्तते अन्वयिनि वर्तते। व्यतिरेकिणि त्विदं नास्ति। यथा यत्र सात्मकत्वाभावस्तत्र प्राणादिमत्त्वाभाव इत्युदाहरणे साधनसाध्यसम्बन्धबोधजनकः शब्दो

नास्ति किन्तु साध्याभावसाधनाभाव[सम्बन्ध]बोधजनकशब्दत्वं वर्तते इति तद्वयावृत्तिः। व्याप्यव्यापकगर्भं तु उभयसाधारणम्। अथ व्यतिरेक्युदाहरणलक्षणमाह - **साध्याभावे**ति मूलम्। अत्राप्यनुमितिहेतुलिङ्गपरामर्शपर-वाक्यजन्यज्ञानजनकसाध्याभावसाधनाभावनियतसम्बन्धबोधजनकशब्दत्वं व्यतिरेकित्वमिति पर्यवसन्नम्। अन्वय्युदाहरणलक्षणे साध्यसाधनपदे तु व्यतिरेक्युदाहरणेऽतिव्याप्तिवारणाय, एवं व्यतिरेक्युदाहरणलक्षणे साध्याभावसाधनाभावपदे अन्वय्युदाहरणेऽतिव्याप्तिवारणायेति पदकृत्यम्।

अथ टीका। **व्याप्तेरिती**ति। ननु व्याप्तेर्विशेषणत्वेऽपि प्रथमनिरूपणे किं बीजमित्यत आह - **प्रथमोपस्थिताया** इति टीका। यथा वह्निव्याप्यधूमवान् इत्यत्र व्याप्तिर्विशेषणम्। सा तु प्रथमोपस्थिता विशेषणत्वात्। तथा चोपस्थितिप्राथम्यादेव निरूपणप्राथम्यमित्यर्थः। ननु यथा व्याप्तिर्विशेषणं तथा पक्षधर्मोऽपि विशेषणम्। यथा व्याप्तिर्धूमवृत्तिस्तथा पक्षधर्मताऽपि धूमवृत्तिः, तथा चोभयोरपि धूमवृत्तित्वेन व्याप्तिवत् पक्षधर्मताया अपि विशेषणत्वमप्यस्तीत्युभयोरुपस्थितिरपि तुल्यैवेत्यत आह - **पक्षधर्मतायाश्चे**ति टीका। अयमाशयः - स्वार्थानुमाने व्याप्ते(प्ति)र्महानसादौ परामर्शात् पूर्वं गृहीतो(ता) नास्ति। अतः स पक्षधर्मतारूपः सम्बन्धः संसर्गमर्यादा(द)यैव भासते। तथा च परामर्शे पक्षधर्मता संसर्गमर्यादया भासते व्याप्तिर्विशेषणत्वेन भासते। तेन स्वार्थानुमानस्थले स्वस्य यथा व्याप्तेर्विशेषणत्वेन [184 A] पूर्वमुपस्थितिः पश्चात् परामर्शकाले पक्षधर्मता संसर्गमर्यादया भासते, तथा च यथा स्वस्योपस्थितिः तथा परस्यापि तथैवोपस्थितिः कर्तव्या इति कृत्वा प्रथमं व्याप्तेरभिधानमुदाहरणवाक्येन व्याप्तेः प्रतिपादनम्, तदनन्तरमुपनयेनोपनयवाक्येन पक्षधर्मतायाः प्रतिपादनम् यथा वह्निव्याप्यधूमवांश्चायमिति सुष्ठूक्तं व्याप्तेः प्राथम्यादिति उपनयात् प्रागुदाहरणनिरूपणम्। **वैशिष्ट्ये**ति टीका। पक्षहेत्वोर्वैशिष्ट्यमेव पक्षधर्मता। यतो धूमवानयं पर्वत इत्यत्र पर्वतो विशिष्यं धूमो विशेषणम्, तयोः सम्बन्धः स एव पक्षधर्मता, तस्याश्च वैशिष्ट्यरूपत्वेन परामर्शात् पूर्वमनुपस्थितत्वेन प्रकारत्वाभावात्। तथा च स्वार्थानुमानस्थले आदौ व्याप्तिरुपस्थिता पश्चात् परामर्शकाले पक्षधर्मता धूमवान् अयम् इतिरूपा भासते। यथा स्वार्थानुमाने रीतिस्तथैव परार्थानुमानेऽपि, परं प्रति तयैव रीत्या प्रदर्शनीयमिति। **अतथात्वादि**ति टीका। पक्षधर्मतायाः प्रकारत्वेन भानाभावात्। तथा च पक्षधर्मतायाः प्रकारत्वे पूर्वोपस्थितिरवश्यं वक्तव्या। तथा च पूर्वोपस्थित्यभावान्न सा प्रकार इत्यर्थः। व्याप्तेः प्राथम्यप्रदर्शनबीजे मतान्तरमवतारयति - **केचित् त्वि**ति टीका। व्याप्तिज्ञानमनुमितिमात्रकारणम्, इदं तु सकलवादिसिद्धम्, ततो व्याप्तेः प्राथमिकप्रदर्शनम्। पक्षधर्मतायाश्चानुमितिमात्रजनकत्वे विप्रतिपत्तिः। यथा सविता भूमेरुपरि भूमौ आलोकवत्त्वात्। सविता(तृ)पक्षे भूमेरूर्ध्वदेशवर्तित्वं साध्यम्, भूमावालोकवत्त्वादिति हेतुः स च सवितृरूपपक्षे नास्ति भूमावेव वर्तमानत्वात्। तथा च हेतोः पक्षावृत्तित्वात् पक्षधर्मता नास्ति, व्याप्तिस्तु वर्तते। तथा हि यत्र यत्र भूमेरालोकवत्त्वं तत्र तत्र

भूमेरुपरिदेशवृत्तित्वं साध्यम्, इयं सामान्यव्याप्तिः । विशेषव्याप्तौ दृष्टान्ताभावात् व्यतिरेकव्याप्तिरेवेति कृत्वा सा पक्षधर्मता विप्रतिपन्नेति । व्याप्तिस्तु सर्ववादिसिद्धेति सा प्रथमं प्रदर्श्यते पश्चात् पक्षधर्मतेति मतान्तरेण समाधानमित्यर्थः । ननु उदाहरणेन समानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यस(सा)मानाधिकरण्यरूपा व्याप्तिः कथं प्रदर्श्यते ? यो यो धूमवान् इत्युदाहरणमध्ये ग्रन्थोक्ता व्याप्तिः कथं ज्ञायत इत्यत आह - **व्याप्तिर्यथोदाहरणे**ति टीका । तथा चाशेषसाधनाश्रयाश्रितसाध्यसम्बन्धरूपा या व्याप्तिः सैवोदाहरणेन प्रदर्श्यते यथा यत्र धूमस्तत्र वह्निः इत्यत्र अशेषसाधनान्युपस्थितानि तत्र वह्निमत्त्वस्य बोधनात् अशेषसाधनाश्रयाश्रितसाध्यसम्बन्धरूपा व्याप्तिः प्रदर्श्यत एव । ननु तथापि [184 B] मूलोक्ता अत्यन्ताभावगर्भा व्याप्तिः सा तु उदाहरणेन न प्रदर्श्यते इत्यत आह - **ग्रन्थकृ**दिति टीका । तथा च ग्रन्थकृदभिमता व्याप्तिरत्यन्ताभावगर्भा, तद्बोधे उदाहरणस्य परम्परयोपयोगः । तथाहि यदा उदाहरणवाक्येनाशेषाणि साधनान्युपस्थितानि पश्चात् तावत्सु साधनाधिकरणेषु साध्यसम्बन्धे बोधिते सति पश्चात् हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यज्ञानं यत्र यावत्साधनाधिकरणेषु यस्य साध्यस्य सम्बन्धस्तस्मिन् साध्ये हेतुसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्याप्यभाव इति परम्परया अशेषसाधनाश्रयाश्रितसाध्यसम्बन्धरूपव्याप्तिज्ञानद्वारा पश्चात् उदाहरणेनात्यन्ताभावगर्भा व्याप्तिरुपदर्श्यते इति परम्परया तत्राप्युदाहरणस्योपयोग इत्यर्थः । ननु अशेषेत्यादिव्याप्तिवत् हेतुसमानाधिकरणेत्यादिव्याप्तिरप्युदाहरण-वाक्येन कुतो न प्रदर्श्यत इत्यत आह - **पदार्थे**ति टीका । तथा चात्यन्ताभावगर्भा या व्याप्तिः सा पदार्थविधया वा उदाहरणेन बोध्यते किंवा वाक्यार्थविधया उदाहरणेन बोध्यते । द्वाभ्यामप्येताभ्यां न लभ्यते । कुतः ? यो यो धूमवान् इत्यत्र धूमाधिकरणमुपस्थितम्, स वह्निमान् इत्यनेन वह्न्यधिकरणमुपस्थितम्, तथा च यत्तच्छब्दाभ्यां साध्यसाधनसामानाधिकरण्यमेवोपस्थितम् न तु अत्यन्ताभावादिः पदार्थ उपस्थित इति न पदार्थविधया तदुपस्थितिः । वाक्यार्थविधयाऽपि न तदुपस्थितिः । पदार्थसम्बन्धो हि वाक्यार्थः, न तु अपदार्थसम्बन्धो वाक्यार्थः । तथा चात्यन्ताभावादीनां पदार्थत्वाभावात् कथमत्यन्ताभावगर्भा व्याप्तिः उदाहरणेन प्रदर्श्यत इत्यर्थः । ननु तर्हि उदाहरणवाक्यात् कथं सा लभ्यत इत्यत आह - **किन्त्वि**ति टीका । तथा तेनोदाहरणेन सहचारे बोधिते मानसो व्याप्तिग्रहो भविष्यति । व्याप्तिग्रहो हि व्यभिचारज्ञानाभावसहकृतसहचारज्ञानात् जायते । तथा चोदाहरणवाक्ये यत्तच्छब्दाभ्यां सहचार ज्ञानं जातं यच्छब्दवीप्सया व्यभिचारज्ञानाभावोऽपि प्रदर्शितः, पश्चाद् व्यभिचारज्ञानाभावसहकृतसहचारज्ञानेनात्यन्ताभावगर्भव्याप्तिग्रहो भविष्यति इति सर्वं सुस्थम् । उदाहरणलक्षणे जनकेत्यन्तस्य कृत्यमाह - **अत्रे**ति टीका । उदासीने आप्तवाक्ये न्यायबहिर्भूतेऽतिव्याप्तिवारणाय जनकान्तं विशेषणम् । ननु तदप्यनुमितिहेतुलिङ्गपरामर्शपरं यद् वाक्यं तज्जन्यं यद् ज्ञानं तत्र परम्परया कारणमुदासीन-वाक्यमपि भवति सामानाधिकरण्यज्ञानद्वाराऽपीत्यत आह - **न्यायजन्यज्ञाने**ति टीका । तथा च जनकत्वस्यार्थो

न्यायजन्यज्ञानपरम्, तेन नोदासीनेऽतिव्याप्तिरित्यर्थः [185 A]। अथ न्यायजन्यज्ञानजनकशब्दत्वमित्येतावति उक्ते प्रतिज्ञादिष्वतिव्याप्तिः, तद्वारणाय व्याप्यत्वेत्यारभ्य बोधजनकेत्यन्तम्। प्रतिज्ञाद्यवयवे व्याप्यत्वाभिमतवन्निष्ठनियतसम्बन्धबोधजनकशब्दत्वं नास्ति। प्रतिज्ञाजन्यवाक्यार्थबोधे व्याप्यत्वाभिमतव्यापकत्वाभिमतसम्बन्धो न भासते, साध्यं केवलं शुद्धमेव भासते इति तद्व्यावृत्तिः। ननु उदाहरणे निरुक्तो यो व्याप्यत्वाभिमतव्यापकत्वाभिमतसम्बन्धबोधस्तज्जनकत्वं नास्ति किन्तु धूमवह्न्योः सामानाधिकरण्यमात्रं भासते परमिदमेतस्य व्याप्यमिदमेतस्य व्यापकमित्यनेन रूपेण न भासते इत्यत आह - **निरुक्तेति** टीका। तथा च यद्यपि तत् साक्षात् न भासते तथापि व्याप्यत्वाभिमतव्यापकत्वाभिमतयोर्नियततात्पर्यकमुदाहरणं भवत्येवेति कृत्वा निरुक्तसम्बन्धबोधजनकत्वं बोध्यम्। ननु न्यायजन्यज्ञानजनकत्वमुपनयेऽप्यस्ति यतस्तत्र वह्निव्याप्यधूमवांश्चायमिति प्रयोगस्ततस्तत्र व्याप्तिर्भासते इति कृत्वा व्याप्यत्वाभिमतेत्यादिकं लक्षणं तत्र वर्तत इत्यतिव्याप्तिरित्यत आह - **उपनये चेति** टीका। उपनये पक्षधर्मताबोधनमात्रे तात्पर्यं न तु व्याप्तौ तात्पर्यम्, व्याप्तेरुदाहरणेनैव सिद्धत्वादिति भावः। पक्षान्तरमाह - **यद्वेति** टीका। तथा च व्याप्यत्वाभिमतवन्निष्ठव्यापकत्वाभिमतसम्बन्धविधायकत्वं विवक्षितम्। नन्वेतावता उपनये कथमतिव्याप्तिर्वारितेत्यत आह - **उपनयस्य चेति** टीका। तथा चोपनये व्याप्तिरूपः सम्बन्धोऽनूद्यते पक्षधर्मता तु विधीयते यतो यो धूमो वह्निव्याप्यस्तद्वान् यो यश्चैत्रः कुण्डली वा स स्वी(स) इति व्याप्त्यंशेऽनुवादः सिद्धकथनं पक्षधर्मताऽसिद्धा प्रोच्यते इति तदंशे विधायकत्वमेवेति कृत्वोपनये नातिव्याप्तिः उपनये व्याप्तिविधायकत्वाभावात् उदाहरणे तु व्याप्तिविधायकत्वमिति भावः। ननु तथाप्युदाहरणैकदेशेऽतिव्याप्तम्। तथाहि यत्र धूमस्तत्र वह्निरित्युदाहरणांशेऽतिव्याप्तिः लक्षणं तु सम्पूर्णोदाहरणस्य यतस्तत्रापि तादृशसम्बन्धविधायकत्वं तिष्ठति। अशेषसाधनाश्रयाश्रिता साध्यसम्बन्धलक्षणा व्याप्तिः सा विधीयते इति कृत्वा तत्सम्बन्धबोधकत्वं तत्राऽप्यस्तीत्यतिव्याप्तिवारणाय शब्दपदम्। तथा च यावदवच्छेदेन तत्सम्बन्धबोधकत्वं तावत्पदसमुदायत्वम्। उदाहरणैकदेशे तु यावदवच्छेन तत्सम्बन्धबोधकत्वं पर्यवसितं तावत्पदसमुदायत्वं तु नास्ति महानसादिपदपर्यन्तावच्छेदेनैव तत्सम्बन्धबोधकत्वात्। ननु सामान्यलक्षणे [185 B] अनुमितीत्यादिके साध्यसाधनपदे न स्त इत्यत आह - **व्याप्यत्वाभिमतेति** टीका। तथा च सामान्यलक्षणे साध्यसाधनपदे न स्तस्तथापि व्याप्यत्वाभिमतेत्यस्य स्थाने साधनत्वाभिमतेति पदं दातव्यं व्यापकत्वाभिमतस्थले साध्यत्वाभिमतेति पदं दातव्यम्। तथा चोदाहरणलक्षणे व्याप्यत्वाभिमतव्यापकत्वाभिमतपददाने अन्वयिनोऽथ च व्यतिरेकिण उदाहरणस्य सङ्ग्रहो भवतीति भावः।

**न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु न, दृष्टान्तप्रयोगस्य सामयिकत्वेनासार्वत्रिकत्वात् यो यो धूमवान् सोऽग्निमान् इत्येव व्याप्तिप्रतीतेः। नापि प्रकृतानुमिति-**

**हेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानविषयव्याप्त्युपनायकं वचनं तत्, उपनयातिव्याप्तेः, अत उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम्। एतदेवान्वयव्यतिरेकव्याप्तिविषयत्वविशेषितं विशेषलक्षणद्वयमित्यन्ये। अत्र च व्यभिचारवारणाय वीप्सामाहुः। यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु वयम्, वीप्सा च यत्पदे न तु तत्पदेऽपि विशेषरूपोपस्थितयोरपि तत्पदेन परामर्शाद् बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः, यथा "यद् यत् पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे" [मालतीमाधव] इत्यत्र। इदं च साध्यसाधनोभयाश्रयविकलानुपदर्शितान्वय-विपरीतोपदर्शितान्वयानुपदर्शितव्यतिरेक-विपरीतोपदर्शितव्यतिरेकभेदाद् आभासरूपमिति।**

अथ मूलम्। कस्यचिदप्युदाहरणलक्षणं दूषयति - **न्यायावयवेति** मूलम्। न्यायावयवरूपं यद् दृष्टान्तवचनम्, तथा च न्यायावयवत्वे सति दृष्टान्तवचनम्। उदासीनवाक्ये यो यो धूमवान् स वह्निमान् इति रूपेऽतिव्याप्तिवारणाय सत्यन्तम्, अवयवान्तरेऽतिव्याप्तिवारणाय दृष्टान्तवचनम्। दूषयति - **दृष्टान्तप्रयोगस्येति** मूलम्। तथा चायमसाधको व्यभिचारित्वादित्यादौ दृष्टान्तप्रयोगो नास्ति दृष्टान्तप्रयोगस्य सामयिकत्वात् कादाचित्कत्वात्। यो यो व्यभिचारी सोऽसाधक इत्येतावन्मात्रं वर्तते, दृष्टान्तप्रयोगो नास्ति सङ्केतितत्वात्। अतोऽत्रोदाहरणवाक्ये दृष्टान्तवचनत्वाभावादव्याप्तिरित्यर्थः। एतदेवाह - **सामयिकत्वेनेति** मूलम्। ननु दृष्टान्ताभावाद् व्याप्तिलाभः कथं स्यादित्यत आह - यो यो धूमवान् स वह्निमान् इत्येतावतैव व्याप्तिबोधात् तेषां मते महानसमिति दृष्टान्तवचनं नास्ति तावन्मात्रेणैव [1]व्याप्तिलाभादित्यर्थः। पुनरपि मतान्तरमाशङ्क्य दूषयति - **नापीति** मूलम्। प्रकृतानुमितिहेतुभूतं यद् ज्ञानं वह्निव्याप्यधूमवानिति रूपं तस्य विषयो या व्याप्तिस्ततस्तद्वारणाय प्रकृतानुमितिहेतुभूतेति पदम्। वादिप्रतिवादिनोरुद्देश्या याऽनुमितिस्तद्धेतुभूतं यद् ज्ञानं तस्य विषयो यो व्याप्तिस्तस्योपनायकं वचनं यत्र धूमस्तत्र वह्निरितिरूपं तद्बोधकं वचनमुदाहरणम्, एतद् दूषयति - **तदिति** मूलम्। तथा चेदं लक्षणमुपनयेऽतिव्याप्तम्, यतस्तत्रापि वह्निव्याप्यधूमवानयमिति स्वरूपे व्याप्त्युपनायकवचनत्वं वर्तते एवेति [अति]व्याप्तिरित्यर्थः। अन्यसम्मतोदाहरणलक्षणमाह - **अत** इति मूलम्। यतोऽन्यानि लक्षणानि दुष्टानि अत इत्यर्थः। **उपनयेति** मूलम्। उपनयाभिधानप्रयोजिका या जिज्ञासा तज्जनकं यद् वाक्यं यो य इत्यादिरूपम्। यदि धूमो वह्निव्याप्यो जातस्ततः

१. प्रतिवादिना तथा सङ्केतितत्वात्। प्रतौ टिप्पणी।

किं सिद्धमित्युपनयाभिधानाकाङ्क्षा भवेत्, जिज्ञासानन्तरमेवोपनयप्रयोगात् । जिज्ञासाजनकमुदाहरणम् । उदाहरणेन जिज्ञासा जन्यते, तथा चोपनयप्रयोग इत्युपनयप्रयोजकत्वम् । उदासीनवाक्येऽतिव्याप्तिवारणाय जनकान्तम् [186 A] । आत्मादावतिव्याप्तिवारणाय वाक्यपदम् । उपनयेति पदम् अवयवान्तरेऽतिव्याप्ति-वारणायेति । इदं सामान्योदाहरणलक्षणम् । अथ विशेषोदाहरणलक्षणमाह - **एतदेवेति** मूलम् । यो यो धूमवान् सोऽग्निमान् इत्युदाहरणानन्तरं वह्निव्याप्यधूमवांश्चायमित्युपनयवाक्यम् । एवं यत्र यत्र इतरभेदाभावस्तत्र पृथिवीत्वाभावो यथा जले इत्युदाहरणवाक्यानन्तरं पृथिवीत्वाभावव्याप्येतरभेदाभाववतीयमिति व्यतिरेकोपनय इति । व्यतिरेकोपनयाभिधानप्रयोजिका या जिज्ञासा तज्जनकवाक्यं व्यतिरेक्युदाहरणम् । ननु यत्र यत्र धूमस्तत्र वह्निरित्युदाहरणे यच्छब्दद्वयानन्तरमेक एव तच्छब्दः प्रयोक्तव्यस्तच्छब्दद्वयं वेत्यत आह - **अत्र चेति** मूलम् । उदाहरणवाक्ये व्यभिचारवारणाय वीप्सामाहुः । आम्रेडितवाक्यं वीप्सा । ननु व्याप्तिबोधनार्थं वीप्सा । यत्र सामानाधिकरण्यादेव व्याप्तिर्बुध्यते तत्र किमर्थं वीप्सा इत्यत आह - **यत्र चेति** मूलम् । यत्र च सामानाधिकरण्यादेव व्याप्तिबोधस्तत्र न वीप्सा इतीष्टापत्तिरेव । यथा हि केवलान्वय्यनुमानेऽभेदानुमाने वा सामानाधिकरण्यादेव व्याप्तिबोधो जायते । यथा शब्दोऽभिधेयः प्रमेयत्वात् इत्यत्र व्यभिचाराभावात् सामानाधिकरण्यमात्रादेव व्याप्तिबोधो जायते । अभेदानुमानं यथा अयमेतदभिन्नः एतत्त्वात् इति अत्र यत्र एतत्त्वं तत्र एतदभिन्नत्वं व्यभिचाराशङ्काभावात् सामानाधिकरण्यमात्रादेव व्याप्तिबोधः तन्न यच्छब्देन वीप्सा । तथा च केवलान्वय्य-भेदानुमानातिरिक्तस्थले व्यभिचारवारणार्थं वीप्सा वक्तव्या । तथाहि धूमादित्यनुमाने यत्र यत्र धूमस्तत्र वह्निरित्यत्र नानाधिकरणेषु धूमवत्सु वह्निमत्त्वबोधने सति कस्मिंश्चिद्धूमवति वह्न्यभावो भविष्यतीति शङ्का निवृत्ता वीप्सया । भूयस्सु धूमवदधिकरणेषु वह्निमत्त्वबोधनात् वह्नेर्व्यतिरेकधर्मत्वव्यभिचारशङ्काऽन्यथा स्यादित्येके । मतान्तरमाह - **वीप्सायामपीति** मूलम् । तथा च वीप्सया भूयः सहचारज्ञाने जातेऽपि पार्थिवत्व-लोहलेख्यत्ववत् व्यभिचारो भविष्यतीति तच्छङ्काया अनिवृत्तेर्वीप्सा व्यर्था इति पूर्वमते । तथा च वीप्सायाः प्रयोजनं नास्त्येव । यत्र धूमस्तत्र वह्निरित्येवोदाहरणम् । तुष्यतु दुर्जन इति न्यायेन वीप्सा तथापि यत्पदे एव सा न तु तत्पदे इत्याह - **वीप्सा चेति** मूलम् । ननु पूर्वयत्पदेनैकमधिकरणमुपस्थापितम्, द्वितीययत्पदेन तदधि-करणातिरिक्तान्यधिकरणान्युपस्थापितानि, तेषामुपस्थितिस्तु एकेन यत्पदेन कथं स्यादित्यत आह - **विशेषरूपेति** मूलम् । तथा च विशेषरूपेण महानसत्वचत्वरत्वादिरूपेणोपस्थितयोरधिकरणयोः यत्पदेनोपस्थितयोरधि-करणयोरेकेन तत्पदेन परामर्शः कर्तुं शक्यत एव । ततः पूर्वयत्पदेनैकमधिकरणं महानसादि उक्तम्, द्वितीयेन तु तदतिरिक्तानि सर्वाण्यधिकरणान्युपस्थापितानि, एकेन तत्पदेन तु तेषां सर्वेषामुपस्थितिः [186 B] कर्तुं शक्यत एवेति । एतदेवाह - **विशेषेति** । विशेषरूपेण महानसत्वादिरूपेणोपस्थितयोरप्येकेन तत्पदेन परामर्शसम्भवात्

इति यत्पदे एव वीप्सा न तत्पदे इत्याह - ननु नानारूपेणोपस्थितयोः पदार्थयोरेकेन तत्पदेन परामर्शः कथं स्यात् नानायत्पदोक्ताः पदार्थाः कथमेकतत्पदादुपस्थिता भविष्यन्तीत्यत आह - **बुद्धिस्थे**ति मूलम्। तथा च सर्व-नाम्नो बुद्धिस्थे शक्तिः यथा 'यश्चकार वनं धन्यं गोपस्त्री यं पुनः पपौ' इत्यादौ षड्विभक्तिसमभिव्याहृतपदानां येऽर्थास्ते एकेनैव तत्पदेन बोद्धुं शक्यते इति। यत्पदेन यः पूर्वं बुद्धिस्थः स एव य(त)त्पदेन [बोद्धुं शक्यते]। यत् नानायत्पदैरुपस्थितं तदेकेनापि तत्पदेन बोद्धुं शक्यत एव। ननु यत्र यत्पदद्वयं तत्रावश्यं तत्पदद्वयमपेक्षितं यत्तदोर्नित्यसम्बन्धात्। अन्यथा व्याकरणानुशासनरूपव्युत्पत्तिविरोधः स्यात् इत्यत आह - **न व्युत्पत्तिविरोध** इति मूलम्। तथा च यत्तदोर्नित्यसम्बन्धमात्रं न तु यावन्तो यच्छब्दास्तावन्तस्तच्छब्दा इति एकेनापि तत्पदेन सर्वयत्पदोक्तार्थानां परामर्शात्। व्युत्पत्त्यविरोधे उदाहरणसम्मतिमाह - **भवभूतेर्मालतीमाधवे** - यद् यत् पापमिति। हे जगन्नाथ नम्रस्य मे यद् यत् पापं तत् प्रतिजहि इति। अत्र यत्पदोभयोपस्थापितयोरर्थयोरेकेनैव तत्पदेन परामर्शसम्भवादिति भावः। तत्पदे न वीप्सा इति सिद्धम्।

अथ टीका। **न्यायावयवे**ति टीका। ननु न्यायावयवपदस्य दृष्टान्तविशेषणभ्रमं वारयति - न्यायावयवत्वे सति इत्यनेन। तथा च न्यायावयवपदं न दृष्टान्तस्य विशेषणं किन्तु वचनस्यैव विशेषणमित्यर्थः। अन्यथा दृष्टान्त-विशेषणत्वे महानसादेः पदार्थस्य शब्दरूपन्यायावयवत्वाभावादसङ्गतिः स्यात् इत्यर्थः। ननु निगमनेऽतिव्याप्तमिदं लक्षणम्, प्रकृतानुमितिहेतुज्ञानविषयव्याप्त्युपनायकं वचनं निगमनमपि भवति। तस्माद् वह्निव्याप्यधूमाद् वह्निमान् इत्येवं रूपं निगमनं भवति, तत्रापि व्याप्त्युपनायकत्वादित्यत आह - **उपनयेत्युपलक्षणमि**ति टीका। तथा च तत्राप्यतिव्याप्तिरिष्टैवेत्यर्थः। **तद्बीजमि**ति टीका। उपनयाभिधानप्रयोजकजिज्ञासाजनकतावच्छेदकाज्ञाने तादृशजनकता ग्रहीतुं न शक्यते, न चोदाहरणत्वं तदवच्छेदकमिति वाच्यम्। उदाहरणस्य जातित्वाभावात् चैत्र-शब्दवृत्तिजात्या सह सङ्करः। तथाहि यत्र चैत्रशब्दवृत्तिजातिस्तत्रोदाहरणत्वमेवं नास्ति। चैत्रशब्दवृत्तिजातिर्घटम् आनय इति वाक्येऽस्ति, तत्रोदाहरणत्वं नास्ति, यत्र चोदाहरणत्वं तत्र चैत्रशब्दवृत्तिजातित्वं नास्ति मैत्रोदाहरणे चैत्रशब्दवृत्तिजातित्वाभावात्, उभयमपि चैत्रोदाहरणेऽस्तीति जातिसङ्करात् तदोपाधिस्तत्। तदाऽयमेव उप-नयेत्यादिरेव अन्यो वा ? नायम् आत्माश्रयात्, नान्यः तदनिर्वचनात् इत्यर्थः। **अनुगते**ति टीका। यावत्पर्यन्त-मुदाहरणवाक्यनिष्ठं तादृशजिज्ञासाजनकतावच्छेदकं गृहीतं नास्ति तावत्पर्यन्तं जिज्ञासाजनकत्वं ग्रहीतुं न शक्यत इत्यर्थः। **तत्सत्त्वे** इति टीका। यदि जनकतावच्छेदकं किञ्चिदस्ति तदा तदेवोदाहरणस्य लक्षणमस्तु इत्यर्थः। **अत्र चेतीति** टीका [187 A]। वीप्सा [व्यभिचार]वारणाय। ननु वीप्सया व्यभिचारस्य वारणं कथं भवति व्यभिचारस्य वस्तुधर्मत्वात्। तथाहि धूमाभाववद्वृत्तित्वं वह्नौ तिष्ठति तस्य तद्धर्मत्वात् तद्वारणं वीप्सया कथं स्यादित्यत आह - **व्यभिचारिसाधारणे**ति टीका। तथा च व्यभिचारिसाधारणो यः साध्यसम्बन्धस्तन्मात्र-

प्रतीतिप्रसङ्गवारणाय अयमर्थः। वीप्सितशब्दश्रवणेन व्यभिचारिसाधारणो यः साध्यसम्बन्धो धूमाभाववद्वृत्तित्वं वह्नेः वह्न्यभाववद्वृत्तित्वं रासभादेस्तद्व्यावृत्तो रासभादिव्यावृत्तो धूमादिमात्रनिष्ठ एवम्भूतो यः सम्बन्धः स वीप्सितशब्दश्रवणेन प्रतीयते। यथा वह्न्यभाववति रासभादिर्वर्तते परं धूमस्तत्र नास्तीति रूपः प्रतीयते इति भावः। एतदेवाह - **तेनेति** टीका। वीप्सितशब्देन यत्पदद्वयेन यावत्साधनाधिकरणोपस्थितौ तत्र साध्यवत्त्व-विधानात् यावत्साधनाश्रयाश्रितं यद्वह्नित्वद्वारकसम्बन्धेन यत् साध्यम्। ननु यावत्साधनाश्रयेषु किमपि साध्यं नास्ति। यथा महानसीयवह्निः सर्वधूमवत्सु नास्तीति कथमियं व्याप्तिरिति चेन्न। यद्यपि सर्वसाधनवत्सु एकं साध्यं संयोगसम्बन्धेन नास्ति तथापि वह्नित्वद्वारकसम्बन्धेन सर्वाणि साध्यानि सर्वसाधनवत्सु वर्तन्ते। तथा च महानसीयवह्निः सर्वसाधनवस्तु वह्नित्वद्वारा वर्तते। यथा घटत्वं द्रव्यत्वद्वारकसम्बन्धेन सकलद्रव्य-मात्रवृत्ति भवति, घटत्वस्य द्रव्यत्वस्य च सम्बन्धो वर्तते, द्रव्यत्वस्य सकलद्रव्यैः सह सम्बन्धो वर्तते इति कृत्वा घटत्वं द्रव्यत्वद्वारकसम्बन्धेन सकलद्रव्यमात्रवृत्ति भवत्येव, तथा महानसीयवह्नेर्वह्नित्वेन सह सम्बन्धो वर्तते, वह्नित्वस्य च स्वाश्रयव्यक्तिषु वह्निषु सम्बन्धस्तिष्ठति, वह्निभिः सह सर्वासां धूमव्यक्तीनां सम्बन्धस्तिष्ठतीति वह्नित्वद्वारकसम्बन्धेनाशेषसाधनाश्रयाश्रितसाध्यसम्बन्धो व्याप्तिरिति व्याप्तिर्गृह्यते। अत्र चिन्त्यमाह - **ग्रन्थकृदिति** टीका। ग्रन्थकृदभिमता या व्याप्तिर्हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिता-नवच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यरूपा व्याप्तिः सा वीप्सया ग्रहीतुं न शक्यते वीप्सावाक्यात् हेतुसमानाधि-करणात्यन्ताभावस्य तत्प्रतियोगित्वस्य च तदनवच्छेदकत्वादेरुपस्थापनाभावात्। तथा च विवक्षितविशिष्ट-सामानाधिकरण्यरूपा या व्याप्तिः सा वीप्सया प्रदर्शयितुं न शक्यते इति कृत्वा ग्रन्थकृद्व्याप्तिपक्षे वीप्साप्रदर्शनं किमर्थमिति चिन्त्यार्थः। ननु ग्रन्थकृद्व्याप्तिपक्षेऽपि व्यभिचारज्ञानवारणाय वीप्साऽवश्यं वक्तव्या। तथा च वीप्सया सकलसाधनाधिकरणेषु साध्यवत्त्वबोधनात् व्यभिचारशङ्काशून्यसहचारदर्शनात् भवति मानसो व्याप्तिग्रहो मनसा व्यभिचारशङ्कानिवृत्तौ व्याप्तिग्रहो भवति इत्याशङ्कार्थः। समाधत्ते - **यदीति** टीका। यदि उदाहरणेन व्यभिचारज्ञानविरोधिज्ञानं चेदुत्पाद्यते तर्हि साक्षादुदाहरणेन व्याप्तिज्ञानमपि कुतो न जननीयम्? तथाहि ययैवोदाहरणरूपया सामग्र्या व्यभिचारज्ञानविरोधिज्ञानं [187 B] जननीयं तयैव सामग्र्या व्याप्तिज्ञानमपि जन्यताम् - सामग्री चोदाहरणरूपा - युक्तेस्तुल्यत्वात्। यदि चात्यन्ताभावप्रतियोगित्वादयः पदार्था उदाहरण-वाक्यान्नोपस्थितास्तर्हि व्यभिचारज्ञानविरोधिज्ञानमपि कथमुपस्थितं स्यात्। व्यभिचारस्तु हेतोः साध्यात्यन्ता-भाववद्वृत्तित्वम्, तन्निवर्तकं तु साध्यात्यन्ताभाववदवृत्तित्वज्ञानमेव। न चोदाहरणवाक्येन साध्यात्यन्ता-भाववदवृत्तित्वमुपस्थापयितुं शक्यते वीप्सापदार्थत्वाभावात् तस्य। अपदार्थत्वेऽपि यदि उदाहरणवाक्येन साध्यात्यन्ताभाववदवृत्तित्वमुपस्थाप्यते तर्हि हेतुसमानाधिकरणात्यन्ताभावेत्यादिरूपा व्याप्तिः कुतो

नोपस्थाप्यते अपदार्थत्वस्योभयत्रापि तुल्यत्वात् । **व्याप्त्युपदर्शकत्वस्ये**ति टीका । यदि व्यभिचारज्ञानविरोधिज्ञानमुत्पाद्यते उदाहरणवाक्ये वीप्सया तदा हेतुसमानाधिकरणेत्यादिरूपा व्याप्तिरपि तया कथं नोपदर्श्या । तथा च वीप्सया पूर्वं व्यभिचार[ज्ञान]विरोधिज्ञानमुत्पाद्यते पश्चान्मानसं हेतुसमानाधिकरणेत्यादिकं व्याप्तिज्ञानं जायत इति यदुक्तं तद् विरुद्धमित्यर्थः । एतदेव विवृणोति - **व्यभिचारज्ञाने**ति टीका । यदि वीप्सया व्यभिचारज्ञानविरोधिज्ञानमुत्पाद्यते तर्हि यो व्यभिचारज्ञानविरोधिज्ञानविषयः स एव व्याप्तिस्तथा च तद्बोधो मानसो न स्यात् किन्तु उदाहरणवाक्यजन्यः शाब्द एव स्यात् । ततः सिद्धं न वीप्सावाक्याद् मूलकृदभिमतव्याप्तिबोधः तस्य वीप्सावाक्यस्थपदार्थत्वाभावात् इति भावः । **यत्र चेती**ति टीका । अत्र शङ्कते - **न त्विति** टीका । तथा च यत्र केवलान्वयिनि अभेदानुमाने वा सामानाधिकरण्यमेव व्याप्तिस्तत्र वीप्सायाः प्रयोजनं नास्तीति केवलान्वयिनि सामानाधिकरणस्यैव व्याप्तित्वात् । तत्र टीकाकारः शङ्कते - केवलान्वयिन्यपि सामानाधिकरण्यं न व्याप्तिः । कुतः ? शब्दोऽभिधेयः प्रमेयत्वात् इत्यत्र यथा अभिधेयत्वसामानाधिकरण्यं प्रमेयत्वे तिष्ठति एवं घटसामानाधिकरण्यमपि प्रमेयत्वे तिष्ठति घटप्रमेयत्वाधिकरणे घटस्यापि सत्त्वात् । अथवा भूतले घटोऽप्यस्ति प्रमेयत्वमप्यस्तीति तयोः सामानाधिकरण्यम् । तथा च सामानाधिकरण्यमात्रं न व्याप्तिः किन्तु केवलान्वयिसाध्येन सह हेतोः सामानाधिकरण्यं केवलान्वयिव्याप्तिः । तथा च तल्लाभः केवलान्वयिसामानाधिकरण्यलाभो वीप्सां विना केवलोदाहरणमात्रान्न भवतीति वीप्सा वक्तव्यैव । **तल्लाभ** इति टीका । यदि च केवलान्वयिसाध्यसामानाधिकरण्यलाभो वीप्सां विनापि स्यात् तर्हि धूमादावपि मूलकृदभिमतव्याप्तिरप्युदाहरणादवगम्येत [188 A] अपदार्थत्वस्य तुल्यत्वात्, एतदेवाह - **न चेदि**ति टीका । धूमेऽपदार्थत्वात् सा व्याप्तिर्वीप्सां विना न बुध्येत तर्हि केवलान्वयिन्यपि सा व्याप्तिः कथं बोद्धव्या ? तथा च केवलान्वयिन्यपि साध्यसामानाधिकरण्यरूपा या व्याप्तिः तस्या बोधो न वीप्सां विनेति केवलान्वयिन्यपि सा उपादेयैवेत्यर्थः । मध्ये शङ्कते - **न चे**ति टीका । तथा च धूमादौ वह्न्यादेर्व्यतिरेकिधर्मत्वेन व्यभिचारशङ्का अत्र भवति, प्रमेयत्वादौ तु अभिधेयत्वादेर्व्यतिरेकिधर्मत्वाभावेन व्यभिचारसंशयाभावात् किमर्थं केवलान्वयिनि वीप्सा उपादेया ? तथा च केवलान्वयिनि धूमापेक्षया व्यभिचारशङ्काऽभावरूपविशेषो वर्तत इति कृत्वाऽनुपादेयैव केवलान्वयिनि वीप्सा इत्याशङ्कार्थः । समाधत्ते - **हेतुसमानाधिकरणे**ति टीका । यदि धूमः साध्याभाववद्वृत्तिर्न वेति व्यभिचारशङ्का धूमे तिष्ठति तर्हि केवलान्वयिन्यपि साध्याभावस्याप्रसिद्धत्वेऽपि साध्यं हेतुसमानाधिकरणो योऽत्यन्ताभावो घटपटाद्यत्यन्ताभावस्तत्प्रतियोगि न वेति व्यभिचारसंशयः केवलान्वयिसाध्ये भवत्येव । यतो हि व्यभिचारो द्विविधोऽस्ति । एको हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यकत्वम्, द्वितीयस्तु साध्यात्यन्ताभाववद्वृत्तित्वं हेतोरिति । द्वितीयस्यासम्भवेऽपि प्रथमस्योक्तरीत्या सम्भवात् । अत्राशङ्कते - **न चे**ति टीका । साध्यस्या-

भिधेयत्वस्यात्यन्ताभावाप्रतियोगित्वलक्षणकेवलान्वयित्वज्ञानात् तादृशव्यभिचारसंशयो न भवतीति न विप्साया: केवलान्वयिनि उपादानम् । **तत्रैवेति** टीका । धूमादावेव तदुपादानं वीप्सोपादानम्, न केवलान्वयिनि इत्यर्थः । दूषयति - **स्वेति** । स्वकर्तव्यतया वादिकर्तव्यतया व्यभिचारशङ्काया अभावेऽपि केवलान्वयिनि वीप्साऽवश्यं वक्तव्यैव । तथाहि न्यायवाक्यैर्यावन्ति यादृशा यादृशा अवयवास्ते ते तादृशास्तादृशा वक्तव्या एव । यदि केवलान्वयिनि व्यभिचारशङ्काया अभावे वीप्सा न प्रदर्श्यते तदा केवलान्वयित्वेन ज्ञाने स्वरूपासिद्धत्वशङ्का नास्तीति पक्षधर्मताऽप्युपनये न प्रदर्श्येतेति उपनयोऽपि केवलान्वयिनि न प्रयोज्यः हेतोः अपक्षधर्मत्वशङ्काया अभावात् । हेतोरपक्षधर्मत्वशङ्काया अभावेऽपि वादिना पक्षधर्मताऽवश्यं प्रदर्शनीया वादिना चोपनयरूपावयवस्य स्वकर्तव्यत्वात्, तादृशावयवत्यागे हि कथकसम्प्रदायविरोधात् । तथा च यथा केवलान्वयिनि हेतोः पक्षधर्मता प्रदर्शनीया, यथा उपनयः स्वकर्तव्यत्वात् उपदर्श्यते तथा वीप्साऽपि प्रदर्शनीयैव केवलान्वयिन्यपीति सिद्धम् । ननु यथाऽसाधकताप्रयोगे[१] उदाहरणाप्रयोगः तद्वत् केवलान्वयिन्यपि वीप्साया अप्रयोग एवेत्यत आह - **असाधकेति** । असाधकताप्रयोगे हि नियमत [188 B] उभयवादिनोः सङ्केतस्तथैव तिष्ठति, यो दोषः सोऽसाधकताव्याप्य इत्युभाभ्यां वादिभ्यामङ्गीकृतत्वात् । तत्रोदाहरणस्य न प्रयोजनम्, तथैव कथकसम्प्रदायात् । सभास्थले वादिनामयमेव सम्प्रदायः, यथा तत्र तथा कथकसम्प्रदायः, तथा केवलान्वयिनि वीप्साया अभाव इति कथकसम्प्रदायात् । केवलान्वयिनि न वीप्सोपादानमित्यस्वरसादाह - **किञ्चेति** टीका । यदि केवलान्वयित्वेन ज्ञाते साध्ये व्यभिचारशङ्काविरहात् वीप्साया अनुपादानं तर्हि साध्ये केवलान्वयित्वेन ज्ञाते सहचारशङ्कापि नास्ति, केवलान्वयित्वस्य सर्ववृत्तित्वात् सहचारशङ्काऽभावः, तदा सहचारबोधने प्रयोजनाभावात् उदाहरणमपि न प्रयुज्येत, उदाहरणं हि सहचारशङ्कानिरासद्वारा सहचारनिश्चयार्थं प्रयोज्यम्, सहचारशङ्काया अभावाद् उदाहरणं निरर्थकं स्यादित्यर्थः । अत्राऽऽशङ्क्य दूषयति - **यदि चेति** टीका । तथा च यद्यपि केवलान्वयिनि सहचारशङ्का नास्ति तथापि सहचारस्य प्रतिज्ञाहेतुभ्यां पूर्वमनुपस्थितत्वात् सहचारघटितव्याप्तेर्बोधः उदाहरणेन विना मानसोऽपि कथं स्यात्, तदर्थमुदाहरणं प्रयोज्यमेवेत्यर्थः । दूषयति - **तदेति** टीका । तर्हि व्यभिचारज्ञानं विना व्यभिचाराभावघटितविशिष्टसामानाधिकरण्यरूपा व्याप्तिर्हेतुसमानेत्यादिका अथवा साध्यात्यन्ताभाववद्वृत्तित्वे सति साध्यसामानाधिकरण्यरूपा व्याप्तिस्तद्ज्ञानाय वीप्साघटितमुदाहरणमावश्यकं केवलान्वयिन्यपि । यदि वीप्साव्यतिरिक्तोदाहरणेन सहचारो बोध्यते तदा वीप्सयाऽव्यभिचारांशोऽपि बोधनीयः, उभयोपस्थितौ सहचारव्यभिचाराभावोपस्थितौ मानसो व्याप्तिनिश्चयो हेतुसमानाधिकरणेत्यादिको बोद्धव्यः । एवं केवलान्वयिनि वीप्साऽऽवश्यिकीत्युक्ता, अभेदानुमानेऽपि तां दर्शयति - **एवं चेति** टीका । अभेदानुमानेऽपि वीप्सा उपादेयैव

१. अयमसाधको व्यभिचारित्वात् । प्रतौ टिप्पणी ।

यथा अयम् एतदभिन्नः एतत्त्वात् इत्यभेदानुमाने यत्र यत्र एतत्त्वं तत्र तत्र एतदभिन्नत्वमिति वीप्सा कर्तव्या एवेति व्याप्त्यव्यभिचारबोधनार्थं व्याप्तिबोधनार्थं वा वीप्सोपादानात्। ननु अभेदानुमाने दृष्टान्ताभावात् कथं वीप्साघटितमुदाहरणं प्रयोज्यमित्यत आह - **तथा चेति** टीका। तथा चैकस्यैव घटादेः पक्षस्य किञ्चिद-वस्थाभेदेन भिन्नभिन्नकालावच्छेदेन पक्षत्वदृष्टान्तत्वयोः सम्भवात्। तथा अभेदानुमाने पक्ष एव दृष्टान्तः। तथाहि अयं घट एतदभिन्नः एतत्त्वात् एतद्वत्, अत्र पूर्वकालावच्छिन्नघटस्य पक्षत्वम् एतत्कालावच्छिन्नस्य दृष्टान्तत्वम् इत्यभेदानुमानेऽपि दृष्टान्तसम्भव इत्यर्थः। तस्माद् यत् मूलकृतोक्तं केवलान्वयिन्यभेदानुमाने वा वीप्सा नास्तीति तत्समाधानं चिन्त्यम्, तदशुद्धमित्यर्थः। **वीप्सायामपीति** मूलम्। तथा च मूलकृता यदुक्तं वीप्सयाऽनेकेष्वधिकरणेषु साध्यसामानाधिकरण्यग्रहेऽपि व्यभिचारशङ्का तदवस्थैव यथा पार्थिव-त्वलोहलेख्यत्वयोरनेकेष्वधिकरणेषु सामानाधिकरण्ये उपस्थिते पार्थिवत्वलोहलेख्यत्वयोर्हीरकादौ व्यभिचारतादवस्थ्यमेव, [189 A] तथा च व्यभिचारशङ्कानिवृत्त्यर्थमपि वीप्सा नोपादेयेति **मणिकृन्मतम्**। एतन्मूलं व्याचष्टे - **अनेकेति** टीका। यो यो धूमवान् स वह्निमान् यथा महानसम् इत्यत्र वीप्सया साधनाधि-करणद्वीत्यादिव्यक्तीनामुपस्थापनेऽपि तत्र प्रथमयत्पदेनैकमधिकरणमुपस्थापितं द्वितीयेन द्वितीयमधिकरणमुप-स्थापितम्। तत्र यद्यप्यधिकरणे हेतुमति साध्यवत्त्वग्रहो जातस्तथापि अधिकरणान्तरे साध्यवत्त्वाग्रहात् व्यभि-चारग्रहस्तदवस्थ एव, द्वितीयेनापि यत्पदेन द्वितीयमेवाधिकरणमुपस्थापितमित्ययमाशयः न तु सर्वाण्यधिकरणा-न्युपस्थापितानीति हृदयम्। आशङ्कते - **नन्विति** टीका। वीप्सया व्युत्पत्तिबलादेव व्याप्तिग्रहः स्यात्। कथं स्यादित्यत आह - **वीप्सितशब्दश्रवणेति** टीका। यो यो धूमवान् इति वीप्सितशब्दश्रवणानन्तरम् एकयत्पदेनै-वाधिकरणोपस्थितौ सत्यां तत्र हेतोः साध्यसामानाधिकरण्यग्रहे पुनर्यत्पदान्तरं किमर्थमुक्तम्? तथा चानुवादे किञ्चित् प्रयोजनमावश्यकम्। प्रयोजनं च किमिति प्रयोजनजिज्ञासायां सत्यां द्वितीययत्पदस्यानुवादादेन(व) व्याप्तितात्पर्यकत्वं गृहीतम्, व्याप्तितात्पर्यकत्वे च गृहीते व्याप्तिबोध एव प्रयोजनमिति प्रथमयत्पदेन बोधितं यत् साधनाधिकरणं तद्भिन्नं सर्वसाधनाधिकरणं द्वितीययत्पदेनोपस्थाप्यते; तद्भिन्नत्वेन सर्वसाधनाधिकरणत्वे-नोपस्थाप्यते। ततः किमित्यत आह - **एवं चेति** टीका। एवं चोभययत्पदाभ्यां सर्वसाधनाधिकरणे साध्यवत्त्व-बोधनात् भवति वीप्सया व्याप्तिग्रह इति। नन्वित्यारभ्य चेत्पर्यन्तं शङ्कार्थः। समाधत्ते - **हन्तैवमिति** टीका। यदि व्युत्पत्तिं विना एकयत्पदोच्चारणानन्तरं पुनर्य[त्प]दोच्चारणं तत्र व्याप्तितात्पर्यका[त्वा]मिति एतादृशव्युत्पत्ति-सहकृतया वीप्सयैव व्याप्तिबोधश्चेत् तर्हि एतादृश्यपि व्युत्पत्तिर्यत्र यत्पदयोगः यत्पदस्य च प्राथम्यं तत्र व्याप्तितात्पर्यकत्वमित्यपि व्युत्पत्तिसहकृताभ्यां यत्पदयोगप्राथम्याभ्यां व्याप्तिबोधो भविष्यतीति। अयमर्थः। एकेनैव यत्पदेन व्याप्तिबोधे सति वीप्सा किमर्थमित्यर्थः। एतदेवाह - **वीप्सां विनैवेति** टीका। यत्र यत्रेति वीप्सां

विनैवेत्यर्थः । **यद्योगप्राथम्याभ्यामिति** टीका । यद्योगो यत्पदयोगः एकं यत्पदमिति यावत् । तस्य प्राथम्यं तत्पदात् पूर्वम् । यत्पदस्य प्राथम्यं नास्ति यत्पदयोगोऽपि नास्ति । तत्र धूमवति वह्निरित्येतादृशे वाक्ये व्याप्तिबोधो न जायते इति कृत्वा यत्पदयोग-प्राथम्याभ्यामेव व्याप्तितात्पर्यकत्वमिति व्युत्पत्त्यनन्तरादेव सर्वसिद्धात् अन्यत्र क्लृप्तात् सकृदुच्चारितयत्पदादेव सकलसाधनाधिकरणोपस्थितौ सत्यां वीप्सावत् वीप्सा-व्यतिरेकेणापि व्याप्तिग्रहसम्भवे किं गुरुणा व्याप्त्यादरेणेत्यर्थः । ननु वीप्साया अभावे किं लाघवमित्यत आह - **यद्योगेति** टीका [189 B] । तथा च वीप्सया यो व्याप्तिग्रहः कर्तव्यः स यत्पदयोगः तत्शब्दात् प्राथम्यं च ताभ्यां या व्युत्पत्तिर्बोधस्तत्पुरस्कारेण स्वल्पाक्षरेण एकयत्पदेनोहारणसंभवे सति वीप्साव्युत्पत्त्यादरो व्यर्थ इत्यत्र वयमित्यस्य ग्रन्थस्य तात्पर्यम् । ननु व्यभिचारतादवस्थ्यमित्यस्य कोऽर्थः ? अयं भावः । त्वयोच्यते यद्योग-प्राथम्याभ्यामेव व्याप्तिग्रहसम्भवे वीप्सा व्यर्थेति, मूलकृता तूच्यते वीप्सायामपि [व्यभि]चारतादवस्थ्यम्, इति तेन सह विरोध इत्यत आह - **न त्विति** टीका । तथा च वीप्साव्युत्पत्त्यादरेऽपि व्यभिचारतादवस्थ्यमित्यत्र मूलस्य न तात्पर्यं किन्तु यद्योग-प्राथम्याभ्यामेव व्याप्तिग्रहसम्भवे किं वीप्सया इति अत्र तद्ग्रन्थस्य तात्पर्यात् । उत्तरग्रन्थोपयोगार्थमाह - **एवमिति** टीका । यदि यद्योग-प्राथम्याभ्यामेव व्याप्तिग्रहसम्भवस्तदा वीप्सावधारणं स्फुटार्थमिति कृत्वा वीप्साव्युत्पत्त्यादरः स्फुटव्याप्तिलाभार्थम्, न तु व्यभिचारशङ्कानिरासार्थं वीप्सादर इत्यर्थः । **वीप्सेति** टीका । भवतु वीप्साव्युत्पत्त्यादरे व्याप्तिलाभस्तथापि सा वीप्सा यत्पदे एव न तु तत्पदे इति । मूलं योजयति - **वीप्सेति** । तथा चैतद्ग्रन्थकारमते वीप्सा नास्त्येव, यत्र धूमस्तत्र वह्निरित्येव व्याप्तिग्रहात् । शङ्कते - **यद्यपीति** टीका । यद्यपि यथा यत्पदे वीप्सा क्रियते तथा तत्पदे वीप्सा क्रियते तदा तत्पदद्वयस्याप्यन्वयो भविष्यत्येव । कथम् ? एकेन यत्पदेनैकमधिकरणमुपस्थापितं द्वितीयेन यत्पदेन अन्यान्याधिकरणानीति, तद्वत् यत्पदेन प्रथममधिकरणं यदुपस्थापितं तत् प्रथमतत्पदेनोपस्थापयितुं शक्यते एवं द्वितीययत्पदेनोपस्थापितं यदधिकरणं तत् द्वितीयेन तत्पदेनोपस्थापयितुं शक्यते । तथा च तत्पदवीप्सायामपि न दोषः । अत्रैव सम्मतिमाह - **सा सा ह्रियेति** टीका । तथा च तत्पदेऽपि वीप्सा कर्तव्येत्युक्तम् । **तथापीति** टीका । एकतत्पदोपादानेनापि अभितः यावदधिकरणोपस्थितिसम्भवे सति द्वितीयतत्पदोपादानं प्रयत्नगौरवम्, यथा यश्चाह वनं धनमित्यादौ नानायत्पदोपस्थाप्यानामर्थानामेकेन तत्पदेनोपस्थापनं कर्तुं शक्यत एवेति द्वितीयतत्पदोपादानं व्यर्थमिति भावः । **विशेषरूपेतीति** टीका । यत् यत् धूमवत् इत्यत्र यत्पदद्वयात् भिन्नरूपेण महानसत्वचत्वरत्वादिभिन्नविशेषरूपेणो-पस्थितयोरपि यत्पदार्थयोः केनचिदेकेन धूमवत्त्वादिरूपेण एकतत्पदेनापि परामर्शसम्भवात् तत्पदद्वयं व्यर्थ-मित्यर्थः । **उपाध्यायमतमाह - अत्र वदतीति** टीका । **उपाध्यायो** वदति तत्पदेऽपि वीप्साऽवश्यं कर्तव्येति । नित्यवीप्सयोः इति सूत्रे कोऽर्थः प्रतिपादित इत्यत आह - **वीप्सायामिति** टीका । वीप्साशब्दार्थो यथा

*व्याप्तुमिच्छा वीप्सा। तथा च व्याप्तिं बोधयितुं येच्छा सा वीप्सा। ततस्थां(स्तां) बोधयितुं यत्र यस्य* पदस्य प्रयोगः क्रियते तत्र एकपदस्य स्थाने पदद्वयात्मकः समुदाय आदिश्यते। तेन [190 A] एकस्य पदस्य पदद्वयरूपता निपात्यते। एवं च सति यथा यत्पदे व्याप्तिं बोधयितुमिच्छा तथा तत्पदद्वयप्रयोक्तुरपि व्याप्ताविच्छा वर्तत एव। तथा च व्याप्तिश्च तदभिधेयस्य तत्पदाभिधेयस्य साकल्येनापरपदार्थेन सह सम्बन्धः, ततः किमित्यत आह - **तथा चेति** टीका। तथा च तत्पदद्वयसमुदायः एकपदतामापन्नोऽवयवद्वयं तत्पदद्वयं तच्छक्तिपुरस्कारेण युगपत् साकल्येनैव यत्तदादिप्रतिपाद्यं सर्वमुपस्थापयतीति व्युत्पत्ती(त्ति)रवसीयते। अत्रोपोद्बलकमाह - **अत एवेति** टीका। यतः पदसमुदायस्य सकलस्वावयवार्थोपस्थापकत्वमेकपदत्वं च पुरस्कृत्य अत्र बहुवचनापत्तिः। **अत एवेति** टीका। **न्यासकार** इदमाशङ्क्य परिहृतवान्। किं तत्? तत्पदद्वयात्मको यः समुदायस्तस्य चेत् सकलस्वावयवार्थोपस्थापकत्वम्। अन्यश्च(च्च) पदद्वयस्थाने एकपदत्वं क्रियते तदाऽनेकार्थकं यत्पदम्, तत्र बहुवचनं स्यात्, यदा एकेन पदेन बहवोऽर्था उपस्थापितास्तदा बहुवचनं स्यात्। यथा नृभिर्नृभिः इत्यत्र इदं चेदेकं पदं तदा द्वितीयनकारस्य णत्वं स्यात् यतो "**रषाभ्यां नो णः**" इति सूत्रे एकपदस्थाभ्यां रेफसकाराभ्यां परस्य नकारस्य णत्वं स्यात् इत्याशङ्क्य परिहृतवान् **न्यासकारः**। परिहारो यथा एकस्य पदस्य स्थाने पदद्वयात्मकः आदेशः यथा एकं पदं त्यक्त्वा पदद्वयं कर्तव्यमिति यथा वृक्षमित्येकपदस्य स्थाने वृक्षं वृक्षमिति निपातनम् न सिञ्चति। अयमादेशः पदद्वयात्मक एवेति न बहुवचनम्; नापि नृभिर्नृभिरित्यत्र एकपदता तेन नस्य णत्वं न भवति इति परिहारः। उपसंहरति - **तस्मादिति** टीका। मूलकृता यदुक्तं वीप्सायामपि व्यभिचारतादवस्थ्यमिति तदयुक्तम्। कुत इत्याह - **यत्पदेति** टीका। यत्पदद्वयेन हेतुमदधिकरणानां सर्वेषां बुद्धिस्थानामुपस्थापनात्। ततः किमित्यत आह - **एवं चेति** टीका। तथा च मूलकृतोक्तं विशेषरूपेणोपस्थितयोः तत्पदेनोपस्थापनं तदप्ययुक्तम्। यत्पदाभ्यां विशेषरूपेणोपस्थितिरेव नास्ति। धूमवत्त्वेनैव बुद्धिस्थानां सर्वेषां यत्पदद्वयेनोपस्थापनम्। ननु यत्पदद्वयेन विशेषरूपोपस्थितिः क्रियते एव, यथा यत्र घटरूपं यत्र च पटरूपं तत्रोभयत्रेत्यादौ यत्पदाद् आद्यात् घटपदत्वेनोपस्थितिः द्वितीयेन यत्पदेन पटत्वेनोपस्थितिः, ततो यत्पदद्वयाद् भिन्नरूपेणोपस्थितिर्भवत्येवेति। कथं न यत्पदद्वयाद् विशेषरूपोपस्थितिरित्यत आह - **न हीति** टीका। न हि यो यो धूमवान् इत्यत्र यत्पदद्वयं परस्परनिरपेक्षम्, यत्र घटरूपमित्यादौ च परस्परनिरपेक्षं यत्पदद्वयम्, अत्र वीप्सास्थले पदद्वयरूपादेशविधानात् यत्पदयोः सापेक्षतैव, तथा च परस्परसापेक्षतायां न विशेषरूपेणोपस्थापनं किन्तु एकेनैव रूपेणाभिधेयं विधत्ते। एतदेवाह टीका - **किन्त्विति। एकेनैवेति।** धूमवत्त्वेन रूपेणैवेत्यर्थः। **तत्समुदाय इति** टीका। यत्पदद्वयसमुदाय [190 B] इत्यर्थः। विशेषरूपेणोपस्थितौ बाधकमाह - **अन्यथेति**। यदि यत्पदद्वयाद् विशेषरूपेणोपस्थितिस्तर्हि यद्धूमवदित्यत्र विशेष्यधूमवत्पदस्य प्रथमयत्पदस्थले आवृत्तिप्रसङ्गात् यथा यद्धूमवत्

यच्च धूमवदिति धूमपदस्यावृत्तिप्रसङ्गः यथा यद्घटरूपवत् यच्च पटरूपवदित्यादिपदावृत्तिप्रसङ्गात् । तथा चायमभिप्रायः ग्रन्थकारेणोच्यते यत्पदतत्पदयोर्वीप्सा न कर्तव्या। **तत्रोपाध्यायेना**शङ्कितम्। ''नित्यवीप्सयोः'' इति **पाणिनिसूत्रेण** व्याप्तिबोधने यदीच्छा तदा इच्छायां सत्यामेकपदस्य स्थाने पदद्वयात्मक एवादेशस्तेन च व्याप्तिबोधः। यथा वृक्षं वृक्षं सिञ्चति, वृक्षत्वं सिञ्चन(सेचन)व्याप्यमिति। प्रकृतेऽपि यत्पदतत्पदयोर्वीप्सा कर्तव्यैवेति **यज्ञपत्युपाध्यायाः**। इदं दूषयति - **अत्र ब्रूमः**। **वीप्सायामपी**ति टीका। न हि मूलस्यायमर्थः। वीप्सायामपि व्यभिचारतादवस्थ्यमित्यस्य ग्रन्थस्यायमर्थो न भवति यतो(त्) वीप्सायामपि कृतायां व्यभिचार-स्तिष्ठत्येवेति, किन्तु अनुमितौ हेतुव्याप्तिज्ञानं नोदेति । कथं नोदेतीत्याह - **ग्रन्थकृन्मते** इति टीका। **मणिकार**मतेऽन्योन्याभावगर्भव्याप्तिज्ञानम् अनुमितिहेतुः । हेतुसमानाधिकरणो योऽन्योन्याभावो घटादीनां यथा धूमवान् घटो न भवतीति रूपस्तत्र धूमवन्निष्ठो योऽन्योन्याभावो घटान्योन्याभावस्तस्य प्रतियोगितावच्छेदकं घटत्वमेव न वह्निस्तथा च हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदको यो वह्निस्तेन सामानाधि-करण्यं हेतोः सा व्याप्तिः, इयं व्याप्तिरत्यन्ताभावगर्भव्याप्त्यपेक्षया लघुभूतेति ग्रन्थकृदाशयः। इयं व्याप्ति-र्वीप्सया ग्रहीतुं न शक्यते इत्यभिप्रायः। इयं व्याप्तिर्वीप्सया कथं ग्रहीतुं न शक्यते इत्यत आह - **सा चे**ति टीका। तथा च साऽन्योन्याभावगर्भा व्याप्तिर्वीप्सया सकलसाधनाधिकरणे साध्यवत्त्वोपस्थापनेऽपि अन्योन्या-भावस्यास्फुरणात् अन्योन्याभावप्रतियोगितानवच्छेदकत्वाज्ञानेऽन्योन्याभावप्रतियोगितानवच्छेदकसाध्य-सामानाधिक[रण्य]रूपा व्याप्तिर्नोपस्थापयितुं शक्यते। एतदेवाह - अन्योन्याभाववाचकपदाभावात्। अत्यन्ता-भावगर्भाऽपि ग्रहीतुं न शक्यते तदुपस्थापकपदाभावात् । ततः किमित्यत आह - **एवं चे**ति टीका। वीप्सायाः सत्त्वे असत्त्वे वा यदि व्याप्तिग्रहानुकूलसहचारमात्रस्यैव ज्ञानं जायते तर्हि किं वीप्सया, यतो वीप्सायां सत्यामपि सहचारज्ञानम् असत्यामपि सहचारज्ञानं तर्हि किं वीप्सया। अत्राशङ्कते - **न चे**ति टीका। अयमेव वीप्सासहितोदाहरणस्य विशेषः यत् वीप्सायाम् असत्यां सर्वस्मिन् साधनाधिकरणे [191 A] साध्यसहचारो-पस्थितिर्नास्ति वीप्सायां सत्यां तु सर्वस्मिन् साधनाधिकरणे साध्यसहचारोपस्थितिर्जायते इत्येव विशेषः । तस्माद् वीप्सादरः कर्तव्य इत्याशङ्कार्थः। समाधत्ते - **सहचारज्ञाने**ति टीका। सर्वस्मिन् साधनाधिकरणे साध्य-सहचारज्ञानत्वेन सहचारज्ञानस्य कारणत्वमिति नोच्यते किन्तु लाघवात् सहचारज्ञानत्वेनैव कारणता, न तु सकलसाधनाधिकरणे साध्यसहचारज्ञानत्वेन कारणता येन वीप्साया आदरः स्यात्। **विशेषणस्ये**ति। **सर्वस्मि**न्निति रूपस्येत्यर्थः। वीप्सायामपीति ग्रन्थहार्दं वर्णयित्वा वीप्सा चेति ग्रन्थस्य हार्दं वर्णयति - **एवं चे**ति टीका। एवं वीप्सायाः कुत्रोपयोग इत्यत आह - **यावदि**ति टीका। यावत्साधनाश्रयाश्रितसाध्यसम्बन्धरूपा या व्याप्तिस्तस्या अपि व्यभिचारव्यावृत्ततया वीप्साबलेनोदाहरणप्रतिपाद्यतया तस्या व्याप्तेः अनुमितिहेतुर्भ(तुत्वं भ)वतु इति

रीत्या वीप्साया उपयोग इति यस्याभ्युपगमस्तं प्रत्याह मूलकारः - **वीप्सा चेति** मूलम्। तद्व्याचष्टे - **योऽपीति** टीका। योऽपीमां व्याप्तिमनुमित्यनुकूलामिच्छति तस्यापि मते तत्पदे वीप्सा व्यर्थैव। तत्पदे वीप्सां विनापि यत्पदवीप्सयैव अशेषसाधनाश्रयाश्रितव्याप्तिलाभसम्भवात् इति कृत्वा तत्पदे वीप्सा व्यर्थेत्यर्थः। पूर्वोक्त-मूलानुपपत्तिमाशङ्कते - **नन्विति** टीका। तथापीति यद् मूलकृतोक्तं प्रथमयत्पदाद् धूमाधिकरणस्य येन रूपेण महानसत्वादिरूपेणोपस्थितिः तद्भिन्नरूपेणैव द्वितीययत्पदस्योपस्थापकत्वमिति तदयुक्तम्। समुदायस्य यत्पदद्वयरूपस्य एकेन रूपेण[१] उपस्थापकत्वमस्तीति विरूपोपस्थितिर्नास्ति, ततो मूलमशुद्धम्। मूलकारेणोक्तं विरूपोपस्थितिरस्तीत्युक्तरीत्या तन्न सम्भवतीति भावः। समाधत्ते - **गौरवेणेति** टीका। लाघवात् प्रत्येक-यत्पदाभ्यामेव प्रत्येकपदार्थोपस्थितौ सत्यां पदद्वयसमुदायस्य एकार्थोपस्थापकत्वे प्रमाणाभावात्, तथा च गौरवं [स्या]दिति भावः। तथा च प्रत्येकं यत्पदद्वयस्य स्वस्वपदार्थे शक्तत्वात् भिन्नभिन्नरूपेण तस्यैवोपस्थापकत्वम्। तथा चोभयत्र धूमवत्त्वेनैकेनैव रूपेणोपस्थितौ सत्यां वीप्साव्युत्पत्तिसहकारिवशाद् व्याप्तिबोध **उपाध्यायमते**। अशेषसाधनेत्यादि व्याप्तिवादिमते प्रथमयत्पदाद् धूमाधिकरणस्य येन रूपेणोपस्थितिः तद्भिन्नाशेषशेष-धूमाधिकरणत्वेन द्वितीययत्पदाद् उपस्थितिः। एवं भिन्नभिन्नरूपेणाशेषधूमाधिकरणोपस्थितौ सत्यां बुद्धिस्था-नामशेषधूमाधिकरणानामेकेनैव तत्पदेनोपस्थितौ सत्यां तत्र वह्निमत्त्वबोधेऽशेषसाधनाश्रयाश्रितसाध्यसम्बन्धरूपा व्याप्तिर्बुध्यत इति द्वितीयमतस्यार्थः। न चैवम्। भिन्नभिन्नेन रूपेणोपस्थितिश्चेत् तदा सकृदुच्चरितस्य पदस्य सकृदन्वयबोधकत्वमिति कृत्वा [191 B] एकस्मात् यत्पदात् एकरूपेणोपस्थितिः तेन रूपेण तत्पदार्थं प्रति धूमवत्पदमन्वितं पश्चाद् द्वितीयेन यत्पदेन पूर्वयत्पदोपस्थापितस्वरूपं परित्यज्य रूपान्तरं द्वितीययत्पदा-दुपस्थितं तेन रूपान्तरेणोपस्थितपदार्थं प्रति धूमवत्पदान्वये आवृत्त्यापत्तिः। यत एकं धूम[वत्]पदमेकेन यत्पदेन सहान्वितम्, द्वितीयं यत्पदं तेन सा[ह] तद् धूमवत्पदमन्वितं न भवति। तस्य धूमवत्पदस्य प्रथमयत्पदेन सहान्वि-तत्वात् द्वितीययत्पदेन सह धूमवत्पदमन्वितं न भवति। यतः सकृदुच्चरितपदस्य सकृदर्थप्रत्यायकत्वनियमात्। अतो घटं पटं चानयेत्यादिवत् आनयेति पदस्य यथाऽऽवृत्तिः तद्वत् धूमवत्पदस्याऽऽवृत्तिप्रसङ्गः। तथा च वाक्यभेदो दोषः। यदाह - सम्भवत्येकवाक्यत्वे वाक्यभेदस्तु दूषणम्। एतद्दूषकताबीजं तु एकवाक्ये लाघवं वाक्यद्वयकल्पने गौरवमिति। तथा च मूलकारेण यदुक्तं पूर्वयत्पदेन एकेन रूपेणोपस्थिति-र्द्वितीययत्पदेन तदितररूपेणोपस्थितिरिति तद् दूषितम्, यतस्तत्राऽऽवृत्त्यापत्तिरेव दोष इति भावः। समाधत्ते - **धूमवत्पदेनेति** टीका। तथा च सकृदुच्चरित[स्य] सकृदर्थप्रत्यायकत्वमयं नियमो नास्ति, यत एकेनापि पदेन नानापदार्थान्वयबोधसम्भवात्। अत एव शब्दखण्डे मूलकृतोक्तं तात्पर्यप्रकरणे - नानार्थात् श्लिष्टात्

१. धूमवत्त्वेन। प्रतौ टिप्पणी।

अनेककारकान्वितैकक्रियापदात् मुख्यलाक्षणिकपराच्च शब्दात् नानाऽऽवृत्तिं विनाऽन्वयबोध इत्युक्त्वाऽनेकार्थप्रतीतीच्छया एकमुच्चारणं भवत्येवेति तत्र सिद्धान्तितम्। तथा च यथा एकं नानार्थपदं यथा सैन्धवपदं नानार्थम्, अन्यच्च श्लिष्टं यथा पृथुकार्तस्वरपात्रमित्यादि। नानार्थश्लिष्टार्थयोरयमेव भेदः - यत्रैकावच्छेदेन नानार्थेषु शक्तिः तन्नानार्थं यथा सैन्धवमानय इत्यादिस्थले सैन्धवत्वावच्छेदेनैव सैन्धवपदस्य अश्वलवणयोः शक्तिमत्त्वम्, श्लिष्टस्य तु भिन्नभिन्नावच्छेदेन शक्तिः एकत्र सुवर्णे पृथुत्वेन कार्तस्वरत्वेन शक्तिः अपरत्र पृथुकत्वेन आर्तस्वरत्वेन च शक्तिः इति भिन्नभिन्नावच्छेदेन शक्तिः। अनेककारकान्वितक्रियापदात् यथा दण्डेन गामानय घटं पटं चानय इति अत्रानेककारकान्वितमेकं क्रियापदम्। मुख्येति यथा गङ्गायां मीन-घोषौ इत्यत्र गङ्गापदं मुख्यपरं मुख्यः प्रवाहः तत्परं लाक्षणिकं तीरं तत्परमपि इत्यत्र सर्वत्राऽऽवृत्तिसहितोऽन्वयबोध इति प्राचां मतम्। नानार्थस्थले यथाऽऽवृत्तिः सैन्धवं पश्य इत्यत्र यत्र वक्त्रा नानार्थपरतया एकं पदमुक्तं तत्र नानार्थपदस्य आवृत्तिर्यथा एकेन सैन्धवपदेन एक एवार्थ उपस्थाप्यते, [192 A] द्वितीयोऽर्थो नोपस्थाप्यते तथा चैकेन सैन्धवपदेन लवणं चेदुपस्थापितं तदा तेन सैन्धवपदेन अश्वबोधे कर्तव्ये सैन्धवपदस्य आवृत्तिः कर्तव्या। आवृत्तिं विनाऽन्वयबोधो न सम्भवतीति प्राचां मतम्। एवं श्लिष्टे पृथुकार्तेत्यादौ एकेन पृथुकार्तस्वरपदेन पृथुं कार्तस्वरमुपस्थापितं तदा पृथुकानाम् आर्तस्वरबोधनार्थं पृथुकार्तस्वरपदस्य आवृत्तिः। एवमनेककारकेत्यत्र घटं पटं च आनय इत्यादौ एकेन आनयपदेन घटेन सहान्वयबोधे पटेन सहान्वयबोध आनयपदस्य आवृत्तिं विना न सम्भवति। **मुख्येति**। गङ्गायां मीन-घोषौ इत्यत्र एकेन गङ्गापदेन प्रवाहं बोधयित्वा मीनान्वयबोधे घोषान्वयबोधार्थं गङ्गापदस्य आवृत्तिः। इति प्राचां **वाचस्पतिमिश्राणां** मतम्। **नवीनमते** आवृत्तिं विनैव अन्वयबोधः। तत्र युक्तिर्यथा सकृदुच्चरितपदस्य सकृदर्थप्रत्यायकत्वनियमे प्रमाणाभावात्, सकृदुच्चरितपदाद् अनेकार्थोपस्थितौ बाधकाभावात्, एकमेव आनयादिपदं स्वार्थोपस्थितिद्वारा घटे पटे चान्वितम् इति आवृत्तिः किमर्थमुपकल्पनीया। एकमपि पदमुभयत्रान्वितं बाधकाभावादिति **मणिकारसिद्धान्तानुरोधेनाह - धूमवत्पदेनेति** टीका। एकेन धूमवत्पदेनोभययत्पदाभ्यां सहान्वयबोधसम्भवात् किमर्थं धूमवत्पदस्योभयत्र आवृत्तिरित्यर्थः। उपसंहरति - **तथा चेति** टीका। तेन धूमवत्पदस्य न आवृत्तिः यत्पदाभ्यां सहान्वये। न त्विदं सिद्धान्तविरुद्धमित्यत आह - **तथाग्रेऽपीति** टीका। अग्रे तात्पर्यग्रन्थे मूलकृता वक्ष्यते यथा नानार्थप्रतीतीच्छया एकपदोच्चारणं सम्भवत्येवेत्यनेन ग्रन्थेनेत्यर्थः। ननु वक्ष्यमाणदूषणात् यो **धूमवान् स वह्निमान्** इत्युदाहरणवाक्यं कथं भविष्यतीत्यत आह - **अत्र चेति** टीका। तथा च यो धूमवान् स वह्निमान् इत्युदाहरणवाक्यं वह्नौ साध्ये धूमे हेतौ न युज्यते एव। कथमित्यत आह - **न हीति** टीका। न हि यो धूमवान् स वह्निमान् इत्यत्र धूमवह्न्योः सामानाधिकरण्यं भासते। कुत इत्यत आह - **धूमस्येति** टीका।

तथा च यो धूमवान् इत्यत्र यत्पदार्थः पर्वतमहानसादिः तस्याधारत्वं, धूमवान् इत्यत्र धूमशब्देन धूम उपस्थापितो वतुप्रत्ययेन तत्संयोग उपस्थापितः तस्य आधेयत्वं प्रतीयते पर्वतादेराधारत्वं प्रतीयते, तथा च पर्वतो धूमवान् इत्यत्र धूमसंयोगनिरूपिताधारः पर्वतः, तथा च यो धूमसंयोगनिरूपिताधारः पर्वतः स वह्निसंयोगाधार इत्येव प्रतीतिर्भवति, ततोऽत्र धूमसंयोग-वह्निसंयोगयोरेव सामानाधिकरण्यं भासते न तु धूमवह्निसामानाधिकरण्यमिति कृत्वा धूमवान् इत्युदाहरणं न युक्तम्। [192 B] यतो वतुप्रत्ययार्थः संयोगः, तेन यत्र धूमसंयोगस्तत्र वह्निसंयोग इति वत् यो धूमवान् स वह्निमान् इत्यपि धूमसंयोगवह्निसंयोगसामानाधिकरण्यमेव पर्यवसन्नम् । तेन धूमवह्निसामानाधिकरण्यं न पर्यवसन्नम्। तथा च धूमवह्न्योर्व्याप्तिबोधो न स्यात् किन्तु धूमसंयोगवह्निसंयोगयोरेव व्याप्तिबोधः स्यात्। तेन यत्र धूमस्तत्र वह्निरित्येवोदाहरणं वाच्यम्। न तु यो धूमवान् स वह्निमान् इति वक्तव्यम् । एवं कृते तत्संयोगयोरेव व्याप्तिबोधः स्यादित्यर्थः। एतदेवाह - **धूमस्ये**ति टीका। धूमवान् इत्यत्र संयोगविशेषणता धूमे प्रतीयते। यत्पदार्थविशेषणता च संयोगे प्रतीयते न तु धूमे, तेन धूमसम्बन्धः पर्वते न प्रतीयते। उपसंहरति - **तस्मादि**ति टीका। तथा च यत्र धूमस्तत्र वह्निः इत्युदाहरणं वक्तव्यम्, न तु यो यो धूमवान् स वह्निमान् इति । प्राचीनमतं दूषयति - **अत्र ब्रूम** इति । **एवमि**ति। यदि यो धूमवान् स वह्निमान् इत्युदाहरणवाक्याद् धूमसंयोगवह्निसंयोगसामानाधिकरण्यमेव भासेत तदा पर्वतो वह्निमान् इति प्रतिज्ञा न स्यात् किन्तु पर्वते वह्निः इति सा स्यात् । न हि पर्वतो वह्निमान् इत्यत्र वह्निर्विधेयः किन्तु वह्निमान् इत्यनेन वह्निसंयोग एव विधेयः तथा च पर्वतो वह्निमान् इति प्रतिज्ञा न स्यात्। दूषणान्तरमप्याह - उपनयोऽपि वह्निव्याप्यधूमवान् अयम् इत्याकारको न स्यात् किन्तु पर्वते वह्निव्याप्यो धूम इत्युपनयः स्यात्। एवं निगमनमपि, तस्माद् वह्निमान् अयम् इति निगमनमपि न स्यात् किन्तु तस्मात् पर्वते वह्निः इत्येव स्यात् । कुतः ? प्रतिज्ञायां वह्नेर्विधेयतया भानाभावात् किन्तु वह्निसंयोगस्य विधेयतया भानात् । एवमुपनयेऽपि पर्वतविशेषणत्वेन धूमस्य भानं नास्ति किन्तु धूमसंयोगस्य। एवं निगमनेऽपि वह्नेर्विधेयतया भानं नास्ति किन्तु वह्निसंयोगस्येति। अत्राशङ्कते - **न चे**ति टीका। तथा च पर्वतो वह्निमान् इति प्रतिज्ञा नास्त्येव। किन्तु पर्वते वह्निः इत्येव प्रतिज्ञा । एवं पर्वते वह्निव्याप्यो धूम इत्येवोपनयः। निगमनमपि तस्मात् पर्वते वह्निः इति आशङ्कार्थः। दूषयति - **कथके**ति टीका। तथा च न हि सर्वत्र न्याये पर्वते वह्निः इति प्रतिज्ञा क्रियते न वा पर्वते वह्निव्याप्यधूम इत्युपनयोऽपि कथकसम्प्रदायविरोधात्। अथ प्रतिबन्द्या समाधानमाह - **यदि चे**ति टीका। तथा च यद्यपि पर्वतो वह्निमान् इति प्रतिज्ञा क्रियते तथापि वह्निसम्बन्धाधेयताप्रतीतौ वह्निसम्बन्धाधेयतायां प्रयोजनाभावेनोभयोर्वादिनोराकाङ्क्षितस्तु वह्निरेवेति तत्रैवाधेयता पर्यवसन्ना इति कृत्वा पर्वतो वह्निमान् इत्येव प्रतिज्ञा इत्यर्थः । तथा च पर्वतो [193 A] वह्निमान् इत्यत्र वह्न्यादिविशिष्ट-सम्बन्धाधेयताप्रतीतौ सम्बन्धस्याधेयतायां प्रयोजनाभावात् वह्निरूपविशेषणांशे एवाधेयता पर्यवसन्ना ।

तथा च पर्वतो वह्निमान् इत्यत्र वह्निसम्बन्धस्य पदार्थत्वेन वह्निसम्बन्धसम्बन्धस्य वाक्यार्थमर्यादया भानेऽपि तस्य प्रयोजनाभावात् वह्नावेव वह्निसम्बन्धेन संयोगेनाधेयता पर्यवसन्ना । तेन पर्वतो वह्निमान् इति प्रतिज्ञा सम्भवत्येव तादृशकथकसम्प्रदायात् इति चेन्मन्यसे तर्हि अत्रापि यो यो धूमवान् इत्युदाहरणवाक्येऽपि तुल्यमेव, अत्रापि धूमवानित्यनेन धूमसम्बन्धसम्बन्धे बोधितेऽपि धूमसम्बन्धसम्बन्धांशे प्रयोजनाभावात् धूमसम्बन्ध एव प्रयोजनम्, तेन धूमसम्बन्धेन संयोगेन धूम एव सामानाधिकरण्यं बोध्यते इत्यर्थः । अयं भावः - **प्राचीनानां** मते यो धूमवान् स वह्निमान् इत्युदाहरणं न सम्भवति किन्तु यत्र धूमस्तत्र वह्निरित्येवोदाहरणम् । — —प्रमुखानां मते यथा पर्वतो वह्निमान् इति प्रतिज्ञा, वह्निव्याप्यधूमवांश्चायमित्युपनयः, तथा यो यो धूमवान् स वह्निमान् इत्यप्युदाहरणं सम्भवत्येव, पूर्वोक्तप्रतिबन्द्या समाधानात् ।

उदाहरणमुक्त्वा उदाहरणाभासमाह - **इदं चे**ति मूलम् । इदमुदाहरणं तद् यदि । विकलपदस्य त्रिष्वन्वयः । तेन साध्यविकलमुदाहरणं तदोदाहरणाभासः यथा यो धूमवान् यथा महानस इति । साधनविकलं यथा स वह्निमान् यथा महानसः । उभयविकलं यथा महानस इत्येव । चतुर्थमाश्रयविकलं यथा यो धूमवान् स वह्निमान् महानसपदादानात् । **अनुपदर्शितान्वये**ति । एकमनुपदर्शितान्वयम्, अनुपदर्शितव्यतिरेकं वा, सम्भवत्यन्वयेऽनुपदर्शितान्वये सति उपदर्शितव्यतिरेकं वा उदाहरणाभासः इत्येवोदाहरणाभासभेदा द्रष्टव्याः ।

अथ टीका । **इदं चेती**ति टीका । ननु यत्रोदाहरणे साध्यसाधनवैकल्यं ज्ञातं तत्रोभयवैकल्ये एकवैकल्यरूपो दोषस्तिष्ठति किमर्थमुभयवैकल्यदोषाद् दृष्टान्ताभासत्वमुच्यते इत्यत आह - **यद्यपी**ति टीका । **साध्यादी**ति टीका । साध्यवैकल्यं साधनवैकल्यं वा उभयवैकल्येऽस्त्येव तथापि **अत्यन्ते**ति टीका । यद्यप्येकतरवैकल्ये दृष्टान्ताभासो भवत्येव तथाप्युभयवैकल्यं महान् दोषो भवतीति ज्ञापनार्थमुभयविकलोदाहरणमप्युदाहरणाभास एवेत्यर्थः । एतदेवाह - **अत्यन्ते**ति । अत्या(त्य)कौशल्यख्यापनाय तेनापि रूपेण साध्यसाधनवैकल्यरूपेणापि पृथगुद्भावनमेकवैकल्यादिति शेषः । **यथे**ति टीका । यो यो धूमवान् स स वह्निमान् इति रूपं परित्यज्य यथा महानसः इत्येवोच्यते इति । एवं व्यतिरेकानुपदर्शने दृष्टान्तो ह्रद इत्युक्तेऽपि ज्ञेयम् । विपरीतस्योदाहरणमाह - **योऽग्नी**ति । यो धूमवान् सोऽग्निमानिति वक्तव्ये योऽग्निमानित्युक्ते विपरीतत्वमित्यर्थः । अत्र चिन्त्यमाह - अवयवान्तराणि परित्यज्योदाहरणरूपावयव एवोदाहरणाभासत्वं कथमुक्तमिति चिन्त्यमाहेत्यर्थः । इत्युदाहरणग्रन्थः समाप्तः ।

**। उदाहरणनिरूपणं समाप्तम् ।**

## । अवयवप्रकरणे उपनयनिरूपणम् ।

उदाहरणानन्तरं भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्तते न वेत्याकाङ्क्षायां व्याप्तस्य पक्षधर्मत्वप्रदर्शनायोपनयः । तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपनयत्वमिति सामान्यलक्षणम् । साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वं च विशेषलक्षणद्वयम् । उदाहरणान्त एव प्रयोग इति न वाच्यं तृतीयलिङ्गपरामर्शस्य व्याप्तिपक्षधर्मतावगाहिनोऽवयवान्तरादलाभात् तदनभ्युपगमेऽपि पक्षधर्मताया अलाभात् । न च हेतुवचनादेव तदवगमः, तस्य को हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात्, वादिवाक्यादेवाक्षेप इति चेत् । न । तदर्थस्यासिद्धत्वेनानाक्षेपकत्वात्, अन्यथा प्रतिज्ञावाक्यादेव सर्वाक्षेपेऽवयवान्तरविलयात् । प्रतिपाद्यानां स्वत एव तदवगम इति चेत्, न, तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात् प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च, अन्यथावयवान्तरेऽप्येवं प्रसङ्गादिति ।

### । अथ उपनयग्रन्थः ।

ननु उदाहरणानन्तरमुपनयः किमर्थं वक्तव्य इत्यत आह - **उदाहरणानन्तरमिति मूलम्** । उदाहरणानन्तरं भवतु धूमादौ व्याप्तिः परं पर्वते धूमश्चेन्न स्यात् केन साधकेन पर्वते वह्निः साधनीयः इत्याकाङ्क्षायामुपनयप्रयोग इत्यर्थः । एतदेवाह - **व्याप्तमिति मूलम्** । व्याप्तं व्याप्यं किं पक्षे वर्तते न वा इति सन्देहे सति अनुमितिर्न जायते, अतो व्याप्यस्य पक्षधर्मत्वोपपादनायोदाहरणानन्तरमुपनयः कर्तव्य एवेत्याह - **व्याप्तस्येति मूलम्** । **तत्रेति** उपनयलक्षणे कर्तव्ये सामान्यलक्षणमिदमित्यर्थः । तथाहि - **अनुमितीति मूलम्** । अनुमितिकरणं यस्तृतीयलिङ्गपरामर्शस्तज्जनकावयवत्वम् । न च प्रतिज्ञादावतिव्याप्तिरिति वाच्यम्, तत्र तृतीयलिङ्गपरामर्शजनकत्वाभावात् । प्रतिज्ञादीनां न्यायजन्यवाक्यार्थज्ञानद्वारा तृतीयलिङ्गपरामर्शप्रयोजकत्वं वर्तते न तु तज्जनकत्वम् । उपनयेन तु तृतीयलिङ्गपरामर्शः साक्षाज्जन्यत एव । तेन वह्निव्याप्यधूमवान् अयम् इति वाक्यात् वह्निव्याप्यधूमवत्त्वज्ञानं जायते । शब्दरूपोपनयात् परामर्शरूपं शब्दजन्यं [193 B] ज्ञानमुत्पद्यते । यद्यपि उपनयस्यापि चरमलिङ्गपरामर्शे न्यायजन्यवाक्यार्थज्ञानद्वारा प्रयोजकत्वमप्यस्ति तथा च प्रतिज्ञादिवत् एतस्यापि समानं तथापि अत्र चरमलिङ्गपरामर्शो न विवक्षितः किं[तु] अनुमितिकारणा(ण)लिङ्गपरामर्शमात्रम् । वह्निव्याप्यधूमवान् अयम् इति

ज्ञाने परामर्शरूपे यस्यावयवस्य साक्षाज्जनकत्वं तादृशावयवत्वमुपनयत्वम् । अयं भावः । प्रथमं पर्वतो वह्निमत्तया ज्ञातव्य इत्येकं प्रतिज्ञावाक्यजन्यं ज्ञानम् ।१। तदनन्तरं वह्निज्ञानं प्रति धूमज्ञानं हेतुरिति हेत्ववयवजन्यं ज्ञानम् ।२। यो यो धूमवान् स वह्निमान् इत्युदाहरणात् धूमो वह्निव्याप्य इति तृतीयं शाब्दज्ञानम् ।३। चतुर्थं तु वह्निव्याप्यधूमवान् अयम् इति शाब्दरूपज्ञानम् ।४। यो वह्निव्याप्यस्तद्वान् अयम् इति ज्ञानमुपनयजन्यम् । पञ्चमं तु तस्माद् वह्निव्याप्यधूमवत्त्वात् वह्निर्बाधितो नास्तीति निगमनजन्यं ज्ञानम् ।५। एतानि पञ्च खण्ड-वाक्यार्थज्ञानानि । एतैः पञ्चभिर्ज्ञानैः महावाक्यार्थज्ञानमेकं जायते । तथाहि पर्वतीयवह्निज्ञानकारणीभूतं धूमज्ञानं तज्ज्ञानविषयो धूमो वह्निव्याप्योऽबाधितविषयोऽसत्प्रतिपक्षश्चेति न्यायजन्यवाक्यार्थज्ञानम् । तदनन्तरं मानसं ज्ञानम् । तत्र सति मानसे ज्ञाने पश्चात् चरमो लिङ्गपरामर्श उत्पद्यते अबाधितासत्प्रतिपक्षविषयवह्निव्याप्यधूमवान् अयम् इति रूपः, तथा च सर्वेषां चरमलिङ्गपरामर्शप्रयोजकता तिष्ठति तथापि लिङ्गपरामर्शरूपं प्रति साक्षाज्जन-कत्वमुपनयस्यैव सम्भवति नान्येषाम् यतोऽनेन प्रथमो यो लिङ्गपरामर्शः स साक्षादेव जन्यते चरमस्तु तद्द्वारा उप-नयजन्यलिङ्गपरामर्शानन्तरं मानसः परामर्शस्तदनन्तरं चरमो मानसः परामर्शोऽप्रामाण्यशङ्कानिरासार्थमङ्गीक्रियते । अथोपनयविशेषणं दर्शयति - **साध्यव्याप्येति** मूलम् । साध्यव्याप्यविशिष्टो यः पक्षस्तद्बोधकावयवत्वम् अन्वय्युपनयत्वम् वह्निव्याप्यधूमवांश्चायमिति रूपम् । अत्र पक्षबोधकावयवत्वमात्रं प्रतिज्ञायामतिव्याप्तम् । ततस्तद्वारणाय साध्यव्याप्यविशिष्टेति । प्रतिज्ञायां तु साध्यव्याप्यविशिष्टः पक्षो नास्ति । साध्यव्याप्यविशिष्ट-पक्षबोधकत्वं वह्निव्याप्यधूमवानयमित्याप्तवाक्ये गतम्, अतस्तद्वारणाय अवयवपदम् । व्यतिरेक्युपनय-लक्षणमाह - **साध्याभावेति** मूलम् । साध्याभावस्य व्यापको योऽभावः साधनाभावस्तत्प्रतियोगिमत्त्वबोधको योऽवयवस्तत्त्वं व्यतिरेक्युपनयत्वम् । यथा पृथिवी इतरेभ्यो भिद्यते इति प्रतिज्ञा, पृथिवीत्वात् अयं हेतुः, यत्र यत्र इतरभेदाभावस्तत्र पृथिवीत्वाभावो यथा जलम् इत्युदाहरणम्, इतरभेदाभावव्यापकाभावप्रतियोगिपृथिवीत्व-वतीयम् इत्युपनयः । अत्र च प्रतियोगिमत्त्वबोधकावयवत्वमित्युच्यमाने वह्निव्याप्यधूमवानयमित्यन्वय्युप-नयेऽतिव्याप्तिः, धूमाभावस्य प्रतियोगी धूमो भावो भवत्येव तद्वत्त्वबोधकावयवत्वमत्र [194 A] तिष्ठत्येव, तद्वारणाय साध्याभावेति पदम् । वस्तुगत्या योऽभावप्रतियोगी तद्वत्त्वबोधकावयवत्वं यद्यपि तिष्ठति तथापि साध्याभावव्यापकाभावप्रतियोगिमत्त्वबोधकावयवत्वं तत्र नास्ति । अवयवपदमाप्तवाक्येऽतिव्याप्तिवारणाय । ननु उपनयरूपोऽवयवः किमर्थं स्वीकर्त[व्य]ः पक्षधर्मताप्रतिपत्तिरूपप्रयोजनस्य हेतुवाक्यादेव जातत्वात् इत्यत आह - **उदाहरणान्तेति** मूलम् । तथा च अवयवत्रयमेवेति न वक्तव्यम् । कुत इत्यत आह - **तृतीयलिङ्गेति** मूलम् । यदि उपनयरूपोऽवयवो नाङ्गीक्रियते तदा व्याप्तिपक्षधर्मताविशिष्टप्रतिपत्तिः कस्माद् भविष्यति ?, प्रतिज्ञया पक्षलाभेऽपि व्याप्तिपक्षधर्मताविशिष्टहेत्वलाभात् । एतदेवाह - **व्याप्तीति** मूलम् । तृतीयलिङ्ग-

परामर्शस्य व्याप्तिपक्षधर्मतावगाहिनोऽवयवान्तरादलाभात्। ननु मास्तु अवयवान्तरादलाभस्ततः किमित्यत आह - **तदनभ्युपगमे** इति मूलम्। यदि अवयवान्तरात् परामर्शस्य लाभो न भवत्येव उपनयोऽपि चेत् न स्वीक्रियते तदा पक्षधर्मताया अलाभादनुमितिर्न स्यादेव। अत्र शङ्कते - **न चेति** मूलम्। तथा च हेतुवचनादेव पक्षधर्मताया लाभ इत्यर्थः। समाधत्ते - **तस्येति** मूलम्। न हि हेतुवाक्येन पक्षधर्मता प्रतिपाद्यते। तस्य हेत्ववयवस्य को हेतुरित्याकाङ्क्षायां स्वरूपमात्रोपस्थापकत्वात् न पक्षधर्मतोपस्थापकत्वमिति भावः। एतदेवाह - **अतदिति**। हेतोः पक्षधर्मतापरत्वाभावादित्यर्थः। अत्राशङ्कते - **वादिवाक्येति** मूलम्। तथा चाप्तोक्तं यद् द्वारमिति पदमन्वयबोधमलभमानं सत् पिधानरूपोऽर्थ आक्षिप्यते एवमुदाहरणवाक्याद् व्याप्तिर्लब्धा पक्षधर्मतां विना व्याप्तिमत्तया ज्ञायमानमपि व्याप्यं कथं साध्यं साध्येत् इत्यनुपपत्तिसहकृताद् वादिवाक्यादेव क्षेपो भविष्यति किमर्थमुपनय इत्याशङ्कार्थः। समाधत्ते - **तदर्थस्येति** मूलम्। कदाचिद् आप्तवाक्यादाक्षेपो जायते। तत्र चाप्रामाण्यशङ्काया अभावात्। अयं वादी अनुमानकर्ता स तु परस्यानाप्तः तद्वाक्यस्यानाप्तत्वेनाप्रामाण्यशङ्काकवलितत्वेन कथं तस्माद् वादिवाक्यादाक्षेपो भविष्यति। तथा विपक्षे। यदि वादिवाक्यादाक्षेपस्तदेतिरूपे प्रतिज्ञावाक्यादेव हेतोर्व्याप्तिपक्षधर्मत्वयोश्च लाभेऽवयवान्तरविलोपप्रसङ्गात्। पुनराशङ्कते - **प्रतिपाद्येति** मूलम्। व्याप्तिपक्षधर्मताज्ञानमनुमितिजनकत्वेन [न] ज्ञातं येन स वादेऽर्ह एव न भवति। तेन व्याप्तिपक्षधर्मताज्ञानमनुमितिजनकमिति यो जानाति स एव वादेऽर्ह इति कृत्वा यः प्रतिपाद्यो वादी तस्य स्वत एव पक्षधर्मताज्ञानं भविष्यति किमुपनयेनेत्याशङ्कार्थः। समाधत्ते - **तेषामिति** मूलम्। व्युत्पन्नवादिना कदाचित् पक्षधर्मता स्वत एव बुध्यते, अव्युत्पन्नेन तु पक्षधर्मता बोद्धुं न शक्यत इति कृत्वा उपनयोऽवश्यमङ्गीकर्तव्यः इत्यर्थः। ननु अव्युत्पन्नेन सह - येन पक्षधर्मता न ज्ञाता तेन सह - [194 B] विवाद एव नास्ति किन्तु व्युत्पन्नेनैव, तेन चाक्षेपः[1] कर्तुं शक्यत एवेत्यत आह - **प्रतिपादकेनेति** मूलम्। तथा च प्रतिपादकेन यावन्त्यनुमित्यङ्गानि वर्तन्ते तावन्ति सर्वाणि प्रदर्शनीयान्येव पक्षधर्मताज्ञानस्यानुमित्यङ्गत्वात्। अतः प्रतिपादकव्यापारत्वात् प्रतिपादकेनावश्यमुपनयो वक्तव्य एव। यदि चाक्षेपादेव पक्षधर्मतायाः लाभो भविष्यति किमर्थमुपनय इति तदा व्याप्त्यादेरप्याक्षेपाद् उदाहरणमपि व्यर्थं स्यादित्यर्थः। इत्यत आह - **अन्यथेति** मूलम्। **अवयवान्तरेति** मूलम्। उदाहरणाद्यवयवान्तरेऽपि आक्षेपाद् व्याप्तिलाभे वैयर्थ्यं स्यादिति भावः। उपनयग्रन्थमूलार्थः समाप्तः।

अथोपनयग्रन्थे टीका यथा। ननु उपनयवाक्यात् जायमानं ज्ञानं तृतीयलिङ्गपरामर्श एव न भवति। तृतीयलिङ्गपरामर्शस्य मानसज्ञानोत्तरकालीनत्वादित्यत आह - **अनुमितिकरणेति**। तथा चानुमितिकरणं यो

---

१. पक्षधर्मतायाः। प्रतौ टिप्पणी।

व्यापारो मानसज्ञानोत्तरकालीनतृतीयलिङ्गपरामर्शस्तत्समानाकारं व्याप्तिपक्षधर्मतावगाहितया समानाकारं यत् ज्ञानम् उपनयवाक्यजन्यं ज्ञानं परामर्शरूपं भवत्येव तदेव परामर्शशब्देन विवक्षितम्। ननु अनुमितिकारणीभूतस्तृतीयलिङ्गपरामर्शः, तस्योपनयः कारणं न भवति परमेतादृशमेव मानसं ज्ञानं कारणम्। अत्राशङ्कते - **यद्यपी**ति टीका। निगमनेऽपि तस्मादिति तच्छब्देन व्याप्तिपक्षधर्मावुच्येते इति कृत्वाऽनुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वं तत्रापि वर्तते इति कृत्वा निगमनेऽतिव्याप्तिः। एतदेवोपपादयति - **तच्छब्देने**ति टीका। [195 A] तच्छब्दस्य बुद्धिस्थवाचकत्वात्। बुद्धिस्थे तु व्याप्तिपक्षधर्मते, तदवगाहित्वं निगमनेऽस्तीति भावः। समाधत्ते - **तथापी**ति टीका। तद् ज्ञानं व्याप्तिपक्षधर्मतावगाहि ज्ञानं कीदृशं विवक्षितम्? यत्साध्यव्याप्यविशेषणेति। साध्यस्य यद् व्याप्यं हेतुरूपं तद् विशेषणं यस्य, यथा पक्षविशेष्यकहेतुविशेषणकं यद् ज्ञानं तदेव विवक्षितम्, निगमनं चैतादृशं न भवति। निगमने वह्निव्याप्यो धूमो न पर्वतस्य विशेषणं किन्तु पर्वतस्य विशेषणं वह्निः, तस्माद् वह्निव्याप्यधूमात् वह्निमानयमिति निगमनम्, निगमने पर्वतांशे वह्निर्विशेषणं तस्य विशेषणं धूम उपनये तु साक्षात् पक्षस्यैव विशेषणं व्याप्यो धूम इति निगमने परामर्शसमानाकारज्ञानजनकत्वमेव नास्ति, कुत्रातिव्याप्तिरित्यर्थः। उत्तरग्रन्थं योजयितुमाभासमाह - नन्विति। परेषां **प्राभाकराणां** मते यतस्तन्मते व्याप्यतावच्छेदकप्रकारकं व्याप्तिज्ञानम्, व्याप्यतानवच्छेदकप्रकारकं पक्षधर्मताज्ञानमेव जनकं न तु व्याप्तिप्रकारकं पक्षधर्मताज्ञानमित्यर्थः। तल्लाभायेति उपनयलाभायेत्यर्थः। तथा च यद्यपि **प्राभाकराणां** मते व्याप्तिपक्षधर्मतोभयवैशिष्ट्यावगाहिज्ञानं कारणं नास्ति तथापि पक्षधर्मताज्ञानं तु कारणं वर्तत एवेति पक्षधर्मताप्रदर्शनाय उपनयः स्वीकार्य एवेत्यर्थः। इदमेवाह - **तथा चे**ति टीका। उदाहरणेन व्याप्त्यामवगतायां सत्यां पक्षधर्मताबोधनार्थमवश्यमुपनयः कर्तव्य एवेत्यर्थः। ननु तथापि धूमवान् अयम् इत्येवोपनयः कर्तव्यो न तु वह्निव्याप्यधूमवान् अयम् इति, व्याप्तिप्रदर्शनं किमर्थम्?, व्याप्तेस्तु उदाहरणेन प्रतिपादितत्वात्, व्याप्तिपक्षधर्मतोभयवैशिष्ट्यावगाहिज्ञानं तु कारणमेव न भवति, किमर्थं वह्निव्याप्येत्यंश उपनये इत्यत आह - **व्याप्तिविशिष्टे**ति टीका। तथा च धूमवान् इत्येव उपनयप्रयोग इत्यर्थः। समाधत्ते - **तच्चे**ति टीका। यतस्तृतीयलिङ्गपरामर्शस्य कारणत्वं व्यवस्थापितं ततो व्याप्तिपक्षधर्मतोभयवैशिष्ट्यप्रतिपादनाय पक्षधर्मताऽ(व्याप्तिर)पि प्रतिपादनीयैवेत्यर्थः। त्वयोक्तं व्याप्तिप्रदर्शनं किमर्थमिति तन्निरस्तमित्यर्थः। इत्युपनयग्रन्थटीका समाप्ता।

**। अवयवप्रकरणे उपनयनिरूपणं समाप्तम्।**

## । अवयवप्रकरणे निगमननिरूपणम् ।

**उपनयानन्तरं निगमनं तच्चानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणव्याप्ति-पक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम् । न च व्याप्ति-पक्षधमतयोश्चतुर्भिरेवावयवैः पर्याप्तेः किंतेनेतिवाच्यम्।अबाधितासत्प्रतिपक्षितत्वयोरलाभेचतुर्णामप्यपर्यवसानात् ।**

**। अथ निगमनग्रन्थः ।**

मूलम् । उपनयानन्तरं निगमनलक्षणमाह - **तच्चेति** मूलम् । **अनुमितीति** मूलम् । अनुमितिहेतुर्यो लिङ्गपरामर्शस्तस्य प्रयोजकं यच्छाब्दज्ञानं तस्य कारणम् एतादृशी या व्याप्तिपक्षधर्मताधीप्रयुक्ता साध्यधीः तज्जनकं वाक्यं निगमनम्, यथा तस्माद् वह्निमान् इत्येतस्मिन् निगमने वर्तते । तथाहि अनुमितिहेतुर्यो लिङ्ग-परामर्शः चरमलिङ्गपरामर्शो मानसज्ञानानन्तरं योऽबाधितत्वाऽसत्प्रतिपक्षत्वज्ञानकालीनव्याप्तिपक्षधर्मता-ज्ञानरूपः [195 B] यथा अबाधितासत्प्रतिपक्षितवह्निव्याप्यधूमवान् अयम् इति रूपः तस्य प्रयोजकं यन्न्याय-जन्यं शाब्दज्ञानं पञ्चावयववाक्यजन्यं यच्छाब्दज्ञानं तस्य कारणं यत्, अथ व्याप्तिपक्षधर्मताधीप्रयुक्ता या साध्यधीः वह्निव्याप्यधूमवत्त्वज्ञानप्रयोज्या या वह्निमत्त्वधीः तज्जनकं यद् वाक्यं तस्माद् वह्निमान् इति एवं रूपम् इदं निगमनम् । कारणान्तं विशेषणं तस्माद् वह्निमान् इत्याप्तवाक्येऽतिव्याप्तिवारणाय, तत्र पूर्वोक्तरीत्याऽ-नुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणत्वं नास्ति। उत्तरदलमवयवान्तरेऽतिव्याप्तिवारणाय। अवयवान्तरे व्याप्तिपक्षधर्मताधीप्रयुक्तसाध्यधीजनकवाक्यत्वं नास्ति। उपनयवाक्ये यद्यपि व्याप्तिपक्षधर्मताविषयत्वं वर्तते यथा वह्निव्याप्यधूमवांश्चायमिति रूप उपनयः तथापि तत्र व्याप्तिपक्षधर्मताधीप्रयुक्तसाध्यधीजनकवाक्यत्वं नास्ति। सा तु धीर्वह्निव्याप्यधूमवत्त्वाद् वह्निमान् इति रूपा तज्जनकवाक्यत्वं निगमने(उपनये) नास्ति। कुतः? वह्निव्याप्यधूमवत्त्वाद् वह्निमान् इत्येवं यद् ज्ञानं तदुपनयवाक्याद् न जायते, तत्तु निगमनवाक्यादेव जायते इति अवयवान्तरव्यावृत्तिः । अत्राशङ्कते मूले - **न चेति** । तथा च प्रतिज्ञाहेत्वोर्यद्विषयिकाऽनुमितिर्जायते तत्साध्य-प्रतिपत्तिद्वारा उपयोगः। हेतुवाक्यस्य तु कोऽत्र हेतुरिति हेतूत्थापनद्वारा उपयोगः। उदाहरणोपनययोस्तु व्याप्ति-पक्षधर्मताज्ञानद्वारा उपयोगः। तथा च चतुर्णामप्यवयवानां तत्तदनुमित्यङ्गप्रतिपत्तिद्वाराऽस्त्युपयोगः। निगमनस्य तु न कोऽप्युपयोग इत्याशङ्कार्थः। समाधत्ते - **अबाधितेति** मूलम्। हेतौ अबाधिताऽसत्प्रतिपक्षत्वं चेन्न लब्धं तदाऽनुमितिर्न जायते इति अबाधितासत्प्रतिपक्षत्वयोरलाभे चतुर्णामप्यवयवानां निष्प्रयोजनत्वात् निगमनस्या-बाधितासत्प्रतिपक्षत्वज्ञानद्वारा उपयोगः ।

अथ टीका। कारणान्तस्य कृत्यमाह - **अत्रेति** टीका। निगमनलक्षणे। ननु व्याप्तेः शाब्दज्ञानकारणत्त्वमेव

नास्तीति कथं विशेषणमित्यत आह - **साध्यधीविशेषणमि**ति टीका। तथा चायं समासः। अनुमितिहेतुलिङ्ग-परामर्शप्रयोजकशाब्दज्ञानकारणं या व्याप्तिपक्षधर्मताधीप्रयुक्ता साध्यधीस्तज्जनकवाक्यत्वमित्यर्थः। तथा च व्याप्तेर्यद्यपि शाब्दज्ञानकारणत्वं नास्ति तथापि व्याप्तिपक्षधर्मताधीप्रयुक्तसाध्यधियो जनकत्वमस्त्येवेति नोक्तदोषः इत्यर्थः। व्याप्तीत्यारभ्योत्तरदलप्रयोजनमाह - **प्रतिज्ञे**ति टीका। तथा च प्रतिज्ञायामनुमिति-हेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणत्वं वर्तते इति कृत्वा कारणान्तमात्रोपादाने प्रतिज्ञायामतिव्याप्तिः, तद्वारणाय व्याप्तीत्यादि उत्तरदलम्। ननु व्याप्तिपक्षधर्मताधीप्रयुक्तसाध्यधीजनकत्वं कथं निगमनवाक्य-स्यास्तीत्याह - **साध्यधीरि**ति टीका। पर्वतो वह्निमान् इति प्रतिज्ञायां [196 A] वह्निमत्तया पर्वतो ज्ञातव्य इति ज्ञानलक्षणा, तथा निगमनवाक्येऽपि बह्निव्याप्यधूमवत्त्वादित्यत्रापि धूमज्ञानमुपस्थितम् तथा च व्याप्तिपक्षधर्मता-विशिष्टहेतुज्ञानात् पर्वतो वह्निमत्तया ज्ञातव्य इति ज्ञानलक्षणा निगमनेऽप्युचिता। तथा च यदि वह्निज्ञाने लक्षणा जाता तदा व्याप्तिपक्षधर्मताधीप्रयुक्तसाध्यधीर्जातैवेति, यतो वह्निव्याप्यो धूमो ज्ञातोऽतः पर्वतोऽपि वह्निमत्तया ज्ञातव्य इति व्याप्तिपक्षधर्मताधीप्रयुक्ता साध्यधीर्भवत्येवेत्यर्थः।

**अथाभिधानाभिधेययोर्व्याप्तिपक्षधर्मतावल्लिङ्गप्रतिपादनादेव पर्यवसानेनावय-वान्तराणां निराकाङ्क्षत्वं विपरीतशङ्कानिवृत्तेरपि तत एव लाभात् अन्यथा निगमनेनापि तदवारणात्, न हि तत् विशेषदर्शनमनादृत्यैव तन्निवर्तकम्। सिद्धनिर्देशतया वारयतीति चेत्। न। स्वरूपमात्राभिधानात् साध्यत्वानुपस्थितौ तस्मादिति हेतुविभक्त्यनन्वय-प्रसङ्गाच्चेति चेत्। न। व्याप्तिपक्षधर्मताज्ञानेऽपि बाधसत्प्रतिपक्षबुद्धेः साध्यज्ञानानु-त्पत्तिदर्शनात् तदभावाबोधने समीहितानिर्वाहात्। अथ बाधादिविरहस्य प्रयोजकत्वं न तु तद्बोधस्य मानाभावात् असिद्धेश्च इति किमर्थं बाधादिविरहो बोधनीय इति चेत्। न। यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः। न चानन्वयः, तस्मादित्यन्वयबलात् एव हेत्वनाकाङ्क्षितत्वलक्षणसिद्धत्वज्ञानात् न त्वन्वयात् प्राक्।**

अथ निगमनस्य वैयर्थ्यमाशङ्कते - **अथे**ति मूलम्। प्रतिज्ञादीनां चतुर्णामप्यवयवानां तावत्पर्यन्तमाकाङ्क्षा यावत्पर्यन्तं व्याप्तिपक्षधर्मतयोर्ज्ञानं न कृतम्। अथ च यद्रूपावच्छिन्नत्वेन ज्ञातस्य लिङ्गस्यानुमितिजनकत्वं तादृशं लिङ्गं यावत्पर्यन्तं न प्रतिपादितं न ज्ञातं तावत्पर्यन्तमाकाङ्क्षा। प्रकृते चोपनयपर्यन्तावयवैः व्याप्तिपक्षधर्मता-विशिष्टं लिङ्गं चेत् प्रतिपादितं तदा व्याप्तिपक्षधर्मतयोर्ज्ञानमपि सिद्धम् अथ च लिङ्गस्यापि ज्ञानं सिद्धमेव, किं

निगमनरूपेणावयवेनेत्याशङ्कार्थः । अक्षरयोजना तु अभिधानशब्देन व्याप्ति[पक्ष]धर्मताज्ञानं सङ्केतात् । अभिधेयं यद्रूपावच्छिन्नस्य लिङ्गस्य ज्ञानमनुमितिहेतुः इदमत्राभिधेयम् । अयमर्थः । अभिधानशब्देन व्याप्ति-पक्षधर्मतयोर्ज्ञानम् । अभिधेयशब्देन लिङ्गतावच्छेदकावच्छिन्नं लिङ्गज्ञानम्, एवं च धूमत्वेन रूपेण धूमज्ञानम् अन्यथा द्रव्यत्वेन रूपेण व्यभिचारिज्ञानादनुमितिर्न जायत इति । तथा च तादृशाभिधानाभिधेययोर्व्याप्ति-पक्षधर्मताविशिष्टलिङ्गप्रतिपादनादेव पर्यवसानेन सिद्धत्वेन यथा घटपटोभयगोचरज्ञानात् घटज्ञानपटज्ञानयोः पर्यवसानात् घटपटोभयसमूहालम्बनज्ञाने पुरुषस्य घटज्ञानेऽप्यपेक्षा न जायते पक्ष(ट)ज्ञानेऽप्यपेक्षा न जायते तद्वत् प्रकृते व्याप्तिपक्षधर्मताविशिष्टं लिङ्गं चेद् ज्ञातं तदा व्याप्तिज्ञानान्तरेऽपेक्षा पुरुषस्य नास्ति लिङ्गज्ञानेऽप्यपेक्षा नास्ति, तथा चानुमितिसामग्र्याः सर्वस्या जातत्वात् अवयवान्तराणां निराकाङ्क्षत्वम् अवयवान्तरस्यापेक्षा नास्तीत्यर्थः । एवं च सति निगमनं व्यर्थमिति भावः । ननु पक्षे वह्न्यभावोऽपि भविष्यतीति विपरीतशङ्कानिवृत्त्यर्थं निगमनमपेक्षितमित्यत आह - **विपरीतेति** मूलम् । विपरीतशङ्कानिवृत्तिरपि पूर्वकृतचतुर्भिरवयवैर्भविष्यतीति किमर्थं निगमनम् । **अन्यथेति** मूलम् । यदि पूर्वेभ्योऽवयवेभ्यो विपरीतशङ्कानिवृत्तिर्न भवेत् तदा निगमनेनापि न भवेत् । न हि पूर्वावयवापेक्षया निगमने कोऽपि विशेषः इत्यर्थः । निगमनेन या विपरीतशङ्का वारणीया सा विशेषदर्शनमुद्रयैव वारणीया, विशेषदर्शनमुद्राव्यतिरेकेण विपरीतशङ्कानिवर्तनं न भवति । [196 B] तथा च विशेषदर्शनविधया निवर्तनं वक्तव्यम् । तच्चोपनयेऽपि तुल्यमस्तीत्यर्थः । एतदेवाह - **न हीति** मूलम् । अत्र शङ्कते - **सिद्धनिर्देशतयेति** मूलम् । तथा च प्रतिज्ञादौ उदाहरणे वा, प्रतिज्ञायां वह्नेः साध्यतया निर्देशः निगमने तु सिद्धतया निर्देशः । ततः सिद्धनिर्देशेन वह्नेर्विपरीतशङ्कानिवृत्तिर्भवतीत्याशङ्कार्थः । दूषयति - **स्वरूपेति** मूलम् । निगमने तस्माद् वह्निमान् इत्येव रूपे स्वरूपमात्रमेवावगम्यते न तु तस्य सिद्धत्वं तद्वाचकपदाभावात् । अथ च यदि वह्नेः सिद्धत्वेनोपस्थितिः तदा तस्मादित्यस्यानन्वय एव स्यात्, यतः सिद्धत्वेनोपस्थिते हेत्वाकाङ्क्षाया अभावात् । इत्युक्तयुक्त्या निगमनं व्यर्थमेवेत्यर्थः । अथेत्यारभ्य निगमने पूर्वपक्षग्रन्थः । सिद्धान्तयति - **व्याप्तीति** मूलम् । तथा चोक्तचतुर्भिरवयवैर्व्याप्तिपक्षधर्मताज्ञाने विद्यमानेऽपि बाधस्तत्प्रतिपक्षितत्वज्ञाने विद्यमानेऽनुमितिर्न जायते । तयोर्ज्ञानं यथाऽत्र वह्निर्नास्तीति आप्तवाक्यादिना बाधज्ञानम्, सत्प्रतिपक्षो यथा वह्न्यभावव्याप्यपाषाणवत्त्ववान् अयमिति ज्ञाने विद्यमानेऽनुमितिर्न जायते इति कृत्वाऽबाधितत्वाऽसत्प्रति-पक्षितत्वबोधनाय निगमनमवश्यमपेक्षितव्यम् । एतदेवाह - **तदभावेति** मूलम् । बाधसत्प्रतिपक्षितत्वाभावाबोधने चतुर्णामप्यवयवानां समीहिता याऽनुमितिस्तदनिर्वाहात् । अत्राशङ्कते - **अथेति** मूलम् । अबाधितत्वमसत्प्रति-पक्षितत्वं च किमर्थं बोधनीयम्, अनुमितावबाधितत्वादिज्ञानस्य कारणत्वे प्रमाणाभावात् । नन्वेवं बाधे सत्यनुमितिः स्यादिति चेन्न, बाधादिज्ञानाभावस्य कारणत्वं न तु अबाधितज्ञानस्य । न चैतयोरैक्यमिति वाच्यम् ।

अघटज्ञानम् अथ च घटज्ञानाभाव इदं द्वयं भिन्नमेव। आद्यं गुणपदार्थः, द्वितीयम् अभावपदार्थः इति तयोर्भेदात्। अथेत्यारभ्य बोधनीयमिति पर्यन्तमाशङ्कार्थः। समाधत्ते - **यद्ज्ञाने(यदवगमे) सती**ति मूलम्। यद्ज्ञाने सति यन्न भवति तत् तदभावज्ञानसाध्यमिति, यथा अप्रामाण्यज्ञाने सति बहुवित्तव्ययायाससाध्या प्रवृत्तिर्न जायते इति कृत्वा सा प्रवृत्तिरप्रामाण्याभावज्ञानसाध्या। तद्वत् प्रकृते बाधज्ञाने सत्प्रतिपक्षज्ञाने च सति अनुमितिर्न जायते इति कृत्वा बाधाभावज्ञानासत्प्रतिपक्षितत्वज्ञानसाध्याऽनुमितिर्भवति। तथा च बाधाभावज्ञानमसत्प्रतिपक्षितत्वज्ञानं चावश्यमनुमितिकारणं मन्तव्यम्। पूर्वोक्तं तस्मादित्यनन्वयदोषमुद्धरति - **न चे**ति मूलम्। यदि तस्मादित्यस्य हेतोरन्वयात् पूर्वं चेत् वह्नेः [197 A] सिद्धत्वज्ञानमुच्येत तदाऽनन्वयो भवति। वह्नेः सिद्धत्वज्ञाने विद्यमाने हेतोरन्वय एव नास्ति किन्तु हेतोरन्वये ज्ञाते पश्चात् हेत्वनाकाङ्क्षितत्वरूपं सिद्धत्वज्ञानं भवति। तथा च हेतोरन्वये निश्चिते हेत्वनाकाङ्क्षितत्वरूपं सिद्धत्वज्ञानं तस्मिन् चाबाधितत्वज्ञानं भवत्येव। एतदेवाह - **न त्वि**ति मूलम्। हेत्वन्वयात् पूर्वं सिद्धत्वज्ञानं नास्तीत्यर्थः।

अथ टीका। **प्रतीतेरि**ति टीका। अन्यथा प्रतीतिव्यतिरेकेण शब्दरूपावयवानां का पर्याप्तिरित्यर्थान्तराभावादनन्वयः स्यादित्यर्थः। नन्वपर्यवसानमपि शब्दरूपावयवानां किमित्यत आह - साकाङ्क्षत्वादित्यर्थः इति। तथा चावयवाङ्गीकारः साकाङ्क्षत्वनिमित्तक एवेत्यर्थः। नन्वथेति मूलेऽभिधानशब्देन पदमुच्यते, अभिधेयशब्देन पदार्थः पदशक्योऽर्थः। तयोः पर्यवसानं प्रकृते किञ्चिन्नास्त्येव। चतुर्ष्वप्यवयवेषु किं शब्द-शब्दार्थयोः पर्यवसानम्? शब्दात् शब्दार्थबोधो जात इति। ततः किम्? निगमनस्य नानेन वैयर्थ्यमिति भावः इत्यत आह - **व्याप्त्यादी**ति टीका। तथा चाभिधानस्यायमर्थः व्याप्तिपक्षधर्मतयोरनुभवस्तज्ज्ञानमिति यावत्। लिङ्गपदं स्वरूपाभिप्रायेण। तथा चाभिधानशब्देन व्याप्तिपक्षधर्मताज्ञानमिति अर्थः। अभिधेयशब्दस्यार्थमाह - **तथाभूते**ति टीका। व्याप्तिपक्षधर्मते यद्रूपावच्छिन्ने वर्तेते तद्रूपावच्छिन्नं ज्ञायमानं लिङ्गमिति यावत्। यथा व्याप्तिरपि धूमत्वेन रूपेण पक्षधर्मताऽपि धूमत्वेन रूपेण ततो धूमत्वावच्छिन्नं धूमज्ञानमिति यावत्। तथा चानुमितौ यानि व्याप्तिज्ञानपक्षधर्मतज्ञानलिङ्गज्ञानादीनि कारणानि तानि सर्वाणि व्याप्तिपक्षधर्मताविशिष्टलिङ्गज्ञाने सति सिद्धान्येवेति किं निगमनेनेति आशङ्कार्थः। ननु तथापि निगमनेन विनाऽवयवचतुष्टयस्य साकाङ्क्षत्वमेवेति। ततो निरा[काङ्]क्षत्वार्थं निगमनमवश्यमपेक्ष्यत इत्यत आह - **आकाङ्क्षा ही**ति टीका। तथा चाकाङ्क्षा चतुर्ष्वप्यवयवेषु नास्ति। आकाङ्क्षा हि द्विविधा - एका अभिधानापर्यवसानलक्षणा आकाङ्क्षा। द्वितीया चाभिधेयापर्यवसानलक्षणा। द्वयोरुदाहरणमाह - **द्वारमि**ति। यथा द्वारमित्येतावत्युक्ते एकस्य पदस्याननुभावकत्वात् द्वारपदस्य पिधेहीत्यनेन साकाङ्क्षत्वं तथा चेदमभिधानापर्यवसानम्। द्वितीया यथा विश्वजितेति विश्वजिद्यागेन यजेत इत्यत्राधिकारिज्ञानं स्वर्गकामज्ञानं यावत्पर्यन्तं ज्ञातं नास्ति तावत्पर्यन्तं वाक्यस्यापर्यवसानमेव। तथा

चाभिधानाभिधेययोरिदमेव नामान्तरमुपकार्योपकारकत्वम् । उपकार्यमभिधेयं तथाभूतं ज्ञायमानं लिङ्गमिति यावत् । अभिधानं व्याप्तिपक्षधर्मताज्ञानमुपकारकम् । तयोश्च प्रकृते पर्यवसानात् तेनोभयविधाऽप्याकाङ्क्षा नास्तीति कृत्वा किमर्थं [197 B] तदुभयाभावे च कथं चतुर्णामवयवानां साकाङ्क्षत्वं स्यादित्यर्थः । उत्तरग्रन्थ-योजनार्थमाभासमाह - **नन्विति** टीका । यावत्पर्यन्तं पक्षे साध्यविपरीतशङ्का निवृत्ता नास्ति तावत्पर्यन्तमभिधेयं व्याप्तिपक्षधर्मताविशिष्टलिङ्गज्ञानं ज्ञायमानं लिङ्गं वा तत्पर्यवसन्नं नास्ति । एतदेवाह - **न हीति** टीका । न हि संभवति पक्षे साध्याभावोऽथ साध्यव्याप्तिपक्षधर्मताविशिष्टं लिङ्गम्, इदं न संभवति द्वयोरेतयोर्विरुद्धत्वात् । ततः किमित्यत आह - **तथा चेति** टीका । अभिधानाभिधेययोर्मध्ये अभिधेयस्यापर्यवसन्नत्वात् चतुर्णामप्यवयवानां साकाङ्क्षत्वात् तन्निवृत्तये निगमनमवश्यं वक्तव्यमित्याभासार्थः । **साध्येति** टीका । पक्षे साध्यविपरीतशङ्का साध्याभावशङ्का इत्यर्थः । सा केन निवर्त्येत्यत आह - **साध्येति** टीका । साध्यसत्त्वोपदर्शको यः प्रतिज्ञा-लक्षणोऽवयवः तस्मादेव साध्यशङ्कानिवृत्तिर्भविष्यति, किं निगमनेन ? अन्यथेत्यस्य व्याख्यामाह - **प्रतिज्ञेति** टीका । यदि प्रतिज्ञालक्षणोऽवयवः साध्यसत्त्वोपदर्शकः स चेद् विपरीतशङ्कानिवर्तको न भवति तदा साध्य-सत्त्वोपदर्शकस्य निगमनस्यापि विपरीतशङ्कानिवर्तकत्वं न स्यादित्यन्वयेत्यारभ्य शङ्कार्थः । न हीत्यस्य व्याख्यानमाह - **न हीति** टीका । विशेषदर्शनेनेत्यस्य व्याख्यानमाह - **पक्षेति** टीका । तथा च निगमनमपि पक्षनिष्ठसाध्यसत्त्वोप-दर्शकत्वात् विपरीतशङ्कानिवर्तकं वक्तव्यम् । न तु तद्रूपं पक्षनिष्ठसाध्यसत्त्वोपदर्शकत्वलक्षणं रूपं परित्यज्य शङ्कानिवर्तकम् । तथा च प्रतिज्ञाया एव साध्यसत्त्वोपदर्शकत्वात् विपरीतशङ्कानिवर्तकत्वमस्तीत्यर्थः । **प्रतिज्ञेति** टीका । तथा च प्रतिज्ञायां न सिद्धनिर्देशः । तथा च साध्यनिर्देशकस्य न विपरीतशङ्कानिवर्तकत्वं किन्तु सिद्ध-निर्देशकस्यैवेति निगमनस्य तदुपदर्शकत्वात् सार्थकत्वमिति भावः । एतदेवाह - **पक्षनिष्ठेति** टीका । तथा च प्रतिज्ञानिगमनयोः पक्षनिष्ठसाध्यसत्त्वोपदर्शकत्वस्याविशेषे विद्यमानेऽपि निगमनं सिद्धत्वोपदर्शकत्वेन विपरीत-शङ्कानिवर्तकं भविष्यति, प्रतिज्ञा तु सिद्धत्वोपदर्शिका न भवतीति प्रतिज्ञा विपरीतशङ्कानिवर्तिका न भवतीति निगमनस्य सिद्धिरेवेति भावः । इदं दूषयति - **स्वरूपेति** टीका । तात्पर्यमाह - **सिद्धत्वेति** टीका । निगमनमपि सिद्धत्वज्ञापनद्वारा विपरीतशङ्कानिवर्तकं तदा स्यात् यदि निगमने सिद्धत्वप्रतिपादकपदं किञ्चित् स्यात्, तच्च नास्तीति । किन्तु साध्यविशिष्टपक्षमात्राभिधायकत्वमेव निगमनस्य यथा वह्निव्याप्यधूमवत्त्वात् वह्निमानयमिति । न चात्रापि साध्यत्वोपदर्शकपदाभावात् कथं साध्योपदर्शकत्वमिति वाच्यम् । हेतौ हेतुत्वेनोपस्थिते सति तदन्वयप्रतियोगितया साध्यत्वस्य संसर्गविधयोपस्थितिः । ननु साध्यत्वोपस्थापकपदाभावात् साध्यत्वानुपस्थितौ सिद्धत्वेनैवोपस्थितिः [198 A] कल्पनीया इत्यतो यन्मूलकृतोक्तं साध्यत्वानुपस्थिताविति तद् योजयति - **प्रत्युतेति** टीका । यदि निगमने साध्यतयोपस्थितिर्नास्ति तदा तस्मादिति हेतुविभक्त्यर्थस्यानन्वय एव स्यात्, यतः

सिद्धत्वेनोपस्थिते हेतोरपेक्षा एव न स्यादिति भावः । निगमनेऽपि यदि सिद्धनिर्देशकत्वं तदा प्रतिज्ञायामपि सिद्धनिर्देशापत्तौ प्रतिज्ञयैव विपरीतशङ्कानिवृत्तौ निगमनस्य वैयर्थ्यमेव स्यादित्यर्थः । तदभावाबोधने समीहिता-निर्वाहादिति मूलं व्याचष्टे - **समीहिते**ति टीका । समीहितम् उद्देश्या या परस्यानुमितिः तदुत्पादानिर्वाहात् । अयमर्थः - यावत्पर्यन्तमबाधितत्वमसत्प्रतिपक्षत्वं च न बोधितं तावत्पर्यन्तं परस्य यं प्रति अनुमितिः क्रियते तस्यानुमितिर्नोत्पद्यते बाधज्ञानस्य प्रतिबन्धकत्वात् । ततः किमित्यत आह - **तथा चे**ति टीका । तथा च तात्पर्यविषयीभूतं यदबाधितासत्प्रतिपक्षत्वे तदन्वितो योऽर्थः तस्य यदभिधानापर्यवसानं सैवावयवान्तराणा-माकाङ्क्षा, तथा चावयवान्तराणां साकाङ्क्षत्वान्निगमनमवश्यं वक्तव्यमेवेति भावः । ननु बाधादिविरहस्य न प्रयोजकत्वं जनकजनकत्वलक्षणम्, बाधाभावस्यानुमितिं प्रति साक्षाज्जनकत्वात्, इत्यत आह - **अनुमिती**ति टीका । न ह्यत्र जनकजनकत्वलक्षणं प्रयोजकं विवक्षितम्, किन्त्वनुमितिजनकत्वमेव विवक्षितम्, तथा च नोक्तदोषः । असिद्धेश्चेति मूलं व्याचष्टे - **तेने**ति टीका । अबाधितत्वादिज्ञानेन विनापि स्वार्थानुमितेर्दृष्टत्वात् स्वार्थानुमितौ तस्य व्यभिचारात् परार्थानुमितावप्यबाधितत्वज्ञानं न कारणमित्यर्थः । सिद्धान्तग्रन्थे यदवगम इति मूलं व्याचष्टे - **यदवगम** इति टीका । ननु यद्ज्ञाने सति यन्न भवति तत् तदभावज्ञानसाध्यमिति व्याप्तिर्नास्ति । कथम् ? घटाभावज्ञाने सति घटप्रत्यक्षं न जायते इति कृत्वा । न च घटज्ञानसाध्यं घटज्ञानं यतो घटाभावाभावो घटस्तज्ज्ञानसाध्यं घटज्ञानमिति व्यभिचार इत्यत आह - **अयं चे**ति टीका । अयं च नियमः प्रत्यक्षातिरिक्तज्ञाने बोद्धव्यः । उक्तानुपपत्तिं स्पष्टयति - **अन्यथे**ति टीका । आभास एव व्याख्यातप्रायमेतत् । प्रत्यक्षातिरिक्तस्थले यथाऽयं नियमः । यथाऽयोग्यताज्ञाने सति शाब्दबोधो न जायते, तदभावो योग्यताज्ञानं तज्ज्ञानसाध्यः शाब्दबोधः । तथा च बाधाभावज्ञानमनुमितिजनकमनुमितिप्रतिबन्धकीभूतज्ञानविषयप्रतियोगिकाभावज्ञानत्वात् योग्यताज्ञानवत् । **अत्र केचिदि**ति टीका । अबाधितत्वज्ञानस्यानुमितिहेतुत्वे प्रोच्यमाने लाघवेनाबाधिता-सत्प्रतिपक्षत्वविषयकपरामर्शस्यैवानुमितिकारणत्वं वक्तव्यम् । न तु परामर्शस्य भिन्ना कारणता [198 B] अबाधितत्वादिज्ञानस्य भिन्ना कारणता, गौरवात् । अबाधितासत्प्रतिपक्षत्वविषयकपरामर्शस्यैव कारणत्वम् यथाऽबाधितासत्प्रतिपक्षितवह्निव्याप्यधूमवानयमित्यस्यैवानुमितिकारणता, न त्वन्यस्य । क्लृप्तकारणकारणता-वच्छेदककल्पना लघीयसी । न तु कारणान्तरकल्पना कार्या, तस्या गौरवग्रस्तत्वात् इति भावः । एतदेवाह - **न त्वि**ति टीका । **गौरवादि**ति टीका । कारणतावच्छेदककल्पनापेक्षया कारणान्तरकल्पने गौरवं स्यात् । तथा चाबाधिताऽसत्प्रतिपक्षत्वं परामर्शस्य कारणतावच्छेदकम्, न तु भिन्नं कारणान्तरम्, गौरवात् । ततः किमित्यत आह - **परामर्शविषयाभाव** इति टीका । तथा चाबाधितत्वमसत्प्रतिपक्षत्वं परामर्शविषयस्तदा तदभावत्वेन सत्प्रतिपक्षत्वस्य परामर्शविषयाभावत्वेनासिद्धमध्ये एवान्तर्भावो बाधितत्वस्य सत्प्रतिपक्षत्वस्य सत्त्वात् ।

अयमर्थः - यैरबाधितासत्प्रतिपक्षितत्वविषयतयैव कारणत्वमुच्यते तेषां मते बाधसत्प्रतिपक्षयोर्न स्वातन्त्र्येण हेत्वाभासत्वम् किन्तु एतयोरसिद्धमध्ये एवान्तर्भावः। तथा चाबाधितत्वज्ञानस्यासत्प्रतिपक्षत्वज्ञानस्यानुमितौ कारणत्वमेव नास्ति किन्तु तयोः परामर्शकारणतावच्छेदकत्वम्। यतोऽबाधितासत्प्रतिपक्षत्वविषयकपरामर्शत्वेन कारणताऽतः कारणतावच्छेदकत्वं तयोरिति। एवं बाधितत्वज्ञानस्य सत्प्रतिपक्षितत्वज्ञानस्य च न साक्षादनुमितिप्रतिबन्धकत्वं किन्तु अबाधितासत्प्रतिपक्षत्वविषयतया परामर्शस्य यत्कारणत्वं तद्विघटकद्वारा तयोस्तत्र प्रतिबन्धकत्वम्। तथा च तादृशपरामर्शकारणविघटनद्वारैव प्रतिबन्धकत्वसम्भवात् न तयोः स्वातन्त्र्येण तत्प्रतिबन्धकत्वमिति भावः। अत्र न च शुद्धज्ञानत्वम् अपसिद्धान्तश्चेति पाठोऽलग्न एव। **किञ्चेति** टीका। बाधः किं पक्षे साध्याभावो वा साध्याभावप्रमा वा। तत्र नाद्य इत्याह - **बाधस्येति** टीका। यदि बाधो नाम पक्षे साध्याभावस्तदाऽबाधितत्वं नाम साध्याभावाभावत्वम्, तच्च साध्यमेव। तथा चाबाधितत्वज्ञानत्वेन कारणत्वमिति वदता साध्यज्ञानस्य साध्यज्ञानत्वेन कारणत्वमुक्तं भवति। तथा चात्माश्रयः। पक्षे साध्यज्ञाने साध्यज्ञानस्य कारणतेत्यात्माश्रय इत्यर्थः। एतदेवाह - **पक्षे** इति टीका। पक्षे साध्यज्ञानं पक्षे साध्यज्ञाने हेतुरित्येव पर्यवसन्नम्। ततः किमित्यत आह - **तच्चेति** टीका। तच्चासङ्गतम्, यतः सिद्धसाधनप्रसङ्गात्। यदि पूर्वं पक्षे साध्यज्ञानं तिष्ठति तदा सिद्धसाधनम्, पक्षे साध्यसिद्धौ सत्यां किं साध्यज्ञानेनेत्यर्थः। यदि च पक्षे साध्यज्ञानं नास्ति तदाऽबाधितत्वज्ञानाभावादनुमितिर्न स्यात्। द्वितीये आह - **यदि चेति** टीका। [199 A] यदि च साध्याभावप्रमा बाधस्तदा दूषणं यथा - **तदेति** टीका। स्वशब्देन यस्य पुरुषस्यानुमितिर्जायते तस्य परस्य वा साध्याभावप्रमाविरहरूपो बाधाभावस्तत्र साध्यसत्त्वनिश्चयं विना निश्चेतुमशक्य एव, तथा च तन्निश्चये पक्षे साध्यनिश्चये सिद्धसाधनं स्यात्। किञ्च पक्षे साध्यनिश्चयोऽप्यनुमितिरूपो वक्तव्यस्तत्राप्यबाधितत्वज्ञानं कारणं वक्तव्यम्। तत्राप्यबाधितत्वं नाम स्वपरसाधारणसाध्याभावप्रमाविरहरूपो बाधाभावः, सोऽपि पक्षे साध्यनिश्चयं विना न सम्भवतीत्यनवस्था स्यात्। उपसंहरति - **इतीति** टीका। तथा च स्वतोऽबाधितत्वनिश्चयस्यानुमितिहेतुत्वे परम्परया पक्षगोचरसाध्यसत्त्वनिश्चयस्यानुमितिहेतुत्वमापद्यते इति सिद्धसाधनात्माश्रयानवस्थादिदोषसम्भवान्महदसमञ्जसम्। उपसंहरति - **तस्मादिति** टीका। अबाधितासत्प्रतिपक्षत्वज्ञानं स्वतोऽनुमितिकारणं न भवति किन्तु परामर्शे कारणतावच्छेदकमिति केचिदिति मताशयः। ननु अबाधितत्वज्ञानस्यानुमितौ स्वातन्त्र्येण कारणत्वं नास्ति तदा यदवगमे सतीत्यादिग्रन्थोऽसङ्गतः स्यात्। तथाहि यदवगमे सति यन्न भवति तदभावज्ञाने सति तद्भवत्येवेति रूपो नियमो न स्यादेव। बाधितत्वज्ञाने जाते सति अनुमितिर्न जायते। बाधितत्वाभावज्ञाने सति अनुमितिर्जायते इति अबाधितत्वज्ञानं कारणमित्युक्तं मूलकृता तच्चासङ्गतमापद्यत इत्यत आह - **यदवगमे सतीति** टीका। तथा च मूलकृतापि योऽयं नियम उक्तः स नाबाधितत्वज्ञानस्य कारणताभिप्रायेण किन्तु

बाधादिज्ञानस्य प्रतिबन्धकत्वाभिप्रायेणाबाधितत्वज्ञानं कारणत्वेन बोध्यते, न तु स्वातन्त्र्येण कारणत्वम-बाधितत्वादिज्ञानत्वेन हेतुत्वं किन्तूक्तरीत्या परामर्शकारणतावच्छेदकतया। यद्यपि अबाधितत्वविषयकज्ञानं कारणं भवति कारणीभूतपरामर्शस्यैवाबाधितासत्प्रतिपक्षविषयत्वात् किन्तु अबाधितत्वज्ञानत्वेन स्वातन्त्र्येण कारणं नास्ति। यथा घटविषयपरामर्शेऽपि धूमे व्याप्तिपक्षधर्मताविषयकपरामर्शे दैवादघटोऽपि भातस्तदा घटज्ञानं कारणं भवत्येव परन्तु तस्य घटज्ञानत्वेन कारणत्वं नास्ति तद्वत् अबाधितासत्प्रतिपक्षविषयकपरामर्शस्य कारणत्वेऽपि अबाधितज्ञानत्वरूपस्य स्वातन्त्र्येण न कारणत्वमित्यभिप्रायेण यदवगमे सतीत्यादि ग्रन्थः केचिदित्य-त्रास्वरसमाह - **वस्तुत** इति टीका। यदि अबाधितत्वज्ञानमनुमितौ कारणं नोच्यते तदाऽनुमितौ को गुणः ? प्रमात्वप्रयोजको गुणः। यथा प्रत्यक्षप्रमायां विशेषणवत् विशेष्येन्द्रियसन्निकर्षो गुणः। यथा विशेषणवत् यद् विशेष्यं तद्विशेष्येन्द्रियसन्निकर्षो गुणः, भ्रमे तु एवं नास्ति विशेष्यस्य शुक्तेः रजतत्वाभावात् नोक्तगुणस्तत्रेति भावः [199 B]। अनुमितौ परामर्शमात्रं न गुणः, तस्य भ्रमरूपानुमितावपि सत्त्वात्। किन्तु पक्षे साध्य-स्याबाधितत्वादिकमेव गुणः। तेन तस्य गुणस्य संशयनिश्चयसाधारणाबाधितत्वज्ञानत्वेनैव कारणत्वम्। तथा चानुमितित्वेन कार्यता, संशयनिश्चयसाधारणाबाधितत्वज्ञानत्वेन कारणता। यदि अबाधितत्वनिश्चयत्वेन कारणतोच्यते तदा पक्षे साध्यनिश्चयस्य कारणत्वेन सिद्धसाधनं स्यात्। किन्तु अबाधितत्वज्ञानत्वेन कारणत्वम्। तथा च साध्यनिश्चयोऽनुमितेः पूर्वं नापेक्षितः किन्तु संशयसाधारणं ज्ञानमात्रं वर्तत एव। यथा शाब्दप्रमायां योग्यता गुणस्तस्याः। संशयनिश्चयसाधारणं ज्ञानमात्रं शब्दप्रमायां योग्यता संशयस्यापि कारणत्वात्। एतदेवाह - **योग्यताज्ञानवदि**ति टीका। यथा योग्यताज्ञानं संशयनिश्चयसाधारणं शब्दप्रमायां गुणस्तथात्रापि अबाधितत्वज्ञानं संशयनिश्चयसाधारणं गुणः इत्यग्रे बाधग्रन्थे वक्ष्यते। तथा च मूलकारेण यदवगमे सति यन्न भवतीति यदुक्तं तद् बाधस्य प्रतिबन्धकत्वाभिप्रायेण, न तु कारणत्वाभिप्रायेण, इत्येतज्ज्ञापनार्थं स ग्रन्थः। अत्र केचिदित्यनेन यदुक्तं पूर्वं तद् दूषयति - **तथा चे**ति टीका। तेनाबाधितत्वज्ञानस्य गुण इत्याद्युक्तरीत्या हेतुत्वे सम्भवति सति हेतुत्वाभिप्रायेणैव यदवगमे सतीत्यादिको ग्रन्थः, न तु बाधज्ञानस्य प्रतिबन्धकत्वाभिप्रायेणेत्यर्थः। ननु वक्ष्यमाणासिद्धलक्षणोक्तरीत्याऽबाधितत्वज्ञानस्य स्वातन्त्र्येण कारणत्वं नायातीत्यत आह - **असिद्धलक्षणं चे**ति टीका। असिद्धलक्षणेऽन्यथैव वक्ष्यामः। यथाऽबाधितासत्प्रतिपक्षत्वविषयतया परामर्शस्य कारणता नास्तीति तथाऽग्रे वक्ष्यत इत्यर्थः। उत्तरग्रंथयोजनार्थमाभासमाह - **न त्विति** टीका। तथा च निगमनेनापि यद् अबाधितत्वबोधनं कर्तव्यं तदपि साक्षान्न, अबाधितत्ववाचकपदाभावात्, किन्तु साध्यस्य सिद्धत्वप्रतिपादन-मुखेन। विरोधि यदसिद्धत्वज्ञानं तद्व्यवच्छेदकतया अबाधितत्वज्ञानं कार्यम्। अन्यथा सिद्धत्वप्रतिपादनेन विनाऽपि चेदबाधितत्वज्ञानं क्रियते तदा प्रतिज्ञावयवादपि तद्बोधापत्तिः। तथा च सिद्धत्वप्रतिपादनं साध्यस्यावश्यं

वक्तव्यम् । तथा च प्रागुक्तो यस्तस्मादित्यस्यानन्वयः स तदवस्थ एवेत्याभासार्थः । अत्र तस्मादिति मूलकृता यदुक्तं वह्निना साकं तस्मादित्यस्य हेत्वन्वये जाते सति तद्बलादेव हेत्वनाकाङ्क्षितत्वलक्षणं सिद्धत्वज्ञानं जायते इति यथाश्रुतं मूलमयुक्तम् । यद्यपि हेत्वनाकाङ्क्षितत्वलक्षणं सिद्धत्वज्ञानं तथापि तेन साक्षान्न बाधविरहो द्योत्यते । तेन जातमपि हेत्वनाकाङ्क्षितत्वलक्षणं सिद्धत्वज्ञानमबाधितत्वज्ञानं विना व्यर्थमेवेति । तथा चेदं निगमनस्य प्रयोजनमित्याह - **तथापीति** टीका । निगमनेनाबाधितत्वमेतादृशं बोध्यते [200 A] । कथमेकवारं पर्वतो वह्निमानिति प्रतिज्ञया पक्षसाध्यविषय[कज्ञाने] पर्वतवह्निविषयकज्ञाने जातेऽपि पुनस्तस्मात् तथा इदं निगमनवाक्यं किमर्थम् ?, पक्षे साध्यस्य पुनर्वचनं किमर्थम् ? तथा चायमनुवादो व्यर्थः सन् किञ्चिदिष्टं ज्ञापयति । तद् ज्ञापनं यथा अनुवादस्य प्रयोजने प्रयोजनजिज्ञासायां पारिशेष्यात् प्रयोजनान्तरस्यान्यस्यासम्भवात्, व्याप्तिपक्षधर्मादी[नां]मुदाहरणोपनयाभ्यां प्रतिपादितत्वात्, बाधादिविधूननमेव प्रयोजनं निगमनस्येत्यवसीयते । कुत इत्यत आह - **तथैव व्युत्पत्तेरिति** टीका । व्युत्पत्तिमेव विवृणोति - **उपसंहारस्येति** टीका । तथा चोपसंहारस्य तस्मात् तथेतिरूपस्यायमेव महिमा यद् विपरीतशङ्काविनिवर्तनं प्रसिद्धं सिद्धं चेत्यर्थः । बाधाभाव एव प्रसिद्ध इत्येवास्य महिमा इत्यर्थः ।

**इह केचित् यथा तस्मादिति सर्वनाम्ना हेतोः परामर्शः पूर्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथेति सर्वनाम्ना सिद्धस्थल इव विरोधादिवारणाय युक्त इत्याहुः । तन्न । तथेति स्वरूपे प्रकारे सादृश्ये वा । आद्ये तथा चायमिति प्रक्रमात् तथेति हेतुमानित्यर्थः स्यात् तथा चानन्वयः, न हि हेतुमत्त्वादेव हेतुमत्त्वमित्यन्वितम् । न द्वितीयः, सामान्येन पक्षस्यापि अन्वयव्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात्, अत एव न तृतीयोऽपि, अभेदानुमाने चान्वयिनि तस्मात् तथेति सादृश्याभावात् बहूनां च प्रक्रमे विशेष्यानन्वयात्, वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात् तस्मादित्यत्र तु विभक्त्यर्थानन्वयादेव नियमः तस्मादनित्य इत्यभिधाने विशिष्य सिद्धतावगम्यते पूर्वं साध्यतयोक्तस्य समर्थहेतुसम्बन्धेन पुनरुत्कीर्तनात् अन्यथा वैयर्थ्यात् । संशय-प्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः किन्तु न्यायाङ्गतयोपयुज्यन्त इति नाधिक्यम्, कण्टकोद्धारस्य च न सार्वत्रिकत्वं समयविशेषोपयोगित्वादिति ।**

अथ मूलव्याख्या । इह केचिदिति मूलम् । केचिद् वदन्ति - तस्मात् तथेति प्राचीनानां मते निगमनम्,

**चिन्तामणिकार**मते तु तस्माद् वह्निमानित्येव निगमनम्। प्राचीनाः स्वमतं वर्णयन्ति - **यथे**ति। यथा तस्मादिति सर्वनाम्ना हेतोर्यः परामर्शः पूर्वोक्तं यत् पक्षधर्मताव्याप्त्यादिकं तल्लाभार्थं तथा साध्यांशस्य तथेति सर्वनाम्ना परामर्शः तस्य प्रयोजनं तु सिद्धस्थले इव विरोधवारणाय। तथा वह्निव्याप्यधूमवानयमित्यत्र इदंशब्देन सिद्धस्य पक्षस्य परामर्शः तद्वत् तथेति सर्वनाम्नाऽपि साध्यांशस्यापि वह्निमत एव परामर्शोऽपि युक्त एव। **विरोधवारणाये**ति मूलम्। पक्षे साध्याभावशङ्काविधूननार्थं तथाशब्दप्रयोग इत्यर्थः। इदं दूषयति - **तन्ने**ति मूलम्। तथा च तथाशब्दो निगमने योऽस्ति स स्वरूपे वा प्रकारे वा सादृश्ये वा। आद्ये दूषणमाह - **तथा चायमिती**ति मूलम्। तथा चायमिति उपनये वह्निव्याप्यधूमवानयमिति प्रक्रमात् तथाशब्देनापि स्वरूपवाचिना तादृशस्वरूपमेव वक्तव्यं यादृश-स्वरूपमेव वक्तव्यम्। यादृशस्वरूपमयमिति शब्देनोक्तमस्ति। तथा चास्यानन्वयः, यथा तस्मादित्यनेन वह्निव्याप्यधूमवत्त्वादित्युक्तं तथेत्यनेनापि वह्निव्याप्यधूमवान् उक्तः, तथा चानन्वयः, न हि वह्निव्याप्यधूम-वत्त्वात् वह्निव्याप्यधूमवान्। अनन्वयमेवोपपादयति - **न हीति** मूलम्। हेतुमत्त्वात् हेतुमत्त्वं [न] कुत्राप्यन्वितं भवतीत्यर्थः। द्वितीयं दूषयति - **न द्वितीय** इति मूलम्। यदि तथाशब्दः प्रकारे तदा पूर्वं प्रतिज्ञोदाहरणोपनयादिस्थले वह्निवत् पक्षादीनामपि प्रकारत्वात् ततस्तस्मिन्नेव पक्षे तस्यैव पक्षस्य प्रकारत्वेनासम्भवात् तथा चायमर्थो भवति तथा इति शब्देन पर्वतवृत्तिः प्रकारः पर्वतत्वं - साध्यवान् यः पक्षस्तद्वृत्तिः प्रकारः पर्वतत्वं - तेन पर्वतत्वप्रकारस्य पर्वतेऽनन्वय एव। तथा च पक्षवृत्तिः प्रकारः पर्वतत्वं तस्य प्रकारस्य पर्वतत्वस्य पर्वतत्वेन रूपेण पर्वत एवान्वयो न भवति, [पर्वतः] पर्वत इति प्रतीतेरभावात्। तथा चेदं पर्यवसन्नम्। तस्मात् तथेति निगमने तस्मादिति शब्दाद् वह्निव्याप्यधूमवत्त्वादिति परामृष्टम्, तथा इत्यनेन तच्छब्देन [200 B] प्रकारवाचिना प्रकारः परामृष्टः। स च व्याप्तौ यथा वह्निमत्त्वेन रूपेण महानसादयः प्रविष्टास्तथा पर्वतोऽपि प्रविष्टः, तथा च तद्वृत्तिर्यः प्रकारः पर्वतत्वं तस्य प्रकारस्य पर्वतत्वेन रूपेण पर्वतेऽन्वयो न भवति, [यथा] घटो घट इति प्रतीतेरभावः तथा पर्वतः पर्वत इति प्रतीतेरभावात्। अथ तृतीयं सादृश्यमिति विकल्पं दूषयति - **अत एव न तृतीयोऽपीति** मूलम्। तथाशब्देन सादृश्यं परामृष्टम्। सादृश्यवाची तथाशब्दो न भवति। अभेदानुमाने तथाशब्देन भेदघटितं सादृश्यं न भवति। तथाहि - अयमेतदभिन्नः एतत्त्वादिति, अत्र यत्र यत्र एतत्त्वं तत्र तत्र एतदभिन्नत्वम्, यथा एतस्मिन्नेव, तथा चायम्, तस्मात् तथा, इत्यत्र तच्छब्देन यद् दृष्टान्तसादृश्यं परामृश्यते तत् पक्षे नास्ति सादृश्यस्य भेदघटितत्वात् प्रकृते च दृष्टान्तस्य भेदघटितस्याभावात्। तथा चाभेदानुमाने तथाशब्दस्यानन्वय एव। दूषणान्तरमाह - **बहूनामिति** मूलम्। बहूनां यत्र प्रक्रमो महानसधूमवह्निपर्वतानां बहूनां यत्र प्रक्रमस्तत्र विशिष्य पर्वतत्वेन रूपेणान्वये नियामकाभावात्। कस्य तथाशब्देनान्वयः ?, सर्वेषां पर्वतमहानसादीनां प्रक्रान्तत्वात् एकस्यैवान्वये नियामकाभावात्। तथा च निगमनवाक्ये तथाशब्देन कस्याप्यन्वयो न स्यात्। एतेनैतादृशं तस्मात् तथेति रूपं

निगमनं नास्तीति भावः । ननु बहूनां प्रक्रमेऽपि योग्यतया यत् पर्वते योग्यं तस्यैवान्वयो भविष्यति । योग्यं च वह्निमत्त्वादिकम्, तस्यैवान्वय इत्यत आह - **वादिवाक्येति** मूलम् । तथा च वादिवाक्ये यदि योग्यतयाऽन्वयस्तदा पर्वतो वह्निमानित्यपि प्रतिज्ञा न स्यात्, किन्तु पर्वतस्तद्वान्, यो यद्वान् स तद्वान्, यथा स इति । तथा च वादिवाक्यात् योग्यतयैव तेषां तेषामन्वयो भविष्यति । तेन सर्वत्रैव तच्छब्दप्रयोगः स्यात्, योग्यतयैवान्वयेऽतिप्रसङ्ग इत्यर्थः । ननु तथा इत्यत्र बहूनां प्रक्रमे एकस्यान्वये नियामकाभावात् चेत् तथाशब्दप्रयोगो नास्ति तदा तस्मादिति शब्दस्यापि प्रयोगो न स्यात् तच्छब्देन हेतोरेव परामर्शो न स्यात्, अत्रापि बहूनां प्रक्रान्तत्वात्, इत्यत आह - **तस्मादिति** मूलम् । तस्मादित्यत्र बहूनां प्रक्रमेऽपि पञ्चम्यर्थस्यान्यत्रान्वयाभावात् वह्निव्याप्यधूमादित्यस्यैवान्वयः, नान्येषाम् । एतदेवोसंहरति - **तस्मादिति** मूलम् । तस्मादनित्यः शब्द इति चेन्निगमनं क्रियते तदा विभक्त्यर्थत्वान्वयबलात् हेतुरेव लब्धः अनित्य इति पदा[त्] तु साध्यवानेवोपस्थित इति तस्मादनित्य इति निगमने विशिष्य सिद्धताऽवगम्यते । ननु सिद्धता कथमवगम्यते इत्यत आह - **पूर्वं साध्यतयेति** । प्रतिज्ञावाक्यात् पूर्वं साध्यतयोक्तस्य साध्यस्य तस्यैव पुनः समर्थहेतुशब्देनोत्कीर्तनात् सिद्धतावगम्यते । यदि च सिद्धता न स्यात् तदा पुनर्हेतुसम्बन्धेन पुनरुत्कीर्तनं व्यर्थं स्यादित्यर्थः । ननु पञ्चैवावयवा इत्यनुपपन्नम्, अन्येऽप्यवयवास्ति-घ्नन्तीत्यत आह - **संशयेति** मूलम् । आदिशब्दाद् विमर्शजिज्ञासादयोऽवयवा बोद्धव्याः । [201 A] एते चावयव-लक्षणाभावादेव नावयवाः । अवयवलक्षणं त्वनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वम् । एतच्च संशयादौ नास्ति, शाब्दज्ञानजनकवाक्यत्वाभावात् तेषाम् । नन्वेवं तर्हि तेषां संशयादीनां तत्र तत्र वादे प्रदर्शनं न स्यात् । अवयवत्वाभावे तेषां प्रदर्शनं न स्यादित्यत आह - **किन्त्विति** मूलम् । तथा च ते स्वातन्त्र्येण न्यायाङ्गत्वेनोपयुज्यन्ते यतः संशयाभावे वादिप्रवृत्तेरेवाभावात् प्रयोजनाभावे च वादो व्यर्थ इत्यतस्तेषामपेक्षा । ननु कण्टकोद्धारः स्वतन्त्रोऽवयवो भविष्यतीत्यत आह - **कण्टकेति** मूलम् । कण्टकोद्धारस्तु नायमाभासः । एतद्रूपस्य कण्टकोद्धारस्य यत्र वादिनोस्तथासमयस्तत्रैव प्रयोगोऽन्यत्र तु नास्तीति सार्वत्रिकाभावान्नावयवत्वमिति संक्षेपः । निगमनेन साध्याभावशङ्काविधूननं कर्तव्यम् ।

अथ टीका । **सिद्धेति** टीका । सिद्धं च पक्षादीति । विवृणोति - **तथेति** टीका । यथा वह्निव्याप्यधूम-वानयमित्यत्रोपनये इदंशब्देन पक्षस्यैव यथासिद्धस्य परामर्शः तथा निगमनस्थतथाशब्देनापि साध्यांशस्य सिद्धस्यैव परामर्शो युक्तः । विरोधवारणायेति मूलं व्याचष्टे - **पक्षेति** टीका । तथा च निगमनेन यद् विरोधिद्वयं - एकः साध्याभावः, अपरं साध्याभावव्याप्यं वह्न्यभावव्याप्यपाषाणवत्त्वादिकं - तयोर्द्वयोर्निरासाय निगमनम् । तथा च निगमनेन साध्याभावो बाधस्तस्य निरासः कार्यः । विपरीतसाधको हेतुः सत्प्रतिपक्षः यथाऽयं वह्न्य-भाववान् पाषाणवत्त्वात् । एतयोर्ययोर्निरासो निगमनेन कर्तव्यः साध्यस्य सिद्धत्वज्ञापनद्वारा तयोर्निरास इत्यर्थः ।

ननु मूले स्वरूप इत्यादि विकल्पत्रयी कृता सा न संभवति। कथम् ? तथेति सर्वनाम्नो बुद्धिस्थे शक्तिः, तत्र च विकल्पानवसरः स्वरूपादीनामनवसरादित्यत आह - **थाल्प्रत्ययस्ये**ति टीका। यद्यपि तच्छब्दस्य बुद्धिस्थे शक्तिः तथापि तच्छब्दोपरि यः थाल्प्रत्ययस्तत्र मतभेदेनार्थत्रये शक्तिरिति। मूलकारेणोक्तमर्थत्रयमित्यर्थः। **प्रकार** इति टीका। ननु प्रकारे थाल्प्रत्ययस्य कथं शक्तिः ?, न हि स्वरूपसम्बन्धविशेषलक्षणं[१] यत् प्रकारत्वं यथा घटे घटत्वं प्रकारः स च स्वरूपसम्बन्धो ज्ञानेन सह सप्रकारः थाल्प्रत्ययेनोपस्थाप्यते स्वरूपसम्बन्धप्रतीत्यभावादित्यत आह - **प्रकार** इति। प्रकारो नाम व्यावर्तको धर्मः, न तु स्वरूपसम्बन्धविशेषलक्षणः प्रकारो थाल्प्रत्ययेनोपस्थाप्यः, तथा प्रतीतेरभावात्। व्यावर्तको धर्मो यथा यथा महानसस्तथा चायं, तच्छब्देन महानसः उपस्थापितः थाल्प्रत्ययेन धूमलक्षणः प्रकार उपस्थापितः। तेन तथाशब्देन धूमवानेव उपस्थापितः इत्यभिप्रायेण - **उपनयस्ये**ति टीका। ननु वह्निव्याप्यधूमावांश्चायमित्येवोपनयस्याकारस्तथा चायमेतादृशस्तु न भवतीत्यत आह - **तथा** [201 B] **चायमि**ति टीका। तथा च यन्मते उपनयस्य तथा चायमित्याकारस्तन्मताभिप्रायेणेदं द्रष्टव्यम्। ननु मूलकृतोक्तं तथा चायमिति प्रक्रमात् निगमनस्थतथाशब्देन हेतुमानेव परामृश्यते इति। न हि प्रक्रममात्रेण तथाशब्देन हेतुमत्त्वं बोधयितुं शक्यते इत्यत आह - **उपनयस्थे**ति टीका। आदौ चायमित्युपनयः पश्चात् तस्मात् तथेति निगमनम्, ततोऽनयोः उपनयनिगमनयोः सन्निधानात् यदुपनयस्थतथाशब्देनोपस्थाप्यते तदेव निगमनस्थेनापि तथाशब्देनोपस्थाप्यते। सन्निधानात् सन्निहितत्वात्। तथा चोपनयस्थतथाशब्देन हेतुमानेवोपस्थाप्यते एवं निगमनस्थतथाशब्देन हेतुमानेवोपस्थापनीय इत्यर्थः। द्वितीये पक्षे सामान्येनेति मूलं व्याचष्टे - **सामान्येनेती**ति टीका। यदि प्रकारवाची थाल्प्रत्ययः तदा तच्छब्दरूपप्रकृत्योपस्थापितो योऽर्थस्तद्वृत्तिर्व्यावर्तकधर्मलक्षणो यः प्रकारः स थाल्प्रत्ययेनोपस्थापनीयः, तत्र च तच्छब्देन च बुद्धिस्थः पदार्थ उपस्थापनीयः, तत्रान्येषां महानसादीनाम् आदिशब्दात् पर्वतादेः साध्यवत्त्वेन रूपेण व्याप्तिग्रहकाले उपस्थितत्वात् तन्मध्ये पक्षस्याप्युपस्थितत्वात् पक्षवृत्तिर्यः प्रकारः पर्वतत्वं तस्यान्वयः पर्वते कर्तव्यः। तथा च तथाशब्देन प्रकृतिप्रत्ययाभ्यां मिलित्वा वह्निमत्त्वसामान्येनोपस्थितपर्वतवृत्तिपर्वतत्वस्यान्वयः पर्वते कर्तव्यः न च पर्वतत्वेन रूपेणान्वयः पर्वते संभवति उद्देश्यविधेययोर्भेदाभावात्। पर्वतत्वेन रूपेण पर्वत उद्देश्यः पर्वतत्वमेव विधीयत इति कृत्वाऽनन्वयः पर्वते सम्भवति उद्देश्यविधेययोर्भेदाभावात् घटो घट इत्यादिवत्। एतदेवाह - **यो यो धूमवानि**ति टीका। यो यो धूमवान् सोऽग्निमान् इत्यत्रोदाहरणे पक्षसाधारणं यत् साध्यवत्पदं तेन वह्निमत्त्वेन रूपेणोपस्थापितो हि यः पर्वतः पक्षस्तस्य पर्वतस्य तत्पदेन परामर्शसम्भवात्। थाल्प्रत्ययोपस्थाप्यमाह - **पक्षवृत्ती**ति टीका। तथा च पक्षवृत्तिर्यः प्रकारः तस्यान्वयः पक्ष एव, तथा चानन्वयो

१. घटोऽयमिति ज्ञाने। प्रतौ टिप्पणी।

यथा न भवत्येवं पर्वतः पर्वत इत्यर्थः। ननु तच्छब्देन उदाहरणकाले वह्निमत्त्वसाधारण्येनोपस्थितस्य पर्वतस्य परामर्शसम्भवेऽपि थालप्रत्ययेन तद्वृत्तिः प्रकारः पर्वतत्वमेव किमर्थमुपस्थापनीयं वह्निमत्त्वमपि कुतो नोपस्थापनीयम् ? तथाशब्देनोपस्थापितं यद् वह्निमत्त्वादिकं प्रकारस्तेन सह पर्वतस्यान्वयो भविष्यत्येवेत्याशङ्कते - **यद्यपीति** टीका। पक्षवृत्तिः प्रकारो वह्निमत्त्वम्, तस्य वह्निमत्त्वस्य पक्षे नानन्वयः, उद्देश्यविधेययोर्भेदसम्भवात्। पर्वतत्वेन रूपेणोद्देश्यता वह्निमत्त्वेन विधेयता इति नानन्वय इत्याशङ्कार्थः। समाधत्ते - **तथापीति** टीका। प्रकृत्यर्थभिन्न एव प्रत्ययार्थस्यान्वयः तत्पदार्थो वह्निमान्। यदि थालप्रत्ययेनापि [202 A] वह्निमत्त्वमेवोपस्थाप्यते तदा प्रकृत्यर्थप्रत्ययार्थयोर्भेदाभावान्न पक्षेऽन्वयः। एतदेवाह - **तथैव व्युत्पत्तेरिति** मूलम्। भिन्नत्वेन प्रकृत्यर्थादुपस्थाप्यतेऽर्थः, तथैव थालप्रत्ययस्य व्युत्पत्तिरिति भावः। तृतीयपक्षे दूषणेऽत एवेत्यस्यार्थमाह - **तत्पदस्येति**। तत्पदेन पक्ष उपस्थापनीयः, थालप्रत्ययेन सादृश्यमुपस्थापनीयम्। तथा च पक्षसादृश्यं पक्षे नान्वेति, सादृश्य[स्य] भेदगर्भितत्वात्, अभेदे सादृश्याभावात्। अत्राभासमाह - **नन्विति**। तत्पदस्यार्थो दृष्टान्तो महानसादिः। थालप्रत्ययेन च सादृश्यमुपस्थाप्यते, तच्च पर्वते अन्वेत्येव। वह्निमत्त्वेन रूपेण महानससादृश्यं पर्वते तिष्ठत्येव महानसपर्वतयोर्भेदादिति। तृतीयपक्षे सादृश्यपक्षे थालप्रत्ययस्य नान्वय इत्याभासार्थः। **अत्रेति** टीका। अभेदानुमाने। ननु दृष्टान्तः पक्षभिन्नः, प्रकृते चाभेदानुमाने पक्षदृष्टान्तयोरभेदात् कथमनुमानं तदित्यत आह - **पक्षस्यैवेति** टीका। तथा च पक्षस्यैव दृष्टान्तत्वे बाधकाभावात् तत्राभेदानुमाने उक्तदोषतादवस्थ्यात् सादृश्यानन्वयदोषतादवस्थ्यादित्यर्थः। अभेदानुमाने सादृश्यस्यानन्वये आभासमाह - **नन्विति** टीका। तथा च यद्यपि व्यक्त्योरभेदस्तथापि कालाद्यवस्थाभेदमादाय सादृश्यान्वयो भविष्यतीत्यर्थः। **बहूनामितीति** टीका। तच्छब्देन महानसधूमवह्निपर्वतादयः सर्वेऽप्युपस्थापनीयास्ततस्तच्छब्देन महानसस्यैव कथमुपस्थितिर्भविष्यतीत्याशङ्कार्थः। अतिप्रसङ्गादित्यस्यार्थमाह - **अवयवेति** टीका। यदि वादिवाक्ये न्यायरूपे योग्यतया कश्चनार्थोऽन्वेति तदाऽवयवविपर्यासवचनरूपं निग्रहस्थानं न स्यात्। कुतः ? यथा पर्वतो वह्निमानिति प्रतिज्ञाऽनन्तरं यो यो धूमवान् इत्युदाहरणं प्रयुक्तम्, पश्चाद् धूमादिति हेतुवाक्यं प्रयुक्तम्, इदं यदवयवविपर्यासवचनं तन्निग्रहस्थानदोषो न स्यात्। प्रतिज्ञार्थे उदाहरणार्थोऽयोग्यतयैव नान्वेति। आकाङ्क्षायोग्यतावशात् तु हेतुवाक्यार्थस्यैवान्वयो भविष्यति। योग्यतया सर्वस्यान्वयावयवविपर्यासवचनं दोषो न स्यादित्यर्थः। अतिप्रसङ्गोऽत्रावयवविपर्यासोऽपि दोषो न स्यादित्यर्थरूपः। अयमतिप्रसङ्ग आपादनरूपो न तु लक्षणदोषरूप इति भावः। स्वोक्ते निगमने तस्माद् वह्निमान् इति रूपे तस्माद् अनित्य इति रूपे वा साधकमाह - **तस्मादनित्य इति** मूलम्। तत्राशङ्कते - **न चेति**। तस्मादनित्य इति निगमनं यथा भवता क्रियते तथा कृतकत्वादनित्यो धूमवत्त्वाद्वा वह्निमान् इत्येव किमिति न क्रियते ?, तच्छब्देन बहूनां प्रक्रमदोष इत्याशङ्कार्थः। समाधत्ते -

**सर्वनामे**ति टीका। कृतकत्वादनित्य इत्युच्यमाने कृतकत्वमात्रस्यैवोपस्थितिर्भवति न त्वनित्यत्वव्याप्तिविशिष्टकृतकत्वस्य, तस्मादित्यनेन सर्वनाम्ना यावद् बुद्धिस्थं तावत् [202 B] उपस्थितिः कर्तव्या, व्याप्तिविशिष्टकृतकत्वस्य बुद्धिस्थत्वात् व्याप्तिविशिष्टस्य तस्यैवोपस्थितिः कार्येत्यर्थः। न च पक्षादीनामपि बुद्धिस्थत्वात् तेषामप्युपस्थितिर्भविष्यतीति वाच्यम्, तत्र विभक्त्यर्थानन्वयात् इति। विभक्त्यर्थान्वययोग्यं कृतकत्वादिकमेवोपस्थाप्यते इति भावः। सर्वनाम्ना पूर्वोक्ताशेषरूपलाभो भवतीत्यत्र सम्मतिमाह - **तदुक्तमि**ति टीका। सर्वनाम्नामयं महिमा यत् सर्वं पूर्वोक्तमनुसंहितं तदेवोपस्थितं भवतीत्यर्थः। तेन तस्मादिति सर्वनामपदेन व्याप्तिविशिष्टकृतकत्वोपस्थितिः कर्तुं शक्यत इति भावः। ननु समर्थहेतुसम्बन्धेन पुनरुत्कीर्तनात् विशिष्य सिद्धताऽवगम्यते, सा च किमर्थं प्रतिज्ञादिवत् साध्यतयैवोपपत्तेरित्यत आह - **अन्यथे**ति मूलम्। यदि प्रतिज्ञादिवत् निगमनेनापि साध्यतयैव प्रतिपादनीया तदा साध्यतायाः प्रतिज्ञादिनैव प्रतिपादितत्वात् निगमनं व्यर्थमेव स्यादित्यर्थः। तथा च समर्थे(र्थ)हेतुसम्बन्धेन तस्मादिति रूपेणोत्कीर्तनात् वह्न्यादिसाध्यस्य सिद्धतैवावगम्यते। तेन सिद्धत्वज्ञानेन विपरीतशङ्कानिवृत्तिरेवेति। विपरीतशङ्का साध्याभावया(व्या)प्यसत्प्रतिपक्षशङ्का, [तन्]निवृत्तिद्वारा निगमनमुपयोगीति सिद्धं न्यायावयवाः पञ्चैवेति। **कण्टके**ति मूलम्। कण्टकोद्धारस्तु पर्वत इत्यादिना या(यद)वयवात्मकं वाक्यमुक्तं तन्नाभासरूपं न मिथ्यारूपम् इति कण्टकोद्धारः सार्वत्रिको न भवति। यत्र वादिनोस्तथाविधः समयः त्वया कण्टकोद्धारप्रयोगः कर्तव्यस्तत्रैव कण्टकोद्धारस्य प्रयोगः, नान्यत्रेति न तस्य सार्वत्रिकत्वमिति।

**॥ अवयवग्रन्थः समाप्तः ॥**

**॥ सम्पूर्णा टीका ॥ [१]कृष्णदुर्गे लिखिता ॥**

---

१. कृष्ण = किशन, दुर्ग = गढ, कृष्णदुर्ग = किशनगढ।

## । अथ हेत्वाभासनिरूपणम् ।

### । हेत्वाभाससामान्यनिरुक्तिः ।

**अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते ।**

प्रसङ्गात् तत्त्वनिर्णयविजयप्रयोजकत्वाच्च हेत्वाभासान् निरूपयति। **अथेति**। पूर्वमनुमानं निरूपितम्, तच्चानुमितिहेतुरेव, स च सदसद्भेदात् द्वेधा भवतीति। हेतुः स सद्धेतुः स्मृतः, तस्य चोपेक्षानर्हत्वं विजयप्रयोजकत्वात्। न चासद्धेतोर्विजयप्रयोजकत्वम्। कुतः? सद्धेतोरेव विजयप्रयोजकत्वात्। न ह्यसद्धेतुप्रयोगेण वादिविजयो भवतीति वाच्यम्। असद्धेतुज्ञाने सद्धेतुः प्रयुज्यते वादिना इति तज्ज्ञानस्य विजयप्रयोजकत्वात्। प्रयोजकत्वं तु कारणकारणत्वम्। विजये कारणम् असद्धेतुभिन्नसद्धेतुज्ञानम्, असद्धेतोश्च प्रतियोगिविधया सद्धेतुज्ञानं प्रति कारणत्वम्, अतः कारणकारणत्वम्। तत्त्वनिर्णयजनकत्वं च सद्धेतोरेव तेनैव तज्जननम्, तस्यापि असद्धेतुभिन्नत्वेन ज्ञानं प्रयोजकम्, तत्रापि असद्धेतुभिन्नज्ञानेन विचारकस्य निर्णयो भवतीत्यसद्धेतोः प्रतियोगिविधया प्रयोजकत्वं तत्त्वनिर्णये भवतीति। नन्वत्र कस्य लक्षणं क्रियते? - धर्मस्य व्यभिचारादेस्तदाश्रयस्य धर्मिणो व्यभिचारिवह्न्यादेर्वा? न तावद् धर्मस्य अग्रिमग्रन्थविरोधात्। तथाहि उपधेयसङ्करेत्यादिन(ना) धर्मिण एव लक्षणकरणात्। नापि [203 A] द्वितीयः तस्य धर्मिणो वह्न्यादेरप्रतिबन्धकत्वात्।

[अथ टीका]। प्रतिबन्धकत्वं तु व्यभिचारज्ञानस्य, न तु धर्मिज्ञानस्येत्यत आह - **हेतुवदिति** टीका। तथा चात्र योगबलाद् व्युत्पत्तिबलात् हेतुवदाभासत इति रूपात् धर्मी व्यभिचाराश्रयो वह्न्यादिरेवात्र लक्ष्यः। न चतस्योक्तरीत्या प्रतिबन्धकत्वमेव नास्तीति वाच्यम्। अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वशब्देन तद्वत्त्वस्य विवक्षिततद्वत्त्वस्य विवक्षितत्वादतो धर्मिणि नाव्याप्तिरिति भावः। **धर्मीति** वह्न्यादिर्व्यभिचारी हेतुरित्यर्थः। **तल्लक्षणमिति** टीका। हेतुवदाभासमानलक्षणमाहेत्यर्थः। ते च पञ्च। तदुक्तम् - सव्यभिचारविरुद्धसाध्यसमप्रकरणसमातीतकाला इति। अस्यार्थः - तत्र सव्यभिचारो धूमे साध्ये वह्न्यादिः। विरुद्धश्च गोत्वे साध्ये अश्वत्वादिः। साध्यसमश्च असिद्धः त्रिधाऽपि। प्रकरणसमः सत्प्रतिपक्षः यथा शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यः व्योमैकगुणत्वात् इत्यादि। अतीतकालश्च पक्षे बाधितसाध्यः यथा वह्निरनुष्णः कृतकत्वात् इत्यादि। ननु एवं कृते लक्षणे व्यभिचारिविरुद्धासिद्धेष्वव्याप्तिः, तेषामनुमितिकारणीभूताभावप्रतियोगिज्ञानविषयत्वाभावात्। न च व्यभिचारादिज्ञानस्यैव अनुमित्यनुत्पादनियतत्वेन तदभावस्यैव कारणत्वं दाहादौ मण्याद्यभावस्यैवेति वाच्यम्, व्यभिचारादिज्ञानाभावापेक्षया परामर्शस्य कारणत्वे लाघवादित्यत आह - **अनुमितीत्यादि** टीका। तथा चानुमितौ यद्यपि व्यभिचारादिज्ञानस्य प्रतिबन्धकत्वं नास्ति उक्तरीत्या व्याप्तिज्ञानस्य कारणत्वात् तथापि

व्याप्तिज्ञानमनुमितौ कारणं तत्कारणं च व्यभिचारज्ञानाभावादिरिति तेषां प्रयोजकत्वात् कारणकारणत्वं वर्तत एवेति भावः । एवं विरुद्धस्य साध्यसामानाधिकरण्यज्ञानप्रतिबन्धकत्वात् असिद्धस्य पक्षधर्मतादिज्ञान-प्रतिबन्धकत्वात् तदभावयोरनुमितिप्रयोजकत्वमस्त्येव । यथाऽनुमितौ वह्निसमानाधिकरणो धूम इति ज्ञानं कारणम्, तज्ज्ञानं वह्न्यसमानाधिकरणो धूम इति ज्ञानान्न भवतीति साध्यसामानाधिकरण्यज्ञाने साध्यासामानाधिकरण्यज्ञानाभावस्य कारणत्वादनुमितौ प्रयोजकत्वं वर्तते । एवं हेतौ पक्षधर्मतादिज्ञानमनुमितौ कारणम्, तत्प्रतिबन्धकं च पक्षवृत्तित्वादिज्ञानमिति तदभावस्यासिद्ध्यादिज्ञानाभावस्यानुमितिप्रयोजकत्वम्, कारणं च पक्षवृत्तित्वज्ञानं तत्कारणं च पक्षावृत्तित्वज्ञानाभाव इति कारणकारणत्वात् । तथा च व्यभिचारादिज्ञानस्याप्रतिबन्धकत्वं कारणीभूताभावाप्रतियोगित्वेऽपि, तथापि व्यभिचारादिज्ञाने सत्यनुमित्यनुत्पादनियमो वर्तते एवेति । तथैव सङ्गतिरिति भावः । **तेनेति** । अनुमित्यनुत्पादनियतत्वविवक्षणेनेत्यर्थः । व्यभिचारादीत्यत्र [203 B] आदिपद-ग्राह्यश्चविरुद्धोऽसिद्धश्चेत्यर्थः । कारणविघटकस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानप्रतिबन्धकस्येत्यर्थः । स्वव्याख्यानबीजं प्रकटयति - **अन्यथेति** टीका । यद्येवं न व्याख्यायते तदा । **यथाश्रुते** इति । अनुमितिकारणीभूताभाव-प्रतियोगियथार्थज्ञानविषयत्वे इत्यर्थः । **तदभावस्येति** टीका । व्यभिचारादिज्ञानाभावस्येत्यर्थः । व्यभिचारादि-ज्ञानाभावश्चानुमितौ कारणं न भवति । कथम् ? लाघवाद् व्याप्त्यादिज्ञानस्यैवानुमितौ कारणत्वात् इत्युक्तत्वात् । **अन्यथासिद्धत्वादिति** टीका । अनुमितौ कारणं व्याप्त्यादिज्ञानम्, तत्कारणं च व्यभिचारज्ञानाभाव इति घटे कुलालपितृवद् अन्यथासिद्धत्वादित्यसङ्गतिः स्यादित्यर्थः । ननु अनुमितिकारणीभूताभावेत्यत्र कारणपदेनानुमिति-प्रयोजकत्वमेवोच्यताम्, तच्चानुमितिप्रयोजकत्वं व्यभिचारादिज्ञानाभावस्य वर्तत एवानुमितिजनकव्याप्त्यादि-ज्ञानजनकत्वात्, किमित्यनुमितिप्रतिबन्धनियतत्वविवक्षणेनेत्यत आह - **कारणपदस्येति** टीका । प्रकृत-लक्षणस्थकारणपदस्येत्यर्थः । प्रयोजकत्वं च नियमे सति नियतपूर्ववर्तित्वे सत्यन्यथासिद्धिचतुष्टयाभावः, स च कारणेऽपि वर्तते कारणकारणेऽपि वर्तते कुलालपितृवत् । एतच्च कारणत्वकारणकारणत्वोभयसाधारणमिति भावः । यदि प्रयोजकपदं कारणपरमेव व्याख्यायते तदोपाधावतिव्याप्तिरित्याह - **तादृशतयेति** । अनुमिति-प्रयोजकतया । कथमनुमितिकारणं भवति । व्याप्तिज्ञानं तत्कारणं भवति । व्यभिचारज्ञानाभावो व्यभिचारज्ञानं चोपाधिज्ञानेन जन्यते । उपाधिज्ञानाभावे सति व्यभिचारज्ञानं न भवतीति । भवत्युपाधिज्ञानाभावस्यानुमिति-प्रयोजकत्वमिति **चिन्तामणिकार**मते । उपाधेर्हेत्वाभासत्वाभावादलक्ष्यत्वम् **उदयन**मते च लक्ष्यत्वेऽप्यन्य-मतेऽतिव्याप्तिः सुदृढेत्यर्थः । **यथोक्ते** इति टीका । कारणपदस्य अनुमित्यनुत्पादनियतत्वविवक्षणे त्वित्यर्थः । **तत्रेति** । उपाधौ नातिप्रसङ्गो नातिव्याप्तिर्लक्षणस्येत्यर्थः । ननु अनुमित्यनुत्पादनिय[तत्व]विवक्षणेनापि कथमु-पाधौ नातिव्याप्तिरित्यत आह - **उपाधिज्ञानेऽपीति** । उपाधिरार्द्रेन्धनादिस्तस्य साध्यव्यापकत्वादिज्ञानेऽपि हेतौ

उपाधिव्यभिचारानुमितिद्वारा प्रतिबन्धकत्वम् । न च साक्षादेव तस्य तत्र प्रतिबन्धकत्वमस्तु इति वाच्यम् । उपाधिज्ञानस्यानुमितिविषयाभावानवगाहितयाऽनुमितिकारणीभूतव्याप्तिविशिष्टपक्षधर्मताज्ञानविषयाभावानवगाहितया साक्षादप्रतिबन्धकत्वात् । तथाहि अनुमितौ विषयः पक्षे साध्यवत्ता, तदभावश्च पक्षे साध्याभावः, उपाधिज्ञानं च साध्यव्यापकत्वसाधनाव्यापकत्वविषय इति कथं ग्राह्याभावावगाहित्वमुपाधिज्ञानस्य यतः पर्वतो न वह्निमानिति ज्ञानं [204 A] पर्वतो वह्निमानिति ज्ञानस्य ग्राह्याभावावगाहि भवति । तद्यथा ग्राह्यो भवति पर्वते वह्निः, ग्रहण-विषयो हि ग्राह्यः, तदभावः पर्वते ग्राह्याभावो भवति, सोऽभावो न वह्निमानिति ज्ञानेन गृह्यते । न चोपाधिर्ग्राह्याभावः, वह्न्यभावत्वेनोपाधेरग्रहणात् । किन्तु साध्यव्यापकत्वादिनैव गृहीतः सः । एवं च अनुमितिकारणं भवति व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शरूपम् । न चोपाधिज्ञानं परामर्शविषयाभावावगाहि भवति, तस्य साध्य-व्यापकत्वसाधनाव्यापकत्वविषयत्वात् परामर्शस्य च व्याप्तिविशिष्टपक्षधर्मताविषयत्वात् । न च तयोरुपाधि-ज्ञानपरामर्शयोः परस्पराभावविषयत्वम् । परामर्शस्य व्याप्तिपक्षधर्मते विषयौ, तदभावश्च व्याप्तिपक्षधर्मताभावः, न चोपाधिस्तथा, तस्य साध्यव्यापकत्वसाधनाव्यापकत्वरूपत्वादिति । नानुमितिकारणविघटकतयोपाधि-ज्ञानस्यानुमितौ प्रतिबन्धनियतत्वमिति प्रकृतविवक्षायां न तत्रातिव्याप्तिरिति भावः । तथा चानुमितिप्रतिबन्ध-नियतज्ञानविषयत्वं हेत्वाभासत्वमिति पर्यवसन्नम् । नियमश्चात्र यस्मिन् सति अनुमित्यनुत्पादो भवत्येवंरूपः इत्यर्थे पर्यवसिते शङ्कते - **नन्विति** टीका । **व्यभिचारादी**ति टीका । अत्र व्यभिचार्यादिधर्मिण एव पूर्वं लक्ष्यत्वा-भिधानात् न व्यभिचारादिधर्मस्य लक्ष्यत्वमिति साधूक्तं तत्रातिव्याप्तिरिति । तथाहि वह्निर्धूमव्यभिचारीति ज्ञानं वह्निहेतुकधूमानुमितौ प्रतिबन्धकमिति । तथा वह्नौ अनुमितिप्रतिबन्धकज्ञानविषयत्वं वर्तते तथा व्यभिचारस्यापि यतो व्यभिचारविशिष्टवह्न्यादिधर्मिज्ञानस्यैव प्रतिबन्धकत्वमिति भवति प्रतिबन्धकीभूतज्ञानविषयत्वं व्यभिचार-स्यापीति लक्षणमतिव्याप्तम् । **न चे**ति टीका । तथा चानुमितिप्रतिबन्धनियतज्ञानविषयत्वे सति हेतुत्वेनाभिमतत्वं लक्षणार्थः । वह्निर्धूमव्यभिचारीति ज्ञानविषयत्वेऽपि धर्मस्य व्यभिचारस्य हेतुत्वाभिमतत्वाभावात् वह्नेरेव हेतुत्वेनाभिमतत्वात् धर्मे व्यभिचारादावतिव्याप्तिरित्याशङ्कार्थः । हेतुत्वाभिमतं विकल्प्य दूषयति - **हेतुत्वे**ति टीका । अभिमानोऽत्र ज्ञानम्, कादाचित्कः किञ्चित्कालसम्बन्धी । तथाहि धूमवान् वह्नेरित्यत्र वह्नेर्हेतुत्वाभिमानो यदि वह्निर्हेतुत्वेन प्रयुज्यते तदेति । **तात्कालिक** इति टीका । यदा लक्षणं हेत्वाभासलक्षणं क्रियते तदानीं यो हेतुत्वेनाभिमानः । **तथाहि आद्य** इति टीका । कादाचित्कत्वेन हेतुत्वाभिमानपक्षे इत्यर्थः । **व्यभिचारादावि**ति टीका । यदेत्थं हेतुः क्रियते पर्वतो धूमवान् धूमाभाववद्वृत्तित्वादित्येव व्यभिचारी हेतुः प्रयुज्यते तदा व्यभिचारस्यापि हेतुत्वेनाभिमानो वर्तते इति कादाचित्कपक्षे व्यभिचाररूपधर्मेऽतिव्याप्तिस्तथैवेत्यर्थः । **अन्ते(न्त्ये)** इति । धूमवान् वह्नेरित्यादौ वह्नौ धूमाभाववद्वृत्तित्वं साधारणानैकान्तिकत्वम्, तदाश्रयो [204 B] वह्निः साधारणा-

नैकान्तिकः, तत्र यदा हेतुत्वाभिमानो नास्ति अयं हेतुरिति ज्ञानं नास्ति तदा तत्र वह्नावव्याप्तिः, साधारणानैकान्तिकस्य नित्यदोषत्वात् अज्ञातोऽपि दोष इति तत्राव्याप्तिः। लक्षणस्यानुमितिप्रतिबन्धनियतज्ञानविषयत्वे सति तात्कालिकहेतुत्वेनाभिमतरूपस्य तत्राभावादित्यर्थः। अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमिति लक्षणे यथार्थपदं किमिति दत्तम्? तत्र वह्निमान् धूमादित्यत्र धूमो वह्निव्यभिचारीति भ्रमरूपज्ञानविषये धूमेऽतिव्याप्तिवारणार्थं तद् दत्तम्। धूमस्य वह्न्यभाववद्वृत्तित्वाभावात् तद् ज्ञानं न यथार्थमिति न तत्रातिव्याप्तिरिति वक्तव्यम्। तथापि यथार्थपदे दत्ते वह्न्यभाववद्वृत्तित्वभ्रमविषयधूमादावतिव्याप्तिस्तदवस्थैवेत्यत आह - **किञ्चेति** टीका। धूमो वह्निव्यभिचारी[ति] भ्रमे धूमत्ववैशिष्ट्यांशे यथार्थत्वात् धूमो वह्निव्यभिचारीति ज्ञानस्य धूमे धूमत्वांशे यथार्थत्वात् व्यभिचारांशेऽयथार्थत्वेऽपि धूमेऽनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं वर्तत इति धूमे सद्धेतौ अतिव्याप्तिरित्यर्थः। **न चेति** टीका। तादृशज्ञानेऽनुमितिप्रतिबन्धनियतज्ञाने यस्मिन् सति अनुमितिप्रतिबन्धो भवतीति यावत्। **यद्विषयतयेति** टीका। यद्विषयत्वमनुमितिप्रतिबन्धकतावच्छेदकं तदंशे याथार्थ्यं विवक्षितम्। अस्ति च धूमवान् वह्नेरित्यत्र वह्निर्धूमव्यभिचारीति ज्ञाने धूमाभाववद्वृत्तित्वविषयत्वमनुमितिप्रतिबन्धकतावच्छेदकं व्यभिचारविषयत्वेनैव तस्य वह्निर्धूमव्यभिचारीति ज्ञानस्य वह्निहेतुकधूमानुमितिप्रतिबन्धकत्वात्। तदंशे च तस्य ज्ञानस्य याथार्थ्यमेव, अयोगोलके वह्नेर्धूमाभाववद्वृत्तित्वस्य सत्त्वात्, अतस्तत्र लक्षणगमनम्। ननु वह्निमान् धूमादित्यत्र धूमो वह्निव्यभिचारीति ज्ञानस्य धूमाभाववद्वृत्तित्वविषयत्वं प्रतिबन्धकतावच्छेदकम्। न च व्यभिचारांशे याथार्थ्यम्, धूमस्य वह्निव्याप्यत्वात्। धूमत्वांशे याथार्थ्यमस्त्येवातो न तत्र विवक्षितलक्षणस्यातिव्याप्तिरिति भावः। समाधत्ते - **आद्ये** इति टीका। अनुमितिप्रतिबन्धकयावद्विषययाथार्थ्यपक्षे इत्यर्थः। **अपरेति**। शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यो व्योमैकगुणत्वात् इति सत्प्रतिपक्षेऽव्याप्ति, तत्रानित्यत्वव्याप्यपरामर्शेन नित्यत्वानुमितिः प्रतिबध्यते, शब्दे नित्यत्वव्याप्यव्योमैकगुणत्ववत्त्वव्याप्यपरामर्शेन चानित्यत्वानुमितिः प्रतिबध्यते। तत्र च नित्यत्वव्याप्यव्योमैकगुत्ववत्त्वविषयत्वं ज्ञाननिष्ठं प्रतिबन्धकतावच्छेदकम् अनित्यत्वानुमितौ। न च तावत्कविषये नित्यत्वव्याप्यव्योमैकगुणत्ववानिति परामर्शे याथार्थ्यमस्ति, व्योमैकगुणत्वस्य नित्यत्वाव्याप्य[त्वा]त्, [205 A] व्योमैकगुणत्वं वर्तते शब्दे न च तत्र नित्यत्वं शब्दस्य वस्तुतो[ऽ]नित्यत्वात्। तथा सत्प्रतिपक्षेऽव्याप्तिरित्यर्थः। उक्तदोषापरिहारोऽव्याप्त्यपरिहारः। **अन्त्य** इति टीका। यद्विषयकत्वेन ज्ञानस्य प्रतिबन्धकत्वं तन्मध्ये कुत्राऽप्यंशेऽनुमितिप्रतिबन्धकज्ञानस्य याथार्थ्यं विवक्षितमिति पक्षे इत्यर्थः। वह्निमान् धूमादित्यत्र धूमो वह्निव्यभिचारीति ज्ञानस्य धूमवह्न्यभाववद्वृत्तित्वम् अनुमितिप्रतिबन्धकतावच्छेदकमिति धूमत्वांशे तस्य याथार्थ्यमेवेति पुनरप्यतिव्याप्तिस्तदवस्थैवेत्यर्थः। **न चेति**। तस्य धूमो वह्निव्यभिचारीति ज्ञानस्य धूमविषयतयेति धूमविषयतया प्रतिबन्धकत्वं नास्ति किन्तु वह्न्यभाववद्वृत्तित्वविषयतया।

न च तदंशे वह्न्यभाववद्वृत्तित्वांशे धूमो वह्निव्यभिचारीति ज्ञानस्य याथार्थ्यमस्तीति नातिव्याप्तिरित्याशङ्कार्थः । **किञ्चिदिति** । तत्रापि धूमो वह्निव्यभिचारीति ज्ञाने यथा वह्न्यभाववद्वृत्तित्वविषयत्वं प्रतिबन्धकतावच्छेदकं तथा धूमत्वविषयत्वमपि प्रतिबन्धकतावच्छेकमस्त्येव, अन्यथा धूमो वह्निव्याप्य इति ज्ञानदशायां किञ्चिद्वह्नि-व्यभिचारीति ज्ञानेन किञ्चित्त्वेन गृह्यमाणधूमेन वह्न्यनुमितिर्न स्यात् । न च तत्र किञ्चित्त्वेनापि रूपेण धूमे वह्नि-व्यभिचारग्रहो न भवत्येवेति वाच्यम्, अधिकरणांशे समानप्रकारकज्ञानस्यैव प्रतिबन्धकत्वात् । तथाहि धूमवान् वह्निमानिति ज्ञानेन धूमावच्छेदेन पर्वते वह्निमत्त्वग्रहेऽपि पर्वतो वह्निमान् न वेति संशयदर्शनात् । अतः सुष्ठूक्तं धूमे वह्निव्याप्यत्वग्रहेऽपि किञ्चित्त्वेन वह्निव्यभिचारग्रह इति किञ्चित्त्वस्य धूमत्वभिन्नत्वात् इति सिद्धं धूमो वह्निव्यभिचारीति भ्रमरूपज्ञानस्य धूमत्वविषयत्वेनापि प्रतिबन्धकत्वमिति तदंशे धूमो वह्निव्यभिचारीति ज्ञानस्य याथार्थ्यमस्त्येवेति सद्धेतौ अतिव्याप्तिस्तदवस्थैवेति समाधानार्थः । **न चेति सद्धेतु** इत्यादि । शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यो व्योमैकगुणत्वादिति सत्प्रतिपक्षेऽनित्यत्वव्याप्यपरामर्शस्य नित्यत्वव्याप्यवत्ताविषयत्वेन प्रतिबन्धकत्वे मानाभावः । तथा च न तत्रातिव्याप्तिः किन्तु अनित्यत्वानुमितौ अनित्यत्वव्याप्यकृतकत्ववत्ता-विषयत्वेनैव प्रतिबन्धकत्वं तदंशे च याथार्थ्यमेवेति न सत्प्रतिपक्षेऽव्याप्तिरित्याशङ्कार्थः । समाधत्ते - **तद्विषयकस्येति** । अनित्यत्वानुमितौ कृतकत्वपरामर्शस्यानित्यत्वव्याप्यकृतकत्ववत्ताविषयत्वेनैव जनकत्वात् तद्विषयत्वेन प्रतिबन्धकत्वाभावात् एकत्र जनकतावच्छेदकत्वप्रतिबन्धकतावच्छेदकत्वयोर्विरुद्धत्वात् । तथा च नित्यत्वव्याप्यव्योमैकगुणत्ववत्ताविषयत्वमेवानित्यत्वपरामर्शे प्रतिबन्धकतावच्छेदकं वाच्यम् । न च तदंशेऽनित्यत्वव्याप्यकृतकत्वपरामर्शस्य [205 B] याथार्थ्यमस्तीत्यव्याप्तिस्तदवस्थैवेति समाधानार्थः । **नन्विति** । शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यो व्योमैकगुणत्वात् इति सत्प्रतिपक्षस्थले अनित्यत्वनित्यत्वानुमितौ कृतकत्वव्योमैकगुणत्वयोर्मध्येऽन्यतरत्साध्यव्याप्यपक्षवृत्ति न भवतीति व्याप्त्यादिभङ्गज्ञानमेव सत्प्रतिपक्षे प्रतिबन्धकमिति । तत्र च याथार्थ्यमस्त्येव, एकत्र विरुद्धनित्यत्वानित्यत्वव्याप्याभावात् । तत्र प्रतिबन्धकीभूतज्ञानस्य यथार्थत्वात् न प्रकृतलक्षणाव्याप्तिरित्याशङ्कार्थः । समाधत्ते - **तादृशं हीति** टीका । अनयोरेकत्र व्याप्तिपक्षधर्मताभङ्ग इति ज्ञानं न प्रत्यक्षरूपम् । अन्यथा प्रत्यक्षरूपत्वेऽस्य ज्ञानस्य व्याप्त्यादिज्ञानापेक्षाभावात् सर्वत्रावश्यकत्वात् नाव्याप्तिर्भवतीत्यभिप्रायः । **विरुद्धोभयेति** । एकत्रानित्यत्वनित्यत्वयोर्विरुद्धयोर्व्याप्यं न वर्तते । कथम् ? यदि नित्यत्वव्याप्यं तत्र वर्तेत तर्हि तत्र नित्यत्वमपि वर्तेत, व्यापकं विना व्याप्याभावात् । एवमनित्यत्वव्याप्यं यदि तत्र वर्तेत तदाऽनित्यत्वमपि तत्र वर्तेत, व्यापकं विना व्याप्याभावात् । तथा चानित्यत्वनित्यत्वयोर्विरोध एव न स्यादेकाधिकरणवृत्तित्वात् अत एव तादृशविरुद्धत्वरूपव्याप्त्यवधारणात् इति अनुमितिरूपं कृतकत्वव्योमैक-गुणत्वयोरन्यतरव्याप्तिपक्षधर्मताभङ्गरूपं ज्ञानं वाच्यम् । तथा चानित्यत्वनित्यत्वव्याप्यपरामर्शानन्तरं विषयान्तरेति

विषयान्तरसञ्चारः सुखदुःखसाक्षात्कारः, आदिपदात् कामिनीजिज्ञासादिः, तत्रानित्यत्वनित्यत्वानुमितिप्रतिबन्धो न स्यात्, कृतकत्वव्योमैकगुणत्वान्यतरव्याप्त्यादिभङ्गज्ञानस्यानुमितिरूपस्याभावात्, तज्जनकीभूतव्याप्तिपक्ष-धर्मताज्ञानस्य विषयान्तरसञ्चारेण प्रतिबन्धात्। स च प्रतिबन्धो न स्यात्। तस्मादनित्यत्वव्याप्यवत्तानित्यत्वव्याप्य-वत्तापरामर्शयोरेवानित्यत्वनित्यत्वानुमितौ प्रतिबन्धकं वाच्यम्। न च तयोर्याथार्थ्यमस्तीत्यव्याप्तिः सत्प्रतिपक्षे तदवस्थैवेति समाधानार्थः। **न चेति** टीका। यत्र शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यो व्योमैकगुणत्वादित्यत्र सत्प्रतिपक्षे हेत्वोरन्यतरव्याप्त्यादिभङ्गानुमितिहेतुव्याप्त्यादिज्ञानं यदा न जातं कामिनीजिज्ञासादिना प्रतिबन्ध-सम्भवात् तदा तत्रानित्यत्वनित्यत्वानुमितिप्रतिबन्धाभावात् हेत्वाभासत्वेनालक्ष्यत्वात् न तत्राव्याप्तिर्दूषणायेति शङ्कार्थः। **तादृशज्ञानाभावेनेति**। हेत्वोरन्यतरव्याप्त्यादिभङ्गानुमित्यभावेन। तथा च तत्रैव यत्रानुमितिप्रतिबन्धो भवतीति, न तस्य लक्ष्यत्वमेवेति भावः। **समाधत्ते - विरुद्धोभयेति** टीका। विरुद्धयोः साध्यसाध्याभावयोः यौ व्याप्यवत्तापरामर्शः यथाऽनित्यत्वव्याप्यकृतकत्ववानयं शब्दो यद्वा नित्यत्वव्याप्यव्योमैकगुणत्ववानयं शब्द इत्येवंरूपः परामर्शः तयोर्विरोधिसामग्रीत्वेन साध्यज्ञानस्य [206 A] विरोधि यत् साध्याभावज्ञानं तत्सामग्रीत्वेन तत्र प्रतिबन्धकत्वात्। तथा च शङ्कयोक्तम् पूर्वं हेत्वोरन्यतरव्याप्त्यादिभङ्गज्ञानं विना सत्प्रतिपक्षस्थले प्रतिबन्ध एव न भवतीति, तदसमीचीनम्, प्रतिबन्धकतावच्छेदकस्य साध्यज्ञानविरोधिसामग्रीत्वस्य तत्रापि परामर्शद्वये सम्भवात् अनित्यत्वनित्यत्वानुमितिप्रतिबन्धस्यावश्यकत्वात्। तथा च यदुक्तं तत्र हेत्वाभासत्वमेव नास्ति अनुमित्यप्रतिबन्धत्वात् अलक्ष्यत्वात् नाव्याप्तिर्दूषणायेति तदशुद्धमेव तत्राप्यनुमितिप्रतिबन्धस्य दर्शितत्वादिति समाधानार्थः। **अन्यथेति**। साध्यसाध्याभावव्याप्यवत्तापरामर्शयोर्विरोधिज्ञानसामग्रीत्वेनाप्रतिबन्धकत्वे साध्य-साध्याभावव्याप्यवत्तापरामर्शप्रयुक्तं हेत्वोरन्यतरव्याप्त्यादिभङ्गज्ञानस्य प्रतिबन्धकत्वे इत्यर्थः। **तस्यापीति** टीका। तस्य सत्प्रतिपक्षस्य साध्यानुमितिहेतुव्याप्तिपक्षधर्मताज्ञानाविघटकत्वात् बाधसत्प्रत्तिपक्षयोः साक्षादनु-मितिप्रतिबन्धकत्वेन हेत्वाभासत्वमिति सिद्धान्तो भज्येत, हेत्वोरन्यतरव्याप्त्यादिभङ्गानुमितिद्वारा साध्यव्याप्य-वत्तासाध्याभावव्याप्यवत्ताज्ञानयोस्त्वयाऽनुमितिप्रतिबन्धकत्वाभ्युपगमात्। **करणे** इति। व्याप्तिपक्षधर्मताज्ञानं तदविघटकत्वात्। यद्यपि बाधप्रतिरोधाभ्यां करणं न विघट्यते तथापि बाध्यस्य ग्राह्याभावावगाहित्वात् साक्षाद-नुमितिप्रतिबन्धकत्वम्। सत्प्रतिपक्षस्य तु साध्यस्य विरोधिज्ञानं साध्याभावज्ञानम्, तत्सामग्री यः साध्याभावव्याप्य-वत्तापरामर्शः, तत्त्वेन साक्षादनुमितिप्रतिबन्धकत्वम्। साक्षात्प्रतिबन्धकत्वं च द्वारान्तरं विना प्रतिबन्धकत्वम्। तच्च सत्प्रतिपक्षेऽप्यस्त्येवेति **न्याय**सिद्धान्तः, एतस्य भङ्गः स्यात् इति समाधानार्थः। अभ्युपेत्याह- **किञ्चेति**। **यत्रेति**। यथाऽयं घटः कम्बुग्रीवादिमत्त्वात् इयं पृथिवी गन्धवत्त्वात् इत्यत्र घटत्वपृथिवीत्वयोर्विरोधज्ञानदशायां सत्प्रतिपक्षे भ्रमात् विरोधो गृहीतस्तत्र हेत्वोरन्यतरव्याप्त्यादिभङ्गज्ञानस्य द्वारत्वेन प्रतिबन्धकत्वेन त्वयाभ्युपगमात्

तस्याऽयथार्थत्वात् । तथाहि - कम्बुग्रीवादिमत्त्वं घटत्वव्याप्यं घटे वर्तते, गन्धवत्त्वं पृथिवीत्वव्याप्यं पक्षे घटे च वर्तते इति हेत्वोरन्यतरव्याप्त्यादिभङ्गज्ञानमयथार्थमेवेति यथार्थत्वघटितं हेत्वाभासलक्षणं तत्राव्याप्तमेवेति समाधानार्थः । **तज्ज्ञानस्येति** । घटत्वव्याप्यकम्बुग्रीवादिमत्त्वपृथिवीत्वव्याप्यगन्धवत्त्वज्ञानस्य यत् अन्यतर-व्याप्तिभङ्गज्ञानं तस्येत्यर्थः । **तादृशज्ञानमिति** टीका । साध्यव्याप्यवत्ताज्ञानं साध्याभावव्याप्यवत्ताज्ञानं चेत्यर्थः । तथा च यदि तस्य प्रतिबन्धकत्वं स्यात् तदा यथार्थत्वघटितप्रकृतलक्षणमव्याप्तं स्यादित्यभिसन्धिः । **किन्त्विति** । अयं घटः कम्बुग्रीवादिमत्त्वात् इयं पृथिवी गन्धवत्त्वात् इत्यत्र घटत्वपृथिवीत्वविरोधज्ञानदशायां सत्प्रतिपक्षे इमौ हेतू घटत्वपृथिवीत्वे स्वसाध्यासाधके इति ज्ञानं प्रतिबन्धकं तच्च यथार्थमेव तस्य तदानीं स्वसाध्यासाधकत्वात्, [206 B] तदा घटत्वपृथिवीत्वानुमित्यभावादिति यथार्थत्वघटितप्रकृतलक्षणाव्याप्तिः सत्प्रतिपक्षे न भवति प्रतिबन्धकीभूतस्य स्वसाध्यासाधकत्वज्ञानस्य यथार्थत्वादिति प्रघट्टकार्थः । **अन्यथेति** । सत्प्रतिपक्षस्थले याऽसाधकतानुमितिः तस्या अप्रतिबन्धकत्वेऽसाधकतानुमानप्रयोगवैयर्थ्यापत्तेरित्यर्थः । सत्प्रतिपक्षस्थले-ऽसाधकतानुमितिरेवं यथा तव हेतुरसाधकः सत्प्रतिपक्षितत्वादिति सिद्धान्त एवेति भावः । साध्यासाधकतानुमितेः प्रतिबन्धकत्वं विकल्प्य दूषयति - **साध्यासाधकत्वं हीति** । साध्यस्य या सिद्धिस्तदजनकत्वं तदुपधानाभावः तत्सम्बन्धाभाव इति यावत् । साध्यानुमितेः प्रतिबन्धकतावच्छेदको यो धर्मो व्यभिचारादिस्तद्वत्त्वं वा । **तज्ज्ञानं चेति** । हेतौ साध्यानुमित्यजनकत्वज्ञानं चेत्यर्थः । **न साक्षादिति** धर्मान्तरम् अद्वारीकृत्येत्यर्थः । **बाधवदिति** । यथा बाधस्यानुमितिविषयीभूतं यत् पक्षे साध्यवत्त्वं तद्विरोधि यत् पक्षे साध्याभाववत्त्वं तदवगाहित्वेनैव प्रतिबन्धकत्वम्, तथा न साध्याजनकत्वज्ञानम् । अनुमितिविषयस्य योऽभावः साध्याभावस्तदवगाहित्वेन प्रतिबन्धकत्वम् अनुमितेः साध्यसाधकत्वस्याविषयत्वात् असाधकताज्ञानस्य साध्यानुमित्यजनकत्वस्य विषयत्वात् । द्वितीयविकल्पम् अनुमितिप्रतिबन्धकतावच्छेदकरूपवत्त्वज्ञानमपि न साक्षात् बाधवत् ग्राह्याभावावगाहितया प्रतिबन्धकम् अनुमितेः साध्यवत्त्वस्य विषयत्वात् एतस्य चासाधकतानुमान-स्यानुमितिप्रतिबन्धकतावच्छेदकरूपवत्त्वस्य विषयत्वात् । न च तयोः परस्पराभावरूपत्वमित्यभिसन्धिः । अतोऽसाधकतानुमितेः न प्रतिबन्धकत्वम् । प्रतिबन्धकौ परामर्शौ घटत्वव्याप्यकम्बुग्रीवादिमत्त्वपृथिवीत्वव्याप्य-गन्धवत्त्वपरामर्शौ, तयोश्च यथार्थत्वमेवेति अन्यतरव्याप्त्यादिभङ्गज्ञानद्वारा सत्प्रतिपक्षस्थलेऽव्याप्तिर्नास्तीति यदुक्तं तदसमीचीनं पूर्वं दूषितत्वात् । ननु मास्तु साक्षादसाधकताऽनुमितेः साध्यानुमितिप्रतिबन्धकत्वम्, [किन्]तु करणविघटनद्वारा प्रतिबन्धकत्वं व्यभिचारादिवत् भविष्यतीत्यत आह - **नापीति** । **व्यभिचारादीति** । यथा व्यभिचारादिज्ञानस्य परामर्शविषयीभूतव्याप्त्याद्यभावविषयतया करणविघटकत्वं न तथाऽसाधकतानुमितेः करणविषयाभावावगाहित्वं करणस्य व्याप्तिपक्षधर्मताविषयत्वात् असाधकतानुमितेश्चासाधकताविषयत्वात् ।

न च तयोः परस्परविरहरूपत्वमिति न करणविघटनद्वाराऽप्यसाधकतानुमितेः प्रतिबन्धकत्वमिति समाधानार्थः । **अन्यथेति** । असाधकतानुमितेरिदमसाधकं सत्प्रतिपक्षितत्वादित्यसाधकतानुमितेः व्यभिचारादिवत् करण-विघटकत्वे । **हेत्वाभासान्तरेति** । न चात्र सिद्ध्यसिद्धिव्याघातः । तथाहि - हेत्वाभासान्तरत्वं किं [207 A] व्यभिचारादिपञ्चकभिन्नहेत्वाभासत्वं वा व्यभिचारादिपञ्चकभिन्नत्वमात्रं वा ? न तावदाद्यः, आपाद्याप्रसिद्धेः व्यभिचारादिपञ्चकभिन्नत्वे सति हेत्वाभासत्वस्य कुत्राप्यप्रसिद्धेः । नापि द्वितीयः इष्टापत्तेः असाधकत्वस्य व्यभिचारादिपञ्चकभिन्नत्वस्य सर्वैरेवाङ्गीकारादिति वाच्यम् व्यभिचारादिभिन्नस्यासाधकत्वस्य हेत्वा-भासत्वापादनात् । तथाहि व्यभिचारभिन्नमिदं यदि व्याप्त्यादिकरणविघटकं स्यात् हेत्वाभासः स्यात् इत्यापादनेन हेत्वाभासत्वमापादनीयम् । ननु असाधकतानुमानं नानुमितिप्रतिबन्धकं तदा कथमसाधकताप्रयोगः क्रियते तान्त्रिकैरित्यत आह - **असाधकतानुमानं चेति** । **किन्त्विति** । वादिना एतादृशी व्यवस्था कृता हेत्वाभासाः प्रयोज्या असाधकतानुमानं च कार्यमिति, तत्रावश्यमसाधकतानुमानमपि उद्देश्यं कर्तव्यमित्यर्थः । अन्यथा तदकरणे व्यवस्थाभङ्गापत्त्या हेत्वाभासोद्भावकस्य निग्रहापत्तेरिति भावः । **किञ्चेति** । हेत्वाभासलक्षणेऽनुमिति-प्रतिबन्धकयथार्थज्ञानविषयत्वमित्यत्र पुरुषे दण्डवद्विशेषणं विद्यमानं सत् व्यावर्तकम् गुरूणां टीकेति वत् गुरोरुपलक्षणत्ववदुपलक्षणत्वं वेति विकल्पार्थः । **नाद्य** इति । न विशेषणत्वपक्ष इत्यर्थः । अज्ञायमाने नित्यदोषे व्यभिचारादौ अव्याप्तिः, अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वस्य विशेषणस्य तदाऽभावात् । अज्ञायमान-दशायां यदा व्यभिचारो न ज्ञायते तस्यां दशायाम् अनुमितिप्रतिबन्धकज्ञानविषयत्वमेव नास्तीति भावः । नित्य-दोषा अनुमितौ साध्याभाववद्वृत्तित्वरूपो व्यभिचारः १, विरुद्धत्वम् २, असिद्धत्वम् ३, बाधश्चेति ४ । [धूमो वह्नेरित्यत्र] वह्नेरयोगोलके धूमाभाववद्वृत्तित्वमेवास्ति १ । गौरश्वत्वादित्यत्र अश्वत्वस्य गोत्वासमानाधिकरणं सर्वदैवास्ति २ । जलह्रदो वह्निमान् धूमादित्यत्र धूमस्य जलह्रदावृत्तित्वं सदास्तीति स्वरूपासिद्धत्वम् । एवं काञ्चनमयोऽद्रिरग्निमान् धूमादित्यत्र काञ्चनमयत्वविशेषणस्याभावात् आश्रयासिद्धत्वं सर्वदेति कृत्वा नित्य-दूषणम् । एवं वह्निमान् नीलधूमादित्यत्र नीलधूमत्वस्य वैयर्थ्यं नित्यदूषणम् ३ । बाधो यथा जलह्रदो वह्निमान् धूमादित्यादौ जलह्रदे साध्याभावो नित्यदोषः ४ । एतेषु अज्ञायमानदशायां ज्ञायमानरूपविशेषणाभावात् हेत्वा-भासलक्षणाव्याप्तिरिति पर्यवसितोऽर्थः । **न चेति तदेति** । अज्ञायमानतादशायां तत् नित्यदोषो व्यभिचारादिर-सङ्ग्राह्यमलक्ष्यमेवेत्यर्थः । समाधत्ते - **साध्यव्यापकेति** । अयं गौरश्वत्वादित्यत्र गोत्वरूपसाध्यस्य व्यापकीभूतो योऽभावोऽश्वत्वाभावस्तत्प्रतियोगित्वरूपविशेषलक्षणस्य विरुद्धलक्षणस्य अज्ञायमानतादशायामपि सत्त्वेन लक्ष्यत्वमेवेति । न हि विशेषलक्षणाक्रान्तं सामान्यलक्षणेनासङ्ग्राह्यं भवतीति । [207 B] **अन्यथेति** । अज्ञाय-मानदशायां सामान्यलक्षणस्यालक्ष्यत्वे विशेषलक्षणस्य साध्यव्यापकीभूताभावप्रतियोगित्वादेः तदा अज्ञाय-

मानत्वदशायां तद्दशायामतिव्याप्त्यापत्तेः, विशेषलक्षणस्य लक्ष्यं हि सामान्यलक्षणाक्रान्तमेवेति भावः। यथा पृथिव्याः सामान्यलक्षणं गन्धवत्त्वम्, विशेषलक्षणं सुरभित्वमसुरभित्वं च, सुरभित्वमसुरभित्वं वा विशेषलक्षणं गन्धवति(त्त्व)सामान्यलक्षणानाक्रान्ते कुत्रापि वर्तत इत्यभिप्रायः। **द्वितीय** इति। ज्ञायमानत्वस्योपलक्षणतायाः पक्ष इत्यर्थः। यथा गुरूणां टीका गुरूणां नष्टत्वेऽपि गुरूपलक्षिततत्कृतित्वादेरुपलक्ष्यतावच्छेदकस्य व्यावर्तकत्वम्। **सद्धेताविति**। यथा शब्दोऽनित्यः शब्दत्वादित्यत्र सद्धेतौ शब्दत्वस्य सद्धेतोः अनित्यत्वसाध्यवत्त्वेन निश्चितात् सपक्षादेर्व्यावृत्ततया गृहीतस्य विपक्षात् नित्यत्ववत्तया निश्चितादाकाशादेर्व्यावृत्ततया गृहीतस्य शब्दत्वस्य हेतोरसाधारण्येन विपक्षा(क्ष)बाधकाज्ञानदशायां यथा विपक्षबाधकं च शब्दस्य नष्टो गकार उत्पन्नो गकार इत्यादि ज्ञानमेव तदनवतारदशायां हेत्वभावस्य साध्याभावो नित्यत्वं तद्व्याप्तिग्रहात् तद्व्यापकत्वग्रहात् शब्दत्वाभावस्येति व्यतिरेकितया अनित्यत्वानुमितिसामग्री वर्तते, शब्दत्वस्य नित्यत्वाभावो नित्यत्वव्यापकाभावप्रतियोगितया नित्यत्वानुमितिसामग्री वर्तते, इति सत्प्रतिपक्षोत्थापकतयाऽसाधारणस्य प्रतिबन्धकत्वम्, तत्र विपक्षबाधकग्रहदशायां शब्दत्वेनाऽनित्यत्वानुमितिरेव यदा भवति तत्र नित्यत्वानुमितिसामग्र्या विपक्षबाधकाग्रहात् दुर्बलत्वात् तदा प्रकृतलक्षणेऽनुमितीत्यादिके ज्ञायमानत्वस्योपलक्षणत्वपक्षे हेतौ शब्दत्वेऽतिव्याप्तिः। असाधारण्यानवतारदशायामनुमितिप्रतिबन्धकं ज्ञानम् अनित्यत्ववद्व्यावृत्तत्वज्ञानम्, तदनवतारदशायां यद्यपि तदानीमसाधारण्यज्ञानं नास्ति तथापि विपक्षबाधकानवतारदशायां पूर्वं तदासीत्। तदुपलक्षितम् अनुमितिप्रतिबन्धकज्ञानोपलक्षितं यथार्थज्ञानविषयत्वं शब्दत्वे वर्तते एवेत्यतिव्याप्तिरित्यर्थः। **सत्प्रतिपक्षे चेति**। यथा शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यो व्योमैकगुणत्वात् इत्यत्र सत्प्रतिपक्षेऽनित्यत्वनित्यत्वविपक्षबाधकाग्रहदशायामुपनयानुमितिप्रतिबन्धो भवति। तत्र सद्धेतौ कृतकत्वे शब्देऽनित्यत्वस्य विपक्षो नित्यत्वम्, तद्बाधकं नष्टो गकार इत्यादिज्ञान[म्], तद्ग्रहदशायां यदाऽनित्यत्वानुमितिरेव भवति नित्यत्वानुमितिसामग्र्या दुर्बलत्वात्। तत्र दशायां ज्ञायमानत्वस्योपलक्षणत्वपक्षेऽतिव्याप्तिः अनुमितिप्रतिबन्धकज्ञानविषयत्वस्य विपक्षबाधकाग्रहदशायां सत्त्वात् इति सद्धेतावप्यतिव्याप्तिरिति भावः। अनुमित्यनुत्पादनियतयथार्थज्ञानविषयत्वं हेत्वाभासत्वमिति लक्षणेऽपि दूषणान्तरमाह - **अपि चेति**। **तादृशेति**। अनुमितिप्रतिबन्धकज्ञानविषयत्वमित्यर्थः। तथा च यस्य हेतोर्यत्पुरुषायानुमितिप्रतिबन्धकज्ञानविषयत्वं तस्य हेतोः तं प्रति [208 A] तत्पुरुषनिरूपितहेत्वाभासत्वम्। **अन्यं प्रतीति**। यस्य कस्याप्यनुमितिप्रतिबन्धकज्ञानविषयत्वेन पुरुषमात्रनिरूपितमेव हेत्वाभासत्वमिति वा। प्रथमपक्षे उदाहरणं यथा सत्प्रतिपक्षादौ चैत्रानुमितिप्रतिबन्धकज्ञानविषयत्वेन चैत्रनिरूपितमेव हेत्वाभासत्वमिति। द्वितीये उदाहरणं यथा पर्वतो धूमवान् वह्नेरित्यादौ हेतोर्विपक्षवृत्तित्वज्ञानस्य चैत्राद्यनुमितिप्रतिबन्धकत्वेऽपि पुरुषमात्रं प्रत्यपि तस्य हेत्वाभासत्वं साधारणस्य नित्यदोषत्वादिति द्वितीयविकल्पोदाहरणम्। प्रथमं दूषयति -

**आद्य** इति। **येनेति**। यथाऽयं गौरश्वत्वादित्यत्राश्वत्वस्य येन गोत्वविरुद्धत्वं न गृहीतं तं प्रति अश्वत्वस्य विरुद्धत्वरूपहेत्वाभासत्वं न स्यात्, तत्पुरुषीयानुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वाभावात्। अन्त्यपक्षं दूषयति - **अन्त्ये** इति। यथा शब्दोऽनित्यः कृतकत्वादित्यत्र अनित्यत्वविपक्षबाधकग्रहदशायां चैत्रस्यानुमितिजनकत्वेऽपि मैत्रस्यानित्यत्वविपक्षबाधकाग्रहदशायां मैत्रस्यानुमितिप्रतिबन्धकज्ञानविषयत्वात् चैत्रं प्रत्यपि तस्य हेत्वाभासत्वापत्तिरित्यर्थः। वस्तुगत्या चैत्रं प्रति हेत्वाभासत्वं नास्तीति भावः। ननु व्यभिचारादिधर्मेऽतिव्याप्तिरित्यत आरभ्य हेत्वाभासत्वापत्तेरित्यन्तेन ग्रन्थेन महापूर्वपक्षग्रन्थे[न]। **अत्रोच्यते** इति। सिद्धान्तः क्रियते इत्यर्थः। **अनुमितीति**। अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वमित्यत्र लक्षणेऽनुमितिप्रतिबन्धकपदेनानुमितिप्रतिबन्धकतावच्छेकमेव विवक्षितम्, तच्च सव्यभिचारत्वादिकधर्म एव। उपाधयो धर्मा इत्यर्थः। नन्वनुमितिप्रतिबन्धकतावच्छेदकत्वं यदि अनुमितिप्रतिबन्धकतावच्छित्तिप्रत्ययहेतुत्वं तदा व्यभिचारादिज्ञानत्वेऽतिव्याप्तिस्तस्याप्यनुमितिप्रतिबन्धकतावच्छित्तिप्रत्ययहेतुत्वात्। व्यभिचारादिज्ञानस्य प्रतिबन्धकत्वे व्यभिचारादिज्ञानत्वमेव तदवच्छेदकम्। अथ ज्ञानस्यानुमितिप्रतिबन्धकतायां विषयतया यदवच्छेदकं यस्य ज्ञानं प्रतिबन्धकं तस्य विषयतया प्रतिबन्धकतावच्छेदकत्वम्। यथा जलह्रदो वह्निमान् इत्याद्यनुमितौ जलह्रदो न वह्निमानिति ज्ञानस्य प्रतिबन्धकतायां जलह्रदे वह्न्यभावस्य ज्ञाने विषयतासम्बन्धेनावच्छेदकत्वं तदा लिङ्गे हेतौ अव्याप्तिः, ज्ञानस्य विषयतासम्बन्धेन प्रतिबन्धकतावच्छेदको यस्तद्वत्त्वाभावात्। कथम्? वह्निर्धूमव्यभिचारीति ज्ञाने विषयतासम्बन्धेन प्रतिबन्धकतावच्छेदको व्यभिचारादिविशिष्टो हेतुर्वह्न्यादिरेव, तस्य वह्न्यादिहेतोर्व्यभिचारादिविशिष्टवह्न्याद्यभावात्। न हि वह्न्यादिर्व्यभिचारविशिष्टवह्न्यादिमान् भवतीत्यत आह - **अनुमितिप्रतिबन्धकतावच्छेदकत्वमिति**। **लिङ्गान्यत्वे सतीति**। तथा च हेतौ वह्न्यादौ नाव्याप्तिः। तथाहि - वह्निर्धूमव्यभिचारीति ज्ञाने विषयतया [208 B] लिङ्गभिन्नं प्रतिबन्धकतावच्छेदकं भवति। वह्नौ अयोगोलके धूमाभाववद्वृत्तित्वं तद्वत्त्व तु वह्नौ वर्तते एवेति लिङ्गान्यत्वे सति अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वमेव सिद्धम्। नन्विदं पूर्वमेव दूषितमेव लिङ्गत्वम्। तथाहि - लिङ्गत्वं व्याप्यत्वं वा व्याप्यत्वेनाभिमतत्वं वा। नाद्यः, पुनरपि वह्न्यादावव्याप्तिस्तस्यापि धूमाव्याप्यत्वेन लिङ्गान्यत्वात्। तथा च लिङ्गान्यत्वे सति यद्विषयतया ज्ञानेऽनुमितिप्रतिबन्धकत्वं तद्वत्त्वं तु वह्नौ नास्ति। न हि वह्नौ वह्निरस्तीति। न द्वितीयः, वह्निर्धूमव्यभिचारीति ज्ञानदशायां वह्नेर्धूमव्याप्यत्वेन ज्ञानाभावात्। कथम्? लिङ्गान्यत्वे सति ज्ञाने विषयतया यदनुमितिप्रतिबन्धकतावच्छेदकं तद्वत्त्वं लक्षणं तदानीं व्यभिचारग्रहदशायां लिङ्गान्यत्वे सति अनुमितिप्रतिबन्धकतावच्छेदको व्यभिचारविशिष्टवह्निरेव, वह्नौ वह्निमत्त्वाभावात् व्यभिचारिणि वह्नौ हेत्वाभासेऽव्याप्तिरिति चेत् उच्यते - **लिङ्गान्यत्वे सतीति**। अत्र लिङ्गपदेन यस्य हेत्वाभासत्वेन लक्ष्यत्वं तद् विवक्षितम्। न चैवं वह्नावव्याप्तिः। धूमवान् वह्नेः इत्यत्र हेत्वाभासत्वेन लक्ष्यो

भवति वह्निः। तत्र वह्निर्धूमव्यभिचारीति ज्ञाने विषयतयाऽनुमितिप्रतिबन्धकतावच्छेदको धर्मो वह्निवृत्तिव्यभिचार इति तद्वत्त्वं च वह्नौ वर्तते एव व्यभिचारस्य लक्ष(क्ष्य)वह्निभिन्नत्वात् इत्यभिप्रायः। लिङ्गान्यत्वे सतीति विशेषणं तु व्यभिचारिणि हेतौ अव्याप्तिवारणार्थम्। तथाहि - वह्निर्धूमव्यभिचारीति ज्ञाने विषयतयाऽनुमितिप्रतिबन्धकतावच्छेदको यस्तद्वत्त्वं लक्षणम्, तच्च प्रतिबन्धकतावच्छेदकं वह्निविशिष्टधूमाभाववद्वृत्तित्वमेव। न च वह्नौ वह्निविशिष्टधूमाभाववद्वृत्तित्वमस्ति वह्निरूपविशेषणाभावात्। इतो वह्नौ अव्याप्तिः, तद्वारणं तु लिङ्गान्यत्वे सतीति पदेन भवत्येव। तथाहि - वह्निर्धूमव्यभिचारीति ज्ञाने विषयतया लिङ्गान्यत्प्रतिबन्धकतावच्छेदकं धूमाभाववद्वृत्तित्वमेव तद्वत्त्वं तु वह्नावस्तीति नाव्याप्तिर्वह्निरूपहेत्वाभासे इति भावः। ननु अनुमितिप्रतिबन्धकज्ञाने लिङ्गान्यत्वे सति विषयतया प्रतिबन्धकतावच्छेदको यो धर्मस्तद्वत्त्वमिति लक्षणं पर्यवसितम्, तच्च संयोगसम्बन्धेन द्रव्यसाध्यकसंयोगसम्बन्धेन द्रव्यान्तरे हेतौ व्यभिचारिणि अव्याप्तम्। तथाहि - अयं प्रदेशः चैत्रवान् तत्सोदरमैत्रवत्त्वात् इत्यत्र व्यभिचारिणि मैत्रेऽव्याप्तिः, यदा चैत्रं मुक्त्वा मैत्रः कुत्रापि गतः पुनरप्यागतस्तदा मैत्रे चैत्राभाववद्वृत्तित्वं नास्ति चैत्रवति प्रदेशे तदानीं मैत्रस्य विद्यमानत्वात् तदा चैत्राभाववद्वृत्तित्वस्याभावादव्याप्तिरित्यत आह - **तद्वत्त्वगोचरेति**। तथा च तत्र प्रदेशे तदानीं चैत्राभाववद्वृत्तित्वाभावेऽपि चैत्राभाववद्वृत्तित्वज्ञानस्य यथार्थत्वात्, पूर्वं मैत्रवत्त्वस्य चैत्राभाववद्वृत्तित्वात्, [209 A] रक्ते घटे पूर्वश्यामे घटश्याम इति ज्ञानवत् यदाकदाचित् घटस्य श्यामत्वात्। ननु पुनरपि व्यभिचारादिधर्मेऽतिव्याप्तमिदं लक्षणम्, तथाहि वह्निर्धूमव्यभिचारीति ज्ञानविषयत्वं वह्नौ धूमे च वर्तते इति ज्ञानेऽनुमितिप्रतिबन्धकतावच्छेदको यो धर्मो व्यभिचारादिस्तद्वत्त्वगोचरयथार्थज्ञानविषयत्वं वह्नेरिव व्यभिचारादेरप्यस्ति इत्यत आह - **विषयत्वमिति**। विशेष्यत्वं यथा घट इति ज्ञाने घटत्वस्य प्रकारताख्यविषयता, घटस्य विशेष्यताख्यविषयता, घटघटत्वसमवाययोः सांसर्गिकी विषयता, तासां मध्ये या विशेष्यताख्या विषयता साऽत्र विवक्षितेत्यर्थः। **तेनेति** टीका। विशेष्यत्वविवक्षणेनेत्यर्थः। **व्यभिचारादौ** इति। आदिपदग्राह्यस्तु विरुद्धत्वादिः। वह्निर्धूमव्यभिचारीत्याद्यनुमितिप्रतिबन्धकज्ञाने लिङ्गत्वं भवति, वह्नौ तदन्यत्वे सति विषयतयाऽनुमितिप्रतिबन्धकतावच्छेदको धर्मो व्यभिचारादिस्तद्वत्त्वगोचरयथार्थज्ञानं तु वह्निर्धूमव्यभिचारवानिति ज्ञानमेव, तादृशज्ञानविशेष्यत्वं तु वह्नावेव न तु व्यभिचारादिधर्मे इति न तत्रातिव्याप्तिरिति। ननु ज्ञाने लिङ्गान्यत्वे सति अनुमितिप्रतिबन्धकतावच्छेदको यो धर्मस्तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वविवक्षायामपि सत्प्रतिपक्षाद्युत्तीर्णतादशायां विपक्षे बाधकग्रहदशायां कृतकत्वहेतौ अनित्यत्वसाधके पुनरतिव्याप्तिः। तथाहि शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यो व्योमैकगुणत्वात् इति सत्प्रतिपक्षितत्वदशायामनुमितिप्रतिबन्धकतावच्छेदको यो धर्मो विरोधिज्ञानसमानकालीनानित्यत्वव्याप्यकृतकत्वम् अथवा विरोधिसामग्री नित्यत्वव्याप्यव्योमैकगुणत्वज्ञानम्, तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वं विपक्षबाधकग्रहदशायामपि सत्प्रति-

पक्षोत्तीर्णे सत्प्रतिपक्षाभावदशायामप्यस्तीति तद्दशायामतिव्याप्तिरित्यत आह - **तात्कालिके**ति। तात्कालिकत्वं चात्र यस्मिन् काले यो लक्ष्यत्वेनाभिमतो हेत्वाभासस्तत्कालावच्छेदेनानुमितिप्रतिबन्धकतावच्छेदकवत्त्वगोचर-यथार्थज्ञानविशेष्यत्वं विवक्षितम्। न चेदं सत्प्रतिपक्षोत्तीर्णतादशायां सद्धेतावस्ति। तथाहि - नष्टो गकार इत्यादि नित्यत्वरूपविपक्षबाधकावतारदशायां सत्प्रतिपक्षोत्तीर्णे तत्कालावच्छेदेनानुमितिप्रतिबन्धकतावच्छेदकवत्त्व-गोचरयथार्थज्ञानविशेष्यत्वाभावात्। अनुमितिप्रतिबन्धकतावच्छेदकं तु सत्प्रतिपक्षे विषयतया साध्याभाव-व्याप्यत्वमेव। न च सत्प्रतिपक्षोत्तीर्णतादशायां हेतौ तद्वत्त्वमस्ति येन तत्कालावच्छेदेन तद्वत्त्वज्ञानं यथार्थं स्यात्, इति सत्प्रतिपक्षोत्तीर्णतादशायां सद्धेतौ अनित्यत्वसाध्यकृतकत्वदशायां नातिव्याप्तिः। **पाकरक्ते** इति। यथा [209 B] पाकात् पूर्वं घटः श्यामोऽभवत्, पाकानन्तरं श्यामे रूपे नष्टे रक्तरूपमुत्पन्नम्, तद्दशायां रक्तत्वदशायां श्यामोऽयं घट इति बुद्धिर्यथार्था, बुद्धेर्याथार्थ्यं तु तद्वति तत्प्रकारकत्वमेव, तच्च रक्तत्वदशायां घटः श्याम इति ज्ञानेऽप्यस्ति श्यामत्ववति घटे श्यामत्वप्रकारकत्वात्। अयथार्था तु बुद्धिः रक्तत्वदशायाम् इदानीं श्याम इति ज्ञानं तस्य हि रक्तत्वकालावच्छेदेन श्यामत्वप्रकारकत्वात्। यत् यदवच्छेदेन नास्ति तस्य तदवच्छेदेन ज्ञानमयथार्थम्, यथा शाखावच्छिन्नः कपिसंयोगो मूलावच्छेदेन नास्ति मूलावच्छेदेन शाखावच्छिन्नकपिसंयोगज्ञानमयथार्थं मूलावच्छेदेन शाखावच्छिन्नकपिसंयोगाभावात्। तथा प्रकृतेऽपि रक्तत्वकालावच्छेदेन घटे श्यामरूपं नास्ति इति तत्कालावच्छेदेन श्यामरूपज्ञानमयथार्थम्, तद्वत् प्रकृते सत्प्रतिपक्षतोत्तीर्णतादशायां सद्धेतौ कृतकत्वेऽनु-मितिप्रतिबन्धकतावच्छेदको धर्मो नित्यत्वव्याप्यव्योमैकगुणत्ववत्त्वादिः तद्वत्त्वाभावात् तत्कालावच्छेदेन तद्वत्त्वज्ञानमयथार्थमेवेति तत्कालावच्छेदेन तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वस्य नातिव्याप्तिरित्यभिप्रायः। **न चैवमि**ति। एवं लक्ष्यत्वाभिमततत्कालावच्छेकत्वविवक्षणेन यथार्थत्वपदं व्यर्थमिति यतः तात्कालिकेति लक्ष्य-त्वाभिमतकालावच्छेदेनानुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वाभावात् सद्धेतौ नातिव्याप्तिः। तथाहि - शब्दोऽ-नित्यः शब्दत्वात् इत्यत्र शब्दत्वे हेतौ विपक्षे बाधकग्रहदशायामसाधारणतोत्तीर्णेऽनुमितिप्रतिबन्धकतावच्छेदकस्य निश्चितसाध्यवद्व्यावृत्तत्वस्याभाव इति तद्दशायां सद्धेतौ नातिव्याप्तिरित्याशङ्कार्थः। **तद्वत्त्वमिति** टीका। लक्ष्यत्वाभिमतकालावच्छेदेनानुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वं न विषयविशेषणं न लक्ष्यत्वाभिमत-हेतुविशेषणमित्यर्थः। **किन्त्विति**। ज्ञानविशेषणमनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वमिति हेत्वाभासलक्षणे यज्ज्ञानपदं तद्विशेषणमित्यर्थः। तथा च धूमप्रागभावादिति वत् अन्यविशेषणत्वान्न वैयर्थ्यमिति भावः। तथाहि-पर्वतो वह्निमान् धूमप्रागभावात् इत्यत्र प्रागभावपदस्य न वैयर्थ्यम्। तत्र हि वह्निव्यभिचार्यवृत्तिधूमत्वप्रवेशेऽपि धूमत्वस्य[1] प्रागभावावृत्तित्वात्। यन्निष्ठा यन्निरूपिता व्याप्तिर्येन विशेषणेन विना ग्रहीतुं न शक्यते तस्यैव

१. धूमत्वं धूमप्रागभावे। प्रतौ टिप्पणी।

सार्थकत्वमिति न्यायात् धूमप्रागभावत्वस्य धूमप्रागभावनिष्ठव्याप्त्यवच्छेदकतया सार्थकत्वम्। तथाहि धूमप्रागभावनिष्ठा व्याप्तिर्धूमप्रागभावावृत्तिना धूमत्वेन नावच्छिद्यते परं धूमप्रागभावत्वेनावच्छिद्यते। यथा यत्र यत्र धूमप्रागभावस्तत्र वह्निरिति (210 A) व्याप्तिग्रहात् इति कृत्वा धूमप्रागभावपदं न व्यर्थम्, तथा प्रकृतेऽपि अनुमितिप्रतिबन्धकतावच्छेदको यो धर्मस्तद्वत्त्वगोचरयथार्थज्ञानविषयत्वरूपहेत्वाभासेतरभेदसाध्यकहेतौ या व्याप्तिर्गृह्यते साऽनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वेन नावच्छिद्यते। तस्य हि अनुमितिप्रतिबन्धकतावच्छेदकवत्त्वगोचरयथार्थज्ञानविषयत्वावृत्तित्वेन व्याप्तिव्यधिकरणत्वादिति न वैयर्थ्यमिति समाधानार्थः। **तथा चे**ति। अनुमितिप्रतिबन्धकतावच्छेदकस्य ज्ञानविशेषणत्वे ज्ञाने च यथार्थत्वविशेषणाप्रवेशे वह्निमान् धूमात् इत्यत्र धूमेऽतिव्याप्तिः। तत्रापि हि धूमो वह्निव्यभिचारीति भ्रममादायानुमितिप्रतिबन्धकतावच्छेदको यो धर्मो वह्न्यभाववद्वृत्तित्वं तद्वत्त्वगोचरज्ञानविषयत्वस्य धूमे सत्त्वादिति सद्धेतौ धूमेऽप्यतिव्याप्तिः। तथा च तद्वत्त्वस्य ज्ञानविशेषणत्वमित्युक्तत्वात् यथार्थत्वविशेषणप्रवेशे च न तत्रातिव्याप्तिः, धूमे वह्निव्यभिचारित्वगोचरयथार्थज्ञानविशेष्यत्वाभावात् धूमो वह्निव्यभिचारीति ज्ञानस्यायथार्थत्वात् धूमे वह्निव्यभिचारित्वाभावात् इत्यभिप्रायः। नन्वनित्ये दोषसाधारणादावज्ञानदशायामव्याप्तिर्नोद्धृता। तथाहि - साधारण्येऽनुमितिप्रतिबन्धकतावच्छेदको यो धर्मो व्यभिचारादिस्तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वाभावात् साधारण्यं तु ज्ञातमेव नास्ति। तत्र विशेषणत्वपक्षे ज्ञानगर्भं लक्षणमव्याप्तम्। न च तस्योपलक्षणमस्त्विति वाच्यम्। तस्यासाधारण्योत्तीर्णतादशायां सद्धेतावतिव्याप्तिरित्युक्तत्वादित्यत आह - **तादृशे**ति। अनुमितिप्रतिबन्धकतावच्छेदको यो धर्मो व्यभिचारादिस्तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वस्य विशेषणत्वमेव, विद्यमानत्वे सति व्यावर्तकत्वं यद्विशेषणत्वं तत्त्वमेवेत्यर्थः। तथा च नोपलक्षणतापक्षमादायासाधारण्योत्तीर्णे सद्धेतावतिव्याप्तिः, तदानीं तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वरूपविशेषणस्याभावात् इति भावः। **न चे**ति। धूमो वह्निव्यभिचारीति ज्ञानाभावदशायां धूमेऽनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगोचरयथार्थज्ञानविशेष्यत्वाभावात् तद्दशायां साधारणे वह्न्यादावव्याप्तिरिति शङ्कार्थः। **तत्रे**ति। साधारणे वह्न्यादावस्मदादिज्ञानाविषयत्वदशायामपि वह्निर्धूमव्यभिचारीत्याकारकेश्वरज्ञानमादायानुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगोचरयथार्थज्ञानविशेष्यत्वस्य सत्त्वात् नाव्याप्तिरीश्वरज्ञानस्य हि नित्यत्वात् सर्वविषयत्वाच्चेति भावः। **एतद्वदि**ति। इदं लिङ्गं वह्निरूपं लिङ्गम्, एतद्वत् धूमव्यभिचारित्ववदित्यर्थः। **न चे**ति शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यो व्योमैकगुणत्वात् इत्ययं सत्प्रतिपक्षावतारः, यदा चैत्रस्य सत्प्रतिपक्षावतारो जातस्तत्र मैत्रं प्रति कृतकत्वस्य हेतोः हेत्वाभासत्वापत्तिः, मैत्रेणैवं ज्ञातं चैत्रायानुमितिप्रतिबन्धकतावच्छेदकयथार्थज्ञानविशेष्यत्वं कृतकत्वे इति [210 B] शङ्कार्थः। तथा च मैत्रस्यापीदृशज्ञानसत्त्वात् हेत्वाभासताज्ञानं स्यादिति भावः। **आपादकाभावा**दिति टीका। चैत्रस्य सत्प्रतिपक्षावतारदशायां मैत्रस्य

तदनवतारदशायामपि मैत्रं प्रति हेत्वाभासत्वापादकाभावादित्यर्थः। ननु अस्त्येव आपादकम्, तथाहि - अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगोचरयथार्थज्ञानविशेष्यत्वमेव हि सर्वपुरुषं प्रति हेत्वाभासत्वमिति। तत्रापि तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वात् मैत्रं प्रत्यपि हेत्वाभासत्वापत्तिरित्यत आह - **न हीति**। **तादृशेति**। अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगोचरयथार्थज्ञानविशेष्यः सर्वपुरुषं प्रति हेत्वाभास इति न प्रकृतलक्षणार्थः। **किन्त्विति**। **तादृशेति**। अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगोचरयथार्थज्ञानविशेष्ये हेत्वाभासत्वमित्येव हेतुतदाभासविवेकोपपत्तिरित्यर्थः। तथा च पुरुषविशेषनियन्त्रितहेत्वाभासत्वव्यवहारप्रयोजकमिदं लक्षणं नोच्यते किन्तु सामान्यतो हेत्वाभासत्वव्यवहारप्रयोजकं लक्षणमुच्यते। तच्च चैत्रानुमितिप्रतिबन्धकत्वात् नातिप्रसङ्गो मैत्रं प्रत्यपीति समाधानार्थः। नन्वेवं चैत्रस्य सत्प्रतिपक्षावतारदशायां मैत्रस्यापि तस्य हेतोः सत्प्रतिपक्षत्वापत्तिः चैत्रसमानबलोपस्थिता, यथाऽनित्यत्वव्याप्यकृतकत्ववानयं तथा नित्यत्वव्याप्यव्योमैकगुणत्ववान् इत्येवंरूपया प्रतिरुद्धचैत्रानुमितिकत्वात् इति मैत्रं प्रत्यपि कृतकत्वहेतोः सत्प्रतिपक्षत्वापत्तिरित्यत आह - **तत्पुरुषीयेति**। तथा च मैत्रानिरूपितसत्प्रतिपक्षतायां मैत्रस्य समानबलोपस्थित्या प्रतिरुद्धं यत् मैत्रानुमितिरूपं कार्यलिङ्गं तत् त्वस्य मैत्रनिरूपितसत्प्रतिपक्षतायां प्रयोजकत्वात्। चैत्रसत्प्रतिपक्षावतारेऽपि मैत्रस्यानुमितिप्रतिबन्धकत्वाभावात् न मैत्रं प्रति सत्प्रतिपक्षत्वापत्तिरिति प्रघट्टकार्थः। **एवमिति**। शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वमनित्यत्ववन्नित्यत्ववद्व्यावृत्तमिति चैत्रीयाऽसाधारण्यावतारदशायां मैत्रं प्रत्यापत्तिः शब्दत्वस्येति न भवति आपादकाभावात्। न हि सर्वपुरुषीयहेत्वाभासत्वव्यवहारप्रयोजकमिदं लक्षणं निरुच्यते किन्तु सामान्यतो हेत्वाभासत्वव्यवहारप्रयोजकम्, हेत्वाभासत्वस्य निष्प्रतियोगिकत्वात् यथा पुरुषविशेषं प्रत्यसाधारण इति वत् पुरुषविशेषं प्रति हेत्वाभास इति व्यवहाराभावात्। तथा च न मैत्रं प्रति चैत्रासाधारण्यावतारदशायां हेत्वाभासत्वापत्तिरित्यर्थः। **सामान्यत** इति। हेत्वाभासत्वव्यवहारमात्रापादने इष्टापत्तिः चैत्रानुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगोचरयथार्थज्ञानविशेष्यत्वात्। सामान्यतो हेत्वाभासत्वं भवतु परं मैत्रीयहेत्वाभासत्वं न भवति आपादकत्वाभावादित्युक्तम्। न च चैत्रस्यासाधारण्यावतारदशायां मैत्रस्य तदनवतारदशायां सद्धेतौ शब्दत्वे मैत्रीयासाधारण्यापत्तिः [211 A] चैत्रीयानुमितिप्रतिबन्धकज्ञानविषयत्वादिति वाच्यम् तत्तत्पुरुषीयासाधारण्यव्यवहारं प्रति [? न] तत्तत्पुरुषीयानुमितिप्रतिबन्धकसकलसपक्षविपक्षव्यावृत्तत्वज्ञानमस्ति येन मैत्रं प्रत्यप्यसाधारणं स्यादिति भावः। **न चेति**। धूमवान् वह्नेः इत्यत्र वह्निर्धूमव्यभिचारी धूमसामग्री धूमव्याप्येति समूहालम्बनमादाय धूमसामग्र्यामतिव्याप्तिः, तथाहि वह्नौ अनुमितिप्रतिबन्धकतावच्छेदकधूमव्यभिचारवत्त्वगोचरयथार्थज्ञानविशेष्यत्वात् धूमसामग्र्याः वह्निर्धूमव्यभिचारी धूमसामग्री धूमव्याप्येति समूहालम्बनसम्भवात्। अयमाशयः। उक्तरूपं समूहालम्बनज्ञानं वह्निव्यभिचारधूमसामग्रीविषयकमेकमेव। तथा च वह्नौ धूमव्यभिचार-

वत्त्वगोचरवह्निर्धूमव्यभिचारी धूमसामग्री धूमव्याप्येति समूहालम्बनमादाय धूमसामग्र्यां सद्धेतौ प्रकृतलक्षणातिव्याप्तिरिति स्पष्टः शङ्कार्थः । समाधत्ते - **तदंशे** इति टीका । यत्र हेत्वाभासत्वेन लक्षणोपसंहारस्तस्मिन्नंशे तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वस्य विवक्षितत्वादित्यर्थः । न चैवं धूमसामग्र्यां सद्धेतावतिव्याप्तिः, तथाहि वह्निर्धूमव्यभिचारी धूमसामग्री धूमव्याप्येति समूहालम्बनविषयत्वेऽपि धूमसामग्र्या धूमसामग्र्यंशे धूमव्यभिचारवत्त्वगोचरयथार्थज्ञानविशेष्यत्वाभावात् तस्य समूहालम्बनस्य वह्न्यंशे धूमव्यभिचारवत्त्वांशे यथार्थत्वात् इति तदंशे हेत्वाभासत्वमेव धूमसामग्र्यास्तु तथात्वाभावात् नातिव्याप्तिरिति समाधानार्थः । ननु जलह्रदो वह्निमान् द्रव्यत्वात् इत्यादौ बाधितेऽव्याप्तिः, तत्र वह्न्यभाववति जलह्रदे जलह्रदो न वह्निमान् इति बाधज्ञानमनुमितिप्रतिबन्धकम्, तत्र विषयतयाऽनुमितिप्रतिबन्धकतावच्छेदकः साध्याभाव एव, न चानुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वं हेतौ द्रव्यत्वेऽस्तीति, यतः साध्याभाववत्त्वं जलह्रदे पक्षे एव वर्तते परं द्रव्यत्वरूपहेतौ नास्तीति ज्ञानेऽनुमितिप्रतिबन्धकतावच्छेदको यो धर्मस्तद्वत्त्वगोचरयथार्थज्ञानविषयत्वस्य बाधिते हेतौ अव्याप्तिरित्यत आह - **सबाधितमिदमि**ति । तथा च द्रव्यत्वं सबाधितमिति । **ज्ञानविषय** इति । तत्रापि द्रव्यत्वेऽप्यनुमितिप्रतिबन्धकतावच्छेदकस्य साध्याभावविशिष्टपक्षस्य हेतोः सत्त्वात् । तथा च साध्याभावविशिष्टपक्षवृत्तित्वं हेतावस्त्येवेति नाव्याप्तिः । **इदमि**ति द्रव्यत्वं हेतुः । **न चे**ति **तथापी**ति । ज्ञानेऽनुमितिप्रतिबन्धकतावच्छेदको यो धर्मस्तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वस्य हेत्वाभासलक्षणस्य निर्वचनेऽपि सत्प्रतिपक्षे शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यो व्योमैकगुणत्वात् इत्यादौ अव्याप्तिः । अव्याप्तिमेव दर्शयति - **विरोधी**ति । प्रथममनित्यत्वव्याप्यकृतकत्ववान् इति परामर्शजन्यानुमितौ नित्यत्वव्याप्यव्योमैकगुणत्ववान् इति [211 B] साध्याभावव्याप्यवत्त्वपरामर्शस्यैव प्रतिबन्धकत्वम् । तत्र च प्रतिबन्धकतावच्छेदकं विषयतया नित्यत्वव्याप्यव्योमैकगुणत्ववत्त्वैव । न च नित्यत्वव्याप्यव्योमैकगुणत्ववत्त्वं कृतकत्वेऽस्ति, व्योमैकगुणत्ववत्त्वस्य शब्दनिष्ठत्वात् कृतकत्वेऽभावात् । एवं नित्यत्वव्याप्यव्योमैकगुणत्ववान् इति परामर्शजन्यानुमितौ अनित्यत्वव्याप्यकृतकत्ववान् इति साध्याभावव्याप्यवत्तापरामर्शस्य प्रतिबन्धकत्वम् । तत्र विषयतयाऽनुमितिप्रतिबन्धकतावच्छेदकं तु अनित्यत्वव्याप्यकृतकत्ववत्त्वमेव । न च तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वं व्योमैकगुणत्वेऽस्ति व्योमैकगुणत्वे कृतिजन्यत्वाभावादिति सत्प्रतिपक्षेऽव्याप्तिरिति शङ्कार्थः । **प्रतिसाधनस्ये**ति । अनित्यत्वरूपसाध्यस्याभावो नित्यत्वम्, तस्य यत् साधनं व्योमैकगुणत्वादिस्तज्ज्ञानस्यैव प्रतिबन्धकत्वादित्यर्थः । **स्थापनाहेताववि**ति । कृतकत्वे हेतौ तत्सम्बन्धाभावेन अनित्यत्वानुमितिप्रतिबन्धकीभूतनित्यत्वव्याप्यवत्तापरामर्शविषयनित्यत्वव्याप्यवत्त्वगोचरयथार्थज्ञानविशेष्यत्वाभावेनेत्यर्थः । **इदं लिङ्गमि**ति । भवतु अनित्यत्वानुमितौ नित्यत्वव्याप्यवत्तापरामर्शस्य प्रतिबन्धकत्वं भवतु च तद्विषयीभूतनित्यत्वव्याप्यवत्त्वस्य प्रतिबन्धकतावच्छेदकत्वं तथापि अनित्यत्वानुमिति-

प्रतिबन्धकतावच्छेदकनित्यत्वव्याप्यवत्त्वं कृतकत्वेऽस्ति। तथाहि - वस्तुसत्त्वे प्रतीतिरेव प्रमाणम्, तथा च इदं लिङ्गं कृतकत्वरूपं लिङ्गमनेन व्योमैकगुणत्वादिना सत्प्रतिपक्षितमिति प्रतीतेः कृतकत्वेऽपि व्योमैकगुणत्व-सम्बन्धोऽस्ति, तेन सम्बन्धेन तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वमप्यस्ति, अनेनेदं सत्प्रतिपक्षितमिति ज्ञानस्य सर्वमते यथार्थत्वात्। एवं व्योमैकगुणत्वेऽपि अनित्यत्वव्याप्यकृतकत्वसम्बन्धोऽस्ति, इदं व्योमैकगुणत्वमनेन अनित्यत्वव्याप्यकृतकत्वेन सत्प्रतिपक्षितमिति सकलमतसिद्धप्रतीतेः। तथा च कृतकत्ववत्त्वगोचरयथार्थज्ञान-विशेष्यत्वमप्यस्ति, अनेनेदं सत्प्रतिपक्षितमिति प्रतीतेः। इति सत्प्रतिपक्षे नाव्याप्तिरिति समाधानार्थः। ननु कृतकत्वे व्योमैकगुणत्वस्य कः सम्बन्धः?, न तावत् समवायः व्योमैकगुणत्वस्योपाधित्वात्, नापि संयोगः तस्य च द्रव्यवृत्तित्वात् कृतकत्वस्याद्रव्यत्वात्, इत्यत आह - **ज्ञानरूपेति**। तथा च कृतकत्वे व्योमैकगुणस्य समवायादिसम्बन्धाभावेऽपि ज्ञानरूप एव सम्बन्धो वक्तव्यः। यथा घटज्ञानं घटस्य ज्ञानमिति प्रतीत्या घटे ज्ञानमेव सम्बन्धः समवायाद्यभावात् विशिष्टज्ञानस्य सत्त्वात् तथा प्रकृतेऽप्यनेनेदं सत्प्रतिपक्षितमिति विशिष्टप्रतीतेः कृतकत्वेऽपि व्योमैकगुणत्वस्य ज्ञानरूप एव सम्बन्ध इति समाधानार्थः। नन्वस्तु सम्बन्धः ज्ञानरूप इत्यत्र किं विनिगमकम्?, कृतकत्वादेरेव [212 A] हेतोः स्वरूपस्य सम्बन्धत्वसम्भवादित्यत आह - **अत एवेति**। यत एव ज्ञानरूप एव तत्र सम्बन्धोऽत एव ज्ञानस्यानित्यत्वात् सत्प्रतिपक्षस्यानित्यदोषत्वम्। कृतकत्वादेः सम्बन्धत्वे सत्प्रतिपक्षस्यानित्यत्वदोषत्वं न स्यात्, सम्बन्धः कृतकत्वं सम्बन्ध्यपि कृतकत्वमेवेत्येवं सम्बन्ध-सम्बन्धिनोर्नित्यत्वात्। ज्ञानस्य सम्बन्धत्वे तदभावदशायां भवति सत्प्रतिपक्षस्यानित्यदोषत्वम्, नित्यकृतकत्वस्य सम्बन्धिनः सत्त्वेऽपि ज्ञानस्य सम्बन्धस्याभावादिति भावः। **न चैवमिति**। सत्प्रतिपक्षे यथा ज्ञानरूपसम्बन्ध-मादायानुमितिप्रतिबन्धकतावच्छेदक[धर्म]वत्त्वं तथा धूमो वह्निव्यभिचारीति ज्ञानरूपसम्बन्धमादाय धूमेऽपि अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वस्य सत्त्वात् धूमेऽतिव्याप्तिरित्याशङ्कार्थः। **तज्ज्ञानस्येति**। धूमो वह्नि-व्यभिचारीति ज्ञानस्यायथार्थत्वेन सकलमतसिद्धायथार्थत्वेन तत्र धूमे तत्सम्बन्धत्वाकल्पनात् धूमो वह्नि-व्यभिचारीति ज्ञानस्य सम्बन्धत्वाकल्पनात्। अतो धूमे ज्ञानसम्बन्धाभावात् नातिव्याप्तिरित्यर्थः। **न चेति**। शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यो व्योमैकगुणत्वात् इत्यत्र सत्प्रतिपक्षेऽनित्यत्वनित्यत्वव्याप्यवत्ता-परामर्शस्यैव सम्बन्धीभूतस्यानित्यत्वनित्यत्वानुमितौ प्रतिबन्धकत्वम्। ननु ज्ञानरूपसम्बन्धावगाहिनोऽनेनेदं सत्प्रतिपक्षितमिति ज्ञानस्य प्रतिबन्धकत्वम्, तथा च सत्प्रतिपक्षे पुनरप्यव्याप्तं तद्वत्त्वगोचरयथार्थज्ञानस्यैव प्रतिबन्धकत्वम्, तच्च सत्[प्रति]पक्षे नास्तीति शङ्कितुराशयः। दूषयति - **इष्टापत्तेरिति**। इष्टापत्तिबीजमाह - **न हीति**। यादृशज्ञानविशेष्यत्वं प्रकृतलक्षणघटकं तादृशज्ञानस्यानुमितिप्रतिबन्धकत्वं न विवक्षितं येन सत्प्रति-पक्षेऽव्याप्तिः स्यात्। **किन्त्विति**। अनुमितिप्रतिबन्धकीभूतस्य यस्य कस्यापि ज्ञानस्य प्रतिबन्धकतावच्छेदको

यो धर्मस्तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वं विवक्षितम्, तच्च सत्प्रतिपक्षेऽप्यस्तीति नाव्याप्तिः । तथाहि - अनित्यत्वानुमितौ प्रतिबन्धकं नित्यत्वव्याप्यव्योमैकगुणत्वज्ञानम्, प्रतिबन्धकतावच्छेदकं च नित्यत्वव्याप्य-व्योमैकगुणत्ववत्त्वम्, तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वं च कृतकत्वेऽप्यस्ति यथा इदं कृतकत्वम् अनेन व्योमैकगुणत्वेन सत्प्रतिपक्षितमिति सकलमतसिद्धव्यवहारादिति समाधानार्थः । ननु व्यभिचारादौ वह्निर्धूम-व्यभिचारीति ज्ञानस्यैवानुमितिप्रतिबन्धकस्य प्रकृतहेत्वाभासलक्षणघटकत्वमिति वैषम्यमिति अत आह - **तथेति**। व्यभिचारादौ प्रतिबन्धकीभूतज्ञानस्यैव लक्षणघटकत्वं सत्प्रतिपक्षे चातादृशस्यापि अप्रतिबन्धकस्यापि लक्षणघटकत्वमित्यन्यदेतत्। अनेनेदं सत्प्रतिपक्षितमिति ज्ञानं सत्प्रतिपक्षे न प्रतिबन्धकं किन्तु विरुद्धपरामर्शज्ञान-स्यैव प्रतिबन्धकत्वमिति [212 B] भावः । न ह्येतावता प्रकृते काऽपि क्षतिरिति भावः । **अन्यथेति**। अनुमिति-प्रतिबन्धकीभूतज्ञानस्यैव प्रकृतलक्षणघटकत्वे बाधिते जलह्रदो वह्निमान् धूमात् इत्यत्र बाधितेऽव्याप्तिः । अव्याप्तिमेव द्रढयति - **न हीति**। इदं लिङ्गं बाधितमिति ज्ञानस्य प्रकृतलक्षणघटकत्वम्। न च तदनुमितिप्रतिबन्धकं किन्तु जलह्रदो न वह्निमानिति ज्ञानमेव। ग्राह्यो वह्निस्तदभावावगाहितया प्रतिबन्धकम्। तथा च जलह्रदो वह्नि-मान् धूमात् इति बाधिते अव्याप्तिः । अनुमितिप्रतिबन्धकतावच्छेदको यो धर्मो बाधः तद्वत्त्वगोचरयथार्थज्ञान-विशेष्यत्वरूपलक्षणघटकीभूतज्ञानस्य जातस्य बाधितमिदं लिङ्गमित्येवंरूपस्यानुमित्यप्रतिबन्धकत्वात् । इति लक्षणघटकीभूतज्ञानस्यानुमितिप्रतिबन्धकत्वावश्यकत्वे बाधितेऽव्याप्तिरिति अन्यथेत्यारभ्यार्थः। **किन्त्विति** । पक्षे साध्याभावविषयकस्यैव ज्ञानस्य प्रतिबन्धकत्वं ग्राह्याभावावगाहित्वात्। ननु लिङ्गनिष्ठसाध्याभाववत्पक्ष-सम्बन्धित्वज्ञानस्य बाधितमिदमिति ज्ञानस्य विरोधाविषयत्वात् ग्राह्याभावानवगाहित्वादित्यर्थः। पक्षे साध्याभाव-ज्ञानं प्रतिबन्धकं हेतौ साध्यस्याग्राह्यत्वात्। हेतुनिष्ठबाधितवृत्तित्वज्ञानस्य ग्राह्याभावानवगाहित्वात् न प्रतिबन्धक-त्वमिति भावः। **अत्रेति** टीका। अत्र लक्षणे यथा अनुमितिप्रतिबन्धकतावच्छेदको यो धर्मः तद्वत्त्वगोचरयथार्थज्ञान-विशेष्यत्वम् इति हेत्वाभासलक्षणे अनुमितिप्रतिबन्धकतावच्छेदकवत्त्वं येन केनापि सम्बन्धेन अथवा सत्प्रति-पक्षितत्वादिव्यवहारप्रयोजकतत्तत्सम्बन्धेन वा ? नाद्यः, वह्निमान् धूमात् इत्यत्र धूमे सद्धेतौ अतिव्याप्तेः, धूमेऽपि वह्न्यभाववद्वृत्तित्वस्य येन केनापि सम्बन्धेन सत्त्वात्, कालिकसम्बन्धेन यथा यत्र काले धूमः पर्वते तत्र कालेऽयोगोलके वह्न्यभावसम्बन्धः । नान्त्यः, अननुगमात् । तथाहि प्रकृतलक्षणे एकसम्बन्धस्याप्रवेशात् । व्यभिचारादौ समवायादिः प्रविष्टः । धूमाभाववान् अयोगोलकः तत्संयोगस्तु वह्नौ समवायेनास्ति इति व्यभिचारे समवायः, सत्प्रतिपक्षे च ज्ञानरूपः सम्बन्धो यथा अनेनेदं सत्प्रतिपक्षितमिति ज्ञानमत्र ज्ञानरूपः सम्बन्धः इत्यन-नुगम इति चिन्त्यं दूषणम्। अत्र समाधानं चिन्त्यम्। **नन्विति**। ज्ञाने विषयतया अनुमितिप्रतिबन्धकतावच्छेदको यो धर्मो लिङ्गान्यत्वे सति तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वमिति लक्षणे पर्यवसिते ज्ञाने याथार्थ्यमनुमिति-

प्रतिबन्धकतावच्छेदकधर्मवद्विशेष्यकत्वे सति अनुमितिप्रतिबन्धकतावच्छेदकव्यभिचारादिप्र(ध)र्मप्रकारकत्वं हेत्वाभासत्वं सत्यन्तम्। वह्निमान् धूमात् इति व्यभिचारभ्रमविषयः धूमेऽतिव्याप्तिवारणार्थं धूमस्य धूमो वह्निव्यभिचारीति भ्रमविषयत्वात्। तद्विशेषणे दत्ते धूमे वह्निव्यभिचाराभावात् धूमे(मो) वह्निव्यभिचारीति ज्ञानस्य [213 A] अनुमितिप्रतिबन्धकतावच्छेदकव्यभिचाररूपधर्मवद्विशेष्यकत्वाभावात् धूमेऽतिव्याप्तिः। तथा च यथार्थज्ञानघटितहेत्वाभासलक्षणे यथार्थत्वघटकतया अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वस्यावश्यं प्रवेशात् अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वमेव लाघवाल्लक्षणं हेत्वाभासत्वस्य भवतु किमनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगोचरयथार्थज्ञानविशेष्यकत्वघटितलक्षणेन। न च धूमेऽतिव्याप्तिरिति वाच्यम्, धूमेऽनुमितिप्रतिबन्धकतावच्छेदकवह्निव्यभिचाराभावात्। इति लाघवात् यथार्थज्ञानाघटितमेव लक्षणं करोतीत्याभासार्थः। **विषयचिन्तायामिति** टीका। यथार्थज्ञानस्य विषयचिन्तायाम् अनुमितिप्रतिबन्धकतावच्छेदकधर्मवद्विशेष्यकत्वे सति अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वमेव याथार्थ्यम्। तत्र ज्ञानस्य विशेष्ये वह्न्यादौ विशेषणीभूतं व्यभिचारादिमत्त्वं तद्वत्त्वमित्यर्थः। **तथा चेति**। अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वापेक्षया अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगोचरयथार्थज्ञानविशेष्यत्वस्य गुरुत्वात् व्यर्थविशेषणत्वमित्यर्थः, यथार्थज्ञानपर्यन्तधावनं व्यर्थमिति भावः।

**तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वं यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं ज्ञायमानं सत् अनुमितिप्रतिबन्धकं यत् तत्त्वं वा हेत्वाभासत्वम्।**

**यद्विषयत्वेनेति** मूलम्। यद्धर्मविषयत्वेन ज्ञानेऽनुमितिप्रतिबन्धकताऽवच्छिद्यते तत्त्वं हेत्वाभासत्वे। यथा धूमवान् वह्नेः इत्यत्र वह्निर्धूमव्यभिचारीति ज्ञानेऽनुमितिप्रतिबन्धकता धूमे व्यभिचारविषयत्वेनावच्छिद्यत इति वह्नेर्हेत्वाभासत्वम्।

[अथ टीका]। **तत्रापीति** टीका। यथार्थज्ञानाघटितं ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्त्वं हेत्वाभासत्वमिति तृतीये लक्षणे वह्निर्धूमव्यभिचारीति ज्ञानविषयीभूतस्य व्यभिचारादेः प्रतिबन्धकत्वमवगम्यते ज्ञायमानं यत् सदनुमितिप्रतिबन्धकं तत्त्वमित्यादिलक्षणकरणात्। तन्न युक्तम्। व्यभिचारादेरतीतानागतसाधारणतया तद्विषयज्ञानस्यैव प्रतिबन्धकत्वम्, यथा धूमवान् वह्नेः इत्यादौ धूमाभाववदयोगोलकसंयोगाभाववति वह्नौ वह्निर्धूमव्यभिचारीति ज्ञानदशायामनुमित्यापत्तिः तादृशज्ञानदशायां ज्ञानविषयीभूतव्यभिचारातीतत्वादिति व्यभिचारज्ञानस्य प्रतिबन्धकत्वं वाच्यमिति तृतीयलक्षणं दुष्टमिति द्वितीयलक्षणमेव द्रष्टव्यम्। ननु यद्विषयकत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वमिति द्वितीयलक्षणेऽपि अव्याप्तिः, तथाहि - धूमवान् वह्नेः इत्यादौ वह्निर्धूम-

व्यभिचारीति ज्ञानस्य वह्निव्यभिचारविषयत्वेन प्रतिबन्धकत्वात् यद्विषयत्वेन प्रतिबन्धकत्वं तत्त्वं व्यभिचाररूपे धर्मेऽस्ति न तु धर्मिणि वह्न्यादौ अस्ति इत्यत आह - **अनेनेति** टीका। यद्विषयत्वेन ज्ञानस्य प्रतिबन्धकत्वमित्यनेन व्यभिचारादयो धर्माः साध्याभाववद्वृत्तित्वादयो विवक्षिताः। आदिपदाद् विरुद्धत्वादय उपगृह्यन्ते। नन्वेवं धर्मिणि वह्न्यादौ अव्याप्तिस्तदवस्थेत्यत आह - **तत्त्वमिति**। **तत्रेति**। यद्विषयत्वेन ज्ञानस्य प्रतिबन्धकत्वं तत्त्वं ज्ञायमानम्। यद् यदनुमितिप्रतिबन्धकं तत्त्वमिति लक्षणद्वये द्वितीयतृतीयरूपे तत्त्वमित्यनेन तद्वत्त्वमिति विवक्षितम्, [213 B] तथा च यद्विषयत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वं तद्वत्त्वं ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तद्वत्त्वमिति द्वितीयतृतीयलक्षणे पर्यवसितम्। तेन धर्मिणि वह्न्यादौ नाव्याप्तिः। तथाहि धूमवान् वह्नेः इत्यादौ वह्निर्धूमव्यभिचारीति ज्ञानस्य वह्नौ धूमाभाववद्वृत्तित्वविषयत्वेन प्रतिबन्धकत्वं वह्नौ धूमाभाववद्वृत्तित्ववत्त्वमस्त्येव। एवमयं गौरश्वत्वात् इत्यादौ अश्वत्वं गोत्वाभावव्याप्यमिति ज्ञानस्याश्वत्वे गोत्वाभावव्याप्यत्वविषयत्वेन प्रतिबन्धकत्वम्, गोत्वाभावव्याप्यत्ववत्त्वं चाश्वत्वे वर्तत एवेति नाश्वत्वेऽव्याप्तिरिति। एवमन्यत्रापि असिद्धत्वाधिर्मविषयत्वेनैव ज्ञानस्य प्रतिबन्धकत्वात् तद्वत्त्वमसिद्धादौ धर्मिण्येव वर्तत इति न धर्मिणि कुत्रापि अव्याप्तिरित्यर्थः। **तेनेति**। ज्ञाने यद्विषयत्वेनानुमितिप्रतिबन्धकत्वं तद्वत्त्वमिति विवक्षणेन व्यभिचारादौ धर्मे धूमाभाववद्वृत्तित्वादौ नातिव्याप्तिः, तद्वत्त्वाविवक्षायां तु भवति धर्मे व्यभिचारादौ अतिव्याप्तिः। तथाहि धूमवान् वह्नेरित्यादौ वह्निर्धूमव्यभिचारीति ज्ञानस्य व्यभिचारविषयत्वेन प्रतिबन्धकत्वं ता[द्व]त्त्वं च व्यभिचारेऽस्तीति भवति व्यभिचारे अतिव्याप्तिः। ज्ञाने यद्विषयत्वेनानुमितिप्रतिबन्धकत्वं तद्वत्त्वमिति विवक्षायां च न धर्मे व्यभिचारादौ अतिव्याप्तिः। तथाहि धूमवान् वह्नेरित्यादौ वह्निर्धूमव्यभिचारीति ज्ञानस्य वह्नौ धूमव्यभिचारविषयत्वेनैव प्रतिबन्धकत्वं तद्वत्त्वं तु वह्नावेव वर्तते न तु व्यभिचारादाविति न तत्रातिव्याप्तिरिति पर्यवसितोऽर्थः। **असम्भव इति**। धर्मिणि वह्न्यादौ व्यभिचारविषयत्वे ज्ञानस्य प्रतिबन्धकत्वात् तत्त्वं तद्वति धर्मत्वं व्यभिचारादौ धर्मेऽस्ति न तु व्यभिचारिणि वह्नावस्तीत्यसम्भवः। **न चेति** टीका। पर्वतो वह्निमान् धूमात् इत्यत्र पर्वते वह्निसिद्धिदशायां वह्न्यनुमितिः सिद्धसाधनात्। स चानुमित्यभावः सिद्ध्यभावरूपपक्षताविरहप्रयुक्त इति तत्र पक्षताविरहरूपाश्रयासिद्धे हेत्वाभासे लक्ष्येऽव्याप्तिः। न हि तत्र सि[द्ध्यभावरूप]पक्षताविरहज्ञानस्य प्रतिबन्धकत्वं किन्तु पक्षताविरहस्यैव प्रतिबन्धकत्वम्। एवं वह्निव्याप्यवत्त्वपरामर्शाभावदशायां वह्न्यनुमित्यभावात् वह्निव्याप्यवत्त्वपरामर्शाभावस्यैवासिद्धेः प्रतिबन्धकत्वमिति न तु परामर्शाभावज्ञानस्येति। तत्र स्वरूपासिद्धावव्याप्तिरित्याशङ्कार्थः। भवता तु लक्षणं कृतं यद्विषयत्वेन ज्ञानस्य प्रतिबन्धकत्वमिति तत्रोक्तस्थले ज्ञानस्याप्रतिबन्धकत्वादिति भावः। **इष्टापत्तेरिति** टीका। पक्षताविरहरूपासिद्धस्य परामर्शाभावरूपस्वरूपासिद्धस्यासङ्ग्रहेऽपि दोषाभावात्। ननु अनुमितिप्रतिबन्धकमात्रस्यैव लक्ष्यत्वात् तयोरपि अनुमितिप्रतिबन्धकत्वात् लक्ष्यत्वमेवेति। तत्राप्यव्याप्तिर्दूषण-

मेवेत्यत आह - **ज्ञायमानदोषस्यैवे**ति टीका। यद्विषयकं ज्ञानमनुमितिप्रतिबन्धकं तस्यैव हेत्वाभासत्वेनात्र लक्ष्यत्वात्। न च पक्षताविरहादिज्ञानस्यानुमितिप्रतिबन्धकत्वं किन्तु पक्षताविरहस्यैवेति [214 A] पक्षताविरहादेरलक्ष्यत्वान्न तत्राव्याप्तिर्दोषायेति भावः। **प्राचीनमते** अनुमितिप्रतिबन्धकमात्रस्यैव हेत्वाभासत्वात् तस्य लक्ष्यत्वम्। न च **मणिकृन्मते** तथेति पक्षतारूपानुमितिकारणाभावादेवानुमितिरूपकार्याभाव इति सुष्ठूक्तम् - **इष्टापत्तेरि**ति। **न चे**ति। अज्ञानादिः परामर्शाभावादिः ज्ञायमानो ज्ञानविषयीभूतः प्रतिबन्धकः। ननु व्याप्यवत्त्वाज्ञानदशायां कथं नानुमितिर्यदि परामर्शाभावस्य न प्रतिबन्धकत्वमित्यत आह - **कारणाभावत्वेने**ति टीका। परामर्शरूपस्य कारणस्याभावत्वेन स्वरूपसत एव ज्ञानाविषयीभूतस्यैव प्रतिबन्धकत्वात्। तथा च तस्य पक्षताविरहस्य परामर्शाभावस्य च न हेत्वाभासत्वमिति भावः। **न चैवमि**ति टीका। परामर्शाभावरूपासिद्धेर्यदि न हेत्वाभासत्वेन लक्ष्यत्वं तदा सन्दिग्धासिद्ध्या(द्धा)दयोऽपि निग्रहस्थानत्वेन प्रतिवादिषु नोद्भाव्याः हेत्वाभासत्वेनालक्ष्यत्वात्। सन्दिग्धासिद्धः स उच्यते यस्य व्याप्तिपक्षधर्मतान्यतरसन्देहेन प्रतिवादिनो व्याप्तिपक्षधर्मतान्यतरनिश्चयाभावः। यथा सर्वमनित्यं मेयत्वात् इत्यत्र मेयत्वस्यानित्यत्वव्याप्तिसन्देहदशायां मेयत्वस्यानित्यत्वव्याप्तिनिश्चयाभावः इत्ययं सन्दिग्धासिद्धः। **अज्ञायमानदोषत्वेने**ति। उक्तसन्दिग्धासिद्धस्य ज्ञानविषयीभूतत्वेनाप्रतिबन्धकत्वेन हेत्वाभासत्वाभावात् भवतां ज्ञायमानदोषस्यैव हेत्वाभासत्वात् पूर्वं सन्दिग्धासिद्धेर्हेत्वाभासत्वं नास्तीत्युक्तम् यतो ज्ञायमानदोषस्यैव हेत्वाभासत्वेनोपवर्णितत्वात्। सन्दिग्धासिद्धिर्ज्ञायमानो दोषो न भवति। यत्र हेतुनिश्चयः पक्षे नास्ति स सन्दिग्धासिद्धः। स च हेत्वाभासो न भवतीति पूर्वमुक्तम् यतो ज्ञायमान एव दोषः प्रतिबन्धकः। तस्य ज्ञानं प्रतिबन्धकं सन्दिग्धासिद्धस्य ज्ञानं प्रतिबन्धकं न भवति किन्तु स्वरूपसन्नेव सन्दिग्धासिद्धः कारणाभावत्वेन दोषः। यत्तु हेतुः सन्दिग्धः तत्र हेतुज्ञानमेव निश्चयरूपं नास्तीति, यथा पर्वतो वह्निमान् वह्निमत्प्रकारकप्रमाविषयत्वात् इत्यत्र वह्नौ अनिश्चिते वह्निमत्त्वप्रकारकप्रमाविषयत्वमपि निश्चेतुं न शक्यते इति कृत्वाऽयं सन्दिग्धासिद्धः, तेन स स्वरूपसन्नेव प्रतिबन्धको न तु हेतुनिश्चयाभावस्यापि ज्ञानमपेक्षितम्, तथा च सन्दिग्धासिद्धः [1]कारणाभावमात्रं न तु तस्य दोषत्वम्, तथा च तस्य दोषत्वमेव नास्ति, तथा च सन्दिग्धासिद्धेर्वादे उद्भावनं न स्यात्। यदि एतस्य हेत्वाभासविधयोद्भावनं तदाऽस्य हेत्वाभासत्वमेव नास्ति यतो यद्विषयकं ज्ञानमनुमितिप्रतिबन्धकं स एव हेत्वाभासः। एतस्य च ज्ञानं प्रतिबन्धकमेव न भवति इति कृत्वा नायं हेत्वाभासः। नन्वस्य हेत्वाभासत्वाभावेऽपि निग्रहस्थानविधया एतस्य वादे उद्भावनं [214 B] भविष्यतीत्यत आह - **निग्रहे**ति टीका। तथा च निग्रहस्थानमध्येऽप्येतस्यागणितत्वात् न तत्रान्तर्भाव इति। ज्ञानघटितं हेत्वाभासलक्षणं न कर्तव्यमेवेत्याशङ्कार्थः। समाधत्ते - **हेत्वाभासाश्चे**ति टीका। पञ्चमाध्यायसमाप्तिस्थितचकारेणा-

---

१. अनुमिति। प्रतौ टिप्पणी।

नुक्तसमुच्चयार्थेन एतेषामपि सन्दिग्धासिद्धादीनामपि निग्रहस्थानत्वेन गणितत्वात् वादे एतस्य (तेषाम्) उद्भावनं युक्तमेव, न त्वस्य (त्वेतेषां) हेत्वाभासत्वमित्यर्थः। एवं सन्दिग्धासिद्धादीनां हेत्वाभासत्वे खण्डिते पुनः सिद्ध-साधनमपि हेत्वाभासो न भवतीत्याह - **सिद्धसाधनमिति**। सिद्धसाधनमपि स्वरूपसदेव दूषणमित्यन्वयः। **पक्षते**ति टीका। सिद्धसाधने सन्देहघटितपक्षताया अभावात् दूषणत्वम्। अथवाऽर्थान्तरत्वेनेति। यथा चन्दन-खण्डवह्नौ साधनापेक्षायां सत्यां यदा चन्दनखण्डप्रभववह्निरेव सिद्ध्यति, पर्वतो वह्निमान् इत्यत्र कस्यचिदिष्टः चन्दनखण्डप्रभवो वह्निः साध्यत्वेन, धूमेन तु चन्दनखण्डप्रभववह्निमात्रं न सिद्ध्यति अचन्दनखण्डप्रभवस्यापि सिद्धत्वात् इत्यर्थान्तरः। ततः सिद्धसाधनस्यापि दूषणत्वं तु निग्रहस्थानमुद्रयैवेति भावः। उत्तरग्रन्थयोजनार्थमा-भासमाह - **न त्विति** टीका। **एतदिति** टीका। अनुमितिप्रतिबन्धकज्ञाने विषयतयाऽवच्छेदका ये धर्मा व्यभिचार-त्वादयः तद्रूपवत्त्वं हेत्वाभासत्वम्, तच्च सद्धेतौ सत्प्रतिपक्षे नास्ति, असाधारणे चाव्याप्तम्। कथम्? एको हेतुः पर्वतो वह्निमान् धूमात्। द्वितीयः पर्वतो वह्न्यभाववान् पाषाणवत्त्वात्। अयं सत्प्रतिपक्षः। पश्चात् परस्परानु-मितिप्रतिबन्धे सति धूमपाषाणवत्त्वयोः सत्प्रतिपक्षत्वं वर्तते। तदनन्तरं धूमे यदाऽनुकूलतर्को जातः यथा वह्न्य-भावे धूमो न स्यादिति रूपस्तदा धूमस्य हेतोः प्रबलत्वं पाषाणवत्त्वहेतोर्दुर्बलत्वं तदा धूमे[न] वह्न्यनुमितिः क्रियते, तदानीं वह्न्यनुमितिकाले धूमे सत्प्रतिपक्षिते पाषाणवत्त्वेन अव्याप्तिः। अनुमितिप्रतिबन्धकज्ञानविषयता-वच्छेदकविरोधिव्याप्त्यादिमत्त्वस्य एकज्ञानविषयतालक्षणसम्बन्धेन धूमेऽभावात्। न हि धूमेन यदा वह्न्यनुमितिः क्रियते तदानीं पाषाणवत्त्वे हेतौ वह्न्यभावव्याप्तेर्ज्ञानं न वा? तज्ज्ञाने धूमो विषयः इति। यथा घटपटाविति समूहालम्बनकाले घटत्वमेकज्ञानविषयतालक्षणसम्बन्धेन पटेऽपि वर्तते तथा सत्प्रतिपक्षेऽपि विरोधिव्याप्त्यादिकं वह्न्यभावव्याप्तिपक्षधर्मते समूहालम्बनज्ञानविषयतासम्बन्धेन [215 A] धूमे तिष्ठति। एवं वह्निनिरूपित-व्याप्तिपक्षधर्मते एकज्ञानविषयतालक्षणसम्बन्धेन पाषाणवत्त्वेऽपि तिष्ठति। सत्प्रतिपक्षता तस्योभयविषयकत्वेन समूहालम्बनत्वम्, तेन धूमेऽनुकूलतर्कावतारो यदा जातस्तदानीं पाषाणवत्त्वे वह्न्यभावव्याप्तिज्ञानमेव नास्ति, तज्ज्ञानाभावे च एकज्ञानविषयतालक्षणसम्बन्धेन वह्न्यभावव्याप्त्यादिकं धूमेऽपि नास्ति, पाषाणवत्त्वे एव वह्न्यभावव्याप्तिज्ञानं नास्ति इति कृत्वा सत्प्रतिपक्षे धूमेऽव्याप्तिः। एवमसाधारणेऽपि सद्धेतुतादशायामनुमिति-प्रतिबन्धकज्ञानविषयतावच्छेदकं यत् सपक्षव्यावृत्तं तदपि नास्ति तदपि ज्ञानरूपसम्बन्धेन सद्धेतौ नास्ति, यथा घटोऽनित्यः घटत्वात् इत्यत्र घटत्वेन यदाऽनित्यत्वानुमितिः क्रियते तदा घटत्वे सपक्षव्यावृत्तरूपं ज्ञानमस्ति, असाधारणोऽयं भवति, परं कृतकत्वादिना रूपेण घटेऽनित्यत्वं निश्चितं यदा सिषाधयिषया घटत्वेनापि अनित्य-त्वं साध्यते तदानीं सपक्षव्यावृत्तज्ञानं नास्ति अनित्यत्वरूपसाध्यवतः पक्षस्यैव सपक्षत्वात्। अथवाऽसाधारणस्य दूषकताबीजं विरोधिव्याप्तिग्रहसामग्रीद्वारा यथा पृथिवी अनित्या पृथिवीत्वात्। अत्र साध्यतदभावयोर्व्याप्ति-

ग्रहसामग्रीद्वारा परस्परव्याप्तिग्रहप्रतिबन्ध एवासाधारणे दूषकताबीजम्। कथम्? यत्र यत्र अनित्यत्वाभावस्तत्र पृथिवीत्वाभावो यथा आकाशे इति व्यतिरेकसहचारात् किं पृथिवीत्वमनित्यत्वव्याप्यमिति वा व्याप्तिग्रहो भविष्यति किं वा यत्रानित्यत्वं तत्र पृथिवीत्वाभाव इति व्यतिरेकसहचारात् किं नित्यत्वपृथिवीत्वयोर्व्याप्तिरिति परस्परव्यतिरेकसहचाराभ्यां परस्परव्याप्तिग्रहप्रतिबन्धो दूषकताबीजम्। यदा पृथिवीत्वमसाधारणोत्तीर्णमनित्यत्वव्याप्तिग्रहेऽनुकूलतर्को ज्ञातस्तदानीमसाधारणोत्तीर्णो भवति तदानीं विरोधिव्याप्तिग्रहसामग्रीवत्त्वमनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदरूपं पृथिवीत्वे नास्ति इत्यसाधारणेऽव्याप्तिरित्याभासार्थः। एतदेवाह - **सत्प्रतिपक्षत्वादेरिति** टीका। आदिशब्दात् सपक्षव्यावृत्तत्वं वा विरोधिव्यतिरेकव्याप्तिग्रहसामग्रीसमावेशो वा अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकं वा परिग्राह्यम्।

**दशाविशेषे हेत्वोरेवासाधारणसत्प्रतिपक्षयोराभासत्वात् तद्बुद्धेरप्यनुमितिप्रतिबन्धकत्वम्। यद्यपि बाधसत्प्रतिपक्षयोः प्रत्यक्षशाब्दज्ञानप्रतिबन्धकत्वान्न लिङ्गाभासत्वं तथापि ज्ञायमानस्याभासस्यात्र लक्षणम्। यद्वा प्रत्यक्षादौ बाधेन न ज्ञानं प्रतिबध्यते किन्तूत्पन्नज्ञानेऽप्रामाण्यं ज्ञाप्यते अनुमितौ तूत्पत्तिरेव प्रतिबध्यते। ते च सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च।**

दशेति मूलम्। एतयोः सद्धेत्वोरसाधारणसत्प्रतिपक्षयोर्यद्धेत्वाभासत्वं तद् दशाविशेषे ज्ञेयम्। तथाहि यदा धूमे वह्निव्याप्तिः पाषाणवत्त्वे वह्न्यभावव्याप्तिरवतीर्णा तदोभयगोचरसमूहालम्बनविषयत्वमुभयोस्तदानीं सत्प्रतिपक्षत्वं भवति। यदा चैकत्रानुकूलतर्कोऽवतीर्णः तस्यां दशायां विरोधिव्याप्त्यादिमत्त्वं नास्ति। यदा एकत्रानुकूलतर्कोऽवतीर्णस्तदाऽन्यत्र व्याप्त्यादिमत्त्वस्य बाधो जातः, तस्यां दशायां सत्प्रतिपक्षतोत्तीर्णे सद्धेतौ अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकविरोधिव्याप्त्यादिमत्त्वस्य [215 B] तदानीमभावात् तदा सद्धेतुः सत्प्रतिपक्षो न भवत्येव। अत एव सत्प्रतिपक्षस्यानित्यदोषत्वम्, एवमसाधारणस्यापि दशाविशेष एव दोषत्वम्। तथाहि यदा पृथिवी अनित्या पृथिवीत्वात् इत्यत्र यत्र नित्यत्वं तत्र पृथिवीत्वाभावमनित्यत्वव्यतिरेकव्याप्तिग्रहसामग्री, यत्रानित्यत्वं तत्र पृथिवीत्वाभाव इति नित्यत्वव्यतिरेकव्याप्तिग्रहसामग्री, उभयोर्व्यतिरेकव्याप्तिग्रहसामग्री यदाऽवतीर्णा तदानीं तस्यां दशायां पृथिवीत्वस्यापि सद्धेतोरसाधारण्यम्, यदा तु एकसाध्यव्यतिरेकव्याप्तिग्रहसामग्र्याः प्रबलत्वं तदानीमसाधारणतोत्तीर्णे सद्धेतौ पृथिवीत्वेऽनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकविरोधिव्याप्तिग्रहसामग्रीसमानकालीनत्वं सद्धेतौ नास्तीति सोऽसाधारणस्तद्दशायां नास्तीति सोऽसाधारणस्तदानीं न भवतीति दशाविशेष एवासाधारण्यमित्यर्थः। **तदिति** मूलम्। सत्प्रतिपक्षत्वज्ञानमसाधारण्यज्ञानं च यदा प्रति-

बन्धकं तदा सोऽसाधारणः सत्प्रतिपक्षश्च भवति। ननु बाधसत्प्रतिपक्षयोर्नानुमितिमात्रप्रतिबन्धकत्वम्। किन्तु प्रत्यक्षे शाब्दज्ञाने च बाधस्य प्रतिबन्धकत्वम्। यथा घटाभाववत्तया निश्चिते घटज्ञानानुदयात्। एवं शाब्दज्ञानेऽपि अग्निना सिञ्चतीति वाक्यात् शाब्दज्ञानानुदयात् शाब्दज्ञानेऽपि बाधः प्रतिबन्धकः। अतो बाधस्यानुमित्यसाधारणदोषत्वाभावात् नानुमितिमात्रे बाधो दोषः। हेत्वाभासत्वं चानुमितिमात्रस्यैव दोषत्वम्। एवं सत्प्रतिपक्षोऽपि प्रत्यक्षशाब्दज्ञानयोरपि प्रतिबन्धकः। यथाहि यदा पुरुषत्वव्याप्यकरादिमानयमिति प्रत्यक्षसामग्री पुरुषत्वाभावव्याप्यवक्रकोटरादिमानयमिति यदा पुरुषत्वाभावप्रत्यक्षसामग्री उभयोर्विरोधिनिश्चयसामग्र्योः समवधानकाले एकतरनिश्चयरूपप्रत्यक्षाभावेन सत्प्रतिपक्षस्य प्रत्यक्षेऽपि प्रतिबन्धकत्वम्। एवं शाब्दज्ञानस्थलेऽपि शब्दोऽनित्यः केनचिदुक्तं शब्दोऽनित्यो नेति तत्र विरोधिनोर्नित्यत्वानित्यत्वयोर्विरोधि[निश्चय]शाब्दसामग्र्योः समवधाने शाब्दज्ञानं न जायते इति कृत्वा सत्प्रतिपक्षस्य शाब्दज्ञानेऽपि प्रतिबन्धकत्वात् नानुमित्यसाधारणो दोषः सत्प्रतिपक्षः। ततश्चानयोर्हेत्वाभासमध्ये निरूपणमनुचितमित्यर्थः। अयं भावः - बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमनुचितम् उक्तरीत्याऽनुमित्यसाधारणदोषत्वाभावादिति पूर्वपक्षार्थः। समाधत्ते - **तथापी**ति मूलम्। अत्र हेत्वाभासग्रन्थे यदाभासस्य लक्षणं तज्ज्ञायमानस्य। अयमर्थः - यस्य ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः। न च निग्रहस्थानादौ अतिव्याप्तिरिति वाच्यम्। निग्रहस्थानमनुमितिदोषो न भवति किन्तु पुरुषदोषः। तथा च बाधज्ञानस्याप्यनुमितिप्रतिबन्धकत्वात् बाधोऽपि हेत्वाभासः, एवं सत्प्रतिपक्षस्याप्यनुमितिप्रतिबन्धकत्वात् हेत्वाभासत्वम्। तथा च हेत्वाभासपरिभाषायां मात्रपदानुपादानेन यज्ज्ञानस्यानुमितिप्रतिबन्धकत्वं स हेत्वाभासो न त्वनुमितिमात्रप्रतिबन्धकत्वेन हेत्वाभासत्वमित्यर्थः। अथानुमितिमात्रप्रतिबन्धकत्वं हेत्वाभासत्वमित्यप्यङ्गीकृत्य पक्षान्तरमाह - **यद्वे**ति मूलम्। **प्रत्यक्षादावि**ति [216 A] मूलम्। शङ्खो न पीतः शङ्खत्वात् इत्यनुमितिरूपबाधज्ञाने विद्यमानेऽपि पीतविषयकं प्रत्यक्षमुत्पद्यत एव। यथा शङ्खो न पीतः शङ्खत्वात् इति पीतत्वाभावानुमितावपि पीतप्रत्यक्षोदयः काचकामलादिदोषात्, तर्हि बाधेन किं क्रियते इत्यत आह - **उत्पन्न** इति मूलम्। उत्पन्ने पीतः शङ्ख इति प्रत्यक्षज्ञाने तेनानुमितिरूपबाधज्ञानेनाप्रामाण्यं प्रत्यक्षज्ञाने ज्ञाप्यते। ननु अनुमितिरूपबाधे न प्रत्यक्षोत्पत्तेरेव प्रतिबन्धः क्रियते इति कृत्वा बाधस्य प्रत्यक्षप्रतिबन्धकत्वं नास्ति। तथा च बाधस्य प्रत्यक्षे बाधत्वेन रूपेण प्रतिबन्धकता नास्ति किन्तु तदिन्द्रियजन्यबाधत्वेन तदिन्द्रियजन्यप्रत्यक्षत्वेन बाध्यबाधकभावः। यदिन्द्रियजन्यं प्रत्यक्षं तदिन्द्रियजन्यो बाधस्तदिन्द्रियजन्ये प्रत्यक्षे प्रतिबन्धकः। यथा पीतः शङ्ख इति भ्रमः चक्षुरिन्द्रियेण जन्यते चक्षुरिन्द्रियेण चेद् बाधज्ञानं भवति तदा चक्षुरिन्द्रियेण पुनः पीतः शङ्ख इति ज्ञानं नोत्पद्यते। एवमनुमितौ अयं विशेषो यत् [यत्]किञ्चिदेव बाधज्ञानं प्रतिबन्धकं तथा चानुमितौ बाधत्वेन प्रतिबन्धकता प्रत्यक्षत्वे तु न बाधत्वेन प्रतिबन्धकता किन्तु बाधविशेषत्वेनैव प्रतिबन्धकता। एवं सत्प्रतिपक्षेऽपि विरोधिनिश्चयसामग्रीत्वेन सत्प्रतिपक्षस्य प्रत्यक्षे न प्रतिबन्धकत्वं किन्तु प्रत्यक्षविरोधिनिश्चय[सामग्री]त्वेन प्रत्यक्षो यो

विरोध(? धि)निश्चयस्तत्सामग्रीत्वेन। यथा घटप्रत्यक्षे घटाभावप्रत्यक्षस्यैव यदि सामग्री तदा घटप्रत्यक्षा(क्ष)-प्रतिबन्धः न तु विरोधिनिश्चयसामग्रीत्वेन प्रतिबन्धकत्वम्। अन्यथा श्वैत्यव्याप्यशङ्खत्ववानयमित्यनुमितिरूप-निश्चयसामग्र्यां विद्यमानायामपि पीतप्रत्यक्षं न स्यात्। विरोधिनिश्चयसामग्रीत्वेऽनुमितिनिश्चयसामग्र्यां सत्यामपि पीतप्रत्यक्षं भवति। अतो विरोधिनिश्चयसामग्रीत्वेन न प्रतिबन्धकता किन्तु प्रत्यक्षविरोधिनिश्चयसामग्रीत्वेनैव सा च प्रत्यक्षस्थल एव। सत्प्रतिपक्षस्य तु यदि प्रत्यक्षे विरोधिनिश्चयसामग्रीत्वेन प्रतिबन्धकत्वं स्यात् तदाऽनुमित्यसाधारणदोषत्वं न स्यात्। तथा च सत्प्रतिपक्षस्य प्रत्यक्षे प्रतिबन्धकत्वमेव नास्ति किन्तु अनुमितावेव तत्रैव विरोधिनिश्चयसामग्रीत्वेन सत्प्रतिपक्षस्य प्रतिबन्धकता। के ते हेत्वाभासा इत्यत आह - **ते चेति** मूलम्। अध्यायसूत्रमाह - **सव्यभिचारे**त्यादि।

अथ टीका। ननु सत्प्रतिपक्षस्य प्रत्यक्षे प्रतिबन्धकत्वं कुतः स्यात्? सत्प्रतिपक्षो हि हेत्वाभासः। स च हेतुज-न्यानुमितावेव प्रतिबन्धकः, न तु स प्रत्यक्षे प्रतिबन्धक इत्यत आह - **अत्रे**ति टीका। **सत्प्रतिपक्षपदमि**ति टीका। किमर्थमिदं व्याख्यानमित्यत आह - **तत्त्वेनैवे**ति टीका। सत्प्रतिपक्षस्य विरोधिनिश्चयसामग्रीत्वेनैवानुमिति-प्रतिबन्धकता, यथा पर्वतो वह्निमान् धूमात् वह्न्यभाववान् पाषाणवत्त्वात् इत्युभयोरपि हेत्वोः सत्प्रतिपक्षयोर्या प्रतिबन्धकता साऽपि विरोधिनिश्चयसामग्रीत्वेनैव यतः पाषाणवत्त्वं वह्न्यभावज्ञानसामग्री धूमवत्त्वं [216 B] वह्निज्ञानसामग्रीति उभयोः परस्परं विरोधात् धूमज्ञानं वह्न्यभावविरोधिज्ञानसामग्री पाषाणवत्त्वज्ञानं वह्निविरोधि-ज्ञानसामग्रीति सत्प्रतिपक्षयोर्विरोधिनिश्चयसामग्रीत्वेनैव प्रतिबन्धकत्वम्। ननु यथाश्रुतं सत्प्रतिपक्षपरमेव कुतो न स्यादित्यत आह - **नन्वि**ति टीका। तस्य सत्प्रतिपक्षस्य अन्यत्रानुमितिव्यतिरिक्तस्थले प्रतिबन्धकत्वाभावात् मूलकृता यदुक्तं प्रत्यक्षशाब्दज्ञानयोर्बाधसत्प्रतिपक्षयोः प्रतिबन्धकत्वं तदसङ्गतं स्यादित्यर्थः। ननु तथापीति समाधानग्रन्थोऽसङ्गतः। बाधसत्प्रतिपक्षयोर्जायमानयोः प्रतिबन्धकत्वेऽपि हेत्वाभासलक्ष्यताप्रयोजकं यदि अनुमित्यसाधारणदोषत्वं तत् तु नास्त्येवेत्यत आह - **न त्वि**ति टीका। तथा चानुमित्यसाधारणदोषत्वेन लक्ष्य-तैव नास्ति किन्तु ज्ञायमानदोषत्वेनैव लक्ष्यता, सा तु अनुमितौ तु तिष्ठत्येवेत्यनुमितौ सत्प्रतिपक्षस्य प्रतिबन्धकत्वा-दित्यर्थः। उत्तरग्रन्थं योजयति - **अनुमिती**ति टीका। तथा च भवतु अनुमित्यसाधारणदोषत्वम्, तदपि तयोर्वर्तत एवेत्यर्थः। ननु मूलकृता बाधस्य प्रत्यक्षे बाधत्वेन न प्रतिबन्धकता इति बाधवारणं कृतं परं सत्प्रतिपक्षवारणं तु न कृतमित्यत आह - **उपलक्षणमि**ति टीका। बाधपदं सत्प्रतिपक्षस्याप्युपलक्षणम्, तेन सत्प्रतिपक्षेणापि प्रत्यक्षज्ञानोत्पत्तेः प्रतिबन्धो न कर्तव्य एवेत्यर्थः। ननु बाधेन प्रत्यक्षज्ञानं न प्रतिबध्यत इत्ययुक्तम्। चक्षुरिन्द्रियेण यदा शङ्खनिष्ठश्वेतविषयकं ज्ञानं जातं 'न पीतः किन्तु श्वेतः' इति तदा पीतप्रत्यक्षानुदयात् प्रत्यक्षोत्पत्तावपि बाधः प्रतिबन्धको भवत्येवेत्यत आह - **प्रत्यक्षे**ति टीका। प्रत्यक्षे प्रत्यक्षबाधत्वेन अयमाशयो मूलकृतः - बाधत्वेन रूपेण या बाधस्य प्रतिबन्धकता साऽनुमितावेव न तु प्रत्यक्षे, प्रत्यक्षे तु प्रत्यक्षबाधत्वेन न तु बाधत्वेन।

एवं सत्प्रतिपक्षेऽपि; न विरोधिनिश्चयसामग्रीत्वेन प्रतिबन्धकत्वं प्रत्यक्षे, अपि तु प्रत्यक्षविरोधिनिश्चयसामग्रीत्वेनेति मूलव्याख्यावसरे उक्तप्रायम् । कुत इत्यत आह - **अपीतत्वानुमितावपी**ति । यदि बाधज्ञानमात्रं प्रत्यक्षे प्रतिबन्धकं स्यात् तदा अनुमितिरूपबाधसम्भवात् यत् पीतप्रत्यक्षं जायते तन्न स्यादित्यर्थः । अनुमितौ अप्रामाण्यशङ्काशून्यबाधज्ञानमात्रं प्रतिबन्धकम् अनुमितिस्तु उक्तबाधे सति न जायते एवेति, प्रत्यक्षे तु तन्नास्ति इति । एतदेवाह - **बाधमात्रेणे**ति टीका । ननु प्रत्यक्षे बाधमात्रं प्रतिबन्धकं मा भवतु, शाब्दज्ञाने तु बाधज्ञानं प्रतिबन्धकं भवत्येव अयोग्यतानिश्चयमात्रस्यैव शाब्दज्ञाने प्रतिबन्धकत्वात् इत्याशयेन शङ्कते - **नन्वि**ति । समाधत्ते - **अत्यन्ते**ति टीका । यथा -

अयं वन्ध्यासुतो याति खपुष्पकृतशेखरः ।
मृगतृष्णाम्भसि स्नातः [217 A] शशशृङ्गधनुर्धरः ॥

अस्य क्षोणिपतेरित्यादौ चायोग्यतानिश्चये विद्यमानेऽपि शाब्दबोधो जायते । न चैवं मानाभावः । शाब्दबोधजन्यचमत्कारविशेषानङ्गीकारे मुखप्रसादादीनामनुभवो न स्यात् । उत्तरदलं यथा 'अबाधात् तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम्' इति । ननु शाब्दबोधे योग्यताज्ञानस्य कारणत्वाभावे शाब्दीप्रमां प्रति योग्यताप्रमया शाब्दप्रमा जायते योग्यताभ्रमाच्छाब्दभ्रम इति न स्यात् । यत्सामान्ययोः कार्यकारणभाव इति न्यायाभावात् सामान्ययोग्यताज्ञानस्य यदि कारणतैव नास्तीत्यत आह - **अबाधादि**ति । शाब्दबोधमात्रे योग्यताज्ञानमात्रस्य कारणत्वाभावेऽपि वस्तुतो यत्र बाधाभावः तत्र शाब्दप्रमा यत्र बाधस्तत्र शाब्दभ्रमः इत्येव भ्रमप्रमाप्रयोजकम् । ननु अबाधात् यत्र शाब्दप्रमोत्पन्ना तत्र तस्याः प्रमात्वं केन निश्चेतव्यमित्यत आह - **स्वत** इति । वस्तुगत्या यत्र बाधो नास्ति तत्र शाब्दप्रमायाः प्रमात्वं केन ग्राह्यम् ? स्वत एव अनुव्यवसायेनैव ग्राह्यम् । **तत्प्रतिबन्धकत्वमि**ति टीका । बाधमात्रस्य न शाब्दज्ञानप्रतिबन्धका[त्व]म्, उक्तस्थले बाधज्ञाने सत्यपि शाब्दज्ञानोदयात् । अत्राशङ्कते - **न चे**ति टीका । तथा च स्वमतेऽपि बाधमात्रस्य न शाब्दज्ञानप्रतिबन्धकत्वम् । कुतः ? यदि शाब्दज्ञाने बाधमात्रस्यैव प्रतिबन्धकत्वं स्यात् तदा 'नरशिरः[कपालं] शुचि प्राण्यङ्गत्वात् शङ्खशुक्त्यादिवत्' अनेन अनुमानेन अशुचित्वबोधकस्याप्यागमस्य बाधः स्यात् । आगमस्तु 'नारं स्पृष्ट्वा तु सस्नेहं सचेलो जलमाविशेत्' इत्यागमोऽपि अनुमानेन बाध्येत । यदि बाधमात्रस्य शाब्दज्ञानप्रतिबन्धकत्वं तदाऽनुमानेनागमस्यापि बाधः स्यादिति न च वाच्यम् । समाधत्ते - **उपजीव्ये**ति टीका । तथा च बाधस्य तत्र शाब्दज्ञाने प्रतिबन्धकत्वं यत्र स्वापेक्षया बलवत्त्वेनाज्ञातशब्दजन्यज्ञाने बाधस्य प्रतिबन्धकत्वम्, प्रकृते च स्वशब्देनानुमानं तदपेक्षया बलवत्त्वेनैव शब्दस्य ज्ञातत्वात् । बलवत्त्वमागमस्य निरूपयति - **उपजीव्ये**ति टीका । नरशिरःशौचानुमानमपि किञ्चिन्मूलकं वक्तव्यम् आगममूलकं वक्तव्यम् । तथा च नरशिरःशौचानुमानस्य मूलमागम एव । ततः अनुमानस्य मूलमागमः । आगमत्वेन रूपेण मूलता, शौचत्वानुमानत्वेन रूपेण मूलिता,

तेन मूलमूलिनोर्मध्ये मूलमेव बलवत् । अशुचित्वबोधकागमस्तु मूल्यनुमानापेक्षया बलवानेव । एतदेवाह - **उपजीव्यजातीयत्वेने**ति टीका । नरशिरःशौचानुमानस्य मूलं य आगमः स उपजीव्यस्तज्जातीयत्वेन अशुचित्वबोधको य आगमः स प्रबल एव. अनेन च प्रबलेनाशुचित्वबोधकागमेन शुचित्वबोधकानुमानं बाध्यत एवेति नानुमानेनागमबाध इत्यभिप्रायः । ननु अशुचित्वबोधकागमस्य बलवत्त्वाज्ञानदशायामनुमानेन [217 B] बाधः स्यात् इत्यत आह - **तद्बलत्वे**ति टीका । यतोऽनुमानापेक्षया शब्दस्य बलवत्त्वाज्ञानं तदाऽनुमानेन शब्दस्य बाधः क्रियत एव, अत एव तद्दशायामनुमानेनागमबाधे इष्टापत्तिरित्यर्थः । मूले हेत्वाभासलक्षणे यद्विषयत्वे-नेत्यादिरूपे शङ्कते - **न त्वि**ति । अयं पाठः चिन्त्यमेतत्पर्यन्तः सर्वमवदातमित्यतः पूर्वं टीकायां द्रष्टव्यः । भ्रमा-ल्लिखितमप्यत्रैव व्याख्यायते । यद्विषयकं ज्ञानमनुमितिप्रतिबन्धकं तद्धेत्वाभासत्वं चेत् तदा गौरवस्यापि हेत्वा-भासत्वम्, गौरवविषयकमपि ज्ञानमनुमितौ प्रतिबन्धक[म]स्ति । अन्यथा कार्यत्वहेतुना क्षितेर्द्वि(र्द्वि)कर्तृक-त्वानुमानं स्यात् । मध्ये शङ्कते - **न चे**ति । हेतुविषयतया यद् ज्ञानं प्रतिबन्धकं स हेत्वाभास इति गौरवज्ञानं तु हेतुविषयतया न प्रतिबन्धकं हेत्वविषयकस्यापि गौरवज्ञानस्य प्रतिबन्धकत्वात् । न गौरवस्य हेत्वाभासत्वमिति शङ्कार्थः । दूषयति - **बाधस्ये**ति । तर्हि बाधस्यापि हेत्वाभासत्वं न स्यात् । न हि हेतुविषयकमेव बाधज्ञानं प्रति-बन्धकं किन्तु साध्याभावज्ञानमात्रम्, तेन बाधस्यापि हेत्वाभासत्वं न स्यादित्याक्षेपार्थः । समाधत्ते - **यज्ज्ञाने सती**ति टीका । यज्ज्ञाने सति अवश्यमनुमितिप्रतिबन्धः स हेत्वाभासः । न हि गौरवज्ञाने सति अवश्यमनुमिति-प्रतिबन्धः यतः फलमुखगौरवज्ञाने विद्यमानेऽप्यनुमितेरप्रतिबन्धात् । यथा यागः स्वर्गसाधनं श्रुत्युपदिष्टकारण-ताकत्वात् । अत्र फलमुखं गौरवम् - यागे यदि स्वर्गसाधनता स्यात् तदाऽधिकाऽपूर्वकल्पना स्यात्, यागस्य चिरविनष्टत्वेन आशुतरविनाशित्वेन कालान्तरभावि स्वर्गं प्रति साधनता कथं स्यादतोऽपूर्वं कल्पनीयम् । इत्य-पूर्वकल्पनमपि गौरवम् । इदं यद् गौरवज्ञानं तदनुमितिप्रतिबन्धकं न भवति, फलमुखत्वात् कारणतानिर्वाहकत्वात् । अपूर्वकल्पनाव्यतिरेकेण यागस्वर्गयोः कार्यकारणनिर्वाहो न स्यादिति गौरवं न दोषायेति गौरवज्ञानस्यानुमिति-प्रतिबन्धकत्वाभावात् न तस्य हेत्वाभासत्वम् । अत्र चिन्त्यमाह - **एवमि**ति टीका । अप्रामाणिकगौरवज्ञानस्य हेत्वाभासोपाधितापत्तिः । यतोऽप्रामाणिकगौरवज्ञानेनानुमितिप्रतिबन्धः क्रियते इति कृत्वाऽप्रामाणिकगौरवस्य हेत्वाभासतापत्तिः । यथा क्षित्यादिकं सकर्तृकं कार्यत्वात् इत्यत्र कर्तृद्वयं कुतो न सिद्ध्यति । यत्र कर्तृद्वयानुमितौ अप्रामाणिकगौरवज्ञानं प्रतिबन्धकमित्यप्रामाणिकगौरवमपि हेत्वाभासः स्यात् । स(सा)म्प्रदायिकानां मते गौरवस्य हेत्वाभासव्यवहाराभावात् तदनुरोधेन गौरवान्यत्वे सति यद्विषयकं ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः इति चिन्त्योद्धारः । उत्तरमूलं योजयितुमाह - **ते चे**ति टीका [218 A] ।

## । हेत्वाभाससामान्यनिरुक्तिः समाप्ता ।

## । हेत्वाभासप्रकरणे सव्यभिचारः ।

**सव्यभिचारोऽपि त्रिविधः साधारण-असाधारण-अनुपसंहारिभेदात् । तत्र सव्यभिचारः साध्यतदभावप्रसञ्जक इति न त्रितयसाधारणं लक्षणम् एकस्योभयं प्रति असाधकत्वात् अनापादकत्वाच्च । नाप्युभयपक्षवृत्तित्वम् उभयव्यावृत्तत्वं वा तत्त्वम् अननुगमात् । अथ साध्यसंशयजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमतः सः, विप्रतिपत्तिस्तु प्रत्येकं न तथा न वा पक्षवृत्तिः साधारणमन्वयेन असाधारणं व्यतिरेकेण अनुपसंहारी पक्ष एवोभयसाहचर्येण कोटिद्वयोपस्थापकः ।**

सव्यभिचारस्य विभागमाह - **साधारणे**ति मूलम् । सव्यभिचारस्य लक्षणमाह - **तत्रे**ति मूलम् । सव्यभिचारलक्षणे इत्यर्थः । **वार्ति[क]कारोक्तं** व्यभिचारलक्षणं दूषयति - **साध्यतदभावे**ति मूलम् । येन हेतुना साध्यमप्यापादयितुं शक्यते साध्याभावोऽप्यापादयितुं शक्यते स सव्यभिचारः । लक्षणं दूषयति - **साध्यतदभावे**ति मूलम् । यथा पर्वतो धूमवान् वह्नेः इत्यत्र हेतुर्वह्निः धूमसहचरितत्वात् धूमापादकः, धूमाभावसहचरितत्वात् धूमाभावस्याप्यापादक इत्येवं साधारणे व्यभिचारिणि लक्षणं वर्तते; एवमसाधारणे यथा शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वमनित्येभ्यो व्यावृत्तमिति कृत्वा नित्यत्वस्यापादकं नित्यादेरपि व्यावृत्तमिति कृत्वाऽनित्यत्वस्यापादकम्, पक्षे एव वर्तमानत्वात् असाधारणः शब्दत्वम् । अनुपसंहारी यथा घटोऽनित्यो घटाकाशान्यतरत्वात्, घटाकाशान्यतरत्वं हेतुः, न चास्यानित्यत्वेन सहचारो न नित्यत्वेन सहचारः, किं पक्षे वर्तमानो हेतुर्नित्यत्ववति वाऽनित्यत्ववति वेति कृत्वाऽयमपि साध्यतदभावापादक(कः) । तेन इदं त्रितयसाधारणं लक्षणम् । दूषयति - **एकस्ये**ति मूलम् । एकस्य हेतोः साध्यसाध्याभावोपस्थापकत्वं नास्ति विरुद्धत्वात् । न ह्येकं साध्यसाधकं तत् कदापि साध्याभावसाधकं भवति । न हि वह्निसाधको धूमो वह्न्यभावसाधको भवति । तथा चेदं लक्षणं सव्यभिचारलक्षणं दुष्टम् । लक्षणान्तरमुपन्यस्य दूषयति - **नापी**ति मूलम् । उभयपक्षवृत्तित्वं सपक्षविपक्षवृत्तित्वं हेतोः सव्यभिचारः यथा पर्वतो धूमवान् वह्नेः इत्यत्र वह्नेर्हेतो(वह्निर्हेतुः) धूमाभाव[व]दयोगोलकवृत्तिः अथ धूमवन्महानसवृत्तिरपि भवति । नन्विदमसाधारणेऽव्याप्तम् । कथम् ? तस्य विपक्षवृत्तित्वाभावात् इत्यत आह - **उभये**ति मूलम् । मास्तु सपक्षविपक्षोभयवृत्तित्वं लक्षणं तस्य किन्तु सपक्षविपक्षोभयव्यावृत्तत्वं तु अस्ति, तच्च शब्दोऽनित्यः शब्दत्वात् इत्यत्र वर्तते येन शब्दत्वस्य [218 B] सपक्षविपक्षोभयव्यावृत्तत्वमस्ति । एतद् दूषयति - **अननुगमादि**ति मूलम् । यदि सपक्षविपक्षोभयवृत्तित्वं लक्षणं सव्यभिचारस्य तदाऽसाधारणे नास्ति तेनासाधारणसाधारणयोरनुगतमेकं लक्षणं नास्ति इति कृत्वा अननुगतमिदं लक्षणम् । एवमुभयपक्षव्यावृत्तत्वं यत्

लक्षणं तदप्यननुगतम्, यद्यपि असाधारणे वर्तते तथापि साधारणे नास्तीत्यननुगतम्। अथ लक्षणान्तरमुद्भाव्य दूषयति - **अथे**ति मूलम्। **साध्ये**ति मूलम्। साध्यस्य यः सन्देहस्तस्य जनिका या कोटिद्वयोपस्थितिः तस्या जनकं यत् पक्षधर्मताज्ञानं तद्विषयत्वे सति हेत्वभिमतत्वमिदं पर्वतो धूमवान् वह्नेरिति अत्र वर्तते। कथम्? वह्निमत्त्वज्ञानं सपक्षविपक्षसाधारणत्वज्ञानेन साध्यसन्देहजनककोटिद्वयोपस्थितिजनकं भवति। वह्नेर्धूमवति धूमाभाववति च वर्तमानत्वादुभयकोट्युपस्थितिर्जायते। अनेन वह्निहेतुना धूमवदुपस्थितिर्जायते धूमाभाववदुपस्थितिरपि जायते। तयोपस्थित्या संशयो जायते यथाऽयं धूमवान् धूमाभाववान् वा। इदं साधारणोदाहरणम्। असाधारणोदाहरणम्- शब्दोऽनित्यः शब्दत्वात् इति। अत्र शब्दत्वस्य सपक्षविपक्षव्यावृत्त्या साध्यस्य साध्याभावस्य चोपस्थिति-जनकत्वम्, यत् एकसम्बन्धिदर्शनमपरसम्बन्धिस्मारकं भवति यथोच्चत्वस्योभयमपि स्थाणुत्वं पुरुषत्वमप्युभयं सम्बन्धि तेनोच्चत्वमुभयस्मारकं भवति। एवं शब्दत्वमुभयव्यावृत्तमिति कृत्वा उभयस्मारकं भवति। तया चोभयोपस्थित्या सन्देहश्च जायते। शेषं टीकायाम्। नन्विदं विप्रतिपत्तौ अतिव्याप्तम्, तथाहि विरुद्धार्थप्रतिपादकं वाक्यं विप्रतिपत्तिः यथा शब्दोऽनित्य इत्येकेनोक्तम् अपरेण च शब्दो नित्य इत्युक्तम्। तदा मध्यस्थस्योभयो-पस्थितिर्जायते। तदनन्तरं मध्यस्थस्य संशयः इति कृत्वा विप्रतिपत्तिवाक्यस्य साध्यसन्देहजन[क]कोटि-द्वयोपस्थितिजनकत्वमस्त्येवेत्यतिव्याप्तिः। साऽतिव्याप्तिर्न भवति। कुत इत्यत आह - **प्रत्येकमि**ति मूलम्। प्रत्येकं यथा शब्दो नित्य इत्युच्यमानेऽनित्यस्योपस्थितिर्न जायते नित्यत्वस्योपस्थितिरेव जायते। अनित्य इत्युच्यमानेऽनित्यत्वस्यैवोपस्थितिर्जायते। उभयोपस्थितेरभावात् इति कृत्वा नोभयोपस्थितिर्जनकत्वम् अथवा पक्षधर्मताज्ञानविषयत्वमपि नास्ति। विप्रतिपत्तेः पक्षवृत्तित्वाभावात् नातिव्याप्तिरित्यर्थः। साध्यसन्देह-जनककोटिद्वयोपस्थितिजनकत्वमेव विवृणोति - **साधारणमि**ति मूलम्। साधारणमन्वयेन वह्न्यादिकं हेतुः सपक्षविपक्षयोरपि वर्तते इति कृत्वोभयोपस्थापकम्। असाधारणं तु व्यतिरिकेण सपक्षविपक्षोभयव्यावृत्त्या साध्यतदभावोपस्थितिजनकम्। अनुपसंहारित्वं सर्वमनित्यं प्रमेयत्वादित्यत्र साध्यतदभावोपस्थितिजनको भवति, पक्षे उभयसाहचर्यात्।

अथ टीका यथा। सामान्यलक्षणमनुक्त्वैव मूलकृता विभागः कृतः सव्यभिचारस्य। तत्राक्षिपति - **यद्यपी**ति टीका। सामान्यलक्षणानन्तरमेव विभागो युक्तः। यदि ततः पूर्वमेव विभागः क्रियते तदा को दोष इत्यत आह- **अप्राप्तकालते**ति टीका। अनाकाङ्क्षिताभिधानेऽप्राप्तकालता यतोऽत्र सामान्यलक्षणानन्तरमेव विभाग आकाङ्क्षितः, सामान्यलक्षणात् यदि पूर्वं विभागः क्रियते तदाऽनाकाङ्क्षिताभिधाने निग्रहस्थानमिदं स्यादित्यर्थः। समाधत्ते - **तथापी**ति टीका। सामान्यलक्षणमकृत्वा यत् सव्यभिचारस्य विभागः कृतः तत्र बीजं किञ्चिदिष्टमस्ति तदाह - **अनुपसंहारी**ति। यदि सामान्यलक्षणात् पूर्वं विभागो न क्रियते तदा वक्ष्यमाणं यद् व्यभिचारलक्षणमेकदेशी

वदिष्यति तदुपसंहारी योऽसिद्धः तत्रातिव्याप्तम् इति व्यभिचारलक्षणे एकदेशी दोषं वदिष्यति, दोषं निवारयितुं मूलकारो वदति - अनुपसंहारी नासिद्धान्तर्भूतः किन्तु व्यभिचारमध्य एवान्तर्भूत इति वक्तुमयं विभागः कृतः सामान्यलक्षणात् प्राक्। तस्मादयमर्थः - कस्यापि वादिनो मतेऽनुपसंहारी असिद्धान्तर्भूतत्वादलक्ष्यः, तन्मतं वारयितुमनुपसंहारी व्यभिचारान्तर्भूतो लक्ष्य एवेति प्रतिपादयितुं विभागः कृत इति। एतदेवाह - **तदन्तर्भूतत्व** इति टीका। व्यभिचारान्तर्भूतत्व इत्यर्थः। ननु व्यभिचारिणि साध्यतदभावोपस्थापकत्वं कथं नास्तीत्यत आह - **प्रसञ्जकत्वमि**ति टीका। प्रसञ्जकत्वं [219 A] साधकत्वम् आपादकत्वं व्याप्यत्वम(मि)ति र्या(या)वत् तच्च विरुद्धम्, उभयस्यैकसाधकाभावात्। न हि साध्यसाध्याभावव्याप्यमेकं सम्भवति। एकस्योभयं प्रति अव्याप्यत्वादित्यर्थः। **साध्यवदि**ति टीका। उभयपक्षवृत्तित्वं साध्यवति वर्तमानत्वं साध्याभाववति च वर्तमानत्वम्। अनुपसंहारिणि तु हेतौ पक्ष एव साध्यसाध्याभाववद्वृत्तित्वं वर्तत इति कृत्वा लक्षणमुपपन्नं त्रितयसाधारणम्। ननूभयव्यावृत्तत्वं धूमेऽपि तिष्ठति सपक्षादयोगोलकात् तस्य व्यावृत्तत्वात् विपक्षाच्च ह्रदादेरपि व्यावृत्तत्वाच्चेत्यत आह सर्वेति विशेषणम्। धूमादेः सर्वसपक्षविपक्षव्यावृत्तत्वं नास्ति। ततो न धूमेऽतिव्याप्तिरित्यर्थः। ननु साध्यसन्देहजनकत्वं कोटिद्वयस्य नास्त्येव यतः कोटिद्वयज्ञानेन सन्देहो जन्यते न तु कोटिद्वयेनेत्यत आह - साध्यसन्देहजनिका या कोटिद्वयोपस्थितिः। सा का इत्यत आह - साध्यतदभावोपस्थितिः। तज्जनकं यत् पक्षधर्मताज्ञानं तद्विषयत्वे सतीत्यर्थः। अत्राशङ्कते - **नन्विति**। पक्षधर्मतापदं व्यर्थम्। साध्यसन्देहजनककोटिद्वयोपस्थापकज्ञानविषयत्वे सति हेत्वभिमतत्वमित्येवास्तु, पक्षधर्मतापदं व्यर्थमित्याशङ्कार्थः। कस्यचिन्मतेन समाधानमाह - **साध्यसन्देहे**ति टीका। प्रामाण्यसन्देहात् विषयसन्देहोऽनुभवसिद्धः। यत्र साध्यज्ञाने प्रामाण्यसन्देहात् साध्यसन्देहो जातः [तत्र कथं साध्यसन्देहो जन्यते ?]। तथा च(हि) साध्यज्ञाने ज्ञानत्वं प्रमाऽप्रमासाधारणवृत्तीति ज्ञानत्वसमानदर्शनात् प्रामाण्याप्रामाण्योपस्थितिर्जायते सा च संशयरूपा, तया प्रामाण्याऽप्रामाण्यसंशयरूपोपस्थित्या साध्यसन्देहो जन्यते। तथा चेदं लक्षणं ज्ञानत्वेऽतिव्याप्तमित्याशङ्कार्थः। तथा च तत्रातिव्याप्तिवारणार्थं पक्षधर्मतापदम्। एवं च ज्ञानत्वेऽतिव्याप्तिर्न भवति। पक्षवृत्तिताज्ञानं नाम साध्यसंशयविषयवृत्तिताज्ञानम्, साध्यसंशयविषयो यः पक्षस्तद्वृत्तित्वज्ञानविषयत्वं न च ज्ञानत्वम्, साध्यसन्देहविषयो यः पर्वतस्तद्वृत्तित्वज्ञानं ज्ञानत्वे तिष्ठतीति ज्ञानत्वेऽतिव्याप्तिर्न भवतीत्यर्थः। परिहारमाह - **न चे**ति टीका। ज्ञानत्वे यत् साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं प्रामाण्याप्रामाण्यसंशयजनकत्वलक्षणं तत् न संशयविषयपर्वतादिवृत्तित्वज्ञानविषयतया। अयमर्थः - ज्ञानत्वं तु ज्ञानवृत्तितयैव प्रामाण्याप्रामाण्यकोटिद्वयोपस्थापकम्, न तु पर्वतवृत्तितया। तस्मात् ज्ञानत्वस्य पक्षवृत्तित्वज्ञानविषयतया न साध्यसन्देहकोटिद्वयोपस्थापकत्वं किन्तु ज्ञानवृत्तितयैव। अत्राशङ्कते - **नन्वि**ति टीका। तथा च सम्पूर्णं सव्यभिचारलक्षणं पक्षवृत्तित्व-

ज्ञानविषयत्वे सति साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं ज्ञानत्वेऽतिव्याप्तमेव। तथाहि यद्यपि पर्वतपक्षकवह्न्यादिसाध्यकस्थले ज्ञानत्वे पक्षधर्मताज्ञानविषयत्वे सति साध्यसन्देहजनककोटिद्वयोपस्थितिर्नास्ति तथापि ज्ञानपक्षके पक्षधर्मताज्ञानविषयतया [219 B] साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं वर्तते। सर्वं ज्ञानं निर्विषयकं ज्ञानत्वात् इत्यत्र निर्विषयकत्वसविषयकत्वानुमितौ जातायां पश्चाद् यदा तस्यामनुमितौ प्रामाण्याप्रामाण्यसन्देहो जायते तदा इदं लक्षणमतिव्याप्तम्। ज्ञानत्वं पक्षवृत्तिताज्ञानविषयो भवति पक्षे ज्ञाने ज्ञानत्वस्य वृत्तित्वात्। ननु एतस्यापि व्यभिचारित्वात् कथमतिव्याप्तिः। अयमपि सङ्ग्राह्यो भवत्येवेति चेत्। न, व्यभिचारास्फूर्तिदशायां ज्ञानत्वे साध्यतदभाववृत्तित्वमपि यत्र उपस्थितं नास्ति नापि साध्यतदभाववद्व्यावृत्तत्वं नाप्यनुपसंहारित्वमुपस्थितं तस्यां दशायां ज्ञानत्वेऽतिव्याप्तेः। कथम् ? यथा वह्निज्ञाने ज्ञानत्वसाधारणधर्मदर्शनमात्रात् प्रामाण्याप्रामाण्यसंशयः तदनन्तरं वह्नितदभावसंशयः तद्वत् प्रकृते यत्र निर्विषयकत्वज्ञाने ज्ञानत्वसाधारणधर्मदर्शनमात्रादेव साध्यसन्देहजनकप्रामाण्याप्रामाण्यकोटिद्वयोपस्थापकत्वं तत्र पक्षधर्मताज्ञानविषयत्वमपि वर्तते, साध्यसन्देहजनककोटिद्वयोपस्थितिर्या प्रामाण्याप्रामाण्यकोटिद्वयोपस्थितिस्तज्जनकत्वमप्यस्तीति तत्र ज्ञानत्वेऽतिव्याप्तिः, न चायं व्यभिचारीति वाच्यम् एतस्य विरुद्धत्वात्। ज्ञानत्वस्य निर्विषयत्वाभावेनैव सह व्याप्तिः, यदज्ञानत्वं तद् निर्विषयत्वाभावो यः सविषयकत्वं तेनैव सह व्याप्तमिति विरुद्धेऽलक्ष्येऽस्मिन् अतिव्याप्तिः। एतदेवाह - **प्रामाण्ये**ति टीका। एतावता प्रबन्धेन साध्यसन्देहजनककोटिद्वयोपस्थापक[त्वं] ज्ञानत्वस्योपपादितं भवति। अथ पक्षधर्मताज्ञानविषयत्वमपि तस्योपपादयति - **तत्रे**ति टीका। तत्र ज्ञानत्वे निर्विषयत्वसंशयविषयीभूतं यज्ज्ञानं तद्वृत्तित्वज्ञानविषयत्वं ज्ञानत्वे तिष्ठति इति कृत्वा पक्षधर्मताज्ञानविषयत्वमपि तत्र तिष्ठतीति ज्ञानत्वे सम्पूर्णं सव्यभिचारलक्षणमतिव्याप्तम्। **तथात्वादि**ति टीका। साध्यसंदेहजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वादित्यर्थः। समाधत्ते - **न ही**ति टीका। तथा चायमर्थः - पक्षधर्मताज्ञानविषयतया यत्र साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं तत्त्वं(त्र) सव्यभिचारत्वम्। ज्ञानत्वे तु निर्विषयत्वसाध्यसन्देहजनकप्रामाण्याप्रामाण्यकोटिद्वयोपस्थापकत्वं यत् तत् निर्विषयत्वरूपसंशयविषयवृत्तित्वेनैवेति नास्ति। अत्र बाधकमाह - **अन्यथे**ति टीका। यदि ज्ञानत्वस्य निर्विषयत्वसंशयविषयवृत्तिताज्ञानविषयतयैव साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं स्यात् तदा घटादिज्ञानेऽपि प्रामाण्याप्रामाण्यसंशयो जायते, न हि तत्र निर्विषयत्व[संशय]विषयवृत्तिताज्ञानं तिष्ठति। एतदेवाह - **ज्ञानत्वस्ये**ति टीका। यदि निर्विषयत्वसंशयविषयवृत्तिताज्ञानविषयतयैव [220 A] साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं स्यात् [तर्हि] अयं घटः कम्बुग्रीवादिमत्त्वात् [इति] अत्र घटज्ञाने ज्ञानत्वसाधारणधर्मदर्शनात् यः प्रामाण्यसंशयो जायते स न स्यात्। तत्र ज्ञानत्वे साध्यसंशयो घटत्वसंशयः तद्विषयो घटः तद्वृत्तित्वज्ञानविषयतया साध्यसन्देहजनकप्रामाण्याप्रामाण्यकोटिद्वयो-

पस्थापकत्वं नास्ति। कुतो नास्ति इत्यत आह - **घटादिवृत्तिताज्ञानविरहादि**ति टीका। तस्मात् सर्वं ज्ञानं निर्विषयकं ज्ञानत्वात् इत्यत्र ज्ञानत्वरूपो यः साधारणो धर्मः प्रमाऽप्रमोभयवृत्तिः तत्साधारणधर्मदर्शनात् प्रामाण्याप्रामाण्यसंशयद्वारा ज्ञानं निर्विषयं न वेति संशयो जायते। निर्विषयत्वसंशयविषयवृत्तित्वज्ञानविषयतया साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं ज्ञानत्वे नास्तीति कृत्वा ज्ञानत्वे नातिव्याप्तिरित्यर्थः। अत्र शङ्कते - **नन्विति**। व्यभिचारादिभ्रमविषयीभूते सद्धेतावतिव्याप्तिः। तथाहि पर्वतो वह्निमान् धूमात् इत्यत्र वह्न्यभाववद्वृत्तिर्धूम इति भ्रमे साध्यसन्देहजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वं वर्तते, यथा व्यभिचारिणि वह्न्यादौ व्यभिचारिप्रमातः साध्यसन्देहजनककोटिद्वयोपस्थितिर्जायते तथा सद्धेतावपि व्यभिचारभ्रमात् साध्यसन्देहजनककोटिद्वयोपस्थितिर्जायते यथा अयं वह्निमान् न वेतिरूपा इति सद्धेतावप्यतिव्याप्तिः। मध्ये शङ्कते- **न चे**ति टीका। तथा च सद्धेतौ हेत्वभिमतपदेन हेत्वाभासपरेण तद्वारणम्, तथाहि व्यभिचारलक्षणे हेत्वभिमतत्वस्थाने हेत्वाभासत्वमभिमतमिति तेनैव न तत्रातिव्याप्तिरित्यर्थः। अत्र दूषणमाह - **अपक्षधर्मे**ति टीका। तथा च ह्रदो वह्निमान् धूमात् इत्यत्राव्यभिचारिणि व्यभिचारिभ्रमविषये तथाप्यतिव्याप्तिः। कथम् ? अस्मिन् ह्रदे धूमाभावात् स्वरूपासिद्धे साध्यसन्देहजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वं वर्तते अथ च हेत्वाभासत्वमपि वर्तते, अतस्तत्रातिव्याप्तिः। मध्ये शङ्कते - **न चे**ति टीका। **तादृशे**ति टीका। साध्यसाध्याभावकोट्युपस्थापकप्रमाविषयत्वं विवक्षितम्। अतोऽपक्षधर्मे धूमे व्यभिचारभ्रमविषयीभूते साध्यसन्देहजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वं नास्तीति कृत्वा नातिव्याप्तिरित्यर्थः। अत्र दूषणमाह - **हेत्वभिमते**ति टीका। व्याभिचारिभ्रमविषयीभूते सद्धेतौ अतिव्याप्तिवारणार्थं हेत्वभिमतपदं दत्तम्, तच्च व्यर्थम् सद्धेतौ साध्यसन्देहजनककोटिद्वयोपस्थापकपक्षधर्मताप्रमाविषयत्वाभावादेव न तत्राति[व्याप्ति]रिति समग्रसव्यभिचारलक्षणे पूर्वपक्षः। अयमत्र प्रघट्टार्थः। साध्यसन्देहजनककोटिद्वयोपस्थापकपक्षधर्मताप्रमाविषयत्वं [220 B] चेत् विवक्षितं तदा हेत्वभिमतपदं हेत्वाभासपरं व्यर्थम्। यदि च भ्रमसाधारणसाध्यसन्देहजनककोटिद्वयोपस्थापकं चेत् विवक्षितं तदा सद्धेतौ व्यभिचारभ्रमविषयीभूतेऽतिव्याप्तिवारणार्थं हेत्वभिमतपदस्य सार्थकत्वेऽपि हेत्वभिमतपदसार्थक्येऽपि अपक्षधर्मधूमे स्वरूपासिद्धे व्यभिचार(रि)भ्रमविषयीभूतेऽतिव्याप्तिरिति। अत्र केषाञ्चित् समाधानमाह - **मैवमि**ति टीका। हत्वभिमतपदस्यार्थः। साध्याव्याप्यत्वं साध्यस्याव्याप्यो यो हेतुरित्यर्थः। साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं तु भ्रमप्रमासाधारणम्, तथा च सद्धेतौ व्यभिचारभ्रमविषयीभूतेऽपक्षधर्मे धूमे तादृशव्यभिचारविषयीभूते व्यभिचारभ्रमविषयीभूते साध्याव्याप्यत्वपदेनैवातिव्याप्तिवारणात् स तु धूमः साध्यव्याप्य एवेति न तत्रातिव्याप्तिः। अत्र साध्याव्याप्यत्वपरत्वकरणे चिन्त्यमाह - **तत्रे**ति टीका। तत्रेति चिन्त्यमिति अग्रेतनेनान्वयः। चिन्त्यबीजमिदमाह - **अव्यभिचारित्वादि**ति टीका। हेत्वभिमतपदं यदि साध्या-

व्याप्यत्वपरं क्रियते तदाऽव्यभिचारित्वभ्रमविषयीभूते विरुद्धे तथाप्यतिव्याप्तिरेव । तथाहि शब्दो नित्यः कृतकत्वात् इति विरुद्धे व्यभिचारभ्रमविषयीभूतेऽत्र भ्रमो यथाऽयं कृतकत्वहेतुर्नित्यत्वेन सह व्यभिचारीति भ्रमस्तत्रातिव्याप्तिः व्यभिचारज्ञानं वर्तते इति कृत्वा साध्यसन्देहजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वं वर्तते, परं साध्याव्याप्यत्वमपि तत्रास्ति इति कृत्वा विरुद्धे तत्रातिव्याप्तिः । अत्र शङ्कते - **न चेति** टीका । तथा च विरुद्धोऽप्यनेन रूपेण सङ्ग्राह्य एव, साधारण एवेति ग्रन्थकारेण लिखितत्वात् सोऽपि सव्यभिचार एवेत्याशङ्का । न चेत्यारभ्य वाच्यमित्यन्तेन ग्रन्थेन दूषयति - **पक्षधर्मतेति** टीका । तर्हि पक्षधर्मतापदवैयर्थ्यापत्तिः । पक्षधर्मतापदं तु इदं ज्ञानं निर्विषयं ज्ञानत्वात् इत्यत्र साध्यसन्देहजनकप्रामाण्याप्रामाण्यकोटिद्वयोपस्थितिजनके ज्ञानत्वेऽतिव्याप्तिवारणार्थम्; तस्य ज्ञानत्वस्य निर्विषयत्वादौ साध्ये विरुद्धत्वेन लक्ष्यत्वादेव सङ्ग्राह्यत्वम्, तदा पक्षधर्मतापदं व्यर्थम्, स तु लक्ष्य एवेति नातिव्याप्तिः । ननु ज्ञानं घटविषयकं ज्ञानत्वात् इत्यत्र साध्यसन्देहजनकप्रामाण्याप्रामाण्यरूपकोटिद्वयोपस्थितिजनके ज्ञानत्वेऽतिव्याप्तिवारणार्थं पक्षधर्मतापदमित्यत आह - **सविषयत्वादाविति** टीका । तथा चेदं ज्ञानं घटविषयकं ज्ञानत्वात् अयं तु व्यभिचारित्वेन सङ्ग्राह्य एव, ज्ञानं सविषयकं ज्ञानत्वात् इत्यत्र सद्धेतावतिव्याप्तिवारणाय पक्षधर्मतापदमित्यत आह - **अन्यादृशस्य चेति** टीका । यस्य साध्यस्य ज्ञानत्वमव्याप्यं तादृशव्यभिचारिविरुद्धबहिर्भूतसाध्यं नास्तीत्यर्थः । उपसंहरति - **तस्मादिति** । यदि [221 A] विरुद्धस्यासङ्ग्राह्यत्वं सव्यभिचारमध्ये न गण्य इति यावत् तदा व्यभिचारित्वभ्रमविषयीभूते विरुद्धेऽतिव्याप्तिः । तथाहि शब्दो नित्यः कृतकत्वात् इति नित्यत्वाभावव्याप्तं कृतकत्वमस्ति, तत्र व्यभिचारित्व-भ्रमो जातो यथाऽयं व्यभिचारीति, तदा तत्र सौ(स)व्यभिचारिवत् साध्यतद्(द)भावकोटिद्वयोपस्थापकत्वं वर्तते पक्षधर्मताज्ञानविषयत्वमपि वर्तते इति कृत्वा तत्रातिव्याप्तिः । **यदि चेति** । विरुद्धस्य यदि सव्यभिचारित्वेन सङ्ग्रहस्तदा ज्ञानं निर्विषयकं ज्ञानत्वात् इत्यत्रातिव्याप्तिर्न भवत्येव तस्यापि सव्यभिचारित्वेन सङ्ग्राह्यत्वात्, तत्रातिव्याप्तिवारणार्थं यत् पक्षधर्मतापदं व्यर्थमेवेति चिन्त्यार्थः । पक्षधर्मतापदसार्थकत्वार्थं स्वयं समाधानं वदति - **येयमिति** टीका । साध्यतदभावकोट्युपस्थापकपक्षधर्मताज्ञानविषयत्वमित्यत्र पक्षधर्मताप्रमाविषयत्वम्, तथा च यदंशे साध्यतदभावकोटिद्वयोपस्थापकत्वं तदंशे प्रमात्वं बोध्यम्, तथा च यदंशे पक्षधर्मताप्रमा तया पक्षधर्मताप्रमया साध्यतदभावसन्देहजनककोटिद्वयोपस्थापकत्वं तदंशे विवक्षितम् । ततः किमित्यत आह - **तेनेति** टीका । तथा च स्वरूपासिद्धसङ्कीर्णे व्यभिचारिणि नाव्याप्तिः । तथाहि ह्रदो धूमवान् वह्नेरिति स्वरूपासिद्धसङ्कीर्णो व्यभिचारी, तत्र नाव्याप्तिः, तत्र वह्नौ स्वरूपासिद्धत्वमपि तिष्ठति व्यभिचारित्वमपि तिष्ठति । ततो वह्निरूपहेतोर्यद्रूपविषयत्वेन साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं तदंशे प्रमात्वं बोध्यम् । भवति च वह्निर्व्यभिचारित्वेन सङ्ग्राह्यः । कथम् ? व्यभिचारित्वविषयकवह्निज्ञानस्य साध्यतदभावसन्देहजनक-

कोटिद्वयोपस्थितिजनकत्वं वर्तते, तदंशे व्यभिचारित्वांशे स सङ्ग्राह्य एव । स्वरूपासिद्धत्वांशे स्वरूपासिद्धत्वविषयतया स्वरूपासिद्धविषयकवह्निज्ञानस्य साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं नास्ति । न हि स्वरूपासिद्धत्वज्ञानात् साध्यसन्देहो जायते। सन्देहस्तु साधारणासाधारणानुपसंहारित्वज्ञानादेवेति कृत्वा स्वरूपासिद्धत्वांशोऽलक्ष्य एवेति। ननु तथापि पक्षधर्मतापदं व्यर्थमित्यत आह - **विरुद्धं चेति** टीका। ज्ञानं निर्विषयकं ज्ञानत्वात् इति अयं विरुद्धः, तथा च यद्विषयत्वेन प्रमारूपज्ञानस्य साध्यसन्देहजनककोटिद्वयोपस्थितिजनकत्वं तदंशे सव्यभिचारित्वम्, न चात्र ज्ञानत्वस्य पक्षधर्मताविषयकप्रमया साध्यसन्देहजनककोटिद्वयोपस्थितिः क्रियते इति पक्षवृत्तित्वप्रमाया अभावेऽपि घटज्ञाने प्रामाण्याप्रामाण्यसन्देहात् घटतदभावकोटिकः सन्देहो जायते इति कृत्वा पक्षधर्मत्वरूपविषयत्वेन न साध्यसन्देहजनककोटिद्वयोपस्थापकत्वम् इति कृत्वा विरुद्धेऽतिव्याप्तिवारणार्थं यद्विषयत्वेन कोट्युपस्थापकत्वं तदंशे प्रमात्वमित्यर्थः। परस्य पक्षधर्मताज्ञानपदस्य सार्थकत्वमेव। ननु असाधारणोत्तीर्णे सद्धेतावव्याप्तिः । कथम् ? तदानीं साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं नास्ति किन्तु साध्यनिश्चायकत्वमेवेति कृत्वा [221 B] तत्राव्याप्तिरित्यत आह - **तादृशेति** टीका। यस्यां दशायां साध्यसन्देहजनककोटिद्वयोपस्थितिजनकत्वं तस्यां दशायां सव्यभिचारत्वेन लक्ष्यत्वम् । अन्यदा तादृशज्ञानाभावे सव्यभिचारित्वमेव नास्तीति सर्वस्यापि सव्यभिचारित्वस्यानित्यदोषत्वमेव। अत्राशङ्कते - **न चेति** टीका। तथा च हेत्वभिमतपदं व्यर्थम् । कथम् ? सद्धेतौ अतिव्याप्तेरेवाभावात् सद्धेतुविषयकज्ञानस्य साध्यसन्देहजनककोटिद्वयोपस्थापकत्वाभावात् इत्याशङ्कार्थः। समाधत्ते - **तस्येति** टीका। हेत्वभिमतपदस्य साध्याव्याप्यत्वपरस्य सद्धेतुर्योऽसाधारणस्तत्रातिव्याप्तिः यतस्तस्यासाधारणत्वज्ञानकालेऽसाधारणत्वविषयकज्ञानस्य साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं वर्तते तेन सद्धेतौ असाधारण्यज्ञानकालेऽतिव्याप्तिः । ननु सद्धेतोरप्यसाधारण्यज्ञानकाले साध्यतदभावसन्देहजनककोटिद्वयोपस्थापकतयाऽसाधारण्यज्ञानकाले सोऽसाधारण्येन लक्ष्य एव, कुतस्तत्रातिव्याप्तिवारणार्थं हेत्वभिमतपदमित्यत आह - **केवलान्वयी**ति टीका। तथा च केवलान्वयीत्यग्रिमग्रन्थास्वरसात् तादृशज्ञानकालेऽपि सद्धेतुरसङ्ग्राह्य एव, सव्यभिचारः स न भवत्येवेति। तत्रातिव्याप्तिवारणार्थं हेत्वभिमतपदं सार्थकमित्यर्थः । तथैवाग्रेतनाभासमाह - **नन्विति** टीका । तथा च हेत्वभिमतपदस्यार्थः साध्याव्याप्यत्वम्, तच्च सद्धेतौ असाधारणेऽव्याप्तम्, केवलान्वयिसाध्यकेऽनुपसंहारिणि सर्वमनित्यं प्रमेयत्वात् इत्यत्र हेतोः साध्याव्याप्यत्वं नास्ति इति तत्राव्याप्तिरित्याभासार्थः ।

**केवलान्वयिसाध्यकानुपसंहारी अयं घट एतत्त्वात् इति असाधारणश्च सद्धेतुरेव तदज्ञानं दोषः पुरुषस्य। अत एवासाधारणप्रकरणसमयोरनित्यदोषत्वम् अन्यथा सद्धेतौ**

**बाधादिज्ञाने हेत्वाभासाधिक्यापत्तिः । न च प्रमेयत्वेनाभेदानुमाने शब्दोऽनित्यः शब्दाकाशान्यतरत्वात् इत्यत्र च साधारणेऽव्याप्तिः तयोः साध्यवदन्यवृत्तित्वेन[1] विरुद्धत्वादिति चेत् । न, एतदज्ञानेऽपि साधारण्यादिप्रत्येकस्य ज्ञानात् उद्भावनाच्च स्वपरानुमितिप्रतिबन्धात् उद्भावितैतन्निर्वाहार्थं साधारणादेरवश्योद्भाव्यत्वेन तस्यैव दोषत्वाच्च । एतेन पक्षवृत्तित्वे सति अनुमितिविरोधिसम्बन्धाव्यावृत्तिरनैकान्तिकः सपक्षविपक्षवृत्तित्वमुभयव्यावृत्तत्वमनुपसंहारित्वं चानुमितिविरोधि तत्सम्बन्धः प्रत्येकमस्ति विरुद्धोऽप्यनेन रूपेण सव्यभिचार एव उपाधेश्च न सङ्कर इति वक्ष्यत इति निरस्तम् । एतदज्ञाने ज्ञाने वावश्यकप्रत्येकज्ञानस्य दोषत्वात् असाधकतानुमितौ व्यर्थविशेषण-त्वाच्च ।**

अथ मूलम् । **केवलान्वयीति** मूलम् । केवलान्वयिसाध्यकोऽनुपसंहारी । अयं घटः एतत्त्वात् इति असाधारणश्च सद्धेतुरेव परं सव्यभिचारो न भवतीत्यलक्ष्य एवात्र स्थले साध्याव्याप्यत्वाभावात् । अलक्ष्यत्वं तर्हि तत्रानुमितिः कुतो न भवतीत्यत आह - **तदज्ञानमिति** मूलम् । यतः सद्धेतोरसाधारण्यज्ञानकाले सद्धेतुत्वाज्ञानं पुरुषस्यैव दोषः न तु तस्यासाधारण्यज्ञानं तदानीं दोषः । **अत एवेति** मूलम् । यतोऽसाधारणः पुरुषदोषो न वस्तुदोषोऽत एव तस्यानित्यदोषत्वम् । नन्वेवं यदि सद्धेतुरसाधारणत्वेन ज्ञातो हेत्व(हेतुः अ) स्तु दोषश्चेन्न भवति तदाऽसाधारणः स्वतन्त्रो हेत्वाभासो न स्यात् । असाधारणो हेत्वाभास एव न स्यादिति चेन्न । शब्दो नित्यः शब्दत्वात् इत्यादेरेव सद्धेतोरेव(वा)साधारणत्वमिति वक्ष्यति, ततोऽसाधारणोऽपि हेत्वाभासो भवति परं सद्धेतुरसाधारणः कदापि न भवतीति भावः । ननु सद्धेतुरपि असाधारणत्वेन ज्ञातः कुतोऽसाधारणो न भवतीत्यत आह - **अन्यथेति** मूलम् । यदि सद्धेतुरपि असाधारण्यज्ञानकाले हेत्वाभासोऽसाधारणस्तदा सद्धेतुरपि बाधादि-ज्ञानकाले बाधितः स्यात्, पर्वतो वह्निमान् धूमात् इत्यस्यापि बाधभ्रमदशायां बाधितत्वं स्यादित्यर्थः । अत्राशङ्कते - **न चेति** मूलम् । घटो घटाभिन्नः प्रमेयत्वात् अत्रेदमभेदानुमानम् । अत्र साध्यतदभावसन्देहजनककोटि-द्वयोपस्थापकत्वं [222 A] सव्यभिचारिलक्षणं नास्ति, सन्देहजनकत्वं हि हेतोः निश्चितसाध्यवन्निश्चित-साध्याभाववद्वृत्तित्वेन ज्ञानात् । एतदभिन्नः प्रमेयत्वात् इत्यत्र कुत्रापि साध्यनिश्चयाभावेन निश्चितसाध्य-वद्वृत्तित्वज्ञानाभावान्न साध्यसन्देहजनककोटिद्वयोपस्थापकत्वेन दोषत्वम् । नापि शब्दोऽनित्यः शब्दाकाशान्य-

---

१. मुद्रिते तु 'साध्यवदवृत्तित्वेन' इति पाठः ।

तरत्वात् इत्यसाधारणे निश्चितसाध्यवद्वृत्तित्वज्ञानाभावात् साध्यसन्देहजनककोटिद्वयोपस्थापकत्वाभावात् अव्याप्तिः। साध्याभाववान् आकाशः तद्व्यावृत्तत्वज्ञानं नास्तीति कृत्वा साध्यतदभावसन्देहजनककोटिद्वयो-पस्थापकं तत्र नास्तीत्यव्याप्तिरित्यर्थः। समाधत्ते - **तयोरि**ति मूलम्। अभेदानुमाने प्रमेयत्वस्य अनित्यत्वानुमाने शब्दाकाशान्यतरत्वस्येति द्वयोः सव्यभिचारत्त्वमेव नास्ति, तर्हि तयोः कथं दोषत्वमित्यत आह - **साध्यवदन्ये**ति मूलम्। तथा च तयोर्विरुद्धमध्य एवान्तर्भावः। केन कृत्वा ? निश्चितसाध्यवदन्यवृत्तित्वेन। अभेदानुमाने पक्षस्य सन्दिग्धत्वात् अन्यस्य तु साध्यवत्त्वाभावात् निश्चितसाध्यवदन्यवृत्तित्वं वर्तते इति कृत्वा विरुद्धलक्षणाक्रान्तत्वात् विरुद्धत्वम्। द्वितीयानुमानेऽपि निश्चितसाध्यवान् घटादिस्तदन्यवृत्तित्वात्, घटस्य तु सन्दिग्धत्वादाकाशस्य तु निश्चितसाध्याभावत्वात् निश्चितसाध्यवदन्यवृत्तित्वेन विरुद्धमध्य एतान्तर्भावः। मतमिदं दूषयति - **एतदज्ञाने**ति मूलम्। अनुमितिप्रतिबन्धकतावच्छेदकं हि रूपमत्र निरूप्यम् न च साध्यसन्देहजनकेत्यादिरूपम्। [साध्य-सन्देहजनकेत्यादिरूपं] तु नानुमितिप्रतिबन्धकतावच्छेदकं किन्तु प्रत्येकसाधारणत्वादिज्ञानमेव। तृती(त्रित)य-साधारणत्वज्ञानस्य नानुमितिप्रतिबन्धकता किन्तु प्रत्येकानि यानि साधारणत्वासाधारणत्वानुपसंहारित्वरूपाणि तज्ज्ञानादेवानुमितिप्रतिबन्धः न तु त्रितयसाधारणरूपज्ञानात् अनुमितिप्रतिबन्धः। एतदेवाह - **प्रत्येके**ति मूलम्। प्रत्येकज्ञानात् अयमसाधारणोऽयं साधारण इत्याद्युद्भावनात् अनुमितिप्रतिबन्धात् साधारणत्वादिज्ञानमेव प्रतिबन्धकं न तु त्रितयसाधारणं विशिष्टज्ञानम्। दूषणान्तरमाह - **उद्भाविते**ति मूलम्। यदापि साध्यसन्देह-जनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वमुद्भाव्यते तदापि साध्यसन्देहजनककोटिद्वयोपस्थापकतावच्छेदकं किंरूपमित्याकाङ्क्षायां साधारणत्वादिकमेवोद्भाव्यं तथा चावश्यक(कं) त्त(त)देवास्तु तथा च साध्येत्यादिरूपं दूषकतौपयिकं न भवतीत्युक्तम्। लक्षणान्तरमाशङ्क्य दूषयति - **एतेने**ति मूलम्। **पक्षे**ति मूलम्। पक्षवृत्तिः सन् अनुमितिविरोधी यः सम्बन्धः साधारणत्वासाधारणत्वानुपसंहारित्वरूपः तस्याव्यावृत्तिः तद्विद्यमानत्वमिति त्रितयसाधारणं लक्षणम्। वर्तते च [तल्लक्षणं] पर्वतो धूमवान् वह्नेः इति साधारणे यथाऽस्य [222 B] पक्षवृत्तित्वमप्यस्ति अनुमितिविरोधी यः सम्बन्धो विपक्षवृत्तित्वरूपः तद्विद्यमानत्वमप्यस्तीति, असाधारणेऽपि वर्तते शब्दो नित्यः शब्दत्वात् इत्यत्र शब्दत्वस्य सपक्षविपक्षव्यावृत्तत्वेन सम्बन्धोऽनुमितिविरोधी तद्विद्यमान-त्वमप्यस्ति, एवमनुपसंहारिण्यपि सर्वमनित्यं प्रमेयत्वात् इत्यादौ प्रमेयत्वमनु[मिति]विरोधिसम्बन्धोऽनुप-संहारित्वरूपस्तस्याव्यावृत्तिस्तद्वत्त्वं वर्तते व्याप्तिग्रहस्थानाभावादेवानुमितिविरोधिसम्बन्ध इति त्रितयसाधारणं लक्षणम्। ननु शब्दो नित्यः शब्दत्वात् इत्यत्र विरुद्धे उभयव्यावृत्तित्वलक्षणो यः सम्बन्धोऽनुमितिविरोधी तद्वत्त्वं विरुद्धे वर्तते इति कृत्वा विरुद्धेऽतिव्याप्तिरित्यत आह - **विरुद्धोऽपी**ति मूलम्। विरुद्धोऽप्यनेन रूपेण सव्यभिचार एव। तर्हि सव्यभिचारविरुद्धयोरभेदात् हेत्वाभासन्यूनतैवेत्यत आह - **उपाधेश्चे**ति मूलम्। तथा

चोपधेयसङ्करेऽप्युपाधेरसङ्कर एव। यथा आत्मा आत्मना आत्मानं जानाति इत्यत्र एकस्य कर्तृकर्मकरणत्वेऽपि कर्तृत्वकर्मत्वकरणत्वादीनामुपाधीनां भेद एवास्ति। कर्तृत्वं क्रियाश्रयत्वेन, क्रियासाधकत्वेन करणत्वम्, कर्मत्वं परसमवेतक्रियाफलशालित्वेन करणव्यापारविषयत्वेन वा कर्तुरीप्सित[त]मत्वेन वा इत्याद्युपाधिभेदात् भेदः। तद्वत् अत्रापि विरुद्धव्यभिचारयोः साङ्कर्येऽपि व्यभिचारित्वविरुद्धत्वयोरुपाध्योरसङ्कर एव। एकस्मिन्नेव हेतौ व्यभिचारित्वमप्यस्ति विरुद्धत्वमप्यस्ति, न च विरुद्धव्यभिचारयोरैक्यमेवेति वाच्यम्। धूमवान् वह्नेः इत्यस्य व्यभिचारित्वमेव, न विरुद्धत्वम्। अयं गौः अश्वत्वात् अयं विरुद्धोऽत्र व्यभिचारित्वं नास्ति इति व्यभिचारित्व-विरुद्धत्वे परस्परमसङ्कीर्णे। यथा इन्द्रियत्वपृथिवीत्वयोर्घ्राणेन्द्रिये सङ्करेऽपि इन्द्रियत्वपृथिवीत्वयोर्भिन्नधर्मत्वम्, तद्वत् प्रकृतेऽपीत्यर्थः। पक्षवृत्तित्वेत्यादिलक्षणं दूषयति - **एतदि**ति मूलम्। पक्षवृत्तित्वे सति अनुमिति-विरोधिसम्बन्धाव्यावृत्तिरूपाज्ञानेऽपि प्रत्येकसाधारणत्वज्ञानेनानुमितिप्रतिबन्धात् प्रत्येकज्ञानं साधारणत्वा-साधारणत्वानुपसंहारित्वज्ञानमेव दोषः, न तु पक्षवृत्तित्वेत्यादिरूपो दोषः। एतदज्ञानेऽपि प्रत्येकज्ञानादनुमिति-प्रतिबन्धादित्यर्थः। ननु प्रत्येकज्ञानात् यथा अनुमितिप्रतिबन्धः तद्वत् एतदज्ञानादप्यनुमितिप्रतिबन्धो जायते इति कृत्वा प्रत्येकदोषवद्विशिष्टमपि दोषः स्यादित्यत आह - **असाधकते**ति मूलम्। तथा च इदमसाधकं पक्षवृत्तित्वे सति अनुमितिविरोधिसम्बन्धाव्यावृत्तिरूपत्वात् बाधवत् इत्यत्र व्यर्थविशेषणत्वम्। अनुमितिविरोधिसम्बन्धा-व्यावृत्तिरूपं किं जातम्? साधारणत्वासाधारणत्वानुपसंहारित्वरूपम् एतद्धेतुमध्ये प्रविष्टम्। तस्यैव हेतुत्वमस्तु। तथा च पक्षवृत्तित्वे सति इत्यादिहेतुर्व्यर्थः। लाघवात् साधारणत्वात् इत्येवास्तु [223 A] उक्तरूपस्य व्यर्थत्वमिति भावः।

अथ टीका। **केवले**ति टीका। यदि केवलान्वयिसाध्यकोऽनुपसंहारी तदा(था)ऽयं घटः एतत्त्वात् इत्येतौ सद्धेतू एव तर्हि वक्ष्यमाणानुपसंहारिलक्षणं वक्ष्यमाणासाधारणविशेषलक्षणं च एतयोः सद्धेत्वोरतिव्याप्तमित्यत आह - **विशेषलक्षणस्यापी**ति टीका। तथा चानुपसंहारिविशेषलक्षणमसाधारणस्यापि विशेषलक्षणं तत् सद्धेत्वतिव्याप्तिव्यावृत्तमेव कर्तव्यम् तल्लक्षणावसरे वक्तव्यम्। अत्र शङ्कते - **यद्यपी**ति टीका। तथा च एतयोरनुपसंहारित्वासाधारणत्वयोः सङ्ग्राह्यत्वेऽपि न काचित् क्षतिः, विशेषलक्षणमप्येतद्द्वयावृत्तं किमर्थं कर्तव्यम्। एतत्साधारणमेव विशेषलक्षणं भवतु इत्याशङ्कार्थः। समाधत्ते - **तथापी**ति टीका। यतः सद्धेतुः कदापि न हेत्वाभास इति मतावष्टम्भेनैतदुक्तमित्यर्थः। यदि सद्धेतुरपि असाधारण्यज्ञानदशायां हेत्वाभासस्तदा धूमो व्यभिचारभ्रमे व्यभिचारी स्यादिति भावः। अत इति मूलस्य व्याख्यानमाह - **यत** इति टीका। यतस्तयोः सद्धेतुत्वाज्ञानं पुरुषस्य दोषो न तु वस्तुनः सद्धेतुरूपस्य, अत एव तस्यानित्यदोषः, वस्तुदोषस्तु यावद्वस्तु तावत्स्थायी, अज्ञानलक्षणो दोषोऽज्ञाने गते गच्छति यदाऽज्ञानं तदैव दोष इत्यर्थः। अत्र चिन्त्यमाह - अत्रेति

टीका। **अत एवेति** टीका। यतः सद्धेतौ सद्धेतुत्वाज्ञानं पुरुषदोषो न वस्तुदोषोऽत एवासाधारणप्रकरणसमौ अनित्यदोषावेव। कथम्? यदा धूमादौ सद्धेतौ सत्प्रतिपक्षत्वज्ञानं पर्वतो वह्निमान् [धूमात्] पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् इत्यत्र वस्तुगत्या धूमः पञ्चरूपोपपन्नत्वात् सद्धेतुरेव, तस्य सद्धेतुत्वाज्ञानं पुरुषस्य दोषो न तु वस्तुदोषः, अत एव सत्प्रतिपक्षस्यास्यानित्यदोषत्वम्, यावत्सद्धेतुत्वाज्ञानं तावत्पर्यन्तमेवायं दोषः इति कृत्वा सत्प्रतिपक्षस्यानित्यदोषत्वम्, तर्हि यथा बाधः पक्षे साध्याभावरूपो नित्यदोषः तद्वत् साध्याभावव्याप्यरूपो यः प्रतिपक्षः यथा पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् इत्यत्र तस्य सत्प्रतिपक्षः साध्याभावव्याप्यरूपः पर्वतो वह्न्यभावाभाववान् धूमात् इत्ययमपि साध्याभावव्याप्यरूपः तदा एतस्यापि वस्तुगत्या साध्याभावव्याप्यत्वं वर्तते इति कृत्वा साध्याभावव्याप्यत्वरूपो धूमो वह्न्यभावानुमितौ दोषः सदाऽस्त्येवेति स वस्तुदोष एवेति किमर्थं सत्प्रतिपक्षस्यानित्यदोषता वक्तव्या नित्यदोषत्वेनैवोपपत्तेः। अत्र शङ्कते - **न चेति** टीका। साध्याभावव्याप्यरूपः सत्प्रतिपक्षो वस्तुदाषो न भवति। कुतः?। यदा साध्याभावव्याप्यो वस्तुगत्या वर्तते तस्य ज्ञानं यदा वह्न्यभावाभावव्याप्यत्वेन नास्ति तदानीं वह्न्यभावानुमितिप्रतिबन्धो न क्रियते इति [223 B] कृत्वा तस्य नित्यदोषत्वं न सम्भवति इत्याशङ्कार्थः। दूषयति - **बाधस्येति** टीका। तदा ह्रदो वह्निमान् धूमात् इत्यत्र बाधस्यापि नित्यदोषत्वं न स्यात्। ह्रदे वह्निव्याप्यपरामर्शाभावदशायामनुमितिप्रतिबन्धाभावात् तस्यापि नित्यदोषत्वं न स्यात्, परामर्श एव नावतीर्णस्तदानीम्। बाधस्य प्रतिबन्धत्वाभावात् नित्यदोषत्वं न स्यादित्यर्थः। अतथात्वापत्तेरिति। यदि साध्याभावव्याप्यवत्त्वेन परामर्शाभावदशायामनुमितिप्रतिबन्धकत्वाभावात् न हेत्वाभासत्वमिति तदा बाधस्यापि दोषत्वं न स्यात्। यतस्तस्य साध्यव्याप्यपरामर्शाभावदशायां प्रतिबन्धकत्वाभावात्। तथाहि गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वात् इत्यत्र गन्धवत्त्वव्याप्यपृथिवीत्ववानयमिति परामर्शाभावदशायां गन्धाभावरूपबाधाज्ञानस्यानुमितिप्रतिबन्धकत्वाभावात्। यावत् परामर्श एवोक्तरूपो नावतीर्णस्तावत्पर्यन्तं कस्यानुमितिप्रतिबन्धकत्वमिति बाधस्यापि हेत्वाभासत्वं न स्यात् अनुमितिप्रतिबन्धकत्वाभावात्। यदि चोक्तरूपपरामर्शे विद्यमानेऽनुमितिप्रतिबन्धकत्वकल्पनात् बाधस्य हेत्वाभासत्वं तदा साध्याभावव्याप्यज्ञानस्यापि विरोधिपरामर्शा(र्श)दशायामनुमितिप्रतिबन्धकत्वकल्पनात् तस्यापि वह्निव्याप्यधूमवत्त्वस्य वह्न्यभावानुमितौ सत्प्रतिपक्षत्वं स्यादेवेति तुल्यमित्यर्थः। ननु साध्याभावव्याप्यज्ञानस्य भ्रमत्वात् तद्विषयः कथं हेत्वाभासः स्यात् इत्यत आह - **एवं चेति** टीका। तथा च यदंशे साध्याभावव्याप्यज्ञानस्य प्रमात्वं तद्विषयस्य वस्तुभासत्वम्। यदंशे भ्रमत्वं तदंशे वस्तुसत्हेत्वाभासत्वं नास्ति। तथाहि प्रथमम् अयमेव हेतुर्यथा अयं वह्न्यभाववान् पाषाणवत्त्वात् पश्चात् पर्वतो वह्निमान् धूमात्, उभयगोचरसमूहालम्बनानन्तरं वह्न्यभावव्याप्यपाषाणवत्त्ववान् अयम् वह्निव्याप्यधूमवान् अयम् इति परामर्शद्वयं समूहालम्बनरूपम्, एतस्य यदंशे

वह्निव्याप्यधूमवत्त्वांशे प्रमात्वम् इति कृत्वा तदंशे वस्तुसत्प्रतिपक्षत्वं नास्तीत्यर्थः। तथा च यत्र बाधस्य प्रमा तत्र वस्तुसत्बाधः, यत्र तु बाधस्य प्रमा नास्ति तत्र वस्तुसत्बाधो नास्ति। ततः सिद्धं बाधवत् सत्प्रतिपक्षोऽपि नित्यदोषोऽस्तु नानित्यदोष इति भावः। अभेदानुमानं कीदृशमित्यत आह - **अयमिति** टीका। अयं घटः एतद्घटाभिन्नः प्रमेयत्वात् इत्यभेदानुमानमित्यर्थः। अयं साधारणोऽग्रेतनः शब्द इत्यादिकोऽसाधारणः, एतयोः पूर्वोक्तलक्षणाव्याप्तिर्यतः साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं नास्ति, साधारणस्य सपक्षविपक्षवृत्तित्व-ज्ञानात् असाधारणस्य सपक्षविपक्षव्यावृत्तत्वज्ञानात्। यतः प्रथमे एतदभेदलक्षणं साध्यं पक्षे एव वर्ततेऽन्यत्रान्यत्र नास्तीति कृत्वा सपक्षवृत्तित्वज्ञानं नास्ति, सन्देहस्तु तदा स्यात् यदि सपक्षवृत्तित्वज्ञानं स्यात्। द्वितीये तु सपक्षविपक्षव्यावृत्तत्वज्ञानात् [224 A] साध्यसन्देहजनककोटिद्वयोपस्थापकत्वं वक्तव्यं तच्च नास्ति, विपक्षव्यावृत्तत्वज्ञानमेव नास्ति विपक्षे आकाशे शब्दाकाशान्यतरस्य हेतोर्वर्तमानत्वात् इति कृत्वा तयोरव्याप्तिरित्यर्थः। ननु मूलकृतोक्तमनयोर्विरुद्धत्वम्, तच्च न सम्भवति। कुतः ? विरुद्धस्य साध्याभाव-व्याप्तत्वात्। अनयोस्तु साध्याभावव्याप्तत्वं नास्ति। कुतः ? यत्र प्रमेयत्वं तत्र एतद्घटाभेदाभाव एवं नास्ति, यतः पक्षे घटे प्रमेयत्वं वर्तते एतद्घटाभेदाभावो नास्ति एतद्घटाभेद एवेति कृत्वा साध्याभावव्याप्तत्वं नास्ति। एवं शब्दाकाशान्यतरत्वस्यापि साध्याभावव्याप्तत्वं नास्ति। पक्षे शब्दे हेतुमति अनित्यत्वस्याभावो नास्ति इति कृत्वा विरुद्धत्वं न भवतीत्यत आह - **साधनस्येति** टीका। न ह्येतन्मते साध्याभावव्याप्तत्वमेव विरुद्धत्वं किन्तु साधनस्य साध्यानवगतसहचारः, स तु वर्तत एव। पूर्वोत्तरहेत्वोः साध्येन सह साधनस्य सहचारः कुत्राप्यवगतो नास्ति। यथा न हि यत्र यत्र प्रमेयत्वं तत्र तत्र एतदभेदः पक्षेऽभेदस्य सन्दिग्धत्वात् अन्यत्रापि भेदस्याभावात्। द्वितीयेऽनित्यत्वस्य घटादौ विद्यमानत्वे शब्दाकाशान्यतरत्वं नास्ति। शब्दाकाशान्यतरत्वस्य शब्दे आकाशे वा सत्त्वात्। शब्देऽनित्यत्वस्य सन्दिग्धत्वात्। आकाशे तु अनित्यत्वाभावस्य विद्यमानत्वात् शब्दाकाशान्यतरत्वं वर्तते परम् अनित्यत्वमाकाशे नास्तीति साध्यसहचारः कुत्रापि नास्तीति कृत्वाऽनवगतसाध्यसहचार एव विरुद्धः इति मतमालम्ब्यैव विरुद्धत्वादित्युक्तम्। ननु तयोः प्रमेयत्वशब्दाकाशान्यतरत्वयोः साध्यवदन्यवृत्तित्वं नास्ति, साध्यवान् पक्षो घटः शब्दश्च तत्र प्रमेयत्वस्य शब्दाकाशान्यतरत्वस्य च विद्यमानत्वात्। तथा च साध्यवदन्यवृत्तित्वं नास्ति किन्तु साध्यवति पक्षे विद्यमानत्वात् इत्यतः साध्यवदन्यवृत्तित्वस्य व्याख्यानमाह - **निश्चितसाध्य-वदवृत्तित्वस्येति** टीका। यद्यपि साध्यवद्वृत्तिभिन्नो न भवति परं निश्चितसाध्यवद्वृत्तिभिन्नो भवत्येव। प्रथमे साध्यनिश्चयः कुत्रापि नास्ति अभेदस्य पक्षमात्रवृत्तित्वात्, द्वितीये घटादौ साध्यनिश्चयेऽपि हेतोः तत्रावृत्तित्वात् इति कृत्वा निश्चितसाध्यवद्वृत्तिभिन्नत्वं वर्तते। तथा च एतौ प्राचां मतेन विरुद्धौ भवत एवेति कृत्वा सुष्ठूक्तं मूल-कृता विरुद्धत्वमिति। ननु शब्दोऽनित्यः शब्दाकाशान्यतरत्वात् इत्यत्र यदा निश्चितसाध्यवद्घटादिव्यावृत्तत्वज्ञानं

जातम्, निश्चितसाध्याभाववन्तो ये परमाण्वादयः तद्व्यावृत्तत्वज्ञानं यदा वर्तते, आकाशस्य तु न वा नित्यत्वेनोपस्थितिर्न वाऽनित्यत्वेन तस्यां दशायां विवक्षितं लक्षणं साध्यसन्देहेत्यादिरूपं शब्दो नित्यः शब्दाकाशान्यतरत्वात् इति विरुद्धेऽतिव्याप्तिरि(प्तमि)त्यत आह - **यस्य यदेति** टीका। यस्य यदा तादृश-ज्ञानविषयत्वं तस्यां दशायां व्यभिचारित्वमिश्र(ष्ट)मेव। अन्यदा तु व्यभिचारत्वप्रयोजकाभावे व्यभिचारित्वमपि नास्ति। तथा च तत्रातिव्याप्तिर्न भवतीत्यर्थः। **तद्दशायामिति** टीका। [224 B] साध्यसन्देहजनककोटिद्वयो-पस्थापकतादशां(शायां) विरुद्धस्यापि व्यभिचारित्वमिष्टमित्यर्थः। **एतदज्ञानेऽपीति** मूले आशङ्कते। **न चेति** टीका। मूलकृतोक्तम् - साधारणत्वादिज्ञाने विद्यमाने एतद् ज्ञानं विनापि साध्यसन्देहजनकत्वादिज्ञाना-भावेऽप्यनुमितिप्रतिबन्धात् न साध्येत्यादिकस्य लक्षणत्वं त्रितयसाधारणरूपत्वमिति। तत्रोच्यते साधारणत्वा-दीनामज्ञानेऽपि साध्यसन्देहेत्यादिरूपेणानुमितिप्रतिबन्धात् साध्यसन्देहेत्यादेरेव सव्यभिचारत्वप्रयोजकरूपत्वमस्तु विनिगमनाभावात् इत्याशङ्कार्थः। **समाधत्ते - एतदिति** टीका। एतज्ज्ञानस्य साध्यसन्देहेत्यादिज्ञानस्य अव्यभिचारस्य विरोधी यो व्यभिचारस्तदविषयकत्वेन प्रतिबन्धकत्वं नास्ति। तस्मात् यत् व्यभिचारविरोधिविषयकं ज्ञानं तदेव ग्राह्याभावावगाहितया प्रतिबन्धकं वक्तव्यम्। ग्राह्यं साध्याभाववद्वृत्तित्वं हेतोस्तदभावः साध्याभाववद्वृत्तित्वं तद्विषयतया प्रतिबन्धकं साधारणत्वादिज्ञानम् असाधारणत्वादिज्ञानम्। असाधारणत्वानुपसंहारित्वज्ञानयोः कथं ग्राह्याभावावगाहित्वं तदग्रे वक्ष्यते। अत्रैवार्थे दृष्टान्तमाह - **अत एवेति** टीका। यथा त्रितयसाधारणरूपज्ञानं ग्राह्याभावानवगाहितया किंवत् प्रतिबन्धकं न भवति। तत्रोदाहरणम्। यथा हेत्वाभासत्वज्ञानम्। हेत्वाभासत्व-ज्ञानं यथा ग्राह्याभावानवगाहितया प्रतिबन्धकं [? न भवति]। यथा वह्निमान् इत्यनुमितौ वह्निर्नास्तीति ज्ञानं प्रतिबन्धकं भवति एवं धूमवान् इति पक्षधर्मताज्ञाने धूमो नास्तीति स्वरूपासिद्धत्वज्ञानमपि प्रतिबन्धकं भवति ग्राह्याभावावगाहितया पक्षधर्मत्वं ग्राह्यं तदभावावगाहितया, तद्वत् हेत्वाभासत्वज्ञानं यत् वर्तते तत् नानुमितिर्वि(वि)षयाभावावगाहि न चानुमितिकारणीभूतज्ञानविषयाभावावगाहीति न हेत्वाभासत्वमात्रज्ञानं प्रतिबन्धकं किन्तु विशिष्य विशिष्य बाधत्वादिज्ञानं प्रतिबन्धकम्। ननु हेत्वाभासत्वादिज्ञानमपि व्यभिचारत्वादिसन्देहोत्पादनद्वारा प्रतिबन्धकम्। को वाऽत्र हेत्वाभास इति द्वारा प्रतिबन्धकमित्यत आह - **तद्द्वानेनेति** टीका। हेत्वाभासत्वादिज्ञानेन यदि व्यभिचारत्वादिसन्देह उत्पाद्यते तदा व्यभिचारत्वादिज्ञानमेव प्रतिबन्धकमस्तु, कृतं हेत्वाभासत्वज्ञानेनेत्यर्थः। एतेनेति निरस्तमित्यनेनान्वयः। नन्विदं सम्पूर्णं लक्षणं विरुद्धेऽतिव्याप्तमित्यत आह - **अत्रेति** टीका। तथा च विरुद्धान्यत्वे पक्षवृत्तित्वे च सति अनुमितिवि-रोधिसम्बन्धाव्यावृत्तिरिति सव्यभिचारलक्षणम्। ननु साधारणत्वादिज्ञानस्यानुमितिविरोधित्वाभावात् कथं ग्राह्याभावानवगाहितया अयमर्थः। अनुमितौ तु पर्वते वह्निर्ग्राह्यः, न च पर्वते वह्न्यभावावगाहिव्यभिचारज्ञानम्,

तस्य तु बाधरूपत्वादित्यत आह - **अनुमितिपरम्परये**ति टीका। तथा चानुमितिविरोधिपदेनानुमितिकारणविघटक इति यावत् । [225 A] तेनायमर्थः अनुमितिकारणीभूतं यत् ज्ञानं व्याप्त्यादिज्ञानं तस्य विरोधि यत् ज्ञानं साधारणत्वासाधारणत्वानुपसंहारित्वविरुद्धत्वज्ञा[नं] तेषां विषयतावच्छेदकानि यानि रूपाणि साधारणत्वादीनि । तथा चानुमितिविरोधिसम्बन्धी(न्धा)व्यावृत्तिरित्यनेन किमुक्तम् ? अनुमितिकारणीभूतज्ञानविरोधि यत् ज्ञानं तस्य विषयताया अवच्छेदकं यद् रूपं तादृशरूपवत्त्वमित्यर्थः। तद् रूपं किमित्यत आह - **तेन साधारणत्वादी**ति । तथा च साधारणत्वादिकमेतादृशं रूपमित्यर्थः । ननु सम्बन्धाव्यावृत्तिरिति किमर्थमुक्तं सम्बन्धवत्त्वमेव कुतो नोक्तमित्यत आह - **तत्सम्बन्धाव्यावृत्ती**ति टीका । तथा च तत्सम्बन्धाव्यावृत्ती(त्य)नेन तत्सम्बन्ध-विद्यमानत्वमेवोक्तम् । ततः किमित्यत आह - **तेने**ति टीका । तथा च विरुद्धान्यत्वविशेषणस्यानुमिती-त्यादे(दि)पदस्य अनुमितिपरम्पराविरोधिकारणविघटकपरत्वम् । अथ च सम्बन्धाव्यावृत्तिरेतस्य विद्यमान-तत्सम्बन्धत्वम् । अथ त्रयाणामपि प्रयोजनमाह - **तेने**ति टीका । तेन स्वरूपासिद्धसङ्कीर्णे व्यभिचारिणि इत्थमव्याप्तिः, इत्थं स्वरूपासिद्धसङ्कीर्णस्य व्यभिचारिणः यथा ह्रदो धूमवान् वह्नेः इति अस्मिन् व्यभिचारिणि पक्षवृत्तित्वाभावादव्याप्तिः। विरुद्धे च विरुद्धान्यत्वविशेषणाभावेऽतिव्याप्तिः यथाऽयं गौरश्वः सास्नादिमत्त्वात् इत्यत्रानुमितिविरोधिसम्बन्धो विरुद्धत्वं तदव्यावृत्तिर्वर्तते इति कृत्वा तत्रातिव्याप्तिः स्यात् । ततो विरुद्धान्यत्वे इति विशेषणे दीयमाने विरुद्धसङ्कीर्णेऽसाधारणे वस्तुगत्या विरुद्धोऽसाधारणश्च, यथा शब्दो नित्यः शब्दत्वात् इत्ययं विरुद्धोऽपि भवति असाधारणोऽपि भवतीति कृत्वा विरुद्धान्यत्वाभावादतिव्याप्तिः। अथ बाधसत्प्रति-पक्षयोरप्यतिव्याप्तिः । कथम् ? तयोरप्यनुमितिविरोधिसम्बन्धो बाधत्वं सत्प्रतिपक्षत्वं चास्तीति कृत्वाऽनु-मितिविरोधिसम्बन्धाव्यावृत्तिस्तत्र वर्तते विरुद्धान्यत्वमप्यस्तीत्यतिव्याप्तिः । अथ कादाचित्कसम्बन्ध-मादायासाधारणोत्तीर्णे सद्धेतौ यदा सद्धेतोरसाधारण्यज्ञानं नास्ति तदानीं सद्धेतावतिव्याप्तिः। तथाहि शब्दोऽनित्यः शब्दत्वात् इति शब्दत्वस्य सपक्षविपक्षव्यावृत्तत्वज्ञानम् अनुकूलतर्केण पक्षे साध्यनिश्चयरूपेण गतं तदानीं सद्धेतावतिव्याप्तिर्यदा कादाचित्कानुमितिविरोधिसम्बन्धोऽसाधारणत्वं तस्यापि वर्तते इति एतानि दूषणानि निरस्तानि वेदितव्यानि। क्रमेणान्वयमाह। तत्र स्वरूपासिद्धे सङ्कीर्णे कथं नातिव्याप्तिरित्यत आह - **साधारण-त्वादेरि**ति टीका। यथा नैमित्तिकद्रवत्ववत्त्वं पृथिवीतेजसोः साधर्म्यम्, तत्र यद्यपि घटादौ नैमित्तिकद्रवत्ववत्त्वं नास्तीति कृत्वाऽव्याप्तिः, तत्राव्याप्तिवारणार्थं नैमित्तिकद्रवत्वावच्छेदकद्रव्यविभाजकोपाधिमत्त्वं विवक्षितं तथा प्रकृतेऽपि पक्षवृत्तित्वे सति अनुमितिविरोधिसम्बन्धः [225 B] साधारणत्वम्, तच्च स्वरूपासिद्धसङ्कीर्णे साधारणे वर्तते एवेति । ततः पक्षवृत्तित्वविशेषणाभावेऽपि नाव्याप्तिः । साधारणत्वं धर्मस्तत्र वर्तते एवेति नाव्याप्तिः । केवलस्वरूपासिद्धस्य साधारणत्वशून्यत्वेनालक्ष्यत्वमेवेति न तत्रातिव्याप्तिः । एतदेवाह -

**अन्यथेति** टीका। विरुद्धेऽतिव्याप्तिं परिहरति - **विरुद्धान्यस्येति**। तथा च विरुद्धान्यस्येति विशेषणात् विरुद्धे नातिव्याप्तिः। अथ विरुद्धसङ्कीर्णासाधारणेऽव्याप्तिं निरस्यति - **विरुद्धान्येति** टीका। तथा च विरुद्धान्यस्य पक्षवृत्तेः अनुमितिविरोधि यत् सपक्षविपक्षव्यावृत्तत्वरूपं तादृशरूपवत्त्वं विरुद्धसङ्कीर्णासाधारणे वर्तते इति तस्यापि लक्ष्यत्वान्नाव्याप्तिः पूर्वोक्ता। अथ बाधसत्प्रतिपक्षयोरतिव्याप्तिं परिहरति - **बाधसत्प्रतिपक्षयोरिति** टीका। तयोरनुमितिविरोधिसम्बन्धो यद्यपि बाधत्वं सत्प्रतिपक्षत्वं वर्तते तथाप्यनुमितिपरम्पराविरोधी न भवति किन्तु साक्षाद्विरोध्येव, लक्षणे तु परम्पराविरोधित्वं विवक्षितम्। बाधसत्प्रतिपक्षयोः परम्परयाऽनुमितिविघटकत्वं नास्ति। सव्यभिचारस्य तु परम्परया विरोधिसं(त्वं) पक्षस्य विद्यमानत्वं विवक्षितम्, तच्च [विरोधित्वम्] असाधारणोत्तीर्णे सद्धेतौ सपक्षविपक्षव्यावृत्तत्वरूपं नास्ति पक्षस्यैव साध्यवत्त्वनिश्चयेन सपक्षव्यावृत्तत्वाभावात् इत्यर्थः। अत्राशङ्कते - **नन्विति** टीका। तथा च व्यर्थविशेषणे नीलधूमादौ विरुद्धान्यस्य पक्षवृत्तेः अनुमितिविरोधि यद् रूपं व्याप्यत्वासिद्धत्वं तस्य तत्र सत्त्वात्। अत्र व्यर्थविशेषणे व्याप्यत्वासिद्धिर्यथा व्याप्तेरंशत्रयम्। एकोऽव्यभिचारांशः, एकः सहचारांशः, अपरोऽवच्छेदकत्वांशश्चेति। तथात्र प्रथमो हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदकमित्यव्यभिचारांशः। तादृशसाध्येन सह सामानाधिकरण्यं सहचारांशः। तादृशसाध्यसामानाधिकरण्यहेतुतावच्छेदकावच्छिन्ने हेतौ सा व्याप्तिः। तत्र नीलधूमादौ अ[व्य]भिचारसहचारांशयोर्विद्यमानत्वेऽपि अवच्छेदकांशो नास्ति। यतो नीलधूमत्वं व्याप्यतावच्छेदकं न भवति गौरवात्। लाघवात् धूमत्वमेव व्याप्यतावच्छेदकमिति। तथा चानुमितिविरोधिसम्बन्धो व्याप्यत्वासिद्धत्वम्, तच्च नीलधूमे वतत एव। एतदेवाह - **तत्सम्बन्धस्येति** टीका। व्याप्यत्वासिद्धत्वलक्षणसम्बन्धस्येत्यर्थः। अयमर्थो नीलधूमत्वेऽनुमितिसम्बन्धो व्याप्यत्वासिद्धत्वं पक्षधर्मत्वमपि तत्र वर्तते इति कृत्वा सव्यभिचारलक्षणं नीलधूमेऽतिव्याप्तिः(प्तम्)। समाधत्ते - **व्यर्थेति** टीका। तथा च विरुद्धेऽतिव्याप्तिवारणार्थं विरुद्धान्यत्ववत् व्यर्थविशेषणाव्यर्थत्वमपि विशेषणम्। तथा चोक्तव्याप्यत्वासिद्धे नातिव्याप्तिः। ननु तथाप्यज्ञानासिद्धेऽतिव्याप्तिः, तथाहि पर्वतो वह्निमान् [226 A] वह्निमत्त्वप्रकारकप्रमाविषयत्वात् इत्यत्र वह्निमत्त्वनिर्णयाभावे वह्निमत्त्वप्रकारकप्रमाविषयत्वमपि दुर्ज्ञेयमित्यज्ञानासिद्धेऽतिव्याप्तिः, अनुमितिविरोधिसम्बन्धो भवति इति कृत्वा तत्रातिव्याप्तिरिति, अतोऽनुमितिविरोधित्वं नाम अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वम्। अज्ञानासिद्धे तु अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वं नास्ति किन्तु कारणभावतया स्वरूपसन्नेव प्रतिबन्धक इत्यर्थः। **विरुद्धोऽपीति** मूलग्रन्थे। आशङ्कते - **न चैवमिति**। यदि विरुद्धोऽनेन रूपेण पक्षवृत्तित्वे सति अनुमितिविरोधिसम्बन्धाव्यावृत्तित्वरूपेण सङ्ग्राह्यस्तदा विरुद्धान्यत्वे सतीति विशेषणं व्यर्थमित्याशङ्कार्थः। समाधत्ते - **अनेन रूपेणेति** टीका। तथा चानेन रूपेणेत्यस्य ग्रन्थस्यायमर्थः। यदि विरुद्धेऽपि

विपक्षवृत्तित्वम् अथवा सपक्षविपक्षव्यावृत्तत्वं वाऽथवाऽनुपसंहारित्वं तिष्ठति तदा तेन रूपेण तस्यापि सङ्ग्राह्यत्वं सव्यभिचारत्वमेव । यदि चोक्तरूपत्रये एकमपि रूपं विरुद्धे नास्ति यदा च केवलं विरुद्धत्वेनोपस्थितस्तस्यां दशायामलक्ष्य एवेति कृत्वा तद्वारणार्थं विरुद्धान्यत्वं विशेषणं देयमेव, ततो विरुद्धान्यत्वविशेषणमपि सार्थकं विरुद्धोऽपीत्यादिग्रन्थोऽपि सङ्गच्छते इति न काप्यनुपपत्तिः ।

**अत एव साध्याव्याप्यत्वे सति साध्याभावाव्याप्यहेत्वाभासत्वं साध्यवन्मात्र-वृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं वेति परास्तम्, व्यर्थविशेषणत्वात् प्रथमं हेत्वाभासत्वाज्ञानाच्च, गगनमनित्यं शब्दाश्रयत्वात् इत्यादिबाधविरुद्धसङ्कीर्णा-साधारणाव्याप्तिरिति कश्चित् । नापि सपक्षविपक्षगतसर्वसपक्षविपक्षव्यावृत्तान्यतरत्वम्, व्यर्थविशेषणत्वात् अनुपसंहार्यव्याप्तेश्च । किञ्च पक्षातिरिक्तसाध्यवतः सपक्षत्वे प्रमेयत्वेनाभेदसाधनेऽनुपसंहार्यव्याप्तिः पक्षातिरिक्तसाध्यवतोऽप्रसिद्धेः, साध्यवतः सपक्षत्वे विवक्षितेऽप्रसिद्धिः वृत्तिमतो धर्मस्य साध्यवद्विपक्षान्यतरवृत्तित्वनियमात् । नापि पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वे सति पक्षातिरिक्तसाध्याभाववन्मात्रवृत्ति-भिन्नत्वम् अनुपसंहार्यव्याप्तेः धूमादावतिव्याप्तेश्च तस्य पक्ष एव साध्यवति वृत्तेः । नापि पक्षवृत्तित्वे विरुद्धान्यत्वे च सति अनुमित्यौपयिकसम्बन्धशून्यत्वं व्यर्थविशेषणत्वात् । एतेनानुगतं सर्वमेव लक्षणं प्रत्युक्तं प्रत्यकमेव दूषणत्वात् उद्भावने वादिनिवृत्तेश्च ।**

अतः परं मूलव्याख्या । सव्यभिचारस्य लक्षणान्तरमुद्भाव्य दूषयति - **अत एवेति** मूलम् । पूर्वोक्तदूषणादेव साध्याव्याप्येति साध्यस्याव्याप्यत्वं हेतोरथ च हेतोः साध्याभावस्याप्यव्याप्यत्वम् । यथा पर्वतो धूमवान् वह्नेः इत्यत्र साध्यस्य धूमस्य वह्नेरव्याप्यत्वं यत्र वह्निस्तत्र धूम इत्येवं नास्ति, अथ च धूमाभावस्याप्यव्याप्यत्वं वह्नेर्यथा यत्र वह्निस्तत्र धूमाभाव इदमपि नास्ति, हेत्वाभासत्वमप्यस्ति । एवं शब्दो नित्यः शब्दत्वात् इत्य-साधारणेऽव्याप्तिपरिहारः टीकातो ज्ञेयः । लक्षणान्तरमाह - **साध्यवन्मात्रवृत्त्यन्यत्वे सति** इत्यादि मूलम् । साध्यवन्मात्रे वृत्तिर्यस्य अथ च साध्याभाववन्मात्रे वृत्तिर्यस्य तदुभयभिन्नत्वं यथा पर्वतो धूमवान् वह्नेः इत्यत्र वह्निर्न धूमवन्मात्रवृत्तिः धूमाभाववति अयोगोलकेऽपि विद्यमानत्वात् नापि धूमाभाववन्मात्रवृत्तिः धूमवति महानसेऽपि विद्यमानत्वात् । असाधारणानुपसंहार्यो(रिणो)रस्य लक्षणस्य योजनं टीकायां भविष्यति । एतद्द्वयलक्षणं दूषयति - **व्यर्थेति** मूलम् । तथा चायं हेतुरसाधकः साध्याव्याप्यत्वे सति साध्याभावाव्याप्य-

हेत्वाभासत्वात् । तत्र इदमसाधकं साध्याव्याप्यत्वादित्येव हेत्वाभासत्वप्रयोजकमस्तु, तेन साध्याभावाव्याप्यत्वहेत्वाभासत्वं व्यर्थम् । एवं वह्निरसाधकः साध्यवन्मात्रवृत्त्यन्यत्वादित्येवास्तु, व्यर्थं साध्याभाववन्मात्रवृत्त्यन्यत्वम्, विशेष्यं व्यर्थमित्यर्थः । दूषणान्तरमाह - **प्रथममिति** मूलम् । साधारणत्वादि [226 B] । अनुमितिप्रतिबन्धकतावच्छेदकत्वरूपाज्ञाने हेत्वाभासत्वमपि ज्ञातुमशक्यमित्यर्थः । मतान्तरेणात्रैव दूषणमाह - **गगनमिति** मूलम् । गगनमनित्यं शब्दाश्रयत्वात् इति असाधारणेऽव्याप्तिः । शब्दाश्रयत्वस्य साध्याभाववन्मात्रवृत्त्यन्यत्वं नास्ति अनित्यत्वाभाववति गगने वृत्तित्वात् । **कश्चिदिति** । अत्रास्वरसं टीकायाम् । लक्षणान्तरं दूषयति - **नापीति** मूलम् । **सपक्षेति** । सपक्षविपक्षगतत्वे सति सपक्षविपक्षव्यावृत्तो यस्तदन्यतरत्वं सपक्षविपक्षगतत्वम् अथ च सपक्षविपक्षव्यावृत्तत्वम् एतन्मध्यादन्यतरत्वम् । सपक्षविपक्षगतत्वमेव यथा धूमसाध्यकवह्न्यनुमाने वह्नेः सपक्षविपक्षगतत्वम् । इदं दूषयति - **व्यर्थेति** मूलम् । यथा वह्निरसाधकः सपक्षविपक्षगतत्वसपक्षविपक्षव्यावृत्तत्वान्यतररूपत्वात् इत्यत्र विपक्षगतत्वात् इत्येवास्तु, व्यर्थमधिकम् । **अनुपसंहारीति** मूलम् । सर्वमनित्यं प्रमेयत्वात् इत्यत्र प्रमेयत्वस्य सपक्षविपक्षव्यावृत्तत्वं नास्ति, प्रमेयत्वस्य केवलान्वयित्वात् । दूषणान्तरमाह - **किञ्चेति** मूलम् । अत्र सपक्षशब्देन किं विवक्षितम् ? - पक्षातिरिक्तसाध्यवत्त्वं वा सपक्षत्वं किंवा यथाकथञ्चित्साध्यवन्मत्त्वं वा ? आद्ये आह - सर्वमभिन्नं प्रमेयत्वात् इत्यत्र पक्षातिरिक्तसाध्यवतोऽप्रसिद्धेः । द्वितीये त्वाह - **साध्यवत** इति मूलम् । तथा च साध्यवतः सपक्षत्वे विवक्षिते वृत्तिमतो धर्मस्य साध्यवत्साध्याभाववदन्यतरत्ववृत्तित्वनियमात् सपक्षविपक्षव्यावृत्तत्वं दुर्ज्ञेयमित्यर्थः । लक्षणान्तरं दूषयति - **नापीति** । पक्षातिरिक्तो यः साध्यवान् तन्मात्रवृत्तिभिन्नत्वे सति साध्याभाववन्मात्रवृत्तिभिन्नं यत् तत्त्वम्, धूमवान् वह्नेः इत्यत्र वह्नौ पक्षातिरिक्तः साध्यवान् महानसादिस्तन्मात्रवृत्तिभिन्नत्वं वर्तते महानसातिरिक्तायोगोलकेऽपि विद्यमानत्वात् । अथ च नापि साध्याभाववन्मात्रवृत्तिः अयोगोलकातिरिक्ते महानसेऽपि विद्यमानत्वात् । दूषयति - **अनुपसंहारीति** मूलम् । सर्वमनित्यं प्रमेयत्वात् इत्यत्राव्याप्तिः, साध्यवदतिरिक्तमप्रसिद्धमित्यव्याप्तिरित्यर्थः । दूषणान्तरमाह - **धूमादाविति** मूलम् । वह्निमान् धूमात् इत्यत्र सद्धेतौ धूमे पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वं वर्तते । कुत इत्यत आह - **तस्येति** । धूमस्य पक्षेऽपि पर्वतेऽपि साध्यवति वृत्तेः । अथ च साध्याभाववन्मात्रवृत्तिभिन्नत्वं द्वितीयं दलं धूमे स्पष्टमेव । साध्याभाववन्मात्रवृत्तिर्धूमो न भवति इति भावः । लक्षणान्तरं दूषयति - **नापीति** मूलम् । पक्षवृत्तित्वे सति विरुद्धान्यत्वे च सति अनुमित्यौपयोगी(यिकः) प्रयोजको यः सम्बन्धो व्याप्त्यादिरूपस्तच्छून्यत्वम्, स्वरूपासिद्धेऽतिव्याप्तिवारणार्थं पक्षवृत्तित्वे सतीति, विरुद्धेऽतिव्याप्तिवारणाय विरुद्धान्यत्वे सतीति । दूषणमाह - **व्यर्थेति** । इदमसाधकं पक्षवृत्तित्वे सति विरुद्धान्यत्वे च सति अनुमित्यौपयिकसम्बन्धशून्यत्वात् इत्यत्र व्यर्थं विशेषणं सत्यन्तं द्वयं व्यर्थम् असाधकत्वानुमाने

तु एतावत एवोपयोगात्। दूषणान्तरमाह - **एतेनेति** मूलम्। एतेन व्यर्थविशेषणत्वेनैव सर्वाणि त्रितयसव्यभिचार-साधारणानि यानि लक्षणानि तानि परास्तानि। **प्रत्येकमिति** मूलम्। विपक्षवृत्तित्वात् इत्येतस्यैवोद्भ(द्धा)वने [227 A] निग्रहसमर्थत्वेन वादिनो निवृत्तेरन्यदिति विशेषणं व्यर्थमिति भावः। असाधारणे च सपक्षवृत्तित्वादिनैव अनुपसंहारिणि तु व्याप्त्युपसंहारस्थानाभावात् व्याप्तिग्रहस्थानाभावादेवासाधकत्वमित्यर्थः।

अथ टीका। **साध्याव्याप्यत्वेति** टीका। नन्विदं लक्षणं शब्दोऽनित्यः शब्दत्वात् इत्यसाधारणेऽव्याप्तिः-(प्तम्)। कथम्? यतस्तत्र साध्याव्याप्यत्वं शब्दत्वस्य हेतोर्नास्ति साध्यव्याप्यत्वात् यत्र यत्र शब्दत्वं तत्रानित्यत्वमित्यत आह - अन्यथा व्याचष्टे साध्यव्याप्यत्वेति। तथा च यद्यपि साध्याव्याप्यत्वं शब्दत्वस्य नास्ति तथापि साध्यव्याप्यत्वनिश्चयविरोधि अथ च साध्याभावव्याप्यत्वनिश्चयविरोधि यद् रूपमसाधारणत्वं तच्च शब्दत्वे वर्तते। न हि शब्दत्वस्यासाधारणज्ञानकाले साध्यव्याप्यत्वनिश्चयः, साध्याभावव्याप्यत्वनिश्चयोऽपि नास्ति। साध्यनिश्चयानिश्चयवति हेतुनिश्चयाभावेन साध्यसामानाधिकरण्यग्रहाभावे कुत्रापि साध्यव्याप्यत्व-निश्चयो न सम्भवतीत्यर्थः। एवं साध्याभाववति गगनादौ हेतुनिश्चयाभावेन शब्दत्वनिश्चयाभावेन साध्याभावव्याप्य-त्वनिश्चयोऽपि नास्तीति दूषणं द्रष्टव्यम्। एवं लक्षणान्तरे साध्यवन्मात्रेत्यादिलक्षणेऽपि एतस्मादेव दूषणात् अन्यथा व्याचष्टे - **साध्यवन्मात्रवृत्तित्वनिश्चयेति** टीका। तथा च साध्यवन्मात्रवृत्तित्वस्य निश्चयः साध्याभाव-वन्मात्रवृत्तित्वस्यापि निश्चयः, तस्य विरोधि यत् हेत्वाभासोपाधिमद्रूपं तद्वत्त्वमित्यर्थः। शब्दोऽनित्यः शब्दत्वात् इत्यत्रेदं वर्तते। यद्यपि शब्दत्वस्य साध्यवन्मात्रवृत्तित्वं विद्यते तथापि साध्यवन्मात्रवृत्तित्वनिश्चयो नास्ति। एवं साध्याभाववन्मात्रवृत्तित्वनिश्चयस्तु नास्ति। साध्यनिश्चयानिश्चयवति हेतुनिश्चयाभावात्। शब्दे तु यद्यपि शब्दत्वस्य निश्चयो वर्तते तथापि अनित्यत्वस्य निश्चयस्तत्र नास्तीति कृत्वा साध्यवन्मात्रवृत्तित्वनिश्चयसाध्याभाववन्मात्र-वृत्तित्वनिश्चयविरोधिहेत्वाभासोपाधिमत्त्वलक्षणं शब्दत्वेऽपि वर्तत इति पूर्वोक्तशब्दत्वे नाव्याप्तिः इति मूलेऽ-व्याप्त्युद्धारः। प्रथममित्यस्य व्याख्यानमाह - **प्रथममितीति**। अयमसाधकः साध्यव्याप्यत्वसाध्याभावव्याप्यत्वो-भयनिश्चयविरोधिहेत्वाभासोपाधिमत्त्वात् इत्यत्र यावत्पर्यन्तं सव्यभिचारित्वग्रहो नास्ति तावत्पर्यन्तमनुमिति-प्रतिबन्धकज्ञानविषयतावच्छेदकत्वलक्षणं हेत्वाभासत्वमपि ज्ञातुं न शक्यते। तत् सव्यभिचारत्वादिरूपं चेत् ज्ञानं तदेवासाधकत्वानुमाने लिङ्गमस्तु, अधिकं व्यर्थम्। अत्राशङ्कते - **यद्यपीति** टीका। तदग्रहे सव्य-भिचारत्वाग्रहेऽपि शब्दादिनाऽयं हेत्वाभास इत्यादिरूपेण हेत्वाभासत्वं ग्रहीतुं शक्यते एव, तथापि न शब्दस्य सर्वत्रायं हेत्वाभास इति प्रयोगः। अयं भावः - सव्यभिचारत्वं चेदज्ञातं स्यात् तदाऽनुमितिप्रतिबन्धकज्ञानविषय-तावच्छेदकानि यानि सव्यभिचारत्वादीनि तादृशरूपवत्त्वं हेत्वाभासत्वम् इदं ज्ञातुं न शक्यते इत्यर्थो मूलस्य [227 B]। एतदुपरि आशङ्का। यद्यपि अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकानि यानि सव्यभिचारत्वादीनि

तद्रूपवत्त्वेन रूपेण यत् हेत्वाभासत्वं तत् यद्यपि ग्रहीतुं न शक्यते तथापि शब्दादनुमितिप्रतिबन्धकज्ञान-विषयतावच्छेदकं यत्किञ्चित् रूपं तद्रूपवान् अयम् इत्येवंरूपात् हेत्वाभासत्वग्रहो भवत्येव। तथापि न सर्वत्र एतादृशः शब्दप्रयोग इति भावः। अग्रे यद्यपीत्यारभ्यापरितोषादितिपर्यन्तं मूलफक्किका मूलान्तरपुस्तके द्रष्टव्या। ततोऽत्र न व्याख्याता। **नापीती**ति टीका। सपक्षविपक्षगतत्वं हेतोरित्येकं दलम्, द्वितीयं यथा सर्वसपक्षविपक्ष-व्यावृत्तान्यतरत्वम्, एतन्मध्येऽन्यत[र]द्रूपम् एकं साधारणेऽन्यच्चासाधारण इति उभयसाधारणं लक्षणम्। अत्र सर्वपदस्य कृत्यमाह - **अयोगोलक** इति टीका। तथा च पर्वतो वह्निमान् धूमात् इत्यत्र यत्किञ्चित्, सपक्षोऽयोगोलकम्, ततो व्यावृत्तो धूमो वर्तते, विपक्षव्यावृत्तत्वमप्यस्ति इति कृत्वा धूमेऽप्यसाधारणं स्यादित्यतः सर्वपदम्, सर्वसपक्षव्यावृत्तत्वं धूमे नास्तीति नातिव्याप्तिः। न हि महानसादिसपक्षात् व्यावृत्तो धूम इति न तस्यासाधारण्यम्। ननु ह्रदो धूमवान् वह्नेः इति स्वरूपासिद्धसङ्कीर्णे साधारणेऽव्याप्तिः। कथम्? वह्नेः पक्षवृत्तित्वाभावात् इति। अतो व्याचष्टे - पक्षवृत्तित्वे सति विरुद्धान्यत्वे च सति अनुमित्यौपयिकसम्बन्धशून्य-त्वम्। एतस्यायमर्थः विरुद्धान्यपक्षवृत्तौ हेतौ यदनुमित्यौपयिकव्याप्त्यादिसम्बन्धशून्यत्वं तद्वत्त्वमित्यर्थः। स्वरूपासङ्कीर्णे साधारणे यद्यपि पक्षवृत्तित्वं नास्ति तथापि वस्तुगत्या विरुद्धान्यस्मिन् पक्षवृत्तिहेतौ यद् व्याप्त्यादिसम्बन्धशून्यत्वं वर्तते तद्वत्त्वं तु स्वरूपासिद्धसङ्कीर्णे साधारणे वर्तते एव। अयमर्थः - यथा नैमित्तिकद्रवत्ववत्त्वं यद्यपि घटे नास्ति तथापि नैमित्तिकद्रवत्ववति यद् द्रव्यविभाजकोपाधिरूपं पृथिवीत्वं तद्वत्त्वं घटे तिष्ठत्येव तद्वत् यद्यपि ह्रदपक्षकधूमसाध्यकवह्निहेतौ पक्षवृत्तित्वाभावादव्याप्तिः तथापि पक्षवृत्तिनि विरुद्धान्यस्मिन् हेतौ पर्वतो धूमवान् वह्नेरित्यादिवह्न्यादौ हेतौ यद् व्याप्त्यौपयिकसम्बन्धशून्यत्वं वर्तते तद्वत्त्वं ह्रदपक्षकहेतावपि वर्तते पर्वतपक्षकहेतावपि वर्तते। न हि व्याप्त्यौपयिकसम्बन्धो ह्रदपक्षेऽपि वर्तते, पर्वतपक्षेऽपि न वर्तते इति कृत्वा नाव्याप्तिः। विवक्षायाः प्रयोजनमाह - **तेने**ति टीका। अथ बाधसत्प्रतिपक्षयोरतिव्याप्तिं निराकरोति - **अनुमित्यनौपयिकत्वमि**ति टीका। तथा चानुमित्यौपयिकत्वमेतादृशं विवक्षितम्। अनु[मिति]-कारणलिङ्गपरामर्शविषयतावच्छेदकत्वरूपं विवक्षितम्। अस्यार्थः - अनुमितिकारणीभूतो यो लिङ्गपरामर्शस्तस्य विषयतया [227 A'] यदवच्छेदकं रूपं तच्चाव्यभिचारांशः सहचारांशः पक्षधर्मत्वांशः, तद्रूपशून्यत्वम्, तच्च व्यभिचारिणि विरुद्धे स्वरूपासिद्धे च वर्तते, तन्मध्ये व्यभिचारिणो लक्ष्यत्वात् विरुद्धस्य स्वरूपासिद्धस्य च पक्षवृत्तित्वविरुद्धान्यत्वविशेषणदानाद् वारणात् स्वरूपासिद्धविरुद्धसङ्कीर्णे च व्यभिचारिणि विरुद्धान्यस्मिन् पक्षवृत्तौ यद् वर्ततेऽनुमित्यौपयिकव्याप्त्यादिसम्बन्धशून्यत्वं तद्वत्त्वस्य विद्यमानत्वादेव नाव्याप्तिः। बाधसत्प्रति-पक्षयोरतिव्याप्तिस्तु अनुमितिकारणलिङ्गपरामर्शविषयतावच्छेदकत्वविवक्षयैव निरस्ता। न हि अबाधितत्वम् असत्प्रतिपक्षत्वं चानुमितिकारणलिङ्गपरामर्शविषयः, चेत् स्यात् तदा तद्रूपशून्यत्वं बाधिते सत्प्रतिपक्षे च स्यात्,

तदेव तयोर्नास्ति। न हि अबाधितत्वम् असत्प्रतिपक्षत्वं च लिङ्गपरामर्शविषयो यतो वह्निव्याप्यधूमवान् अयमिति परामर्शमध्येऽबाधितत्वमसत्प्रतिपक्षत्वं च भासत इति तयोरतिव्याप्तिर्निरस्ता भवति। आशयमविद्वान् शङ्कते - **न चेति** टीका। यथाश्रुते विरुद्धे स्वरूपासिद्धे चातिव्याप्तिः यतः सहचारः पक्षधर्मता चेति रुपद्वयं परामर्शविषयो भवत्येव। ततस्तच्छून्यत्वं पक्षधर्मताशून्यत्वं वर्तते स्वरूपासिद्धे, सहचारशून्यत्वं च वर्तते विरुद्धे, ततस्तत्राति-व्याप्तिरित्यर्थः। आशयमुद्घाटयति - **स्वरूपासिद्धे**ति टीका। तथा च विरुद्धान्यस्मिन् पक्षवृत्तिहेतौ यद् वर्ततेऽनुमित्यौपयिकसम्बन्धशून्यत्वं रूपं तद्वत्त्वं विवक्षितम्। स्वरूपासिद्धे विरुद्धे च त्वया याऽतिव्याप्तिर्दातव्या सा पक्षधर्मताशून्यत्वं सहचारशून्यत्वं वाऽऽदायातिव्याप्तिर्दातव्या। स्वरूपासिद्धे पक्षधर्मताशून्यत्वं विरुद्धे च सहचारशून्यत्वमादायातिव्याप्तिर्दातव्या, सा चातिव्याप्तिर्न भवति। न हि सहचारशून्यत्वं पक्षधर्मताशून्यत्वं वा पक्षवृत्तौ विरुद्धान्यस्मिन्। पक्षवृत्तौ चैतादृशं रूपं तु लक्षणे विवक्षितं वर्तते। तत्तु पक्षधर्मताशून्ये(न्यत्वं) स्वरूपासिद्धे नास्ति, विरुद्धे च सहचारशून्यत्वं नास्ति। तथा चायमर्थः - पक्षवृत्तौ विरुद्धान्यस्मिन् वर्तते, यदनुमित्यौपयिकसम्बन्धशून्यत्वं तद् विपक्षवृत्तित्वं सपक्षव्यावृत्तत्वम् अनुपसंहारित्वम्, तदेवानुमित्यौपयिक-सम्बन्धशून्यत्वं पक्षवृत्तौ विरुद्धान्यस्मिन् इति विशेषणमहिम्नाऽऽयास्यति न तु पक्षधर्मताशून्यत्वं सहचारशून्यत्वं वा येन स्वरूपासिद्ध(द्धे) विरुद्धे वाऽतिव्याप्तिः स्यात्। एतदेवाह - **न तदुभयमि**ति टीका। **प्रथमस्येति**। पक्षधर्मताशून्यत्वस्यापक्षधर्मे न तु पक्षवृत्तिनी(त्तावि)त्यर्थः। **द्वितीयस्येति**। सहचारशून्यस्येत्यर्थः। सहचारशून्यत्वं विरुद्ध एव, न तु विरुद्धान्यस्मिन् [227 B'] इत्यर्थः।

**उच्यते। उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं तत्त्वं विरुद्धान्यपक्षवृत्तित्वे सति अनुमितिविरोधिसम्बन्धाव्यावृत्तिर्वा अनैकान्तिकत्वम्, तच्च साधारणत्वादि, तेनैव रूपेण ज्ञातस्य प्रतिबन्धकत्वात् परस्य तथैवोद्भावनाच्च लक्षणानुरोधेन प्रत्येकमेव हेत्वाभासत्वम्। यद्वा साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं तेनासाधारणस्य साध्यतदभावोपस्थापकतया दूषकत्वपक्षे नाव्याप्तिः। न चैवमाधिक्ये विभागव्याघातः, स्वरूपसतानुगतरूपेण त्रयाणामेकीकृत्य महर्षिणा विभागकरणात्। न चैवं साध्याभावज्ञापकत्वेन बाधप्रकरणसमयोस्तदज्ञापकतयान्येषामुपसङ्ग्रहः कुतो न कृत इति वाच्यम्। स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वात्।**

अथ मूलम्। **उभयेति**। उभयकोट्योः साध्यसाध्याभावरूपयोरुपस्थापकतावच्छेदकं यद् रूपं तद्वत्त्वम्।

यथा पर्वतो धूमवान् वह्नेः इति साधारणे सपक्षविपक्षवृत्तित्वेन साध्यसाध्याभावसहचरितत्वम्, यथा पर्वतो धूमवान् वह्नेः इत्यत्र वह्निः धूमधूमाभावसहचरितो भवतीति ज्ञानेन पर्वतो धूमवान् न वा इति कोटिद्वयोपस्थापकत्वं जायते। तदवच्छेदकमत्र साधारणत्वम्, तद्वत्त्वं साधारणेऽस्ति। एवं शब्दोऽनित्यः शब्दत्वात् इति असाधारणस्य सपक्षविपक्षव्यावृत्तत्वेन रूपेण साध्यसाध्याभावकोट्युपस्थापकत्वम्, यथा शब्दत्वमनित्येभ्यो घटादिभ्योऽपि व्यावृत्तं विपक्षेभ्य आकाशादिभ्योऽपि व्यावृत्तम् अतः किं शब्दत्ववान् शब्दः किं नित्योऽनित्यो वेति कोटि-द्वयोपस्थापकत्वम्, तदवच्छेदकं सपक्षविपक्षव्यावृत्तत्वम्, तदेवासाधारणत्वम् । अनुपसंहारिणि तु अग्रे वदिष्यति - **अनुपसंहारित्वमेवे**ति। पूर्वोक्तमेव लक्षणं समर्थयति - **विरुद्धान्यत्वे**ति मूलम्। विरुद्धान्यत्व-विशिष्टे(ष्टो) योऽनुमितिविरोधिसम्बन्ध(न्धः) [त]स्य याऽव्यावृत्तिः स(सा) एवानैकान्तिकत्वम्। तच्च रूपं किमित्यत आह - **साधारणत्वादी**ति मूलम्। ननु [उ]भयकोट्युपस्थापकतावच्छेदकसाधारणत्वादिज्ञाने तेनैव साधारणत्वादिनैव रूपेणास्य दूषकत्वमस्तु, किमनेनोभयकोट्युपस्थापकतावच्छेदकत्वरूपेण। यदि च साधारणत्वं रूपमुपस्थितं नास्ति तदोभयकोट्युपस्थापकत्वस्यैवाज्ञानात् तदाऽनेन रूपेण दूषकत्वमेव न सम्भवतीत्यत आह - **तेनैवे**ति मूलम्। तैनैव साधारणत्वादिरूपेणैव ज्ञातस्य हेतोः प्रतिबन्धकत्वम्, न तूभयकोट्युपस्थापकता-वच्छेदकत्वरूपेण ज्ञानस्य दूषकत्वम्। परस्य वादिनस्तेनैव साधारणत्वादिरूपेणोद्भावनं युक्तम्। ननु यदि साधारणत्वादिरूपेण ज्ञानस्य दूषकत्वं तदा येन रूपेण दूषकत्वं तेनैव रूपेण हेत्वाभासविभागोऽस्तु, किमनेनोभय-कोट्युपस्थापकतावच्छेदकरूपवत्त्वेनेत्यत आह - **लक्षणे**ति मूलम्। यादृशधर्मविषयकत्वेन ज्ञानस्यानुमिति-प्रतिबन्धकत्वं तादृशरूपवत्त्वमेव हेत्वाभासोपाधिः। साधारणत्वासाधारणत्वानुपसंहारित्वविषयकज्ञानत्वेनानु-मितिप्रतिबन्धकत्वम्, तदेव हेत्वाभासविभाजकोपाधिः। ननु तर्हि उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वस्य किं प्रयोजनमिति चेत् तदग्रे वक्ष्यामः। लक्षणान्तरमाह - **साध्यवन्मात्रे**ति मूलम्। साध्यवन्मात्रवृत्तिर्यस्तद्भिन्नत्वे सति इत्येकं दलम्, द्वितीयं साध्याभाववन्मात्रवृत्तिर्यस्तद्भिन्नत्वे सतीति, सत्यन्तस्य कृत्यं यथा पर्वतो वह्निमान् धूमात् इत्यत्रातिव्याप्तिवारणाय, धूमोऽपि साध्याभाववन्मात्रवृत्त्यन्यो भवति। साध्याभाववन्मात्रवृत्तिहृदत्वं तद्भिन्नत्वं धूमेऽपि वर्तते इत्यतः साध्यवन्मात्रवृत्त्यन्यत्वं विवक्षितम्, साध्यवन्मात्रवृत्त्यन्यत्वमित्येवास्तु। तदा विरुद्धेऽतिव्याप्तिः। [228 A] साध्यवन्मात्रवृत्त्यन्यो भवति विरुद्धोऽत आह - साध्याभाववन्मात्रवृत्त्यन्य-त्वम्। एतच्च विरुद्धे नास्ति। कथम्? विरुद्धस्य साध्याभाववन्मात्रवृत्तित्वात् तस्य इति भावः। नन्वसाधारणस्य विरोधिव्याप्तिग्रहसामग्रीत्वेन दूषकतायाम् उ[भ]यकोट्युपस्थापकतावच्छेदकमसाधारणत्वं न भवति। अयमर्थः - असाधारणस्य यत्र यत्र नित्यत्वं तत्र तत्र शब्दत्वाभावः, यत्रापि नित्यत्वं तत्रापि शब्दत्वाभाव इति विरोधि-[व्याप्ति]ग्रहसामग्र्याः समवधाने परस्परव्याप्तिनिश्चयप्रतिबन्धकत्वेन व्याप्तिसंशायकत्वेन वा प्रतिबन्धकत्वं

तथा चासाधारणस्य साध्यसाध्याभावोपस्थापकत्वाभावात् असाधारणेऽव्याप्तिः । यदि असाधारणत्वज्ञानेन साध्यसाध्याभावोपस्थितिश्चेत् क्रियते तदा तत्र लक्षणं वर्तते परं तेन विरोधिव्याप्तिसंशय एव क्रियते विरुद्ध-व्याप्तिग्रहसामग्रीसमवधानवशात् इत्यत आह - **तेनेति** मूलम् । यत उभयकोट्युपस्थापकरूपवत्त्वेन विभाजकोपाधिस्तेन रूपेण विभागः क्रियते, तथा चासाधारणेन यदा साध्यतदभावोपस्थितिः सत्प्रतिपक्षद्वारा क्रियते तदा सत्प्रतिपक्षोत्थापकत्वेन दूषकत्वपक्षे उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं तिष्ठति इति कृत्वा न असाधारणेऽतिव्याप्तिः । असाधारणस्य सत्प्रतिपक्षोत्थापकत्वं यथा शब्दोऽनित्यः शब्दत्वात् इत्यत्र यत्र यत्र अनित्यत्वाभावस्तत्र शब्दत्वाभावोऽनया व्याप्तिग्रहसामग्र्याऽनित्यत्वाभावव्याप्यशब्दत्वाभावप्रतियोगिमान् अयमिति परामर्शः इति नित्यत्वानुमाने सत्प्रतिपक्षः एवं यत्र नित्यत्वं तत्र शब्दत्वाभावो यथा आकाशे तथा च नित्यत्वव्यापकशब्दत्वाभाववान् अयमिति द्वितीयः परामर्शः, इत्युभयोः परामर्शयोः साध्यसाध्याभाव-कोट्युपस्थापकत्वं वर्तते इति कृत्वाऽसाधारणस्योक्तसत्प्रतिपक्षद्वारा उभयकोट्युपस्थापकत्वमस्तीत्यसाधारणे नाव्याप्तिः । अथ त्रयाणां प्रत्येकरूपेणासाधारणत्वादिना यदि दूषकत्वं तदा किमुभयकोट्युपस्थापकता-वच्छेदकरूपेणेत्याशङ्कां निराकर्तुमाह - **न चैवमिति** मूलम् । साधारणत्वादिना प्रत्येकरूपेण दूषकत्वं चेत् तदा हेत्वाभासाधिक्यं स्यात् असिद्धादयश्चत्वारस्त्रयश्चैते इति सप्त स्युरित्याशङ्कार्थः । समाधत्ते - **स्वरूपसतेति** । यद्यपि एषां प्रत्येकरूपेण दूषकत्वं तथापि स्वरूपसत् यदनुगतं रूपम् उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं तेन रूपेण **महर्षिणा** विभागकरणात् नाधिक्यम् । यदि(द्यपि) उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वज्ञानम् उक्तरीत्या अनुमितिप्रतिबन्धकं न भवति तथाप्यनेन रूपेण त्रयाणामेकीकरणमेव प्रयोजनम् । सव्यभिचारस्या-न्येभ्योऽयं विभाजकोपाधिरित्यत्र तात्पर्यम् । [228 B] एतदेवाह - **महर्षिणेति** मूलम् । अत्राशङ्कते - **न चेति** मूलम् । यदि दूषणप्रयोजकरूपभेदेऽपि उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वेन त्रयाणामेकीकरणं तदा साध्याभावव्यापकत्वेन बाधप्रकरणयोरपि तज्ज्ञापकतया अन्येषामपि विरुद्धादीनामपि अनेकरूपेण सङ्ग्रहः स्यात् तथा च हेत्वाभासद्वयं त्रयं वा स्यादित्याशङ्कार्थः । समाधत्ते - **स्वतन्त्रेच्छेति** । यथा वेगभावनास्थिति-स्थापकानां संस्कारत्वेन रूपेण एक एव विभागः धर्माधर्मयोरदृष्टत्वेन रूपेण एकविभागसम्भवेऽपि धर्मत्वेन रूपेण धर्मस्याधर्मत्वेन चाधर्मस्येति विभागद्वयं कृतमित्यत्र विभागकरणे स्वतन्त्रस्य **महर्षे**रिच्छा नियामिका । तथात्रापि बाधसत्प्रतिपक्षयोरपि अनेन रूपेणान्तर्भावो भवति । तथापि न कृत इत्यत्र **महर्षे**रिच्छैव प्रमाणम् । **नियोग** इति मूलम् । नियोगस्तु एवमेव इति रूपः । पर्यनुयोगस्तु अनेवंरूपः तदविषयत्वात् एवं कथं कृतं कथं वा न कृतमिति वक्तुमशक्यत्वादित्यर्थः । अथ एतेषु त्रिषु मध्ये प्रथमोपस्थितस्य साधारणस्य लक्षणमाह - **तत्रेति** ।

[अथ टीका]। पूर्वं सव्यभिचारस्य सिद्धान्ते टीका यथा उभयकोट्युपस्थापकतेत्यत्राशङ्कते - **नन्विति** टीका। शब्दोऽनित्यः शब्दत्वात् इत्या[त्र] शब्दत्वं सपक्षविपक्षव्यावृत्तत्वेनोपस्थितम्। शब्दत्वे च शब्दात् आप्तवाक्यादिरूपात् यथा इदं शब्दत्वम् अनित्यत्वव्याप्यमित्येवंरूपात् व्याप्तिग्रहः, तस्यां दशायामसाधारणोत्तीर्णेनानुमितिजननात् हेत्वाभासत्वं नास्ति, उभयकोट्युपस्थापकतावच्छेदकं यद् रूपं सपक्षविपक्षव्यावृत्तत्वं तच्चात्रापि तिष्ठतीति सद्धेतौ शब्दत्वे लक्षणमतिव्याप्तमित्याशङ्कार्थः। समाधत्ते - **तद्व्याप्तीति** टीका। भ्रान्तोऽसीत्यभिप्रायः। न हि आप्तवाक्यादिना व्याप्तिग्रहे जाते शब्दातिरिक्तस्थले हेतुसाध्ययोः सामानाधिकरण्यनिर्णयाभावात् शब्दे एव सामानाधिकरण्यनिर्णयो वक्तव्यः। अयं भावः - आप्तेनोक्तं शब्दत्वमनित्यत्वव्याप्यमिति रूपो यो व्याप्तिग्रहः स पक्षातिरिक्ते नास्त्येव, तथा च शब्द एव पक्षेऽनित्यत्वशब्दत्वयोर्निर्णयो वक्तव्यः, तथा च पक्ष एवानित्यत्वस्य निर्णयो जातः, तदा पक्षस्यैव सपक्षत्वात् सपक्षव्यावृत्तत्वाभावात् उभयकोट्युपस्थापकत्वमेव तत्र नास्तीति लक्षणस्यापि तत्राभावात् नातिव्याप्तिः। एतदेवाह - **सकलेति** टीका। तत्र शब्दत्वे व्याप्तिग्रहदशायामाप्तवाक्यादिना अभावात् लक्षणाभावादित्यर्थः। न चाप्तवाक्यात् शब्दत्वानित्यत्वयोः सामानाधिकरण्यलक्षणश्चेद् व्याप्तिग्रहो भवति तदा सपक्षव्यावृत्तत्वं नास्तीति त्वया वक्तव्यम्। परं साध्याभावव्यापकाभावप्रतियोगित्वलक्षणो व्यतिरेकव्याप्तिग्रह एव चेत् स्यात् शब्दत्वमनित्यत्वाभावव्यापकाभावप्रतियोगीति व्याप्तिग्रहो जातः, तस्यां दशायां व्यतिरेक्यनुमितिरेव जन्यते, तदानीं [229 A] पक्षे शब्दे साध्यसन्देहात् अनित्यत्वसन्देहात् अन्यत्रानित्येभ्यो व्यावृत्तत्वज्ञानात् सपक्षविपक्षव्यावृत्तत्वज्ञानं तिष्ठति। तथा च तस्यां दशायामुभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वज्ञानं वर्तते इति कृत्वा तत्र सद्धेतावतिव्याप्तिरित्यस्वरसादाह - **विशेषादर्शनसहितस्येति** टीका। तथा च विशेषादर्शनसमानकालीनोभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं लक्षणम्। यत्र चाप्तवाक्यात् व्यतिरेकव्याप्तिग्रहो जातस्तत्र साध्याभावव्यापकाभावप्रतियोगित्वज्ञानमेव विशेषदर्शनं तिष्ठति इति कृत्वा विशेषदर्शनासमानकालीनत्वाभावात् नातिव्याप्तिः। अत्राशङ्कते - **नन्विति**। सर्वमभिधेयं प्रमेयत्वात् इत्यत्र केवलान्वयिसाधकेऽनुपसंहारिण्यव्याप्तिः। कथम्? साध्यस्यैव प्रसिद्धिः(द्धेः), साध्याभावकोटेरप्रसिद्धेः। तथा च साध्यतदभावोभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वाभावादव्याप्तिः। एतदेवाह - **साध्याभावकोटेरिति** टीका। समाधानमाह - **तस्येति** टीका। तस्यानुपसंहारिणोऽलक्ष्यत्वात्। तथा चोक्तरूपोऽनुपसंहारी एव न भवति। ननु सर्वमभिधेयं प्रमेयत्वात् इति अनुपसंहारिणश्चेति वक्ष्यमाणग्रन्थविरोध इत्यत आह - **व्याप्तीति** टीका। तथा च व्याप्तिनिश्चयविरोधी यः सन्देहः स साध्यकोटिको यद्यपि न भवति साध्यस्य केवलान्वयित्वेन सन्देहाभावात् तथापि अभिधेयत्वं सकलपदार्थनिष्ठात्यन्ताभावप्रतियोगी न वेति सन्देहस्यापि साध्यं सकलपक्षवृत्ति न वेतिवत्

व्याप्तिग्रहविरोधित्वं वर्तत एवेति सर्वमवदातम् । एतदेवाह - **साध्यसन्देहः** । पक्षे साध्यसन्देहः, साध्ये पक्षवृत्तित्वसन्देहश्च, एतौ व्याप्तिग्रहंविरोधिनौ भवत एव। सर्वस्यापि पक्षीकृतत्वात् कुत्रापि साध्यनिर्णयो नास्ति नापि साध्याभावनिर्णयः केवलान्वयित्वात् इति कृत्वा केवलान्वयिसाध्यकेऽनुपसंहारिणि नाव्याप्ति। व्याप्ति-निश्चयविरोधिसन्देहजनककोटिद्वयोपस्थापकत्वमिति सव्यभिचारस्य लक्षणम् अनुपसंहारिण्यप्यस्ति, सर्वपक्षे यथा साध्यसन्देहो व्याप्तिविरोधी कुत्रापि साध्यस्य निश्चयाभावात् व्याप्तिविरोधित्वं तस्य, एवं साध्येऽपि सर्वपक्षवृत्तित्वसन्देहोऽपि व्याप्तिविरोधी भवत्येव कुत्रापि साध्यनिर्णयाभावात् । इदं तु केवलान्वयि-साध्यकेऽनुपसंहारिण्यप्यस्तीति भावः। सर्वमभिधेयं प्रमेयत्वात् इत्ययमनुपसंहारी कुत्रापि साध्यनिर्णयाभावात् व्याप्तिग्रहविरोध इति लक्षणं सुस्थम्। अत्राशङ्कते - **अथायमिति** टीका। अयमिच्छावान् ज्ञानात् इत्यत्र सद्धेतौ प्रामाण्याप्रामाण्यरूपा या उभयकोटिस्तस्या या उपस्थितिर्यथा इदं ज्ञानं प्रमा न वेति तज्जनकतावच्छेदकं यद् ज्ञानत्वं तद्वति ज्ञाने सद्धेतावतिव्याप्तिः। प्रथममिच्छावान् इत्यनुमितौ ज्ञानत्वसाधारणधर्मदर्शनात् इदं ज्ञानं प्रमा न वेति [229 B] तज्जनकतावच्छेदकं यद् ज्ञानत्वं [तद्वति ज्ञाने] प्रामाण्याप्रामाण्योभयकोट्युपस्थितिर्जायते तया प्रामाण्याप्रामाण्यरूपया उभयकोट्युपस्थित्या इच्छारूपं यत् साध्यं तस्य संदेहः क्रियते यतः प्रामाण्या-प्रामाण्यसन्देहानन्तरं विषयसन्देहस्यानुभवसिद्धत्वात् । अयमिच्छावान् इति इच्छाया अनुमितौ विषयत्वात् अनुमितौ प्रामाण्यसन्देहात् इच्छासन्देहः तथा चेच्छासन्देहजनिका या उभयकोट्युपस्थितिः प्रामाण्याप्रामाण्य-कोट्युपस्थितिः तज्जनकतावच्छेदकं यद् ज्ञानत्वं तद्वति ज्ञाने सद्धेतौ अतिव्याप्तिरित्याशङ्कार्थः । समाधत्ते - **यन्निष्ठतयेति** टीका । तथा च यन्निष्ठतया यद् ज्ञानमुभयकोट्युपस्थितिजनकं तादृशेऽवच्छेदकरूपवत्त्वं विवक्षितम्। यथा पर्वतो धूमवान् वह्नेः इत्यत्र वह्निनिष्ठतया सपक्षविपक्षवृत्तित्वज्ञानम्, तत् धूमतदभावसन्देह-जनककोटिद्वयोपस्थापकं भवति इति कृत्वा वह्नौ सपक्षविपक्षवृत्तित्वं साधारणत्वम्, तद् वर्तते वह्नौ इति कृत्वा वह्निः साधारणः, इदं ज्ञानत्वे नास्ति, ज्ञानत्वं ज्ञानरूपहेतुवृत्तितयैव साध्यसन्देहजनकप्रामाण्या-प्रामाण्यकोटिद्वयोपस्थापकमिति नास्ति । यत्र हेतुवृत्तित्वं ज्ञानत्वस्य नास्ति तत्रापि पर्वतो वह्निमान् धूमात् इत्यनुमितौ प्रामाण्याप्रामाण्यसन्देहाधीनो वह्निसन्देहो जन्यते एव। अयमर्थः - धूमे ज्ञानत्वाभावेऽपि वह्न्यनुमितौ [प्रामाण्या]प्रामाण्यसन्देहात् वह्निसन्देहो भवत्येव। तथा च ज्ञानरूपहेतुवृत्तितयैव ज्ञानत्वं न प्रामाण्याप्रामाण्य-कोट्युपस्थितिजनकं किन्तु हेतुवृत्तित्वाभावेऽपि साध्यसन्देहजनकं भवत्येव इति न तत्रातिव्याप्तिः ज्ञानत्वस्य धूमेऽभावात् । एतदेवाह - **अनुमितिवृत्तितयेति** टीका । तथा च यत्र धूमवृत्तितया ज्ञानत्वस्य ज्ञानं नास्ति तत्रापीत्यर्थः । बाधकमाह - **अन्यथेति** टीका । यदि हेतुवृत्तितयैव ज्ञानत्वस्य साध्यसन्देहजनकप्रामाण्या-[प्रामाण्य]कोट्युपस्थितिजनकत्वे इत्यर्थः । **तथात्वं न स्यादिति** टीका । वह्निसन्देहजनकप्रामाण्याप्रामाण्य-

कोट्युपस्थापकता स्यादित्यर्थः। समाधानान्तरमाह - **प्रामाण्येति** टीका। प्रामाण्यसंशयमद्वारीकृत्य साध्यतदभावकोट्युपस्थापकतावच्छेदकरूपवत्त्वं विवक्षितम्। साधारणे सपक्षविपक्षवृत्तित्वज्ञानस्य प्रामाण्यसंशयद्वारा न वह्निसंशयजनकत्वम् इति। असाधारणे तु सपक्षविपक्षव्यावृत्तस्य प्रामाण्यसंशयमद्वारीकृत्यैव साध्यतदभावकोट्युपस्थापकत्वं वर्तते। ज्ञानत्वस्य तु प्रामाण्याप्रामाण्यकोटिद्वारैव साध्येतदभावकोट्युपस्थापकत्वमिति न तत्रातिव्याप्तिः। इदमेवाह - **अत** इति। द्वितीयं व्याचष्टे - ननु विरुद्धान्यत्वे सतीति लक्षणं स्वरूपासिद्धेऽतिव्याप्तं स्वरूपासिद्धे ह्रदो वह्निमान् धूमात् इति रूपे विरुद्धान्यत्वं वर्तते, अनुमितिविरोधिसम्बन्धो यः स्वरूपासिद्धत्वं तदव्यावृत्तिर्वर्तते इति कृत्वा तत्रातिव्याप्तिरित्यत आह [230 A] - **एतच्चेति** टीका। तथा च यथा स्वरूपासिद्धे नातिव्याप्तिः, यथा च विरुद्धे नातिव्याप्तिः, यथा च स्वरूपासिद्धसङ्कीर्णे साधारणे विरुद्धसङ्कीर्णेऽसाधारणे च नाव्याप्तिः, तथा पूर्वपक्षलक्षणव्याख्यानावसर एव व्याख्यातमित्यर्थः। लक्षणानुरोधेनेति मूलं व्याचष्टे - **लक्षणानुरोधेनेति**। यद्विषयत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वं तल्लक्षणानुरोधेन हेत्वाभासलक्षणानुरोधेनेत्यर्थः। तथा च साधारणत्वासाधारणत्वानुपसंहारित्वविषयकज्ञानत्वेनानुमितिप्रतिबन्धकत्वात् तत्त्वादिनैव साधारणत्वादिनैव रूपेण दूषकता हेत्वाभासता चेत्यर्थः। लक्षणान्तरे आशङ्कते - **नन्विति** टीका। सद्धेतुसङ्कीर्णेऽसाधारणे यथा शब्दोऽनित्यः शब्दत्वात् इति सद्धेतुसङ्कीर्णोऽसाधारणः, शब्दो नित्यः शब्दत्वात् इति विरुद्धसङ्कीर्णोऽसाधारणः, इति एतयोरव्याप्तिः। कथमित्यत आह - **प्रथमस्येति** टीका। शब्दोऽनित्यः शब्दत्वात् इत्यस्य साध्यवान् अनित्यत्ववान् यः शब्दस्तन्मात्रवृत्तिद्व(र्व)स्तुगत्याऽनित्यमात्रवृत्तित्वं तस्येति भावः। द्वितीयस्य शब्दो नित्यः शब्दत्वात् इत्यस्य नित्यत्वरूपं यत् साध्यं तदभाववन्मात्रवृत्तित्वात् साध्याभाववन्मात्रवृत्त्यन्यत्वं नास्ति। ततोऽत्रासाधारणेऽव्याप्तिरित्याशङ्कार्थः। मध्ये शङ्कते - **न चेति** टीका। अत्र साध्यवत्पदं निश्चितसाध्यवत्परं साध्याभाववत्पदमपि निश्चितसाध्याभावा[वत्]परमित्यर्थः। शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वस्य साध्यवन्मात्रवृत्त्यन्यत्वं नास्ति तथापि निश्चितसाध्यवन्मात्रवृत्त्यन्यत्वं तु वर्तत एव निश्चितसाध्यवन्तो ये घटपटादयस्तद्व्यावृत्तत्वं वर्तत एव शब्दे तु साध्यमनित्यत्वं निश्चितं नास्ति, एवं शब्दो नित्यः शब्दत्वात् इत्यत्र शब्दः साध्याभाववत्तया निश्चितो नास्ति किन्तु ये साध्याभाववत्तया नित्यत्वाभाववत्तया निश्चिता घटपटादयस्तद्व्यावृत्तत्वं वर्तत एव, इति निश्चितसाध्यवन्मात्रवृत्त्यन्यत्वं निश्चितसाध्याभाववन्मात्रवृत्त्यन्यत्वं वर्तत एवेति नोक्ता[ऽ]साधारणे व्याप्तिरिति मध्ये शङ्कार्थः। दूषयति - **अनुपसंहारीति** टीका। तथा च सर्वमनित्यं प्रमेयत्वात् इत्यत्र विश्वस्यैव साध्यसन्देहवत्तया निश्चितसाध्यवतोऽप्रसिद्धेरित्यनुपसंहारिणि अव्याप्तिः। ततो निश्चितसाध्यवन्मात्रवृत्त्यन्यत्वं नास्ति। दूषणान्तरमाह - **धूमेति** टीका। पर्वतो वह्निमान् धूमात् इत्यत्र धूमस्य निश्चितसाध्याभाववन्मात्रवृत्त्यन्यत्वमस्ति निश्चितसाध्याभाववान् ह्रदादिस्तन्मात्रवृत्त्यन्यत्वं वर्तते। अथ च

निश्चितसाध्यवन्मात्रवृत्त्यन्यत्वमप्यस्ति सन्दिग्धसाध्यवति पक्षेऽपि वर्तमानत्वात् [230 B]। तथा च धूमेऽप्यतिव्याप्तिरिति दूषणद्वयं विवृणोति - **प्रथमे**ति टीका। सर्वमभिधेयं प्रमेयत्वात् इत्यत्रेत्यर्थः । कुत इत्यत आह - **प्रमेयमात्रस्ये**ति। तथा च सर्वस्य पक्षत्वात् सर्वत्र साध्यसन्देहात्। **द्वितीये**ति टीका। पर्वतो वह्निमान् धूमात् इत्यत्रेत्यर्थः । धूमस्य निश्चितसाध्यवन्महानसादिकं तन्मात्रवृत्त्यन्यत्वं वर्तत एव सन्दिग्धसाध्यवति पर्वते वर्तमानत्वादिति भावः। **अत एवे**ति टीका। **तदुभयपदमि**ति टीका। साध्यवत्साध्याभाववदेतदुभयपदमित्यर्थः । यतोऽनुपसंहारिणि सद्धेतौ चातिव्याप्तिरतः पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वे सति पक्षातिरिक्तसाध्याभाववन्मात्रवृत्त्यन्यत्वमपि लक्षणं न भवति। कुतः ? अनुपसंहारिणि पक्षातिरिक्तसाध्यवतोऽप्रसिद्धेः सर्वस्यैव पक्षत्वात्। धूमेऽपि अतिव्याप्तिस्तथाहि पक्षातिरिक्तः साध्याभाववान् ह्रदादिस्तन्मात्रवत्त्यन्यत्वं वर्तते पर्वते वर्तमानत्वात्। एवं पक्षातिरिक्तसाध्यवन्महानसादिस्तन्मात्रवृत्त्यन्यत्वमपि वर्तत एवेति कृत्वा धूमेऽतिव्याप्तिः । अत्र कस्य समाधानान्तरमाशङ्क्य दूषयति - **न चे**ति टीका । तथा च लक्षण[स्या]यमेवार्थस्तथाहि - साध्यवन्मात्रवृत्तित्वेनाप्रतीयमानत्वे सति साध्याभाववन्मात्रवृत्तित्वेनाप्रतीयमानत्वे च सति हेत्वाभासत्वं यथायं पर्वतो धूमवान् वह्नेः इत्यत्रेदं लक्षणं वर्तते धूमरूपसाध्यवन्मात्रवृत्तित्वेन प्रतीयमानो न भवति यतो धूमाभाववति विपक्षेऽयोगोलकेऽपि वह्नेर्वृत्तेः अथ धूमाभाववन्मात्रवृत्तित्वेनापि न प्रतीयते वह्नेर्धूमवत्यपि प्रतीयमानत्वात्। अथ शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वमनित्यत्ववन्मात्रवृत्तित्वेनापि न प्रतीयते घटादौ शब्दत्वस्याप्रतीतेः, अथ च नित्यत्ववन्मात्रवृत्तित्वेनापि न प्रतीयते आकाशादौ शब्दत्वाप्रतीतेः इति असाधारणेऽपि लक्षणं गतम्। अनुपसंहारिणि तु सर्वस्यानित्यत्वरूपसाध्यसन्देहवत्त्वात् न साध्यवन्मात्रवृत्तित्वेन प्रतीतिः, नापि साध्याभाववन्मात्रवृत्तित्वेनापि प्रतीतिः, साध्यस्य साध्याभावस्य निश्चयः कुत्रापि नास्तीति त्रितयसाधारणं लक्षणम् । अथ पर्वतो वह्निमान् धूमात् इत्यादौ अतिव्याप्तिवारणार्थं साध्यवन्मात्रवृत्तित्वेनाप्रतीयमानत्वं विशेषणम् । धूमादौ साध्याभाववन्मात्रवृत्तित्वेनाप्रतीयमानत्वं वर्तत एव वह्न्यभाववति धूमस्यावृत्तित्वेन ज्ञानात्, परं धूमस्य वह्निमन्मात्रवृत्तित्वेनाप्रतीयमानत्वं नास्ति वह्निमन्मात्रवृत्तित्वेन धूमस्य प्रतीयमानत्वात्। अथोत्तरदलकृत्यं विरुद्धेऽतिव्याप्तिवारणार्थम्, विरुद्धे साध्याभाववन्मात्रवृत्तित्वेनाप्रतीयमानत्वं नास्ति, तत उक्तम् [231 A] - साध्याभाववन्मात्रवृत्तित्वेनाप्रतीयमानत्वं नास्ति साध्याभाववन्मात्रवृत्तित्वेन तस्य प्रतीयमानत्वात्। हेत्वाभासपदस्य कृत्यमाह - **नाज्ञायमाने**ति टीका। तथा चाज्ञायमानदशायां धूमे साध्यवन्मात्रवृत्तित्वेनाप्यप्रतीयमानत्वं वर्तते, यदा धूमो न ज्ञातस्तदापि साध्यवन्मात्रवृत्तित्वेनापि अप्रतीयमानो वर्तते, साध्याभाववन्मात्रवृत्तित्वेनापि न प्रतीयते इति कृत्वा धूमेऽप्यतिव्याप्तिः, अतो दत्तं हेत्वाभासपदम् । अथ प्रकारान्तरेण हेत्वाभासपदस्य कृत्यमाह - **व्यतिरेके**ति टीका। धूमे व्यतिरेकव्याप्तिमत्तया ज्ञायमाने यथा यत्र

वह्न्यभावस्तत्र धूमाभाव इति व्यतिरेकव्याप्तिमत्तया धूमे ज्ञाते साध्यसामानाधिकरण्याज्ञानात् साध्यवन्मात्रवृत्तित्वेनाप्यप्रतीयमानत्वं वर्तते । अथ च धूमस्य व्यतिरेकव्याप्तिमत्तया ज्ञानात् साध्याभाववन्मात्रवृत्तित्वेनाप्यप्रतीयमानत्वं वर्तते । यतो वह्न्यभाववति धूमस्याऽप्रतीयमानत्वमेवेति । तत्रातिव्याप्तिवारणार्थं हेत्वाभासपदम् । इति न चेत्यारभ्य कस्यचिन्मते समाधानम् । इदं लक्षणं दूषयति - **व्यतिरेकव्याप्तिमत्तयेति** टीका । यदा धूमे व्यतिरेकव्याप्तिरेव ज्ञाता तस्यां दशायां साध्यवन्मात्रवृत्तित्वेनाप्रतीयमानत्वं वर्तते । साध्यसामानाधिकरण्याज्ञानात् न साध्यवन्मात्रवृत्तित्वेन तस्य ज्ञानम् । व्यतिरेकव्याप्तिमत्तया ज्ञानाच्च साध्याभाववन्मात्रवृत्तित्वेनापि धूमस्याप्रतीयमानत्वम् । साध्याभाववति धूमाभावस्य गृहीतत्वात् धूमसामानाधिकरण्यं न गृहीतमिति। अथ चावशिष्टं हेत्वाभासत्वम्, तदपि धूमे वर्तते इत्यतिव्याप्तिरित्याह - **हेत्वन्तरेणेति** टीका। यथा पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् इत्यनेन धूमे सत्प्रतिपक्षिते धूमेऽतिव्याप्तेर्हेत्वाभासत्वमपि तत्र जातमिति भावः। ननु सत्प्रतिपक्षावतारकालीनत्वाभावे सति साध्यवदित्यादि पूर्वोक्तं समस्तं लक्षणमित्यत आह - **जलेति** टीका । जलह्रदो वह्निमान् धूमात् इति स्वरूपासिद्धे धूमेऽथ च वह्निसामानाधिकरण्येनाज्ञायमाने साध्यवन्मात्रवृत्तित्वेनाप्रतीयमानत्वं वर्ततेऽथ च साध्याभाववन्मात्रवृत्तित्वेनाप्रतीयमानत्वमप्यस्ति यतस्तेन वह्न्यभाववति धूमस्याग्रहणात् इति स्वरूपासिद्धे धूमे पूर्वकृतसम्पूर्णलक्षणातिव्याप्तिरिति पूर्वकृतलक्षणं दुष्टं कस्यचित् समाधानान्तरमपीति भावः । अथ लक्षणोपरि पूर्वपक्षे कस्यचित् समाधानान्तरमाशङ्क्य दूषयति - **अथेति** टीका । असाधारण्याभावस्य यः कालो यत्र कालेऽसाधारण्यं नावतीर्णं तदवच्छिन्नं यत् साध्यव्याप्तत्वं हेतोः तदभावे सति तत्कालः तत्र काले असाधारण्याभावकालावच्छिन्नसाध्या[भाव]व्याप्यत्वं विरुद्धत्वं च, [231 B] एतयोरभावः सव्यभिचारत्वम् । एतल्लक्षणं यथा पर्वतो धूमवान् वह्नेः इत्यत्र वर्तते, तथाहि यद्यपि वह्नौ साधारणत्वेन ज्ञानकालेऽसाधारणत्वेन ज्ञानं नास्ति तथापि असाधारण्याभावकालावच्छिन्नं यत् साध्यव्याप्तव्यं तदभावस्तिष्ठति । अत्र विशेषणदलमसाधारण्याभावकालः, विशेष्यदलं साध्यव्याप्तत्वम् । यद्यपि वह्नौ साधारणत्वेन ज्ञानकालेऽसाधारण्याभावकालरूपं विशेषणं तिष्ठति तथापि वह्नौ साध्यव्याप्यत्वं विशेष्यं नास्तीति विशेष्याभावप्रयुक्तः सप्तम्यन्तविशिष्टस्याभावः । अथ च वह्नेरसाधारण्याभावकालावच्छिन्नं यत् साध्याभावव्याप्यत्वं [अथ च विरुद्धत्वं] तयोरभावः उत्तरदलमप्यस्ति, वह्नौ असाधारण्याभावकालावच्छिन्नं यत् साध्याभावव्याप्यत्वम् अथ च विरुद्धत्वं तदभावस्तिष्ठत्येव । यतस्तदा वह्नौ असाधारण्यज्ञानमपि नास्ति तादृशकालावच्छिन्नसाध्याभावव्याप्यत्वमपि नास्ति विरुद्धत्वमपि। अथ च शब्दोऽनित्यः शब्दत्वात् इत्यत्रापीदं वर्तते। यद्यपि शब्दत्वेऽनित्यत्वरूपसाध्यव्याप्तत्वमस्ति तथापि असाधारण्याभावकालावच्छिन्नं साध्यव्याप्तत्वं नास्त्येवासाधारणस्य विद्यमानादेव । अत्र विशेषणाभावप्रयुक्तो विशिष्टाभावः । अत्र द्वितीयमुत्तरदलमप्यस्ति

तथाहि असाधारण्याभावकालावच्छिन्नसाध्याभावव्याप्यत्वमपि नास्ति असाधारणस्य विद्यमानत्वात्। उत्तरदले साध्याभावपदं पूर्वदले **साध्यपदं प्रविष्टम्**। अनुपसंहारिण्यपीदं लक्षणमस्ति यथा सर्वमनित्यं प्रमेयत्वात् इत्यत्र असाधारण्याभावकालावच्छिन्नसाध्यव्याप्तत्वमपि साध्याभावव्याप्तत्वमपि नास्ति इति कृत्वा तत्रापि लक्षणं वर्तते। सर्वमनित्वं प्रमेयत्वात् इत्यत्र न वा प्रमेयत्वमनित्यत्वेन व्याप्तम्, न वाऽनित्यत्वाभावेन व्याप्त-मित्यनुपसंहारिणि लक्षणं सुस्थम्। पर्वतो वह्निमान् धूमात् इति सद्धेतौ अतिव्याप्तिवारणार्थं पूर्वदलं सत्यन्तं धूमेऽसाधारण्याभावकालावच्छिन्नसाध्यव्याप्यत्वाभावो नास्ति किन्तु असाधारण्याभावकालावच्छिन्नसाध्य-व्याप्तत्वमेव वर्तते इति न तत्रातिव्याप्तिः। अथ विरुद्धेऽतिव्याप्तिवारणार्थमुत्तरदलम्, विरुद्धोऽसाधारण्या-भावकालावच्छिन्नविरुद्धाभावो नास्ति किन्तु विरुद्धत्वमेवेति भावः। बाधेऽतिव्याप्तिवारणाय उत्तरदलमध्ये साध्याभावव्याप्यत्वपदम्। तदर्थोऽयम् तथा सति सर्वोऽपि लक्षणार्थोऽयम्। असाधारण्याभावकालावच्छिन्न-साध्यव्याप्तत्वाभावे सति असाधारण्याभावकालावच्छिन्नसत्प्रतिपक्षत्वबाधितत्वस्वरूपासिद्धत्वव्याप्यत्वा-सिद्धत्वविरुद्धत्वाभास(सा)भाव [232 A] इति लक्षणार्थः। सर्वमुत्तरदलं बाधादा[व]तिव्याप्तिवारणाय, पूर्वदलं तु सद्धेतावतिव्याप्तिवारणाय। सद्धेतौ उत्तरदलं वर्तते परं साध्यव्याप्तत्वाभावो नास्तीति न तत्रातिव्याप्तिः। इदम् **उपाध्यायमतं** दूषयति - **असाधारण्यं हीति** टीका। असाधारण्याभावकालावच्छिन्नेत्यत्र असाधारण्यं किं विवक्षितम्? चत्वारो विकल्पाः तत्पुरुषीयमित्यादि। तत्पुरुषीयपदेन यस्यानुमितिस्तत्पुरुषीयमसाधारण्यम्, तत्साध्यी[यं] यस्य साध्यस्यानुमितिप्रतिबन्धस्तत्साध्यीयम्, एवं पुरुषसाध्ययोर्यत्किञ्चिद्विकल्पौ बोध्यौ। आद्यं दूषयति - **तत्पुरुषीयमिति**। एतद् रूपमनित्यं रूपत्वात् इत्यत्र रूपत्वे हेतौ अनित्यत्वसाध्यक-रूपत्वहेतुकासाधारण्यं तस्य पुरुषस्य कदापि नावणीर्तम्। कथम्? तस्य पुरुषस्य कदापि सपक्षविपक्षव्यावृत्तस्य ज्ञानं रूपत्वस्य हेतोर्न जातम्। तत्राव्याप्तिः। तत्रासाधारण्यमप्रसिद्धं तत्पुरुषीयमिति कृत्वा रूपत्वेऽ-व्याप्तिः। एतदेवाह - **तत्साध्यकेति** टीका। एतद् रूपमनित्यमित्यत्वा(त्रा)नित्यत्वव्यक्तिविशेष-साध्यकसाधारणानैकान्तिकप्रमेयत्वादौ अव्याप्तेर्वज्रलेपत्वात्। तत्पुरुषीयमसाधारण्यमप्रसिद्धमित्यर्थः। अत्राशङ्कते - **न चेति** टीका। तत्पुरुषं प्रति स साधारणो न भवत्येव असाधारणस्य कदापि तेनाज्ञानात् असाधारणगर्भितत्वात् सव्यभिचारलक्षणस्येति तथा चायमर्थः। साधारणो वाऽनुपसंहारी वा हेतुर्भवतु। तस्मिन् हेतौ यस्य पुरुषस्यासाधारण्यमवतीर्णं तं प्रत्येव स साधारणः, यस्य पुरुषस्य यं हेतुं प्रति असाधारण्यं कदापि नावतीर्णं स हेतुस्तं पुरुषं प्रति साधारणो न भवत्येव इत्याशङ्कार्थः। दूषयति - **तस्येति** टीका। तस्य साधारणस्य नित्यदोषत्वात्। नित्यदोषस्तु सर्वान् पुरुषान् प्रति तु दोष एव। यथा धूमसाध्यको वह्निः कञ्चित् प्रति दोषः कञ्चित् प्रति अदोष इति नास्ति, सर्वान् प्रति तस्य दोषत्वात्। एवं तत्साध्यकपक्षेऽपि दोषमाह - **तत्साध्यकेति**

टीका। यथा उत्पन्नविनष्टपदार्थव्यभिचारिणि प्रमेयत्वादौ उत्पन्नविनष्टपदार्थस्य ज्ञानं केनापि न ज्ञातम्। तत्र तत्साध्यकमपि नावतीर्णं साध्यज्ञानस्य केनाप्यज्ञातत्वात्। तथा च तत्साध्यकसाधारणेऽव्याप्तिः तत्साध्यकासाधारणस्य अप्रसिद्धत्वात्। अथ यं कञ्चित् पुरुषं यं कञ्चित् साध्यमादायासाधारण्यकालो विवक्षित इति पक्षे आह - **अन्ये** इति टीका। तथा च सद्धेतुत्वज्ञानदशायामतिव्याप्तिः। तथाहि पर्वतो वह्निमान् धूमात् इत्यत्र यदा धूमस्य सद्धेतुत्वेन ज्ञानं वर्तते तदानीं कस्यचित् अन्यस्यासाधारण्यज्ञानं धूमविषयकं भ्रमरूपं यथा सपक्षात् महानसादपि व्यावृत्तं विपक्षाच्च ह्रदादपि व्यावृत्तमिति असाधारण्यज्ञानं जातमिति, तदा धूमेऽतिव्याप्तिः। यद्यपि धूमे साध्यव्याप्तत्वं वर्तते तथापि यत्किञ्चीय पुरुषीयासाधारण्याभावकालावच्छिन्नसाध्यव्याप्तत्वं तु [232 B] नास्त्येव। विशेषणाभावायत्तो विशिष्टाभावः। तथा च धूमेऽसाधारण्याभावकालावच्छिन्नसाध्यव्याप्तत्वाभावो वर्तते। तथा च तत्र पूर्वदलं तिष्ठति। हेत्वाभासचतुष्टयातिरिक्तरूपपर्यवसन्नं तल्लक्षणमादाय धूमेऽतिव्याप्तिरित्यर्थः। एतदेवाह - **तदेवासाधारण्ये**ति टीका। **विशिष्टाभावे**ति टीका। असाधारण्याभावकालेत्यादिविशेषणाभावप्रयुक्तो विशिष्टाभाव इति कृत्वा धूमेऽतिव्याप्तिरिति भावः। स्वमतमाह - **अत्रोच्यत** इति टीका। **साध्ये**ति टीका। साध्यवन्मात्रवृत्तित्वमथ च साध्याभाववन्मात्रवृत्तित्वं च एतदुभयनिश्चयविरोधिहेत्वाभासतोपाधिस्तद्वत्त्वम्। अयमर्थः - यादृशहेत्वाभासोपाधिज्ञानात् साध्यवन्मात्रवृत्तित्वस्यापि निश्चयो न जायते साध्याभाववन्मात्रवृत्तित्वस्यापि निश्चयो न जायते तादृशहेत्वाभासोपाधिकत्वम्। ननु तादृशोपाधिः क इत्यत आह - **तादृशश्चे**ति टीका। एक उपाधिः सपक्षविपक्षगामित्वं साधारणे। असाधारणे सपक्षविपक्षव्यावृत्तत्वं द्वितीमसाधारणत्वमुपाधिः। तृतीयमनुपसंहारित्वमेवोपाधिः। यथा धूमवान् वह्नेरित्य(ति) साधारणे वह्नेर्हेतोः सपक्षविपक्षगामित्वज्ञाने विद्यमाने साध्यवन्मात्रवृत्तित्वस्य निश्चयो न जायते हेतोर्विपक्षेऽपि विद्यमानत्वात्। अथ च साध्याभाववन्मात्रवृत्तित्वस्यापि निश्चयो न जायते साध्यवति वह्नेर्वृत्तेः इति कृत्वा साधारणत्वमुभयनिश्चयविरोधित्वं भवत्येव। शब्दोऽनित्यः शब्दत्वात् इत्यत्राप्यसाधारणे शब्दत्वे सपक्ष[विपक्ष]व्यावृत्तत्वज्ञानं तत्। साध्यव्यतिरेकव्याप्तिग्रहसामग्री यथा(दा) शब्दत्वमनित्यात् चेत् व्यावृत्तं तदा यत्र(त्रा)नित्यत्वं तत्र शब्दत्वाभाव इत्यनित्यत्वसाध्यव्यतिरेकव्याप्तिग्रहसामग्री। साध्याभावव्यतिरेकव्याप्तिग्रहसामग्री यदा शब्दत्वं विपक्षात् नित्यात् चेत् व्यावृत्तं तदा यत्र नित्यत्वं तत्र शब्दत्वाभाव इति साध्या[भाव]व्यतिरेकव्याप्तिग्रहसामग्री। तथा च सपक्षविपक्षव्यावृत्तत्वज्ञानाभ्यां साध्यसाध्याभावव्यतिरेकव्याप्तिग्रहसामग्रीभूताभ्यां विरोधात् नैकं साध्यवन्मात्रवृत्तित्वं साध्याभाववन्मात्रवृत्तित्वं च तयोर्मध्ये नैकस्यापि निश्चयः किन्तु उभयोः सन्देह एव। यथा स्थाणुत्वपुरुषत्वयोर्विरुद्धज्ञानसामग्रीभ्यां स्थाणुत्वपुरुषत्वयोः सन्देहः न तू[भयो]र्मध्ये कस्यापि निश्चयः, एवमत्रापीत्येकस्यापि न निश्चयः। **अनुपसंहारित्वं चे**ति

टीका । अनुपसंहारित्वं तु साध्यवन्मात्रवृत्तित्वसाध्याभाववन्मात्रवृत्तित्वरूपं यदुभयं तन्निश्चयविरोधि । अनुपसंहारित्वज्ञानं यथा भवति तथा अग्रे [अन्]उपसंहारिग्रन्थे उपपादयिष्यते इत्यर्थः । **यद्यपीति** टीका । यदि चासाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषकत्वं तदा साध्यवत्त्वसाध्याभाववत्त्वरूपोभयनिश्चयविरोधित्वमेवासाधारणस्य जातं न तु साध्यवन्मात्रवृत्तित्वलक्षणा साध्या(ध्य)व्याप्तिः साध्याभाववन्मात्रवृत्तित्वलक्षणा साध्याभावव्याप्तिः तदुभयनिश्चयविरोधित्वं नास्ति इति कृत्वाऽव्याप्तिरित्यर्थः [233 A] । यथा शब्दोऽनित्यः शब्दत्वात् इत्यत्र यत्र यत्र अनित्यत्वाभावः(? अनित्यत्वं) तत्र शब्दत्वाभाव इत्येको[ऽनित्यत्वसाध्यस्य] व्यतिरेकसहचारः, पश्चात् यत्र चा(च) नित्यत्वं तत्र शब्दत्वाभाव इति साध्याभावस्य व्यतिरेकसहचार इत्युभाभ्यां व्यतिरेकसहचाराभ्यामुभयव्यतिरेकव्याप्तिग्रहद्वारा उभयसाध्यसाध्याभावयोः सन्देह एव क्रियते न तु निश्चयः, तथा च साध्यसाध्याभावोभयनिश्चयविरोधित्वमेवागतं न तु साध्यवन्मात्रवृत्तित्वलक्षणा साध्यव्याप्तिः । अथ च साध्याभाववन्मात्रवृत्तित्वलक्षणोभयव्याप्तिनिश्चयविरोधित्वं तु नागतमेवेत्यव्याप्तिरित्याशङ्कार्थः । समाधत्ते - **तथापीति** टीका । यदि असाधारणस्य शब्दत्वस्य साध्यसाध्याभावोभयनिश्चयविरोधित्वमागतं तदा साध्यवन्मात्रवृत्तित्वनिश्चयेन साध्यानुमानं कर्तव्यम् । अथ च साध्याभाववन्मात्रवृत्तित्वनिश्चयेन साध्याभावानुमानं कर्तव्यं तदापि उभयव्याप्तिनिश्चयविरोधित्वमप्यस्त्येव । एतदेव विवृणोति - **व्यतिरेके**ति टीका । तथा च व्यतिरेकव्याप्तिपुरस्कारेण सत्प्रतिपक्षोत्थापनात् आदौ उभययोः साध्यसाध्याभावयोर्यो निश्चयः तदुभयविरोधिनिश्चयत्वमागतमेव । तथाहि यत्रानित्यत्वाभावः (यत्रानित्यत्वं) तत्र शब्दत्वाभाव इत्ययं साध्यव्यतिरेकव्याप्तिग्रहसामग्री (साध्यव्यतिरेकसहचारः), यत्र चानित्यत्वं (चानित्यत्वाभावः) तत्र शब्दत्वाभाव इति साध्याभावस्य व्यतिरेकसहचारः, इत्युभाभ्यां व्यतिरेकसहचाराभ्यां प्रथममुभयव्यतिरेकव्याप्तिनिश्चयप्रतिबन्धः क्रियते । साध्यव्यतिरेकव्याप्तेः [साध्याभावव्यतिरेक]व्याप्तेश्चेत्युभयनिश्चयविरोधित्वमपि वर्तते इत्यसाधारणे नाव्याप्तिः । ननु केवलान्वयिसाध्यकेऽनुपसंहारिणि सर्वमभिधेयं प्रमेयत्वात् इत्यत्र साध्याभावस्याप्रसिद्धेः साध्याभाववन्मात्रवृत्तित्वमप्या[प्र]सिद्धम् इति अनुपसंहारिणि अव्याप्तिः इत्यत आह - **केवलान्वयी**ति टीका । तथा च केवलान्वयिसाध्यकोऽनुपसंहारी अस्य मते लक्ष्य एव न भवति सव्यभिचार एव न भवतीति न तत्राव्याप्तिः अग्रिममूलास्वरसानुरोधात् । तत्सङ्ग्राह्यतापक्षेऽपि नाव्याप्तिस्तत्रेत्याह - **तत्सङ्ग्राह्यते**ति टीका । साध्याभावस्याप्रसिद्धत्वात् साध्यवन्मात्रवृत्ति[त्व]स्याप्यप्रसिद्धेर्यतः साध्यवन्मात्रवृत्तित्वं नाम साध्यवद्वृत्तित्वे सति साध्याभाववदवृत्तित्वमिति साध्याभावस्याप्यप्रसिद्धेः । तदप्रसिद्धिवारणार्थं विवक्षां करोति । साध्यवन्मात्रवृत्तित्वपदेन साध्यनिष्ठहेतुसमानाधिकरणात्यन्ताभाव(वा)प्रतियोगित्वनिश्चयः । अस्यार्थो यथा साध्यनिष्ठः साध्ये वर्तमानः, एवंभूतो यो हेतु(तुः) [तत्]समानाधिकरणात्यन्ताभावाप्रतियोगित्वं घटादीनामत्यन्ताभावाप्रति-

योगित्वं साध्यस्याभिधेयत्वस्य यो निश्चयस्तद्विरोधित्वं विवक्षितम्, एवं साध्याभाववन्मात्रवृत्तित्वमत्रापि साध्ये हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यविरोधिनिष्ठे तत्त्वनिश्चयः, एतद्विरोधित्वं हेत्वाभासोपाधिकत्वं विवक्षितम्। यद्यपि केवलान्वयिसाध्यके [233 B][१] अनुपसंहारिणि साध्याभावोऽप्रसिद्धः तथाप्युक्तरूपं यत् साध्याभाववन्मात्रवृत्तित्वं तत् तु प्रसिद्धमेवास्ति। साध्यमभिधेयत्वं तदधिकरणानधिकरणं गगनमेव प्रसिद्धम्। तादृशविरोधित्वस्य यद्यपि व्याप्त्यघटकत्वं तथापि ततो यथाकथञ्चिद् बोध्यम्।

**तत्र साधारणत्वं न साध्याभाववद्गामित्वम् सर्वमनित्यं मेयत्वात् इत्यनुपसंहार्ये भूर्नित्या गन्धवत्त्वात् इत्यसाधारणे संयोगादिसाध्यकद्रव्यत्वे चातिव्याप्तेः। अत एव न साध्यवत्तदन्यवृत्तित्वम्, नापि निश्चितसाध्यवत्तदन्यवृत्तित्वम्, साध्यवदन्यवृत्तित्वस्य दूषकत्वेन शेषवैयर्थ्यात्। अत एवामुकेनायमनैकान्तिक इत्येवोद्भाव्यते, तत एव वादिनिवृत्तेश्च न तु सपक्षगतत्वमपि। अनुपसंहार्यो व्यावर्त्योऽन्यथा तस्यैतद्विशेषत्वापत्तिरिति चेत्, त्यज तर्हि तमधिकं क्लृप्तेऽन्तर्भावात्। नापि सपक्षविपक्षगतत्वम्, व्यर्थविशेषणत्वात्। विरुद्धो व्यावर्त्य इति चेत्, न, विपक्षगामित्वस्यैव दूषकत्वे तस्याप्येतदन्तर्भावात्। अथ पक्षान्यसाध्यवत्तदन्यवृत्तित्वं साधारणत्वं तेन सर्वमनित्यं मेयत्वात् इत्यनुपसंहार्ये नातिप्रसङ्गः। न च व्यर्थविशेषणता घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यनुपसंहार्यस्य विरुद्धस्यानैकान्तिकभिन्नस्य व्यवच्छेद्यत्वादिति चेत्। न। दूषकताप्रयोजकरूपभेदमन्तरेण भेदस्यैवानुपपत्तेः। साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्तित्वमित्यपि न व्यर्थविशेषणत्वात् एकव्यक्तिकसाध्ये तदभावाच्च। एतेन हेत्वाभासान्तरव्यवच्छेदकं लक्षणान्तरेऽपि विशेषणं व्यर्थमिति। उच्यते। विपक्षगामित्वं साधारणत्वं तन्मात्रस्य दूषकत्वात् विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारणत्वम्, अन्यथा तस्य हेत्वाभासान्तरतापत्तेः उपाधेश्च न सङ्कर एव।**

अथ मूलम्। साधारणलक्षणमाह - **साध्याभाववदिति**। हेतोरिति शेषः। दूषयति - **सर्वमिति**। सर्वमनित्यं

१. अनवधानतः लिपिकारेण २३३-अङ्कस्य स्थाने २३४-अङ्कः लिखितः।

मेयत्वात् इत्यनुपसंहारिणि अतिव्याप्तिः । भूर्नित्या गन्धवत्त्वात् इत्यसाधारणे चातिव्याप्तिः । इदं संयोगि द्रव्यत्वात् इति सद्धेतावतिव्याप्तिः । तथाहि - यथाक्रममनित्यत्वाभाववति गगने प्रमेयत्वस्य वर्तमानत्वात्, असाधारणे नित्यत्वाभाववति विपक्षे गन्धवत्त्वस्य वर्तमानत्वात्, एवं द्रव्यत्वस्यापि संयोगाभाववति वृक्षे वर्तमानत्वात् अतिव्याप्तिरित्यर्थः । अत्र समाधानान्तरमाशङ्कते - **अत एवेति** मूलम् । पूर्वोक्तानुपसंहारिणि पूर्वोक्तासाधारणे एवं संयोगवदन्योन्याभावस्याव्याप्यवृत्तित्वमालम्ब्य पक्षे आह - **साध्यवदिति** मूलम् । लक्षणान्तरं साधारणस्येदं साध्यवदन्यवृत्तित्वम्, साध्यवतो योऽन्योऽयोगोलकादिस्तद्वृत्तित्वं वह्नेरिति । एवं कृतेऽपि लक्षणे पूर्वोक्तातिव्याप्तिर्लगत्येव । लक्षणान्तरमाशङ्क्य दूषयति - **नापीति** मूलम् । निश्चितसाध्यवान् यः तदन्यस्तु विपक्षस्तद्वृत्तित्वं वह्नेर्निश्चितसाध्यवन्महानसः तदन्योऽयोगोलकः तत्र वर्तते इति कृत्वा लक्षणमुपपन्नं साधारणस्येति । दूषयति - **साध्यवदन्यवृत्तित्वस्येति** मूलम् । दूषणोद्भावने साध्यवदन्यवृत्तित्वमेवोद्भावनीयम् । न तु निश्चितत्वांशोऽपि यथा इदमसाधकं निश्चितसाध्यवदन्यवृत्तित्वात् इति । अत्र निश्चितपदं व्यर्थम्, साध्यवदन्यवृत्तित्वमात्रेणैव दूषकत्वात् । दूषणं तु एतावतैव भवत्येव दूषणे समर्थत्वादेतस्येत्यर्थः । अत्रोपष्टम्भकमाह - **अत एवेति** मूलम् । धूमेन सह वह्निरनैकान्तिकः इत्येवोद्भावनीयम्, न त्वन्यत् । न तु निश्चितधूमाभाववत्त्वांशोऽपि तत्र, गौरवादित्यर्थः । लक्षणान्तरमाशङ्कते - **नापीति** । नापि सपक्षविपक्षगतत्वं हेतोः । दूषयति - **व्यर्थविशेषणत्वादिति** । अयमसाधको विपक्षगामित्वात्, तथा च विपक्षगामित्वस्यैव दूषकत्वे सपक्षगतत्वांशो व्यर्थः तावतैव दूषकत्वसम्भवात् । अत्राशङ्कते - **अनुपसंहार्येति** मूलम् । तथा च विपक्षगतत्वमनुपसंहार्येऽपि वर्तते । अन्यथा तस्यैव साधारणत्वविशेषापत्तिरित्याशङ्कार्थः । दूषयति - **तर्हीति** मूलम् । तर्हि त्यज्यतामधिकोऽनुपसंहारी, तस्याप्यसाधारण एवान्तर्भावोऽस्तु इत्यर्थः । अत्राशङ्कते - **विरुद्धेति** मूलम् । तथा च यदि साधारणत्वं विपक्षगामित्वमात्रमुच्यते तदा विरुद्धे विपक्षगामित्वं [234 A] तिष्ठति परं तत्र साधारणत्वं नास्ति इति कृत्वा सपक्षगामित्वमित्युक्तम् । यदि विपक्षगामित्वमात्रेण दूषकत्वं सम्भवति तदा विपक्षगामित्वेन रूपेण विरुद्धस्यापि साधारण एवान्तर्भावोऽस्तु इत्यर्थः । लक्षणान्तरमाशङ्कते - **अथेति** मूलम् । पक्षान्यत् यत् साध्यवत् तदन्यवृत्तित्वम्, धूमवान् वह्नेः इत्यत्र पक्षान्यसाध्यवन्महानसादिकम् तदन्योऽयोगोलकः तद्वृत्तित्वं साधारणत्वम् । तत्र पक्षान्येति विशेषणस्य प्रयोजनमाह - **तेनेति** मूलम् । सर्वमनित्यं प्रमेयत्वात् इत्यत्रानुपसंहार्ये पक्षभिन्नं यत् साध्यवदन्यत् तद्वृत्तित्वं प्रमेयत्वस्य नास्ति सर्वस्य पक्षीकृतत्वात् । तथा चानुपसंहारिणि अतिव्याप्तिर्न भवति । न चासाधकतानुमाने व्यर्थविशेषणतेति वाच्यम् । अयं घटोऽनित्यः घटाकाशोभयवृत्तिद्वित्वाश्रयत्वात् इत्यनुपसंहार्यस्य अथ च विरुद्धस्यापि व्यवच्छेद्यत्वात् तत्रातिव्याप्तिवारणार्थं पक्षान्येति पदम्, घटाकाशोभयवृत्तिद्वित्वाश्रयत्वमाकाशेऽपि वर्तते तस्य साध्य-

वदन्यवृत्तित्वं वर्तते अनित्यत्ववदन्यवृत्तित्वात् । तथा चोक्तानुपसंहार्ये पक्षान्यत् यत् साध्यवत् पटादिकं तद्वृत्तित्वं नास्तीति कृत्वा नातिव्याप्तिः, एवं विरुद्धेऽयमश्वो गोत्वात् इतिरूपे पक्षान्यत् यत् साध्यवत् अश्वादिकं तद्वृत्तित्वं गोत्वस्य नास्तीति विरुद्धे नातिव्याप्तिः । इदं लक्षणं दूषयति - **दूषकते**ति मूलम् । दूषकताप्रयोजकं यद् भिन्नं रूपं चेत् स्यात् तदा तद्भेदेनानुपसंहार्यविरुद्धसाधारणानां भेदः स्यात्, तदेव तु नास्ति। साध्यवदन्यवृत्तित्वमात्रेण दूषकताप्रयोजकरूपस्यैकेन त्रयाणां भेद एव न स्यात्। तथा च पक्षान्यत्वरूपं विशेषणं व्यर्थमेवेति भावः । लक्षणान्तरमाशङ्कते - **साध्यवद्वृत्तित्वे** इति मूलम् । साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्तित्वमिति साधारणलक्षणम् । यथा धूमवान् वह्नेः इत्यत्र वह्निः साध्यवद्वृत्तिर्भवति अथ च सर्वसाध्यवदन्यद(न्योऽ)-योगोलकं(कः) तद्वृत्तिरपि भवतीति कृत्वा वह्निः साधारणः । सर्वपदं धूमादावतिव्याप्तिवारणाय । यत्किञ्चित्साध्यवान् महानसोऽपि भवति पर्वतीयवह्न्यपेक्षया, तत् सर्वपदम् । सर्वसाध्यवदन्यवृत्तित्वं विरुद्धेऽप्यतिव्याप्तम्, यथा शब्दो नित्यः कृतकत्वात् इत्यत्र कृतकत्वं सर्वसाध्यवदन्यवृत्तिर्भवतीति विरुद्धेऽतिव्याप्तिवारणार्थं साध्यवद्वृत्तित्वे सतीति पदम् । इदं दूषयति - **व्यर्थे**ति मूलम् । दूषकत्वे साध्यवद्वृत्तित्वांशो व्यर्थः । इदमसाधकं सर्वसाध्यवदन्यवृत्तित्वात् इत्यस्यैव दूषकत्वे साध्यवद्वृत्तित्वांशो व्यर्थः । न च विरुद्धेऽप्यतिव्याप्तिरिति वाच्यम् । विरुद्धेऽपि दूषकताप्रयोजकैक्यस्य विद्यमानत्वात् विरुद्धोऽप्येतदन्तर्भूत एवास्तु इत्यर्थः । दूषणान्तरमाह - [234 B] **एकव्यक्तिके**ति मूलम् । यथाऽयं गौः प्रमेयत्वात् इत्यत्र सर्वाणि साध्यवन्त्यप्रसिद्धानि गोत्वलक्षणसाध्यस्यैकत्वादित्यर्थः । **एतेने**ति मूलम् । यतो दूषकताप्रयोजकरूपस्य विपक्षवृत्तित्वस्य विरुद्धादिषु विद्यमानत्वात् तेषामपि साधारण एवान्तर्भावः । अत एव तद्व्यावृत्त्यर्थं यानि यानि साधारणलक्षणानि कृतानि तेष्वपि विरुद्धवारणार्थं विरुद्धान्यत्वे सतीत्यादिविशेषणं व्यर्थमेव विरुद्धस्यापि साधारण एवान्तर्भावोऽस्तु इत्यर्थः । सिद्धान्तमाह - **विपक्षवृत्तित्वमि**ति मूलम् । तथा च साध्याभाववन्मात्रवृत्तित्वलक्षणं यत् विपक्षवृत्तित्वं तेनैव रूपेणास्य दूषकत्वात् । ननु विरुद्धेऽपि अयमश्वो गोत्वात् इति स्वरूपे विपक्षवृत्तित्वमस्त्येव, ततो विरुद्धस्यापि साधारणत्वं स्यादित्यत आह - **विरुद्धस्यापी**ति मूलम् । तत्त्व(त्वा)ज्ञाने इति विरुद्धत्वाज्ञाने साध्याभावव्याप्तत्वाज्ञाने विपक्षवृत्तित्व(त्वा)ज्ञानदशायां विपक्षवृत्तित्वेन रूपेण विरुद्धोऽपि साधारणो भवत्येव, न तु विरुद्धत्वं साधारणत्वं चैकम् । विरुद्धत्वं नाम साध्यसमानाधिकरणात्यन्ताभावप्रतियोगिहेतुत्वं यथा अयमश्वो गोत्वात् इत्यत्र अश्वत्वसमानाधिकरणो योऽत्यन्ताभावो गोत्वस्य तत्प्रतियोगिकं(त्वं) गोत्वे वर्तते, तथा च विरुद्धत्वोपाधेः साधारणतोपाधेश्च भेदात् हेतुरूपोपधेयसङ्करेऽपि नाभेददोषः उपाधेरसङ्करात् इति ।

अथ टीका । **एकव्यक्तिके**ति टीका । यदि सर्वपदं साध्यवत्परं तदा सर्वाणि यानि साध्यवन्ति

तदन्यवृत्तित्वमित्यागतम् । तथा च इदं शब्दवत् अष्टद्रव्यातिरिक्तद्रव्यत्वात्, यत्र यत्र शब्दवत्त्वाभावस्तत्र तत्र अष्टद्रव्यातिरिक्तद्रव्यत्वाभावः यथा पृथिव्याम् । अत्र साध्यवतां बहुत्वं नास्ति साध्यवत आकाशस्य एकत्वात् । एतदेवाह - एका व्यक्तिराश्रयरूपा यस्य साध्यस्येत्यर्थः । सिद्धान्त आह - **विपक्षेतीति** टीका । अत्र विपक्षपदं विकल्प्य दूषयति - विपक्षत्वं किं निश्चितसाध्याभाववत्त्वं वा साध्याभाववत्त्वमात्रं वा ? आद्ये आह - **निश्चितेति** टीका । तथा यथाऽसाधारणः शब्दत्वादिर्निश्चितसाध्यवद्व्यावृत्तत्वेन । यदा साध्यवतो निश्चयः तदैव तद्व्यावृत्तत्वेनासाधारण्यम्, यदा तु निश्चयो नास्ति तस्यासाधारण्यमपि नास्ति, ततोऽसाधारणस्याऽनित्यदोषत्वम् । तथा निश्चितसाध्याभाववद्वृत्तित्वं विपक्षत्वम् । यदा साध्याभाववत्तया निश्चयो वर्तते तदैव विपक्षवृत्तित्वस्य विद्यमानत्वात् साधारणत्वम्, यदा तु साध्याभावस्य निश्चयो नास्ति तदा निश्चितसाध्याभाववद्वृत्तित्वं नास्तीति कृत्वाऽस्यापि साधारणस्यापि अनित्यदोषत्वं स्यात् । सिद्धान्तस्तु साधारणस्य नित्यदोषत्वं यत्र हेत्वाभासोपाधौ ज्ञानस्य प्रवेशो नास्ति । वस्तुसत एव दूषकत्वम्, वह्नेर्धूमाभाववद्वृत्तित्वेनैव दूषकत्वम्, परं निश्चित-धूमरूपसाध्याभाववद्वृत्तित्वेन [235 A] निश्चयरूपाधिकज्ञानस्याप्रवेशात् । तस्मात् अनित्यदोषत्वमिदमेव यस्मिन् हेत्वाभासोपाधौ ज्ञानांशप्रवेशः, यत्र ज्ञानत्वांशप्रवेशो नास्ति ता[त्र] नित्यदोषत्वम्, तथा च साधारण-स्याप्यनित्यदोषापत्तिः । न द्वितीयः । यदि साध्याभाववत्त्वमात्रे तदा साध्याभाववद्वृत्तित्वज्ञानस्य या प्रतिबन्धकता सा किं साध्याभाववद्वृत्तित्वनिश्चयेन किं वा तज्ज्ञानत्वमात्रेण ? आद्ये आह - **तन्निश्चयत्वेनेति** टीका । तथा च साध्याभाववद्वृत्तित्वनिश्चयत्वेन प्रतिबन्धकत्वे उपाधिसन्देहाहितो यो व्यभिचारसन्देहस्तस्य प्रतिबन्धकत्वं न स्यात् । कुतः ? सन्देहरूपज्ञाने साध्याभाववद्वृत्तित्वस्य निश्चयत्वाभावात् । प्रतिबन्धकता तु साध्या-भाववद्वृत्तित्वनिश्चयत्वेन वर्तते । तन्निश्चयत्वाभावात् सन्दिग्धानैकान्तिकस्य प्रतिबन्धकता न स्यात् । उपाधिसन्देहाहितव्यभिचारसन्देहस्य प्रतिबन्धकत्वात् इदमेव सन्दिग्धानैकान्तिकत्वम् । द्वितीये आह - द्वितीय-पक्षस्य साध्याभाववत्त्वमात्रमेव विपक्षत्वमस्य विकल्पस्य विकल्पद्वयम् - साध्याभाववद्वृत्तित्वनिश्चयत्वेन प्रतिबन्धकत्वं किं वा साध्याभाववद्वृत्तित्वज्ञानत्वेन ? प्रथमपक्षे दूषणमुक्तम् । द्वितीये साध्याभाववद्वृत्तित्व-ज्ञानत्वेनेति रूपे दूषणमाह - **तज्ज्ञानत्वेनेति** टीका । तज्ज्ञानत्वेन साध्याभाववद्वृत्तित्वज्ञानत्वेन चेत् प्रतिबन्धकत्वं तदा पक्षीयव्यभिचारसन्देहस्यापि अनुमितिप्रतिबन्धकत्वं स्यात् यथा पर्वतो वह्निमान् न वा इति वह्न्यभाव-सन्देहस्य विद्यमानत्वात् । तथा च हेतुमति पक्षे यः साध्याभावसन्देहो व्यभिचारसन्देहः स एवानुमितिप्रतिबन्धक इति । तथा च साध्याभाववद्वृत्तित्वज्ञानं पक्षीयव्यभिचारसन्देहोऽपि भवति इति कृत्वा तस्यापि प्रतिबन्धकत्वं स्यादित्यर्थः । अत्राशङ्कते - **न चेति** टीका । तथा च साध्याभाववद्वृत्तित्वज्ञानत्वेनैव व्यभिचारस्य प्रतिबन्धकत्वं परन्तु तज्ज्ञानं कीदृशम् ? साध्याभावांशे निश्चयभृतम् ? पक्षीयसाध्यसन्देहरूपं यद् ज्ञानं तत् साध्याभावांशे

निश्चयरूपं न भवति इति कृत्वा न तस्य प्रतिबन्धकत्वमित्याशङ्कार्थः । दूषयति - **साध्यतदभावेति** टीका । यदि साध्याभाववद्वृत्तित्वं नित्यदोषो व्यभिचारः प्रतिबन्धकता तु साध्याभावांशे निश्चयभूतसाध्याभाववद्वृत्तित्वज्ञानत्वेनैव तदाऽसाधारणस्यापि नित्यदोषतापत्तिः । साध्यवद्व्यावृत्तत्वमे(मा)त्रा(त्र)मेवासाधारणत्वम्, तज्ज्ञानस्य या प्रतिबन्धकता सा साध्यांशे निश्चयभूतज्ञानत्वेन प्रतिबन्धकतेति कृत्वाऽसाधारणस्यापि नित्यदोषतापत्तिः । म(? त्व)योच्यते - साधारणस्य नित्यदोषता तज्ज्ञानस्य प्रतिबन्धकतायां निश्चयप्रवेशात् । तदा मयाऽप्युच्यते - साध्यवद्व्यावृत्तत्वमात्रमेवासाधारणत्वम्, प्रतिबन्धकतायां तु निश्चयप्रवेशः । त्वया साधारणस्य नित्यदोषतोच्यते मया तु असाधारणस्यापि नित्यदोषत्वं स्यादिति प्रतिबन्दी कृता सा त्वनुत्तरम् । प्रतिबन्दी तु उत्तरमेव न भवतीत्यत आह - **अपि चेति** टीका । स श्यामो [235 B] मित्रातनयत्वात् इत्यत्र पक्षीकृतमित्रातनयातिरिक्तमित्रातनये सर्वत्र श्यामत्वनिश्चयदशायां शाकपाकजत्वेनोपाधितया सन्दिग्धेन यत् व्यभिचारसन्देहापादनं कर्तव्यं तत् पक्षे एव कर्तव्यम् । उपाधिसन्देहादवश्यं साध्यसन्देहः, स साध्यसन्देहः पक्षातिरिक्ते तु न सम्भवति पक्षातिरिक्ते साध्यस्य निश्चितत्वात् । तथा च पक्ष एव साध्यसन्देहः कर्तव्यः । तथा च तस्य पक्षीयसाध्यसन्देहस्योपाधीयसन्देहाहितस्य साध्याभावांशे निश्चयत्वाभावात् स व्यभिचारसन्देहः प्रतिबन्धको न स्यात् । **न चैवमिति** टीका । तथा चोपाधिसन्देहाहितो व्यभिचारसन्देहो न प्रतिबन्धक एव भवतु इतीष्टापत्तिरित्यर्थः । दूषयति - **तत्रेति** । यदि उपाधिसन्देहाद् व्यभिचारसन्देहो न दूषणं तदा उपाधेरुद्भावनं न स्यात्, उपाधेः स्वतो दूषकत्वाभावात् किन्तु व्यभिचारसन्देहद्वारा एव तस्य दूषकत्वात् । तथा च पक्षातिरिक्तस्थले श्यामत्वस्य निश्चयो वर्तते । तदा शाकपाकजत्वस्य साधनाव्यापकतया साध्यव्यापकतया सन्दिग्धेन सन्दिग्धस्योपाधेरुद्भावनं न स्यात् इत्यर्थः । ननु यत्र पक्षातिरिक्तस्थले साध्यनिश्चयो जातस्तत्रोपाधेरुद्भावनं मा भूत् इत्यत आह - **अपसिद्धान्ताच्चेति** टीका । यत्र पक्षातिरिक्तस्थले साध्यनिश्चयेऽपि सन्दिग्धोपाधेरुद्भावनं वर्तते एवानुमानस्य तेन दूषणात् । दूषणान्तरमाह - **क्षितिरिति** । क्षितिर्द्विकर्तृका कार्यत्वात् इत्यत्राप्रयोजकत्वं **नैया[यि]कै(के)**नोच्यते तदा तेनाऽप्रयोजकत्वेन व्यभिचारसन्देहोऽवश्यं क्रियते । यथोपाधिसं[दे]हाद् व्यभिचारसन्देहस्तथाऽप्रयोजकत्वसन्देहादपि व्यभिचारसन्देहोऽवश्यं भवत्येव । तथा च व्यभिचारसन्देहस्य पक्षे हेतुमत्तया निर्णीते साध्याभावांशे संशयीभूतपक्षीयव्यभिचारसन्देहप्रतिबन्धकत्वस्य सर्वसिद्धत्वात् तत्र साध्याभावांशे निश्चयीभूतव्यभिचारज्ञानत्वेन प्रतिबन्धकत्वेऽप्रयोज[क]त्वाहितव्यभिचारसन्देहस्य प्रतिबन्धकत्वं न स्यात् । साध्याभावांशे निश्चयो नास्ति इति कृत्वाऽप्रयोजकताहितव्यभिचारसन्देहस्य प्रतिबन्धकत्वं न स्यादित्यर्थः । दूषणान्तरमाह - **किञ्चेति** टीका । यदि साध्याभावांशे प्रतियोगिवैयधिकरण्यप्रवेशेऽयमेतत्संयोगी वृक्षत्वात् इत्यत्र साध्याभाववद्वृत्तित्वस्य विद्यमानत्वात् साधारण्यं स्यात् । तथा च सद्धेतौ वृक्षत्वेऽतिव्याप्तिः । तत्प्रवेशे प्रतियोगि-

वैयधिकरण्यप्रवेशे साध्यवैयधिकरण्यावच्छेदेन साध्याभावसामानाधिकरण्यमिति व्यभिचार इति फलितोऽर्थः। तथा च साध्यवैयधिकरण्यप्रवेशापेक्षया साध्याधिकरणभिन्नाधिकरणवृत्तित्वज्ञानमेव व्यभिचारः प्रतिबन्धकमस्तु। अयमर्थः - साध्यस्याधिकरणं तद्भिन्नाधिकरणं यस्य तद्वृत्तित्वज्ञानमेव प्रतिबन्धकमस्तु लाघवात्। तत्र साध्यवैयधिकरण्यं प्रविष्टम्, तच्चाधिकमिति गौरवम्। दूषणान्तरमाह - **किञ्चेति** टीका। साध्यवदन्यवृत्तित्वज्ञानस्यावश्यं प्रतिबन्धकत्वात् अत्यन्ता[भाव]घटितज्ञानस्यापि [236 A] प्रतिबन्धकत्वाच्च प्रतिबन्धकज्ञानानन्त्यापत्तिः। ततः किमित्यत आह - **एवं चेति** टीका। साध्यनिष्ठहेतुसमानाधिकरणात्यन्ताभावप्रतियोगित्वमप्येकं व्यभिचारज्ञानम्, द्वितीयं च हेतुनिष्ठसाध्यवन्मात्रवृत्तिभिन्नत्वज्ञानम् एतदपि व्यभिचारज्ञानम्, तृतीयं तु हेतुनिष्ठसाध्यसम्बन्धाभावप्रतियोगित्वज्ञानमपि व्यभिचारः, इत्यादीनां नानाज्ञानानां प्रतिबन्धकत्वात् तत्तद्ज्ञानविषयाणां तेषां तेषां तत्र तत्र प्रतिबन्धकत्वे प्रतिबन्धकत्वानन्त्यं स्यात्। तथा चानन्ता हेत्वाभासा स्युः इति आशयः इति पूर्वपक्षार्थः। समाधत्ते - **मैवमिति**। विपक्षत्वं हि साध्याभाववत्त्वमेव। तथा च साध्याभाववद्वृत्तित्वमात्रं व्यभिचारः, न तु निश्चयगर्भम्। ततः किमित्यत आह - **अत** इति। अतः साधारणस्य नानित्यदोषता, यतो हेत्वाभासोपाधौ ज्ञानस्य निश्चयरूपस्याप्रवेशात्। तथा च यन्निश्चयः सर्वदाऽनुमितिप्रतिबन्धको भवत्येव तस्यैव नित्यदोषत्वम्। असाधारणस्तु अनित्यदोष एव। कुतः ? यथा शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वस्य सपक्षविपक्षव्यावृत्तत्वनिश्चयः सर्वदाऽनुमितिप्रतिबन्धको न भवति। कुतः ? अत्रानित्यत्वानुमाने सपक्षो घटादिः, विपक्षो ह्याकाशादिः, तथा च शब्दत्वस्य घटपटरूपा ये सपक्षाः कालाकाशादयो ये विपक्षास्तद्व्यावृत्तत्वज्ञानं यत् तद् यदि पक्षे शब्देऽनित्यत्वसन्देहः, तस्यां दशायामेव घटपटाकाशादिव्यावृत्तत्वनिश्चयोऽनुमितिप्रतिबन्धकः यतः सपक्षविपक्षव्यावृत्तत्वज्ञानेनानुमितिप्रतिबन्धस्य सम्भवात्। तथा च यादृशो निश्चयोऽनुमितिप्रतिबन्धकः सर्वदा तद्विषयस्य नित्यदोषत्वम्, घटपटाकाशव्यावृत्तत्वनिश्चयो वर्तते यः साध्यसन्देहदशायामेवानुमितिप्रतिबन्धकः, न तु साध्यनिश्चयदशायां यदा साध्यसन्देहः पक्षे स्थितस्तदानीमनुमितिप्रतिबन्धः। आप्तवाक्यात् साध्यनिश्चयदशायां विद्यमानोऽपि घटपटाकाशव्यावृत्तत्वनिश्चयोऽनुमितिप्रतिबन्धको न भवति सिषाधयिषयाऽनुमितेर्जायमानत्वात् इति भावः। एवं च(चा)साधारणस्यानित्यदोषता सिद्धा। ननु यदि साध्याभाववत्त्वमेव विपक्षत्वं तद्वृत्तित्वं च साधारणत्वं तदा तज्ज्ञानस्य तन्निश्चयत्वेन न प्रतिबन्धकत्वम्। उपाधिसन्देहाहितव्यभिचारसन्देहस्य प्रतिबन्धकत्वं न स्यात्, तस्य साध्याभाववद्वृत्तित्वनिश्चयत्वाभावात्। तथा च साध्याभाववद्वृत्तित्वज्ञानत्वेन प्रतिबन्धकता वक्तव्या। तथा च पक्षेऽपि व्यभिचारसन्देहस्यापि प्रतिबन्धकत्वं स्यादित्यत आह - **प्रतिबन्धकता चेति** टीका। तथा चानुमितिप्रतिबन्धकतावच्छेदकं व्यभिचारज्ञानत्वमेव। न चैवं व्यभिचारज्ञानत्वेन प्रतिबन्धकत्वे पक्षीयसाध्यव्यभिचारसन्देहस्यापि प्रतिबन्धकत्वेऽनुमितिमात्रोच्छेदप्रसङ्गात्। पक्षीयसाध्यव्यभिचारसन्देहस्य

सर्वत्र विद्यमानत्वात् इत्याशङ्कार्थः । समाधत्ते - **तर्केति** टीका । तथा च यद्यपि पक्षीयोऽपि [236 B] साध्यव्यभिचारसंदेहो भवति तथापि विशेषदर्शनविरहविशिष्ट एव प्रतिबन्धकः । यदा विशेषदर्शनं वह्निव्याप्य-धूमवांश्चायमित्याकारकं वर्तते तदानीं व्यभिचारसंशयस्य प्रतिबन्धकत्वाभावात् अनुमितिस्तु भवत्येवेति नानुमानमात्रोच्छेदो दोषः । तथा च पक्षीयसाध्यव्यभिचारसन्देहस्याप्यनुमितिप्रतिबन्धकत्वं भवत्येव । प्रकारान्तर-माह - **यद्वेति** टीका । तथा च हेतुमत्तया निश्चिते उपाधिसन्देहाद्यनाहितो यो व्यभिचारसन्देहस्तदतिरिक्त-व्यभिचारज्ञानत्वेनानुमितिप्रतिबन्धकता । व्यभिचारज्ञानत्वेनैव प्रतिबन्धकत्वमुच्यते, तदा पक्षीयसाध्यव्यभि-चारसन्देहस्यापि प्रतिबन्धकता स्यात् । अत उक्तम् उपाधिसन्देहाद्यनाहितव्यभिचारसन्देहातिरिक्तेति पदम् । ततः पक्षीयसाध्यव्यभिचारसन्देहस्तु उपाधिसन्देहाद्यनाहित एव, व्यभिचारसन्देहेन तु तदतिरिक्तः पक्षे यः साध्यसन्देहः स तु स्वाभाविक एंव न तु केनचित् क्रियत इति तद्व्यवच्छेद इति । अथ स्वमते यादृशो व्यभिचारसन्देहः प्रतिबन्धकस्तमाह - **वस्तुत** इति टीका । व्यभिचारनिश्चयस्य भिन्नं प्रतिबन्धकतावच्छेदकं व्यभिचारसन्देहस्य च भिन्नं प्रतिबन्धकतावच्छेदकम् । तत्राद्यस्याव्यभिचाररूपं यद् ग्राह्यं तदभावनिश्चयत्वेन प्रतिबन्धकत्वम् । व्याप्तौ तु अव्यभिचार एव ग्राह्यः यतोऽव्यभिचरितसामानाधिकरण्यं व्याप्तिः । अत्राव्यभिचारो ग्राह्यः, तस्याभावो व्यभिचारः, तन्नि[श्च]यत्वं व्यभिचारनिश्चयत्वं प्रतिबन्धकतावच्छेदकम् । तन्निश्चयेति व्यभिचारनिश्चयस्येत्यर्थः । व्यभिचारसन्देहस्य चान्यं प्रतिबन्धकतावच्छेदकमित्याह - **ग्राह्यसंशयस्येति** टीका । अनुमितौ ग्राह्यो वह्निः, तत्संशयस्य तद्घटितव्यभिचारसंशयस्य । यथा धूमवति पर्वते वह्निरस्ति न वेति व्यभिचारसन्देहः, तस्य तत्त्वेन ग्राह्यव्यभिचारसन्देहत्वेन न प्रतिबन्धकत्वं किन्तु यथा भूतले घटोऽस्ति न वा अत्र प्रत्यक्षे ग्राह्यो घटस्तस्य यो व्यभिचारसन्देहो घटोऽस्ति न वेति रूपस्तस्य घटोऽयमिति प्रत्यक्षे दर्शनात् यतो घटसन्देहो घटप्रत्यक्षेऽनुकूल एव तद्वत् व्याप्तिप्रत्यक्षेऽपि ग्राह्योऽव्यभिचारस्तस्य व्यतिरेको व्यभिचारस्तत्सन्देहस्यापि न प्रतिबन्धकत्वं किन्तु अनुकूलत्वमेव वाच्यम् । तथापि धूमो वह्निव्यभिचारी न वेति व्यभिचारसन्देहे विद्यमाने व्याप्तिप्रत्यक्षं न जायते इति कृत्वा व्यभिचारसंशयस्य व्याप्तिप्रत्यक्षेऽवश्यं प्रतिबन्धकत्वमिति सिद्धान्ते । आशङ्कते - **न चेति** टीका । पक्षीयसाध्यव्यभिचारसन्देहे विद्यमाने व्याप्तिप्रत्यक्षाभावेऽनुमितिर्न स्यात् । व्याप्तिप्रत्यक्षे व्यभिचारसन्देहस्य प्रतिबन्धकत्वस्य विद्यमानत्वात् इत्याशङ्कार्थः । अतिप्रसङ्गः अनुमितिर्न स्यादितिरूपः । समाधत्ते - **प्रतिबन्धकेति** टीका । न हि सर्वोऽपि साध्यव्यभिचारसन्देहोऽनुमितिप्रतिबन्धक इत्युच्यतेऽस्माभिः किन्तु यादृशयादृश-साध्यव्यभिचारसन्देहात् व्याप्तिग्रहप्रतिबन्धो दृष्टः । [237 A] यादृशेति यथोपाधिसन्देहाहितव्यभिचारसन्देहे विद्यमाने व्याप्तिग्रहप्रतिबन्धो जायते, स्वाभाविकपक्षीयसाध्यव्यभिचारसन्देहे विद्यमाने व्याप्तिग्रहप्रतिबन्धो न भवति इति फलबलात् । यादृशव्यभिचारग्रहे सति व्याप्तिग्रहप्रतिबन्धोऽनुभवसिद्धस्तत्र तत्तद्व्यभिचार-

सन्देहत्वेनैव व्याप्तिग्रहप्रतिबन्धकत्वम्। ननु तत्तद्व्यभिचारसन्देहत्वेन व्याप्तिग्रहप्रतिबन्धकत्वे प्रतिबन्धकताव-च्छेदकस्यानुगतस्याभावादननुगमः स्यादिति चेन्न, प्रतिबन्धकतावच्छेदकाननुगमस्यादोषत्वात् । तथाहि कारणतावच्छेदकस्याननुगमे तेन तेन तत्तद्दण्डत्वादिना रूपेण कारणत्वे उच्यमाने तत्तद्दण्डव्यक्तेस्तत्तद्घटव्यक्तिं प्रति व्यभिचारितयाऽनन्यथासिद्धनियतपूर्ववर्तित्वरूपं कारणत्वं न सिद्ध्यति, व्यभिचारेणोक्तरूपेण कारणत्वा-ग्रहात् ।प्रतिबन्धकत्वस्य तु कारणीभूताभावप्रतियोगित्वरूपस्याननुगमेऽपि तेन तेन रूपेण यानि यानि बन्धकानि तावदभावकूटस्यैव कारणत्वम् । तथाहि यथा दाहे मणिनिष्ठप्रतिबन्धकतावच्छेदकं न मणित्वम् उत्तेजकमणि-साधारण्यात्। मणित्वमुत्तेजकमणावप्यस्ति। प्रतिबन्धकप्रतिबन्धकमुत्तेजकम्। किन्तु तत्तन्मणित्वेन तत्तद्दाहत्वेन च प्रतिबध्यप्रतिबन्धकभावे दाहत्वावच्छिन्ने तावत्प्रतिबन्धकानामभावकूट एव कारणम्, तावदभावकूटस्य दाहत्वावच्छिन्नेऽनुगतकारणत्वसम्भवात् । यथा तद्दाहविशेषे तन्मणिप्रतिबन्धकः एवं तद्दाहे तदौषधमिति। दाहत्वावच्छिन्नेऽनुगतप्रतिबध्यप्रतिबन्धकभावाभावेऽपि दाहत्वावच्छिन्नेऽनुगतकार्ये तत्तत्प्रतिबन्धकाभावत्वेन रूपेण यावन्तः प्रतिबन्धकाभावास्तावतां प्रतिबन्धकाभावानाम् । दण्डचक्रादिषु अनुगतकारणतावच्छेदका-भावेऽपि कपालनिष्ठा कारणता भिन्ना, चक्रनिष्ठा कारणता भिन्ना, दण्डनिष्ठा कारणता भिन्ना । तथा च कपालस्य कपालत्वेन कारणत्वम्, अन्येषामपि तत्तद्रूपत्वेन कारणत्वम्, तद्वत् प्रतिबन्धकाभावस्य भिन्न(न्ना) भिन्ना कारणता तत्तत्प्रतिबन्धकाभावत्वेन यथा तत्तन्मण्यभावत्वेन कारणता । एवं च तत्तद्व्यभिचारज्ञानस्यापि प्रतिबन्धकतया तत्तद्व्यभिचारज्ञानाभावात्वेनैव कारणता यथा साध्यात्यन्ताभाववद्वृत्तित्वज्ञाने विद्यमाने व्याप्तिग्रहो न जायते इति कृत्वा वह्न्यभाववद्वृत्तित्वज्ञानाभावत्वेनानुमितिकारणता प्रतिबन्धकाभावस्य कूटकारणत्वेन(ना)नुगम एव नास्ति तत्प्रतिबन्धकाभावत्वेन दाहत्वेनानुगत एव कार्यकारणभाव इति भावः, किन्तु कारणतावच्छेदकाननुगमो दोष इत्यर्थः । एतदेवाह - **तत्तत्सन्देहत्वेनैवेति** टीका । यादृशाद् व्यभिचारज्ञानाद् व्याप्तिग्रहो न जायते तादृशव्यभिचारज्ञानत्वेन प्रतिबन्धकता, तदभावत्वेन करणतेत्यर्थः । यद्वेति पक्षमुपसंहरन्नाह - **निश्चितेति** [237 B] टीका । निश्चितहेतुमति पक्षे उपाधिसन्देहाद्यनाहितसाध्यव्यभिचारसंशयातिरिक्तव्यभिचारसंशयत्वेन प्रतिबन्धकत्वे प्रतिबन्धकाननुगमोऽपि नास्ति । सर्वेषु व्यभिचारसन्देहेषु निश्चितहेतुमतीत्यादिप्रतिबन्धकता-वच्छेदकमप्यनुगतं भवतीति अनुगतत्वमपि न दोष इत्यर्थः । **अत एवेति** टीका । यतो निश्चितहेतुमती-त्याद्युक्तव्यभिचारसंशयत्वेन प्रतिबन्धकत्वम् अत एवानुमानदूषणार्थं व्यभिचारस्य व्यभिचारसंशयत्वेनाप्युद्भावनं कर्तव्यम्। व्यभिचारनिश्चयस्य तु व्यभिचारनिश्चयत्वेनैव दूषणम्। ननु साध्याभाववद्वृत्तित्वनिश्चयत्वेन संशयत्वेन वा व्यभिचारज्ञानस्य प्रतिबन्धकत्वे अयं वृक्षः संयोगी द्रव्यत्वात् इत्यत्र साध्याभाववद्वृत्तित्वज्ञानं वर्ततेऽनु-मितिप्रतिबन्धः स्यादित्यत आह - **साध्याभावेति** टीका। तथा च न साध्याभाववद्वृत्तित्वज्ञानत्वेन प्रतिबन्धकत्वं

किन्तु साध्याभावे प्रतियोगिवैयधिकरण्यं विशेषणं तथा च प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वज्ञानत्वं व्यभिचारः। तत्प्रतियोगिवैयधिकरण्यं यदवच्छेदेन प्रतियोगिवैयधिकरण्यं वर्तते। यथा वृक्षः संयोगी सत्त्वात् इत्यत्र संयोगरूपप्रतियोगिवैयधिकरण्यं गुणत्वकर्मत्वावच्छेदेन, तेन गुणत्वकर्मत्वावच्छेदेन यः संयोगाभावः स प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नः, गुणरूपकर्मरूपाधिकरणे संयोगात्यन्ताभावो द्रव्यत्वावच्छेदेन तु नास्ति, तद्वृत्तित्वज्ञानं सत्त्वस्य हेतोर्भवतीति सत्त्वस्य व्यभिचारज्ञाने विद्यमाने सत्त्वे संयोगनिरूपितो व्याप्तिग्रहः। अत्राशङ्कते - **न चैवमिति** टीका। तथा च व्यभिचारलक्षणे प्रतियोगिवैयधिकरण्यप्रवेशे गौरवम्। कथम् ? साध्याधिकरणभिन्नाधिकरणवृत्तित्वं वा वक्तव्यम् किं वा साध्यवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वम् ? लाघवात् प्रथममेवेत्याशङ्कार्थः। समाधत्ते - **तदुद्भावन** इति टीका। यद्यपि साध्याधिकरणभिन्नाधिकरणवृत्तित्वं व्यभिचारत्वं प्रतियोगिवैयधिकरण्येत्याद्यपेक्षया गुरु भवति तथापि प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववदवृत्तित्वं व्याप्तिरिति व्याप्तिपक्षे साध्यवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञानस्य समानप्रकारकत्वेन। यतः साध्यवैयधिकरण्याव[च्छे]दे(द)क(का)वच्छिन्नसाध्याभाववदवृत्तित्वं व्याप्तिः। अत्र व्याप्तौ साध्याभाववदवृत्तित्वं प्रकारः व्यभिचारे तु तदभावः साध्याभाववद(द्)वृत्तित्वम्। यथा घटज्ञाने घटाभावज्ञानं प्रतिबन्धकम्, तत्र घटज्ञाने घटत्वं प्रकारः, घटाभावज्ञानं तु घटत्वप्रकारावच्छिन्नाभावज्ञानं भवत्येव, तद्वत् प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववदवृत्तित्वं व्याप्तिः साध्यवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वं व्यभिचारः। एतादृशव्याप्तिव्यभिचारयोर्ज्ञाने [238 A] समानप्रकारकता तिष्ठत्येव। एकत्र व्याप्तौ उक्तरूपसाध्याभाववदवृत्तित्वं प्रकारः, व्यभिचारे तु उक्तरूपं चेत् साध्याभाववदवृत्तित्वं तदभाव इति साध्याभाववदवृत्तित्वस्योभयत्रापि प्रकारत्वात् समानप्रकारत्वम्। विरोधिविषयतया तस्यैव प्रतियोगिवैयधिकरण्येत्यादिज्ञानस्य प्रतिबन्धकत्वात्, गौरवेऽपि उभयोः समानप्रकारकतया प्रतिबध्यप्रतिबन्धका(?क)भावानुरोधात् प्रतियोगीत्याद्येव व्यभिचारलक्षणं न त्वन्यत्। प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववदवृत्तित्वरूपव्याप्तिज्ञाने साध्यवदन्यवृत्तित्वरूपव्यभिचारज्ञानं तस्मिन् व्याप्तिज्ञाने प्रतिबन्धकं न भवति समानप्रकारकत्वाभावात्। अत्राशङ्कते - **न चेति** टीका। यथा प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववदवृत्तित्वं व्याप्तिः, तत्र व्याप्तिज्ञाने प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वज्ञानं प्रतिबन्धकम्, एवं च साध्यवदन्यवृत्तित्वज्ञानं यद् वर्तते तत् प्रतियोगिवैयधिकरण्येत्यादिव्याप्तिज्ञाने तु प्रतिबन्धकम्। किन्तु साध्यवदन्यवृत्तित्वज्ञानमेव तत्र प्रतिबन्धकम्, एवं च सति अत्यन्ताभावगर्भव्यभिचारज्ञानं प्रतिबन्धकम्। अन्योन्याभावगर्भमपि व्यभिचारज्ञानं प्रतिबन्धकम्। यथा अत्यन्ताभावगर्भं साध्यात्यन्ता-

भाववदवृत्तित्वम् अन्योन्याभावगर्भं च साध्यवदन्यावृत्तित्वं व्याप्तिलक्षणम्, एवं व्यभिचारोऽपि साध्यात्यन्ताभाववद्वृत्तित्वं साध्यवदन्यवृत्तित्वं चेति एतावुभौ व्यभिचारौ । एवं च हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः, हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यकत्वं व्यभिचारः । एवमन्योन्याभावः हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यसामानाधिकरण्यं व्याप्तिः । यथा पर्वतो वह्निमान् धूमात् इत्यत्र धूमसमानाधिकरणोऽन्योन्याभावो घटाद्यन्योन्याभावः यथा वह्निमान् घटो न भवति इतिरूपः, तत्प्रतियोगितानवच्छेदकं साध्यं वह्निरूपं यतो वह्निमान् घटो न भवति इत्यत्र घटत्वं प्रतियोगितावच्छेदकं व(प)रं वह्निर्न भवति। कुतः ? यतो वह्निमान् वह्निमान् न भवति इति प्रतीतेरव्यभिचारिणि तु इदं लक्षणं नास्ति। यथा पर्वतो धूमवान् वह्नेः इत्यत्र वह्निसमानाधिकरणो योऽन्योन्याभावो धूमवदन्योन्याभावो यथाऽयोगोलकं(कः) धूमव(वा)न् न भवतीत्यत्र वह्निसमानाधिकरणो योऽन्योन्याभावो धूमवदन्योन्याभावस्तस्य प्रतियोगितावच्छेदको धूम एव यतः प्रतीतिरयोगोलकं(कः) धूमव(वा)न् न भवति। अत्र धूमवान् प्रतियोगी। धूमः प्रतियोगितावच्छेदकः प्रतियोगिनिष्ठो धर्मः। धूमोऽपि धूमवन्निष्ठ इति धूमवतः प्रतियोगितावच्छेदकः । तथा च तत्र धूमे वह्निसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वं नास्ति । अतोऽन्योन्याभावगर्भव्याप्तिरपि व्यभिचारिणि नास्ति। तथा च हेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वं [238 B] व्यभिचारत्वं सिद्धम् । एतादृशानि व्यभिचारज्ञानानि बहूनि वर्तन्ते । तत्तद्ज्ञानानां प्रतिबन्धकत्वात् तत्तज्ज्ञानविषयव्यभिचाराणामपि बहुत्वात् हेत्वाभासाधिक्यापत्तिरित्याशङ्कार्थः। उत्तरमाह - **अत्यन्ताभावगर्भे**ति टीका । यदि अत्यन्ताभावगर्भैव व्याप्तिस्तथा चात्यन्ताभावगर्भव्याप्तेरेव ज्ञानमनुमितिहेतुस्तदाऽत्यन्ताभावगर्भव्यभिचारज्ञानमेव व्याप्तिग्रहप्रतिबन्धकम्, न त्वन्यत्। तथा चात्यन्ताभावगर्भव्याप्तिज्ञानेऽन्येषां व्यभिचारज्ञानानां प्रतिबन्धकत्वमेव नास्ति, तेनात्यन्ताभावगर्भमेव व्यभिचारज्ञानं व्याप्तिग्रहे प्रतिबन्धकं न चान्यत्। यदि चानुमितौ कारणं लाघवादन्योन्याभावगर्भमेव व्याप्तिज्ञानं तदाऽन्योन्याभावगर्भ[म्] एव व्यभिचारज्ञानमेव व्याप्तिप्रतिबन्धकं नान्य[त्] इति कृत्वा न हेत्वाभासाधिक्यम् । तथा च यदेवानुमितिकारणीभूतं व्याप्तिज्ञानं तद्घटितव्यभिचार एव हेत्वाभासो नान्यो व्यभिचार इति सिद्धम्, अन्येषामप्रतिबन्धकत्वात् एकस्मिन् व्याप्तिज्ञाने [ना]नाव्यभिचारज्ञाना[ना]मप्रतिबन्धकत्वात्। यदि चैकत्र तेषां प्रतिबन्धकत्वं तत्राह - **प्रतिबन्धकत्वे चे**ति टीका । तदा तावद्व्यभिचारज्ञानप्रतिबन्धकविषयतावच्छेदकत्वेन व्याप्तिज्ञानकारणीभूतसहचारग्रहस्य सहकारी योऽभावस्तस्य प्रतियोगि यज्ज्ञानं तद्विषयतावच्छेद[क]रूपवत्त्वेन सर्वेषामेकीकरणेन **महर्षिणा** विभजनात्। अयमर्थः - व्याप्तिग्रहस्य कारणीभूतो यः सहचारग्रहः सामानाधिकरण्यज्ञानं तस्य सहकारी योऽभावो व्यभिचारज्ञानाभावः तस्य प्रतियोगि यज्ज्ञानं व्यभिचारज्ञानं तद्विषयतावच्छेदकरूपवत्त्वं

सर्वेषु व्यभिचारेषु वर्तत इति म(न) हेत्वाभासाधिक्यमिति स्पष्टोऽर्थः। साध्येता(त्या)रभ्य अनुसरणीयत्वादि-तिपर्यन्तः पाठः प्रामादिक इति न योजितः। ननु साध्याभाववद्वृत्तित्वरूपं साधारणलक्षणम्, तच्च विरुद्धेऽपि तिष्ठति साध्याभाववद्वृत्तित्वं हेतोस्तत्रापि सत्त्वादित्यत आह - **विरुद्धस्यापी**ति टीका। यदि विरुद्धः साध्याभाववद्वृत्तित्वेन रूपेण सङ्ग्राह्यस्तदा इदमेव विपक्षवृत्तित्वलक्षणं रूपम्। एतेन विरुद्धोऽपि साधारण एव। यदि च विरुद्धोऽसङ्ग्राह्यः साधारणो न भवति। सपक्षवृत्तित्वसहकृतं साध्याभाववद्वृत्तित्वमेव साधारणलक्षणं विरुद्धस्य सपक्षवृत्तित्वाभावात्। एवं च विरुद्धे नातिव्याप्तिरित्यर्थः। तच्चाज्ञाने इति मूलं व्याचष्टे - **यद्यपी**ति टीका। यद्यपि तत्त्वेन विरुद्धत्वेन विरुद्धस्य ज्ञानं वर्तते तथापि साध्याभाववद्वृत्तित्वलक्षणं यत् साधारणत्वं सव्यभिचारत्वं तत् तु विरुद्धे तिष्ठत्येव। अन्यथा साधारणस्य नित्यदोषत्वं न स्यात्। यदि विरुद्धत्वेन ज्ञानदशायामपि साधारणत्वं नास्ति तदा साधारणस्य नित्यदोषत्वं न स्यात्। तथापि यदि विरुद्धस्य विरुद्धत्वेन ज्ञानं तदा साधारणत्वं तस्य नोद्भाव्यम्, किन्तु विरुद्धत्वमेवोद्भाव्यम् न तु साधारणत्वमित्यर्थः। ननु यदि साध्याभाववद्वृत्तित्वेन रूपेण विरुद्धोऽपि साधारणस्तदा विरुद्धव्यभिचारसामान्यलक्षणमव्याप्तलक्षणम् [239 A]। यथा उभयकोटयुपस्थापकतावच्छेदकत्वलक्षणमव्याप्तं विरुद्धे तदभावात्। न हि उभय-कोटयुपस्थापकतावच्छेदकत्वप्रयोजकं सपक्षविपक्षवृत्तित्वं सपक्षविपक्षव्यावृत्तत्वं वाऽनुपसंहारित्वं वा विरुद्धे तिष्ठति। तथा च विरुद्धस्य यदि साधारणत्वेन सङ्ग्रहस्तदा व्यभिचारसामान्यलक्षणाव्याप्तिरित्यत आह - **एतत्सङ्ग्राहकमि**ति टीका। तथा च यदि विरुद्धस्य साधारणत्वं तदा यथा विरुद्धस्य सामान्यलक्षणेन सङ्ग्रह(हः) साध्यवन्मात्रवृत्तित्वेत्यादिभक्तुपाध्यायो(? पाधिनो)क्तरीत्या। यद्यपि विशेषलक्षणेन साध्या-भाववद्वृत्तित्वरूपेण विरुद्धस्यापि साधारणत्वेन सङ्ग्रहस्तदा सामान्यलक्षणेनासङ्ग्रहेऽपि न दोषः। **यदा त्वि**ति टीका। यद्यपि नानादूषणोपाधीनां साध्याभावव्याप्तत्वं विरुद्धत्वं विपक्षवृत्तित्वं साधारणत्वमित्यादीनां दूषणोपाधीनां दूषणविभाजकानामेकत्र विरुद्धादौ समावेशेऽपि न दोषशङ्का, उपधेयसङ्करेऽप्युपाधेरसङ्करात्। न हि विपक्षवृत्तित्वं साध्याभावव्याप्तत्वं चैक एवोपाधिरिति। नहि विरुद्धे व्याप्तत्वस्याधिकस्य प्रवेशादनयोर्भेदः।

**सर्वमनित्यं मेयत्वादित्यनुपसंहारी, शब्दोऽनित्यः शब्दत्वात् भूर्नित्या गन्धवत्त्वादित्य-साधारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोऽपि पक्षतादशायामुद्भावयितुं न शक्यत इत्युभयोर्भेदेनोपन्यासः। सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः। ननु सपक्षत्वं न साध्यवन्मात्रत्वं विपक्षावृत्तेर्वृत्तिमतः साध्यवद्वृत्तित्वनियमात्। नापि पक्षातिरिक्त-साध्यवत्त्वम्, शब्दोऽनित्यः शब्दत्वादित्यादेर्व्याप्तिधीदशायामप्यसाधारणतापत्तेः। न**

चेष्टापत्तिः, बाधप्रतिरोधौ विना व्याप्तिपक्षधर्मतया ज्ञातादनुमितिनियमादिति चेत् न, सर्वनिश्चितसाध्यवद्विपक्षव्यावृत्तत्वस्य तत्त्वात् शब्दत्वानित्यत्वव्याप्तिग्रहे सति शब्दे साध्यनिश्चयान्नातिव्याप्तिः। न च घटोऽयमेतत्त्वादिति सद्धेतावतिव्याप्तिः, साध्यसन्देह-दशायां तस्य हेत्वाभासत्वात्। यद्यपि भूर्नित्या गन्धवत्त्वादित्यादिर्वस्तुतः साधारणः शब्दो नित्यः शब्दत्वादिति विरुद्धः शब्दोऽनित्यः शब्दत्वादित्यादिः सद्धेतुरेव व्याप्त्य-ज्ञानस्य पुरुषदोषत्वादित्युदाहरणाभावादसाधारणो न पृथक्, तथापि पक्षतादशायां साध्यतदभावानिश्चयेन तस्य दोषत्वम् अन्यथा पक्षत्वभङ्गप्रसङ्गात्। अथ सर्वसपक्ष-व्यावृत्तिरेव दोषो न विपक्षव्यावृत्तिरपि तस्या अनुगुणत्वात् प्रत्युत विपक्षव्यावृत्तत्वेन व्यतिरेकितया परसाध्यसाधकमेवोपन्यस्तं स्यात्। न च संशायकतया दोषत्वं तच्चो-भयव्यावृत्तत्वज्ञानादिति वाच्यम्। व्याप्तिग्राहकं सहचारज्ञानं तदभावद्वारा सपक्षव्या-वृत्तत्वमात्रस्य दोषत्वात्। किञ्च शब्दोऽनित्यः शब्दत्वादित्युक्त्वा निवृत्ते तावन्नेदमुद्भाव्यं न्यूनत्वेनैव वादिनिग्रहात् तदुद्भावने वादिनिवृत्तेश्च। न च न्यूनत्वे तदुपजीव्यम्, असाधारण्यव्यतिरेकेणापि तदुपन्यासात्। न च व्यतिरेकिप्रयोगे तदुपन्यासः, व्याप्ति-पक्षधर्मतयोरप्रतिक्षेपेऽकिञ्चित्करत्वात्, स्वार्थानुमाने च सर्वसपक्षव्यावृत्तिरेव दोष इत्युक्तमिति।

अथ मूलम्। **सर्वमनित्यमिति मूलम्**। ननु सर्वमनित्यं प्रमेयत्वादित्यनुपसंहारी। शब्दो[ऽ]नित्यः शब्दत्वादित्यसाधारणः। भूर्नित्या गन्धवत्त्वादित्ययमसाधारणः। एतेषां त्रयाणां वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणत्वमेव स्यादित्यत आह - **सर्वमिति मूलम्**। तथा चानेन रूपेण वस्तुगत्या त्रयाणां साधारणत्वं वर्तते तथापि पक्षतादशायां यदा पक्षे साध्यसन्देहो वर्तते तदानीं साधारणत्वमुद्भावयितुं न शक्यते पक्षे साध्या-भाववत्त्वनिर्णयाभावात्। पक्षे साध्याभाववत्त्वनिर्णयश्चेत् स्यात् तदा साध्याभाववद्वृत्तित्वस्य व्यभिचारस्य निर्णय एव स्यादित्यर्थः। असाधारणलक्षणमाह - **सर्वेति**। सर्वसपक्षविपक्षाभ्यां व्यावृत्तोऽसाधारण इत्यर्थः। सद्धेतौ धूमेऽतिव्याप्तिवारणार्थं सर्वपदम्। अत्राशङ्कते - **नन्विति मूलम्**। सपक्षत्वं विचारयति - किं सपक्षत्वम्। **साध्यवदिति मूलम्**। यदि साध्यवत्त्वमात्रं सपक्षत्वं तदा हेतौ सपक्षविपक्षव्यावृत्तत्व-

लक्षणमसाधारण्यं तदेव दुर्ग्रहम् । कथं दुर्ग्रहमित्यत आह - **विपक्षवृत्तेरिति मूलम्** । यो वृत्तिमान् धर्मो विपक्षावृत्तिः सोऽवश्यं सपक्षवृत्तिर्भवत्येव । यतः सर्वं वस्तु किञ्चित् साध्यवत् किञ्चित् साध्याभाववत् । यत् साध्यवन्न भवति तदेव साध्याभाववद् भवति, तथा च यदि साध्याभाववति न वर्तते हेतुस्तदाऽवश्यं साध्यवति वर्तते, यदि च साध्यवति न वर्तते तदाऽवश्यं साध्याभाववति वर्तते, तेन यो वृत्तिमान् धर्मः साध्यवतो व्यावृत्तश्चेत् तदाऽवश्यं साध्याभाववति वर्तमानः, यदि च साध्याभाववतो व्यावृत्तस्तदाऽवश्यं साध्यवति वर्तते, ततो वृत्तिमतो धर्मस्योभयव्यावृत्तत्वं न सम्भवतीति [239 B] कृत्वाऽसाधारण्यं दुर्ग्रहमित्यर्थः । अत्र केषाञ्चित् समाधानमुद्भाव्य दूषयति - **नापीति** मूलम् । सपक्षत्वं न साध्यवन्मात्रत्वं किन्तु पक्षातिरिक्त-साध्यवत्त्वम्, पक्षातिरिक्तसाध्यवत्त्वं चेदुक्तं तदा वृत्तिमतो धर्मस्य सपक्षविपक्षव्यावृत्तत्वं सम्भवत्येव । तथाहि पूर्वं साध्यवन्मात्रत्वमेव सपक्षत्वमुक्तम्, तदा सपक्षविपक्षाभ्यामन्यः तृतीयः प्रकारः न सम्भवतीत्युक्तम् । साम्प्रतं पक्षातिरिक्तसाध्यवत्त्वमात्रं चेत् सपक्षत्वमुक्तं तदा सपक्षविपक्षाभ्यामन्यः तृतीयः प्रकारः पक्ष एव सम्भवति, तथा च सपक्षविपक्षाभ्यां व्यावृत्तत्वमसाधारणत्वं सम्भवत्येव । इदं दूषयति - **शब्दोऽनित्य** इति मूलम् । शब्दोऽनित्यः शब्दत्वादित्यादेर्व्याप्तिग्रहदशायामप्यसाधारणत्वं स्यात् । पक्षातिरिक्तः साध्यवान् घटादिस्तद्व्यावृत्तत्वं शब्दत्वस्य वर्तते इति कृत्वाऽयमप्यसाधारणः स्यात् वस्तुगत्या व्याप्तिग्रहदशायां सद्धेतुरेव । अत्र शङ्कते - **न चेति** मूलम् । असाधारणो भवत्विति इष्टापत्तिरिति न च वाच्यमित्यर्थः । दूषयति - **बाधेति** मूलम् । शब्दोऽनित्य शब्दत्वादित्यत्र व्याप्तिग्रहदशायाम् बाधसत्प्रतिपक्षौ न स्तः व्याप्तिविशिष्टपक्षधर्मताज्ञानं च वर्तते तस्यां दशायाम्, अनुमितिप्रतिबन्धकं किमपि नास्तीति कृत्वाऽनुमितिर्जायते तस्यां दशायामपि, यदि असाधारणत्वं तदाऽसाधारणस्यासाधारणत्वमेव न स्यादित्याशङ्कार्थः । समाधत्ते - **सर्वेति** मूलम् । सर्वं यन्निश्चितसाध्यवत् अथ च यन्निश्चितसाध्याभाववत् तद्व्यावृत्तमसाधारणत्वमिति कृत्वा न पूर्वोक्तदोषः । तथाहि निश्चितसाध्यवान् घटादिस्तत्रानित्यत्वस्य निश्चयात् तद्व्यावृत्तत्वं शब्दत्वेऽस्ति, निश्चितसाध्याभाववान् आकाशादिस्तद्व्यावृत्तत्वं शब्दत्वे तिष्ठति । अतः शब्दत्वमसाधारणम् । अथ पूर्वोक्तं दोषं निराकरोति - **शब्दत्वेति** मूलम् । तथा च शब्दोऽनित्यः शब्दत्वात् इत्यत्र यदि शब्देऽनित्यत्वव्याप्तिग्रहो नास्ति पक्षे वा [अ]नित्यत्वस्य सन्देहात् तदानीमसाधारण्यं वर्तते एव । निश्चितसाध्यवन्तो घटादयः तद्व्यावृत्तत्वं ज्ञानस्य विद्यमानत्वात्, विपक्षाकाशादिव्यावृत्तत्वज्ञानस्यापि विद्यमानत्वात् तदानीमसाधारण्यं तिष्ठत्येव । शब्दत्वे यदाऽनित्यत्वव्याप्तिग्रहस्तदा शब्दत्वे योऽनित्यत्वसामानाधिकरण्यनिश्चयः स शब्द एव भविष्यति, तदा शब्देऽनित्यत्वनिश्चयान्नासाधारण्यं सर्वनिश्चितसाध्यवस्तुमध्ये शब्दस्यापि वर्तमानत्वात्, तद्व्यावृत्तत्वं नास्तीति नासाधारण्यम् । **शब्दत्व इति** । तथा च शब्देऽनित्यत्वसन्देहदशायां शब्दत्वे हेतौ असाधारण्यान्नातिव्याप्तिः,

सर्वनिश्चितसाध्यवद्व्यावृत्तत्वात्। यदि पक्षे शब्दे साध्यनिश्चयो जातस्तदा सर्वनिश्चितसाध्यवद्व्यावृत्तत्वाभावात् शब्दत्वे नातिव्याप्तिः [240 A], अन्यथा शब्दत्वेऽतिव्याप्तिर्भवेत्। कथम् ? यद्यपि शब्दत्वे घटादिसपक्षव्यावृत्तत्वं वर्तते इति कृत्वाऽतिव्याप्तिस्तत्र भवेत्, ततोऽतिव्याप्तिवारणार्थं सर्वनिश्चितसाध्यवद्व्यावृत्तत्वं नास्तीति कृत्वा न तत्रातिव्याप्तिरित्यर्थः। अत्राशङ्कते - **न चेति** मूलम्। अयं घटः एतत्त्वात् इत्यत्र सद्धेतावतिव्याप्ति। कथम् ? एतत्त्वं हेतुः, सपक्षो घटान्तरम्, तस्माद् व्यावृत्तः(त्तं) विपक्षाच्च पटादेर्व्यावृत्तमिति कृत्वा सपक्षविपक्षव्यावृत्तत्वादसाधारण्यं स्यादित्याशङ्कार्थः। समाधत्ते - **साध्यसन्देहदशा[या]मिति** मूलम्। तथा च त्वया कस्यां दशायाम् एतत्त्वेऽतिव्याप्तिर्दीयते ? पक्षे साध्यसन्देहदशायां वा किं वा पक्षे साध्यनिर्णयदशायां वा ? नाद्यः। यदि पक्षे साध्यसन्देहस्तदा तस्य हेत्वाभासत्वमिष्टमेव। निश्चितसाध्यं घटान्तरं तद्व्यावृत्तत्वं तत्र वर्तते, निश्चितसाध्याभाववन्तो ये विपक्षाः पटादयः तेभ्योऽपि व्यावृत्तत्वम्, लक्षणस्य तत्र गमनाद् भवत्येव तस्यासाधारण्यम्। यदि साध्यनिर्णयस्तदा निश्चितसाध्यवद्व्यावृत्तत्वान्नातिव्याप्तिः। अत्राशङ्कते - **यद्यपीति** मूलम्। तथा च भूर्नित्या गन्धवत्त्वात् इति असाधारणः साधारणो भवति, साध्याभाववद्वृत्तित्वात् साधारणो भवति। पक्षे साध्यसन्देहदशायां निश्चितसाध्यवद्व्यावृत्तत्वात् असाधारणोऽपि भवति। एवं शब्दो नित्यः शब्दत्वात् अयं विरुद्धोऽपि निश्चितसाध्यवद्व्यावृत्तत्वात् असाधारणोऽपि भवति। अथ च शब्दोऽनित्यः शब्दत्वात् अयं सद्धेतुरेव। तथा च एतेषां त्रयाणां यद्यपि निश्चितसाध्यवद्व्यावृत्तत्वेनासाधारण्यं तथापि नासाधारणस्याऽसङ्कीर्णमुदाहरणमिति कृत्वा प्रथमस्य साधारणत्वात् द्वितीयस्य तु विरुद्धत्वात् तृतीयस्य सद्धेतुत्वात्। नन्वयं चेत् सद्धेतुस्तदाऽनुमितिः कुतो न भवतीत्यत आह - **व्याप्तिज्ञानमिति** मूलम्। व्याप्तिज्ञानं तत्र नास्ति पुरुषस्याज्ञानरूपदोषात्। तथा चासाधारणस्याऽसङ्कीर्णोदाहरणाभावात् नासाधारणः स्वतन्त्रो हेत्वाभासः इति यद्यपीत्यारभ्य पूर्वपक्षार्थः। समाधत्ते - **तथापीति** मूलम्। उपधेयतो हेतोः असङ्कीर्णस्थलाभावेऽपि उपाधेरसङ्करो वर्तते एव। कथम् ? साधारणे विपक्षवृत्तित्वमुपाधिः। शब्दो नित्यः शब्दत्वात् इति विरुद्धे साध्याभावव्याप्तत्वं दूषकताबीजम्, तद्वत् शब्दोऽनित्यः शब्दत्वात् इति हेतावपि निश्चितशब्दवत्तदभाववद्व्यावृत्तत्वमनुमितिप्रतिबन्धकं भवत्येवेति कृत्वा निश्चितसाध्याभाववद्व्यावृत्तत्वं तज्ज्ञानमपि। शब्दोऽनित्यः शब्दत्वात् इत्यत्र यदा शब्देऽनित्यत्वसंदेहो वर्तते तदानीं निश्चितसाध्यवद्व्यावृत्तत्वज्ञाने [240 B] विद्यमानेऽनुमितिप्रतिबन्धात् सर्वनिश्चितसाध्यवद्व्यावृत्तत्वमपि एको हेत्वाभासोपाधिस्तिष्ठत्येव। तेन शब्देऽनित्यत्वरूपसाध्यसन्देहदशायां शब्दत्वं सद्धेतुरप्यसाधारणो भवत्येव, न हेत्वाभासन्यूनता इत्यर्थः। **अन्यथेति**। यदि शब्दो(ब्देऽ)नित्यत्वरूपसाध्यनिश्चयस्तदा शब्दस्य साध्यसन्देहघटिता पक्षता न स्यात्। साध्यनिश्चये विद्यमाने साध्यसन्देहघटितं पक्षत्वं नास्ति। तदा साध्यसन्देहदशायां शब्दत्वमसाधारणो भवत्येवेत्यर्थः। अत्राशङ्कते -

**अन्यथे**ति मूलम्। यदि सर्वसपक्षव्यावृत्तत्वे सति विपक्षव्यावृत्तत्वमसाधारण्यं तदा सर्वसपक्षव्यावृत्तिरेव दोषः, न तु [विपक्ष]व्यावृत्तिरपि; [विपक्षव्यावृत्तिरपि] दोषत्वेन किमर्थमुद्भावनीया ?, विपक्षव्यावृत्तेः प्रत्युतानुमित्यनुकूलत्वात्। तथा च यदि विपक्षव्यावृत्तिरप्युद्भाविता तदा परस्य विपक्षव्यावृत्तत्वज्ञानेन व्यतिरेकव्याप्तिसाधकमेवोपन्यस्तं स्यात्। तथाहि तव हेतुरयं विपक्षव्यावृत्त इत्युद्भाविते वादिना एवं वक्तव्यम् - यदि विपक्षव्यावृत्तस्तदा विपक्षव्यावृत्तत्वज्ञानद्वारा व्यतिरेकव्याप्त्या तवानुमितिरेव भविष्यतीति मदीयो हेतुः सद्धेतुरेव। यथा वह्न्यभाववद्विपक्षात् ह्रदात् व्यावृत्तो धूमो व्यतिरेकव्याप्तिमान् एव, यतो यत्र वह्न्यभावस्तत्र धूमाभाव इति व्यतिरेकव्याप्तिमद्धूमवत् मदीयोऽपि हेतुः अनित्यत्वसाधकशब्दत्वरूपः सद्धेतुरेव भविष्यतीति जितमस्माभिः। तथा च दूषकताबीजमध्ये विपक्षव्यावृत्तस्य प्रवेशो न कार्य इति भावः। मध्ये शङ्कते विपक्षव्यावृत्तत्वमप्युद्भावनीयमित्याशयेन - **न चे**ति मूलम्। यथा सपक्षविपक्षानुवृत्तत्वज्ञानात् साध्यसन्देहः तथा सपक्षविपक्षत्वे व्यावृत्तत्वज्ञानादपि। किमयं सपक्षाद्व्यावृत्तः इति कृत्वा साध्याभाववान् वा किं वा विपक्षव्यावृत्तत्वात् साध्यवान् वा इति सपक्षविपक्षव्यावृत्तत्वज्ञानेन साध्यसन्देहः क्रियते इति सपक्षव्यावृत्तत्ववत् विपक्षव्यावृत्तत्वज्ञानमपि सन्देहजनकतया दोषः। दूषणान्तरमाह - **किञ्चे**ति मूलम्। शब्दो[ऽ]नित्यः शब्दत्वात् इत्युक्त्वा यत्र शब्दत्वं तत्रानित्यत्वमित्युदाहरणाभावादेव निवृत्ते वादिनि न्यूनत्वादेव दूषणं जातमिति न्यूनत्वे वादिनि निग्रहात्। **तदुद्भावने**ति मूलम्। न्यूनत्वोद्भावनेनैव वादिनिवृत्तेश्च ततो नेदं शब्दोऽनित्यः शब्दत्वात् इत्यसाधारणत्वमुद्भावनीयम्। असाधारणत्वप्रयोजकं सपक्षविपक्षव्यावृत्तत्वम्, तच्चात्र नोद्भावनीयं न्यूनत्वेनोदाहरणरूपावयवन्यूनत्वेन वादिनिग्रहात्। न च तदपि भवत्विति वाच्यम्। उपस्थितं दूषणं परित्यज्य दूषणान्तरोद्भावनेऽधिकत्वेनैव [241 A] निग्रहात् इति भावः। अत्राशङ्कते - **न चे**ति मूलम्। सपक्षविपक्षव्यावृत्तत्वज्ञाने सति न्यूनत्वं भवति। सपक्षात् यदा हेतुर्व्यावृत्तस्तदाऽन्वयव्याप्तौ दृष्टान्ताभावः। नोदाहरणाभावात् न्यूनत्वम्। तथा च न्यूनत्वे सपक्षव्यावृत्तत्वरूपसाधारण्यमुपजीव्यं भवति साक्षात् परम्परया वा कारणं भवतीति व्यभिचारोपजीव्यबाधवत् न्यूनत्वोपजीव्यासाधारणस्यापि बाधवत् पृथग् हेत्वाभासः। यथा व्यभिचारे उपजीव्यो बाधस्तद्वत् असाधारणस्यापि पृथग् हेत्वाभासत्वमिति न च वाच्यम्। अत्र दूषणमाह - **असाधारणे**ति मूलम्। असाधारणव्यतिरेको नाम असाधारण्यानुपस्थितावपि सपक्षविपक्षव्यावृत्तत्वलक्षणस्यासाधारण(ण्य)स्यानुपस्थितावपि केवलसपक्षव्यावृत्तत्वज्ञाने(न)मात्रेण तदुद्भावनात् न्यूनत्वोद्भावनात्। कथम् ? सपक्षविपक्षव्यावृत्तत्वरूपोभयव्यावृत्तत्वज्ञानं नोपयुज्यते। न च व्यतिरेकी। व्यतिरेकव्याप्त्याऽनुमानप्रयोगेऽसाधारणस्योपन्यासः किञ्चित्करो न। कुत इत्यत आह - **व्याप्ती**ति मूलम्। न ह्यसाधारणज्ञानेन व्याप्तिज्ञानं विघटयते पक्षधर्मताज्ञानं वा विघटयते। यथा शब्दोऽनित्यः शब्दत्वात् इत्यत्रासाधारण्योद्भावने सति न शब्दत्वस्य

पक्षधर्मताज्ञानं विघटच्यते सपक्षविपक्षव्यावृत्तत्वज्ञानस्य पक्षधर्मताज्ञानविरोधित्वाभावात्। नापि व्याप्तिविघटन-द्वारा। यद्यपि सपक्षव्यावृत्तत्वज्ञानेनान्वयव्याप्तिर्विघटच्यते तथापि व्यतिरेकव्याप्तेरप्रतिक्षेपात् अविघटनात् विपक्षव्यावृत्तत्वज्ञानेन व्यतिरेकव्याप्तेरप्रतिक्षेपात् विपक्षव्यावृत्तिस्तु व्यति[रेक]व्याप्तावनुगुणैव। दूषणान्तरमाह - **स्वार्थेति**। स्वार्थानुमाने सपक्षव्यावृत्तिरेव दोषो न तु विपक्षव्यावृत्तिः, सर्वसपक्षव्यावृत्तौ दृष्टान्ताभावात् सर्वसपक्षव्यावृत्तेरनुमितिप्रतिबन्धकत्वम्, परं स्वार्थानुमाने विपक्षव्यावृत्तेः प्रतिबन्धकत्वमेव नास्ति अनुगुण-त्वात्। ननु परार्थानुमानेऽपि सपक्षव्यावृत्तिरेव दोषो विपक्षव्यावृत्तिस्तु अकिञ्चित्करैवेति मूलकृता स्वार्थानु-मानमेव किमर्थमुक्तमिति चेन्न। अभिप्रायापरिज्ञानात्। परार्थानुमितौ विपक्षव्यावृत्तः(त्तेः) कश्चनोपयोगोऽस्ति। कथम्? शब्दोऽनित्यः शब्दत्वात् इत्यत्रानुमानप्रयोगे सति अपरवादिना वक्तव्यम् - अयं सपक्षविपक्षव्यावृत्त इति कृत्वाऽसाधारणः। तदुपरि शब्दानित्यत्ववादिना वक्तव्यम् - यदि विपक्षव्यावृत्तस्तदा यत्रानित्यत्वाभावस्तत्र शब्दत्वाभाव इति व्यतिरेकव्याप्तिग्रहद्वारा विपक्षव्यावृत्त्या तवानुमितिः अनित्यत्वानुमितिर्भविष्यति यथा शब्दोऽनित्य इति। इत्यनित्यत्ववादिना उक्ते सति तद्दृष्टान्तेनैवासाधारण्यवादी दूषणं प्रयच्छति यथा विपक्ष-व्यावृत्त्या यत्र अनित्यत्वाभावस्तत्र [241 B] शब्दत्वाभाव इति व्यतिरेकव्याप्त्या साध्यानुमितिर्भविष्यति एवं सपक्षव्यावृत्त्या यत्र साध्यं साध्याभावाभावरूपमनित्यत्वं तत्र शब्दत्वाभाव इति साध्याभावव्यतिरेकव्याप्त्या साध्यानुमितिरपि कुतो न भवतीति प्रतिबन्दिविधया विपक्षव्यावृत्तत्वस्यापि परार्थानुमाने किञ्चित् प्रयोजनं तिष्ठतीति कृत्वा उक्तं स्वार्थानुमान इति।

अथ टीका। **असाधारणलक्षणे सर्वनिश्चितेति** टीका। सर्वाणि यानि निश्चितसाध्यवन्ति अथ च सर्वे ये विपक्षास्तद्व्यावृत्तत्वमित्यर्थः। साध्यवति सर्वविशेषणस्य कृत्यमाह - **तेनेति** टीका। यदि निश्चितसाध्य-वद्विपक्षमात्रवृत्तित्वमुच्यते तदा धूमादित्यत्रापि निश्चितसाध्यवदयोगोलकं(कः) तद्व्यावृत्तो धूमोऽथ विपक्ष-व्यावृत्तोऽपि भवतीति धूमोऽप्यसाधारणः स्यादित्यत उक्तम् - **सर्वसपक्षेति**। न हि धूमः सर्वेभ्यः सपक्षेभ्यो व्यावृत्तः। विपक्षस्थाने सर्वपदस्य कृत्यमाह - **विरुद्धेति**। यदि सर्वनिश्चितसाध्यवद्व्यावृत्तत्वं विपक्षव्यावृत्तत्व-मित्येवोच्यते तदा शब्दो नित्यः शब्दत्वादिति शब्दत्वं नित्येभ्यः सपक्षेभ्यो व्यावृत्तं विपक्षेभ्योऽपि घटादिभ्यो व्यावृत्तमिति सर्वविपक्षव्यावृत्तत्वं नास्ति शब्दत्वस्य विपक्षे शब्देऽपि वर्तमानत्वात्। अतो विरुद्धे शब्दत्वे-ऽतिव्याप्तिवारणाय सर्वपदं विपक्षेऽपि विशेषणम्। अत्राशङ्कते - **नन्विति** टीका। यदा शब्देऽनित्यत्वनिश्चयो नास्ति तदानीं सपक्षविपक्षव्यावृत्तत्वरूपमसाधारण्यमवतीर्णम्, तदानीं शब्दत्वे आप्तवाक्यात् अनित्यत्व-प्रतियोगिकव्यतिरेकव्यापकाभावप्रतियोगित्वग्रहः, यथा यत्र यत्र अनित्यत्वाभावस्तत्र तत्र शब्दत्वाभाव इति अनित्यत्वाभावस्य व्यापको योऽभावः शब्दत्वाभावस्तत्प्रतियोगि शब्दत्वमिति यदा व्यतिरेकव्याप्तिग्रहस्तदा

तत्र शब्दत्वेऽतिव्याप्तिः। तदानीं शब्दत्वं हेत्वाभासो न भवति अनुमितेर्जायमानत्वात्। लक्षणं सपक्षविपक्ष-व्यावृत्तत्वरूपं तत्राप्यस्तीत्यतिव्याप्तिरित्याशङ्कार्थः। समाधत्ते - **संशयविरोधी**ति। तथा च संशयविरोधि-विशेषदर्शनविरहकालीनसर्वसपक्षविपक्षव्यावृत्तत्वस्य विवक्षितत्वात्। एवं च साध्याभावव्यापकाभाव-प्रतियोगित्वलक्षणो यदा व्यतिरेकव्याप्तिग्रहोऽवतीर्णः उक्तरूपः तदानीं संशयविरोधिविशेषदर्शनविरह-कालीनसर्वसपक्षविपक्षव्यावृत्तत्वं नास्ति, अत्र तु साध्याभावव्यापकाभावे प्रतियोगिमत्त्वलक्षणं विशेषदर्शनं वर्तते इति न तत्रातिव्याप्तिः। यदि संशयविरोधीति पदं नोच्यते तदा विशेषदर्शनविरहकालीनसर्वसपक्ष-विपक्षव्यावृत्तत्वमसाधारण्यमित्युक्तौ असाधरण एवाव्याप्तिः। शब्दोऽनित्यः शब्दत्वादित्यसाधारणज्ञानकाले एव [242 A] हेतुज्ञानलक्षणविशेषदर्शनस्य विद्यमानत्वात्। यतः शब्दत्वज्ञानरूपो(पं) यत् विशेषदर्शनं तत् संशयविरोधि न भवति। कुतः? सपक्षविपक्षव्यावृत्तत्वज्ञानाभ्याम् उभयनिरूपितव्यतिरेकव्याप्तिग्रहे विद्यमानेऽपि संशयतादवस्थ्यात्। अत एव एकस्मिन्नेव उच्चत्वादियुक्ते धर्मिणि स्थाणुत्वव्याप्यवक्रकोटरादिमान् अयं पुरुषत्वव्याप्यकरादिमान् अयम् इत्युभयविशेषदर्शने विद्यमानेऽपि संशयतादवस्थ्यात्। कुत्रचिदधःप्रदेशे भ्रमाद् वक्रकोटरादिकं दृष्टम्, कुत्रचिदुपरिप्रदेशे भ्रमात् करादिकमपि दृष्टम् इत्युभयविशेषदर्शने सत्यपि स्थाणुर्वा पुरुषो वा इत्यादि संशयतादवस्थ्यम्, तद्वत् प्रकृतेऽपि सपक्षविपक्षव्यावृत्तत्वरूपविशेषदर्शने विद्यमानेऽपि यथाऽनित्यत्वाभावव्यापकाभावप्रतियोगिशब्दत्वम् अथवा नित्यत्वव्यापकाभावप्रतियोगि-शब्दत्वमिति विशेषदर्शने विद्यमानेऽपि शब्दोऽनित्यो न वेति संशयतादवस्थ्यात्। ततः संशयविरोधीति विशेषदर्शनविशेषणम्। संशयविरोधिविशेषदर्शनं किम्? आप्तवाक्यजन्यमनुकूलतर्कादिसहकृतं वा विशेषदर्शनं संशयविरोधि। अथवा पूर्वोक्तातिव्याप्तिनिराकरणार्थं समाधानान्तरमुद्भाव्य दूषयति - **हेत्वाभासत्वेने**ति टीका। तथा च शब्दोऽनित्यः शब्दत्वात् इत्यत्र आप्तवाक्यात् शब्दत्वे हेतौ अनित्यत्वाभावव्यापकाभाव-प्रतियोगित्वग्रहे जातेऽपि हेत्वाभासत्वं शब्दत्वे नास्तीति न तत्रातिव्याप्तिः। इदं मतं दूषयति - **पक्षान्तरे**ति। यदा शब्दो न पक्षः कृतः किन्तु घट एव पक्षीकृतो यथा घटोऽनित्यः शब्दत्वात् इति अत्रोक्तव्यतिरेक-व्याप्तिग्रहोऽवतीर्णः, आप्तवाक्यात् यत्रानित्यत्वाभावव्यापकाभावप्रतियोगिशब्दत्वमित्येतादृशे व्याप्तिग्रहे जातेऽपि घटे पक्षे शब्दत्वस्य स्वरूपासिद्धत्वमपि तिष्ठति। तथा च हेत्वाभासरूपविशेषणे दत्तेऽपि नाति-व्याप्तिपरिहारः। यतस्तत्र हेत्वाभासत्वमपि वर्तते सपक्षविपक्षव्यावृत्तत्वमपि तिष्ठति। असाधारणस्तु शब्दत्वं न भवति आप्तवाक्यात् व्याप्तेर्निर्णयात्। **तथा चे**ति टीका। यदा शब्देऽनित्यत्वनिश्चयो जातस्तदा सर्वसपक्ष-व्यावृत्तत्वमेव नास्ति पक्षस्यैव सपक्षत्वात् इति शब्दत्वे नातिव्याप्तिरित्यर्थः। व्याप्तिग्राहकमिति मूले शङ्कते - **नन्वि**ति टीका। व्याप्तिग्राहको यः सहचारग्रहः यथा यत्र शब्दत्वं तत्रानित्यत्वमिति, एतादृशसहचार-

ग्रहविघटकतया स्वतोऽसाधारण्यं दूषकं न भवति इति कृत्वा परमुखनिरीक्षकतयाऽसाधारणोऽपि हेत्वाभासो न स्यात् । यथा उपाधिः स्वतो दूषको न भवति । किन्तु व्याप्तिज्ञानकारणीभूतव्यभिचारज्ञानाभावरूपकारणविघटकतया [242 B] उपाधेर्दूषकत्वं न तु स्वतः, तद्वत् व्याप्तिज्ञानकारणीभूतसहचारज्ञानकारणविघटकतया परमुखनिरीक्षकत्वात् उपाधिवत् हेत्वाभासान्तरं न स्यादित्याशङ्कार्थः । समाधानमाह - **पूर्वपक्षिणे**ति । यः पूर्वपक्षी असाधारणं दूषयति तस्य तदिष्टमेव, मास्तु असाधारणो हेत्वाभासः । असाधारणव्यतिरेकेणापीति फक्किकां व्याचष्टे - **असाधारणे**ति टीका । न्यूनत्वेऽसाधारण्यं नोपजीव्यं यतोऽसाधारण्याभावेऽपि अप्रतिभादिनापि दृष्टान्तास्फुरणात् । यदा दृष्टान्तप्रयोगो न कृतस्तदापि न्यूनत्वसम्भवादित्यसाधारणस्य न्यूनत्वोपजीव्यं व्यभिचारीत्यर्थः । ननु व्यतिरेकिप्रयोगे इति मूलमनन्वितम् । कुतः ? पूर्वोक्तदूषणानुद्धारात् । कथम् ? व्यतिरेकिप्रयोगे जातेऽपि असाधारण्यं किमु(मि)त्युद्भावनीयं तत्रापि सपक्षव्यावृत्त्या दृष्टान्ताभावादेव न्यूनत्वसम्भवात् । न्यूनत्वेनैव निग्रहो भविष्यतीत्यत आह - **व्यतिरेकिप्रयोगे सम्पूर्ण** इति टीका । तथा च कथं न्यूनत्वं न भवतीत्यत आह - **तथा चे**ति टीका । सम्पूर्णता चान्वयदृष्टान्तेन वा भवति व्यतिरेकिदृष्टान्तेन वा भवति, तथा च व्यतिरेकिदृष्टान्तेन सम्पूर्णस्य जातत्वादित्यर्थः । तथा च न्यूनत्वाभावादसाधारण्यमेवोद्भावनीयमित्यर्थः । **अकिञ्चित्करत्वादि**ति । असाधारण्यस्य शब्दनिष्ठत्वस्य व्याप्तिपक्षधर्मतयोरप्रतिक्षेपे असाधारण्यज्ञाने विद्यमाने पक्षधर्मताविघटनाभावात् व्याप्तिज्ञानविघटनाभावाच्चासाधारण्यस्याकिञ्चित्करत्वम् । एतदेव व्याचष्टे - **तत्रे**ति टीका । असाधारणस्थले सहचारज्ञानविघटनद्वारापि न व्याप्तिग्रहप्रतिबन्धकत्वम्, अन्वयसहचारज्ञानाभावेनान्वयव्याप्त्यग्रहेऽपि व्यतिरेकसहचारात् व्यतिरेकव्याप्तिग्रहस्य जायमानत्वात् । **स्वार्थानुमान** इति टीका । **तथा चे**ति टीका । उभयव्यावृत्तत्वस्य सपक्षविपक्षव्यावृत्तत्वस्य कुत्राप्युपयोगो नास्ति स्वार्थानुमानपरार्थानुमानयोरुभयोरपि । यतः सपक्षव्यावृत्तेरन्वयसहचारज्ञानप्रतिबन्धकत्वात् दूषकत्वम्, विपक्षव्यावृत्तिस्तु नोभयसहचारज्ञानप्रतिबन्धिकेति न विपक्षव्यावृत्तिर्दूषणमिति पूर्वपक्षार्थः ।

**उच्यते । शब्दत्वं साध्यवतस्तदभाववतश्च निवृत्तत्वेन ज्ञातमर्थाद् व्यतिरेकितया वा पक्षे साध्यं तदभावं च साधयेत् [उभयोः] अविशेषात्, अन्यथा पक्षवृत्तित्वानुपपत्तिरिति साध्यतदभावोत्थापकतया स्वार्थानुमानेऽसाधारणो दोषः, सत्प्रतिपक्षे द्वौ हेतू तथा, अत्र त्वेक एवेति तयोर्भेदः । असाधारणेन व्यतिरेकिप्रयोगे परस्य सर्वसपक्षव्यावृत्तत्वमात्रमुद्भाव्यं साध्याभावोत्थापकत्वात् न तु विपक्षव्यावृत्तत्वमपि प्रतिकूलत्वात् व्यर्थत्वाच्च । यद्वा विपक्षव्यावृत्ततया साध्यमिव सपक्षव्यावृत्ततया**

**साध्याभावमपि साधयेदिति दृष्टान्ततया प्रतिबन्धितया वा तदुद्भावनमपि, लक्षणं तु सर्वसपक्षव्यावृत्तत्वं न तु विपक्षव्यावृत्तत्वमपि व्यर्थविशेषणत्वात्, विरुद्धमप्यनेनोपाधिना असाधारणमेव अन्यथैतदवगमे विरुद्धत्वाज्ञाने हेत्वाभासान्तरतापत्तेः ।**

अथ मूलम् । **उच्यते** इति । असाधारणस्य दूषकत्वं व्यवस्थापयति - **शब्दत्वमिति** मूलम् । शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वं (=हेतुः) साध्यं यदनित्यत्वं तद्वन्तो ये घटादयस्तेभ्यो व्यावृत्तम्, साध्याभाववदाकाशादयस्तेभ्योऽपि व्यावृत्तम् इति कृत्वा साध्यवद्व्यावृत्तं साध्याभाववद्व्यावृत्तमपि, साध्यवद्व्यावृत्तत्वेन ज्ञातं साध्याभाववद्व्यावृत्तत्वेनापि ज्ञातम् । तथा च किम् ? अर्थात् अर्थापत्त्या व्यतिरेकितया इति स्वमते । तथा च यदि साध्यवद्व्यावृत्तं तदा यत्र साध्यं तत्र हेत्वभाव [243 A] इति साध्याभावव्यापकाभावप्रतियोगित्वमत्त्वेन साध्याभावस्यानुमितिः किं वा विपक्षाद्व्यावृत्त इति कृत्वा यत्र साध्याभावस्तत्र हेत्वभाव इति व्यतिरेकव्याप्त्या साध्याभावव्यापकाभावप्रतियोगिमत्त्वेन हेतुना किं साध्यस्य वाऽनुमितिर्भविष्यति । साध्याभावस्य याऽनुमितिर्भविष्यति यथा यत्र साध्याभावस्य व्यतिरेको यत् साध्यं तस्य व्यतिरेकव्याप्त्या साध्याभाव इति । **उभयोरविशेषादिति** मूलम् । उभयोः साध्यसाध्याभावानुमितिसामग्र्योः एकत्र विशेषदर्शनाभावात् उभयसन्देहः तथा च साध्यसाध्याभावयोः परस्परानुमितिप्रतिबन्धात् नैकानुमितिः इति । असाधारणस्य साध्यतदभावानुमितिसामग्रीत्वात् परस्परविरुद्धानुमितिसामग्र्यां सत्यां सत्प्रतिपक्षवत् परस्परप्रतिबन्धात् नैकतरानुमितिरिति भावः । ननु साध्यवद्व्यावृत्तत्वं साध्याभाववद्व्यावृत्तत्वं चेत्युभयोर्न साध्यसाध्याभावसाधकत्वम् । कुतः ? शब्दवत् । यथा शब्दत्वे साध्यवद्व्यावृत्तत्वं तिष्ठति साध्याभाववद्व्यावृत्तत्वमपि तिष्ठति तद्वत् । आकाशेऽपि साध्यवद्व्यावृत्तत्वं साध्याभाववद्व्यावृत्तत्वं च तिष्ठति आकाशस्यावृत्तित्वात् । तथा चाकाशे साध्यसाध्याभाववद्व्यावृत्तत्वज्ञाने विद्यमानेऽपि आकाशे साध्यसाध्याभावानुमितिरित्यत आह - **अन्यथेति** मूलम् । वृत्तिमतो धर्मस्य साध्यवत्साध्याभाववदन्यतरवृत्तित्वनियमात् साध्यसाध्याभावोपस्थापकत्वम् । अयमाशयः । शब्दत्वे साध्यवद्व्यावृत्तत्वज्ञाने विद्यमाने साध्याभावनिरूपितव्यतिरेकव्याप्तिग्रहः, साध्याभाववद्व्यावृत्त[त्व]ज्ञाने विद्यमाने साध्यनिरूपितव्यतिरेकव्याप्तिग्रहः, उभयोर्व्यतिरेकव्याप्तिज्ञाने विद्यमानेऽपरानुमितिसामग्रीपक्षधर्मतामात्रमवशिष्टम्, तच्च यदि शब्दत्वे विद्यते तदाऽवश्यं साध्यं साधयिष्यत्येव, यदि च साध्यं न साधयेत् तदा साध्यसाधकसामग्रीविरह एव स्यात् । ततः प्रकृते व्याप्तेः सपक्षव्यावृत्ततया साध्याभावनिरूपिता व्यतिरेकव्याप्तिः, साध्याभाववद्व्यावृत्ततया साध्यनिरूपितव्यतिरेकव्याप्तिः । एवं चा(च) व्यतिरेकव्याप्तौ सिद्धायां यदनुमितिसामग्रीविघटनं तत् पक्षवृत्तित्वविलम्बादेव स्यादिति पक्षवृत्तित्वस्यैव

शब्दत्वेऽभावः स्यादित्यर्थः पुनरपि विविच्य लिख्यते । सर्वत्र व्यतिरेकिणि मर्यादेयं यतः साध्याभाववतो विपक्षात् हेतुश्चेद् व्यावृत्तस्तदा साध्याभाववति विपक्षे साध्याभावहेत्वभावयोर्यः सहचारग्रहः स साध्यव्यतिरेकव्याप्त्युपयोगी साध्यव्यतिरेकसहचारग्रहः, तादृशसाध्यव्यतिरेकसहचारग्रहानन्तरं साध्याभावव्यापकहेत्वभाव इति व्यतिरेकव्याप्तिग्रहानन्तरं साध्याभावव्यापकाभावप्रतियोगिमान् अयम् इति व्यतिरेकिपरामर्शः, तदनन्तरं साध्याभावो नास्तीति [243 B] व्यतिरेक्यनुमितिः । यथा पर्वतो वह्निमान् धूमात् इत्यत्र ह्रदो वह्न्यभाववान् भवति, तथा च वह्न्यभाववति ह्रदे यत्र वह्न्यभावस्तत्र धूमाभाव इति व्यतिरेकसहचारः, तादृशव्यतिरेकसहचारग्रहानन्तरं यत्र वह्न्यभावः तत्र धूमाभाव इति व्यतिरेकव्याप्तिग्रहानन्तरं वह्न्यभावव्यापका[भाव]प्रतियोगिधूमवान् अयम् इति परामर्शः, तदनन्तरमनुमितिर्जायतेऽत्र वह्न्यभाववान् नेति । तद्वत् प्रकृते शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वमनित्यात् घटात् सपक्षात् व्यावृत्तम्, विपक्षात् आकाशात् नित्यात् व्यावृत्तम्, एवंरूपेण शब्दत्वं व्यावृत्तं तिष्ठति । ततोऽनित्यत्वनित्यत्वयोर्भावाभावरूपता । नित्यत्वस्याभावोऽनित्यत्वम्, अनित्यत्वस्याभावो नित्यत्वम्, एवमुभयोः परस्पराभावरूपता । तथा च शब्दत्वं यदि अनित्येभ्यो घटादिभ्यः सपक्षेभ्यो व्यावृत्तं तदा यत्रानित्यत्वं तत्र शब्दत्वाभाव इत्ययं यः सहचारग्रहः स नित्यत्वस्य व्यतिरेकसहचारग्रहो यतोऽनित्यत्वस्य नित्यत्वाभावरूपत्वम् । तथा चायमेव नित्यत्वस्य व्यतिरेकसहचारः, तेन नित्यत्वव्यतिरेकसहचारेण एतादृशो व्याप्तिग्रहो जायते यथा शब्दत्वाभावोऽनित्यत्वव्याप्यः इति नित्यत्वव्यतिरेकव्याप्तिग्रहः तदनन्तरं यदि बाधसत्प्रतिपक्षादिरूपा विरोधिसामग्री नास्ति तदा नायमनित्य इति नित्य एव पर्यवसन्नः इति व्यतिरेक्यनुमितिः । एवं शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वं विपक्षात् नित्यात् आकाशादेः सकाशात् व्यावृत्तं चेत् तदाऽनित्यत्वव्यतिरेकव्याप्तिग्रहः यथाऽनित्यत्वाभाववान् विपक्षो नित्यो गगनादिः तस्मात् यदि व्यावृत्तं तदाऽनित्यत्वव्यतिरेकव्याप्तिग्रहः सिद्धः । कथम् ? यथा यत्र अनित्यत्वस्य व्यतिरेको नाम नित्यत्वं तच्चानित्यत्वविपक्षे नित्ये गगनादौ वर्तते तथा च यत्र नित्यत्वं तत्र शब्दत्वाभाव इत्यनित्यत्वव्यतिरेकसहचारात् नित्यत्वव्याप्यः शब्दत्वाभाव इति अनित्यत्वव्यतिरेकव्याप्तिग्रहो जायते । तदनन्तरमनित्यत्वाभावरूपं यत् नित्यत्वं तद्व्यापको योऽभावः शब्दत्वाभावः तत्प्रतियोगिमान् अयम् इति परामर्शात् नायं नित्य इत्यनित्यत्वानुमितिर्विरोधिसामग्र्यभावे जायते । एवमुक्तप्रकारेण शब्देऽनित्यत्वे साध्यमाने शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वं यदि अनित्यात् सपक्षात् व्यावृत्तं तदा नित्यत्वविपक्षात् व्यावृत्तम् । एवं पूर्वोक्तप्रकारेण नित्यत्वव्यतिरेकव्याप्तिग्रहः यदि अनित्यात् व्यावृत्तं तदेत्यर्थः । यदि चानित्यत्वविपक्षात् व्यावृत्तं तदा यत्रानित्यत्वाभावो नाम नित्यत्वं तत्र शब्दत्वाभाव इति अनित्यत्वविपक्षव्यावृत्त्याऽनित्यत्वव्यतिरेकव्याप्तिग्रहो जायते, तथा च नित्यत्वानित्यत्वयोः परस्परं भावाभावरूपतयाऽनित्यत्वस्य यः सपक्षः स नित्यत्वस्य विपक्ष

इति कारणात् शब्दत्वमनित्यात् सपक्षात् व्यावृत्तं तदा नित्यत्वविपक्षात् व्यावृत्तम् इयं नित्यत्वव्यतिरेकव्याप्तिग्रहसामग्री, अनित्यत्वविपक्षात् गगनादिभ्यः शब्दत्वं यदि व्यावृत्तं [244 A] तदा[ऽ]नित्यत्वव्यतिरेकव्याप्तिग्रहसामग्री, उभयव्यतिरेकव्याप्तिग्रहसामग्रीसमवधाने सति व्यतिरेक्यनुमानेन शब्दत्वमनित्यत्वं वा साधयेत् नित्यत्वं वेति सत्प्रतिपक्षोत्थापकतयाऽसाधारणं दोषः। अयमेव सत्प्रतिपक्षो यत्र द्वौ विरोधिपरामर्शौ। अत्र तु तौ स्तः यथाऽनित्यत्वाभावव्यापकाभावप्रतियोगिमान् अयमिति परामर्शो नित्यत्वानुमितिहेतुभूतः परामर्शः, द्वितीयस्तु नित्यत्वाभावव्यापकाभावप्रतियोगिमान् अयमिति तु अनित्यत्वानुमितिहेतुभूतः परामर्शः इति सत्प्रतिपक्षोत्थापकतयाऽसाधारणस्य दूषकत्वमिति वि[वे]केन प्रघट्टकार्थः। ननु यदि असाधारणस्य विरोधिपरामर्शोत्थापकतया दूषकत्वं तदा सत्प्रतिपक्षादस्य भेदो न स्यात्। सत्प्रतिपक्ष एवायं भवतु, सत्प्रतिपक्षेणापि विरोधिपरमर्शद्वयमेवोत्थाप्यते इत्यत आह - **सत्प्रतिपक्षे** इति मूलम्। यथा सत्प्रतिपक्षौ द्वौ हेतू - पर्वतो वह्निमान् धूमात्, पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् इति हेतुद्वयम्। अत्र तु असाधारणे शब्दत्वमेव एक एव हेतुः इत्यस्य तस्माद् भेदः। ननु सपक्षविपक्षव्यावृत्तत्वं चेदसाधारणत्वं तदा परार्थानुमाने पञ्चावयववाक्यरूपे विपक्षव्यावृत्तत्वं कथमुद्भावनीयं तस्य विपक्षव्यावृत्तत्वस्य प्रत्युत साध्यानुमित्यनुकूलत्वादित्यत आह - **असाधारणेनेति मूलम्**। तथा च परेणानित्यत्वानुमानवादिनं प्रति असाधारण्यदूषणदात्रा सपक्षव्यावृत्तत्वमात्रमुद्भावनीयम् न तु विपक्षव्यावृत्तत्वमपि तस्य प्रत्युतानुमित्यनुकूलत्वात्। तेन परार्थानुमाने सपक्षव्यावृत्तत्वमेवोद्भावनीयम् तावतैव दुष्टत्वात् तस्येति भावः। **प्रतिकूलत्वादिति**। अनुमितिदूषणवादिना अनुमित्यङ्गोद्भावने विपक्षव्यावृत्तत्वोद्भावने प्रतिकूलत्वमेव दूषणदातुरेवानिष्टापत्तिरित्यर्थः। दूषणान्तरमाह - **व्यर्थत्वादिति** मूलम्। अयमसाधकः सपक्षव्यावृत्तत्वादित्येव सार्थकम्। विपक्षव्यावृत्तत्वं तु स्वार्थानुमान एव सत्प्रतिपक्षोत्थापकतया दूषणम्। उक्तरीत्या सपक्षविपक्षव्यावृत्तत्वज्ञानाभ्यां सत्प्रतिपक्षपरामर्शद्वयमेव क्रियत इति तत्रैव विपक्षव्यावृत्तत्वं सार्थकम्। **यद्वेति मूलम्**। न हि मया विपक्षव्यावृत्तत्वमनुमानदूषणार्थमुद्भाव्यते किन्तु विपक्षव्यावृत्तत्वं दृष्टान्तीकृत्य यथाकाशे सपक्षव्यावृत्तत्वमेवोद्भाव्यते। यथा शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वमनित्यत्वाभाववद्गगनाद् व्यावृत्तं सत् यत्रानित्यत्वाभावस्तत्र शब्दत्वाभावः यथाकाशे इति व्यतिरेकव्याप्त्या शब्दे(ब्दत्वे)नानित्यत्वं साधनीयम् अनित्यत्वाभावव्यापकाभावप्रतियोगिमत्त्वात् [244 B]। शब्दत्वात् यथाऽनित्यत्वं साधनीयं तथाऽनित्याद् घटाद् व्यावृत्तं सत् यत्रानित्यत्वं तत्र शब्दत्वाभाव इति नित्यत्वस्याभावो यत् अनित्यत्वं तद् घटादिषु वर्तते तस्माद् व्यावृत्तं शब्दत्वं यत्रानित्यत्वं तत्र शब्दत्वाभाव इति नित्यत्वस्य व्यतिरेकव्याप्त्याऽनित्यत्वाभावव्यापकाभावप्रतियोगिशब्दत्ववान् अयम् इति परामर्शात् नित्यत्वस्यापि शब्दत्वे कथं न सिद्धिः व्यापकाभावे व्याप्याभावस्यावश्यंभावनियमात्। तस्माद् यथा

विपक्षव्यावृत्तत्वेन कृत्वा व्यतिरेकव्याप्त्या साध्यसाधनवत्सपक्षव्यावृत्त्या साध्याभावोऽपि कथं न साधनीयस्तुल्यांशत्वात् । साध्यांशे विपक्षव्यावृत्तत्वरूपसाधकवत् साध्याभावांशेऽपि सपक्षव्यावृत्तत्वरूपसपक्ष-(साधक)स्य विद्यमानत्वात् साध्याभावोऽपि तेन कथं [न] साधनीयः इति प्रतिबन्दि(न्धि)मुखेन विपक्षव्यावृत्तत्वमुद्भाव्यते। एतदेवाह - **सपक्षव्यावृत्ततये**ति मूलम्। ननु तर्हि यद्वेति पक्षे विपक्षव्यावृत्तत्वस्य दृष्टान्तमुखेनोद्भावनं तदा विपक्षव्यावृत्तत्वं प्रति वादिनाऽनुमानदूषणत्वेन नोद्भावनीयं स्यादित्यत आह - **लक्षणं तु** इति मूलम्। असाधारणस्य तु लक्षणमनुमानदूषणार्थं सपक्षव्यावृत्तत्वमात्रम् न तु विपक्षव्यावृत्तत्वं व्यर्थविशेषणत्वात् । दृष्टान्तार्थमेव विपक्षव्यावृत्तत्वमित्यर्थः । ननु सपक्षव्यावृत्तत्वमेव चेदनुमानदूषणं तदा विरुद्धोऽप्यसाधारणः स्यात् तस्यापि सपक्षव्यावृत्तत्वादित्यत आह - **विरुद्धमि**ति मूलम्। विरुद्धमनेनोपाधिना सपक्षव्यावृत्तत्वरूपोपाधिना असाधारणमेव तथा चेष्टापत्तिरित्यर्थः । यदि च विरुद्धः सपक्षव्यावृत्तत्वेनासाधारणो न भवति तदा तत्र बाधकमाह - **अन्यथे**ति मूलम्। एतदवगमे विरुद्धे सपक्षव्यावृत्तत्वरूपस्यावगमे विरुद्धस्य साध्याभावव्याप्तत्वरूपस्याज्ञाने सति अपि अनुमितिप्रतिबन्धात् षष्ठहेत्वाभासत्वापत्तिः । कुतः ? सपक्षव्यावृत्तत्वेन रूपेणासाधारणस्तु त्वया नोच्यते, साध्याभावव्याप्तत्वलक्षणं विरुद्धहेतुत्वं त्वया ज्ञातमेव नास्ति, तर्हि विरुद्धः को वा हेत्वाभासः स्यादित्यर्थः ।

अथ टीका। न तु अर्थादिति स्वमते लगति, अर्थापत्तेर्**नैयायिकमते** प्रमाणत्वानङ्गीकारादित्यत आह - **परमते** इति टीका। तथा च परमताभिप्रायेणेदमुक्तम् न तु स्वमताभिप्रायेणेत्यर्थः । ननु **प्राभाकरमते**ऽपि व्यतिरेक्यनुमानं नास्ति। कथं व्यतिरेकितयेत्युक्तमित्यत आह - **स्वमते** इति। ननु मूले यदुक्तं साध्यतदभावोत्थापकतयेति तदलग्नम् । कुतः ? असाधारणस्य किं सत्प्रतिपक्षोत्थापकतया दूषकत्वम्, किं वा विरुद्धव्याप्तिग्रहसामग्र्युत्थापनद्वारा दूषकत्वम्, किं वा परस्परव्याप्तिग्रहप्रतिबन्धकतया दूषकत्वम् ? यदि तस्य सत्प्रतिपक्षोत्थापकतया दूषकत्वं तदा साध्यतदभावोत्थापकतयेति न लगति, न हि सत्प्रतिपक्षे साध्यसाध्याभावोत्थापनं जायते [245 A]। साध्यसाध्याभावोत्थापनं नाम साध्यसाध्याभावानुमितिः, सा तु न जायते, किन्तु साध्यसाध्याभावानुमित्यनुकूलव्याप्तिपक्षधर्मतोपस्थितिरेव जायते। द्वाभ्यां परामर्शाभ्यां परस्परकार्यप्रतिबन्धात् नानुमितिः । द्वितीयपक्षेऽपि विरुद्धव्याप्तिग्रहसामग्र्युत्थापनद्वारापि [सा अनुमितिर्न जायते]। परस्परव्याप्तिग्रहप्रतिबन्धपक्षे साध्याभावोत्थापकत्वशङ्काऽपि नास्ति, व्याप्तिज्ञानमेव न जातम् कुतोऽनुमितिरित्यन्यथा व्याचष्टे - **साध्याभावे**ति टीका। तथा च साध्यसाध्याभावानुमितिं प्रति यदनुकूलं यद् व्यतिरेकव्याप्तिद्वयं स(त)त्सहितं यत् पक्षधर्मताज्ञानमनित्यत्वव्यापकाभावप्रतियोगिमान् अयं नित्यत्वव्यापकाभावप्रतियोगिमांश्चेति रूपम्, तज्ज्ञानविषयतयाऽसाधारणस्य दूषकत्वम्। व्याप्तिद्वयं च - यत्र अनित्यत्वं तत्र

शब्दत्वाभाव इत्येकं व्याप्तिज्ञानं साध्यनिरूपितव्याप्तिज्ञानं विपक्षव्यावृत्तत्वज्ञानेन जायते, द्वितीयं यत्र नित्यत्वं तत्र शब्दत्वाभाव इति सपक्षव्यावृत्तत्वज्ञानेन जायते। तथा च विरोधिपरामर्शलक्षणो यः सत्प्रतिपक्षस्तदुत्थापन-द्वाराऽसाधारणस्य दूषकत्वमिति भावः। अत्राशङ्कते - **न चैवमिति** टीका। तथा च यदि असाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषकत्वं तदा सत्प्रतिपक्षेऽसाधारणोद्भावनं न स्यात्। यथा सत्प्रतिपक्षे सत्प्रति-पक्षान्तरस्योद्भावनं नास्ति तद्वत् सत्प्रतिपक्षेऽसाधारणस्याप्युद्भावनं न स्यात्। असाधारणेनापि सत्प्रतिपक्ष एव कर्तव्यः। स च सत्प्रतिपक्षः स्थापनानुमाने सिद्ध एवास्ति इत्याशङ्कार्थः। समाधत्ते - **तदुद्भावनस्येति** टीका। सत्प्रतिपक्षे यथा सत्प्रतिपक्षोद्भावनं नास्ति तथाऽसाधारणेऽपि सत्प्रतिपक्षोद्भावनं नास्त्येवे[त्य]-त्रेष्टापत्तिरिति **साम्प्रदायिकाः**। अत्र **मिश्रमतेन** मूले दूषणमुद्भावयति - **अत्र वदन्तीति** टीका। मूलकारेणोच्यते - असाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषकत्वम्। तत्र वदन्ति - तस्य सत्प्रतिपक्षोत्थापकतया दूषकत्वं न सम्भवतीति। कुत इत्यत आह - **योऽनित्यत्वेति** टीका। असाधारणस्थले व्यतिरेकव्याप्तिग्रहः एतादृशः - यो नित्यत्वाभाववान् स शब्दत्वाभाववान्। अनित्यत्वे साध्ये नित्यत्वमेव विरुद्धम् तथा च विरोधिपरामर्श एतादृशो वक्तव्यः - नित्यत्वव्यापकाभावप्रतियोगि यच्छब्दत्वं तद्वान् अयमिति, परामर्शे नित्यत्वव्यापका-भावरूपो यः शब्दत्वाभावस्तस्याभावो यः शब्दत्वं तस्य निश्चयोऽवश्यं वक्तव्यः, अन्यथा शब्दत्वस्य पक्षधर्मताया अग्रहे व्याप्तिपक्षधर्मताज्ञानाभावे परामर्श एव कथं स्यादिति। शब्दत्वाभावरूपं यद् व्यापकं तदभावो यत् शब्दत्वं तस्य निश्चयोऽवश्यं वक्तव्यः। ततः किमित्यत आह - **नित्यत्वाभावरूपस्येति** टीका। नित्यत्वाभावरूपस्य व्याप्यस्य। तथा च यत्र यत्र नित्यत्वाभावोऽनित्यत्वं तत्र तत्र शब्दत्वाभाव इत्यत्र व्यापकः शब्दत्वाभावः व्याप्यस्तु नित्यत्वाभावः, ततो व्यापकाभाववत्तया निश्चिते [245 B] व्याप्यस्य यः सन्देहः स व्यभिचारसन्देहः, ततः सन्दिग्धानैकान्तिकस्य विद्यमानत्वात् कथं व्यभिचारसन्देहे व्याप्तिग्रहः स्यात् व्याप्तिग्रहाभावे च सत्प्रतिपक्षोत्थापनमपि कथं स्यात्? यथा प्रकृते शब्दोऽनित्यः शब्दत्वात् इत्ययम-साधारणः, अनेनासाधारणेन सत्प्रतिपक्षोत्थापनं कर्तव्यम्, तच्च कीदृशम्? शब्दोऽनित्यः शब्दत्वात् अत्र सत्प्रतिपक्षो यथा शब्दः नित्यः शब्दत्वात् इत्यत्र नित्यत्वमनित्यत्वाभावरूपं साधनीयम्, तथा च शब्दः नित्यः शब्दत्वात् इति सत्प्रतिपक्षे एतादृशो व्यतिरेकव्याप्तिग्रहः - तथाहि यत्र यत्र नित्यत्वाभावो नामाऽनित्यत्वं तत्र शब्दत्वाभाव इति। व्यतिरेकव्याप्तिग्रहोऽनित्यत्वानुमाने यः सपक्षो घटादिकं तस्मात् शब्दत्वस्य व्यावृत्तत्वज्ञानाद् भविष्यति। कथम्? नित्यत्वाभावो वर्तते घटे तस्मात् शब्दत्वं व्यावृत्तमिति कृत्वा यत्र नित्यत्वाभावस्तत्र शब्दत्वाभाव इति व्याप्तिग्रहो भवतीति वक्तव्यम्। स च न सम्भवति। कुतः? पक्षीय-व्यभिचारज्ञानस्य प्रतिबन्धकत्वात्। कथम्? शब्दत्वाभावो नित्यत्वाभावस्य व्यापकः, तस्य व्यापकस्य

शब्दत्वाभावस्याभावः शब्दत्वम्, तत् शब्दे निश्चितं वर्तते । अथ च व्याप्यो यो नित्यत्वाभावो नाम अनित्यत्वम्, तच्च पक्षे सन्दिग्धमिति कृत्वा पक्षे व्यभिचारसन्देहस्य विद्यमानत्वात् न व्याप्तिग्रहः सत्प्रतिपक्षानुमाने सन्दिग्धानैकान्तिकदूषणग्रस्तत्वात् इति भावः । अथ पक्षीयो व्यभिचारसन्देहो न व्याप्तिग्रहप्रतिबन्धक इत्याशयेन शङ्कते - **न चानुमान** इति टीका । यदि च पक्षीयोऽपि व्यभिचारसन्देहो दूषणं स्यात् तदाऽनुमानमात्रोच्छेदः स्यात् । पर्वतो वह्निमान् धूमात् इत्यत्र पक्षे साध्यात्यन्ताभाववद्वृत्तित्वस्य सन्देहो वर्तत एव धूमवत्तया निश्चिते पर्वते वह्नेः सन्देहात् । तथा च व्यभिचारस्य दलद्वयम् - एकं साध्याभाववत्त्वरूपम्, द्वितीयं च साध्याभावाधिकरणे हेतोर्विद्यमानत्वलक्षणं दलम् । तन्मध्ये हेतोर्विद्यमानत्वलक्षणं यद् दलं तन्निश्चितं साध्याभावाधिकरणत्वलक्षणं यद् दलं तच्च सन्दिग्धमिति कृत्वा सन्दिग्धव्यभिचारः स पक्षीयो यथा न दूषणं तथा शब्दे पक्षे शब्दत्वाभावाभावरूपं यत् शब्दत्वं तद्वत्तया निश्चिते शब्दे यो नित्यत्वाभावस्य सन्देहः सोऽपि पक्षीयो व्यभिचारसन्देहो भवतीति सोऽपि न दूषणमित्याशङ्कार्थः । इदं दूषयति - **तावतापी**ति टीका । द्विविधो हि पक्षीयो व्यभिचारसन्देहः - एको व्यापकाभाववत्तया निश्चिते व्याप्यसन्देहः, द्वितीयो व्याप्यवत्तया निश्चितव्यापकसन्देहः । प्रथमो यथा यत्र धूमस्तत्र वह्निरिति व्याप्तौ व्यापको वह्निस्तदभाववत्तया निश्चिते ह्रदे यदि धूमसन्देहस्तदा आद्यः । द्वितीयस्तु धूमवत्तया निश्चिते पर्वते यो वह्न्यभावसन्देहः । तत्र द्वितीयस्य प्रतिबन्धकत्वाभावेऽपि आद्यस्य व्यापकाभाववत्तया निश्चिते व्याप्यसन्देहरूपस्यावश्यं प्रतिबन्धकत्वम् । अन्यथा वह्न्यभाववत्तया निश्चिते ह्रदे धूमस्य [246 A] वृत्तित्वसन्देहः स्वो(सो)ऽप्यनुमितिप्रतिबन्धको न स्यात् । तथा च व्यापकाभाववत्तया निश्चिते व्याप्यसन्देहोऽवश्यं प्रतिबन्धको भवत्येव । तथा च प्रकृते सत्प्रतिपक्षानुमाने शब्दो नित्यः शब्दत्वात् इतिरूपे व्याप्यो नित्यत्वाभावः, तस्य व्यापकः शब्दत्वाभावः, तदभावो यः शब्दत्वं तद्वत्तया निश्चिते शब्दे नित्यत्वाभावरूपस्य व्याप्यस्य यः सन्देहः स प्रतिबन्धको भवत्येव । एतदेवाह - **व्यापकाभाववत्तया निश्चिते** इति टीका । तथा च व्यापकाभाववत्तया निश्चिते पक्षे व्याप्यसन्देहस्तु अवश्यं प्रतिबन्धको भवत्येव । तथा च शब्दोऽनित्यः शब्दत्वात् इत्यत्र व्यापकः शब्दत्वाभावः तदभावः शब्दत्वं तद्वत्तया शब्दत्ववत्तया निश्चिते शब्देऽनित्यत्वाभावरूपस्य व्याप्यस्य सन्देहस्य विद्यमानत्वात् तथा कथं शब्दत्वनित्यत्वयोः सत्प्रतिपक्षानुमानव्याप्तिग्रहः स्यात् । अत्राशङ्कते - **न चैवमि**ति टीका । यदि व्यापकाभाववत्तया निश्चिते व्याप्यसन्देहो प्रतिबन्धकस्तदा व्यतिरेकिणोऽनुमितिर्न स्यात् । तथाहि यत्र इतरभेदाभावस्तत्र पृथिवीत्वाभाव इति व्यतिरेकव्याप्तिग्रहो न स्यात् । कुतः ? अत्र इतरभेदाभावो व्याप्यः पृथिवीत्वाभावो व्यापकः तथा च व्यापकस्य पृथिवीत्वाभावस्याभावः पृथिवीत्वं तस्य पृथिव्यां निश्चयात् व्याप्यस्य इतरभेदाभावस्य सन्देहात् । पृथिव्यामितरभेदाभावः सन्दिग्धः पृथिवीत्वस्य निश्चय इत्यनेन प्रकारेण

व्यतिरेकिण उच्छेदः स्यात्। कुत इत्यत आह - **सर्वत्रेति** टीका। तथा च सर्वत्र व्यतिरेकिणि व्यापको यो हेत्वभावस्तस्याभावः पृथिवीत्वं तद्रूपो यो हेतुः तस्य निश्चयो वर्तते। पक्षे पृथिव्यामितरभेदाभावरूपव्याप्याभावस्य सन्देहात् सन्दिग्धानैकान्तिकत्वं व्यभिचारसन्देहः, व्यापकाभावरूपो यो हेतुस्तन्निश्चये व्याप्याभावरूपो य इतरभेदाभावस्तस्य सन्देहात् सन्दिग्धानैकान्तिकत्वम्, तल्लक्षणमुक्तरूपम्। शङ्कां दूषयति - **यत्रेति** टीका। यद्यपि व्यतिरेकिणि तादृशः सन्देहः व्यापकाभाववत्तया निश्चिते व्याप्यसन्देहः सन्दिग्धव्यभिचारः प्रतिबन्धको भवत्येव तथापि यत्र यत्र व्यतिरेकिस्थले तर्कावतारो जातः यथा यदि पृथिवीत्ववति इतरभेदाभावः स्यात् तत्रा(दा) तत्र पृथिवीत्वमपि न स्यात् इति तर्केण [तत्र तत्र] सन्दिग्धानैकान्तिकस्य निवारणात् तेन तादृशतर्कावतारेण व्यभिचारसन्देहो(हे) निरस्तै(स्ते)ऽनुमितेः सुखेन सम्भव इत्यर्थः। समाधानान्तरमाह - **यस्येति** टीका। यस्य व्यतिरेकिणोऽप्रसिद्धमेव साध्यं सिध्यति तत्र साध्याज्ञाने साध्याभावरूपस्य व्याप्यस्य सन्देहो(हा)भावात् कथं व्यभिचारसन्देहः स्यादित्यर्थः। तथा च व्यभिचारसन्देहाभावात् व्यतिरेकिणि नानुमितौ किञ्चित् प्रतिबन्धकमिष्यते इति भावः। अत्राशङ्कते - **न चात्रापीति** टीका। तथा च यथा व्यतिरेकिणि तर्कावतारेण [246 B] व्यभिचारसन्देहे निरस्ते व्यतिरेक्यनुमितिर्जायते तद्वत् अत्रापि असाधारणस्थले तर्कावतारेण यथा यदि शब्दत्ववत्यपि नित्यत्वाभावोऽनित्यत्वं स्यात् तदा शब्दे शब्दत्वमेव न स्यात् इति तर्केण व्यभिचारज्ञाने निरस्ते नित्यत्वाभावस्य शब्दत्वाभावस्य च व्यतिरेकसहचारे यत्र यत्र नित्यत्वाभावस्तत्र तत्र शब्दत्वाभाव इति रूपेण व्यतिरेकव्याप्तेर्ग्रहो भविष्यति इति असाधारणेऽपि विरुद्धव्याप्तिग्रहे सति सत्प्रतिपक्षावतारो भविष्यत्वेवेत्याशङ्कार्थः। समाधत्ते - **एककोटीति** टीका। यदि उभयविरुद्धव्याप्तिग्रहानुकूलसामग्रीसमवधाने एकत्रानुकूलतर्कावतारस्तिष्ठति तदा उत्तरनित्यत्वानुमितौ जातायां पूर्वानुमानस्य दुर्बलत्वात् सत्प्रतिपक्ष एव न सम्भवति। स एव हि सत्प्रतिपक्षो यत्रोभयानुमानं तुल्यबलं भवति, तत्रैव परस्परकार्यप्रतिबन्धेन सत्प्रतिपक्षता भवति। ततोऽसाधारणस्य सत्प्रतिपक्षोत्थापकत्वं नास्तीति भावः। यदि चोत्तरानुमानेऽनुकूलतर्कावतारो नास्ति तदा सव्यभिचारज्ञानेन व्याप्तिप्रतिबन्धे कृते कुतः तस्य सत्प्रतिपक्षत्वम्। अतः पक्षीयोऽपि व्यभिचारसन्देहो व्याप्तिग्रहप्रतिबन्धक इत्यत्र **मूलकारसम्मतिमाह** - **अत एवेति** टीका। तथा च शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दस्य पक्षतादशायां साध्यतदभावयोरनिश्चयात् असाधारणस्य दोषत्वम्। एतावता पक्षीयोऽपि साध्यव्यभिचारो व्याप्तिग्रहप्रतिबन्धको भवत्येव। अन्यथा पक्षतादशायां साध्यतदभावानिश्चयेनेति किमर्थमुक्तं स्यात् इत्यर्थः। **मूलकारस्यायमभिप्रायः** पक्षे साध्यसन्देहस्य साध्याभावव्यापकाभाववत्तया निश्चिते व्याप्यसन्देहस्य प्रतिबन्धकत्वात्। ननु भवतु व्यापकाभाववत्तया निश्चिते व्याप्यसन्देहस्य प्रतिबन्धकत्वम्, तथाप्युभयत्र नित्यत्वपक्षेऽनित्यत्वपक्षे चोभयत्रापि तर्कावतारात् उभय-

व्यभिचारज्ञाने निरस्ते उभयत्र विरुद्धव्याप्तिपक्षधर्मताज्ञानेऽवतीर्णे सत्प्रतिपक्षावतार उभयोः समानबलत्वात् भविष्यति, ततः सिद्धमसाधारणस्य सत्प्रतिपक्षोत्थापकत्वमेव दूषकताबीजमित्यत आह - **किञ्चैवमिति** टीका। तथा च हेत्वाभासानां यो भेदः स दूषकताबीजभेदादेव यथा साधारणविरुद्धयोः, साधारणस्याव्यभिचारज्ञान-विघटनद्वारा विरुद्धस्य च सहचारज्ञानविघटनद्वारा। तद्वत् असाधारणस्य सत्प्रतिपक्षस्य च भेदो वक्तव्यः, स च दूषकताबीजभेदो नास्ति, तत्र सत्प्रतिपक्षे विरुद्धव्याप्तिपक्षधर्मताज्ञानमसाधारणेऽपि विरुद्धव्याप्तिपक्ष-धर्मताज्ञानम्। तथाहि - यथा शब्दोऽनित्यः शब्दत्वात् शब्दो नित्यः व्योमैकविशेषगुणत्वात् इति सत्प्रतिपक्षेऽ-नित्यत्वव्याप्यशब्दत्ववान् अयम् अथवा नित्यत्वव्याप्यव्योमैकविशेषगुणवान् अयम् इति वा [247 A] सत्प्रतिपक्षो विरुद्धव्याप्तिपक्षधर्मताज्ञानद्वयात्मा। असाधारणे तु शब्दोऽनित्यः शब्दत्वात् इत्यत्र अनित्यत्वा-भावव्यापकाभावप्रतियोगिमान् अयं नित्यत्वाभावव्यापकाभावप्रतियोगिमान् अयम् इति विरुद्धव्यतिरेक-परामर्शद्वयात्मा [असाधारणः] यतोऽत्र शब्दत्वस्य सपक्षविपक्षव्यावृत्तत्वमुभयं वर्तते। तत्र विपक्षव्यावृत्तत्वं साध्यव्यतिरेक्यनि(नु)मित्यनुकूलः साध्यव्यतिरेकपरामर्शः, सपक्षव्यावृत्तत्वं विद्यतेऽतः तेन साध्याभावव्यति-रेक्यनुमित्यनुकूलः साध्याभावव्यतिरेकपरामर्शः। तत्र प्रथमद्वितीयावप्युक्तरूपौ द्वावपि परामर्शौ परस्परानुमिति-प्रतिबन्धकौ सत्प्रतिपक्षावेव। साध्यव्यतिरेकपरामर्शस्तु अनित्यत्वाभावव्यापकाभावप्रतियोगिमान् अयम्। यथाऽन्वयव्याप्त्यभावात् व्यतिरेकसहचारात् व्यतिरेकव्याप्तिग्रहो यथा यत्र अनित्यत्वाभावस्तत्र शब्दत्वाभावः व्याप्तिस्तु इयमेव शब्दत्वाभावोऽनित्यत्वाभावव्याप्य एवेति, तदनन्तरमनित्यत्वाभावव्यापकाभावप्रतियोगिमान् अयम् इति परामर्शो जायते, इदं विपक्षव्यावृत्तत्वेन यतोऽनित्यत्वस्य विपक्ष आकाशादिस्ततः शब्दत्वस्य व्यावृत्तत्वात् प्रथमः परामर्शः। द्वितीयस्तु परामर्शः सपक्षव्यावृत्तत्वेन, यथा शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वस्य अनित्यात् घटादेः सपक्षात् व्यावृत्तत्वं वर्तते, तदाऽनित्यत्वस्य यः सपक्षो घटादिः स नित्यत्वस्य साध्याभावस्य विपक्षः, ततः साध्याभावेऽपि व्यतिरेकसहचारात् व्यतिरेकव्याप्तिग्रहो यथा यत्र अनित्यत्वाभावो नाम नित्यत्वं तत्र शब्दत्वाभावो यथा घटे इति, व्यतिरेकसहचारात् शब्दत्वाभावोऽनित्यत्वव्याप्यः इतीदं साध्याभावव्यतिरेकव्याप्तिज्ञानम्, ततोऽनित्यत्वव्यापकाभावप्रतियोगिमान् अयम् इति द्वितीयः साध्या-भावव्यतिरेकपरामर्शः। ततोऽयं शब्दत्वहेतुर्विरुद्धपरामर्शद्वयात्मा सत्प्रतिपक्ष एव, न तु असाधारणो हेत्वा-भासान्तरम्। ततोऽसाधारणस्य सत्प्रतिपक्षात् भेदो नास्ति इति कृत्वाऽसाधारणः सत्प्रतिपक्षात् भिन्नो नास्तीत्युक्तं किञ्चैवमित्यारभ्य भेदो न स्यादित्यन्तेन ग्रन्थेन। ननु सत्प्रतिपक्षौ(क्षे) द्वौ हेतू असाधारणे त्वेक एव हेतुरिति सत्प्रतिपक्षात् भेदोऽस्य भविष्यतीत्यत आह - **हेतुभेद** इति टीका। तथा च न हि हेतुभेदमात्रं दूषकताबीजम्। न हि हेतुभेदमात्रेण तत्र सत्प्रतिपक्षता हेत्वैकत्वेन त्वसाधारणतेति। ततो हेतुभेदमात्रेण हेत्वैक्येन च किमित्यत

आह - **तावतापीति** टीका । तथा च सत्प्रतिपक्षे द्वौ हेतू एकोऽसाधारणे चेत् हेतुरिति विरोधिपरामर्शद्वयं चोभयत्रावशिष्टं तदाऽसाधारणः सत्प्रतिपक्षविशेषः स्यात् न तु हेत्वाभासान्तरमित्यर्थः । अत्राशङ्कते - [247 B] **न चेति** टीका । उभयपरामर्शविषयतापन्नं प्रतिसाधनं सत्प्रतिपक्षः । उभयोः परामर्शयोः विषयतापन्नमेकं साधनं तस्य प्रतिकूलं साधनं प्रतिसाधनम् । यथा शब्दोऽनित्यः श्रोत्रग्राह्यत्वात् शङ्खादिध्वनिवत्, स च सर्ववादिनामनित्य एव वर्णात्मकस्तु नित्यः इत्यत्र एकः परामर्शः अनित्यत्वव्याप्यश्रोत्रग्राह्यत्ववान् अयम् । द्वितीयस्तु - शब्दो नित्यः अनित्यविशेषगुणासमानाधिकरणविभुविशेषगुणत्वात् ईश्वरज्ञानादिवत् इति, अस्मदाद्यनित्यज्ञाने व्यभिचारवारणायानित्यविशेषगुणासमानाधिकरणेति पदम्, अस्मदादिज्ञानम् अनित्यविशेषगुणाः सुखादयः तैः समानाधिकरणमिति तद्व्युदासः, अत्रान्वयव्याप्तिग्रह ईश्वरज्ञाने, तत ईदृशः परामर्शः नित्यत्वव्याप्यानित्यविशेषगुणासमानाधिकरणविभुविशेषगुणत्ववान् अयम् इति । सत्प्रतिपक्षे हेतुभेदः । असाधारणे तु शब्दोऽनित्यः शब्दत्वात् इत्यत्रान्वयदृष्टान्ताभावेनानित्यत्वव्यापकाभाव-प्रतियोगिशब्दत्ववान् अयम् इति परामर्शो विपक्षव्यावृत्तत्वेनेत्येकः, द्वितीयस्तु सपक्षव्यावृत्तत्वेन अत्रापि अन्वयदृष्टान्ताभावात् नित्यत्वाभावव्यापकाभावप्रतियोगिशब्दत्ववान् अयम् इति । एतावताऽयमसाधारणः सत्प्रतिपक्षविशेष एव स्यात्, न तु स्वतन्त्रो हेत्वाभासः । तथा च विरोधिपरामर्शविषयत्वं सत्प्रतिपक्षे दूषकताबीजम्, असाधारणे च सपक्षविपक्षव्यावृत्तत्वज्ञानमिति भिन्नमेव दूषकताबीजमिति भिन्नो हेत्वाभासोऽसाधारणः । नन्वसाधारणे सपक्षविपक्षव्यावृत्तत्वं चेत् दूषकताबीजं तदा कथं सपक्षविपक्षव्यावृत्तत्वज्ञान-मात्रमनुमितिप्रतिबन्धकं स्यादित्यत आह - **तज्ज्ञानस्येति** । तथा च तज्ज्ञानस्य सपक्षविपक्षव्यावृत्तत्वज्ञानस्य या दूषकता सा तज्ज्ञानस्य सपक्षविपक्षव्यावृत्तत्वज्ञानस्य व्यतिरेकोभयसहचारग्रहरूपतया । कोऽर्थः ? विपक्षव्यावृत्तत्वज्ञानं यत् वर्तते तत् साध्यव्यतिरेकसहचारग्रहरूपम् यथा यत्रानित्यत्वाभावस्तत्र शब्दत्वा-भावः यथा गगने । एवं सपक्षव्यावृत्तत्वज्ञानं यत् वर्तते तत् साध्याभाव्यतिरेकसहचारग्रहरूपं भवति, यथा यत्रानित्यत्वं तत्र शब्दत्वाभाव इति साध्याभावव्यतिरेकसहचाररूपं भवति । तथा चोभाभ्यां सहचारग्रहाभ्यामुभयविरोधिपरामर्शौ द्वौ उत्पद्येते इति विरोधिपरामर्शोत्थापनद्वारा असाधारणस्य दूषकत्वम् । तथा च सत्प्रतिपक्षे विरोधिपरामर्शद्वयं दूषकताबीजम्, असाधारणे तु सपक्षविपक्षव्यावृत्तत्वज्ञानं दूषकता-बीजम् इति दूषकताबीजभेदात् अवश्यं सत्प्रतिपक्षासाधारणयोर्भेद इति [248 A] उभयत्राप्यनुमितिप्रति-बन्धकत्वसाम्येऽपि एतद्रूपेण भेदः । साध्या(ध्य)साध्याभावोपस्थापकत्वानै(न्नै)का अनुमितिरिति भावः । एतत्पर्यन्तं न चोभयपरा[म]शे(र्शे)त्यारभ्य सत्प्रतिपक्षासाधारणयोर्दूषकताभेदनिरूपणं कस्यचिन्मतभेदेन दर्शितम्, इदं मतं दूषयितुमाह - **एवं हीति** टीका । यदि असाधारणस्य विरोधिपरामर्शोत्थापकतया दूषकत्वं

तदा व्यभिचारोत्थापकोपाधिवत् परमुखनिरीक्षकत्वमेव स्यात् । यथोपाधेः साध्यव्यापकत्वसाधनाव्यापकत्वज्ञाने विद्यमानेऽनुमितिप्रतिबन्धोऽपि नास्ति न वानुमितिकारणं विद्यते किन्तु व्यभिचारोत्थापकतया दूषणम्, तथा च यावत्पर्यन्तं व्यभिचारो नोत्थापितस्तावत्पर्यन्तमुपाधेर्न दूषकत्वम्, एवमुपाधेः परमुखनिरीक्षकतया न हेत्वाभासत्वम्, एवमसाधारणेनापि यदि यावत्पर्यन्तं सपक्षविपक्षव्यावृत्त(त्व)ज्ञाने विद्यमानेऽपि विरोधिपरामर्शो नोत्थापितस्तावत्पर्यन्तमेतस्य न दूषकत्वम्, तेन विरोधिपरामर्शो यदोत्थाप्यते तदैव दूषणमिति परमुखनिरीक्षकत्वात् हेत्वाभासत्वमेवास्य नास्तीति क्व अन्तर्भावबहिर्भावादिचिन्ता । दूषणान्तरमाह - **किञ्चेति** टीका । तथा च अनेन असाधारणेन विरोधिपरामर्श एतादृश उद्भावनीयः यः प्रथमो विपक्षव्यावृत्तत्वज्ञानेन क्रियते नित्यत्वव्यापकाभावप्रतियोगिमान् अयम् इति अनित्यत्वानुमित्यनुकूल एव । द्वितीयस्तु अनित्यत्वस्य व्यापकोऽयमभावः शब्दत्वाभावस्तत्प्रतियोगिमान् अयम् अनेनानित्यत्वाभावः साध्यते स च प्रतिकूल एव । तथा चानित्यत्वव्यापकाभावप्रतियोगिमान् अयम् इत्यस्यैव परामर्शस्योत्थापनद्वारा दूषकता वक्तव्या । सापि न सम्भवति । अनित्यत्वव्यापकाभावप्रतियोगिमत्त्वज्ञानं तु विरुद्धत्वज्ञानमेव । यतः साध्याभावो यो नित्यत्वं तद्व्याप्यशब्दत्ववान् अयम् इति परामर्शो न सम्भवति यतः साध्याभाववतो हेतोर्व्यावृत्तत्वात् किन्तु व्यतिरेकपरामर्श एव, तथा चानित्यत्वव्यापकाभावप्रतियोगिमान् अयम् इति परामर्शः साध्याभावस्यैवेति विरुद्धत्वम् । ततो विरुद्धे एव असाधारणस्यान्तर्भावः । दूषणान्तरमाह - **अपि चेति** टीका । यदि असाधारणे सपक्षविपक्षव्यावृत्तत्वज्ञानमपि वक्तुमशक्यम् । तदेवाह - यतो वृत्तिमतो धर्मस्य साध्यतदभावान्यतरवृत्तित्वनियमात् । अयमर्थः - यो धर्मो वृत्तिमान् तस्य साध्यतदभावोभयव्यावृत्तत्वमसम्भवि विरोधात् तयोः । एतदेव विवृणोति - **वृत्तिमत्त्वेनेति** । यदि तस्य शब्दत्वादेर्धर्मस्य वृत्तिमत्त्वनिश्चयः तदा साध्यतदभावान्यतराधिकरणवृत्तित्वनिश्चयः, न तु उभयाधिकरणव्यावृत्तत्वज्ञानम् । यथा घटो यदि वह्निमति न वर्तते तदाऽवश्यं वह्न्यभावाधिकरणे वर्तते, यदि च स वह्न्यभावाधिकरणे न वर्तते तदा वह्निमति अवश्यं वर्तते इति । इदमुपसंहरति - **सपक्षविपक्षव्यावृत्तत्वस्य चेति** । [248 B] एकत्र असाधारणे साध्यतदभाववद्व्यावृत्तत्वज्ञानं वा दूषकताबीजं किं वा सपक्षविपक्षव्यावृत्तत्वज्ञानं वा ? आद्यं तु वृत्तिमतो धर्मस्य ग्रहीतुमशक्यमेवोक्तरीत्या । द्वितीयं तु सपक्षविपक्षव्यावृत्तत्वज्ञानं सपक्षत्वविपक्षत्वे च साध्यतदभावनिश्चयगर्भे तथा च सपक्षविपक्षव्यावृत्तत्वे च वृत्तिमतो धर्मस्य ग्रहीतुं शक्ये तथापि तयोः सपक्षविपक्षव्यावृत्तयोः विरोधाभावात् विरोधिपरामर्शद्वयं ताभ्यामुत्थापयितुं न शक्येते(क्यते) । यतोऽनयोः सपक्षव्यावृत्तत्वविपक्षव्यावृत्तत्वयोर्विरोधो नास्ति एकस्मिन् धर्मिण्युभयोः सम्भवात् । अयमर्थः - यः पक्षवृत्तिर्धर्मो हेतुरूपः सन्निश्चितसाध्यवतः सपक्षात् व्यावृत्तः निश्चितसाध्याभाववद्रूपविपक्षादपि व्यावृत्तः, अतस्तृतीयः प्रकारोऽप्यस्ति इति कृत्वा

विरोधो नास्ति सपक्षविपक्षव्यावृत्तत्वस्य सत्त्वात् । **विरुद्धे**ति टीका । विरुद्धयोर्यो व्याप्तिग्रहो यथा नित्यत्व-नित्यत्वाभावा(व)साधकयोर्विरुद्धयोर्यो व्याप्तिग्रहः स पक्षान्तर्भावेन वक्तव्यः । अयमाशयः - विरुद्धव्याप्ति-पक्षधर्मताज्ञानद्वयं हि सत्प्रतिपक्षः, तथा पक्षे विरुद्धव्याप्तिपक्षधर्मताज्ञानद्वयं वक्तव्यम्, तच्च द्वयं याभ्यां सपक्षविपक्षव्यावृत्तिहेतौ निश्चितसाध्यवद्व्यावृत्तत्वमप्यस्ति निश्चितसाध्याभाववद्व्यावृत्तत्वमप्यस्ति ततोऽनयोः सपक्षव्यावृत्तत्वविपक्षव्यावृत्तत्वयोर्विरोध एव नास्तीति कथमनयोः सत्प्रतिपक्षोत्थापकत्वम्, यतः तच्च विरुद्धव्याप्तिपक्षधर्मताज्ञानद्वयं तद्धि यन्मूलकं तयोर्विरोधो वक्तव्यः, तच्च सपक्षविपक्षव्यावृत्तत्वमूलकम्, तयोश्च विरोधी(धा)भावात् एकस्मिन् पक्षवृत्तिहेतौ द्वयोः सत्त्वात् न सत्प्रतिपक्षोत्थापकत्वमिति स्पष्टोऽर्थः । एतावताऽसाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषकत्वं निरस्तम् । पुनरत्रैवार्थे दूषणमाह - **सत्प्रतिपक्षे चे**ति । तथा च यदि असाधारणस्य सत्प्रतिपक्षोत्थापकत्वेन दूषकत्वं तदा सत्प्रतिपक्षेऽसाधारण्यं नोद्भा-वनीयमेव । कुतः ? असाधारणेनापि सत्प्रतिपक्ष एव कर्तव्यः । यथा पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पर्वतत्वात् इति द्वौ विरुद्धौ सत्प्रतिपक्षौ सिद्धौ, तत्र प्रथमानुमानवादिना द्वितीयानुमानवादिनं प्रति पर्वतत्वे हेतावसाधारण्यं नोद्भावनीयं स्यात् असाधारण्येन किं कर्तव्यम् । यदि सत्प्रतिपक्षः कर्तव्यः सत्प्रतिपक्षस्तु पूर्वं सिद्ध एव । दोषस्तु स एव कर्तव्यो यो नास्ति । यतः पर्वतत्वस्य हेतोर्येनासाधारण्यमुद्भावनीयं तेनासाधारणेन पर्वतत्वस्य सत्प्रतिपक्षः कर्तव्यः, तस्य सत्प्रतिपक्षो धूमवत्त्वरूपस्तिष्ठत्येव तनैव वह्नेः साधनात् । ततः सत्प्रतिपक्षेऽसाधारण्यं नोद्भावनीयं स्यादित्यर्थः । अत्र शङ्कते - **न चे**ति टीका । सत्प्रतिपक्षेऽसाधारण्यो-द्भावनं नास्त्येवेतीष्टापत्तिरित्यर्थः । दूषयति [249 A] **कथकै**[रि]ति टीका । कथकैः स्वसम्प्रदायानुरोधेन सत्प्रतिपक्षेऽप्यसाधारण्यमुद्भाव्यते । तथा च तेषां सम्प्रदायेन सह विरोधः । ननु तर्हि असाधारण्यं कथं दोष इत्यत आह - **तस्मादि**ति टीका । उभयव्यावृत्तत्वग्रहस्य सपक्षविपक्षव्यावृत्तत्वग्रहस्येत्यर्थः । व्याप्तिग्रह-सामग्रीत्वेनेति । विरुद्धव्याप्तिग्रहसामग्रीत्वेनेत्यर्थः । तथा च यथा सत्प्रतिपक्षस्थले द्वयोर्हेत्वोर्विरुद्धानुमिति-सामग्रीत्वेन परस्परकार्यप्रतिबन्धकत्वात् नानुमितिस्तथा सपक्षव्यावृत्तत्वविपक्षव्यावृत्तत्वज्ञानयोर्विरुद्धव्याप्ति-ग्रहसामग्रीत्वेन परस्परव्याप्तिग्रहप्रतिबन्धकत्वात् नैकव्याप्तिग्रहोदयः, तथा चासाधारणस्य सत्प्रतिपक्षोत्थापकत्वं नास्ति, किन्तु विरुद्धव्याप्तिग्रहसामग्रीत्वेन परस्परव्याप्तिग्रहप्रतिबन्धकत्वेनैवासाधारणस्य हेत्वाभासत्वम् । एतदर्थे दृष्टान्तमाह - **विरोध्यनुमिती**ति टीका । यथा सत्प्रतिपक्षे द्वयोः परामर्शयोः विरुद्धानुमितिसामग्रीत्वेन परस्परानुमितिप्रतिबन्धकत्वाद् दूषकत्वं तद्वत् अत्रापीत्यर्थः । तथा चैतन्मते परस्परव्याप्तिग्रहप्रतिबन्धकत्वेनैव दूषकत्वम्, न तु सत्प्रतिपक्षोत्थापनद्वारा इत्येतन्मतस्यार्थः । इदं **पक्षधरमिश्रमतम्** । अथ स्वमतमाह - **अत्र ब्रूम** इति । असाधारणस्य सत्प्रतिपक्षोत्थापकत्वे यानि दूषणानि **मिश्रेण** दत्तानि तानि क्रमेणोद्धरति -

**सत्प्रतिपक्षतये**ति टीका। तथा च सत्प्रतिपक्षोत्थापकतयैवास्य दूषकत्वम्, न तु परस्परव्याप्तिग्रहप्रतिबन्धकत्वेन। अत्राशङ्कते - **न चे**ति टीका। पक्षीयव्यभिचारसन्देहस्य व्यापकाभाववति शब्दत्वाभावाभाववति नित्यत्वाभावरूपस्य व्याप्यस्य संशयात् यथा शब्दत्ववति नित्यत्वाभावो वर्तते न वेति संशयरूपो व्यभिचारसंशयस्तेन व्याप्तिग्रहः(ह)प्रतिबन्धः क्रियते। ततो व्याप्तिग्रह एव नास्ति कथं सत्प्रतिपक्षः इत्याशङ्कार्थः। समाधत्ते - **व्यतिरेकी**ति टीका। यदि व्यापकाभाववति व्याप्यसन्देहरूपो व्यभिचारसन्देहरूषो व्यभिचारसन्देहः प्रतिबन्धकस्तदा व्यतिरेकिविलयः स्यात्। यथा पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् इत्यत्र पृथिवीत्वाभावो व्यापकः, इतरभेदाभावो व्याप्यः, यतो यत्र इतरभेदाभावस्तत्र पृथिवीत्वाभावः। तथा च यः पृथिवीत्वाभावो व्यापकस्तस्याभावः पृथिवीत्वम्, तद्वत्यां पृथिव्यां पृथिवीत्वस्य निश्चयात् व्याप्यस्य इतरभेदस्य सन्देहात् व्यभिचारसन्देहोऽस्ति, इत्येवं व्यतिरेकिणि कुत्रापि व्याप्तिग्रहो न स्यात्, ततोऽयं व्यभिचारसंशयो न प्रतिबन्धक इति व्यतिरेकव्याप्तिग्रहो भवत्येव। ततः सत्प्रतिपक्षोऽप्युक्तरूपो भविष्यत्येवेत्यर्थः। अत्राशङ्कते - **न चे**ति टीका। व्यतिरेकिणि उक्तरूपोऽपि व्यभिचारसन्देहः प्रतिबन्धको व्याप्तिग्रहे भवत्येव। न चैवं तेन व्याप्तिग्रहप्रतिबन्धे व्यतिरेकिविलयापत्तिरिति वाच्यम्। तर्कादिना गदिपदात् व्याप्यादर्शनस्य परिग्रहः। तथाहि [249 B] - यदि पृथिवीत्वाभाववति पृथिवीत्ववति इतरभेदो न स्यात् तदा पृथिवीत्वाभावाभावोऽपि तत्र न स्यादिति तर्केण व्यभिचारसंशयनिरासः। तस्मिन् निरस्ते व्यतिरेकिपरामर्शो भवत्येव। ततो व्यतिरेकिविलयो न भवतीति भावः। इदं दूषयति - **एवं ही**ति टीका। यदि व्यापकाभाववति व्याप्यसन्देहरूपस्य व्यभिचारसन्देहस्य पक्षीयस्यानुमितिप्रतिबन्धकत्वं तदा निश्चितहेतुमति पक्षे साध्यसन्देहरूपो यो व्यभिचारसन्देहस्तस्यापि प्रतिबन्धकत्वं स्यात्। अत्राशङ्कते - **न चे**ति टीका। तथा च निश्चितहेतुमति पक्षे साध्यसन्देहरूपस्य व्यभिचारसन्देहस्य प्रतिबन्धकत्वं तदाऽनुमानमात्रोच्छेदः स्यादित्याशङ्कार्थः। समाधत्ते - **तर्कादिने**ति टीका। त्वद्रीति-(व्यतिरेकि)वत् अत्रापि तर्कादिना व्यभिचारसन्देहनिवृत्तौ तत्सम्भवात् व्याप्तिग्रहे सति परामर्शसम्भवात्। अयमाशयः - व्यतिरेकिणि व्यापकाभाववति व्याप्यसन्देहरूपो व्यभिचारसन्देहः प्रतिबन्धक एव परं तर्कादिना तस्य निवृत्तिरिति कृत्वा व्यतिरेकिणि व्याप्तिग्रहे सति अनुमितिर्भवत्येवेति न व्यतिरेक्युच्छेदः, तद्वत् प्रकृतेऽपि निश्चितहेतुमति पक्षे साध्यसन्देहरूपो व्यभिचारसन्देहः प्रतिबन्धक एव परम् अनुमानमात्रोच्छेदस्तु न भवति तर्कादिना व्यभिचारसन्देहनिवृत्तेरित्यर्थः। अत्राशङ्कते - **न चैवमि**ति टीका। तथा चेष्टापत्तिः यतो हि पक्षीयोऽपि व्यभिचारसन्देहो व्याप्तिग्रहप्रतिबन्धकः परं तर्कादिना तस्य सन्देहस्य निवृत्त्याऽनुमानमात्रोच्छेदो न भवति। संशये निवृत्ते व्याप्तिग्रहद्वाराऽनुमितिर्भवत्येवेतीष्टापत्तिः। दूषयति - **अपसिद्धान्ता**दिति टीका। तथा चायं कस्यापि सिद्धान्तो न भवति यत् निश्चितहेतुमति पक्षे साध्यसन्देहरूपो व्यभिचारसन्देहः प्रतिबन्धकः,

इदं न कस्यापि मतम्। अथ पक्षीयोऽपि साध्यघटितव्यभिचारसन्देहो व्याप्तिग्रहप्रतिबन्धको न भवतीत्यत्रानुकूलां सम्मतिमाह - **अत एवेति** टीका। अत एव **मूलकृता** पक्षतासम्पत्तये पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् इत्यादौ घटादौ पक्षतासम्पत्तये सन्देहः पृथगुपपादितः पृथवीत्वेन ते भवत इति सन्देहसिषाधयिषे भवत इति ग्रन्थेन। तथा च यदि पक्षीयोऽपि व्यभिचारसन्देहः प्रतिबन्धकः स्यात् तदा पूर्वं व्यतिरेकिग्रन्थे मूलकारेण यत् उक्तं घटादौ इतरभेदसन्देहो नास्ति ततः सन्देहाभावात् घटादौ इतरभेदानुमितिर्न स्यादिति पूर्वपक्षयित्वा घटत्वेन रूपेण यद्यपि इतरभेदसंशयो नास्ति तथापि पृथिवीत्वेन रूपेण घटादावपि इतरभेदसंशयो वर्तत एव यथा पृथिवी इतरभिन्ना न वेति घटस्यापि पृथिवीकोटौ प्रक्षिप्तत्वात् घटेऽप्युक्तरूपः सन्देहस्तत्र वर्तत एवे[ति] व्यतिरेकिग्रन्थे सिद्धान्तितम् [250 A]। ततो यदि पक्षीयोऽपि व्यभिचारसन्देहः प्रतिबन्धकः स्यात् तदा घटादौ इतरभेदानुमित्यर्थं तस्योपपादना व्यभिचारसंशयस्योपपादना किमर्थं कृता स्यात्, न हि प्रतिबन्धकस्योपपादना अनुमित्यर्थं क्रियते। उपसंहरति - **तस्मादिति** टीका। प्रतिबन्धकत्वं फलबलकल्प्यम्। यादृशे व्यभिचारसन्देहेऽनुमितिर्नोदेति तादृशस्यैव प्रतिबन्धकत्वं कल्प्यं भवति।

ततः किमित्यत आह - **तथा चेति** टीका। तथा चान्वयिनि व्याप्यनिश्चये पक्षीयो व्यापकसंशयो न दोषः, व्यतिरेकिणि च व्यापकाभावनिश्चये पक्षीयव्याप्यसन्देहो न प्रतिबन्धकः। तथा च इदं सन्देहद्वयं पक्षीयं प्रतिबन्धकं तु न भवत्येव, तादृशे संशये विद्यमानेऽपि अनुमितेर्दर्शनात्। तत् संशयद्वयं तु प्रतिबन्धकं न भवत्येव। तथा च पक्षीयसाध्यव्यभिचारसन्देहस्य प्रतिबन्धकत्वाभावे व्यतिरेकिवत् असाधारणेऽपि व्याप्तिग्रहो भवत्येव। ततः सिद्धमसाधारणेनापि सत्प्रतिपक्षोत्थापनं कर्तव्यमिति सत्प्रतिपक्षोत्थापनद्वारा एव दूषकत्वम्। पूर्वोक्तं दूषणमाशङ्क्योद्धरति - **न चेति** टीका। यदि असाधारणस्य सत्प्रतिपक्षोत्थापकतयैव दूषकत्वं तदास्य सत्प्रतिपक्षात् भेदो न स्यात्। सत्प्रतिपक्षेऽपि विरोधिपरामर्शद्वयर्विधयैक(व) दूषकत्वम्। असाधारणेऽपि तथैवेत्यभेद इत्याशङ्कार्थः। समाधत्ते - **हेतुभेदेति** टीका। सत्प्रतिपक्षे हेतुद्वयमत्र तु एक एवेति विशेषः। अत्राशङ्कते - **न चेति** टीका। तथा चासाधारणः सत्प्रतिपक्षविशेष एव भवतु, न तु हेत्वाभासान्तरमिति। समाधत्ते - **स्वतन्त्रेच्छाया** इति। शमदमादिसम्पन्नस्य महामुनेः अक्षपादस्य इच्छाया नियोगपर्यनुयोगं कर्तुं कः समर्थः। तस्मात् यादृशी इच्छा मुनेरिच्छा तादृश एव विभागः, कथमन्यथा धर्माधर्मयोः पृथग् विभागः स्यात् अदृष्टत्वेन एकत्वस्यैव सम्भवात्। अन्यथा बाधकमाह - यदि विभागे स्वतन्त्रेच्छा न नियामिका तदा साक्षात्प्रतिबन्धकत्वेन बाधसत्प्रतिपक्षयोरप्येक एव विभागः स्यात्। बाधे विद्यमाने साक्षादेवानुमितिर्न जायते, सत्प्रतिपक्षे च विद्यमाने साक्षादेवानुमिति(र्न) र्जा(जा)यते; न तु कारणं व्याप्तिज्ञानं पक्षधर्मताज्ञानं वा ताभ्यां विघट्यते, व्याप्तिपक्षधर्मताज्ञानोत्तरमेव बाधसत्प्रतिपक्षयोरुदयात्। यथा गन्धप्रागभावावच्छिन्नो घटो

गन्धवान् पृथिवीत्वात् इत्ययं साध्याभावप्रमारूपो बाधः, स च व्याप्तिपक्षधर्मताज्ञानोत्तरमेवोदेति। व्याप्तिस्तु पृथिवीत्वगन्धवत्त्वयोर्वर्तते एव पक्षधर्मताऽपि पृथिवीत्वस्य घटेऽस्त्येव। ततः गन्धप्रागभावकाले गन्धाभावात् साध्याभावरूपो बाधः । एवं सत्प्रतिपक्षेऽपि यत उभयोर्हेत्वोर्यदि व्याप्तिपक्षधर्मताज्ञानं तुल्यं तदैव सत्प्रतिपक्षावतारः । स च व्याप्तिपक्षधर्मताज्ञानोत्तरमेवेति [250 B] बाधप्रतिरोधयोः साक्षात्प्रतिबन्धकत्वेन एका[स्मिन्] एवानयोर्विभागे परिगणनं स्यात् । अथ सत्प्रतिपक्षासाधारणयोर्भेदकान्तरमप्याह - **वस्तुत** इति टीका। सत्प्रतिपक्षासाधारणयोरयमेव भेदः यतः(त्) सत्प्रतिपक्षे उभयत्र हेतुद्वये व्याप्तिपक्षधर्मताज्ञानम्। न हि सत्प्रतिपक्षे एकत्र व्याप्तिपक्षताज्ञानम् । कुतः ? एकत्र हेतौ व्याप्तिपक्षधर्मताज्ञानेऽपरत्र व्याप्त्यभावज्ञाने स्वरूपासिद्धत्वज्ञाने सत्प्रतिपक्षतापत्तेः । एतदेवाह - **अन्यथेति** । न ह्येवमसाधारणे उभयत्र व्याप्तिपक्ष-धर्मताज्ञानम् । असाधारणे तु एकत्रैव हेतौ व्याप्तिपक्षधर्मताज्ञानम्, यथा शब्दोऽनित्यः शब्दत्वात् इत्यत्र नित्यत्वव्यापकाभावप्रतियोगित्वम् अनित्यत्वव्यापकाभावप्रतियोगित्वमपि शब्दत्वस्यैव शब्दत्वस्यैव पक्षधर्म-ताज्ञानम् इति कृत्वा सत्प्रतिपक्षाऽसाधारणयोर्महान् भेदः। अत्रार्थे मूलकारस्य सम्मतिमाह - **तदिदमुक्तमिति** टीका। द्वौ हेतू सत्प्रतिपक्षे, एको हेतुरसाधारणे इति मूलकारेणेति भावः। दूषणान्तरं निराकरोति - **यस्त्विति** टीका । यथा उपाधिः व्यभिचारानुन्नयनदशायामुपाधिज्ञानेऽप्यनुमितिप्रतिबन्धकत्वाभावात् व्यभिचारोन्नयने चानुमितिप्रतिबन्धकत्वात् परमुखनिरीक्षकतया हेत्वाभासो न भवति तथाऽसाधारणोऽपि विरुद्धव्यतिरेकि(क)-व्याप्तिपक्षधर्मताज्ञानविषयतादशायामेव अनुमितिप्रतिबन्धात् विरुद्धव्यतिरेकव्याप्तिपक्षधर्मताज्ञानं यदा नास्ति तदाऽनुमितिप्रतिबन्धाभावात् परमुखनिरीक्षकस्वतन्त्रं हेत्वाभासत्वं न स्यात्। समाधत्ते - **तत्तथैवेति** टीका। विरुद्धव्यतिरेकव्याप्तिपक्षधर्मताज्ञानविरहदशायां हेत्वाभासत्वं तस्य नास्त्येव किन्तु तद्दशायामेव । अत एवानित्यदोषत्वमसाधारणस्य । तथा च यथा व्यभिचारास्फूर्तिदशायां साध्यव्यापकत्वादिज्ञाने नोपा-धिरस्ति, असाधारणे तु यदा विरुद्धव्याप्तिपक्षधर्मताज्ञानं नास्ति तदाऽसाधारणत्वमेव तस्य नास्ति, विरुद्धव्याप्ति-ग्रहदशायामेवासाधारणत्वं तदा परमुखनिरीक्षकत्वाभावादसाधारणस्य हेत्वाभासत्वमेवेत इदमेवाह - **तद्विषयीभूतस्यैवेति** टीका । विरुद्धव्यतिरेकव्याप्तिपक्षधर्मताज्ञानविषयस्यैवेत्यर्थः । ननु विरुद्धव्यतिरेक-व्याप्तिपक्षधर्मताज्ञानविरहदशायामपि कुतोऽस्य हेत्वाभासत्वं नास्तीत्यत आह - **तत्त्वस्यैवेति**। अनुमिति-प्रतिबन्धकत्वघटितं हेत्वाभासत्वं तच्च विरुद्धेत्यादिविरहदशायां नास्ति, अतस्तद्विरहदशायां तस्य हेत्वाभासत्वं नास्तीत्यर्थः । अत्रैवानुकूलमुपोद्वलकमाह - **अत एवेति** टीका। [251 A] यदा विरुद्धव्याप्तिपक्षधर्मताज्ञानं वर्तते तदनन्तरं यदि एकत्र नित्यत्वांशेऽनित्यत्वांशे वाऽनुकूलतर्कावतारो जातस्तदाऽसाधारणत्वं नास्ति, विरुद्धव्यतिरेकव्याप्तिपक्षधर्मताज्ञानविषयत्वाभावात् तदानीमसाधारणत्वं नास्त्येवेत्यर्थः । अतिप्रसङ्ग इति ।

असाधारणत्वप्राप्तिरूपो नास्तीत्यर्थः । यत् पूर्वं विरुद्धाभेद आशङ्कितस्तं निराकरोति - **न च विरुद्धमिति** टीका । तथा चासाधारणस्य विरुद्धान्तर्भावो न भवति । कुत इत्यत आह - **साध्यव्यापकेति** टीका । साध्यव्यापकाभावप्रतियोगित्वज्ञानस्य विषयत्वविषयकत्वेनानुमितिप्रतिबन्धकत्वमेव नास्ति ग्राह्याभावानवगाहित्वात् । तथा च साध्यव्यापकाभावप्रतियोगित्वज्ञानमात्रमनुमितिप्रतिबन्धकमेव न भवति । न चैवं विरुद्धस्यापि हेत्वाभासत्वं न स्यात् । यतो विरुद्धेऽपि साध्यव्यापकाभावप्रतियोगित्वज्ञानमस्ति, तच्च प्रतिबन्धकमेव नास्ति, यथा अयम् अश्वः सास्नादिमत्त्वात् इत्यत्र साध्यमश्वत्वम् तस्य व्यापकोऽभावः सास्नादिमत्त्वाभावः तत्प्रतियोगित्वज्ञानं सास्नामत्त्वे वर्तते इति कृत्वा विरुद्धोऽपि हेत्वाभासो न स्यात् इत्यत आह - **तत्रेति** टीका । यथा विरुद्धत्वज्ञानस्यानुमितिप्रतिबन्धकत्वं तथा अग्रे वक्ष्यत इत्यर्थः । दूषणान्तरं निराकरोति - **न चेति** टीका । पूर्वमुक्तं वृत्तिमत्त्वेन ज्ञातस्य शब्दत्वस्य साध्यतदभावव्यापकाभावप्रतियोगित्वं ग्रहीतुं न शक्यते वृत्तिमतः साध्यतदभावान्यतराधिकरणवृत्तित्वनियमात् तथा चोभयसाध्यतदभावरूपाधिकरणव्यावृत्तत्वज्ञानात् साध्यतदभावोभयव्यापकाभावप्रतियोगित्वग्रह इति न च वाच्यम् । समाधत्ते - **न हीति** टीका । सकलव्याप्याधिकरणे व्यापकसम्बन्धो व्याप्तिः एवं चेत् व्याप्तिः स्यात् तदा सकलनित्यत्वाधिकरणे सकलानित्यत्वाधिकरणे च हेत्वभावस्य शब्दत्वाभावस्य च ग्रहे हेतोर्वृत्तिमत्त्वग्रह एव न स्यात् । सकलाधिकरणेत्यादिरूपा व्याप्तिरेव नास्ति सकलाधिकरणानामग्रहात् । यतः सर्वं वस्तु किञ्चिदनित्यत्ववत् किञ्चिन्नित्यत्ववत्, अथ उभयत्राधिकरणे यदि शब्दत्वाभावो गृहीतस्तदा शब्दत्वस्य वृत्तिमत्त्वग्रह एव न स्यात् । यथा घटाधिकरणेऽप्याकाशस्याभावः घटाभावाधिकरणेऽपि आकाशस्याभाव इति आकाशस्यावृत्तित्वम्, परन्तु नित्यत्वस्य व्यापकता हेत्वभावस्य गृहीता, सा तु न सकलनित्यत्वाधिकरणे सकलानित्यत्वाधिकरणे वा हेत्वभावस्य सत्त्वम्, किन्तु नित्यत्ववन्निष्ठात्यन्ताभावाप्रतियोगित्वं हेत्वभावस्य व्यापकता, एवमनित्यत्ववन्निष्ठात्यन्ताभावाप्रतियोगित्वं हेत्वभावस्य इति, एतादृश्यां व्यापकतायां सकलनित्यत्वाधिकरणस्य सकलानित्यत्वाधिकरणस्य वा प्रवेश एव [251 B] नास्ति इति कृत्वा नित्यत्वानित्यत्वयोरुभयोरपि हेत्वभावस्य व्यापकताग्रहेऽपि हेतोः शब्दत्वे वृत्तिमत्त्वं गृहीतुं शक्यत एव, तथा चेदं व्यापकताज्ञानं हेतोर्वृत्तिमत्त्वग्रहे प्रतिबन्धकमेव न भवतीति, एतदेवाह - **तथा चेति** टीका । नित्यत्ववन्निष्ठात्यन्ताभावाप्रतियोगी शब्दत्वाभावः इत्येको व्यापकताग्रहः, द्वितीयस्तु अनित्यत्ववन्निष्ठेत्यादिकः, एतावता एतादृशस्य व्यापकत्वस्य शब्दत्वाभावे ग्रहेऽपि वृत्तिमत्त्वग्रहः शब्दे भविष्यत्येवेति भावः । ननूभयव्यापकत्वग्रहस्य वृत्तिमत्त्वाभावेन सह व्याप्यत्वात् यथा यत्रोभयव्यापकत्वग्रहस्तत्र वृत्तिमत्त्वाभावः यथाऽऽकाश इति तत इदं व्यापकताज्ञानं शब्दत्वस्य वृत्तिमत्त्वग्रहे प्रतिबन्धकं भवत्येवेत्यत आह - **ग्राह्याभावेति** टीका । तथा च व्याप्यज्ञानं व्याप्त्यग्रहदशायां प्रतिबन्धकं न भवत्येव, यथा वह्न्य-

भावज्ञाने धूमज्ञानं प्रतिबन्धकं तदैव भवति यदा वह्निव्याप्यत्वेन धूमस्य ग्रहः नान्यदा । तद्वत् प्रकृते यत्र नित्यत्वानित्यत्वोभयव्यापकत्वं तदा वृत्तिमत्त्वाभाव इति नित्यत्वानित्यत्वोभयव्यापकत्वस्य वृत्तिमत्त्वाभावस्य च व्याप्त्यग्रहदशायां वृत्तिमत्त्वग्रहप्रतिबन्धकत्वाभावात् ग्राह्याभावावगाहितया प्रतिबन्धकत्वं वाच्यम् । ग्राह्यं वृत्तिमत्त्वम्, तदभावावगाहितया प्रतिबन्धकत्वं नित्यत्वानित्यत्वोभयव्यापकत्वग्रहस्य वाच्यम् । तच्च न सम्भवतीत्यर्थः ग्राह्याभावस्य वृत्तिमत्त्वाभावस्य व्यापकताग्रहेऽविषयत्वात् । **अत एवे**ति टीका । यतो ग्राह्याभावानवगाहितयोभयव्यापकत्वग्रहो वृत्तिमत्त्वग्रहे प्रतिबन्धको न भवति एवं वृत्तिमत्त्वग्रहे(हो)ऽपि ग्राह्याभावानवगाहितया उभयव्यापकत्वग्रहे न प्रतिबन्धकः ग्राह्याभावानवगाहित्वात् । यदि च ग्राह्याभावानवगाहित्वेऽपि वृत्तिमत्त्वग्रहस्तदुभयव्यापकत्वग्रहे प्रतिबन्धकस्तदुभयव्यापकत्वग्रहो वा वृत्तिमत्त्वग्रहे प्रति[बन्धकः] इत्येकग्रहोऽपरग्रहे प्रतिबन्धकश्चेत् स्यात् तदा बाधस्यापि प्रतिबन्धकत्वं न स्यात् इत्याह - **अन्यत्रे**ति टीका । बाधस्यापि प्रतिबन्धकत्वं न स्यात्, कुतः ? यदि पक्षस्य साध्यव्याप्यवत्तया ग्रहस्तदा साध्याभावरूपबाधग्रह एव न सम्भवति यदि च साध्याभावग्रहस्तदा साध्यवत्त्वग्रह एव न सम्भवतीति बाधस्य प्रतिबन्धकत्वं न स्यात्, उभयग्रहस्योभयत्र प्रतिबन्धकत्वात् । एतदेवाह - **साध्यव्याप्यवत्तये**ति टीका । यदि साध्यव्याप्यवत्तया पक्षश्चेत् ज्ञातस्तदा व्यापकसम्बन्धः पक्षस्यावश्यं वर्तते इति कृत्वा साध्याभावज्ञानरूपो बाध एव नोदेति । उपसंहरति - **तस्मादि**ति टीका । यथा व्याप्यवत्तया निश्चिते पक्षे बो(बा)धरूपो यो व्यापकाभावः साध्याभावस्तस्य निश्चयो भवत्येव यथा [252 A] गन्धप्रा० (=गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वात्) इत्यत्र व्याप्यवत्त्वनिश्चये विद्यमानेऽपि बाधरूपो निश्चयो जायते । तथा नित्यत्वानित्यत्वयोर्हेत्वा(त्व)भावस्य व्यापकतानिश्चये विद्यमानेऽपि वृत्तिमत्त्वग्रहः शब्दत्वस्य पक्षे भविष्यत्येवेत्यर्थः । ननु व्याप्यवत्ताज्ञानस्य बाधग्रहे प्रतिबन्धकत्वं मास्तु भिन्नप्रकारकत्वात् । यतो व्याप्यवत्ताज्ञाने व्याप्तिः प्रकारो बाधे तु साध्याभावः प्रकारो न तु व्याप्त्यभावः प्रकारः इति भिन्नप्रकारकत्वात् न प्रतिबन्धकत्वं तदा भिन्नप्रकारकत्वात् अत्रापि वृत्तिमत्त्वग्रहनित्यत्वानित्यत्वग्रहयोः प्रतिबध्यप्रतिबन्धका(क)भाव एव न स्यात् इत्याह-**तदा प्रकृतेऽपी**ति । दूषणान्तरं निराकरोति - **सत्प्रतिपक्षे चे**ति टीका । सत्प्रतिपक्षेऽसाधारण्योद्भावनं नास्त्येव, पूर्वोक्तरीत्या प्रयोजनाभावात् । यतोऽसाधारणेनापि सत्प्रतिपक्ष एव कर्तव्यस्तस्य च पूर्वं सिद्धत्वात् । अत्राशङ्कते - **न चैवमि**ति । यदि सत्प्रतिपक्षेऽसाधारण्योद्भावनं नास्ति तथा(दा) **कथकसम्प्रदाय**विरोधः इति न च वाच्यम् । समाधत्ते - **तस्य चे**ति टीका । **तस्य कथकसम्प्रदाय**स्य सन्दिग्धत्वात् । सत्प्रतिपक्षेऽसाधारण्योद्भावनं वर्ततेऽयमर्थः सन्दिग्धः । एतावता प्रबन्धेन सत्प्रतिपक्षोत्थापकतयाऽसाधारणस्य दूषकतां समर्थयित्वा उभयव्याप्तिग्रहप्रतिबन्धकतयाऽसाधारणस्य दूषकत्वमिति **मिश्रमतं** दूषयति - **तस्मादि**ति

मूलम्। यदुक्तं **मिश्रेण** सपक्षविपक्षव्यावृत्तत्वज्ञानमुभयविरुद्धव्याप्तिग्रहसामग्रीति कृत्वा तयोः परस्परव्याप्तिग्रह-प्रतिबन्धकत्वेनैव दूषकत्वं तद् दूषयति - **तदपीति**। सपक्षविपक्षव्यावृत्तत्वज्ञाने जातेऽपि आप्तवाक्यादि-रूपशब्दात् व्याप्तिग्रहादनुमित्युत्पत्तेरनुभवसिद्धत्वात्, व्याप्तिग्रहप्रतिबन्धाभावादनुमित्युत्पत्तेरावश्यकत्वात्। तथा च परस्परविरुद्धव्याप्तिग्रहप्रतिबन्धकत्वेन नासाधारणस्य दूषकत्वम्। ननु यदि असाधारणस्थले आप्त-वाक्यात् व्याप्तिग्रहे सति अनुमितिर्जायते तदा सत्प्रतिपक्षोत्थापकत्वेनापि असाधारणस्य दूषकत्वं न स्यात्। यतस्तव मतेऽपि सत्प्रतिपक्षोत्थापकत्वेन दूषकत्वं तदपि न सम्भवति इत्यत आह - **किञ्चेति** टीका। तथा च सपक्षविपक्षव्यावृत्तत्वज्ञानं यत् वर्तते तत् उभयसहचारव्यतिरेकसहचारग्रहरूपं शब्दत्वाभावस्य नित्यत्व-नित्यत्वाभावरूपसाध्यसाध्याभावसहचारग्रहरूपम्, न चैतावन्मात्रं व्यतिरेकव्याप्तिग्रहसामग्री किन्तु अनुकूल-तर्कसहकृता सा। उभयव्यावृत्तत्वज्ञानं व्यतिरेकव्याप्तिग्रहसामग्री। यदि तत्रानुकूलतर्कोऽवतीर्णस्तदाऽ-साधारण्यमेव न भवति। ततोऽनुकूलतर्कसहकृतस्य तस्य सपक्षविपक्षव्यावृत्तत्वज्ञानस्य व्याप्तिग्रहप्रतिबन्धकत्वं वक्तव्यम्। तथा च परमुखनिरीक्षकत्वात् स्वतन्त्रहेत्वाभासत्वं न स्यादेव। दृष्टान्तेन विवृणोति - **न हीति**। इतरसामग्री व्यभिचारज्ञानसामग्री, [252 B] तत्समवहितस्योपाधिज्ञानस्य व्यभिचारानुमापकलिङ्गसमवहित(तं) यत् उपाधिज्ञानं तस्य व्यभिचारज्ञानसामग्रीत्वेन व्याप्तिज्ञानप्रतिबन्धकतया उपाधेरपि हेत्वाभासत्वापत्तिः, तथा च परस्परविरोधिव्याप्तिग्रहसामग्रीत्वेनासाधारणस्य प्रतिबन्धकत्वं नास्ति। न हीत्यारभ्य ध्येयमितिपर्यन्तो ग्रन्थः पुस्तकान्तरात् शोध्यः। ननु साध्यतदभावोत्थापकतया सपक्षव्यावृत्तत्ववत् विपक्षव्यावृत्तत्वमप्युपयुज्यते एव इत्यत आह - **असाधकतानुमाने** इति शेषः। तथा च इदमसाधकं सपक्षविपक्षाभ्यां व्यावृत्तत्वात् अत्र इदमसाधकं सपक्षव्यावृत्तत्वात् इत्येवास्तु, विपक्षव्यावृत्तत्वं व्यर्थम्। तथा च परार्थानुमाने सपक्षव्यावृत्तत्वेनैव हेतुनाऽसाधकतानुमितौ संभवत्यां विपक्षव्यावृत्तत्वं नोद्भावनीयम्। तथा च न तल्लिङ्गविशेषणं विरुद्धमिति। ननु विरुद्धमनेनोपाधिना चेत् साधारणं तदा तत्रानैकान्तिकसामान्यलक्षणं साध्यतदभावोभयकोट्युपस्थापकता-वच्छेदकरूपवत्त्वं विरुद्धे नास्ति कथमनेनोपाधिना संग्राह्यमित्यत आह - **अत्रेति** टीका। विरुद्धश्चेत् अनेनोपाधिनाऽसाधारणत्वेन यदि सङ्गृहीतः सामान्यलक्षणयोग्यः पूर्ववत् योज्य इत्यर्थः।

**अनुपसंहार्यो नासत्सपक्षविपक्षः सिद्ध्यसिद्धिविरोधात्। नापि केवलान्वयि-धर्मावच्छिन्नपक्षकः, केवलान्वयिसाध्यकस्य सद्धेतुत्वात् व्यतिरेकिसाध्यकस्य तु साध्यतदभाववद्गामित्वेन साधारणत्वात् अन्यथा संशयाहेतुत्वेनानैकान्तिकता न स्यात्, सर्वं क्षणिकं सत्त्वात् इति साध्याप्रसिद्ध्या व्याप्यत्वासिद्धमपार्थकं वा,**

**साध्यप्रसिद्धौ तु साधारणमेव । न च पक्षान्यसाध्यवत्तदन्यवृत्तित्वं पक्षातिरिक्त-साध्याभाववद्वृत्तित्वं वा साधारणत्वम्, व्यर्थविशेषणत्वात् । न च विरुद्धं विशेषणस्य व्यावर्त्यमित्युक्तम् । नाप्यत्यन्ताभावप्रतियोगिसाध्यकत्वे सति केवलान्वयिधर्मा-वच्छिन्नपक्षकत्वम्, सर्वमभिधेयं मेयत्वात् इत्यत्र विप्रतिपत्त्या पक्षतादशायां पक्षे साध्यानिश्चयेनानुपसंहारिणि अव्यापकत्वात् । अथ पक्षातिरिक्ते व्याप्तिग्रहानुकूला-प्रतीतसहचारोऽनुपसंहार्यः यदि च पक्षे व्याप्तिग्रहः कथञ्चित् तदा शब्दोपदर्शित-व्याप्तिकानुमानवदभेदानुमानवच्च सद्धेतुरेवेति चेत् । न । तत्रैव सद्धेतावतिव्याप्तेः सर्वस्य पक्षत्वे पक्षातिरिक्ताप्रसिद्धेः, असाधारणविरुद्धयोरतिव्याप्तेश्च दूषकतायां व्यर्थ-विशेषणत्वाच्च । न च दूषकता अनैकान्तिकत्वेन न प्रत्येकमिति वाच्यम् । अर्थगत्या व्यर्थविशेषणत्वात् । नापि विप्रतिपत्तिविषयमात्रवृत्तित्वं केवलान्वयिसाध्यके अव्याप्तेः सर्वस्य पक्षत्वे मात्रार्थाभावादिति ।**

अथ मूलम् । अनुपसंहारिलक्षणमाह - **अनुपसंहारीति** मूलम् । तत्र प्राचां लक्षणमाह - **नासदिति** । तथा च यस्य सपक्षोऽपि नास्ति विपक्षोऽपि नास्ति, यथा सर्वमनित्यं प्रमेयत्वात्, अत्र सर्वस्य पक्षीकृतत्वात् सपक्षविपक्षाभावः । इदं दूषयति - **सिद्ध्यसिद्धीति** । अनुपसंहारिणि सपक्षविपक्षौ सिद्धौ वाऽसिद्धौ वा ? यदि सिद्धौ तदा तौ न स्त इति वक्तुं न शक्यते, असिद्धौ तदापि नास्ति इति वक्तुं न शक्ये(क्य)ते । यतः सद्भ्यां प्रतियोग्यधिकरणाभ्यामभावो निरूप्यते, अभावस्य सत्प्रतियोग्यधिकरणनिरूप्यत्वात् । लक्षणान्तरं दूषयति - **नापीति** मूलम् । केवलान्वयिधर्मावच्छिन्नः पक्षो यस्य । यस्य हेतोः पक्षतावच्छेदकं केवलान्वयि-धर्मः । यथा अभिधेयमनित्यं प्रमेयत्वात् इत्यत्राभिधेयत्वं पक्षतावच्छेदकम् । इदं दूषयति - **केवलान्वयि-साध्यकेति** मूलम् । केवलान्वयिधर्मावच्छिन्नपक्षके हेतौ साध्यं केवलान्वयि केवलव्यतिरेकि वा ? नाद्यः, केवलान्वयिसाध्यकस्य सर्वस्यैव हेतोः सद्धेतुत्वात् । द्वितीयमाह - **व्यतिरेकीति** मूलम् । यदि व्यतिरेकि साध्यं तदा साध्याभाववति हेतुर्वर्तते न वा ? न द्वितीयः साध्याभाववदवृत्तिर्हेतुः सद्धेतुरेव । प्रथमे आह - यदि साध्याभाववति हेतुर्वर्तते तदा साधारण एव, किमनुपसंहारिणेति । यदि अनुपसंहारिणि हेतौ साध्य-साध्याभाववद्वृत्तित्वं नास्ति तदा मुख्यसव्यभिचारं साध्यसाध्याभावसन्देहजनककोटिद्वयोपस्थापकत्वलक्षणमेव नास्तीति कुतोऽस्यानैकान्तिकता । अत्राशङ्कते - **सर्वमिति** मूलम् [253 A] । तथा च सर्वं क्षणिकं सत्त्वात्

इदमेव अनुपसंहारिणि उदाहरणम्। तत इदमुदाहरणमुक्तम्। दूषयति - **साध्येति**। तथा चात्र साध्याप्रसिद्ध्या क्षणिकत्वरूपसाध्यस्याप्रसिद्ध्या व्याप्यत्वासिद्धस्यैवोदाहरणमिदम्। ननु साध्याप्रसिद्धौ व्याप्यत्वासिद्धिरपि कथं स्यात् ?, यतः साध्यसाधनयोर्व्याप्त्यभावो व्याप्यत्वासिद्धिः। तथा च यदि साध्यप्रसिद्धिर्नास्ति तदा व्याप्यत्वासिद्धिरपि कथं स्यात् इत्यत आह - **अपार्थकमिति** मूलम्। यदि च साध्यप्रसिद्धिस्तदा पूर्वोक्तं साधारणत्वमेव। अत्राशङ्कते - **न चेति** मूलम्। तथा च साधारणादयमेव भेदः - साधारणो यः स पक्षातिरिक्तसाध्यवत्तदन्यवृत्तिः, इदं साधारणस्य लक्षणम्। अथवा पक्षातिरिक्तसाध्यात्यन्ताभाववद्वृत्तित्वं साधारणत्वम्। अत्र पक्षातिरिक्तपदमनुपसंहारिणि अतिव्याप्तिवारणार्थम्। प्रमेयत्वस्य नित्यत्वाभाववद्वृत्तित्वात् परं तत्र पक्षातिरिक्तत्वं नास्ति सर्वस्य पक्षीकरणात्। इति साधारणादनुपसंहारिणो भेदः। दूषयति - **व्यर्थविशेषणत्वादिति** मूलम्। अत्रेदमसाधकं साध्यवत्तदन्यवृत्तित्वात्, पक्षातिरिक्तपदं व्यर्थम्। असाधकत्वं चैतावन्मात्रेणैव। एवं साध्यात्यन्ताभाववद्वृत्तित्वमेवासाधकत्वे प्रयोजकम्, न तु पक्षातिरिक्तेति विशेषणम् गौरवात्। आशङ्कते - **न चेति** मूलम्। अत्र साध्यवत्पदस्य प्रयोजनं विरुद्धव्यावृत्तिः, यतो विरुद्धेऽपि साध्यवदन्यवृत्तित्वं वर्तते परं तत्र साधारणत्वं नास्तीति तत्रातिव्याप्तिवारणार्थं साध्यवद्वृत्तित्वे सति इत्युक्तम्, विरुद्धे साध्यवद्वृत्तित्वाभावात्। अत्र सामधत्ते - **इत्युक्तमिति**। विरुद्धोऽपि साध्याभाववद्वृत्तित्वेन रूपेण साधारण एवेति तद्व्यावृत्त्यर्थं विशेषणमनुचितमेवेति साधारणग्रन्थे उक्तमित्यर्थः। मतान्तरेऽनुपसंहारिलक्षणं दूषयति - **नापीति** मूलम्। अत्यन्ताभावप्रतियोगिसाध्यं यस्य तत्त्वे सति केवलान्वयिधर्मेणावच्छिन्नो यः पक्षः तत्कत्वम्। सद्धेतौ अतिव्याप्तिवारणार्थं सत्यन्तम्, यथा सर्वमभिधेयं प्रमेयत्वात् इत्यत्र सर्वस्मिन् यदाऽभिधेयत्वस्य निश्चयः तदानुमानं सिषाधयिषया भवति। तत्र सद्धेतौ केवलान्वयिधर्मावच्छिन्नपक्षकत्वं वर्ततेऽनुपसंहारित्वं नास्ति तस्य सर्वत्र निश्चयात्। अतोऽत्यन्ताभावप्रतियोगिसाध्यकत्वं तत्र नास्तीति नातिव्याप्तिः। अथ पर्वतो वह्निमान् धूमात् इति सद्धेतौ अत्यन्ताभावप्रतियोगिसाध्यकत्वं वर्तते परमनुपसंहारित्वं नास्तीति केवलान्वयीत्यादि। दूषयति - **सर्वमभिधेयमिति** मूलम्। सर्वमभिधेयं प्रमेयत्वात् इत्यत्र यदा सर्वस्मिन् अभिधेयत्वरूपसाध्यसन्देहेन पक्षता वर्तते तस्यां दशायामयमनुपसंहारी, यत्र सर्वस्मिन् पक्षे साध्यसन्देहः स एवानुपसंहारीति। तथा च तत्राव्याप्तिः, यतस्तत्रात्यन्ताभावप्रतियोगिसाध्यकत्वं नास्ति अभिधेयत्वरूपसाध्यस्य [253 B] अत्यन्ताभावप्रतियोगित्वाभावादिति अव्याप्तिः। एतदेवाह - **विप्रतिपत्त्येति** मूलम्। ननु न विप्रतिपत्तिविषयत्वं पक्षत्वम्, अपि तु साध्यसन्देहविषयत्वं पक्षत्वम्। यदि विप्रतिपत्तिविषयत्वं पक्षत्वं तदा क्षितिः सकर्तृका कार्यत्वात् इत्यत्र अङ्कुरे सर्गाद्यकालीनवेदघटलिप्यादि-सम्प्रदायेषु सकर्तृकत्वविप्रतिपत्तिर्नास्ति, क्षितावेव सकर्तृकत्वविप्रतिपत्तिः, यतः क्षितेः सकर्तृकत्वसाधनार्थमे-

वेदमनुमानं परमङ्कुरसर्गाद्यकालीनानामपि सकर्तृकत्वं सिद्ध्यति तस्मादेवानुमानात् । तथा चाङ्कुरादीनामपि पक्षत्वं वर्तते परं विप्रतिपत्तिविषयत्वं तेषु नास्तीति तल्लक्षणं दुष्टम् । परं साध्यसन्देहविषयत्वं तेष्वपि वर्तते इत्याह - **साध्यानिश्चयेने**ति मूलम् । तथा च सर्वमभिधेयं प्रमेयत्वात् इत्यत्र सर्वत्र साध्यसन्देहवत्त्वादनुपसंहारिणि अव्याप्तिः । लक्षणान्तरमाशङ्कते - **अथे**ति मूलम् । पक्षातिरिक्ते सपक्षादौ व्याप्तिग्रहस्यानुकूलः प्रतीतसहचारो यत्र नास्ति तादृशहेतुरनुपसंहारी, यथा सर्वमनित्यं प्रमेयत्वात् इत्यत्र पक्षातिरिक्ते व्याप्तिग्रहानुकूलः सहचारः प्रतीतो नास्ति, अतोऽयमनुपसंहारीत्यर्थः स्पष्टः । अत्र व्याप्तिग्रहानुकूलत्वेन रूपेणान्वयव्यतिरेकयोरुभयोरपि सहचारयोः सङ्ग्रहः । तथा च यत्र सर्वस्य पक्षीकरणेनान्वयदृष्टान्तो(न्ता)भावादन्वयसहचारो नास्ति व्यतिरेकसहचारोऽपि नास्ति इति भावः । ननु यदि पक्षे एव व्याप्तिग्रहो जातस्तदानीं पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारत्वं वर्तते । पर्वतो वह्निमान् धूमात् इत्यत्रापि यदा आप्तवाक्यात् पक्षे पर्वते एव व्याप्तिग्रहो जातस्तदा पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारत्वं वर्तत इति धूमादौ सद्धेतौ अतिव्याप्तिरित्यत आह - **पक्षे**ति । तथा च यदि पक्षे व्याप्तिग्रहस्तदा स सद्धेतुरेव जातः । एतदर्थे दृष्टान्तमाह - **शब्दोपदर्शितव्याप्तिके**ति मूलम् । शब्देनोपदर्शिता व्याप्तिर्यस्य । यत्र महानसादौ व्याप्तिर्न गृहीता किन्तु आप्तवाक्यादयं हेतुरेतस्य व्याप्यः इत्येव यत्र व्याप्तिग्रहो जातः स यथा सद्धेतुः तथा अयमपि सद्धेतुः । यत्र पक्ष एव व्याप्तिग्रहस्तत्र हेत्वाभासरूपविशेषणाभावात् नातिव्याप्तिः । दृष्टान्तान्तरमाह - **अभेदानुमानवच्चे**ति मूलम् । अयमेतदभिन्नः एतत्त्वात् इत्यत्र पक्षे व्याप्तिग्रहः सोऽपि सद्धेतुरेव, तथा प्रकृतलक्षणे हेत्वाभासरूपं विशेषणं नास्ति अतो नातिव्याप्तिः । अत्र हेत्वाभासत्वं विशेषणं देयमेवेति भावः । इदं लक्षणं दूषयति - **तत्रैव सद्धेतौ** इति मूलम् । तथा चासाधकत्वानुमाने हेत्वाभासत्वरूपविशेषणस्य गौरवात् तत्रोक्तसद्धेतौ अतिव्याप्तिरेवेत्यर्थः । दूषणान्तरमाह - **सर्वस्ये**ति मूलम् । अनुपसंहारिणि सर्वस्य पक्षत्वात् पक्षातिरिक्ताऽप्रसिद्धेस्तथा च पक्षातिरिक्तव्याप्तिग्रहानुकूलाप्रतीतसहचारत्वमनुपसंहारिलक्षणमव्याप्तं [254 A] पक्षातिरिक्तस्याप्रसिद्धेरित्यर्थः । अत्रैव दूषणान्तरमाह - **असाधारणविरुद्धयोरपी**ति मूलम् । तथा चासाधारणे सपक्षे सत्त्वं नास्ति विपक्षे च सत्त्वं नास्ति, ततः सपक्षे सत्त्वाभावात् पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारत्वम् असाधारणे, विरुद्धेऽपि विरुद्धस्य साध्यसामानाधिकरण्याभावा[त्] पक्षातिरिक्तेत्यादिलक्षणं तत्र वर्तते, इति तयोरतिव्याप्तिः । यद्यपि असाधारणे व्यतिरेकव्याप्तिग्रहानुकूलो व्यतिरेकसहचारः पक्षातिरिक्ते विपक्षादौ तिष्ठत्येव, तथाहि शब्दोऽनित्यः शब्दत्वात् यत्रानित्यत्वाभावस्तत्र शब्दाभावो यथा गगने इति अत्र व्याप्तिग्रहानुकूलो विपक्षे व्यतिरेकसहचारस्तिष्ठतीति पूर्वोक्तं लक्षणं नातिव्याप्तम्, तथापि व्याप्तिग्रहानुकूलान्वयसहचाराभिप्रायेणेदं दूषणम् । अथवा एतदस्वरसादाह - **दूषकतायामि**ति मूलम् । तथा च इदमसाधकं व्याप्तिग्रहानुकूलाप्रतीतसहचारत्वा[दित्येवास्तु

पक्षातिरिक्तेति विशेषणं व्यर्थम्। अत्राशङ्कते - **न चेति**। तथा च यदि अनुपसंहारित्वेनासाधकतानुमानं स्यात् तदा व्यर्थविशेषणता स्यात्। दूषकता चानुपसंहारित्वेन रूपेण नास्ति, दूषकता चानैकान्तिकत्वेन, तथा च इदमसाधकं पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारत्वात् इति असाधकतानुमाने कर्तव्ये व्यर्थविशेषणता स्यात्। परमिदं नास्ति इदमसाधकमनैकान्तिकत्वात् इत्येवास्ति, तदा व्यर्थविशेषणत्वं नास्ति इत्यर्थः। इदं दूषयति - **अर्थगत्येति** मूलम्। अर्थगतिश्चेदृशी अनैकान्तिकत्वमुभयकोट्युपस्थापकतावच्छेदकं रूपम्। तत्रोभयकोट्युपस्थापकतावच्छेदकमत्र किम् ? अनुपसंहारित्वम्, तच्च पक्षातिरिक्ते व्याप्तिग्रहानुकूलाऽ-प्रतीतसहचारत्वम्, तथा च पक्षातिरिक्तेति पदं व्यर्थमेव, व्याप्तिग्रहेत्यादि असाधकतानुमानमस्तु। लक्षणान्तर-माशङ्क्य दूषयति - **नापीति** मूलम्। विप्र[तिपत्]तीति विरुद्धार्थप्रतिपादकं वाक्यद्वयं विप्रतिपत्तिः। विरुद्धार्थप्रतिपादकं वादिप्रतिवादिवाक्यद्वयम्, तद्विषयः यावद् विप्रतिपत्तिविषयस्तावन्मात्रवृत्तित्वम्, तथा च सर्वमनित्यं प्रमेयत्वात् इत्यत्र सर्वस्य विप्रतिपत्तिविषयत्वात् विप्रतिपत्तिविषयमात्रवृत्तिर्न भवति सपक्षेऽपि वर्तमानत्वात्। इदं दूषयति - **केवलान्वयीति** मूलम्। तथा च **सर्वमभिधेयं प्रमेयत्वात्** इत्यत्र पक्षतादशाया-मयमनुपसंहारी भवति, यदा सर्वस्मिन् अभिधेयत्वस्य संशयस्तदा विप्रतिपत्तिविषयमात्रवृत्तित्वं नास्ति इति कृत्वा तत्राव्याप्तिरित्यर्थः। एतदेव विवृणोति - **सर्वस्येति** मूलम्। विप्रतिपत्तिविषयमात्रवृत्तित्वं नाम सकल-विप्रतिपत्तिविषयत्वे वृत्तित्वे सति विप्रतिपत्तिविषयेतरावृत्तित्वम्। तथा च सर्वस्य विप्रतिपत्तिविषयत्वात् विप्रतिपत्तिविषयेतरदप्रसिद्धम्, [254 B] तथा चोक्तलक्षणमशुद्धमित्यर्थः।

अथ टीकाव्याख्या। **तत्रैवेति** टीका। यत्र सद्धेतौ पक्ष एव व्याप्तिग्रहस्तत्र सद्धेतौ पक्षातिरिक्ते व्याप्ति-ग्रहानुकूलाप्रतीतसहचारत्वं वर्तते यतः पक्ष एव व्याप्तिग्रहादिति कृत्वा पक्षातिरिक्तेत्यादिकं नास्ति, तथा च तत्रातिव्याप्तिः। पर्वतो वह्निमान् धूमात् इत्यत्रापि पर्वत एव व्याप्तिग्रहो ज्ञातः न तु महानसादौ, तदा धूमेऽतिव्याप्तिरित्यर्थः। असाधारणविरुद्धयोरतिव्याप्तेश्चेत्यत्राभासं ददाति - **नन्विति**। तथा च यत् पक्षातिरिक्तत्वं चेत् लक्षणे विशेषणं तदा सद्धेतौ अतिव्याप्तिर्भविष्यति, परं तदेव विशेषणं नास्ति, किन्तु व्याप्तिग्रहानुकूला-प्रतीतसहचारत्वमेव विवक्षितम्, तत्तु सद्धेतौ नास्ति पक्षे एवाप्रतीतसहचारत्वादित्यर्थः। **विशेषणवैयर्थ्यमिति** टीका। यथा इदमसाधकं साध्यतदभावोभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वात् इत्यत्र साध्यपदं व्यर्थम्, साध्याभावकोट्युपस्थापकतावच्छेदकरूपवत्त्वात् इत्येवमस्तु, साध्यपदं व्यर्थमित्यर्थः साध्याभावेत्यादि-युक्तत्वात्। **यत्त्विति** टीका। अनैकान्तिकत्वं नाम उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वम्। अत्रावच्छेद-[क]रूपं किं तत्राह - **योग्यताबलादिति** टीका। सर्वमभिधेयं प्रमेयत्वात् इत्यत्र साधारणत्वासाधारणत्व-योरभावात् अनुपसंहारित्वमेव। सर्वस्य पक्षीकृतत्वात् पक्षातिरिक्ते सहचाराग्रहात् अनुपसंहारित्वस्यैव तत्र

योग्यत्वात्। **व्यर्थविशेषणत्वमिति**। पक्षातिरिक्तेति विशेषणं व्यर्थमित्यर्थः। पक्षातिरिक्ते व्याप्तिग्रहानुकूलाऽप्रतीतसहचारत्वम् अत्र व्याप्तीत्यादि एवास्तु असाधकतानुमाने व्यर्थं विशेषणमित्यर्थः। इदं व्याख्यानं दूषयति - **तन्नेति तत्प्रकारि(रे)णेति**। यदि उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं इति अनैकान्तिकलक्षणेऽनुपसंहारित्वेन रूपेणानुपसंहारिणो यदि प्रवेशः स्यात् तदा व्यर्थविशेषणता स्यात्। अनैकान्तिकलक्षणे तु उभयकोट्युपस्थापकतावच्छेदकत्वरूपेणानुपसंहारिणः प्रवेशः, न तु अनुपसंहारित्वेन रूपेण। यथा धूमात् इत्यत्र धूमस्यापि हेतुत्वे धूमत्वेनैव रूपेण नीलधूमस्य प्रवेशो न तु नीलत्वेन रूपेण, तद्वत् इहापीत्यर्थः। तत्प्रकारेणेति अनुपसंहारित्वप्रकारेणेत्यर्थः। **व्यर्थेति** टीका। पक्षातिरिक्तेति विशेषणस्य व्यर्थत्वाभावात् यतस्तेन रूपेणानुपसंहारित्वस्य प्रवेश एव नास्तीत्यर्थः। **अन्यथेति** टीका। यदि तत्प्रकारेणोपस्थितिं विनापि व्यर्थविशेषणत्वं स्यात् तदेत्यर्थः। तथा च धूमात् इत्यत्रापि योग्यताबलात् नीलधूम एव प्रायो वर्तते, ततस्तत्रापि नैल्यस्य व्यर्थविशेषणता स्यात्। एतदेव विवृणोति - **नीलधूमवदिति**। स्पष्टम्। अन्यमतमाह - **अनैकान्तिकत्वेनेति** टीका [255 A]। अन्येषामयमभिप्रायः - अनैकान्तिकत्वं नाम नोभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं किन्तु साधारणासाधारणानुपसंहार्यन्यतमत्वम्, तथा च लाघवात् इदमसाधकम् अनुपसंहारित्वात् इत्येवास्तु साधारणत्वेत्याद्युक्तं व्यर्थम् इत्याहुः केचित्। ननु मूले केवलान्वयिसाध्यकेति किमर्थमुक्तम् ?, व्यतिरेकिसाध्यको(के)ऽनुपसंहारिण्यपि लक्षणमव्याप्तमेवेत्यत आह - **यद्यपीति** टीका। व्यतिरेकिसाध्यकोऽप्यनुपसंहारी भवत्येव। सर्वमनित्यं प्रमेयत्वात् इत्यत्र सर्वस्य पक्षीकृतत्वेन विप्रतिपत्तिविषयातिरिक्तमप्रसिद्धमित्यर्थः। तथा च व्यतिरेकिसाध्यकेऽनित्यत्वरूपसाध्यके प्रमेयत्वेऽव्याप्तिस्तदवस्थैव यतस्तत्रापि विप्रतिपत्तिविषयातिरिक्तं प्रसिद्धं नास्तीति भावः। समाधत्ते - **तथापीति** टीका। तस्य प्रमेयत्वस्य नित्यत्वसाध्यकत्वेन साधारणत्वमपि तिष्ठति। प्रेमयत्वस्यानित्यत्वाभाववद्वृत्तित्वात् साधारणत्वमपि वर्ततेऽनुपसंहारित्वं तस्य नास्त्येवेति कदाचिद् वदिष्यति परः इति कृत्वा निःसन्दिग्धाव्याप्तिदानार्थं केवलान्वयिसाध्यकेत्युक्तम्। तथा च सर्वमनित्यं प्रमेयत्वात् इत्येनं साधारणत्वभात्वा(?भावात्) परित्यज्य उदाहरणान्तरम् यथा सर्वमभिधेयं प्रमेयत्वात् इत्यत्र साधारणत्वासाधारणत्वयोरभावात् अनुपसंहारित्वमेवेति कृत्वाऽत्रानुपसंहारिणि अव्याप्तिर्निश्चितेत्यर्थः। क्वचिदतिव्याप्तेरिति पाठः, तं व्याचष्टे - **नन्विति** टीका। तथा च मात्रपदस्यार्थः कात्स्र्न्यं साकल्यं वा व्यवच्छेदार्थकं वा ? आद्ये दूषणमाह - केवलान्वयिसाध्यकेऽतिव्याप्तिरित्यर्थः। यथा सर्वमभिधेयं प्रमेयत्वात् इत्ययं सद्धेतुः, अत्रापि सकलविप्रतिपत्तिविषयवृत्तित्वं वर्तते यतः सर्वस्मिन् अभिधेयत्वस्य विप्रतिपत्तिः तत्र सर्वस्मिन् प्रमेयत्वस्य हेतोर्वर्तमानत्वात्, सकलविप्रतिपत्तिविषयवृत्तित्वं वर्तते इति कृत्वा तत्रातिव्याप्तिः। एतदेव विवृणोति - **व्याप्तिज्ञानस्येति**

टीका। तथा च सर्वमभिधेयं प्रमेयत्वात् इत्ययं सद्धेतुरेव। यदि प्रमेयत्वेऽनुपसंहारित्वज्ञानदशायां व्याप्तिर्न ज्ञायते तदा पुरुषदोष एव न तु वस्तुदोषः। तत्रातिव्याप्तिः सुस्थैवेत्यर्थः। अन्त्ये आह - **सर्वस्य चेति** टीका। यदि मात्रपदस्य व्यवच्छेद्यपरत्वं तदा सर्वं यदा पक्षीकृतं तदा विप्रतिपत्तिविषयातिरिक्ताप्रसिद्धेः सर्वस्यैव विप्रतिपत्तिविषयत्वात्। दोषान्तरं वक्तुमाह - **उपलक्षणमिति**। एतदेवाह - शब्दोऽनित्यः शब्दत्वात् इत्यत्र शब्दत्वस्य हेतौ विप्रतिपत्तिविषयः सर्वोऽपि शब्दः, तन्मात्रवृत्तित्वं शब्दत्वस्य हेतोरस्त्येवेति कृत्वाऽसाधारणेऽतिव्याप्तिः, तथा च विप्रति[पत्ति]मात्रविषयवृत्तित्वरूपं दुष्टमित्यर्थः।

**उच्यते। व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहारी, स चान्वयेन व्यतिरेकेण वा सर्वस्य पक्षत्वे दृष्टान्ताभावात् घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यादौ साध्यसाधनसाहचर्याज्ञानात् तस्य विरुद्धत्वाज्ञानदशायामनुपसंहारित्वेनेष्टत्वात् केवलान्वयिधर्मावच्छिन्नपक्षको वा सर्वमभिधेयं प्रमेयत्वादिति सद्धेतौ न केवलान्वयी पक्षतावच्छेदको निश्चितसाध्यवद्वृत्तित्वात् विप्रतिपत्त्या साध्यानिश्चयदशायां पक्षत्वे तदनुपसंहार्येव व्यतिरेकिसाध्यके साध्याभाववद्वृत्तित्वाज्ञानदशायामिदं दूषणं तदवगमेऽपि साधारणसङ्कर एव, एवं व्याप्यत्वासिद्धेर्ज्ञाने तदुद्भावने चायं व्यभिचारवदुपजीव्यत्वाददोषः, घटाकाशोभयवृत्तिद्वित्वाश्रयत्वं च विरुद्धमेव। एतेनानुपसंहारित्वप्रतिसन्धाने यदि व्याप्तिग्रहस्तदानुमितिरेव तदभावे व्याप्यत्वासिद्धिरेवेति निरस्तमुपजीव्यत्वादिति।**

अथ मूलम्। अनुपसंहारिलक्षणम्। सिद्धान्तमाह - **व्याप्तीति**। व्याप्तिग्रहस्यानुकूलः परम्परया साक्षात् वा प्रयोजकः, [255 B] एतादृश एकस्मिन् धर्मिणि उपसंहारो नाम सहचारः, स चान्वयसहचारो वा भवतु व्यतिरेकसहचारो वा भवतु, तस्य यत्राभावः सोऽनुपसंहारी। एतदेव विवृणोति - **स चेति**। तथा चान्वयसहचारोऽपि यत्र नास्ति व्यतिरेकसहचारोऽपि नास्ति, एतत्सहचारद्वयं कथं तत्र नास्तीत्यत आह - **सर्वस्य पक्षत्वे** इति मूलम्। यथा सर्वमनित्यं प्रमेयत्वात् इत्यत्र सर्वं पक्षीकृतम्, तदा पक्षातिरिक्तं किमपि नास्तीति अन्वयसहचारो नास्ति अन्वयदृष्टन्ताभावात् विपक्षाभावाच्च व्यतिरेकदृष्टान्ताभावात् व्यतिरेकसहचारोऽपि नास्तीत्ययमनुपसंहारी। ननु घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वात् इत्यत्राप्यन्वयसहचारो नास्ति। आकाशे यद्यपि हेतुर्वर्तते तथापि तत्र साध्यं नास्तीति कृत्वाऽन्वयसहचारो नास्ति। अनित्यत्वाभावो

यद्यपि आकाशे वर्तते तथापि हेत्वभावो नास्तीति व्यतिरेकसहचारोऽप्यत्र नास्ति। तथा च व्याप्तिग्रहानुकूल एकधर्मिणि पक्षादौ अन्वयसहचारो वा व्यतिरेकसहचारो वाऽत्रानुमानेऽपि नास्तीति अयमप्यनुपसंहारी स्यादित्यत आह - **घटोऽनित्य** इति मूलम्। तथा चैतस्य हेतोः पक्षे अनित्यत्वनिश्चयो नास्तीति कृत्वा यत्रानित्यत्वं तत्र घटाकाशोभयवृत्तिद्वित्वाश्रयत्वाभाव इति कृत्वा हेत्त्वभावव्याप्तत्वमनित्यत्वस्य वर्तते इत्यतो विरुद्धत्वेनोद्भाव्यते। वस्तुगत्या तु अयं साधारण एवानित्यत्वाभाववति गगने हेतोर्वर्तमानत्वात्। परमार्थतः साधारणस्यास्य हेत्वभावव्याप्तत्वेन चेत् ज्ञातस्तदा विरुद्धत्वेनोद्भाव्यते तदा विरुद्ध एव। ननु यदा विरुद्धत्वेनापि ज्ञानं नास्ति पक्षे च हेतुसाध्ययोरुपसंहारोऽपि ज्ञातो नास्ति घटेऽनित्यत्वस्य साध्यस्य सन्देहात् तदानीमनुपसंहारी स्यादेवेत्यत आह - **विरुद्धत्वाज्ञानदशायामि**ति मूलम्। तथा चास्य विरुद्धत्वाज्ञानदशायामनुपसंहारित्व-मिष्टमेवेत्यर्थः। इदमत्र तत्त्वम्। साध्याभाववद्वृत्तित्वं साधारणत्वम्। साध्यवद्व्यावृत्तत्वम् असाधारणत्वम्। एकधर्मिणि साध्यसाधनयोः सहचाराभावोऽनुपसंहारित्वम्। तथा च एतेषां त्रयाणां रूपाणामेकस्मिन् धर्मिणि समावेशे यथासम्भवं विद्यमानेऽपि यथा यत्र हेतौ त्रयाणां समावेशः स त्रिविधो भवत्येव परं यद् रूपं यदा उपस्थितं तदा तेन रूपेण स तथा व्यवह्रियते। उपधेयसङ्करेऽपि उपाधेरसङ्करस्तूक्त एव। तथा च घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वात् इत्यत्र अनित्यत्वरूपसाध्याभाववति गगने हेतोर्विद्यमानत्वात् साधारणत्वम्, विरुद्धोऽपि यथाऽयं साध्यस्य हेत्वभावव्याप्तत्वात् यत्र यत्र साध्यं तत्र तत्र हेत्त्वभाव इति ततो यत्रानित्यत्वं तत्र तत्र घटाकाशोभयवृत्तिद्वित्वाश्रयत्वाभावो यथा पटे इति विरुद्धत्वम्। तदापि यदुपस्थितं भवति स तदा तेन व्यवह्रियते। अथानुपसंहारिणो [256 A] द्वितीयं लक्षणमाह - **केवलान्वयी**ति मूलम्। केवलान्वयिधर्मे-णावच्छिन्ना पक्षता यस्य स तथा। यथा प्रमेयमनित्यं प्रमेयत्वात् इत्यत्र प्रमेयत्वावच्छिन्ना पक्षता। ननु सर्व-मभिधेयं प्रमेयत्वात् इत्यत्र केवलान्वयी धर्मः सर्वत्वमेव तदवच्छिन्ना पक्षता अस्ति परमनुपसंहारित्वं नास्ति, तस्य सद्धेतुत्वादित्यत आह - **सर्वमभिधेयमि**ति मूलम्। **सर्वमभिधेयमित्यत्र सर्वत्वं न पक्षता-**वच्छेदकम्। कुतः ? अभिधेयत्वस्य तत्र निश्चयात् सर्वत्वस्य साध्यसन्देहविषयतानवच्छेदकत्वात्। न च साध्यसन्देहाभावादनुमानं किमर्थमिति वाच्यम्, सिषाधयिषया निश्चितेऽप्यनुमानसम्भवात्। ननु अभिधेयत्वस्य यथा(दा) सन्देहो यथाऽभिधेयत्वं सर्वनिष्ठात्यन्ताभावप्रतियोगि न वा वह्निः पर्वतवृत्तिर्न वेति वत् तदानीं सद्धेतावपि लक्षणमिदमतिव्यापकं केवलान्वयिधर्मावच्छिन्नपक्षकत्वं वर्तत एवेत्यत आह - **विप्रतिपत्ती**ति मूलम्। तथा च सर्वस्मिन् यदि अभिधेयत्वस्य निश्चयो नास्ति विप्रतिपत्त्या वादिविरुद्धवाक्यद्वयेन सन्देहस्य विद्यमानत्वात् तस्यां दशायामस्याप्यनुपसंहारित्वमिष्टमेवेत्यर्थः। तथा च तस्यापि लक्ष्यत्वात् नातिव्याप्तिरिति भावः। ननु सर्वमनित्यं प्रमेयत्वात् इत्यत्र साधारणेऽपि केवलान्वयिधर्मावच्छिन्नपक्षकत्वादतिव्याप्तिरित्यत

आह - **व्यतिरेकीति** मूलम् । व्यतिरेकिसाध्यके उक्तरूपे साध्याभाववद्वृत्तित्वमपि वर्तते साध्यसन्देहदशायां केवलान्वयिधर्मावच्छिन्नपक्षकत्वमपि वर्तते इत्येवमनयोरुपधेयसङ्करेऽपि हेत्वाभाससङ्करेऽपि यदा साध्याभाववद्वृत्तित्वज्ञानं नास्ति तदानीमनुपसंहारित्वेनैवोद्भावनं यतः साधारणत्वे[न] नोद्भावयितुं शक्यते साध्याभावस्यानित्यत्वाभावस्य कुत्रापि निश्चयाभावात् यतः सर्वस्य पक्षीकृतत्वात् सर्वत्र साध्यसन्देहस्य विद्यमानत्वात् । साधारणस्तु तदे(दै)वोद्भावयितुं शक्यते यदि कुत्रापि साध्याभावनिश्चयो भवति, तदा तत्र हेतोर्विद्यमानत्वेन साधारणत्वेनोद्भावनं स्यात् । न चैवमस्ति । तस्मात् साधारणत्वमस्य नास्तीत्यनुपसंहारित्वमेवास्येति । तथा च प्रमेयत्वस्य साध्याभाववद्वृत्तित्वाज्ञानदशायामनुपसंहारित्वेनैवोद्भावनम् । **तदवगमे** इति मूलम् । यदि प्रमेयत्वस्य साध्याभाववद्वृत्तित्वज्ञानं तदाऽयं साधारण एव, तदानीमनुपसंहारी न भवति । कथं न भवतीति चेत् यत्रैव साध्याभावस्य निश्चयो जातस्तत्रैव साध्यसन्देहो नास्ति इति कृत्वा केवलान्वयिधर्मावच्छिन्नपक्षकत्वाभावात् । यतः सर्वत्वेनानित्यत्वस्य सन्देहो नास्ति अतः सर्वत्वं न तत्र पक्षतावच्छेदकं तथा च सोऽनुपसंहारी न भवति । सङ्करस्तु सन्देहाभिप्रायेण । यदा साध्यस्य सन्देहस्तदा अनुपसंहारी । यदा तु साध्यसन्देहो न स्थितस्तदा साधारण एवेति । नन्व[नु]पसंहारी [256 B] व्याप्यत्वासिद्ध एव कुतो न भवति । व्याप्यत्वासिद्धेऽपि व्याप्तिग्राहकप्रमाणं नास्ति अत्रापि व्याप्तिग्राहकं प्रमाणं नास्तीत्यत आह - **एवमिति** मूलम् । यथा व्यभिचारे बाध उपजीव्यत्वात् पृथक् । यथाऽयोगोलकः धूमवान् वह्नेः अयं व्यभिचारी भवति, यदि अयोगोलकपक्षके हेतौ साध्यं चेन्नास्ति तदा साध्याभाववति हेतोर्विद्यमानत्वात् । स्वरूपासिद्धः यदि च ह्रदादिपक्षके ह्रदो धूमवान् वह्नेः इत्यत्र वह्निः स्वरूपासिद्धः । तथा च बाधस्य स्वरूपासिद्धव्यभिचाराभ्यां पृथगुदाहरणं नास्ति तथापि व्यभिचारे उपजीव्यत्वात् बाधः पृथग् हेत्वाभासः । यतः साध्याभावप्रमया विना साध्याभाववद्वृत्तित्वरूपो व्यभिचारो हि न संभवति अतो बाधो व्यभिचारस्य उपजीव्यत्वात् पृथग् हेत्वाभासः । तद्वत् यद्यपि व्याप्यत्वासिद्धेऽयमनुपसंहारी [उप]जीव्यो यथाऽन्वयेन वा व्यतिरेकेण वा [व्या]प्त्युपसंहाराभावादुप(दनुप)संहारी व्याप्यत्वासिद्धस्योपजीव्यो भवति, उपसंहाराभा[वाभा]वे व्याप्यत्वासिद्धो न भवति । व्याप्यत्वासिद्धस्योपजीव्यत्वात् अनुपसंहारी पृथग् हेत्वाभासः । तत्र व्याप्यत्वासिद्धो मास्तु, अनुपसंहारिणैव चरितार्थत्वात् इति न च वाच्यम्, व्याप्यत्वासिद्धज्ञानस्यापि व्यभिचारादिज्ञानवत् पृथक् प्रतिबन्धकत्वात् । ननु घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वात् इत्यत्र यदा आकाशे घटाकाशोभयवृत्तिद्वित्वाश्रयत्वं ज्ञातम् अनित्यत्वाभावश्च ज्ञातः तदा साध्याभावव्याप्तत्वात् विरुद्ध एवायम्, कथमनुपसंहारी उक्त इत्यत आह - **घटेति** मूलम् । न हि अयं साध्याभावव्याप्तत्वेन ज्ञानदशायामनुपसंहारी उक्तः किन्तु तदज्ञानदशायाम्, साध्याभावव्याप्तत्वज्ञानदशायां तु विरुद्धत्वमेवैतस्य इति पूर्वमुक्तमेव । कस्यचिन्मतमुट्टङ्क्य दूषयति -

**एतेनेति** मूलम् । अनुपसंहारित्वेन ज्ञाते सर्वमनित्यं प्रमेयत्वात् इत्यत्र व्याप्तिग्रहस्तिष्ठाति न वा ? यदि व्याप्तिग्रहस्तिष्ठति तदाऽनुमितिरेव । यदा तु व्याप्तिग्रहो नास्ति तदा व्याप्यत्वासिद्धिरेव दूषणं तथा चायमनुपसंहारी एव न भवति इति । 'एतेन'आरभ्य 'निरस्तम्' इत्यन्तेनान्वयः । इदं दूषयति - **उपजीव्यत्वादिति** मूलम् । यत्र व्याप्त्युपसंहारो नास्ति तत्र व्याप्यत्वासिद्धो यद्यपि वर्तते तथापि व्याप्यत्वासिद्धौ उपजीव्यत्वात् अनुपसंहारी व्यभिचारे बाधवत् पृथग् हेत्वाभासः ।

अथ टीका । **व्याप्तीति** टीका । नन्वनुपसंहारिणि व्याप्तिग्रहानुकूल एकधर्म्युपसंहाराभावो नास्ति, सन्देहरूपोपसंहारस्य व्याप्त्यनुकूलस्य विद्यमानत्वात् व्याप्तिग्रहे सहचारज्ञानस्य विशेषणज्ञानत्वेन कारणत्वात् । तथाहि सामानाधिकरण्यावच्छेदकं रूपं व्याप्तिः । धूमवह्नौ सामानाधिकरण्यावच्छेदकं धूमत्वम्, तदेव व्याप्तिः । तत्र सामानाधिकरण्यं विशेषणम् [257 A], विशेषणज्ञानस्य संशयनिश्चयसाधारणस्य विशेषणज्ञानत्वेनैव कारणत्वम्, तथा च सन्देहरूपं सामानाधिकरण्यरूपं सहचारज्ञानमत्र तिष्ठत्येव, यथा सर्वमनित्यं प्रमेयत्वात् इत्यत्र सर्वस्मिन् हेतुनिश्चयो वर्तते अनित्यत्वस्य सन्देहात् साध्यसन्देहात् साध्यसहचारसन्देहस्तिष्ठत्येव, अन्यत्रानुमाने पक्षातिरिक्ते हेतुमति साध्यनिश्चयो वर्तते परं पक्षे नास्तीति कृत्वा साध्यसन्देहोऽनुकूल एव, अनुपसंहारिणि तु पक्षातिरिक्तेऽपि निश्चयाभावा[त्] सर्वत्र पक्षसपक्षेषु सन्देहात् दूषणं सः, तथा च लक्षणम् अनुपसंहारिणि अव्याप्तं तत्र साध्यसन्देहस्य विद्यमानत्वादित्यत आह - **तदनुकूलत्वं चेति** टीका । तदनुकूलः सहचारनिश्चयो ग्राह्यः । तथा चोपसंहारस्य या व्याप्तिग्रहानुकूलता सा सहचारनिश्चयत्वेन ग्राह्या । यदि सहचारनिश्चयत्वेन व्याप्तिग्रहानुकूलता नास्ति तदा बाधकमाह - **अन्यथेति** टीका । यदि सहचारनिश्चयत्वेन कारणता न स्यात् तदाऽनुपसंहारिणि सन्देहसाधारणसहचारज्ञानस्य विद्यमानत्वात् व्याप्तिधीप्रसङ्गादित्यर्थः । तत्रापि यदि व्याप्तिग्रहस्तदा अनुमितिः स्यादिति भावः । अत्र लक्षणे पूर्वपक्षयति - **नन्विति** टीका । अनुपसंहारिण्यपि व्याप्तिग्रहानुकूलसहचारनिश्चयाभावो नास्ति व्याप्तिग्रहानुकूलयत्किञ्चित्सहचारनिश्चयस्य विद्यमानत्वात्, यथा सर्वमनित्यं प्रमेयत्वात् इत्यत्र व्याप्तिग्रहानुकूलसहचारनिश्चयस्य विद्यमानत्वात् । तथाहि यत्र प्रमेयत्वं तत्र अभिधेयत्वम् इत्येवंरूपव्याप्तिग्रहानुकूलसहचारनिश्चयस्य विद्यमानत्वात् । तन्निरासार्थं **स्वव्याप्तीति** । प्रकृतसाध्यप्रकृतसाधनयोर्या व्याप्तिस्तद्ग्रहानुकूलः सहचारनिश्चयस्तदभावो विवक्षणीयः । ततः किमित्यत आह - **तथा चेति** टीका । एवं यदि क्रियते तदा केवलव्यतिरेकिण्यतिव्याप्तिः । यथा पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् इत्यत्र यथा यत्र इतरभेदाभावस्तत्र पृथिवीत्वाभाव इत्ययं यः सहचारनिश्चयः स साध्याभावसाधनाभावयोरेव व्याप्तिग्राहकः, न तु साध्यसाधनयोः । ततः साध्यसाधनयोर्व्याप्तिग्रहानुकूलसहचारनिश्चयस्तत्रापि नास्तीति व्यतिरेकिण्यतिव्याप्तिः । एतदेवाह -

**तादृशेति** टीका। साध्यसाधनयोर्व्याप्तिग्रहानुकूलसहचारनिश्चयो नास्तीत्यर्थः। समाधत्ते - **व्यतिरेकसहचारनिश्चयस्येति** टीका। यन्मते व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते यथा यत्र वह्न्यभावस्तत्र धूमाभाव इति व्यतिरेकव्याप्त्याऽन्वयव्याप्तिर्गृह्यते, ययोरभावयोः सहचारस्तत्प्रतियोगिनोरपि सहचार इति न्यायात्। एवं सति व्यतिरेकसहचारस्यापि स्वव्याप्तिग्रहानुकूलत्वं [257 B] तिष्ठत्येवेति स्वव्याप्तिग्रहानुकूलसहचारनिश्चयाभावो नास्तीति न तत्र लक्षणस्यातिव्याप्तिरिति समाधानाम्। ननु यन्मते व्यतिरेकसहचारेणान्वयव्याप्तिर्न गृह्यते तन्मते का गतिरित्यत आह - **मतान्तरे त्विति** टीका। व्याप्तिपदमेवान्वय[व्यतिरेक]व्याप्तिसाधारणं कर्तव्यम्, तत् किंरूपमित्यत आह - **स्वसाध्यसिद्धीति** टीका। स्वपदेन प्रकृतं यत् साध्यं तत्सिद्ध्यनुकूला या व्याप्तिः अन्वयव्यतिरेकोभयरूपा तत्परं व्याप्तिपदं कर्तव्यम्। तथा च स्वसाध्यसिद्ध्यनुकूला व्याप्तिरन्वयव्याप्तिरपि भवति व्यतिरेकव्याप्तिरपि भवति तथापि व्यतिरेकिणि अन्वयव्याप्तिग्रहानुकूलः सहचारनिश्चयो नास्ति तथापि स्वसाध्यसिद्ध्यनुकूला व्याप्तिर्व्यतिरेकव्याप्तिस्तद्ग्रहानुकूलः सहचारनिश्चयो वर्तते इति तदभावो नास्तीति न तत्रातिव्याप्तिरित्यर्थः। एतदेव विवृणोति - **तथा चेति** टीका। व्यतिरेकिणि स्वसाध्यसिद्ध्यनुकूला व्यतिरेकव्याप्तिरेव भवति। ततः किमित्यत आह - **तद्ग्रहानुकूलश्चेति**। स्वसाध्यसिद्ध्यनुकूला या व्याप्तिस्तद्ग्रहानुकूलश्चेत्यर्थः। एतदुपसंहरति - **तस्य चेति** टीका। तस्य व्यतिरेकसहचारस्य प्रतीतिरेव वर्तते व्यतिरेकसहचारनिश्चयाभावो नास्ति इति कृत्वा व्यतिरेकिणि नातिव्याप्तिरित्यर्थः। अत्राशङ्कते - **नन्विति** टीका। पर्वतो वह्निमान् धूमात् इत्यत्र धूमस्याज्ञानदशायां धूमेऽतिव्याप्तिः, तत्रापि वह्निव्याप्तिग्रहानुकूलसहचारनिश्चयो नास्ति धूमस्यैवाज्ञानात् इत्याशङ्कार्थः। सिद्धान्ती मध्ये शङ्कते - **न चेति** टीका। तथा च व्याप्तिग्रहानुकूलसहचारनिश्चयाभावो यत्र हेत्वभिमते इति विवक्षितं तत्र हेत्वभिमतपदस्यार्थो हेत्वाभासत्वमित्यर्थः, तेन धूमेऽज्ञानदशायां हेत्वाभासत्वाभावात् नातिव्याप्तिरित्याशङ्कार्थः। समाधत्ते - **जलहृदेति** टीका। जलहृदो वह्निमान् धूमात् इति स्वरूपासिद्धेऽज्ञायमानदशायां लक्षणसत्त्वात् हेत्वाभासत्वाच्चातिव्याप्तिरित्यर्थः। पुनः शङ्कते - **न च साध्यसहचारेति** टीका। साध्यसहचारस्य यो निश्चयः तस्य विरोधी यो हेत्वाभासोपाधिस्तद्वत्त्वं यथा सर्वमनित्यं प्रमेयत्वात् इत्यत्र अनित्यत्वसहचारनिश्चयविरोधिहेत्वाभासतोपाधिरनुपसंहारित्वं भवति यतः सर्वस्मिन् अनित्यरूपसाध्यसन्देहात् सर्वस्य च पक्षत्वात् साध्यनिश्चयः कुत्रापि नास्तीति साध्यसहचारनिश्चयविरोधित्वमनुपसंहारित्वस्य वर्तते एवेति शङ्कार्थः। दूषयति - **विरुद्धेऽपीति**। **विरुद्धरूपो** यो हेत्वाभासोपाधिः सोऽपि साध्यसहचारनिश्चयविरोधी भवत्येवेति तत्र लक्षणम(स्या)तिव्याप्तिरित्यर्थः। अयं गौः अश्वत्वात् इत्यत्र अश्वत्वे गोत्वविरुद्धत्वज्ञानमश्वत्वे [258 A] गोत्वसहचारनिश्चयविरोधि भवत्येवेत्यर्थः। समाधत्ते - **अनुपसंहारिलक्षणं स्वसाध्येति** टीका। स्वशब्देन प्रकृतहेतुः, तस्य यत् साध्यं तस्य या सिद्धिः तदनुकूलो यो व्याप्तिग्रहः तदनुकूलो यः सहचारनिश्चयः तन्निश्चयविरोधित्वावच्छिन्नो यो

निश्चयः तद्विरोधी यो हेत्वाभासतोपाधिः तद्वत्त्वस्य । यथा सर्वमनित्यं प्रमेयत्वात् इत्यत्र स्वशब्देन प्रमेयत्वं हेतुः, तस्य यत् साध्यम् अनित्यत्वं तस्य या सिद्धिः अनुमितिः तदनुकूलो यो व्याप्तिग्रहः अन्वयव्याप्तिग्रहो व्यतिरेकव्याप्तिग्रहो वा तदनुकूलो यः सहचारनिश्चयः अन्वयसहचारनिश्चयः प्रमेयत्वस्य व्यतिरेकाभावात् यथा यत्र यत्र प्रमेयत्वं तत्र तत्र अनित्यत्वम् एतादृशो यः सहचारनिश्चयः तद्विरोधित्वावच्छिन्नो यो निश्चयः अन्वयसहचारनिश्चयो वा व्यतिरेकसहचारनिश्चयो वा तस्य विरोधी यो हेत्वाभासतोपाधिरनुपसंहारित्वं भवति । तथा चानुपसंहारित्वज्ञाने विद्यमाने कोऽपि सहचारनिश्चयो नास्तीति भावः । हेत्वाभासतोपाधिरित्येवोच्यमाने बाधेऽतिव्याप्तिः, अत उक्तं सहचारनिश्चयत्वावच्छिन्नविरोधीति पदम् । बाधस्तु सहचारनिश्चयत्वावच्छिन्नविरोधी न भवति । यतो ह्रदो वह्निमान् धूमात् इत्यत्र ह्रदे बाधे विद्यमानेऽपि अन्वयसहचारः साध्यसाधनयोर्वर्तते इति अथ सहचारनिश्चयत्वावच्छिन्नविरोधिहेत्वाभासतोपाधिमत्त्वमित्युच्यमानेऽसम्भवः । यतः सर्वमनित्यं प्रमेयत्वात् इत्यत्र सहचारनिश्चयत्वावच्छिन्नविरोधिहेत्वाभासत्वं नास्ति । प्रमेयत्वस्य घटेन सह सहचारनिश्चयो वर्तते यथा प्रमेयत्वं कपाले घटोऽपि तत्रेति एकत्र कुत्रापि सहभावः सहचारः सोऽस्ति परं व्याप्तिर्नास्ति अत उक्तं व्याप्तिग्रहानुकूलसहचारपदम् । अन्वयव्यतिरेकसहचारसाधारण्यार्थमाह - **स्वसाध्यसिद्ध्यनुकूले**ति । तथा च स्वसाध्यसिद्ध्यनुकूलो यो व्याप्तिग्रहः तदनुकूलसहचारनिश्चयत्वम् अन्वयव्यतिरेकसहचारयोः साधारणः । विरुद्धेऽतिव्याप्तिं निराकरोति - **विरुद्धत्वस्य चे**ति टीका । विरुद्धत्वं तु सहचारनिश्चयत्वावच्छिन्नविरोधी न भवति । विरुद्धत्वज्ञाने विद्यमानेऽपि व्यतिरेकसहचारनिश्चयो जायते एव यथा अयं गौः अश्वत्वात् इत्यत्र अश्वत्वे गोत्वविरुद्धत्वज्ञाने विद्यमानेऽपि गोत्वाभावाश्वत्वाभावयोः सहचारनिश्चयात् । तथा च विरुद्धत्वस्य सहचारनिश्चयत्वावच्छिन्नविरोधित्वं नास्ति उक्तविरोधित्वज्ञाने विद्यमानेऽपि व्यतिरेकसहचारनिश्चयस्य विद्यमानत्वात् । अतो विरुद्धत्वे नातिव्याप्तिरिति भावः । [258 B] अनुपसंहारिणि उक्तलक्षणं योजयति - **अनुपसंहारिणि त्वि**ति टीका । सर्वमनित्यमित्यत्र सर्वस्य पक्षत्वात् प्रमेयमात्रमेव पक्षः । तेन न हेतोः साध्यसहचारनिश्चयो न वा साध्याभावस्य हेत्वभावसहचारनिश्चय इति सहचारत्वावच्छिन्नविरोधित्वमनुपसंहारित्वे वर्तते एवेति अत्राशङ्कते - **न चे**ति टीका । तथा च केवलान्वयिसाध्यकेऽनुपसंहारिणि अव्याप्तिः, तथाहि सर्वमभिधेयं प्रमेयत्वात् इत्यत्र व्यतिरेकसहचारस्याभावात् । स्वसाध्यसिद्ध्यनुकूलव्याप्तिग्रहानुकूलसहचारनिश्चयो यो व्यतिरेकसहचारनिश्चयः स नास्तीति कृत्वाऽव्याप्तिरित्यर्थः । समाधत्ते - **तत्रान्वयमात्रस्यैवे**ति । तत्र केवलान्वयिनि अन्वयमात्रस्यैव स्वसाध्यसिद्ध्यनुकूलतया तद्ग्रहानुकूलः सहचारनिश्चयोऽन्वयसहचारनिश्चय एव । न हि लक्षणमध्ये स्वसाध्यसिद्ध्यनुकूलव्याप्तिग्रहानुकूलव्यतिरेकसहचारनिश्चयत्वेन प्रवेशः येन लक्षणेऽस्य केवलान्वयिनि अव्याप्तिः स्यात् । तथा च व्यतिरेकसहचारत्वेन प्रवेशो नास्ति किन्तु सहचारत्वेनैव, स च

सहचारनिश्चयोऽन्वयसहचारनिश्चयस्तिष्ठत्येवेति कृत्वा उक्ताऽव्याप्तिर्नास्तीत्यर्थः । विरुद्धत्वाज्ञानेऽपीति मूलं व्याचष्टे - **विरुद्धत्वेति** । यद्यपि विरुद्धत्वज्ञानदशायामपि उक्तलक्षणसत्त्वात् साध्यसिद्ध्यनुकूलेत्यादिलक्षणं वर्तते तदानीमनुपसंहारित्वं वर्तते एव । ननु यदि विरुद्धत्वाज्ञानदशायामप्यनुपसंहारित्वं वर्तते अन्वयसहचारो नास्ति ततोऽनुपसंहारित्वमस्ति तथापि तदानीमनुपसंहारित्वं नोद्भावनीयं किन्तु विरुद्धत्वमेवोद्भावनीयम् । ननु विरुद्धत्वज्ञानदशायामनुपसंहारित्वमेव नास्ति । कथं नास्ति ? स्वसाध्यसिद्ध्यनुकूलव्याप्तिग्रहानुकूल-सहचारनिश्चयत्वावच्छिन्नव्यतिरेकसहचारनिश्चयस्तिष्ठत्येव । यथा अयं गौः अश्वत्वात्, यत्र यत्र गोत्वाभावस्त-त्राश्वत्वाभावो यथा पटे तथा च तादृशानुकूलसहचारनिश्चयत्वावच्छिन्नो व्यतिरेकसहचारनिश्चयस्तिष्ठत्येव । तथा च विरुद्धत्वज्ञानदशायामनुपसंहारित्वं कथं स्यादित्यत आह - **एतच्चेति** । यत् विरुद्धत्वज्ञानदशाया-मप्यनुपसंहारित्वमुक्तं तत् अन्वयसहचारो नास्तीत्यभिप्रायेण । अथ रहस्यमाह - **वस्तुत** इति टीका । तत्र विरुद्धे अयं गौः अश्वत्वात् इत्यत्रानुपसंहारिलक्षणमेव नास्ति । कथं नास्ति ? स्वसाध्यसिद्ध्यनुकूलव्याप्ति-ग्रहानुकूलो व्यतिरेकसहचारनिश्चयस्तिष्ठत्येव गोत्वाभावाश्वत्वाभावयोः पटे सहचारस्य विद्यमानत्वादिति कृत्वाऽनुपसंहारिणो लक्षणमेव तत्र नास्तीति न तत्रातिव्याप्तिः । अथोत्तरग्रन्थे आभासं [259 A] लापयति - **नन्विति** टीका । तथा चानुपसंहारी स्वसाध्यसिद्ध्यनुकूलसहचारग्रहाभावः पर्यवसन्नः । स चानुमितौ यत् कारणमात्ममनःसंयोगः तदभाववत् कारणाभावमात्रम्, ननु(न तु) अनुमितिप्रतिबन्धकज्ञानविषयता-वच्छेदकहेत्वाभासोपाधिमत्त्वम् इत्यस्य कारणाभावत्वे स्वरूपसत एव प्रतिबन्धकत्वम् न तु तज्ज्ञानं प्रतिबन्धकमित्याभासार्थः । **केवलान्वयीति** टीका । केवलान्वयिधर्मस्य यद्व्यापको यः साध्यसिद्धि-विरोधिसन्देहः तद्विषयवृत्तित्वमनुपसंहारित्वम् । तथा च सर्वमनित्यं प्रमेयत्वात् इत्यत्रानित्यत्वस्य सर्वस्मिन् सन्देहात् सर्वत्वं यः केवलान्वयी धर्मस्तस्य व्यापको भवत्यनित्यत्वस्य सन्देहः यत्र प्रमेयत्वं तत्र अनित्यत्व-सन्देहस्तिष्ठत्येव । एवमुक्तलक्षणमनुपसंहारिणि योजितम् । ननु तथापि सर्वमभिधेयं प्रमेयत्वात् इत्यत्रानुप-संहारिणि इदं लक्षणमव्याप्तम्, अभिधेयत्वस्य केवलान्वयितया स्वसाध्यसिद्धिविरोधिसन्देहो नास्त्येव अभिधेयत्वस्य केवलान्वयितया सन्देहाभावात् इत्यत आह - **तेनेति** टीका । प्रमेयं सर्वं न वेति सन्देहाभावेऽपि प्रमेयत्वं सर्ववृत्ति न वेति सन्देहो भवत्येव । यथा पर्वतो वह्निमान् न वेति पर्वतविशेष्यको वह्नितदभावकोटिकः संशयः अथ च वह्निः पर्वतवृत्तिर्न वेति वह्निविशेष्यकः पर्वतवृत्तित्वतदभावकोटिकः सन्देहो भिन्नः । तद्वत् प्रकृतेऽपि प्रथमस्यासम्भवेऽपि द्वितीयस्य सम्भवात् प्रथमे प्रमेयत्वस्य केवलान्वयितया तदभावासम्भवात् द्वितीये प्रमेयत्वकोटिकसंशयाभावात् सर्ववृत्तित्वकोटिकः संशयो भवत्येव । तथा च साध्यतदभावकोटिकसन्देहो यथा सर्वस्मिन् तद्वृत्तित्वज्ञानं यथा सर्वमनित्यं प्रमेयत्वात् इत्यत्र वर्तते । केवलान्वयिधर्मव्यापकः स्वसाध्यसिद्धि-विरोधी सन्देहः सर्वमनित्यं न वा तद्विषयवृत्तित्वं सर्वमनित्यं प्रमेयत्वात् इत्यनुपसंहारिणि वर्तते । स च सन्देहः

साध्यसन्देहविरोधी भवत्येव तद्वत् सर्वं प्रमेयमभिधेयत्वात् इत्यत्र प्रमेयत्वतदभावकोटिकसन्देहाभावेऽपि प्रमेयत्वं सर्वस्मिन् वर्तते न वेत्येतादृशस्य केवलान्वयिधर्मव्यापकस्वसाध्यसिद्धिविरोधिसन्देहस्य विद्यमानत्वात् यथा प्रमेयत्वं सर्वस्मिन् न वेति सन्देहे विद्यमानेऽपि स्वसाध्यसिद्धिर्न भवत्येव प्रमेयत्वरूपसाध्यसिद्धिर्न भवत्येव। तथा च तादृशसन्देहविषयवृत्तित्वं सर्वमभिधेयं प्रमेयत्वात् इत्यनुपसंहारिणि वर्तत एवेति नाव्याप्तिः। एतदेवाह - **तस्यापी**ति टीका। प्रमयत्वं सर्वस्मिन् वर्तते न वेति सन्देहस्यापीत्यर्थः। इति पूर्वोक्त्या तत्राप्यनुपसंहारिलक्षणं वृत्तिमित्यर्थः। विशेषदर्शनकाली[यया] यत्रानुमित्सयाऽनुमितिसम्भवस्तत्र प्रमेयत्वे सद्धेतौ अतिव्याप्तिं निराकरोति - **न चे**ति टीका। सर्वमभिधेयं प्रमेयत्वात् इत्यत्र सर्वस्मिन् अभिधेयत्वस्य निश्चयात् साधनस्य [259 B] प्रमेयत्वस्यापि निश्चया[द]नुमित्सया यत्रानुमितिर्जायते तत्र सद्धेतौ इदं लक्षणं नातिव्याप्तम्, तत्राभिधेयत्वकोटिकः सन्देह एव नास्ति अनुमित्सया चानुमानसम्भवात् तादृशसन्देहविषय-वृत्तित्वमेव नास्ति केवलान्वयिधर्मव्यापकस्वसाध्यसिद्धिविरोधिसन्देह एव नास्ति इति कृत्वा तत्र नातिव्याप्तिरित्यर्थः। एतदेवाह- **तादृशसंशये**ति। केवलान्वयिधर्मस्य व्यापको यथा यत्र केवलान्वयिधर्म-स्तत्र स सन्देहस्तद्विषयकसन्देहाभावादित्यर्थः। अत्राशङ्कते - **न चे**ति टीका। तथा च द्रव्यगुणकर्मसामान्य-विशेषसमवायाभावा अनित्याः प्रमेयत्वात् इत्यत्राव्याप्तिः, [यतः] केवलान्वयिधर्मावच्छिन्नः संशयो नास्ति सर्वमनित्यं न वा इत्येतादृशसंशयस्य तत्राभावात्। अत्र द्रव्यादीनि सर्वाणि पक्षीभवन्ति तथापि तत्र पक्षता-वच्छेदकः केवलान्वयी धर्मो न भवति, पक्षतावच्छेदकानि तु द्रव्यत्वादीनि भिन्नानि इति कृत्वाऽव्याप्तिः। समाधत्ते - **केवलान्वयी**ति टीका। तथा च यद्यपि केवलान्वयी धर्मोऽत्र पक्षतावच्छेदको नास्ति तथापि केवलान्वयिधर्मव्यापकः संशयस्तिष्ठत्येव यथा यत्र यत्र प्रमेयत्वं तत्र तत्र स संशयः अनित्यत्वसंशयः। कुतः ? प्रमेयत्वमपि द्रव्यादिष्वेव सप्तसु वर्तते, अनित्यत्वसंशयः सोऽपि विषयतासम्बन्धेन द्रव्यादिष्वपि वर्तते, केवलान्वयिधर्मः प्रमेयत्वं तद्व्यापकः उक्तसंशयो भवत्येव। यदि सर्वस्मिन् अनित्यत्वसंशयो न स्यात् तदाऽनुपसंहारित्वमेवास्य न स्यात्। यदि केवलान्वयिधर्मा(र्म)व्यापकः(क)संशयाभावेऽनुपसंहारित्वा-भावादित्याह - **अन्यथे**ति। विवक्षितं द्रव्यगुणेत्युक्तानुमानेऽनुपसंहारित्वं तन्न स्यादित्यर्थः। अत्र शङ्कते - **न चे**ति। तथा च सर्वो धूमवान् वह्निमान् धूमात् इत्यनुपसंहारिणि अव्याप्तिः। सर्वस्मिन् धूमवति वह्निसन्देहात् सोऽनुपसंहारी भवति परमत्र लक्षणं नास्ति, यतः स संशयः केवलान्वयिधर्मव्यापको न भवति। धूमाभाववत्यपि घटादौ प्रमेयत्वस्य (? अयोगोलकादौ वह्नेः) वर्तमानत्वात् तत्र संशयो नास्ति। अव्याप्तिमेव विवृणोति - **सकले**ति टीका। सकलधूमाधिकरणे पक्षीकृते वह्निसंशयो वर्तते। अत्र पूर्वपक्षिणोऽयमेवाभिप्रायः यत्र सर्वस्मिन् हेत्वधिकरणे साध्यसन्देहः सोऽनुपसंहारीति। अयमप्यनु[प]संहारी भवति परं तत्र लक्षणं न गतम्, केवलान्वयि-धर्मव्यापकसन्देहाभावात् अव्याप्तिरित्यर्थः। सिद्धान्तयति - **तस्ये**ति। अनुपसंहारित्वेन स लक्ष्य एव न

भवति। कुतः ? अनुपसंहारी तु स एव भवति यत्रान्वयसहचारो वा व्यतिरेकसहचारो वा सर्वथा न भवेत्। यथा सर्वो धूमवान् वह्निमान् इत्यत्रान्वयसहचाराभावेऽपि व्यतिरेकसहचारस्य विद्यमानत्वात् यथा यत्र वह्न्यभावस्तत्र धूमाभावो यथा ह्रदे इति व्यतिरेकसहचारस्य विद्यमानत्वात्। केवलव्यतिरेकिवदिति। [260 A] केवलव्यतिरेकिणि अन्वयसहचाराभावेऽपि व्यतिरेकसहचारस्य विद्यमानत्वात् व्यतिरेकी यथा सद्धेतुः तथाऽयमपि सद्धेतुरेव नानुपसंहारीत्यर्थः। अत्राशङ्कते - **नन्विति**। तथा च यदनुपसंहारित्वज्ञाने संशयविषयवृत्तित्वज्ञाने संशय उपलक्षणमेव भवति न तु विशेषणम्, संशयविषयकज्ञानस्याप्रतिबन्धकत्वात्। किन्तु स्वरूपसत् तादृशसंशयाक्रान्तप्रमेयमात्रवृत्तित्वज्ञानं यद् वर्तते तद् व्याप्तिज्ञानविरोधितयाऽनुमितिप्रतिबन्धकं वाच्यम्। संशयविषयकं तु संशयाक्रान्तप्रमेयमात्रवृत्तित्वज्ञानं न प्रतिबन्धकम्। संशयस्य ज्ञानाभावेऽपि सर्वस्मिन् यदा संशयो वर्तते तत्संशयाक्रान्तप्रमेयमात्रत्वज्ञाने विद्यमानेऽपि अनुमितिप्रतिबन्धात्। अयमत्र भावः - सर्वमनित्यमित्यत्र सर्वस्मिन् वस्तुमात्रे यदाऽनित्यत्वसन्देहो वर्तते तदैव परं साध्यसहचारनिश्चयो न जायते इति संशयाक्रान्तप्रमेयमात्रवृत्तित्वज्ञानं व्याप्तिज्ञानविरोधितया प्रतिबन्धकं वाच्यम् न तु संशयस्यापि ज्ञानं प्रतिबन्धकम्। ततः किमित्यत आह - **तथा चे**ति टीका। एवं सर्वस्मिन् वस्तुमात्रे यदा संशयो वर्तते तदा साध्यसहचारनिश्चय एव नास्ति, ततः साध्यसहचारनिश्चयाभावे हेतोर्व्याप्तिपक्षधर्मताज्ञानमेव नास्ति इति कृत्वा अनुपसंहारिस्थलेऽज्ञानासिद्धिरेव न तु हेत्वाभासान्तरत्वम्। अयमाशयः - यद्विषयकं ज्ञानमनुमितेरनुमितिकारणीभूतज्ञानस्य वा प्रतिबन्धकं तादृशधर्मवत्त्वं हेत्वाभासत्वम्। यथा बाधे साध्याभाववत्पक्षज्ञानं यद् वर्तते तद् अनुमितिप्रतिबन्धकं भवति, ततस्तस्य हेत्वाभासत्वम्। अनुपसंहारिणि तु प्रमेयत्वस्य सर्ववृत्तित्वज्ञानं तु प्रतिबन्धकमेव न भवति। कुतः ? अनुमितिविषयस्य वाऽनुमितिकारणीभूतज्ञानविषयस्य वाऽभावानवगाहनात्। यथा सर्वमभिधेयं प्रमेयत्वात् इत्यत्र प्रमेयत्वस्य सर्वत्र वृत्तित्वज्ञाने विद्यमानेऽभिधेयत्वानुमितेर्जायमानत्वात् अनुमितिविषयाभावानवगाहनात् अनुमितिकारणीभूतं व्याप्तिज्ञानं पक्षधर्मताज्ञानं वा तदभावानवगाहनात् च। तथा च सर्वस्मिन् अनित्यत्वस्य संशयो वर्तते इति कृत्वा साध्यसहचारनिश्चयः कुत्रापि नास्ति, तदा सहचारनिश्चयाभावे(वः), अनित्यत्वसंशय एव स्वरूपसत् तादृशनिश्चये प्रतिबन्धकः, तथा च प्रतिबन्धकत्वं तु संशयज्ञानस्य नास्ति किन्तु उक्तरूपसंशयस्यैव। यस्य तु प्रमेयत्वस्य सर्ववृत्तित्वज्ञानं तस्य तु प्रतिबन्धकता नास्ति ग्राह्याभावानवगाहित्वात्। तथा चोभयथाप्यनु[प]संहारी हेत्वाभासो न भवति। यदि संशयः साध्यसहचारानिश्चये प्रतिबन्धको भवति तथापि संशयस्य ज्ञानं प्रतिबन्धकं न भवति, [260 B] स्वरूपसति संशये विद्यमाने एव सहचारानिश्चयात्। यस्य तु प्रमेयत्वस्य सर्ववृत्तित्वज्ञानं ततु(त्तु) प्रतिबन्धकमेव न भवति अनुमितितत्कारणीभूतज्ञानविषयाभावानवगाहित्वात्। हेत्वाभासत्वं तु तस्यैव यस्य ज्ञानं प्रतिबन्धकम्, प्रकृते तु संशयस्य ज्ञानं प्रतिबन्धकं नास्ति स्वरूपसत्संशयस्यैव प्रतिबन्धकत्वात्, प्रमेयत्वस्य तु ज्ञानं वर्तते

तत्तु प्रतिबन्धकमेव नास्तीति नानुपसंहारी हेत्वाभासः । मध्ये शङ्कते - **न चेति** । यदा सर्वस्मिन् अनित्यत्व-सन्देहो वर्तते स एव सन्देहो हेतोः साध्याभावः(व)सहचारज्ञानं भवति यतः सर्वस्मिन् साध्यसन्देहः सर्वस्मिंश्च हेतुज्ञानमपि वर्तते, तद् ज्ञानं हेतोः साध्यसहचारनिश्चयप्रतिबन्धकं भवतीति कृत्वा विशिष्टहेतुज्ञानस्य प्रतिबन्धकत्वात् हेत्वाभासत्वं भवत्येवेत्याशङ्कार्थः । दूषयति - **तथा सतीति** टीका । तथा चानुपसंहारिणः साधारणत्वमेव स्यात् साधारणत्वज्ञानत्वेनैव प्रतिबन्धकत्वात् । यतः साधारणत्वं साध्याभाववद्वृत्तित्वम् । अत्रापि हेतोः साध्याभावसन्देहात् साध्याभाववति हेतुज्ञानम्, तदेव साधारणत्वम्, तेन हेतुमति साध्या[भाव]-सन्देहः, स एव साध्याभाववति हेतुज्ञानम्, ततः तत् साधारणज्ञानमेव प्रतिबन्धकम् न तु अनुपसंहारित्वज्ञानम् । ननु अनुपसंहारित्वज्ञानस्य न साध्याभावसहचरितज्ञानत्वेन प्रतिबन्धकत्वं किन्तु साध्याभावस्य सर्वस्मिन् सन्देहात् स्वरूपसत्साध्याभावसंशय एव प्रतिबन्धकः, स एवानुपसंहारीत्यत आह - **अत एवेति** टीका । सर्वस्मिन् पक्षे साध्याभावसंशयश्चेत् प्रतिबन्धकः तदा स हेत्वाभास एव न स्यात् । कुतः ? यस्य ज्ञानं प्रतिबन्धकं स एव हेत्वाभासः । एतदेवाह - **ज्ञायमानेति** टीका । यद्विषयकं ज्ञानं प्रतिबन्धकं स एव हेत्वाभासः, अतः स्वरूपसन् सन्देहः प्रतिबन्धक इति कृत्वा न स हेत्वाभासः । अत्राशङ्कते - **न चेति** टीका । तथा चोक्तरूपसंशयस्य ज्ञानं प्रतिबन्धकं मास्तु किन्तु संशय एव साध्याभावसामानाधिकरण्यज्ञानत्वेन प्रतिबन्धकम(कोऽ)स्तु । ततोऽनुपसंहारित्वज्ञानस्य साध्याभावसामानाधिकरण्यज्ञानत्वेन प्रतिबन्धकत्वमस्तु, तस्यापि साध्याभावसामानाधिकरण्यज्ञानत्वादनुपसंहारी हेत्वाभासोऽस्तीत्याशङ्कार्थः । समाधत्ते - **सहचारेति** । तथा च यत्रानुपसंहारिणि सर्वस्मिन् साध्याभावसन्देहो वर्तते तत्र सर्वत्र साध्यसहचारनिश्चय एव नास्ति इति कारणाभावादेव न व्याप्तिग्रहो न तु हेत्वाभासात् । दूषणान्तरमाह- **तेन रूपेणेति** । साध्याभाव-सामानाधिकरण्यज्ञानत्वरूपेण प्रतिबन्धकत्वस्याकल्पनात् । यतः साधारणज्ञानस्य साध्याभावांशे निश्चय-रूपसाध्याभावसहचरितज्ञानत्वेन प्रतिबन्धकत्वं परं साध्याभावांशे सन्देहरूपसाध्याभावसहचरितज्ञानत्वेन न कुत्रापि प्रतिबन्धकत्वम्, [261 A] तेनानुपसंहारित्वज्ञानस्य प्रतिबन्धकत्वं न कल्प्यम् । ननु उपाधिसन्देहा-हितो यत्र व्यभिचारसन्देहस्तत्र साध्याभावांशे सन्देहरूपसाध्याभावसहचरितज्ञानत्वेन प्रतिबन्धकत्वस्य दृष्टत्वात् अत्रापि साध्याभावांशे सन्देहरूपसाध्याभावसहचरितज्ञानत्वेन प्रतिबन्धकत्वात् हेत्वाभासोऽनुपसंहारी भवत्येवेत्यत आह - **कल्पते वेति** । यदि अनुपसंहारित्वज्ञानस्य साध्याभावांशे सन्देहरूपसाध्याभाव-सहचरितज्ञानत्वेन प्रतिबन्धकत्वं तदा केवलान्वयिसाध्यकानुपसंहारिणोऽसङ्ग्रहापत्तिः यथा सर्वमभिधेयं प्रमेयत्वात् इत्यस्यासङ्ग्रहापत्तेः । कुत इत्यत आह - **तत्रेति** । केवलान्वयिसाध्याभावस्याप्रसिद्धेः साध्या-भावांशे सन्देहो नास्ति । अत्राशङ्कते - **न चेति** टीका । तथा च केवलान्वयिसाध्यकोऽनुपसंहारी उक्तरूपः स लक्ष्य एव न भवति अनुपसंहारी एव न भवति, साध्याभावांशे सन्देहरूपसाध्याभावसहचरितज्ञानत्वेन

प्रतिबन्धकत्वात् प्रकृते च साध्याभावो नास्तीति नानुपसंहारी सः। दूषयति - **अव्यवहितेति** टीका। सर्वमभिधेयं प्रमेय[त्वा]त् इत्यत्र विप्रतिपत्त्येति मूलग्रन्थेनानुपसंहार्येवेत्यभिधानात्। अग्रिमग्रन्थ उक्तरूपमूलग्रन्थ इत्यर्थः। दूषणान्तरमाह - **तज्ज्ञानस्येति**। अनुपसंहारिणि साध्याभावांशे सन्देहरूपसाध्याभावसहचरितत्वज्ञानत्वेन प्रतिबन्धकत्वेऽपि तज्ज्ञानस्यानुपसंहारित्वज्ञानस्य साधारणविलक्षणप्रतिबन्धकत्वं नास्ति। कथम् ? साध्याभावांशे सन्देहरूपसाध्याभावसहचरितत्वज्ञानत्वेन या प्रतिबन्धकता यथा सर्वं वस्तु अनित्यं न वेत्यत्रायं सन्देहः प्रमेयं सर्वं वस्तु अनित्यं न वेति रूपः स साध्याभावांशे सन्देहरूपसाध्याभावसहचरितज्ञानं भवति प्रतिबन्धकता साधारणत्वेनैव रूपेण तथा चायं साधारण एव भवतु। एतदेवाह - **साधारणविलक्षणेति**। तथा च साधारणे यत् साध्याभावसहचरितज्ञानत्वं प्रतिबन्धकतावच्छेदकतावच्छेदकं तदत्रापि वर्तत इत्यर्थः। अत्राशङ्कते - **न चेति** टीका। तादृशो यः संशयः सर्वमनित्यं न वेति रूपः तद्विषयः सर्वं पक्षरूपं तद्वृत्तित्वज्ञानं तदेव हेत्वाभासोपाधिः। इदं तु साधारणे नास्ति, साधारणो यः स कुत्रचिदेव साध्याभावसहचरितज्ञानम्। सर्वमनित्यमित्यत्र सर्वस्मिन् अनित्यत्वसन्देहात्। शब्दोऽनित्यः प्रमेयत्वात् इति साधारणस्य प्रमेयत्वस्यानित्यत्वाभावसहचरितत्वं गगनादावेवेति ततो भेदः। इदं दूषयति - **तज्ज्ञानस्येति** टीका। तज्ज्ञानमनित्यत्वसन्देहवत् यावद्विश्वं तद्वृत्तित्वज्ञानं यद् वर्तते तत् न वा फलेऽनुमितौ साक्षात् प्रतिबन्धकं, प्रमेयत्वस्य अनित्यत्वसंशयाक्रान्तं यद् विश्वं तद्वृत्तित्वज्ञानं तत् अनुमितिविषयः [261 B] साध्यमनित्यत्वरूपं तदभावावगाहि न भवति विश्वस्मिन् अनित्यत्वाभावस्याभासनादित्यर्थः। न वा करणविघटकम्, व्याप्तिज्ञानविघटकमपि न भवति, तद्विघटकं हि व्यभिचारज्ञानं वाऽसहचारज्ञानं वा, एवमुभयरूपमपि न भवति, सर्वस्मिन् प्रमेयत्वं वर्तते इति यत् ज्ञानं तत् अनित्यत्वप्रमेयत्वयोरसहचारज्ञानरूपमपि न भवति, व्यभिचारज्ञानरूपमपि न भवति साध्याभाववद्वृत्तित्वानवगाहनात्। यतः सर्वस्मिन् प्रमेयत्वं वर्तते एतस्मिन् ज्ञाने साध्याभाववद्वृत्तित्वानवगाहनात्। तस्मादनुपसंहारी न हेत्वाभासः इति पूर्वपक्षः ननु ज्ञाने संशय इत्यारभ्य ज्ञेयः [इत्यन्तः]। समाधत्ते - **केवलान्वयीति** टीका। केवलान्वयिधर्मस्याव्यापको यस्तादृशः संशयो यथा यत्र यत्र प्रमेयत्वं तत्र तत्र तादृशः संशयः सर्वमनित्यं न वेति रूपः, तन्मात्रवृत्तित्वमेवानुपसंहारित्वम्। नन्वेतन्निरुक्ता[वा]नुपसंहारित्वज्ञानस्य प्रतिबन्धकता कथं स्यात् पूर्वोक्तरीत्या प्रतिबन्धकतायाः खण्डितत्वादित्यत आह - **तज्ज्ञानं चेति** टीका। तज्ज्ञानं केवलान्वयीत्याद्युक्तरूपं ज्ञानं यद्यपि तद्ज्ञानत्वेन प्रतिबन्धकं न भवति पूर्वोक्तरीत्या ग्राह्याभावानवगाहित्वात्, किन्तु साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन प्रतिबन्धकम्। साध्यसामानाधिकरण्यस्य यः संशयः साध्यसामानाधिकरण्यसंशयः प्रमेयत्वम् अनित्यत्वरूपसाध्यसामानाधिकरण्यं न वेति रूपः, तस्य या सामग्री संशयविषयमात्रवृत्तित्वज्ञानरूपा सा सामग्री उक्तसंशयस्य भवति, तत्त्वेन प्रतिबन्धकत्वम्। एतदेव विवृणोति - **संशयसामग्र्या** इति टीका।

तथा च संशयसाम्ग्र या विशेषादर्शनरूपायाः स्थाणुर्वेत्यादौ दृष्टत्वात्। तथा प्रकृते इयं हेतोः साध्यसामानाधिकरण्यरूपसंशयसामग्री सा निश्चयप्रतिबन्धिका भवत्येव। एतदेव विवृणोति - **तद्विशिष्टस्ये**ति टीका। तच्छब्देन केवलान्वयिधर्मव्यापकतादृशसंशयविषयमात्रवृत्तित्वम्, तद्विशिष्टो यो हेतुः तज्ज्ञानस्य साध्यसामानाधिकरण्यसंशयजनकत्वं वर्तत एव। यत् साध्यसामानाधिकरण्यसंशयजनकं तत् साध्यसामानाधिकरण्यनिश्चयप्रतिबन्धकं भवत्येव। कथं भवतीत्यत आह - **हेतुमती**ति टीका। हेतुमति सर्वत्र साध्याभावसन्देहेन हेतौ साध्यसामानाधिकरण्यसन्देहः क्रियते एव। यथा पर्वते वह्न्यभावसन्देहे विद्यमाने पर्वतत्त्वे वह्न्यसामानाधिकरण्ये सन्देहो भवत्येव तद्वत् सर्वस्मिन् हेतुमति यदि साध्याभावसन्देहो वर्तते तदा तेन साध्याभावसन्देहेन हेतौ साध्यसामानाधिकरण्यसन्देह औचित्यावर्जितः। उचितः सन्देहो यथा ज्ञाने प्रामाण्यसन्देहात् विषयसंदेहः इत्युचितः [262 A] सन्देहः उपाधिसन्देहात् वा व्यभिचारसन्देहः, तद्वत् संशयविषयवृत्तित्वज्ञानात् औचित्यावर्जितो हेतौ साध्यसामानाधिकरण्यसंशयो भविष्यत्येव। यत एव संशयविषयवृत्तित्वज्ञानं हेतोर्ज्ञानस्य साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन प्रतिबन्धकत्वम् अत एवास्यानुपसंहारिणोऽनित्यदोषत्वं संशयसाम्ग्र या अनित्यत्वात्। एतदेव साम्ग्र या अनित्यत्वमेव विवृणोति - **विशेषदर्शनसत्त्व** इति। यत एव सर्वस्याः संशयसाम्ग्र या विशेष(षा)दर्शनसहिताया एव संशयजनकत्वम् अतो विशेषदर्शने विद्यमाने संशयसामग्रीत्वमेव नास्ति। अत एवानित्यदोषत्वम् अनुपसंहारिण इत्यर्थः। अत्राशङ्कते - **उक्तक्रमेणे**ति। त्वयोच्यते संशयविषयवृत्तित्वज्ञानं साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन चेत् दोषः तदा स यः साध्याभावसंशयस्तस्यैव दोषत्वं कल्प्यताम् न तु संशयविषयवृत्तित्वज्ञानस्येति शङ्कार्थः। दूषयति - **क्वचिदि**ति। साध्याभावसंशयमात्रं न हेतौ साध्यसामानाधिकरण्यसंशयसामग्री। कुतः ? हेतोरनुपस्थितदशायां साध्याभावसंशये विद्यमानेऽपि साध्यसामानाधिकरण्यसंशयाभावात्। तस्मात् साध्याभावसंशयमात्रं न साध्यसामानाधिकरण्यसंशयसामग्री हेतोरनुपस्थितिदशायां तस्यास्तत्सामग्रीत्वाभावात्। ननु भवतु साध्याभावसंशयविषयवृत्तित्वज्ञानं साध्यसामानाधिकरण्यसंशयसामग्रीत्वम्, तस्यास्तु निश्चयप्रतिबन्धकत्वम्। कथमित्यत आह - **विशेषादर्शन** इति। तथा च यथा साध्यसामानाधिकरण्यसंशयः साध्यसामानाधिकरण्यनिश्चये प्रतिबन्धकः तद्वत् साध्याभावसंशयविषयवृत्तित्वज्ञानमपि संशयसामग्रीत्वेन साध्यसामानाधिकरण्यनिश्चये प्रतिबन्धकं भवत्येव। संशयसाम्ग्र यास्तु निश्चयप्रतिबन्धकत्वं क्लृप्तमेव। अत्रायं प्रघट्टकार्थः - हेतोः साध्याभावसंशयविषयवृत्तित्वमनुपसंहारित्वं यथा सर्वमनित्यं प्रमेयत्वात् इत्यत्र प्रमेयत्वहेतोरनित्यत्वाभावसंशयविषयो यद्विश्वं तद्वृत्तित्वमनुपसंहारित्वम्। तज्ज्ञानस्य हेतोः साध्यसामानाधिकरण्यसंशयसामग्रीत्वेनानुमितिप्रतिबन्धकत्वम्। अत्र हेत्वधिकरणे यदि साध्याभावसंशयस्तदा तेन संशयेन हेतौ साध्यसामानाधिकरण्यसंशयोऽवश्यं क्रियत एवेति कृत्वा संशयविषयवृत्तित्वज्ञानं हेतौ साध्यसामानाधिकरण्यसंशयसामग्रीत्वेनावश्यं प्रतिबन्धकं भवत्येवेत्यनुपसंहारी हेत्वाभासः सिद्धः। इदं दूषयति-

**चिन्त्यमि**ति टीका। **तज्ज्ञाने**ति टीका। साध्याभावसंशयविषयवृत्तित्वज्ञाने विद्यमानेऽपि शब्दात् आप्तवाक्यात् व्याप्तिग्रहो भवत्येव। यथा पूर्वं हेतोः साध्याभावसंशयविषयवृत्तित्वज्ञानं जातम्, तस्मिन् ज्ञाने जातेऽपि इदं प्रमेयत्वमनित्यत्वव्याप्यमिति केनचिद् आप्तेनोक्तम्, तदा संशयविषयवृत्तित्वज्ञाने विद्यमानेऽपि हेतौ साध्य-सामानाधिकरण्यरूपव्याप्तिनिश्चयो जायते इति कृत्वा तज्ज्ञानं न व्याप्तिग्रहप्रतिबन्धकम्। दूषणान्तरमाह - **साध्ये**ति। यदि [262 B] आदौ साध्यसामानाधिकरण्यसंशयस्यैव साध्यसामानाधिकरण्यनिश्चयप्रतिबन्धकत्वं स्यात् तदा खलु तत्संशयसामग्री निश्चयप्रतिबन्धिका स्यात्। संशयस्यैव यदि प्रतिबन्धकत्वं नास्ति तदा संशयसामग्र्याः प्रतिबन्धकत्वं कुतः, यतः साध्यसामानाधिकरण्यसंशयस्यैव योग्यता संशयपर्यवसन्नतया ग्राह्यसंशयपर्यवसन्नतया ग्राह्यनिश्चयाप्रतिबन्धकत्वात्। यथाऽत्र घटोऽस्ति न वेति संशये विद्यमानेऽपि घटनिश्चयो जायते घटेन्द्रियसन्निकर्षो जायते तद्वत् प्रकृतेऽपि ग्राह्यं साध्यसामानाधिकरण्यं तस्य यः संशयः संग्राह्यसंशयः स, हेतौ यः साध्यसामानाधिकरण्यसंशयः संग्राह्यसंशयो भवति तत्संशयस्य ग्राह्यनिश्चयाप्रतिबन्धकत्वात्। तथा च ग्राह्यसंशयस्यैव यदि प्रतिबन्धकत्वं नास्ति तदा तत्सामग्र्याः सुतरामप्रतिबन्धकत्वम्। अत्राशङ्कते - **न चैवमि**ति टीका। यदि साध्याभावसंशयविषयवृत्तित्वज्ञानस्य हेतौ साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन प्रतिबन्धकता चेन्नास्ति, कुतः ?, साध्याभावसन्देहविषयवृत्तित्वज्ञाने विद्यमानेऽपि शब्दादिना व्याप्तिग्रहात्, तर्हि व्यभिचारसंशये विद्यमानेऽपि शब्दाद् व्याप्तिग्रहो भविष्यति, तदा व्यभिचारसंशयस्यापि व्याप्तिग्रह-प्रतिबन्धकता न स्यात् आप्तवाक्यात् तत्रापि व्याप्तिग्रहस्य जायमानत्वात्, तथा सति व्यभिचारस्यापि हेत्वाभासत्वं न स्यादित्यर्थः। एवं प्रतिबन्द्या यदि अनुपसंहारिणो हेत्वाभासत्वमुक्तरीत्या न स्यात् तदा व्यभिचारस्यापि हेत्वाभासत्वं न स्यादिति भावः। समाधत्ते - **न ही**ति टीका। यद्विषयः संशयोऽनुमिति-प्रतिबन्धकः साक्षात् परम्परया वा तत्त्वं हेत्वाभासत्वमिति न हि किन्तु यद्विषयो निश्चयोऽनुमितिप्रतिबन्धकस्तत्त्वं हेत्वाभासत्वम्। यथा धूमो वह्निव्यभिचारीति भ्रमरूपे व्यभिचारनिश्चये विद्यमाने केनापि प्रकारेणानुमितिर्न भवति। तथा च व्यभिचारो हेत्वाभासो भवति। अनुपसंहारी चैतादृशो नास्ति। कथम् ? अनुपसंहारित्वस्य निश्चयः प्रतिबन्धको नास्ति। यतो हेतुमति साध्याभावस्य निश्चय एव नास्ति, सर्वस्मिन् अनित्यत्व-रूपसाध्यसन्देहात्। दूषणान्तरमाह - **अन्यथे**ति टीका। यदि साध्याभावसंशयविषयवृत्तित्वज्ञानस्य हेतौ साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन प्रतिबन्धकत्वं तदा व्यभिचारसंशयसामग्रीत्वेन साध्यव्यापकसाधना-व्यापकलक्षणोपाधिज्ञानरूपेण व्याप्तिग्रहप्रतिबन्धकत्वात् उपाधिज्ञानविषयस्योपाधिरपि हेत्वाभासत्वं स्यात् इत्यर्थः। ततः साध्याभावसंशयविषयवृत्तित्वज्ञानं हेतौ साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन न हेत्वाभास इत्युक्तं भवति। एतदेवाह - **औचित्यावर्जि**ते इति टीका। अथोपाधिज्ञानस्य व्यभिचारसन्देहसामग्रीत्वमेव नास्तीत्याशङ्कते [263 A] - **तज्ज्ञानस्ये**ति टीका। तथा चोपाधिज्ञानव्यभिचारसन्देहसामग्री एव न भवति।

कुतः ? उपाधिज्ञाने विद्यमानेऽपि व्यभिचारतदभावकोटिकस्मरणविरहदशायामुपाधिज्ञाने विद्यमानेऽपि व्यभिचारसन्देहाभावात् नोपाधिज्ञानस्य व्यभिचारसंशयसामग्रीत्वमित्याशङ्कार्थः । समाधत्ते - **न हीति** टीका। **तादृशेति** । साध्याभावसंशयविषयवृत्तित्वज्ञाने विद्यमानेऽपि हेतौ साध्यसामानाधिकरण्यतदभावकोटिकस्मरणविरहदशायां हेतौ साध्यसामानाधिकरण्यसंशयजनकत्वाभावात् न तज्ज्ञानस्य साध्याभावसंशयविषयवृत्तित्वज्ञानस्य उक्तरूपसंशयसामग्रीत्वम् । एतदेवाह - **कोटीति** । तथा चानया प्रतिबन्द्या अनुपसंहारी हेत्वाभासस्तदा उपाधेरप्युक्तरीत्या हेत्वाभासत्वं स्यात् इत्यर्थः । अत्राशङ्कते - **न चेति** टीका । साध्यव्यापकत्वसाधनाव्यापकत्वज्ञाने विद्यमानेऽपि व्यभिचारतदभावकोटिस्मरणविरहदशायामुपाधिज्ञानस्य संशयानुत्थापकत्वात् न तस्य संशयसामग्रीत्वम्, अनुपसंहारिणस्तु साध्याभावसंशयविषयवृत्तित्वज्ञाने विद्यमानेऽवश्यं हेतौ साध्यसामानाधिकरण्यतदभावकोट्युपस्थापनं जायते एवेति कृत्वा एतस्य साध्याभावेत्यादिकस्यावश्यं संशयसामग्रीत्वं वर्तत एवेत्याशङ्कार्थः । दूषयति - **तत्रेति** । तत्र हेतौ साध्यसामानाधिकरण्यतदभावकोट्युपस्थापने तस्य साध्याभावसंशयविषयवृत्तित्वज्ञानस्यासामर्थ्यात् तस्य तदघटितत्वात् । यथा भवति च प्रामाण्यसंशयस्य विषयसंशयसामग्रीत्वं प्रमाणस्य विषयघटितमूर्तिकत्वात् घटज्ञानप्रामाण्यं नाम घटत्ववति घटे [घट]त्वप्रकारत्वं तथा प्रकृते नास्ति । न हि हेतौ साध्यसामानाधिकरण्यघटितमूर्तिकं साध्याभावसंशयविषयवृत्तित्वम् । ननु साध्याभाववद्वृत्तित्वाज्ञानदशायामिति मूलमयुक्तम् । अनुपसंहारिणि सन्देहरूपं साध्याभाववद्वृत्तित्वज्ञानं तिष्ठत्येव इति अनुपसंहारिणि इति मुक्त(मूल)मयुक्तम् इत्यतोऽन्यथा व्याचष्टे - **साध्याभाववद्वृत्तित्वे** इति । निश्चयरूपं साध्याभाववद्वृत्तित्वज्ञानं तु नास्त्येव तच्च विरुद्धे वर्तत एवेति कृत्वा यदा व्यतिरेकसाध्यके सर्वमनित्यं प्रमेयत्वात् यदाऽनित्यत्वरूपसाध्याभाववद्वृत्तित्वस्य निश्चयो नास्ति तदा तु अनुपसंहार्येव, यदा तु साध्याभाववद्वृत्तित्वनिश्चयोऽस्ति तदा तु साधारणसङ्कर एवेत्यर्थः । ननु तदवगम इति अपि मूलमयुक्तम् । साध्याभाववद्वृत्तित्वावगमस्तु तिष्ठत्येवानुपसंहारिणि सन्देहरूपसाध्याभाववद्वृत्तित्वज्ञानस्यानुपसंहारिणि सत्त्वात् इत्यर्थः । इत्यतोऽन्यथा व्याख्यातम् - **तन्निश्चय एवेति** । ननु तदा साधारणसङ्कर एवेति मूलकारोक्तमयुक्तम् । यदा तु साध्याभाववद्वृत्तित्वनिश्चयो वर्तते तदानीमनुपसंहारित्वं नास्त्येवेति कथं साधारणेन सह सङ्कर इत्यत आह - **कालभेदेति** । तथा च [263 B] सर्वमनित्यं प्रमेयत्वात् इत्यत्र प्रमेयत्वहेतौ कालभेदेन सङ्करो बोद्धव्यः । तथाहि यदा प्रमेयत्वे साध्याभाववद्वृत्तित्वनिश्चयो वर्तते तदानीं साधारणः, यदा तु साध्याभाववद्वृत्तित्वस्य सन्देहरूपं ज्ञानं तिष्ठति तदाऽनुपसंहारित्वमिति कालभेदेन साधारणानुपसंहारित्वयोः सङ्करो बोद्धव्यः । ननु व्याप्यत्वासिद्धस्येत्ययुक्तं मूलम् । सर्वमभिधेयं प्रमेयत्वात् इत्यत्र व्याप्यत्वासिद्धिरेव नास्ति प्रमेयत्वाभिधेयत्वयोर्व्याप्तेर्विद्यमानत्वात् इत्यत आह - **इदं चेति** टीका । न हीदं केवलान्वयिसाध्यकानुपसंहार्यभिप्रायेणेति किन्तु व्यतिरेकसाध्यकाभिप्रायेण । यथा सर्वमनित्यं प्रमेयत्वात्

इत्यत्र अनित्यत्वप्रमेयत्वयोर्व्याप्तिः यद्यपि नास्ति तथापि अयं व्याप्यत्वासिद्धो भवत्येव यतो व्याप्तिर्नास्ति तथापि व्याप्यत्वासिद्धौ अयमनुपसंहारी उपजीव्यो भवत्येव व्याप्यत्वासिद्धस्तु उपजीवक इति अनुपसंहारी पृथक् हेत्वाभास इति। स्वरहस्यमाह - **वस्तुत** इति। मूलकारेण व्याप्यत्वासिद्धशब्देनाज्ञानरूपाऽसिद्धिरेवोक्ता न तु व्याप्यत्वासिद्धिर्यतो व्याप्त्या(प्त्य)ज्ञानरूपा याऽज्ञानरूपाऽसिद्धिर्यतोऽत्र व्याप्तिर्नास्तीति। तस्या उपजीव्योऽनुपसंहारी भवति। यत एव सर्वत्र साध्याभावसन्देहोऽत एव साध्यस्य हेतोश्च व्याप्तिनिश्चयो नास्ति। अतो व्याप्तिनिश्चयश्चेन्नास्ति अत एवाज्ञानरूपासिद्धौ अयमनुपसंहारी उपजीव्यः। अत्रैवोपोद्वलकमाह - **अत एवेति**। यत एवानुपसंहारे(रि)णोऽज्ञानरूपासिद्धौ उपजीव्यत्वम् अत एव मूलकारोऽपि व्याप्यत्वासिद्धिमप्यज्ञानरूपासिद्धित्वेनैव विभावयिष्यति। ननु अनुपसंहारिणोऽज्ञानरूपासिद्धौ उपजीव्यत्वं तदा ज्ञाने इत्ययुक्तम्। अज्ञानरूपासिद्धिर्या वर्तते तस्याः स्वरूपेऽनुपसंहारी उपजीव्यो भवति, [न] अज्ञानरूपासिद्धेर्ज्ञाने इति, अत आह - **अत एवेति**। यत एव अज्ञानरूपासिद्धेर्ज्ञाने नोपजीव्यत्वम् अत एव एतदपरितोषेणैव 'उद्भावने च' इत्युक्तम्। ननु घटाकाशेति मूलमप्रकृतमेवेत्यत आह - **अनुपदमिति**। घटाकाशेत्यादिस्थले उक्ता याऽव्याप्तिस्तामव्याप्तिं निराकरोति - **घट** इति। तथा च यद्यप्याकाशे घटाभावे निश्चयो वर्तते तर्हि सोऽनुपसंहारी न भयत्येव, स तु विरुद्ध एवेत्यर्थः। यत्र सर्वत्र साध्याभावसन्देहो भवति तदाऽनुपसंहारित्वम्। एतस्य तु गगने साध्य(ध्या)भावस्य निश्चयात् ततः सर्वत्र साध्याभावसन्देहो नास्तीति नानुपसंहारी। ननु घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वात् इत्यत्र विरुद्धत्वमपि न सम्भवति, विरुद्धस्तु साध्याभावव्याप्तः। प्रकृते च हेतोः साध्याभावव्याप्तिर्नास्ति इति स विरुद्धः कथं स्यादित्यत आह - **इदं चेति** टीका। इदं च विरुद्धत्वम्। अनवगतसाध्यसहचारो विरुद्ध इति प्राचां विरुद्धस्य लक्षणमभिप्रेत्योक्तम्। रहस्यमाह - **वस्तुत** इति टीका [264 A]। घटोऽनित्यः घटाकाशेत्यादिकः साध्याभाववति गगने हेतोर्विद्यमानत्वात् अयं साधारण एवेति सारम्।

**। इति समाप्तः सव्यभिचारग्रन्थः।**

## हेत्वाभासप्रकरणे विरुद्धः

विरुद्धो न साध्याभावव्याप्यः संयोगादिसाध्यके सद्धेतावतिव्याप्तेः। नापि साध्यवन्निष्ठात्यन्ताभावप्रतियोगिव्याप्यत्वं तत्त्वम् इदं द्रव्यं गुणवत्त्वात् इत्यादौ संयोगादिव्याप्येऽतिव्याप्तेः, किन्तु साध्यासमानाधिकरणसाध्याभावव्याप्यः साध्यवदन्योन्याभावव्याप्यो वा, साध्याभावत्वं साध्यविरोधित्वमात्रं भावाभावसाधारणं तेनाभावे साध्येऽभावाभावस्य भावत्वेऽपि नाव्याप्तिः अभावाभावोऽभावप्रतियोगिनिरूप्यत्वेन भावभिन्न एव वा। न च भावत्वेनोपपत्तौ किमधिकेनेति वाच्यम्। बाधकं विना अभावप्रतीतेः प्रमात्वात् अन्यथा अत्यन्ताभावान्योन्याभावयोरप्रसिद्धिः। अथ साध्यहेत्वोर्विरोधे पक्षे साध्यसत्त्वे हेत्वसिद्धिः हेतुसत्त्वे साध्याभावसिद्धौ बाधः। न च प्रमाणान्तरेण साध्याभावसिद्धौ बाधो न हेतुत्वेनैवेति वाच्यम्। विशेषणवैयर्थ्यादिति चेत्। न। हेतोः पक्षे साध्याभावोपस्थापनेऽपि प्रथमोपस्थितविरोधस्यैव उपजीव्यत्वेन दोषत्वात्। ननु साध्याभावसम्बन्धो व्यभिचार एव दोषः न तु तन्नियतत्वमपि गौरवात् असाधकत्वे व्यर्थत्वाच्च। न च साध्यासहचरितस्य साध्याभावसहचरितस्य वा गमकत्वभ्रमरूपायामशक्तौ विशेषोऽस्ति येनाशक्तिविशेषोन्नायकतया न व्यर्थविशेषणता। न चानैकान्तिकसामान्यलक्षणे विपक्षवृत्तित्वं न विशेषणम् असाधारणाद्यव्याप्तेः साधारणं तु सपक्षवृत्तित्वसहितमिति वाच्यम्। विपक्षगामित्वस्यैव साधारणत्वात् अधिकस्य व्यर्थत्वात्। न च विरुद्धं व्यावर्त्यं विपक्षगामित्वेनात्रैव तदन्तर्भावात्। अथानैकान्तिके विपक्षसम्बन्धो न दूषकताबीजम् असाधारणाद्यव्याप्तेः। न च तत्रान्यदेव बीजं हेत्वाभासाधिक्यापत्तेरिति चेदस्तु तावदेवं तथापि साधारणे विरुद्धप्रवेशो वज्रलेप एव।

अथ मूलम्। विरुद्धेति मूलम्। साध्याभावेन व्याप्तो हेतुर्विरुद्धः। साध्याभावसहचरितो हेतुर्विरुद्धः इत्युच्यमाने साधारणेऽतिव्याप्तिः, अत उक्तम् - व्याप्तेति। व्याप्तत्वं नामाव्यभिचरितसामानाधिकरण्यम्,

तेन साध्याभावाव्यभिचारित्वे सति साध्याभावसहितत्वम्, सत्यन्तं साधारणे अतिव्याप्तिवारणार्थम्, यथा धूमवान् वह्नेः इत्यत्र धूमाभाववति वह्निवृत्तिः परं वह्नेः धूमाभावाव्यभिचारित्वं नास्ति धूमवत्वपि तस्य वर्तमानत्वात्। विरुद्धस्तु साध्याभावव्याप्त एव, यथा अयमश्वः गोत्वात् यत्र यत्र गोत्वं तत्र तत्र अश्वत्वाभाव इत्यश्वत्वाभावेन गोत्वहेतुर्व्याप्तः इति विरुद्धः। इदं लक्षणं दूषयति - **संयोगादीति** मूलम्। अयं कपिसंयोगी वृक्षत्वात् यत्र यत्र वृक्षत्वं तत्र कपिसंयोग इति व्याप्तिसत्त्वात् सद्धेतुरस्ति परं संयोगाभावेनापि सह वृक्षत्वं व्याप्तमिति सद्धेतावति[व्याप्ति]रित्यर्थः। लक्षणान्तरमाह - **नापीति** मूलम्। साध्यवति वर्तमानो योऽत्यन्ताभावः तस्य यत् प्रतियोगि तद्व्याप्यत्वम्। यथा अयमश्वः गोत्वात् इत्यत्राश्वत्ववन्निष्ठोऽत्यन्ताभावो गोत्वस्यात्यन्ताभावः, तत्प्रतियोगि गोत्वम्, तद्व्याप्यत्वं गोत्वे वर्तते यत्र गोत्वं तत्र गोत्वमिति अभेदेऽपि व्याप्यव्यापकभावात्। अभेदे यथा व्याप्यव्यापकभावस्तथा सत्प्रतिपक्षग्रन्थे वक्ष्यते। इदं दूषयति - **इदमिति** मूलम्। इदं द्रव्यं गुणवत्त्वात् इत्यत्र सद्धेतावतिव्याप्तिः। साध्यं यद् द्रव्यत्वं तद्वत् यद् द्रव्यं तन्निष्ठो योऽत्यन्ताभावः संयोगात्यन्ताभावः, तस्य प्रतियोगी संयोगः, तद्व्याप्यत्वं गुणवत्त्वे वर्तते, यथा यत्र यत्र गुणवत्त्वं तत्र संयोगः, इति गुणवत्त्वस्य साध्यवन्निष्ठात्यन्ताभावप्रतियागित्वं वर्तते इति कृत्वा उक्तसद्धेतावतिव्याप्तिः। सिद्धान्तलक्षणमाह - **किन्त्विति**। साध्येन सहासमानाधिकरणो यः साध्याभावस्तद्व्याप्यत्वम्। यथा अयमश्वो गोत्वात् इत्यत्र साध्यमश्वत्वम्, तेन सहासमानाधिकरणो यः साध्याभावोऽश्वत्वाभावः तद्व्याप्यत्वं वर्तते गोत्वस्य, यथा यत्र यत्र गोत्वं तत्र तत्राश्वत्वाभावः, इति साध्यासमानाधिकरणसाध्याभावव्याप्यत्वं गोत्वे वर्तते। वृक्षः कपिसंयोगी वृक्षत्वात् इत्यादौ अतिव्याप्तिवारणार्थं साध्यासमानाधिकरणपदम्। तत्र यद्यपि साध्याभावव्याप्यत्वं वृक्षस्य विद्यते परं साध्यासमानाधिकरणसाध्याभावव्याप्यत्वं नास्ति, यतः स(यः) संयोगाभावः स संयोग(गा)समानाधिकरणो न भवति। साध्यासामानाधिकरणत्वमात्रम् अवृत्तिगगनादौ गतमतः साध्याभावव्याप्यत्वमिति गगने साध्याभावव्याप्यत्वं नास्ति गगनस्य [264 B] अवृत्तित्वात् इत्यर्थः। अथ साध्यासमानाधिकरणपदान्तर्भावे गौरवमिति तदनन्तर्भावेनैवान्योन्याभावगर्भलक्षणमाह - **साध्यवदन्येति**। साध्यवतो योऽन्योन्याभावः तद्व्याप्तत्वं हेतोरित्यर्थः। यथा अयमश्वो गोत्वात् इत्यत्र अश्वत्ववदन्योन्याभावोऽश्वान्योन्याभावस्तु एक एव, तद्व्याप्तत्वं गोत्वस्य वर्तते यथा यत्र यत्र गोत्वं तत्राश्वान्योन्याभावः इति। ननु प्रथमलक्षणेऽयं घटात्यन्ताभाववान् घटात् इत्यत्र विरुद्धे हेतौ घटे साध्याभावस्याभावो नास्ति। अत्र साध्यस्य घटात्यन्ताभावरूपस्याभावरूपत्वेनाभावप्रतियोगिकाभावान्तरानभ्युपगमात् अव्याप्तिरित्यत आह - **साध्याभावत्वमिति** मूलम्। न हि अत्राभावैकस्वभावत्वं साध्याभावत्वं विवक्षितं किन्तु भावाभावसाधारणमेव साध्याभावत्वं विवक्षितम्। तथा यद्यपि घटात्यन्ताभावस्याभावो

घटातिरिक्तो नास्ति तथापि घटात्यन्ताभावस्याभावो घट एव, ततः साध्यासमानाधिकरणसाध्याभावो घट एव, तद्व्याप्यत्वं घटे त्वया [या] व्याप्तिरुक्ता सा परिहता भवति। ननु भावाभावसाधारणं यत् साध्याभावेऽभावत्वं तत् किमित्यत आह - **विरोधित्वमात्रमि**ति। साध्येन सह विरोधित्वमात्रम्, यथा गोत्वाश्वत्वयोर्विरोधस्तथा साध्येन सह साध्याभावस्य यत् विरोधित्वं तदेव साध्याभावत्वम्। विवक्षायाः प्रयोजनमाह - **तेने**ति मूलम्। **अभावे** इति। यथा अयं घटात्यन्ताभाववान् घटात् इत्यत्र घटात्यन्ताभावस्याभावो घट एव, स घटात्यन्ताभावस्य विरोध्यस्ति, तद्व्याप्यत्वं घटे तिष्ठत्येव अभेदेति न्यायात्। ननु साध्यविरोधित्वं साध्याभावत्वं चेत् विवक्ष्यते तदा साध्यासमानाधिकरणेति पदं व्यर्थम्, तद्धि संयोगसाध्यकेऽतिव्याप्तिवारणार्थं दत्तम्, तन्न सम्भवति, संयोगात्यन्ताभावस्य संयागविरोधित्वमेव नास्ति एकत्र वृक्षे द्वयोः सत्त्वात्। अयं संयोगी वृक्षत्वात् इत्यत्र साध्यविरोधी अभावो गुणकर्मादिनिष्ठः, तद्व्याप्यत्वं वृक्षत्वस्य हेतोर्नास्ति, यथा यत्र यत्र वृक्षत्वं तत्र संयोगी(ग)विरोधी अभाव इति नास्ति, वृक्षत्वं वृक्षे तत्र संयोगविरोधी अभावो नास्ति, संयोगविरोधी अभावस्तु गुणकर्मादावेव, तेन तत्र नातिव्याप्तिरित्यत आह - **अभावाभाव** इति। **इदमेकदेशिमतेन**। अभावस्य घटाभावस्याभावो न घटः किन्तु अभाव एव। यथा घटस्याभावो न भूतलघटादिकं किन्तु अतिरिक्त एवाभावः। शेषयुक्तिः **पदार्थखण्डने**। प्रतियोगीति। तथा घटरूपप्रतियोगिनिरूप्यत्वेन घटाभावोऽधिकरणप्रतियोगिभ्यां भिन्नः तद्वत् घटात्यन्ता[भावा]भावोऽपि घटात्यन्ताभावरूपप्रतियोगिनिरूप्यत्वेन घटात्यन्ताभावादतिरिक्त [265 A] एवेत्यर्थः। अत्राशङ्कते - **न चे**ति मूलम्। भावेनैव घटस्वरूपेणैवोपपत्तौ घटात्यन्ताभावो घटातिरिक्तो नास्ति क्लृप्तेनैवोपपत्तौ अतिरिक्ताभावकल्पने प्रमाणाभावात् इत्याशङ्कार्थः। समाधत्ते - **बाधकं विने**ति मूलम्। अभावत्वप्रकारकप्रतीतेर्भावविशेष्यत्वे भ्रमत्वमेव स्यात्, तस्माद् भ्रमे घटादिर्विशेष्यं न भवति किन्तु अभाव एवेत्यर्थः। न च प्रमात्वे सम्भवति बाधकं विना भ्रमकल्पनम्। न सम्भवतीति धियामौत्सर्गिकं प्रमात्वमिति कृत्वा यावत् प्रमात्वं सम्भवति ता[व]त्पर्यन्तं भ्रमत्वं न कल्पनीयमित्यर्थः। बाधकमाह - **अन्यथे**ति मूलम्। यदि घटात्यन्ताभावाभावस्तु घटस्तदा घटस्याप्यत्यन्ताभावो भूतलस्वरूपातिरिक्तो न सम्भवेत्। क्लृप्तभूतलस्वरूपेणैवोपपत्तौ अतिरिक्ताभावकल्पने प्रमाणाभावादित्यर्थः। यथा भूतलस्वरूपेणैवोपपत्तौ घटात्यन्ताभावोऽतिरिक्तो न सिध्येत् एवं घटवदन्योन्याभावोऽपि भूतलादतिरिक्तो न सिध्येत्, भूतलस्वरूपेणैव तस्योपपन्नत्वात् इति भावः। अथ विरुद्धो न दूषणमित्याशङ्कते - **अथे**ति मूलम्। विरुद्धो न हेत्वाभासः इत्यन्वयः। किमिति यत्र विरुद्धो दूषणं तत्र स्वरूपासिद्धिर्वा बाधो वाऽवश्यं तिष्ठत्येव। कथम्? तत्राह - साध्यहेत्वोर्यदि विरोधः साध्येन सहानवस्थानमिति रूपः तदा यदि पक्षे साध्यं वर्तते तदा तत्र हेतुरेव नास्ति, तदा स्वरूपासिद्धिरेव दूषणम् पक्षे हेतोर-

वर्तमानत्वात् । यदि च हेतुर्वर्तते तदा साध्यं नास्ति तदा बाध एव स्यात्, पक्षे साध्याभाव एव बाध इति वचनात् । **हतु(त्व)सिद्धिरिति** स्वरूपासिद्धिरित्यर्थः । अत्र शङ्कते - **न चेति** । तथा च यत्र प्रमाणान्तरेण साध्याभावसिद्धिस्तत्र बाधः । यत्र च तेनैव हेतुना साध्याभावसिद्धिस्तत्र विरुद्धो हेत्वाभासः, यथा अयमश्वो गोत्वात् अत्र गोत्वेनैव हेतुना अश्वत्वाभावः यथा अयमश्वत्वाभाववान् गोत्वादिति, ततोऽयमेवास्य बाधात् भेद इति शङ्कार्थः । दूषयति - **विशेषणेति** मूलम् । तथा च साध्याभावसिद्धिरेव बाधः, न तु प्रमाणान्तरेणेति विशेषणं [देयम्] गौरवात् बाधलक्षणेऽधिकनिरर्थकपदप्रवेशादित्यर्थः । अथेत्यारभ्य चेत्पर्यन्तं विरुद्धनिषेधे पूर्वपक्षार्थः । विरुद्धं समर्थयति - **हेतोरिति** मूलम् । हेतुना यावत्पर्यन्तं साध्याभाव उपस्थापित एव नास्ति तावत्पर्यन्तमेव प्रथमोपस्थितं यत् साध्यहेत्वोर्विरोधज्ञानं तस्यैवानुमितिप्रतिबन्धकत्वेन बाधे उपजीव्य एव विरोधः स्वतन्त्रो हेत्वाभासः । अथ विरुद्धो व्यभिचारान्तर्भूत एव दूषणमित्याशयेन शङ्कते - **नन्विति** मूलम् । तथा च यत्र विरुद्धत्वं तिष्ठति तत्र साध्याभावसम्बन्धस्तु हेतोरवश्यं तिष्ठति, ततोऽत्र व्यभिचार एव दोषोऽस्तु साध्याभाववति [265 B] हेतोर्वर्तमानत्वात् । तेन विरुद्धः पृथग् मास्तु । **न त्विति** । इदमसाधकं साध्याभावव्याप्तत्वात् साध्याभावनियतसहचरितत्वात् इत्यत्र नियतपदं व्यर्थम्, साध्याभावसहचरितत्वात् इत्येवास्तु । तच्च व्यभिचार एवेति । ततो लक्षणे दूषकत्वे साध्याभावसहचरितत्वं वा साध्य(ध्या)भावनियतसहचरितत्वं वेति साध्याभावसहचरितत्वमेवास्तु, गौरवात् नियतपदं व्यर्थमिति । गौर[व]मुक्त्वा असाधकतायां व्यर्थत्वमाह- **असाधकत्वे** इति । इदमसाधकं साध्याभावसहचरितत्वादित्येवास्तु न तु नियतत्वांशोऽपीति गौरवादित्यर्थः । ननु साध्याभावसहचरितत्वं हेतोर्व्यभिचारः, साध्याभावनियतसहचरिततत्वं विरुद्धत्वम्, ततः साध्याभावसहचरितत्वेन व्यभिचारेण यादृशी असाधकतानुमितिः क्रियते तद्विलक्षणा [अ]साधकत्वविशेषानुमितिः साध्याभावनियतसहचरितत्वरूपविरुद्धत्वेन क्रियते, सा [अ]साधकत्वविशेषानुमितिर्न व्यभिचारित्वमात्रेण किन्तु साध्याभावनियतसहचरितत्वेनेति नियतत्वांशोऽसाधकत्वविशेषोन्नायकतया साधकं(कः) सार्थकम्(कः) इत्याशङ्क्य निराकरोति - **न चेति** मूलम् । साध्याभावसहचरितस्य नाम साध्याभावनियतसहचरितस्य विरुद्धस्येत्यर्थः । साध्याभावसहचरितस्य साध्याभाववद्वृत्तित्वस्य व्यभिचारस्य गमकत्वभ्रमरूपायामशक्तौ असाधकत्वानुमितावित्यर्थः । **तत्रेति** । यथा व्यभिचारित्वेनासाधकत्वानुमितिः क्रियते तादृशी, [न] तद्विलक्षणाऽसाधकतानुमितिर्विरु[द्धत्वे]न क्रियते, [विशेष] एव तु नास्ति । तथा च विरुद्धस्य यत् कार्यं तद् व्यभिचारत्वेनैव क्रियते ननु विरुद्धत्वेन किम्, किमर्थं विरुद्धत्वाङ्गीकारः ? तथा चाशक्तिविशेषोन्नायकतयाऽपि [कथं] न व्यर्थविशेषणता भवेदित्याशङ्कार्थः । अत्राशङ्कते - **न चेति** । तथा चानैकान्तिकत्वसामान्यलक्षणे विपक्षगामित्वं न विशेषणम्, असाधारणेऽनुपसंहारिणि च विपक्षगामित्वस्यैवाभावात्, असाधारणस्य विपक्षव्यावृत्तत्वात्,

अनुपसंहारिणस्तु विपक्षाभावात्। तथा चानैकान्तिकसामान्यलक्षणे दूषकतायां न विपक्षगामित्वं विशेषणम्। ननु अनैकान्तिकसामान्ये यद्यपि न विपक्षगामित्वं विशेषणं तथापि साधारणे तद् भविष्यतीत्यत आह - **साधारणं त्विति**। साधारणं तु न विपक्षवृत्तित्वं किन्तु सपक्षविपक्षवृत्तित्वम्। तथा च साधारणे सपक्षविपक्ष-सहितं दूषकताबीजम्, विरुद्धे तु विपक्षवृत्तित्वमेव दूषकताबीजम्। तथा चानयोर्दूषकताबीजभेदेन हेत्वाभासभेद इत्याशङ्कार्थः। दूषयति - **विपक्षगामित्वस्येति** मूलम्। तेन साधारणेऽपि विपक्षगामित्वमात्रमेवास्तु दूषणम्, न तु सपक्षवृत्तित्वांशोऽपि व्यर्थत्वात् दूषकतायां व्यर्थत्वात्। ननु विपक्षवृत्तित्वमात्रं न साधारणत्वं विरुद्धेऽपि गतत्वात् किन्तु सपक्षवृत्तित्वसहितं साधारणत्वमित्याशयेनाह - **न च विरुद्धमिति** [266 A]। विरुद्धं व्यावृत्त्यं(वर्त्यं) साधारणात् सपक्षव्यावृत्तत्वविशेषणेन। दूषयति - **विपक्षगामित्वेनेति** मूलम्। तथा च विपक्षगामित्वेन विरुद्धस्यापि साधारण एवान्तर्भावोऽस्तु इष्टत्वादित्यर्थः। अत्राशङ्कते - **अथेति** मूलम्। अनैकान्तिकसामान्ये विपक्षसम्बन्धो न दूषकताबीजम्। असाधारणे विपक्षसम्बन्धाभावात्। ततोऽनैकान्तिक-सामान्ये विपक्षसम्बन्धो न दूषकताबीजम्। अतो विपक्षसम्बन्धो विरुद्ध एव दूषकताबीजम्। अयमेव विरुद्धस्य अनैकान्तिकात् भेदः। मध्ये शङ्कते - **न चेति**। तत्र असाधारणे यद्यपि विपक्षसम्बन्धो नास्ति तथापि तत्रान्यदेव दूषकताबीजं भविष्यति। अनैकान्तिके तु विपक्षगामित्वमेव दूषकताबीजमस्तु, ततो विरुद्धोऽप्यनेन रूपेणानैकान्तिक एवान्तर्भूतोऽस्तु इत्याशङ्कार्थः। दूषयति - **हेत्वाभासेति** मूलम्। तथा चासाधारणेऽनै-कान्तिकसामान्ये दूषकताबीजं यो विपक्षसम्बन्धः स यदि असाधारणे नास्ति तदाऽसधार[ण]स्यानैकान्तिकात् बहिर्भावे हेत्वाभासान्तरतापत्तिः। तस्मादनैकान्तिकसामान्ये विपक्षसम्बन्धो न दूषकताबीजम् किन्तु विरुद्ध एव एतद् दूषकताबीजम् इत्यतो विरुद्धः पृथग् हेत्वाभास इति। अथेत्यारभ्य पूर्वपक्षार्थः। समाधत्ते - **अस्त्विति** मूलम्। **एवमिति** मूलम्। अनैकान्तिकसामान्ये विपक्षसम्बन्धो दूषकताबीजं मास्तु असाधारणे विपक्षसम्बन्धाभावात्। किन्तु साधारणे दूषकताबीजं विपक्षसम्बन्धो भवत्येव। तथा च साधारणे विरुद्धप्रवेशो विपक्षसम्बन्धत्वेन रूपेण वर्तत एवेति विरुद्धो न पृथग् हेत्वाभासः।

अथ टीका। **संयोगादीतीति** टीका। ननु वृक्षः संयोगी द्रव्यत्वात् इत्यत्र संयोगसाध्यके सद्धेतौ द्रव्यत्वे संयोगाभावव्याप्त(प्य)त्वमेव नास्ति, द्रव्यत्वाधिकरणे संयोगसामान्याभावो नास्त्येव परमाण्वाकाशादिसंयोग-सत्त्वात् कुतो लक्षणातिव्याप्तिरित्यन्यथा व्याचष्टे - **संयोगविशेषेति** टीका। तथा च वृक्षः कपिसंयोगी वृक्षत्वात् इत्यत्रा[ति]व्याप्तिर्वृक्षत्वस्य साध्याभावव्याप्त(प्य)त्वात् अतिव्याप्तिरित्यर्थः। ननु मूलस्थं साध्यास-मानाधिकरणसाध्याभावव्याप्यत्वं विरुद्धत्वम् इदम्। वृक्षः कपिसंयोगी वृक्षत्वात् इत्यत्रातिव्याप्तिः। कथम्? यतः साध्यासमानाधिकरणं नाम साध्याधिकरणात् भिन्नं यत् अधिकरणं तन्निष्ठत्वम्, तथा वृक्षः कपिसंयोगी

वृक्षत्वात् इत्यत्र गुणकर्मादावधिकरणे य एव कपिसंयोगाभावः स एव वृक्षेऽप्यस्तीति कृत्वा साध्याभावाधिकरणनिष्ठो यः कपिसंयोगाभावो गुणादिनिष्ठः स एव वृक्षनिष्ठोऽधिकरणभेदेन अभावभेदाभावात्, तद्व्याप्यत्वं वृक्षत्वे वर्तत एवेति कृत्वाऽतिव्याप्तिस्तत्र तदवस्थैवेत्यन्यथा व्याचष्टे - **साध्यवैयधिकरण्येति** टीका। तथा च साध्यवैयधिकरण्यं यदवच्छेदकं तदवच्छिन्नो यः साध्याभावः स इत्यर्थः। एवं कृते वृक्षः कपिसंयोगीत्यादौ नातिव्याप्तिः। कथम् ? कपिसंयोगरूपसाध्यवैयधिकरण्यस्य यदवच्छेदकं गुणत्वकर्मत्वादिकं तदवच्छिन्नो यः [266 B] कपिसंयोगाभावः तद्व्याप्यत्वं वृक्षत्वे नास्त्येव। यथा द्रव्यत्वसामानाधिकरण्यं पटत्वे वर्तते तथापि घटत्वविशिष्टं द्रव्यत्वसामानाधिकरण्यं पटत्वे नास्तीति एवं यद्यपि कपिसंयोगाभावव्याप्यत्वं वृक्षत्वे वर्तते परं गुणत्वकर्मत्वाद्यवच्छिन्नकपिसंयोगाभावव्याप्यत्वं वृक्षत्वे नास्तीति न तत्रातिव्याप्तिरित्यर्थः। **तत्रेति** टीका। **अधिकरणेनैवोपपत्तेरिति** टीका। तथा च केवलाधिकरणस्वरूपेणैवाभावव्यवहारोपपत्तौ अधिकाभावकल्पने प्रमाणाभावात् इति पूर्वपक्षिणो मतेन दूषितम्। **अत्रेति** टीका। ननु प्रमाणान्तरेणेति विशेषणं विरुद्धेऽतिव्याप्तिवारणार्थं दत्तमिति तत् सार्थकमित्यत आह - **अत्रेति** टीका। अत्रेति विरुद्धे यदि व्यभिचारव्यावृत्तेन रूपेणानुमितिप्रतिबन्धकत्वं स्यात् तदा विरुद्धेऽतिव्याप्तिवारणार्थं विशेषणं प्रमाणान्तरेणेति सार्थकं स्यात्। तदेव तु विरुद्धे नास्तीति विरुद्धेऽतिव्याप्तिवारणार्थं विशेषणं व्यर्थमेवेत्यर्थः। **तद्भेदेति** टीका। साधारणविरुद्धयोर्भेदानुपपत्तिरित्यर्थः। उभयोरैकैक(व)दूषकताबीजसत्त्वात् ऐक्यमेव स्यादिति भावः। ननु विरुद्धस्य यदि अनैकान्तिकाद् भेदः सिद्धो यतोऽनैकान्तिकस्य विपक्षवृत्तित्वेन दूषकता नास्ति असाधारणानुपसंहारिणोस्तदभावात्। किन्तु विरुद्धस्यानैकान्तिकाद् भेदे सिद्धेऽपि यत्र सामान्यतो भेदस्तत्र विशेषतोऽपि भेदः तथा च विरुद्धस्य साधारणादपि भेदो भविष्यत्येव। यतोऽनैकान्तिके विपक्षवृत्तित्वेन दूषकता नास्ति विरुद्धे तु विपक्षवृत्तित्वेन दूषकता वर्तते इति सामान्यतोऽनैकान्तिकाद् भेदे सिद्धे साधारणादपि भेदः सिद्ध एवेत्यर्थत आह - **वस्तुत** इति। अनैकान्तिकत्वसामान्यज्ञानं तु नानुमितिप्रतिबन्धकं किन्तु विपक्षवृत्तित्वसपक्षव्यावृत्तत्वादिज्ञानम्, तथा च विरुद्धस्यापि विपक्षवृत्तित्वज्ञानत्वेनैव प्रतिबन्धकत्वात् विरुद्धस्य साधारण एवान्तर्भावोऽस्तु। एतदेवाह - **विरोध्यविषयकत्वादिति** टीका। उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वमनैकान्तिकत्वम्, न चैतज्ज्ञानं प्रतिबन्धकम् अनुमितितत्कारणीभूतविषयाभावानवगाहनात्। तथा च विशेषज्ञानं साधारणत्वादिज्ञानमेव प्रतिबन्धकम्। विरुद्धस्य साधारण एवान्तर्भाव इति भावः।

**अन्ये तु विरुद्धलक्षणे न व्यर्थत्वं साधारणस्य व्यवच्छेद्यत्वात्। नाप्यसाधकतानुमितौ, एतस्यापि व्याप्यत्वात्, नीलधूमादौ च व्याप्तिरस्तु एवेति न स्वार्थानुमाने दोषः**

**परस्य तु व्यर्थत्वमधिकम्। न च विरुद्धत्वादित्यत्र शब्दाधिक्यमिति, तन्न, अर्थो हि लिङ्गम्, न च व्यभिचारावारकविशेषणावच्छेदेनापि व्याप्तिः, गौरवादिति वक्ष्यते, न चार्थगत्या व्यर्थत्वेऽपि विरुद्धत्वादित्यत्र उद्भावनाशक्यत्वम्, आवश्यकतद्विवेचने तदुद्भावनस्य शक्यत्वादिति हेतुद्वयोपन्यासे चाधिकं प्रथमेन द्वितीयस्य कृतकर्तव्यताया दुष्टिबीजत्वात्। न च नीलधूमादित्यादौ विशिष्टकर्तव्यमन्येन केनापि कृतम्, धूमवत्त्वादित्यनेनैव कृतमिति चेत्। न। तथानुपन्यासात् अन्यथा नीलानन्वयापत्तेः। अपरे तु साध्यानवगतसहचारः साध्याभावसहचारी विरुद्धः अन्यथा पृथिव्यां मेयत्वेनेतरभेदानुमानं न विरुद्धं स्यात् साध्याभावाव्याप्यत्वात्। न च तत् साधारणं सपक्षासत्त्वात्। न च साध्यसहचाराज्ञानदशायां साधारणातिव्याप्तिः, तदा तस्यापि विरुद्धत्वादिति प्राहुः। तन्न। विपक्षगामित्वं दूषकताप्रयोजकमित्युक्तत्वात्। अत एव व्यभिचरितो व्यतिरेक्यनैकान्तिक एव। नापि साध्याभावसाधकत्वं तत्प्रमापकत्वं वा, साध्याभावसम्बन्धबुद्धिं विना तदज्ञानात्। नापि साध्यवदन्यत्वव्याप्यत्वम्, व्याप्यत्वविवेचने व्यर्थविशेषणत्वात्। नापि स्वव्यापकाभावप्रतियोगिसाध्यकत्वम्, साध्याभावस्य हेतुव्यापकत्वप्रतीतौ हेतुसाध्याभावसम्बन्धभानस्यावश्यकत्वादिति।**

अथ मूलव्याख्या। अन्ये त्विति मूलम्। विरुद्धलक्षणे साध्य(ध्या)भावव्याप्त(प्य)त्वरूपे न व्यर्थत्वं नियतपदस्येति शेषः। विरुद्धलक्षणं साध्याभावेन सहाव्यभिचरितसहचरितत्वम् इति नियमपदलभ्योऽर्थः। तथा च साधारणेऽतिव्याप्तिवारणार्थमव्यभिचरितत्वदलम् साधारणे साध्याभावेन सहाव्यभिचरितसहचरितत्वं नास्ति साध्यवत्यपि पक्षे हेतोर्वर्तमानत्वात्, विरुद्धस्तु साध्याभावेन सहाव्यभिचरितसहचरित एवेति तयोर्भेदः। ननु अव्यभिचरितत्वांशस्य विरुद्धलक्षणे यद्यपि वैयर्थ्यं नास्ति तथापि असाधकतानुमितौ वैयर्थ्यं स्यादेव। तथाहि इदमसाधकं साध्याभावाव्यभिचरितसहचरितत्वात्। लाघवात् साध्याभावसहचरितत्वात् इत्येवास्तु। न चो(च) साधारणे गतमिति वाच्यम्। तेनाप्यसाधकतानुमितिरनेन [267 A] क्रियत एवेति अव्यभिचरितपदं व्यर्थमित्यत आह - **नापीति** मूलम्। तथा चासाधकतानुमितावपि अव्यभिचरितपदस्य वैयर्थ्यं नास्ति। कुतः ? असाधकतानुमाने यथा साध्याभावसहचरितत्वं हेतुः तथा साध्याभावाव्यभिचरितसहचरितत्वमपि

हेतुः । एतस्येति साध्याभावाव्यभिचरितसहचरितत्वस्येत्यर्थः । ननु यथा नीलधूमात् इत्यादौ व्याप्तिर्नास्ति तद्वत् अव्यभिचारांशस्याधिक्यात् साध्याभावाव्यभिचरितसहचरितत्वेऽपि व्याप्तिर्नास्तीत्यत आह - **नीलधूमादाविति** मूलम् । तेन नीलधूमादावपि व्याप्तिरस्त्येव यथा धूमेन सह वह्नेर्व्याप्तिस्तथा नीलधूमेनापि सह वह्नेर्व्याप्तिसत्त्वात् यत्र नीलधूमस्तत्र वह्निरिति । अन्यथा विशेषाणामव्याप्यत्वे निराश्रया व्याप्तिः स्यात् । तथाहि यदि नीलधूमे व्याप्तिर्नास्ति पीतधूमे व्याप्तिर्नास्ति तदा कुत्र धूमे व्याप्तिः स्यात् ?, नीलाद्यतिरिक्तधूमो नास्ति नीलाद्यन्यतमत्वस्य एव धूमत्वात् । उपसंहरति - **न स्वार्थानुमाने दोष** इति मूलम् । ननु यदि नीलधूमादित्यत्र नाधिकं तदा परं प्रत्यपि नीलधूमादित्येव प्रयोगः स्यादित्यत आह - **परस्य त्विति** मूलम् । तथा च नीलपदं परार्थानुमाने व्यर्थम्, न तु व्याप्त्यभावादिना तद् दूषणमित्यर्थः । तथा च प्रकृतमुपसंहरति - **न चेति** मूलम् । तथा च परार्थानुमाने नीलधूमात् इत्यत्र व्यर्थोऽधिको नीलशब्दः तद्वत् परार्थानुमानेऽव्यभिचरितत्वांशोऽप्यधिक इति । न स्वार्थानुमानेऽधिकं साध्याभावाव्यभिचरितसहचरितत्वात् इत्युच्यमाने दूषणम् । ततो विरुद्धः साधारणात् भिन्न एवेति भावः । इदं समाधानं पूर्वपक्षी दूषयति - **तन्नेति** । अर्थो वाच्य एव लिङ्गं न तु तद्वाचकः शब्दः । तथा च नीलधूमादौ यद्यपि व्याप्तिरस्त्येव तथापि व्यभिचारावारकविशेषणावच्छेदेन नास्ति, यतो धूमात् इत्युच्यमाने कुत्रापि व्यभिचारो नास्ति । तदेव हि विशेषणं सार्थकं यद् व्यभिचारवारकं भवति । प्रकृते च नीलं न व्यभिचारवारकं किन्तु व्यभिचारावारकम्, न तदवच्छेदेन व्याप्तिः गौरवात् । तथा च साध्याभावाव्यभिचरितसहचरितत्वात् इत्यत्राव्यभिचरितांशे व्यर्थत्वमिति भावः । अत्राशङ्कते - **न चेति** मूलम् । इदमसाधकं विरुद्धत्वात् इत्यत्र विरुद्धत्वं नाम साध्याभावाऽव्यभिचरितसहचरितत्वम् इत्यर्थगत्या अव्यभिचरितपदस्य व्यर्थत्वेऽपि साध्याभावसहचरितत्वात् इत्येतावत्येव यु(उ)क्ते सति विरुद्धत्वात् इत्यत्र तु व्यर्थविशेषणत्वमुद्भावयितुं न शक्यते । उक्तरीत्याऽर्थगत्या व्यर्थविशेषणत्वेऽपि वाच्यगता विरुद्धत्वात् इत्यत्र व्यर्थविशेषणतोद्भावयितुं न शक्यत इत्याशङ्कार्थः । समाधत्ते - **आवश्यकेति** मूलम् । तथा च विरुद्धत्वादिति हेतौ कृते परेण पृष्टे विरुद्धत्वं नाम किम् ?, साध्याभावाव्यभिचरितसहचरितत्वमिति उक्ते सति अव्यभिचारांशो व्यर्थ इत्यर्थः । आवश्यकं तद्विवेचनं विरुद्धत्वस्य विवेचनम्, ततस्तदुद्भावनस्य व्यर्थविशेषणोद्भावनस्य शक्यत्वात्, तेन विरुद्धेन व्यर्थविशेषणत्वात् असाधकतानुमितिः कर्तुं न शक्यते [267 B] इत्याशङ्कार्थः । तथा च साध्याभावाव्यभिचरितसहचरितत्वात् इत्यत्र व्यभिचारावारकविशेषणावच्छेदेन व्याप्तिरेव नास्ति इति कृत्वा तन्नासाधकतानुमितिसाधनम् । त्वया यद् उक्तं परार्थानुमाने इदमधिकं स्वार्थानुमाने तु न किञ्चिद् दूषणमिति तद् न सम्भवति, यतो व्यर्थविशेषणावच्छेदेन व्याप्तिरेव नास्ति इति कृत्वा स्वार्थानुमानेऽपि दूषणम् । ननु नीलधूमत्वात् इत्यादिस्थले व्याप्तिर्वर्तते एव पुरुषस्तु अधिकत्वात् निगृह्यत इति मयोच्यते, त्वया

चोच्यते व्यभिचारावारकनीलविशेषणावच्छेदेनापि व्याप्तिर्नास्ति तर्हि अधिकं कुत्र दूषणमिति, अत आह - **हेतुद्वयोपन्यासे चेति** मूलम् । यत्र हेतुद्वयोपन्यासः यथा पर्वतो वह्निमान् धूमात् आलोकाच्च इति हेतुद्वयोपन्यासेऽधिकता आलोकादित्यत्रैव। यतः प्रथमेन धूमादिति हेतुना आलोकस्य द्वितीयस्य हेतोः कृतकार्यतयाऽन्यस्यालोकादित्यस्य दुष्टत्वं प्रयोजनाभावात्। नीलधूमादौ तु व्यर्थविशेषणावच्छेदेन व्याप्तिरेव नास्ति, न तु अधिकत्वं हेतुद्वयाभावात्। व्यर्थत्वं हेतुद्वये एव दूषणम्, न च नीलविशिष्टधूमकर्तव्ये। अन्येन हे[तु]ना केनचित् क्रियतेऽन्यस्य हेतोरभावात्। अत्राशङ्कते - **धूमवत्त्वादिति** मूलम्। तथा च नीलधूमकर्तव्यं यत् तत् धूमादित्यनेनैव कृतम् इति कृत्वाऽत्राप्यधिकत्वं दोषोऽस्तु इति शङ्कार्थः। दूषयति - **तथानुपन्यासादिति**। न हि नीलधूमरूपविशिष्टव्यतिरेकेण धूमात् इत्यस्य शुद्धस्योपन्यासः। यतो नीलधूमात् इत्युक्ते धूमात् इत्यस्य शुद्धस्योपन्यासो भवतीति नास्ति। यदि शुद्धस्योपन्यासो स्यात् तदा नीलेत्यनन्वितं स्यात्। धूमादिति शुद्ध एव हेतुः नीलस्य च तथा सति कुत्रान्वयः स्यादित्यर्थः। तस्मात् सिद्धं नीलधूमात् इत्यत्राधिकता नास्ति। अधिकता तु धूमात् आलोकाच्चेत्यत्राधिकतेति। अत्र अन्ये तु इत्यनेनापि मतेन विरुद्धः समर्थितः सोऽपि दूषित इति ज्ञेयम्। अथ मतान्तरेण विरुद्धं समर्थयति - **अपरे त्विति** मूलम्। साध्येति साध्यस्यानवगतः सहचारो यस्मिन् हेतौ एवंभूतो यः साध्याभावसहचारी स विरुद्धः। यथा अयमश्वो गोत्वात् अत्र साध्यमश्वत्वं तेन सहचारो गोत्वस्य हेतोरनवगतः। अथ च गोत्वमश्वत्वाभावसहचारि भवति इति कृत्वाऽयं विरुद्धः। साध्याभावसहचारी विरुद्ध इत्युच्यमाने साधारणेऽतिव्याप्तिः, यथा धूमवान् वह्नेः इत्यत्र वह्नेर्धूमाभावसहचारो वर्तते अयोगोलकादाविति। तद्वारणार्थमुक्तं साध्यानवगतसहचारेति। साधारणस्य साध्यानवगतसहचारत्वं नास्ति महानसादौ साध्येन सहचारात्। गोत्वस्याश्वत्वेन सह कुत्रापि सहचाराभावात् विरुद्धत्वम्। अथ साध्यानवगतसहचारस्येति पदस्य प्रयोजनमाह - **अन्यथेति** मूलम्। यदि साध्याभावव्याप्य एव विरुद्धः स्यात् तदा पृथिवी इतरभेदवती मेयत्वात् इत्यत्र मेयत्वे विरुद्धे हेतौ इतरभेदाभावस्य श्रे(मे)यत्वे व्याप्यत्वं नास्ति, यथा यत्र यत्र मेयत्वं तत्र तत्र इतरभेदाभाव इति नास्ति पृथिव्यामेव व्यभिचारात्। हेतुमाह - **साध्याभावेति**। मेयत्वस्य इतरभेदाभावव्याप्यत्वाभावात् यथा यत्र मेयत्वं तत्र इतरभेदाभाव इति [268 A] नास्ति, पृथिव्यां मेयत्वं वर्तते इतरभेदाभावो नास्ति इतरभेदस्य जलादिभेदस्य पृथिव्यां सत्त्वात् इत्यर्थः। अत्राशङ्कते - **न चेति** मूलम्। तथा चायं हेतुः साधारण एव, न विरुद्ध इति शङ्कार्थः। दूषयति - **सपक्षेति**। साधारणो हि सपक्षगामी, अस्य च सपक्षो नास्ति इतरभेदस्य पूर्वं कुत्राप्यनिश्चयात्। तथा च तत्सङ्ग्रहार्थं विरुद्धत्वसङ्ग्रहार्थमिदं लक्षणं साध्यानवगतेत्यादिपूर्वोक्तम्। अत्र लक्षणेऽतिव्याप्तिमाशङ्कते - **न चेति** मूलम्। तथा च पर्वतो धूमवान् वह्नेः इत्यत्र धूमसहचारो वह्नौ यदा ज्ञातो नास्ति तदा साध्यानवगतसहचारो

भवति वह्निः इति कृत्वा साधारणे वह्नावतिव्याप्तिः । समाधत्ते - **तदेति** मूलम् । तदा साध्यसहचाराज्ञानदशायां **तस्य साधारणस्य विरुद्धत्वेन सङ्ग्राह्यत्वं विरुद्धत्वमेवेत्यर्थः**, इति मतेन स्थापितं विरुद्धं दूषयति - **तन्नेति** । तथा च साध्यानवगतसहचारः साध्याभावसहचारीति विरुद्धलक्षणे साध्यानवगते(त)सहचारी(रः) [इ]ति विशेषणं तु व्यर्थमेव दूषकतायाम् । यत् तु साध्याभावसहचारित्वं विपक्षगामित्वं तत् तु साधारणत्वमेव । ततो विरुद्धस्य साधारण एवान्तर्भावः स्यादिति भावः । ननु पृथिवी इतरेभ्यो [भिद्यते] मेयत्वात् इत्यत्र यदि विरुद्धोऽधिको हेत्वाभासो नास्ति तदाऽयं कुत्रान्तर्भूत इत्यत आह - **अत एवेति** मूलम् । यतः साध्याभावसहचरितत्वं साधारणत्वम् अत एव व्यभिचरितो व्यतिरेक्यपि साधारण एव, यथा पृथिवी इतरेभ्यो भिद्यते मेयत्वात् इत्यत्र इतरभेदरूपं साध्य(ध्यं) व्यतिरेकि, साध्यस्यान्वयित्वेन हेतोरन्वयित्वम्, साध्यस्य व्यतिरेकित्वेन हेतोरपि व्यतिरेकित्वम्, ततोऽयं व्यभिचरितो व्यतिरेकी साधारण एवान्तर्भूतः । विरुद्धं समर्थयितुं मतान्तरमाह - **नापीति** मूलम् । साध्याभावसाधकत्वं साध्याभावानुमितिजनकत्वमित्यर्थः । ननु साध्याभावानुमितिजनकत्वं भ्रमरूपवह्न्यभावानुमितिजनके धूमादावतिव्याप्तम्, यथा भ्रमात् केनचित् ज्ञातम् अयं वह्न्यभाववान् धूमात् इत्यत्र साध्याभावानुमितिजनकत्वादतिव्याप्तिरित्यत आह - **तत्प्रमापकत्वमिति** मूलम् । तथा च धूमे वह्न्यभावप्रमापकत्वाभावात् नातिव्याप्तिरित्यर्थः । वर्तते च यथाऽयमश्वो गोत्वात् इत्यत्र तु गोत्वेनाश्वत्वाभावस्य प्रमारूपैवानुमितिर्जन्यते इति, अतोऽयं विरुद्ध इत्यर्थः । इदं लक्षणं दूषयति - **साध्याभावेति** मूलम् । साध्याभावसम्बन्धबुद्धिं विना साध्याभावसाधकत्वमपि ज्ञातुं न शक्यते, साध्याभावप्रमापकत्वमपि ज्ञातुं न शक्यते, तथा चावश्यकोपस्थितसाध्याभावसम्बन्ध एव दूषणमस्तु व्यर्थमधिकम् । स च साध्याभावसम्बन्धस्तु [268 B] साधारण एव, यथा वह्निसम्बन्धो यदि धूमे ज्ञायते तदा वह्न्यनुमितिर्भवति, यदि च वह्निसम्बन्धो धूमे न ज्ञातस्तदा धूमात् वह्न्यनुमितिर्न भवति, तथा च यस्य सम्बन्धो हेतौ सपक्षादौ ज्ञायते तदनुमितिर्भवति । ततः प्रकृते गोत्वेऽश्वत्वाभावसम्बन्धश्चेत् ज्ञातो भवति तदाऽश्वत्वाभावसम्बन्धज्ञानं गोत्वे दूषणमस्तु, किमर्थं साधकत्वांशः प्रमापकत्वांशश्च लक्षणे प्रवेष्टव्यः ? साध्याभावसम्बन्धश्च पूर्वोक्तरीत्या साधारण एवेति । लक्षणान्तरमाशङ्क्य दूषयति - **नापीति** मूलम् । साध्यवतोऽन्यः साध्यवदन्यः, तद्व्याप्यत्वं साध्यवद्भिन्नव्याप्यत्वम् । यथाऽयमश्वो गोत्वात् इत्यत्र साध्यवानश्वः, तदन्योऽश्वत्वाभावः, तद्व्याप्यत्वं यथा यत्र यत्र गोत्वं तत्र तत्राश्वत्वाभाव इति विरुद्धः । इदं दूषयति - **व्याप्यत्वेति** मूलम् । व्याप्यत्वविवेचने कृते व्याप्यत्वं नाम अव्यभिचरितसहचरितत्वम्, यथा वह्न्यभाववदवृत्तित्वे सति वह्निसामानाधिकरण्यम्, तथा चाव्यभिचरितत्वांशेऽसाधकतानुमाने व्यर्थविशेषणत्वग्रस्तं लक्षणान्तरमाशङ्क्य दूषयति - **नापीति** मूलम् । स्वशब्देन हेतुः, तस्य व्यापको योऽभावः तस्य प्रतियोगि साध्यं यस्य हेतोः स स्वव्यापकाभावप्रतियोगिसाध्यकः । यथा

अयमश्वो गोत्वात् इत्यत्र गोत्वस्य व्यापकोऽश्वत्वाभावः तस्य प्रतियोगि यत् साध्यमश्वत्वं तत्कत्वं गोत्वे वर्तते इति गोत्वं विरुद्धम् । **साध्याभावस्येति** मूलम् । तथा च यदि साध्याभावस्य हेतुव्यापकत्वप्रतीतिस्तदा हेतोरपि साध्याभावसम्बन्धप्रतीतिरावश्यकीति ततः साध्याभावसम्बन्धज्ञानं व्यभिचारज्ञानमेव दूषणमिति विरुद्धस्यापि तत्रैवान्तर्भावः स्यादिति विरुद्धपूर्वपक्षग्रन्थार्थः ।

अथ टीका । **तथानुपन्यासादिति** मूलव्याख्या । ननु इदं मूलमयुक्तम्, नीलधूमात् इत्यत्र धूमवत्त्वोपन्यासस्तिष्ठत्येव इत्यत आह - **नीलेति** टीका । तथा च नीलबहिर्भावेन धूमस्योपन्यासः स्यात् तदा नीलधूमरूपविशिष्टकर्तव्यमन्येन कृतं स्यात् । न च नीलबहिर्भावेन नीलधूमात् इत्यत्र धूमपदप्रयोग इत्यर्थः । तथा चात्राधिक्यप्रयोजकं नीलधूमात् इत्यत्र हेत्वन्तरं नास्तीति नात्राधिक्यं व्यर्थविशेषणतेति भावः । ननु नीलस्य अनन्वये किं दूषणमित्यत आह - **तथैवेति** टीका । तथा च यदि नीलबहिर्भावेनैव धूमवत्त्वस्य प्रयोगस्तदा धूमासमभिव्याहृतस्य नीलपदस्यानन्वयिपदजातमपार्थकं स्यात् इत्यर्थः । ननु साध्यानवगतसहचारो विरुद्ध इत्यत्र गोत्वाश्वत्वयोः सहचारभ्रमदशायां विरुद्धत्वं [न] स्यात् यतः तयोः साध्यानवगतसहचारो नास्ति भ्रमेण तयोः सहचारस्य ज्ञातत्वादित्यनवस्था इत्यन्यथा व्याचष्टे - **साध्याप्रमितेति** [269 A] । साध्येन सहचारो यत्र प्रमितो नास्तीत्यर्थः । एवं गोत्वाश्वत्वयोर्यद्यपि भ्रमरूपः सहचारो वर्तते तथापि स सहचारः प्रमितः सहचारो नास्तीति न तत्रातिव्याप्तिः । साध्याभावसम्बन्धबुद्धिं विनेति फक्किकां व्याचष्टे - **साध्याभावेति** टीका । हेतोः साध्याभावस्य प्रमापकत्वं तदा स्यात् यदि हेतुः साध्याभावव्याप्यत्वेन ज्ञायते, यदि हेतुः साध्याभावव्याप्यत्वेन ज्ञातस्तदा साध्याभावसहचारज्ञानमावश्यकमिति साध्याभावसहचारज्ञानत्वेन दूषकत्वमस्तु इत्यर्थः । ततो विरुद्धः साधारण एव भवतु इत्यर्थः । एतदेवाह - **तत्सम्बन्धबुद्धिरिति** । व्याप्यत्वज्ञाने चावश्यं सम्बन्धबुद्धिरिति भावः । **अन्यथेति** टीका । यदि साध्याभावसहचारज्ञानं साध्याभावप्रमापकत्वज्ञाने विद्यमाने नास्ति तदा साध्याभावप्रमापकत्वज्ञानं विरोध्यविषयत्वात् अप्रतिबन्धकमिति कथं साध्याभावप्रमापकत्वं विरुद्धो हेत्वाभासः यतः साध्याभावप्रमापकत्वज्ञानं व्याप्तौ ग्राह्यो व्यभिचारः सहचारश्च तदभावानवगाहितया ग्राह्याभावानवगाहित्वात् प्रतिबन्धकमेव न स्यात् । ततो विरुद्धो हेत्वाभासो न भवेदित्यर्थः ।

**उच्यते । साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वम् । न च प्रतियोगिनोरन्वये भासमान एव तदभावयोर्व्याप्तिग्रहः भिन्नग्रहसामग्रीत्वात्[१], अन्यथा व्यतिरेकिविलयापत्तेः ।**

अथ सिद्धान्ते मूलम् । **साध्यव्यापकाभावेति** । साध्यस्य व्यापको योऽभावः तत्प्रतियोगित्वं हेतौ विरुद्ध-

---

१. मुद्रितपुस्तके तु 'भिन्नग्राहकसामग्रीकत्वात्' इति पाठः ।

त्वम्। यथा अयमश्वो गोत्वात् इत्यत्र विरुद्धे यत्राश्वत्वं तत्र गोत्वाभाव इति साध्यस्य व्यापको गोत्वाभावस्तत्प्रतियोगित्वं गोत्वे वर्तते इत्यतोऽयं विरुद्ध इत्यर्थः। अत्र साध्यसमानाधिकरणाभावप्रतियोगित्वं विरुद्धत्वमित्येवास्तु व्यापकत्वांशः किमर्थमिति चेन्न पर्वतो वह्निमान् धूमात् इत्यत्र अतिव्याप्तिवारणार्थं व्यापकत्वभागः। तथाहि वह्निसमानाधिकरणो योऽत्यन्ताभावो धूमात्यन्ताभावोऽयोगोलके तत्प्रतियोगित्वं धूमे वर्तते एव इति व्यापकत्वांशः, तथा च धूमाभावो वह्नेर्व्यापको न भवति यतो यत्र वह्निस्तत्र धूमाभाव एवं व्यापकत्वं नास्ति महानसादावुभयसत्त्वात्। ननु अत्रापि लक्षणे साध्याभावसहचरितत्वज्ञानमावश्यकम्, ततोऽस्यापि व्यभिचारित्वज्ञानत्वेनैव प्रतिबन्धकत्वमस्तु। ततो विरुद्धः किमर्थं पृथगित्यत आह - **न चेति** मूलम्। तथा च साध्यहेत्वभावयोर्व्याप्तिग्रहे यदि हेतुसाध्याभावयोर्व्याप्तिग्रह आवश्यकः स्यात् तदा व्यभिचारज्ञानत्वेन दूषकत्वं स्यात्, तदेव तु नास्ति साध्याभावहेत्वोर्यथा यत्र यत्र गोत्वं तत्राश्वत्वाभाव इति व्याप्तिग्रहाभावेऽपि साध्यहेत्वभावयोर्व्याप्तिज्ञानात् न साध्यहेत्व(हेतुसाध्या)भावयोर्व्याप्तिज्ञानम्। साध्यस्य हेत्वभावे यद् व्यापकत्वज्ञानं तत् हेतौ साध्याभावव्याप्तिज्ञानं विना चेन्न भवेत् तदा हेतौ साध्याभावव्याप्तिर्नाम साध्याभावेनाव्यभिचरितः [269 B] सम्बन्धः, ततः साध्याभावसहचारज्ञानमावश्यकम्, तदा विरुद्धस्यापि साधारणज्ञानत्वेनै[व] प्रतिबन्धकत्वं स्यात्, न चैवम्। **प्रतियोगिनोरिति** मूलम्। प्रतियोगिनोः हेत्वभावस्य प्रतियोगी हेतुः साध्याभावाभावस्य प्रतियोगी साध्याभावः इति हेतुसाध्याभावयोः प्रतियोगिनोः अन्वये भासमाने एव तदभावयोः हेत्वभावसाध्ययोः चेत् व्याप्तिग्रहः तदा साधारणत्वेन प्रतिबन्धकता स्यात्। तदेव तु नास्तीत्यर्थः। यथा अयमश्वो गोत्वात् इत्यत्र गोत्वाभावेऽश्वत्वव्यापकत्वज्ञाने गोत्वाभावो व्यापकोऽश्वत्वं व्याप्यम्। यत्र यत्र अश्वत्वं तत्र तत्र गोत्वाभाव इति रूपे यदि ए[त]त्प्रतियोगिनोरश्वत्वगोत्वाभावयोः प्रतियोगिनोः, अश्वत्वस्य प्रतियोगी अश्वत्वाभावः गोत्वाभावस्य प्रतियोगी गोत्वं तयोः, व्याप्तिग्रहः आवश्यकः स्यात् यथा यत्र गोत्वं तत्राश्वत्वाभाव इति तदा गोत्वेऽश्वत्वाभावसहचारज्ञानं तदेव व्यभिचारज्ञानमिति व्यभिचारज्ञानत्वेनैव प्रतिबन्धकता स्यात्, परमेवं नास्ति। कुत इत्यत आह - **भिन्नग्रहसामग्रीत्वादिति** मूलम्। यत्र गोत्वं तत्राश्वत्वाभाव इति व्याप्तिग्रहे अश्वत्वाभावगोत्वसहचारज्ञानरूपा भिन्ना सामग्री। अथ च यत्राश्वत्वं तत्र गोत्वाभाव इति व्याप्तिग्रहे भिन्ना सामग्री। तथा च यत्राश्वत्वं तत्र गोत्वाभाव इत्यत्र व्याप्तिग्रहे गोत्वेऽश्वत्वाभावसहचारज्ञानस्योपेक्षैव नास्तीति किन्तु अश्वत्वस्य गोत्वाभावसहचारज्ञानापेक्षेति। यथा यत्र यत्र अश्वत्वं तत्र गोत्वाभाव इति व्याप्तिग्रहेऽश्वत्वे गोत्वाभावसहचारज्ञानस्यैवापेक्षा। यथा यत्र धूमस्तत्र वह्निरिति व्याप्तिज्ञाने धूमे वह्निसहचारज्ञानस्यैवापेक्षा न तु धूमाभावे वह्निसहचारज्ञानापेक्षा यथा वह्न्यभावसहचरितो धूम इति सहचारज्ञानस्यैवापेक्षा नास्ति। **अन्यथेति** मूलम्। यदि प्रतियोगिनोरन्वये भासमाने एवाभावयोरन्वयो भासेत, यथा घटपटयोः सहचारज्ञाने विद्यमाने एव घटपटाभावयोः सहचारज्ञानं यदि स्यात्, तदा व्यतिरेकिविलयो व्यतिरेक्यनुमानं

न स्यात्। यथा पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् इत्यत्र यत्र यत्र इतरभेदाभावस्तत्र पृथिवीत्वाभाव इति व्याप्तिग्रहे प्रतियोगिनोरप्यन्वयसहचारग्रहापेक्षा यथा इतरभेदसहचरितं पृथिवीत्वमिति यदि अन्वयसहचारज्ञानं तदा केवलव्यतिरेकिण उच्छेदः स्यात्। कथम् ? अन्वयसहचारे सोऽन्वयी एव स्यादिति भावः। इति सिद्धान्तितं विरुद्धो व्यभिचाराद् भिन्न इत्युक्त(क्तिः) युक्ता। अयं भावः - विरुद्धो व्यभिचारी तदा भवति यदा विरुद्धत्वज्ञानं व्यभिचारविषयकं स्यात्। यत्र यत्र अश्वत्वं तत्र तत्र गोत्वाभाव इति यद् गोत्वाश्वत्वयोर्विरुद्धज्ञानं तत् चेत् व्यभिचारविषयकं स्यात् तदा विरुद्धत्वज्ञानस्य व्यभिचारज्ञानत्वेनैव प्रतिबन्धकत्वं स्यात्, यदि अश्वत्वाभाववति गोत्वं वर्तते इति एतद्विषयकं स्यात् तदा साध्याभाववति हेतोर्ज्ञानात् व्यभिचारमेवेदं स्यात्। न त्वेवं किन्तु अश्वत्वाभाववति गोत्वम्। अयं व्यभिचारः एतद्विषयकं चेत् [270 A] तद् ज्ञानं स्यात्, तदा विरुद्धत्वज्ञानं व्यभिचारज्ञानं स्यात्। न चैतत् अनयोर्भिन्नसामग्रीकत्वात्। अश्वत्वाभाववति गोत्वमिति तु अश्वत्वादिप्रतियोगिज्ञानसाध्यम्, विरुद्धे तु सहचारज्ञानरूपा सामग्री यत्राश्वत्वं तत्र गोत्वाभाव इति अश्वत्वगोत्वाभावयोः सहचारज्ञानं गोत्वरूपप्रति[योगि]ज्ञानम्। सामग्रीभेदात् अनयोर्भेद इति मूलकारसमाधानम्।

अथ टीका। अत्र टीकायामाक्षेपः। अत्र पूर्वपक्षो यथा यत्राश्वत्वं यत्र गोत्वाभाव इदं यद् विरुद्धत्वज्ञानं तत् नानुमितौ साक्षाद् विरोधि न वा तत्करणे व्याप्तिज्ञानादौ विरोधि। कुत इत्यत आह - **साध्यव्यापकत्वमिति** टीका। लक्षणे साध्यव्यापकत्वं नाम साध्यवन्निष्ठात्यन्ताभावाप्रतियोगित्वम्, तथा च हेत्वभावे साध्यवन्निष्ठात्यन्ताभावाप्रतियोगित्वलक्षणं यद् व्यापकत्वं तस्य ज्ञानेनानुमितिविरोध्यर्थभानं न वा, अनुमितिकरणव्याप्तिज्ञानविषयविरोधी व्याप्तिविषयोऽव्यभिचारः सहचारश्च तद्विरोध्यर्थः कोऽपि न भासते। यत्राश्वत्वं तत्र गोत्वाभाव इत्यश्वाधिकरणे गोत्वाभावज्ञानं चेत् जातम् एतद् ज्ञानं नाव्यभिचारज्ञानविरोधि व्यभिचाराविषयकत्वात्, नापि सामानाधिकरण्यज्ञानविरोधि सामानाधिकरण्याभावाविषयकत्वात्। अश्वत्ववति गोत्वाभाव इति ज्ञाने विद्यमानेऽपि अश्वत्वगोत्वयोः सामानाधिकरण्यज्ञानं भविष्यत्येव यथा वह्निमति अयोगोलके गोत्वा(धूमा)भाव इति ज्ञाने विद्यमानेऽपि धूमवह्नौः(ह्न्योः) सहचारज्ञानं जायत एव। एतदेवाह - **ग्राह्याभावस्फुरणादिति** टीका। व्याप्तिज्ञाने ग्राह्योऽव्यभिचारः सहचारश्च तदभावास्फुरणादित्यर्थः। ननु ग्राह्याभावानवगाह्यपि ज्ञानं प्रतिबन्धकं भवतु इत्यत आह - **अतथाभूतेति** टीका। ग्राह्याभावानवगाहिनो ज्ञानस्य प्रतिबन्धकत्वाभावात्। कुत इत्यत आह - **अन्यथेति** टीका। यदि ग्राह्याभावानवगाह्यपि ज्ञानं प्रतिबन्धकं स्यात् तदा घटज्ञाने पटाभावज्ञानमपि प्रतिबन्धकं स्यात्। ग्राह्यो घटः तदभावानवगाहित्वात्। यत्र ज्ञाने यो विषयः स तत्र ग्राह्यः यथा घटो विषयश्चेत् तदा घटज्ञाने घटो ग्राह्यः तदभावावगाह्येव ज्ञानं प्रतिबन्धकमित्याशङ्कार्थः। ततः सिद्धं विरुद्धत्वरूपमुक्तज्ञानं

प्रतिबन्धकमेव न भवतीति भावः । उत्तरयति - **सकले**ति टीका । सकलसाध्याधिकरणे वृत्तियोऽभावो हेतोरभावस्तत्प्रतियोगित्वं हेतौ तदेव विरुद्धत्वं विवक्षितम् । यथा यावन्ति अश्वत्वाधिकरणानि तन्निष्ठा येऽत्यन्ताभावा गोत्वात्यन्ताभावास्तत्प्रतियोगित्वं गोत्वे वर्तते इति कृत्वाऽश्वत्वसाधने गोत्वं विरुद्धो हेतुः । यत्किञ्चित्साध्याधिकरणनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानस्य हेत्वभावे यत्किञ्चित्साध्याधिकरणनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानस्य साध्यसामानाधिकरण्यज्ञानविरोधित्वं यद्यपि नास्ति, वह्निमत्यपि अयोगोलके धूमाभाव इति ज्ञाने विद्यमानेऽपि वह्निधूमयोः सामानाधिकरण्यज्ञानस्य सम्भवात् धूम(मा)भाव(वे) यावद्वह्न्यधिकरणनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञाने [270 B] विद्यमाने धूमवति वह्निरिति ज्ञानानुदयात्, सकलसाध्याधिकरणे धूमाभावज्ञाने विद्यमाने सा[ध्या]धिकरणे हेतुरिति ज्ञानं नोदेति गाह्याभावावगाहिज्ञानस्य विद्यमानत्वात् सकलसाध्याधिकरणे हेतौ ग्राह्ये सकलसाध्याधिकरणे हेत्वभावावगाहि यद् ज्ञानं तद्विरुद्धत्वज्ञानं भवत्येव । एतदेव विवृणोति - **सर्वस्मिन्नि**ति टीका । सर्वस्मिन् साध्याधिकरणे यत् हेतुविरहज्ञानं तत् हेतौ साध्यसामानाधिकरण्यज्ञानविरोधि भवत्येव । कथमित्यत आह - **साध्याधिकरणे** इति टीका । साध्याधिकरणं(णे) हेतौ गृह्यमाणे साध्याधिकरणे हेत्वभावज्ञानं विरोधि भवत्येव । ननु द्रव्यत्वसाध्यककपिसंयोगरूपहेतौ सद्धेतौ इदं लक्षणमतिव्याप्तम् । तथाहि-इदं द्रव्यं कपिसंयोगात् इत्यत्र सकलसाध्याधिकरणे द्रव्यत्वाधिकरणे कपिसंयोगरूपहेत्वभावज्ञानं वर्तते कपिसंयोगस्य अव्याप्यवृत्तित्वात् इत्यत आह - **अभावपदं चे**ति टीका । साध्यवन्निष्ठो यः प्रतियोगिव्यधिकरणोऽभावः तत्प्रतियोगित्वम् इदं च विरुद्धत्वम्, इदं द्रव्यं कपिसंयोगात् इत्यत्र सद्धेतौ कपिसंयोगे नास्ति सकलद्रव्यत्वाधिकरणनिष्ठो यः प्रतियोगिव्यधिकरणोऽत्यन्ताभावस्तत्प्रतियोगित्वम् । द्रव्यत्वाधिकरणे यः कपिसंयोगात्यन्ताभावः स प्रतियोगिव्यधिकरणो न भवतीति न तत्रातिव्याप्तिरित्यर्थः । अत्राशङ्कते - अयमाकाशवान् द्रव्यत्वात् इत्यत्र इदं लक्षणमव्यापकं सकलसाध्याधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वलक्षणमव्याप्तम् । आकाशस्य वृत्तिः कुत्रापि नास्तीति सकलसाध्याधिकरणनिष्ठो योऽत्यन्ताभावस्तत्प्रतियोगित्वं द्रव्यत्वे वक्तव्यम् तच्च नास्त्येव सकलसाध्याधिकरणस्याकाशस्य अप्रसिद्धेः । मध्ये शङ्कते - **न चे**ति । तदा अलक्ष्यमेव अयमाकाशवान् द्रव्यत्वादिति हेतुर्विरुद्धो न भवतीत्याशङ्कार्थः । समाधत्ते - साध्ये आकाशे द्रव्यत्वसामानाधिकरण्याभावज्ञानं व्याप्तिग्रहप्रतिबन्धकं भवतीति कृत्वा तद्विषयस्येति, साध्ये हेतुसामानाधिकरण्याभावस्य हेत्वासत्वमुचितमेव । यद्विषयकं ज्ञानं प्रतिबन्धकं स हेत्वाभासः भवति आकाशे च द्रव्यत्वसामानाधिकरण्याभावज्ञानं द्रव्यत्वाकाशयोः सामानाधिकरण्यरूपव्याप्तिग्रहे प्रतिबन्धकं भवतीति स सामानाधिकरण्याभावो हेत्वाभासो वक्तव्य एवेत्यर्थः । एतदेवाह - **तस्ये**ति । तस्य प्रतिबन्धकज्ञानविषयत्वस्य तत्र साध्ये आकाशरूपे यो हेतुसामानाधिकरण्याभावस्तस्मिन् हेतुसत्त्वादित्यन्वयः । पुनः शङ्कते - **न चे**ति टीका । ननु सकलसाध्याधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं

विरुद्धत्वं नोच्यते, किन्तु साध्ये हेतुसामानाधिकरण्याभावः एव विरुद्धत्वम् इत्याशयेन शङ्कते - **न चेति**। तथा चाकाशसाध्यके पूर्वोक्तेऽनुमाने द्रव्यत्वसामानाधिकरण्यं घटे प्रसिद्धं तदभाव आकाशे साध्ये वर्तते एवेति सकलविरुद्धेषु लक्षणं व्यापकं वर्तते एवेति नाव्याप्तिः, अयवे(मे)व च विरुद्धहेत्वाभासोपाधिः। दूषयति - **अस्यापीति** टीका। इदं द्रव्यं [271 A] आकाशात् इत्यत्र विरुद्धेऽतिव्याप्तिः यतो हेतुसामानाधिकरण्यस्याकाश-सामानाधिकरण्यस्याप्रसिद्धेरित्यर्थः। अथेत्यारभ्य पूर्वपक्षो विरुद्धदूषणार्थः। विरुद्धं समर्थयति - **सर्वेषामेवेति** टीका। सर्वेषां साध्ये हेतुसामानाधिकरण्याभाव इत्येकः। हेतौ साध्यसामानाधिकरण्याभाव इत्यादीनां सर्वेषां विरुद्धोपाधित्वमेव कुत इत्यत आह - **विरुद्धत्वाविशेषेणेति** टीका। तथा च हेतौ साध्यसामानाधिकरण्या-भावज्ञानं व्याप्तिज्ञानविरोधि अथ च साध्ये हेतुसामानाधिकरण्याभावज्ञानमपि व्याप्तिज्ञानविरोधि भवत्येवेति एको हेत्वाभासोपाधिरपरो नेति वक्तुमशक्यं विरोधित्वाविशेषेण, एकस्य हेत्वासोपाधित्वे विनिगमका-भावादित्यर्थः। **न चेति**। तथा च नानाज्ञानानामुक्तरूपाणां प्रतिबन्धकत्वात् तद्विषयाणां हेत्वाभासत्वे हेत्वा-भासानन्त्यं स्यादित्याशङ्कार्थः। समाधत्ते - **सामानाधिकरण्येति** टीका। सामानाधिकरण्ये साध्यहेतुप्रतियोगि-कत्वधीविरोधिधीविषयत्वेन सर्वेषामेकीकरणात्। यथा सर्वोऽपि सम्बन्धोऽनुयोगिकप्रतियोगिको भवति। यथा दण्डदेवदत्तयोः संयोगो दण्डप्रतियोगिकदेवदत्तानुयोगिकः। यतोऽधिकरणमनुयोगि [देवदत्तरूपम्] दण्डरूप आधेयः प्रतियोगी। तथा प्रकृते हेतुसाध्ययोः सामानाधिकरण्यमपि हेत्वनुयोगिकं साध्यप्रतियोगिकं च भवति। ततः सामानाधिकरण्ये हेत्वनुयोगिकत्वज्ञानविरोधि किं ज्ञानम्, यथा इदं द्रव्यमाकाशात् इत्यत्र द्रव्यत्वसामाना-धिकरण्ये आकाशानुयोगिकत्वज्ञानविरोधि किं ज्ञानम्? आकाशे द्रव्यत्वसामानाधिकरण्यं नास्ति इदमेव विरोधि ज्ञानम्, तद्विषयो भवत्याकाशे द्रव्यत्वसामानाधिकरण्याभावः, एवं सामानाधिकरण्ये साध्यप्रतियोगिकत्वज्ञान-विरोधि किं ज्ञानम्? अयमाकाशवान् द्रव्यत्वात् इत्यत्र द्रव्यत्वसामानाधिकरण्ये आकाशप्रतियोगिकत्वज्ञान-विरोधे(धि) कीदृशं ज्ञानम्? आकाशरूपे साध्ये द्रव्यत्वरूपहेतुसामानाधिकरण्याभाव इति ज्ञाने विद्यमाने द्रव्यत्व-सामानाधिकरण्ये आकाशप्रतियोगिकत्वं ग्रहीतुं न शक्यते। यथा वायौ रूपाभावज्ञाने विद्यमाने वाय्वनुयोगिकत्वग्रहो न भवति, वाय्वधिकरणे वा रूपप्रतियोगिकत्वग्रहो न सम्भवति इत्युभयविधं ज्ञानं न जायते, तद्वत् प्रकृते सामानाधिकरण्ये हेत्वनुयोगिकत्वसाध्यप्रतियोगिकत्वज्ञानं विरोधि भवत्येव। हेतौ साध्यसामानाधिकरण्यं नास्ति, साध्ये वा हेतुसामानाधिकरण्यं नास्तीति ज्ञानमुभयरूपमपि सामानाधिकरण्ये या साध्यहेतु[प्रतियोगिक]-त्व(त्वा)नुयोगिकत्वधीस्तद्विरोधि भवत्येव। एवं यथा साध्ये हेतुसामानाधिकरण्याभावज्ञानं विरोधि तद्वत् साध्यवति हेतुर्वर्तमानो नास्ति इति इदमपि ज्ञानं विरोधि भवतीति कृत्वा एतज्ज्ञानविषयो यः साध्यवदवृत्तित्वं सोऽपि नाधिको हेत्वाभासः किन्तु तन्मध्ये एवेत्यर्थः। **अत एवेति** टीका। सकलसाध्यवान् यः स न हेतुमान् इति

ज्ञानं [271 B] सामानाधिकरण्यग्रहे प्रतिबन्धकं भवति। द्वितीयमाह - **सकलेति** टीका। सकलानि यानि साध्याधिकरणानि तन्निष्ठा येऽन्योन्याभावास्तत्प्रतियोगितावच्छेदकत्वमपि सामान्याधिकरण्यग्रहे प्रतिबन्धकं भवति। यथाऽयमश्वो गोत्वात् इत्यत्र प्रथमेऽश्वत्ववद्यावदधिकरणं गोत्ववत् नास्ति। द्वितीये यावन्ति अश्वत्वाधिकरणानि तन्निष्ठा येऽन्योन्याभावा गोत्ववदन्योन्याभावास्तत्प्रतियोगितावच्छेदकं गोत्वमिति ज्ञानमपि सामानाधिकरण्यग्रहे प्रतिबन्धकं भवतीति तज्ज्ञानविषयो यः स हेत्वाभास इति विभागन्यूनता साऽत एव परिहृता। कुतः? उक्तोपाधिना सामानाधिकरण्ये साध्यहत्वनुयोगि[क]त्वप्रतियोगिकत्वेत्यादिना विरुद्धमध्य एव लक्षितो भवतीत्यर्थः। अत एवेत्यस्य विवरणमाह - **तज्ज्ञानस्येति** टीका। तज्ज्ञानानि पूर्वोक्तानि यदि सामानाधिकरण्यग्रहे प्रतिबन्धकानि तदोक्तोपाधिना विरुद्धमध्ये एवान्तर्भावात्, यदि च तज्ज्ञानस्य सामानाधिकरण्यग्रहे प्रतिबन्धकत्वं नास्ति तदा तस्य हेत्वाभासत्वं नास्त्येवेत्यर्थः। अथ विरुद्धसाधकं मतान्तरमाह - **यत् त्विति**। साध्यस्य या सामानाधिकरण्यधीः तद्विरोधि यत् ज्ञानं तद्विषयत्वं विरुद्धत्वं पूर्वकल्पे स्वयमुक्ते सामानाधिकरण्ये साध्यहेत्वनुयोगिकत्वप्रतियोगिकत्वधीविरोधिधीविषयत्वेनानुगम उक्तः। इह तु साध्येत्यादि दूषयति - **अवृत्तीति** टीका। अवृत्तिगगनादौ। यथाऽयमाकाशवान् द्रव्यत्वात् इत्यत्र आकाशरूपसाध्यसामानाधिकरण्यधीः अप्रसिद्धा।

**यद्वा वृत्तिमतः साध्यवदवृत्तित्वं साध्यवद्वृत्तित्वानधिकरणत्वं सध्यासमानाधिकरणधर्मत्वं साध्यवद्वृत्तित्वानधिकरणधर्मत्वं वा तत्त्वम्। न च व्यतिरेक्य(किण्य)तिव्याप्तिः, तत्र साध्याप्रसिद्ध्या तथाज्ञानविरहात्।[1] साधारणे चातिव्याप्तिरेव अनेनापि रूपेण तस्य दोषत्वात्। न च साध्यवदवृत्तित्वे सति वृत्तिमत्त्वज्ञानात् साध्याभाववद्गामित्वज्ञानमावश्यकं तेन विना साध्यवदवृत्तित्वाज्ञानादिति वाच्यम्। उपजीव्यत्वेन भिन्नत्वात् उपजीव्यत्वेऽपि साध्यवति न वर्तत इति ज्ञानं न स्वतोदूषकमिति चेत्। न, असहचारज्ञानस्य विरोधितया व्याप्तिग्रहप्रतिबन्धकत्वात् [2]व्यभिचाराज्ञानविरोधित्वेन व्यभिचारज्ञानवत्। ननु विरुद्धस्य स्वार्थानुमानदोषत्वेऽपि परार्थानुमानेऽपार्थकत्वमयोग्यताज्ञानेन निश्चितानन्वयादिति चेत्। न, अयोग्यताज्ञानस्य विरुद्धत्वज्ञानोपजीवकत्वेन तस्यैव दोषत्वात्, बाधेऽप्येवम्। स चायं विधिसाधने त्रिविधः - साक्षात्**

---

१. मुद्रितपुस्तके तु 'असाधारणे च सङ्कर एव अनेनापि रूपेण तस्य दोषत्वात्' इति पाठः।

२. 'अव्यभिचारज्ञानविरोधित्वेन' इति टीकास्वीकृतः पाठः।

**साध्याभावव्याप्यत्वात्, साध्यव्यापकाभावव्याप्यत्वात्, साध्यव्यापकविरुद्धोपलम्भात्, यथा धूमवान् अयं योग्यधूमवत्तया अनुपलभ्यमानत्वात्, निरग्निकत्वात्, जलाशयत्वात्। न च सर्वत्र साध्यव्यापकविरुद्धोपलम्भ इति न त्रैविध्यम्, एतदज्ञानेऽपि साध्याभावतद्व्यापकाभावव्याप्यत्वेनापि ज्ञातस्य दोषत्वात् । न च धूमवान् अयं तदभाववत्त्वादिति त्रयाधिकम्, स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं हि व्यापकत्वम्, तच्च अभेदेऽपि धूमवान् अयं धूमाभाववत्तयोपलभ्यमानत्वात् तद्वत्तयानुपलभ्यमानत्वादित्यनैकान्तिकमेव। निषेधसाधनेऽपि त्रिविधः - प्रतियोग्युपलम्भात्, साध्यव्यापकाभावोपलम्भात्, साध्यव्यापकविरुद्धोपलम्भात्, यथा निरग्निकोऽयम् अग्निमत्त्वात् धूमाभावशून्यत्वात्, धूमवत्त्वात्। सर्वश्चायं विशेषणद्वारापि यथा कृष्णागुरुप्रभववह्निमान् अयं कटुकासुरभिपाण्डरधूमवत्त्वात्। अयं च बाधाश्रयासिद्धस्वरूपासिद्धासाधारणसङ्कीर्णः क्वचित् ।**

अथ मूलम् । **यद्वेति** मूलम् । **वृत्तिमत** इति मूलम् । तथा च वृत्तिमतो हेतोः साध्यवदवृत्तित्वं यथाऽयमश्वो गोत्वात् इत्यत्र वृत्तिमतो गोत्वस्य साध्यवदवृत्तित्वं वर्तते इति कृत्वा तस्य विरुद्धत्वम् ।' द्वितीयं लक्षणमाह - **साध्यवदिति** । साध्यवति यद् वृत्तित्वं धर्मः तदनधिकरणत्वं वर्तते वा इदम्, यथा अश्वत्वाधिकरणवृत्तित्वस्यानधिकरणत्वं गोत्वे इति विरुद्धः सः । अथ तृतीयमाह - **साध्येति** । साध्येन सहासमानाधिकरणो यो धर्मस्तत्त्वम्, अश्वत्वेन सहासमानाधिकरणो धर्मो गोत्वं भवति। चतुर्थमाह - **साध्यवदिति** । साध्यवत् अश्वत्ववत् यदधिकरणं तद्वृत्तित्वानधिकरणधर्मत्वं गोत्वे वर्तते इति विरुद्धत्वम् । अत्र शङ्कते - **न चेति** मूलम् । व्यतिरेकिणि वृत्तिमतः साध्यवदवृत्तित्वज्ञानं तिष्ठति, यथा पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् इत्यत्र पृथिवीत्वस्य वृत्तिमतः साध्यवदवृत्तित्वज्ञानं विद्यते इति न च वाच्यम्। दूषणमाह - **तत्रेति** मूलम् । तत्र व्यतिरेकिणि साध्यवदवृत्तित्वज्ञानमेव नास्ति साध्याप्रसिद्धेः । **तथेति** मूलम् । साध्यवदवृत्तित्वज्ञानविरहात् इत्यर्थः । ननु आकाशः शब्दवान् कृतकत्वादिति साधारणेऽतिव्याप्ति साध्यवति आकाशे कृतकत्वज्ञानाभावात् इत्यतिव्याप्तिः इत्यत आह - **साधारणे चेति** मूलम् । तथा च साधारणे यदि साध्यवदवृत्तित्वज्ञानं वर्तते [272 A] तदाऽनेन रूपेण साधारणोऽपि विरुद्ध एव । साधारणत्वं तु साध्याभाववद्वृत्तित्वेन । तथा चैकस्यापि कृतकत्वरूपहेतोः साध्यवदवृत्तित्वेन विरुद्धत्वम्, साध्याभाववद्वृत्तित्वेन साधारणत्वम् इति उपाधिभेदाद् भेद इत्यर्थः । एतदेवाह - **अनेनापीति** मूलम् । साध्य-

वदवृत्तित्वेन रूपेणेत्यर्थः। अत्राशङ्कते - **न चेति** मूलम्। तथा च साध्यवदवृत्तित्वे सति वृत्तिमत्त्वज्ञानात् साध्याभाववद्गामित्वस्य ज्ञानं व्यभिचारज्ञानमावश्यकम्। तेन व्यभिचारज्ञानेन विना वृत्तिमतः साध्यवद्वृत्तित्वमेव न सम्भवति। यतो वृत्तिमत् साध्यवति चेन्न वर्ततेऽवश्यं साध्याभाववति वर्तते इति व्यभिचारज्ञानमेव, ततोऽस्य व्यभिचारज्ञानत्वेनैव दूषकत्वमस्तु, यथाऽयमश्वो गोत्वात् इत्यत्र साध्याभाववद्वृत्तित्वलक्षणं व्यभिचारज्ञानमेव दोष इति शङ्कार्थः। उत्तरयति - **उपजीव्यत्वेनेति** मूलम्। तथा च व्यभिचारज्ञाने विरुद्धत्वज्ञानमुपजीव्यं परम्परया कारणं यतो विरुद्धत्वज्ञानानन्तरं व्यभिचारज्ञानं जायते। ततो विरुद्धः पृथग् हेत्वाभास इति। यतो यद् वृत्तिमत् साध्यवति न वर्तते तदवश्यं साध्याभाववति वर्तते इति साध्याभाववद्वृत्तित्वज्ञाने साध्यवदवृत्तित्वज्ञानमुपजीव्यमिति भावः। अत्राशङ्कते - **उपजीव्यत्वेऽपीति** मूलम्। यद्यपि साध्याभाववद्वृत्तित्वज्ञाने साध्यवदवृत्तित्वज्ञानमुपजीव्यं भवति तथापि साध्याभाववद्वृत्तित्वलक्षणं व्यभिचारज्ञानं स्वत एव दूषकं भवतु, न तु साध्यवदवृत्तित्वज्ञानं स्वतो दूषकं ग्राह्याभावानवगाहित्वात् - ग्राह्यं व्याप्तौ अव्यभिचरितसामानाधिकरण्यं तदभावानवगाहित्वात् - इति न च वाच्यम्। दूषयति - [**असहचारज्ञानस्येति** मूलम्]। असहचारज्ञानं यद् वर्तते तत् सामानाधिकरण्यरूपव्याप्तिग्रहे विरोधि भवति। ततोऽसहचारज्ञानस्य सहचारज्ञानविरोधित्वात् ग्राह्याभावावगाहित्वात् सामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबन्धकत्वं तिष्ठत्येव। दृष्टान्तमाह - **अव्यभिचारेति** मूलम्। अव्यभिचरितसामानाधिकरण्यं व्याप्तिः। ततो व्यभिचारज्ञानम् अव्यभिचाररूपं यद् ग्राह्यं तदभावो यो व्यभिचारः तदवगाहित्वेन व्यभिचारज्ञानस्य प्रतिबन्धकत्वं तिष्ठत्येव, तद्वत् व्याप्तिज्ञानं हेतुसाध्ययोः सामानाधिकरण्यं ग्राह्यम्, तदभावावगाहि असहचारज्ञानम्, तत्त्वेन रूपेण साध्यवदवृत्तित्वादिज्ञानानां सर्वेषां विरुद्धज्ञानत्वेन प्रतिबन्धकत्वं भवत्येव। अत्राशङ्कते - **नन्विति** मूलम्। ननु विरुद्धो यो वर्तते स स्वार्थानुमाने दूषणं भवतु व्यभिचारज्ञानेऽस्योपजीव्यत्वात् परार्थानुमाने तु इदमपार्थकमेव निग्रहस्थानविशेष एव स्यात् यथाऽयमश्वो गोत्वात् इति परार्थानुमाने साध्यवदवृत्तित्वं यद् वर्तते तदपार्थकमेव। अनन्वयिपदजातस्यापार्थकत्वात्। यतोऽश्वत्वगोत्वयोरन्वय एव नास्ति। नन्वपार्थकत्वं कथमित्यत आह - **अयोग्यतेति** मूलम्। अयमश्वो गोत्वात् इत्यत्र अश्वत्वगोत्वयोरन्वयाभावात् [272 B] अयोग्यतेति भावः। उत्तरयति - **अयोग्यताज्ञानस्येति** मूलम्। यदेव गोत्वाश्वत्वयोर्विरोधज्ञानं तदेव गोत्वाश्वत्वयोरयोग्यताज्ञानं जायते। यतो विरोधज्ञानानन्तरमयोग्यताज्ञानं जायतेऽतोऽयोग्यताज्ञानं विरोधज्ञानेऽप्युपजीव्यं भवतीति विरुद्धः पृथग् हेत्वाभासः। **तस्यैवेति** विरुद्धस्यैवेत्यर्थः। नन्वश्वत्ववत्यवर्तमानं यद् गोत्वं तदधिकरणे गवि अश्वत्वं बाधितमिति बाधत्वेनैवात्रानुमाने दूषणमस्तु न तु विरुद्धेनेत्यत आह - **एवं बाधेऽपि** इति मूलम्। यथाऽयोग्यताज्ञाने विरोधज्ञानमुपजीव्यं तथा बाधज्ञानेऽपि विरोधज्ञानमुपजीव्यं भवतु। बाधज्ञानं यथा गोत्वाधिकरणे गोव्यक्तौ अश्वत्वं नास्तीति। इति विरुद्धः पृथक्। अथ विरुद्धविभागमाह - **स चायमिति** मूलम्। विरुद्धस्त्रिविध

इत्यर्थः। तान् उद्दिशति - **साक्षादिति**। एकः साक्षात् साध्याभावव्याप्यत्वात्। द्वितीयमाह - **साध्यव्यापकाभावव्याप्यत्वात्**। तृतीयो यथा **साध्यव्यापकविरुद्धोपलम्भात्**। क्रमेणोदाहरति - **यथा धूमवानयं योग्यधूमवत्तयाऽनुपलभ्यमानत्वात्** । अत्र साक्षात् साध्यस्याभावो धूमाभावस्तद्व्याप्यत्वं वर्तते योग्यधूमवत्तयाऽनुपलभ्यमानत्वस्य । यथा यत्र योग्यधूमवत्तयाऽनुपलभ्यमानत्वं तत्र धूमाभाव इति । साक्षात् अव्यवधानेनेत्यर्थः । द्वितीयमुदाहरति - **निरग्निकत्वादिति** । धूमवानयं निरग्निकत्वात् । अत्र साध्यस्य धूमस्य यद्व्यापकं योग्यधूमवत्तयोपलभ्यमानत्वं यत्र यत्र धूमस्तत्र योग्यधूमवत्तयोपलभ्यमानत्वमिति, तस्य योऽभावो योग्यधूमवत्तयाऽनुपलभ्यमानत्वं तद्व्याप्यत्वं वर्तते निरग्निकत्वस्य यथा यत्र निरग्निकत्वं तत्र तत्र योग्यधूमवत्तयाऽनुपलभ्यमानत्वम्। तृतीयमाह - **जलाशयत्वादिति** मूलम्। पर्वतो धूमवह्निमान् (धूमवान्) जलाशयत्वात् इत्यत्र साध्यो धूमस्तद्व्यापको वह्निस्तद्विरुद्धो जलाशयस्तत्त्वात्, अतः साध्यव्यापकविरुद्धोपलम्भो वर्तत इति तृतीयः। अत्राशङ्कते - **न चेति**। तथा च त्रयाणामप्येतेषां साध्यव्यापकविरुद्धोपलम्भेनैव एकत्वमेवास्तु, किमर्थं विभागत्रयमित्यत आह समाधत्ते - **एतदज्ञानेऽपीति** मूलम्। एतदज्ञानेऽपि साध्यव्यापकविरुद्धोपलम्भकस्याज्ञानेऽपि साक्षात् साध्याभावव्याप्यत्वेनापि ज्ञातस्य दूषकत्वात् भिन्नभिन्नेनापि रूपेण दूषकत्वं वर्तत इति कृत्वा त्रैविध्यम्। एतदेवाह - **साध्याभावेति**। साध्याभावव्याप्यत्वेन हेतोः साध्यव्यापकाभावव्याप्यत्वेन च ज्ञानस्य दोषत्वं वर्तते एवेति त्रैविध्यं युक्तमित्यर्थः। अथ विरुद्धस्य विभागान्तरमाशङ्क्य निराकरोति - **न चेति** मूलम् । धूमवानयं तदभाववत्त्वात् धूमाभाववत्त्वात् घटादिवत् इदं विरुद्धं त्रयाधिकमित्याशङ्कार्थः। उक्तेष्वेवान्तर्भावयति — **स्वसमानाधिकरणेति** मूलम्। स्वशब्देन हेतुस्तत्समानाधिकरणो योऽत्यन्ताभावस्तस्यापि अप्रतियोगित्वं व्यापकत्वम्, तथा चायं साध्याभावव्याप्य एव। कथम् ? साध्यस्याभावः साध्याभावो धूमाभावस्तद्व्याप्यत्वं धूमाभावे तिष्ठत्येव । यत्र धूमाभावस्तत्र धूमाभाव इति अभेदेऽपि व्याप्यव्यापकभावस्येष्टत्वात् । अन्यदपि विरुद्धान्तरमाशङ्क्य निराकरोति - **धूमाभाववत्तयेति** मूलम् । अयं धूमवान् [273 A] धूमाभाववत्तया उपलभ्यमानत्वात् तद्वत्तया धूमवत्तयाऽनुपलभ्यमानत्वात् इदं विरुद्धान्तरं किमिति नोक्तमित्यत आह - **अनैकान्तिकमेवेति** मूलम्। इदं विरुद्धं न भवति किन्तु अनैकान्तिकमेव, यतः कदाचित् धूमवत्यपि धूमाभाववत्तया उपलभ्यमानत्वं तिष्ठति इति सपक्षे सत्त्वात् विपक्षे धूमाभाववत्यपि सत्त्वात् सपक्षविपक्षगामित्वात् अनैकान्तिकमेव, द्वितीयमपि इदं विरुद्धं न भवति, साध्यवत्यपि तदभाववत्तया उपलभ्यमानत्वं तिष्ठतीति भावः। एवं निषेधसाधनेऽपि विरुद्धस्त्रिविधः। [प्रथमं भेदमाह] - **प्रतियोग्युपलम्भात्**। द्वितीयं भेदमाह - **साध्यव्यापकाभावोपलम्भात्** । तृतीयं भेदमाह - **साध्यव्यापकविरुद्धोपलम्भात्** । क्रमेणोदाहरणानि यथा निषेधसाधनं साध्याभावसाधनं पूर्वभेदकृतसाध्याभावसाधनं यथा अयं धूमाभाववान् धूमोपलम्भात् । अत्र प्रतियोग्युपलम्भो विरुद्धो हेतुः ।

द्वितीयोदाहरणं यथा अयं धूमाभाववान् धूमाभावव्यापको यो धूमसामग्र्यभावस्तदभावो धूमसामग्री तद्वत्त्वात्। अयं धूमाभावस्तस्य व्यापको यो धूमसामग्र्यभावस्तदभावो धूमसामग्री तद्वत्त्वात् । तृतीयोदाहरणं यथा अयं धूमाभाववान् धूमवत्त्वात् इत्यत्र धूमाभावव्यापको यो धूमसामग्र्यभावस्तद्विरुद्धो यो धूमस्तदुपलम्भात् । अत्र मूलपाठे **निरग्नित्वात्** इति पाठोऽशुद्ध इव लक्ष्यते। अथ विशेषणद्वाराऽपि विरुद्धमाह - **सर्वश्चायमि**ति मूलम् । विशेषणद्वाराऽपि कोऽपि विरुद्धो भवति। यत्र साध्यविशेषणं हेतुविशेषणेन सह विरुद्धं यथा अयं कृष्णागुरुप्रभववह्निमान् कटुकासुरभिपाण्डुरधूमवत्त्वात् इत्यत्र कृष्णागुरुप्रभवत्वं साध्यविशेषणं कटुकासुरभिपाण्डुरत्वं हेतुविशेषणं यतः कृष्णागुरुप्रभवो धूमः कटुको न भवति असुरभिर्न भवति पाण्डुरश्च न भवति इति साधनविशेषणविरोधः । **अयमि**ति मूलम्। अयं विरुद्ध इत्यर्थः, बाधादिसङ्कीर्णो भवति। क्रमेणोदाहरणानि यथा अयं वह्निमान् ह्रदत्वात् । अत्र बाधो वर्तते ह्रदे वह्न्यभावात्। विरुद्धोऽप्ययं भवति वह्न्यभावव्याप्तत्वात् ह्रदस्येति। आश्रयासिद्धसङ्कीर्णविरुद्धो यथा काञ्चनमयो ह्रदो वह्निमान् ह्रदत्वात्। अत्र काञ्चनमयत्वमाश्रये विशेषणम्, तदसिद्ध्या आश्रयासिद्धः । स्वरूपासिद्धसङ्कीर्णविरुद्धो यथा ह्रदो वह्न्यभाववान् धूमात् । अत्र ह्रदे धूमाभावात् स्वरूपासिद्धो धूमः । असाधारणसङ्कीर्णविरुद्धो यथा पर्वतो वह्न्यभाववान् एतत्पर्वतत्वात् इत्यत्र एतत्पर्वतत्वं वह्न्यभाववति पर्वतान्तरे नास्तीति असाधारणः । [273 B] इति विरुद्धग्रन्थे मूलव्याख्या सम्पूर्णा।

अथ टीका। अथ वृत्तिमत इत्यत्र ग्रन्थे आभासं ददाति - **न त्विति**। इदं द्रव्यमाकाशात्, यत्र द्रव्यत्वं तत्राकाशाभाव इति विरुद्धलक्षणम्, साध्यव्यापको योऽभाव आकाशाभावस्तत्प्रतियोगित्वमाकाशे वर्तते इति कृत्वा विरुद्धलक्षणं वर्तते परमत्र विरुद्धत्वं नास्ति। अत्राशङ्कते - **न चे**ति टीका। दूषकताबीजं सहचारग्रहविरोधः तत् तु वर्तते आकाशस्यावृत्तित्वात् सहचारग्रहो नास्तीति विरुद्ध एवायमित्याशङ्कार्थः । दूषयति - **तत्रे**ति टीका। **उक्तविरुद्धत्वग्रहेण** साध्यव्यापकाभावप्रतियोगित्वग्रहेणान्वयसहचारग्रहप्रतिबन्धेऽपि **व्यतिरेकव्याप्तिग्रहप्रतिबन्धाभावात्** यथा यत्र द्रव्यत्वाभावस्तत्राकाशाभाव इति व्यतिरेकव्याप्तिग्रहसम्भवात् इति व्यतिरेकव्याप्तिग्रहप्रतिबन्धो नास्तीति कृत्वाऽयं विरुद्धो न भवति। एवमुक्तविरुद्धलक्षणमविरुद्धे गतमित्यस्वरसादाह- **यद्वेती**ति। **यथा** च आकाशे कथं नातिव्याप्तिरित्यत आह - **वृत्तिमत** इति टीका। तथा च यो वृत्तिमान् हेतुः **चेत्** सकलसाध्याधिकरणनिष्ठात्यन्ताभावप्रतियोगी जातस्तदा व्यतिरेकव्याप्तिग्रहोऽपि न भवति आकाशस्य वृत्तिमत्त्वरूपविशेषणाभावना(वान्ना)तिव्याप्तिरित्यर्थः। अत्र केचित् साध्यवदवृत्तित्वमेव विरुद्धलक्षणं समर्थयन्ति - **केचित्त्विति**। तथा च वृत्तिमत्त्वांशः किमर्थमित्यत आह - **असङ्कीर्णस्थलाभिप्रायेण**। एतदेव विवृणोति - **अन्यथे**ति टीका। यदि हेतुरेवावृत्तित्वेन ज्ञातस्तदा स्वरूपासिद्धिरेव दूषणं भविष्यति। ततः किमित्यत आह - **स्वरूपासिद्धी**ति। तदा स्वरूपासिद्धिरेव दोषो भविष्यति। यदि वृत्तिमत्पदं न दीयते तदा स्वरूपासिद्धिरेव

दोषो न तु विरुद्ध इत्यर्थः । ननु विरुद्धे दूषकताबीजं किमित्यत आह - **साध्यवदवृत्तित्वमि**ति टीका। तथा च यः साध्यवदवृत्तिः स एव विरुद्ध इत्यर्थः। ननु साध्यवद्वृत्तित्वानधिकरणत्वादीनि त्रीण्यपि लक्षणानि इदमाकाशादिति आकाशहेतुकेऽतिव्याप्तानि आकाशस्यावृत्तित्वादित्यत आह - **पूर्वास्वरसेने**ति टीका। तथा चात्रापि वृत्तिमत्त्वं विशेषणं दातव्यम्। ननु साध्यवद्वृत्तित्वानधिकरणत्वम् अथ च साध्यवद्वृत्तित्वानधिकरणधर्मत्वमित्यनयोः को भेद इत्यत आह - **अन्योन्ये**ति टीका। उभयत्राभावप्रवेशेऽपि अन्योन्याभावभेदेन भेदः। प्रथमे साध्य[वद्]वृत्तित्वाधिकरणभिन्नत्वमित्यन्योन्याभावगर्भम्, द्वितीयं तु साध्यवद्वृत्तित्वात्यन्ताभावाधिकरणत्वम्। प्रथमे साध्यवद्वृत्तित्वस्य यदधिकरणं हेतुस्तद्भिन्नाधिकरणत्वं [274 A] हेतोर्विरुद्धत्वमित्यर्थः । द्वितीयार्थो यथा साध्यवद्वृत्तित्वस्य धर्मस्य योऽत्यन्ताभावस्तदधिकरणत्वं हेतोर्विरुद्धत्वमित्यर्थः । स्वमतोपन्यासमाह - **अत्र ब्रूम** इति। **असाधारणोक्ते**ति । यथाऽसाधारणे सपक्षव्यावृत्तत्वग्रहे विद्यमानेऽपि शब्दादाप्तवाक्यात् व्याप्तिग्रहस्तथा वृत्तिमत्त्वविशिष्टसाध्यवदवृत्तित्वग्रहे विद्यमानेऽपि अत्रापि शब्दात् व्यतिरेकव्याप्तिग्रहो भवति। यथाऽयमश्वो गोत्वात् इत्यत्र वृत्तिमद्गोत्वमश्ववदवृत्ति इति ज्ञाने विद्यमानेऽपि यत्राश्वत्वाभावस्तत्र गोत्वाभाव इति व्यतिरेकव्याप्तिग्रहः आप्तवाक्यात् भवत्येव । यथा घटेऽश्वत्वाभावोऽपि वर्तते गोत्वाभावोऽपि वर्तते तस्मादश्वत्वाभावव्यापकाभावप्रतियोगि गोत्वमिति शब्दादुक्तरूपव्यतिरेकव्याप्तिग्रहो भवत्येव । एतदेवाह - **वृत्तिमत्त्वस्ये**ति टीका। वृत्तिमत्त्वघटितं यद् विरुद्धत्वं साध्यवदवृत्तित्वं तद्ग्रहस्यापि अश्वत्ववति वृत्तिमदपि गोत्वं न वर्तते इति ग्रहे विद्यमानेऽपि अश्वत्वाभावव्यापकाभावप्रतियोगि गोत्वमिति व्याप्तिग्रहः शब्दात् जायते, तत्र स साध्यवदवृत्तित्वग्रहः प्रतिबन्धक एव न भवति ग्राह्याभावानवगाहित्वात् अनुमितिविषयाभावानवगाहित्वात् व्यतिरेकव्याप्तिज्ञानविषयाभावानवगाहित्वाच्च। **तस्मिन्नि**ति। साध्यवदवृत्तित्वरूपविरुद्धग्रहे विद्यमानेऽपि आप्तवाक्यादिना व्याप्तिग्रहो भवत्येवेति न स प्रतिबन्धकः तर्हि वृत्तिमत्त्वविशिष्टसाध्यवदवृत्तित्वरूपस्य विरुद्धत्वस्य कथं हेत्वाभासत्वमित्यत आह - **तस्मादि**ति टीका। यदि व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते इति यदा मतं तदा ग्राह्याभावावगाहितयाऽन्वयव्याप्तिग्रहप्रतिबन्धकं भवत्येव । कुतः ? साध्यसामानाधिकरण्यमन्वयव्याप्तिः, ततो हेतोः साध्यसामानाधिकरण्यं साध्यवद्वृत्तित्वम्, ततः साध्यवद्वृत्तित्वग्रहे साध्यवदवृत्तित्वग्रहः प्रतिबन्धको भवत्येव, अन्वयव्याप्तिग्रहे यथा गोत्वमश्वत्ववद्वृत्ति इत्यन्वयव्याप्तिग्रहेऽश्वत्ववदवृत्तित्वज्ञानमश्वत्ववद(द्)वृत्तित्वज्ञाने प्रतिबन्धकं भवत्येव परं व्यतिरेकव्याप्तिग्रहे तद्विरुद्धत्वज्ञानं प्रतिबन्धकं न भवति। कथम् ? उक्तरूपसाध्यरूपवदवृत्तित्वज्ञाने विद्यमानेऽपि व्यतिरेकव्याप्तिग्रहस्य जायमानत्वात् । यत्राश्वत्वाभावस्तत्र गोत्वाभाव इति व्यतिरेकव्याप्तिग्रहे तद्विरुद्धत्वज्ञानं प्रतिबन्धकं न भवति ग्राह्याभावानवगाहनात्। ग्राह्यस्तु अश्वत्वाभाववति गोत्वाभावो ग्राह्य इति व्यतिरेकव्याप्तिग्रहे तदभावो विरुद्धज्ञानेन नावगाह्यते भिन्नविषयकत्वात्। ततस्तदविरुद्ध-

त्वज्ञानमन्वयव्याप्तिग्रहे प्रतिबन्धकं भवत्येव। यतोऽश्वत्ववदवृत्तिगोत्वमिति ज्ञानेऽश्वत्ववद्वृत्तिगोत्वमित्येतादृशं ज्ञानं न जायते इत्यतस्तत्र तत्प्रतिबन्धकम्। ननु साध्यवद्वृत्तित्वग्रहे साध्यवदवृत्तित्वग्रहश्चेत् प्रतिबन्धकस्तदा साध्यवदवृत्तित्वमेव विरुद्धत्वमस्तु, कृतं वृत्तिमत्त्वांशे[न] इत्यत आह - **तत्र चेति** टीका। ततो वृत्तिमत्त्वप्रवेशो मास्तु, तं विनापि विरुद्धत्वं सम्भवत्येव। न चैवं द्रव्यमाकाशात् इत्यत्र साध्यवदवृत्तित्वज्ञानस्य विद्यमानत्वात् अतिव्याप्तिरिति वाच्यम्। तस्यापि साध्यवदवृत्तित्वेन विरुद्धत्वमेव। न त्वेवम्, तादृशविरुद्धत्वग्रहस्याकाशादि-हेतुके विरुद्धव्यतिरेकव्याप्तिग्रहे प्रतिबन्धकत्वाभावात् कथं हेत्वाभासत्वमिति चेन्न व्यतिरेकव्याप्तिग्रह-प्रतिबन्धकत्वाभावेऽपि व्यतिरेकव्याप्त्या यदन्वयव्याप्तिग्रहो जायते तत्र प्रतिबन्धकं तिष्ठत्येवेत्यर्थः। **अत एवेति**। यतोऽन्वयव्याप्तिग्रह एव विरुद्धत्वग्रहः प्रतिबन्धकोऽत एव व्याप्यत्वासिद्धिरप्यन्वयव्याप्तिग्रहे प्रतिबन्धिका। व्यर्थविशेषणे नीलधूमादौ या व्याप्यत्वासिद्धिस्तिष्ठति यतो नीलधूमत्वावच्छिन्ना व्याप्तिर्नास्ति धूमत्वावच्छिन्ना एव व्याप्तिः। नीलधूमत्वावच्छिन्नव्याप्तेरभावात् नीलधूमत्वावच्छिन्ना व्यर्थविशेषणिका व्याप्यत्वासिद्धिः, साऽप्यन्वयव्याप्तिग्रहे एव प्रतिबन्धिका। यथा यत्र वह्न्यभावस्तत्र नीलधूमाभाव इति व्यतिरेकव्याप्तिग्रहो भवत्येवेति न व्यतिरेकग्रहे प्रतिबन्धकता किन्तु अन्वयव्याप्तिग्रहे एव, नीलधूमत्वस्य गौरवेण कृत्वा नीलधूमत्वावच्छिन्नाऽन्वयव्याप्तिर्ग्रहीतुं न शक्यत इत्यर्थः। **विषयविरोधाभावादिति** टीका। व्यर्थविशेषणत्वं नाम अनवच्छेदकत्वम्, तेनावच्छेदकघटितं व्याप्तिज्ञानं विरुध्यते ग्राह्याभावावगाहित्वात्। ग्राह्यमवच्छेदकम्, तदभावावगाहिज्ञानेनावच्छेदकत्वज्ञाने(नं) विरुध्यत एवेत्यर्थः। व्यतिरेक्यतिव्याप्तिरिति मूलं व्याचष्टे - **व्यतिरेक्यतिव्याप्तिरिति** टीका। ननु व्यतिरेकिण्यतिव्याप्तिर्मूलकारेण दत्ता सा न सम्भवति, वस्तुगत्या तत्रापि साध्यवदवृत्तित्वाभावात्, पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् इत्यत्र पृथिवीत्वस्य हेतोरितर-भेदवत्यां पृथिव्यां विद्यमानत्वात् साध्यवदवृत्तित्वस्यासम्भवात् इत्यत आह - **साध्यवदवृत्तित्वज्ञानस्येति**। अत्र वस्तुनः साध्यवदवृत्तित्वस्य यद्यपि अतिव्याप्तिर्नास्ति तथापि साध्यवदवृत्तित्वज्ञानं तत्र तिष्ठति यतस्तत्र साध्यवद्वृत्तित्वज्ञानं नास्ति हेतोः साध्यस्याप्रसिद्धत्वात्। अतस्तत्र साध्यवदवृत्तित्वज्ञानं तिष्ठतीति व्याप्तिग्रहप्रति-बन्धद्वाराऽनुमितिप्रतिबन्धापत्तिः। ततो [275 A] वस्त्वतिप्रसङ्गे तात्पर्याभावात् ज्ञानातिप्रसङ्गे तात्पर्यमित्यर्थः। एतदेवाह - **वस्त्वतिव्याप्तेरिति** टीका। **अत एवेति** टीका। यतस्तज्ज्ञानस्यातिप्रसङ्गस्तत एवेत्यर्थः। **व्यभिचाराज्ञानेति** टीका। ननु दार्ष्टान्तिके विरुद्धत्वज्ञानसामानाधिकरण्यज्ञानयोरेव विरोधो दृष्टान्ते तु व्यभिचार-ज्ञानव्यभिचारज्ञानाभावयोः विरोध इति दृष्टान्तदार्ष्टान्तिकविरोध इत्यत आह - **व्यभिचाराज्ञानस्येति** टीका। अव्यभिचारज्ञानस्येत्यर्थः। तथा च अव्यभिचारज्ञानव्यभिचारज्ञानयोरेव विरोध इत्यर्थः। ननु अयोग्यताज्ञान-मपार्थकत्वज्ञानमेव भवतु परमयोग्यताज्ञानं विरुद्धत्वज्ञानं कथं स्यादिति प्रश्ने आह - **पदपदार्थयोरिति** टीका।

यथाऽग्निना सिञ्चेत् इत्यत्र पदपदार्थयोः संसर्गाभावप्रमा तिष्ठति। प्रमैव च प्रकृते विरुद्धत्वधीः, यतः उभयोः पदार्थयोः संसर्गाभाव एव प्रमा स एव विरोध इत्यर्थः। सिद्धान्ते टीकाभिप्रायो यथा नात्र विरुद्धत्वमेवायोग्यत्वम्, अयोग्यता नाम संसर्गाभावप्रमा, विरुद्धत्वं नाम संसर्गबाधः संसर्गबाधस्य संसर्गाभावप्रमायामुपजीव्यत्वादिति भावः। **अत्रेति** टीका। **यैवेति** टीका। मूलकारेणोक्तम् अयोग्यताज्ञाने बाध उपजीव्य इति तच्चिन्त्यमित्याह - **अत्रेति** टीका। यथा ह्रदे पक्षे वह्न्यभावधीः बाधधीः अनुमाने, सैव च शाब्दे बोधेऽयोग्यताधीः, ततो बाधा-योग्यत्वयोरुपजीव्योपजीवकभाव एव नास्ति इति चिन्त्यार्थः। ननु निरग्निकत्वात् इत्यस्य साध्यव्यापकाभावत्वमेव न तु साध्यव्यापकाभावव्याप्यत्वं यथा धूमव्यापको वह्निस्तदभाव एव निरग्निकत्वम्। न तु निरग्निकत्वस्य निरग्निकत्वं व्याप्यमित्या[न्य]था व्याचष्टे - **अग्निसम्बन्धाभावादि**त्यर्थः। एतदेव विवृणोति - **तेनेति**। धूमव्यापको यो वह्निस्तस्य योऽभावो वह्न्यभावः, तद्व्याप्यो वह्न्यभावस्य व्याप्यो वह्निसम्बन्धाभावो भवति यथा यत्र वह्निसम्बन्धाभावस्तत्र वह्न्यभाव इति। मतान्तरेणाह - **अभेदेऽपीति**। तथा च वह्न्यभावस्य वह्न्य-भावो व्याप्यो भवत्येवेति। यथाश्रुत एवायं हेतुः। अत्रैवानुकूलमाह - **अत एवेति**। यत एव मूलकृताऽभेदेऽपि व्याप्यव्यापकभाव उक्तोऽतो वह्न्यभावस्यापि वह्न्यभावो व्याप्यो भवतीत्यर्थः। एतदज्ञानेऽपीति मूले चिन्त्यमाह - **यदिति** टीका। मूलकारेण ये भेदाः त्रयः साध्याभावव्याप्यत्वादय उक्तास्ते किं प्रतिबन्धकज्ञान-विषयतावच्छेदकत्रैविध्येन यदि त्रैविध्यं तदा पूर्वोक्तानि यानि साध्यवदवृत्तित्वादीनि तेषां यानि ज्ञानानि तेषामपि प्रतिबन्धकत्वात् त्रैविध्यमुपपन्नम्, बहवो भेदाः स्युः। द्वितीयं विकल्पमाह - **पूर्वोक्तेति** टीका। पूर्वोक्तानां साध्यवदवृत्तित्वादीनां यानि ज्ञानानि तेषां यदि सहचारज्ञानविरोधित्वेनानुगमम् एकत्वं कृत्वा अनेन त्रैविध्योपाधिना विभागस्तदा दूषणमाह- **तदेति** टीका। एतेषामपि साध्याभावव्याप्यत्वादीनामपि सहचारज्ञानविरोधित्वेन एकत्वमेव भवतु किं त्रैविध्येन। पक्षान्तरं दूषयति - एतत् त्रैविध्यं साध्याभावव्याप्यत्वादिकं विरुद्ध-हेत्वाभासोपाधिरपि न भवति। किमिति त्रैविध्यं विरुद्धोपाधिर्न भवतीति। [275 B] क्रमेण त्रिषु दूषणमाह - **प्रथमे** इति टीका। प्रथमस्य साध्याभावव्याप्यत्वज्ञानस्य साधारणज्ञानत्वेनैव दूषकत्वं स्यात्। साध्याभाव-व्याप्यत्वं नाम साध्याभावेन सहाव्यभिचरितसम्बन्धः तथा च लाघवात् साध्याभावसम्बन्धज्ञानत्वं यत् साधारण-ज्ञानत्वं [ते]नैव रूपेण दूषकत्वमस्तु, किं विरुद्धेन। द्वितीयतृतीययोरप्याह - विरुद्धेऽव्यभिचारांशोऽधिक(कः), साध्यव्यापकाभावत्वसाध्यव्यापकविरुद्धोपलम्भयोः सामानाधिकरण्यग्रहे सामानाधिकरण्यरूपग्राह्याभावान-वगाहित्वात् हेत्वाभासत्वं नास्ति, किं विरुद्धत्वेन। एतदेव विवृणोति - **न हीति** टीका। यथा धूमवान् इत्यत्र धूमवत्त्वे साध्ये वह्न्यभावव्याप्यत्वग्रहस्य वह्निविरुद्धत्वग्रहस्य वा विरोधित्वं सहचारग्रहे प्रतिबन्धकमेव नास्ति, धूमसहचारग्रहे धूमविरुद्धत्वग्रह एव प्रतिबन्धकः न तु पूर्वोक्तविरुद्धत्वग्रहः साध्यव्यापक-

विरुद्धत्वग्रहकालेऽपि शब्दाभासादिना धूमव्याप्यत्वग्रहसम्भवात्। तथा च द्वितीयतृतीयज्ञाने प्रतिबन्धकमेव न भवति। अत्राशङ्कते - **न चेति** टीका। तथा च पूर्वोक्तं यत् साध्यवदवृत्तित्वं स एव विरुद्धो हेत्वाभासः। स केन प्रकारेण ग्राह्यः ?, तद्ग्रहणे इदं प्रकारत्रयं साध्याभावव्याप्यत्वादिकमिति शङ्कार्थः। समाधत्ते - एतत् त्रयं पूर्वोक्तं यत् साध्यवदवृत्तित्वं तद्ग्रहणे प्रकारो न भवति। यत एतद्ग्रहेऽपि तदग्रहात्, एतदग्रहेऽपि तद्ग्रहात् इति न तद्ग्रहणे प्रकारत्रयम्। अथायं चेति ग्रन्थे आभासं ददाति - **नन्विति** टीका। तथा च यत्र विरुद्धस्तिष्ठति तदा बाध्य(ध)व्यभिचारादिकमावश्यकम्। मूलार्थमाह - **तथा चेति** टीका। उपधेयस्य साङ्कर्येऽपि उपाधेरसाङ्कर्यात्। यथा बाधज्ञानं व्यभिचारज्ञानं वा प्रतिबन्धकं तद्वत् साध्यवदवृत्तित्वज्ञानमपि प्रतिबन्धकमिति कृत्वा तद्विरुद्धो हेत्वाभासः। स्वयं योयि(जि)तग्रन्थे व्याख्यानान्तरं दूषयति - **यत् त्विति** टीका। अयं यो विरुद्धः स क्वचित् बाधादिसङ्कीर्णोऽपि भवति इति स्वरूपकथनमात्रं कृतं ग्रन्थकृता अयं चेति ग्रन्थेन। एतदुदाहरणमाह - **चतुर्विधाः परमाणव** इति। अत्रानित्यत्वं साध्यम्, पार्थिवपरमाणुत्वादित्यत्र हेतुः भागे जलादौ स्वरूपासिद्धम्, परमाणुषु अनित्यत्वसाध्याभावात् बाधः, ततोऽत्र बाधोऽपि वर्तते भागे स्वरूपासिद्धोऽपि वर्तते, विरुद्धत्वमपि वर्तते परमाणुत्वस्यानित्यत्वेन सह विरोधात्। इदं दूषयति - **प्रकृतेति** टीका। प्रकृते विरुद्धस्वरूपे साङ्कर्यकथनस्योपयोगाभावात्। तथा च विरुद्धे प्रमेयत्वमस्तीतिवत् विरुद्धे हेत्वन्तरसाङ्कर्यकथनेन विरुद्धस्य किमप्युपयोगो न भवतीत्यर्थः। इति विरुद्धग्रन्थे टीकार्थः समाप्तः।

**। इति विरुद्धग्रन्थः पूर्णः।**

## हेत्वाभासप्रकरणे सत्प्रतिपक्षः

**सत्प्रतिपक्षत्वं न समानबलबोधितसाध्यविपर्ययलिङ्गत्वम्, परस्परप्रतिबन्धेनोभयोरबोधकत्वात् बलं च न सपक्षसत्त्वादि व्यतिरेकिण्यभावात्। नापि समानव्याप्तिपक्षधर्मतावत्त्वम्, विरोधेनैकत्र तद्भङ्गनियमात्। नापि व्याप्तिपक्षधर्मतया ज्ञातत्वं विरोधिव्याप्तिपक्षधर्मताविशिष्टज्ञानयोरन्यतरभ्रमत्वनियमेन नित्यत्वव्याप्यश्रावणत्वादिवैशिष्ट्याप्रसिद्ध्या आरोपयितुमशक्यत्वात्। न च साध्यव्याप्यस्य पक्षधर्मता पक्षधर्मस्य वा साध्यव्याप्यता आरोप्या इति वाच्यम्। एकत्र तदुभयाभावात् विशिष्टस्याप्रसिद्ध्या तद्वैशिष्ट्यस्यारोपासम्भवात्। नाप्यनिर्धारितविशेषेण बोधितसाध्यविपर्ययकत्वम् उभयोरबोधकत्वात् विशेषश्च न व्याप्तिभङ्गाभङ्गरूपः एकत्र तद्भङ्गनियमात्। उच्यते। साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं तत्त्वम्, बलं च व्याप्तिपक्षधर्मते। विरोधिबोधकान्यगमकतौपयिकरूपसम्पत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्यत्वं वा तत्त्वम्, स्थापनाया व्याप्तिपक्षधर्मत्वमुभयवादिसिद्धं वादिना तदभावानुपन्यासात्, द्वितीयस्य तु तत्त्वमन्यतरासिद्धमिति प्रथमेन द्वितीयं बाधितमिति स्वार्थानुमान एवायं दोष इत्येके। तन्न। एकदा निरन्तरयोर्वोभयोर्व्याप्तिपक्षधर्मतया ज्ञातयोः प्रतिपक्षत्वात् युगपदुपस्थितेश्च कारणवशेन स्वपरसाधारणत्वात्।**

अथ सत्प्रतिपक्षग्रन्थः। तत्र मूलम्। **समानबलेति**। समाने च ते बले व्याप्तिपक्षधर्मताज्ञानरूपे ताभ्यां बलाभ्यां बा(बो)धितौ [1]साध्यविपर्ययौ यस्य तादृशलिङ्गत्वम्। यथा पर्वतो वह्निमान् धूमात् अथ पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् ह्रदवत्। अत्र पूर्वेण धूमेन वह्निः साध्यते परेण पाषाणवत्त्वेन वह्न्यभावः [276 A] साध्यते। यथाहि - [यदा] धूमेन स्वव्याप्तिपक्षधर्मतोपस्थित्या वह्निः साध्यते तदा पाषाणवत्त्वेनापि व्याप्तिपक्षधर्मतोपस्थित्या वह्न्यभावोऽपि साध्यते इति द्वयोस्तुल्यबलत्वम्। एवमत्रोभयोस्तुल्यबलत्वे ज्ञानदशायां केनापि कस्यापि प्रतिबन्धो न भवतीति सत्प्रतिपक्षत्वं परस्परं द्वयोरपीति। इदं लक्षणं दूषयति - **परस्परेति** मूलम्। तथा च सत्प्रतिपक्षे बोधितसाध्यविपर्ययत्वमेव नास्ति परस्परप्रतिबन्धेनोभयोरबोधकत्वात्। अत्रैव दूषणान्तरमाह -

---

१. साध्यसाध्याभावरूपौ। प्रतौ टिप्पणी।

**बलं चेति** मूलम्। बलं विचारयति। किं बलम्। न सपक्षे सत्त्वादी(दि)ति व्यतिरेकिणः सपक्षस्यैवाभावात्। सपक्षसत्त्वरूपबलं नास्तीति अव्याप्तिः। लक्षणान्तरमाशङ्क्य निराकरोति - **नापीति** मूलम्। समाने व्याप्ति-पक्षधर्मते यस्य। इदं दूषयति - **विरोधेनेति** मूलम्। न हि एकत्र पर्वतलक्षणे पक्षे साध्यस्यापि व्याप्तिपक्षधर्मतावल्लिङ्गं तिष्ठति साध्याभावस्यापि व्याप्तिपक्षधर्मतावल्लिङ्गं तिष्ठति। एकत्रावश्यं व्याप्तिपक्षधर्मताभङ्गनियमः एकत्र साध्यसाध्याभावव्याप्ययोर्विरोधेनासत्त्वात्। तृतीयलक्षणं दूषयति - **नापीति** मूलम्। व्याप्तिपक्षधर्मताया ज्ञातत्वं हेतोः द्वयोरिति शेषः। तथा च एकस्मिन् पक्षे साध्यसाध्याभावव्याप्यपक्षधर्मतावल्लिङ्गं न तिष्ठति तथापि तद(द्)ज्ञानं तिष्ठत्येवेति भेदः। पुनरपीदं लक्षणं दूषयति - **विरोधीति**। तथा च ज्ञानं किं प्रमारूपं वा भ्रमरूपं वा ? आद्ये यदि प्रमारूपं तदा व्याप्तिपक्षधर्मताविशिष्टज्ञानयोरन्यतरत्वभ्रमनियमात् वस्तुगत्या उभयत्र व्याप्तिपक्षधर्मते तु प्रमारूपे न भवत इति। यदि च भ्रमरूपं तदा दूषणमाह - **नित्यत्वव्याप्येति** मूलम्। यथा शब्दोऽनित्यः कृतकत्वात् घटवत्, द्वितीयः शब्दो नित्यः श्रावणत्वात्। प्रथमः परामर्शोऽनित्यत्वव्याप्यकृतकत्ववान् अयम्। द्वितीयस्तु नित्यत्वव्याप्यश्रावणत्ववान् अयमिति। अत्र एतादृशः परामर्शो वक्तव्यः, स च न सम्भवति, नित्यत्वव्याप्यश्रावणत्वस्याप्रसिद्धत्वात्। न हि वन्ध्यापुत्रस्य [आ]रा(रो)पः कुत्रापि सम्भवति यथा वन्ध्यापुत्रवान् अयमिति। हट्टादौ प्रसिद्धस्यैव रजतस्य शुक्त्यादावारोपः। न तु नित्यत्वव्याप्यश्रावणत्वं कुत्रापि प्रसिद्धम्, नित्यत्वव्याप्यवस्तुनः श्रावणत्वस्याभावात्। कथम् ? यथा वन्ध्या एषा सुतवती अयं भ्रमो न सम्भवति। भ्रमे हि क्वचित् प्रमितं सत् क्वचिदारोप्यते यथा रजतम्। न च नित्यत्वव्याप्यश्रावणत्वं कुत्रापि प्रमितं तादृशवस्तुनोऽभावात् इति कृत्वा तस्य भ्रमो न सम्भवतीति। एतदेवाह - **आरोपयितुमिति**। तथा च नित्यत्वव्याप्यश्रावणत्वविशिष्टस्यारोपोऽसिद्धः। विशिष्टस्यारोपाभावेऽपि खण्डप्रसिद्ध्याऽऽरोपो भविष्यतीति अत आह - **न चेति**। तथा च यद्यपि विशिष्टमप्रसिद्धं तथापि प्रसिद्धं भविष्यति। ततो नित्यत्वव्याप्यं गगनादिकं प्रसिद्धम्, तत्र श्रावणत्वस्यारोपः अथवा श्रावणत्वे धर्मिणि नित्यत्वव्याप्यत्वस्यारोपः, ततः सिद्धं यथा वन्ध्यापुत्रस्याप्रसिद्धत्वेऽपि पुत्रत्वं प्रसिद्धम्, तेन पुत्रे वान्ध्येयत्वमारोप्यते, वन्ध्या तु प्रसिद्धाऽस्त्येवेति खण्डारोपेणारोपरूपपरामर्शो [276 B] भविष्यतीत्याशङ्कार्थः। **साध्यव्याप्यस्येति** मूलम्। साध्यं यन्नित्यत्वं तद्व्याप्यं गगनत्वम्, तत्र गगनत्वे पक्षधर्मता शब्दवृत्तिता आरोप्यते अथवा पक्षधर्मस्य शब्दत्वस्य नित्यत्वव्याप्तिरारोप्यते यत्र शब्दत्वं तत्र नित्यत्वमिति शब्दत्वं नित्यत्वव्याप्यमिति शङ्कार्थः। दूषयति - **एकत्रेति**। अत्र यद्यपि नित्यत्वव्याप्यत्वं प्रसिद्धं श्रावणत्वेऽपि पक्षधर्मता प्रसिद्धा तर्हि श्रावणत्वे धर्मिणि नित्यत्वव्याप्यत्वस्यारोपो भवतु नाम परन्तु शब्दे धर्मिणि नित्यत्वव्याप्यश्रावणत्वस्यारोपः कथं स्यात् नित्यत्वव्याप्यश्रावणत्वस्याप्रसिद्धत्वात्। तथा चैकत्र शब्दरूपे धर्मिणि तदुपनयस्येति व्याप्तिपक्षधर्मतारूपोपनयस्याभावात् यथा नित्यत्वव्याप्यश्रावणत्ववान् अयम्

इत्युपनयो न सम्भवति। तदेवाह - **विशिष्ये(ष्टे)**ति मूलम्। विशिष्ट(ष्टः) विशेषाकारेण। यथा नित्यत्वव्याप्य-श्रावणत्वस्यारोपो न सम्भवति तस्याप्रसिद्धत्वात्। लक्षणान्तरमाशङ्क्य दूषयति - **नापी**ति मूलम्। न निर्धारितो विशेषो याभ्यां ताभ्यां हेतुभ्यां बोधितौ साध्यतद्विपर्ययौ ययोस्तौ अनिर्धारितेत्यादि। यथा पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् इत्यत्र द्वयोः समानव्याप्तिपक्षधर्मतोपस्थितिकाले उभयोर्मध्ये कस्यापि विशेषोऽधिकबलत्वं नावधारितम्। यतस्तन्मध्ये एकेन साध्यं बोध्यतेऽपरेण साध्याभावो बोध्यते। इत्युभयोः परस्परसत्प्रतिपक्षत्वम्। दूषयति - **उभयोरि**ति मूलम्। तथा च समानव्याप्तिपक्षधर्मतोपस्थित्या एकत्र विशेषा-भावादुभयोः परस्परकार्यप्रतिबन्धकत्वं यथा धूमेन वह्न्यभावानुमितिप्रतिबन्धः पाषाणवत्त्वेन च वह्न्यनुमिति-प्रतिबन्धः इति बोधितसाध्यविपर्ययत्वं नास्ति। उक्तरीत्या एकस्यापि हेतोर्बोधकत्वाभावादसम्भव इत्यर्थः। किञ्च अनिर्धारितविशेषेत्यत्र को वा विशेष इत्याह - **विशेषश्चे**ति। प्रकृते विशेषशब्देन किं व्याप्तिभङ्गो वा व्याप्त्यभङ्गो वा। उभयत्र दूषणमाह - **एकत्रे**ति। तथा चानिर्धारितविशेषत्वं यत उभयोर्मध्ये एकत्र व्याप्तिभङ्गतदभङ्गयोरवश्यं सत्त्वात्। उभयोर्विरुद्धत्वादेकत्र तद्भङ्गश्चावश्यक इत्यर्थः। सत्प्रतिपक्षलक्षणे सिद्धान्तमाह - **उच्यते** इति। **साध्ये**ति। साध्यं च साध्यविरोधि च तयोर्यदुपस्थापनं तत्र समर्था या बलो-पस्थितिर्व्याप्तिपक्षधर्मतोपस्थितिस्तया बलोपस्थित्या प्रतिरुद्धं कार्यं ययोस्तौ तयोर्भावस्तत्त्वम्, यथा पर्वतो वह्निमान् धूमात् वह्न्यभाववान् पाषाणवत्त्वात् इत्यत्र साध्यतदभावोपस्थापनसमर्था वा बलोपस्थितिः सा [त]या बलोपस्थित्या प्रतिरुद्धं कार्यमनुमितिरूपमुभयोरप्यनुमितिप्रतिबन्धात् सत्प्रतिपक्षलक्षणमुपपन्नम्। पदकृत्यं यथा बाधेन प्रतिरुद्धकार्यलिङ्गेऽतिव्याप्तिवारणार्थं बलोपस्थित्येति, यतो बाधो न बलोपस्थितिः। बलं तु व्याप्तिपक्षधर्मतारूपमेव। अथ चाधिकव्याप्तिपक्षधर्मतारूपबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गे हीनबलेऽतिव्याप्तिवारणार्थं समानेति पदम्। ततो यत्राधिकबलेन हीनबलस्य प्रतिरोधः क्रियते तत्र [277 A] समानबलोपस्थितिर्नास्तीति कृत्वा नातिव्याप्तिः। अत्र मतान्तरमाशङ्क्य दूषयति - **व्याप्ती**ति मूलम्। स्थापनानुमानस्य व्याप्तिपक्षधर्मतावत्त्वं द्वयोर्वादिनोः सिद्धम्। कथम्? यतो द्वितीयेन सत्प्रतिपक्षदात्रा वादिना प्रथमानुमाने व्यभिचारो वा बाधो वा आश्रयासिद्धिर्वा नोद्भाविता अत एव ज्ञायते प्रथमानुमाने व्याप्त्यादिभङ्गो नास्ति तदभावात्। प्रथमानुमानं स्थापनानुमानं प्रबलम्। द्वितीयं सत्प्रतिपक्षदात्रा कृतं साध्याभावसाधकम्, तदुभयवादिसिद्धं न भवति। द्वितीयानुमानं पूर्ववादिनोऽसिद्धम्, तेन तदभावानुपन्यासात् व्याप्तिपक्षधर्मतोभया-भावानुपन्यासात् प्रथमानुमानेन तु द्वितीयमनुमानं बाधितमेवेति सत्प्रतिपक्षः परार्थानुमाने दूषणमेव न भवति। तर्हि स कुत्र दूषणमित्यत आह - **स्वार्थानुमान** इति मूलम्। यस्य पुरुषस्य साध्यतदभावसाधिका या व्याप्तिपक्ष-धर्मतोपस्थितिर्जाता तत्रैव स्वार्थानुमाने सत्प्रतिपक्षो दोष इति, यथा यस्य धूमे व्याप्तिपक्षधर्मतोपस्थितिर्जाता

पाषाणवत्त्वेऽपि तदुपस्थितिर्जाता तदानीमुभयोः प्रबलत्वात् स्वार्थानुमाने सत्प्रतिपक्षत्वमित्यर्थः । इदं मतं दूषयति - **तन्नेति** । **एकदेति** मूलम् । एकदैव यत्र व्याप्तिपक्षधर्मतोभयोपस्थितिर्जाता अथवा द्वयोर्निरन्तरयोरव्यवधानेन व्याप्तिपक्षधर्मतोभयोपस्थितिर्जाता तत्रोभयोः परस्परं सत्प्रतिपक्षत्वसम्भवात् परार्थानुमानेऽपि सत्प्रतिपक्षो दोषः इत्युक्तम् । यथा वह्निमान् धूमात् इति अथ पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् इति उभयोरेकदैव व्याप्तिपक्षधर्मतोभयोपस्थितिर्जाता उभाभ्यां पञ्चावयवानुमानकरणात् द्वयोरपि हेत्वोर्मध्यस्थस्य व्याप्तिपक्षधर्मतोपस्थितौ जातायाम्, प्रतिवादिनो वा युगपदेव व्याप्तिपक्षधर्मतोभयोपस्थितिर्जाता, तत्र सत्प्रतिपक्षत्वमेव दोषः । ननु स्वार्थानुमाने युगपदुभयव्याप्तिपक्षधर्मतोपस्थितिर्भवतु नाम परन्तु परार्थानुमाने उभयोर्हेत्वोर्व्याप्तिपक्षधर्मतोपस्थितिः कथं स्यादित्यत आह - **युगपदुपस्थितेश्चेति** मूलम् । तथा च यथा स्वार्थानुमाने उभयोर्हेत्वोर्व्याप्तिपक्षधर्मतोभयोपस्थितिर्युगपदेवोभयपदार्थस्मरणरूपसामग्रीवशात् । एतदेवाह - **कारणेति** मूलम् । व्यभिचारज्ञानाभावसहचारज्ञानादिकारणवशात् । यथा समूहालम्बनरूपशाब्दज्ञानं जायते 'घटपटौ आनय' इत्युभयसन्निकर्षवशात् तथा धूमपाषाणवत्त्वयोरप्युभयव्याप्तिपक्षधधर्मतोपस्थितिः स्यादेवेति परार्थानुमानेऽपि स दोष इत्यर्थः ।

अथ टीका । ननु व्याप्तिपक्षधर्मतया ज्ञातत्वं यल्लक्षणं तत् । यत्रोभयोर्मध्ये एकत्र हेतौ अधिकबलोपस्थितिर्जाता अपरत्र च न्यूनबलोपस्थितिस्तत्रोभयत्र व्याप्तिपक्षधर्मतया ज्ञातत्वं वर्तते परमेकत्रानुकूलतर्कावतारोऽपरत्रानुकूलतर्कावतारो नास्ति, यथा वह्निमान् धूमात् वह्न्यभाववान् पाषाणवत्त्वात् इत्यत्र प्रथमेऽनुकूलतर्को वर्तते वह्न्यभावे धूमो न स्यादिति रूपः परं द्वितीयेऽनुकूलतर्को नावतीर्णः, तेन [277 B] यत्रानुकूलतर्कावतारो जातस्तत् प्रबलं यत्र चानुकूलतर्कावतारो न जातस्तत् दुर्बलमिति तत्रापि व्याप्तिपक्षधर्मतया ज्ञातत्वरूपं लक्षणं वर्तते इति कृत्वा तत्रातिव्याप्तिरित्यन्यथा व्याचष्टे - **व्याप्तिपक्षधर्मतावगाहीति** । तथा च व्याप्तिपक्षधर्मतावगाहि यत् समानज्ञाने विषयत्वं तत्त्वं विवक्षितम्, ततो यत्रानुकूलतर्कोऽवतीर्णस्तत्र समानत्वं नास्ति इति कृत्वा नातिव्याप्तिरित्यर्थः । **यद्यपीति** टीका । शब्दो नित्यः श्रावणत्वात् इत्यत्र नित्यत्वव्याप्यश्रावणत्वस्य भ्रमरूपाऽपि व्याप्तिप्रसिद्धिः सम्भवत्येव यथा श्रावणत्वे धर्मिणि नित्यत्वव्याप्तेर्भ्रमरूप आरोपः सम्भवत्येव यथा अत्र श्रावणत्वे नित्यत्वव्याप्तिर्वर्तते इति भ्रमरूपं ज्ञानं सम्भवत्येवेति आरोपयितुमशक्यत्वादिति मूले यदुक्तं तन्न सम्भवतीति । यद्यपीति ग्रन्थेन पूर्वपक्षार्थः । समाधत्ते - **तथापीति** टीका । तथा च श्रावणत्वे नित्यत्वव्याप्यत्वमारोपयितुं शक्यते तथापि नित्यत्वव्याप्यश्रावणत्वस्य आरोपः शब्दे न सम्भवति । कथम् ? नित्यत्वव्याप्यश्रावणत्वस्य विशिष्टस्याप्रमितौ सत्यामारोपयितुमशक्यत्वात् । यद्यपि भ्रमोपस्थितमपि विशिष्टमारोपयितुं शक्यते तथापि प्रमितमेवारोप्यते इति मतमादाय दूषणम्, तथा च नित्यत्वव्याप्यश्रावणत्वं कुत्रापि प्रमितं नास्तीति न तदारोपः

इत्यर्थः। **पक्षविशेष्यकेति** टीका। नित्यत्वव्याप्यश्रावणत्ववान् अयं शब्दः इति पक्षविशेष्य[क]परामर्शमभिप्रेत्योक्तम्। तत्र पक्षविशेष्यकपरामर्शे विशिष्ट एव हेतुरारोप्यस्तस्य चाप्रमितत्वात्। यत्र च हेतुविशेष्यक एव परामर्शो जातस्तत्र यथा श्रावणत्वमयं हेतुः नित्यत्वव्याप्यः शब्दवृत्तिश्च तत्रोभयमपि प्रमितं सम्भवत्येव नित्यत्वव्याप्यत्वमपि प्रमितं सम्भवति शब्दवृत्तित्वमपि प्रमितं सम्भवति एव इति कृत्वा उभयस्यापि प्रमितस्यारोपः सम्भवत्येव। तस्मात् पक्षविशेष्यकपरामर्शाभिप्रायेणोक्तमारोपो न सम्भवतीति। **अन्यथेति** टीका। यदि पक्षविशेष्यक एव परामर्शो नोच्यते तदेत्यर्थः। हेतुविशेष्यकपरामर्शे तूभयमपि आरोप्यम्। विशिष्टमनारोप्यं किन्तु द्वयमारोप्यं तच्च द्वयमपि प्रमितमेव। एतदेवाह - **एकस्य द्वयमिति** टीका। एकस्य श्रावणत्वस्य शब्दवृत्तित्वं नित्यत्वव्याप्तिश्चेति द्वयमपि प्रमितं सत् श्रावणत्वे आरोपयितुं शक्यते एव। अत्रैव साधकान्तरमाह - **अत एवेति** टीका। यतः खण्डशः प्रमितं नित्यत्वव्याप्यत्वं प्रमितं शब्दवृत्तित्वमपि प्रमितमिति खण्डशः प्रमितमारोपयितुं शक्यत एवेति अत एव इदं दूषणमलग्नकं दृष्ट्वा सिद्धान्तग्रन्थे उद्धरिष्यति। **अन्यथेति** टीका। व्याप्तिविशिष्टः प्रमित एवारोप्यते तदा वस्तुगत्या लिङ्गाभाववति अनुमित्यनुत्पत्तिः। वस्तुगत्या धूमाभाववति पर्वते धूमभ्रमात् याऽनुमितिः सा न स्यादेव। तत्र हेतौ विशेष्ये पक्षवृत्तित्वस्य वह्निव्याप्यत्वस्यारोपासम्भवात् धर्मिणो धूमस्यैवाभावात्। यदि पुरोवर्तिः शुक्तिर्भवति तदा तत्र रजतत्वारोपः [278 A] सम्भवति न त्वन्यथा। तद्वत् यदि धूमो विद्यमानो भवेत् तदा तत्र धूमे वह्निव्याप्यत्वस्य पर्वतवृत्तित्वस्य चारोपो भवेत्, परं यत्र धूम एव नास्ति तत्र धर्मिण एवाभावात् कथं तदारोपः ? तस्मात् पक्षविशेष्यक एवारोपो वक्तव्यः वह्निव्याप्यधूमवान् अयम्। ननु (न तु) अत्र धूमे पर्वतवृत्तित्वं वह्निव्याप्यत्वं चेति हेतुविशेष्यक आरोपः कर्तव्यः पूर्वोक्तदोषात् अथ हेतुविशेष्यकपरामर्शेऽपि व्याप्तिपक्षधर्मतयोरप्याकाशादिके लिङ्गेऽभावात्। यथा इदं द्रव्यम् आकाशात् इत्यत्र आकाशे एकस्मिन्नेव हेतौ व्याप्तिरपि नास्ति पक्षधर्मतापि नास्ति आकाशस्यावृत्तित्वात्। यत्राकाशस्तत्र द्रव्यमिति नास्ति। नाप्याकाशस्य पक्षधर्मत्वम्, आकाशः कस्यापि धर्मो न भवति। तथा च त्वया यदुक्तं साध्यव्याप्ये हेतौ पक्षधर्मस्यारोपः पक्षधर्मे वा साध्यव्याप्यत्वस्यारोपः इति तद् अयुक्तम्, गगने एतदुभयाभावात्। यतस्तत्र व्याप्यत्वमपि नास्ति पक्षधर्मत्वमपि नास्ति। यत आकाशस्यापि वृत्तिमत्त्वभ्रमदशायामाकाशात् द्रव्यत्वस्यानुमितिर्जायते सा न स्यात्, यत् त्वयोक्तम् व्याप्ये पक्षधर्मत्वारोपात् भ्रमरूपानुमितिः पक्षधर्मे वा व्याप्यत्वारोपात् भ्रमरूपानुमितिरिति तन्न स्यात् आकाशस्य व्याप्यत्वपक्षधर्मतोभयाभावादित्यर्थः। अयमत्र प्रघट्टकार्थः। पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् इति सत्प्रतिपक्षे अत्र उभयत्र व्याप्तिपक्षधर्मताज्ञानमपेक्षितम्, तत्र धूमे व्याप्तिपक्षधर्मताज्ञानं यद्यपि तिष्ठति तथापि पाषाणवत्त्वे व्याप्तिविशिष्टपक्षधर्मता नास्ति यतः पाषाणवत्त्वे वह्न्यभावव्याप्यत्वं नास्ति यत्र यत्र पाषाणवत्त्वं तत्र तत्र वह्न्यभाव इति व्याप्तिर्नास्ति पर्वते व्यभिचारात्।

पाषाणवत्त्वे व्याप्तिविशिष्टपक्षधर्मता प्रमा न सम्भवति। न च व्याप्तिविशिष्टपक्षधर्मताज्ञानं भ्रमरूपं वक्तव्यम्। यथा वह्न्यभावव्याप्यपाषाणवत्त्ववान् अयम् इति परामर्श इति न वाच्यम्, स च न सम्भवति। कथम्? विशिष्टस्याप्रसिद्धत्वात्। न हि वह्न्यभावव्याप्यपाषाणवत्त्वं कुत्रापि प्रसिद्धम्, पाषाणवत्त्वस्य वह्न्यभावव्याप्यत्वाभावात्, इत्यप्रसिद्धो विशिष्टः। यद्यप्ययं पक्षविशेष्यको वह्न्यभावव्याप्यपाषाणवत्त्ववान् अयम् इतिरूपोऽप्रसिद्धत्वात् न सम्भवति तथापि हेतुविशेष्यकः परामर्शः सम्भवति। वह्न्यभावव्याप्यत्वं ह्रदत्वे प्रसिद्धम्, तच्च पक्षवृत्तिनि पाषाणवत्त्वे आरोप्यते इति प्रमितस्य विशेषणांशस्यारोपः। अथवा पर्वतवृत्तिपाषाणत्वं यत् पाषाणे प्रसिद्धं तस्यारोपो वह्न्यभावव्याप्ये ह्रदत्वे क्रियते यथा इदं ह्रदत्वं पर्वतवृत्तिपाषाण [278 B] इति, ततो हेतुविशेष्यकः परामर्शः सम्भवति। यथा पर्वतवृत्तिपाषाणो वह्न्यभावव्याप्य इति वाच्यम्। तत्रेदं दूषणम्, यतो हेतुविशेष्यकपरामर्शस्यानुमितिकारणत्वं नास्ति यतोऽनुमितिसमानविशेष्यक एव परामर्शोऽनुमितिकारणं यथा पर्वतो वह्निमान् वह्निव्याप्यधूमवांश्चायं पर्वत इति तद्वत् अत्र पर्वतविशेष्यिका यदि अनुमितिस्तदा पर्वतविशेष्यक एव परामर्शः कारणं न तु हेतुविशेष्यकः, ततो हेतुविशेष्यकः परामर्शः कारणं न भवतीत्युक्तम्। दूषणान्तरं तु यथा भवतु हेतुविशेष्यकः परामर्शोऽनुमितिकारणं तथापि स एव न सम्भवति यथा इदं द्रव्यम् आकाशात् इत्यत्र साध्यव्याप्ये हेतौ पक्षवृत्तित्वारोपः इदमपि न सम्भवति आकाशे व्याप्तिपक्षधर्मयोरभावात् पक्षवृत्तिन्यपि हेतौ साध्यव्याप्यत्वारोपोऽपि न सम्भवति, आकाशे पक्षवृत्तित्वमपि नास्ति साध्यव्याप्यत्वमपि नास्ति इति कृत्वा हेतुविशेष्यकपक्षविशेष्यकोभयरूपपरामर्शो न सम्भवतीति सत्प्रतिपक्षो न सम्भवतीत्युक्तं भवति। विशेषश्चेति मूलफक्किकां व्याचष्टे - **विशेष** इति। ननु विशेषश्च न व्याप्तिभङ्गाभङ्गरूपः इति मूलमयुक्तम्, सत्प्रतिपक्षे वस्तुतो व्याप्तिभङ्गाभङ्गस्यैव विद्यमानत्वात्। यथा पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् इत्यत्र वस्तुगत्या एकत्र पाषाणवत्त्वे व्याप्तिभङ्गः अपरत्र धूमे व्याप्त्यभङ्गः, ततो व्याप्तिभङ्गाभङ्गौ वर्तेते न इति मूलमयुक्तम् इत्यन्यथा व्याचष्टे -**अनिर्धारित** इति टीका। तथा च व्याप्तिभङ्गाभङ्गरूपो विशेषोऽनिर्धारितो न वाच्यः। कुतः? एकत्र भङ्गनियमादिति। ननु तथापि व्याख्यानस्यार्थस्य नोत्तरमिदम् यतः पूर्वमनिर्धारित इति शेष इति व्याख्यानम्, तत्र नेदमुत्तरमित्यत आह - **तथा चे**ति टीका। तथा चान्यतरत्वेन रूपेणात्र निर्धारणं वर्तते एव उभयोर्मध्ये एकत्र व्याप्तिभङ्गाभङ्गयोरवश्यं सम्भवादित्यर्थः। सत्प्रतिपक्षग्रन्थे सिद्धान्तप्रतीकं यथा **अन्याधिकरणे**ति टीका। समानपदस्य कृत्यमाह - **अन्ये**ति टीका। यथा पर्वतो वह्निमान् धूमात् वह्न्यभाववान् पाषाणवत्त्वात् अत्र उभयोर्व्याप्तिपक्षधर्मतोपस्थितिर्जाता। अथ च धूमेऽनुकूलतर्कावतारो जातस्तत्रानुकूलतर्कावतारवता प्रथमेन प्रबलानुमानेन द्वितीयस्य तर्कशून्यस्य बाधः क्रियते एव, स(अ)तस्तत्र सत्प्रतिपक्षत्वं नास्तीत्यसत्प्रतिपक्षेऽपि सत्प्रतिपक्षलक्षणगमनादतिव्याप्तिरतस्तद्वारणार्थमाह - **समाने**ति। तथा च यत्र द्वयोर्हेत्वोर्मध्ये एकत्रानुकूल-

तर्कावतारस्तत्र समानबलोपस्थित्यभावात् [279 A] सत्प्रतिपक्षलक्षणं नास्तीति नातिव्याप्तिरित्यर्थः। ननु तत् किं समानत्वमित्यत आह - **समानत्वं चे**ति टीका। साध्यतदभावनिर्णयाजनकत्वेनेति। तदेव समानत्वं यत् साध्यनिर्णयो न क्रियते सत्प्रतिपक्षग्रस्तत्वात् साध्याभावनिर्णयोऽपि न क्रियते तद्विपरीतसाधकग्रस्तत्वात्। अत्रैवोपोद्बलकमाह - **अधिकबलोपस्थितिश्चे**ति टीका। यतोऽधिकबलोपस्थिति(तिः) निर्णयजनिकाऽतो निर्णयाजनकत्वमेव समानबलत्वम्। अत्र यत्र तर्कसहकृताधिकबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गे हीनबलेऽतिव्याप्तिवारणार्थं समानपदं दत्तम्। तदयुक्तमित्याशङ्कते - **नन्वि**ति टीका। **तत्फलस्ये**ति। तस्या अधिकबलोपस्थितेर्यत् फलमपरानुमानबाधः तस्यैव हीनबलानुमितिप्रतिबन्धकत्वम् न तु अधिकबलोपस्थितेः प्रतिबन्धकत्वम् इति कृत्वा तत्रातिव्याप्तिरेव नास्तीत्याशङ्कार्थः। अत्रैव दूषणान्तरमाह - **किञ्चे**ति टीका। यतो दोषादपरानुमानस्य हीनबलत्वं तत एवानुमितिप्रतिबन्धः न त्वधिकबलोपस्थितेः प्रतिबन्धकत्वम्, तथा चाधिकबलोपस्थितेः प्रतिबन्धकत्वं नास्ति, तत्कृतबाधस्य दोषान्तरस्य वा प्रतिबन्धकत्वमित्याशङ्कार्थः। समाधत्ते - **बाधस्ये**ति। यदि तर्कसहकृताधिकबलोपस्थितेः फलं बाधः तस्य चानुमितिप्रतिबन्धकत्वं तदा यत् ज्ञानं यत्र प्रतिबन्धकं तत्सामग्री अपि तत्र प्रतिबन्धिका इति न्यायेन बाधस्य तत्र प्रतिबन्धकत्वेऽवश्यं बाधसामग्री अपि तत्र प्रतिबन्धिका वाच्या। तथा च बाधसामग्रीरूपा याऽधिकबलोपस्थितिस्तया प्रतिरुद्धे कार्ये हीनबलेऽतिव्याप्तिवारणार्थं युक्तमेव विशेषणं समानपदरूपमिति। यदि च बाधसामग्र्याः तत्र प्रतिबन्धकत्वं नास्ति तदा दूषणमाह - **अन्यथे**ति टीका। यदि बाधसामग्री हीनबले न प्रतिबन्धिका तदा हीनबलेन बाधावतारात् पूर्वं कुतो नानुमितिर्जन्यते, हीनबलेन चानुमितिर्न जन्यत एवेति बाधसामग्री अपि अवश्यं प्रतिबन्धिका वाच्या। अत्र शङ्कते - **न चे**ति टीका। तथा च बाधसामग्री न प्रतिबन्धिका किन्तु तदानीं सत्प्रतिपक्षत्त्वमेव, तेन यदा बाधावतारो नास्ति तदा सत्प्रतिपक्षत्वमेव यदा च बाधोऽवतीर्णस्तदानीं बाध एव प्रतिबन्धकः न सत्प्रतिपक्ष इत्याशङ्कार्थः। समाधत्ते - **अव्यवहितेते**ति टीका। यदि बाधावतारात् पूर्वम् उभयोरपि सत्प्रतिपक्षत्वं तदाऽधिकबलेन हेतुनाऽपरं यत् साध्यं तदभावानुमितिरूपो यो बाधस्तस्याजननापत्तेः उभयोः सत्प्रितिपक्षत्वात्। तस्मात् अधिकबलोपस्थितेरवश्यं [279 B] प्रतिबन्धकत्वं वक्तव्यमिति। द्वितीयं दूषणं निराकरोति - **यदि ही**ति टीका। तथा च हीनबलत्वप्रयोजकं दोषान्तरं चेत् प्रतिबन्धकं तदा स दोषोऽपि प्रतिबन्धकोऽस्तु सामग्री अपि प्रतिबन्धिकाऽस्तु। उभयोर्मध्ये एकस्य प्रतिबन्धकत्वे विनिगमकाभावात् उभयोरपि प्रतिबन्धकत्वम्। यत्र च विनिगमकं नास्त्येकप्रतिबन्धकतायां तत्रोभयोरपि प्रतिबन्धकत्वम्, अत्रैवानुकूलमाह - **अन्यथे**ति टीका। यथा ह्रदो धूमवान् वह्नेः इत्यत्र बाधव्यभिचारयोरुभयोरप्युपस्थितिदशायामनुमितिप्रतिबन्धात् एकस्य प्रतिबन्धकत्वं नापरस्येति विनिगन्तुमशक्यत्वात् बाधव्यभिचारयोरपि प्रतिबन्धकत्वम्, अन्यथा तत्रो-

भयोरपि प्रतिबन्धकत्वं न स्यात् । यथा हेत्वाभासान्तरज्ञानकालेऽपरहेत्वाभासज्ञानस्यापि प्रतिबन्धकत्वं तथा दोषान्तरसङ्कीर्णाया अपि बाधसाम्ग्र याः प्रतिबन्धकत्वमित्यत आह - **दोषान्तरेति** टीका । यदि यत्र बाधसामग्री प्रतिबन्धिका तत्र दोषान्तरमपि प्रतिबन्धकं भवतु बाधसामग्री अपि प्रतिबन्धिका भवतु विनिगमकाभावात् । ननु बाधसाम्ग्र या अनुमितिप्रतिबन्धकत्वे हेत्वाभासान्तरता स्यात् इत्यत आह - **तद्विषयस्ये**ति टीका । अत्र पाठः पुस्तकान्तरात् द्रष्टव्यः । अत्र समाधानग्रन्थो विलोक्यः । अथ साध्यविरोध्युपस्थापनसमर्थपदस्य प्रयोजनमाह - **धूमोऽयमिति** । एकमनुमानं यथा धूमो न वह्निनिरूपितव्याप्तिपक्षधर्मः धूमत्वात् । द्वितीयमनुमानं पूर्वानुमान-परामर्शादनुमितिर्जाता, ततः तत्र धूमो न व्याप्तिपक्ष[धर्मः], इयं याऽनुमितिः सैव व्याप्तिपक्षधर्मोपस्थितिः, तया प्रतिरुद्धकार्यो भवति। वह्निव्याप्यधूमवान् अयमिति धूमो वह्निव्याप्यपक्षधर्मो नीलविशेषवत्त्वात् इत्येकमनुमानम् । द्वितीयं च धूमो न व्याप्तपक्षधर्मः धूमत्वात् इत्यत्र धूमो न व्याप्तपक्षधर्म इति यदाऽनुमितिरनुकूलतर्कादिना जाता तदा साऽनुमितिः समानबलोपस्थितिर्भवति यतस्तत्रापि व्याप्तिपक्षधर्मोपस्थितिर्भासते येन धूमो न व्याप्य-पक्ष[धर्मः] इत्यनुमितिर्जाता । अनया प्रतिरुद्धकार्यो भवति नीलविशेषवत्त्वादिति हेतुः । अयं च दुर्बलो भवति यतः प्रथमानुमाने एवानुकूलतर्कावतारो जातोऽत्र तु न जात इति तस्य दुर्बलत्वं परं स सत्प्रतिपक्षो न भवति एकस्य दुर्बलत्वात् । सत्प्रतिपक्षत्वं तु समानबलत्वे एव भवति । अतस्तत्र हीनबले[न] सत्प्रतिपक्षलक्षणा-तिव्याप्तिरित्यर्थः । ननु द्वितीयानुमितिर्न धूमो व्याप्तिपक्षधर्म इत्यनुमितिः समाना कथं स्यादित्यत आह - **स्वय-मिति** टीका । समानत्वं नाम निर्णयाजनकत्वम्, इयं त्वनुमिति(तिः) निर्णयरूपैवेति कृत्वा निर्णयाजनिकैवेति । ननु साध्यविरोध्युपस्थापनसमर्थत्वं कस्य विशेषणमित्याह - **उपस्थित्याविति** टीका । तथा च साध्यविरोधि यत् साध्याभावस्तस्य यदुपस्थापनं ज्ञापनं तत्र समर्था या बलोपस्थितिस्तया प्रतिरुद्धकार्यलिङ्गत्वम् । [280 A] एतावता साध्यविरोध्युपस्थापनसमर्थपदेन पूर्वोक्तातिव्याप्तिपरिहारः कथं जात इत्यत आह - **बाधरूपोपस्थिति-स्त्विति** टीका । तथा च पूर्वोक्ता या बाधरूपोपस्थितिः सा साध्यविरोध्युपस्थापनसमर्था न किन्तु सा साध्यविरोध्युपस्थितिरेव यतः साध्यं प्रथमानुमाने व्याप्तपक्षधर्मत्वम्, तदभावरूपोपस्थितिरियं बाधरूपानुमितिः, ततस्तत्रातिव्याप्तिर्न भवतीत्यर्थः । अत्राशङ्कते - **न चेति** टीका । बलपदेन स्वसाध्यं स्वस्य हेतोः साध्यं यत् तस्य यत् विरुद्धं साध्याभावस्तस्य बलं व्याप्तिपक्ष[धर्म]ते तदुपस्थितिः, तथा च प्रकृते व्याप्तपक्षधर्मत्वं साध्यम्, तदभावो व्याप्तपक्षधर्मत्वाभावः, ततो व्याप्तपक्षधर्मत्वाभावनिरूपिता या व्याप्तपक्षधर्मतोपस्थितिः साऽपेक्षिता भवति । न व्याप्तिपक्षधर्म[ता] इति । बाधरूपानुमितौ प्रतियोगिविधया या व्याप्तपक्षधर्मतोपस्थितिः सा व्याप्ति-पक्षधर्मता[ऽ]भावस्य व्याप्तिपक्षधर्मतोपस्थितिर्न भवति इति कृत्वा तत्रातिव्याप्तिर्न भवतीति न च वाच्यमित्या-शङ्कार्थः । समाधत्ते - **उक्तविशेषणदानेनेति** । उक्तविशेषणं साध्यविरोध्युपस्थापनसमर्थपदम्, तद्दानेन । तथा

च प्रथमतो बलपदस्य स्वविरोधिबलपरत्वं न कर्तव्यम्, यथाकथञ्चित् बलपरत्वमेव, तेन पूर्वोक्तातिव्याप्तिर्लगति, ततस्तद्वारणार्थं साध्यविरोध्युपस्थापनसमर्थपदं दातव्यम्। एतत्पददानमहिम्ना स्वसाध्यविरोधीत्ययमर्थो लभ्यते। अयमर्थः - यदि प्रथमत एव समानबलोपस्थितिपदस्यार्थः स्वसाध्यसिद्धिविरोधीत्ययमर्थः क्रियते तदा तत् साध्यविरुद्धोपस्थापनपदं व्यर्थमेव भवति। ननु केवलबलपदं स्वसाध्यसिद्धिविरोधिबलपरम्, तथा सति किं स्यात् इत्यत आह - **विशेषणे**ति टीका। विशेषणं तु साध्यविरोध्युपस्थापनसमर्थत्वरूपं तस्य वैयर्थ्यं स्यात् यतः समानपदस्यैवार्थः स्वसाध्यविरोधीत्येवार्थः कृतो वर्तते। ननु सम्पूर्णसत्प्रतिपक्षलक्षणं केवलान्वयिसत्प्रतिपक्षेऽव्याप्तम् यथा अयं ज्ञानाभाववान् अचेतनत्वात् अयं ज्ञानवान् वस्तुतत्त्वात्। न च घटे व्यभिचारे(रो) विषयतासम्बन्धेन तत्रापि ज्ञानवत्त्वसत्त्वात्। अत्र साध्यं ज्ञानवत्त्वम्, तद्विरोधि अप्रसिद्धं विषयतासम्बन्धेन सर्वस्य साध्यवत्त्वात् इति केवलान्वयिनि सत्प्रतिपक्षेऽव्याप्तिरित्यत आह - **साध्यविरोध्युपस्थापनसमर्थत्वं** चेति टीका। साध्यस्य या सिद्धिस्तद्विरोधिनी या उपस्थितिर्ज्ञानं साध्यज्ञानविरोधिज्ञानजननसमर्थत्वम्, इदं केवलान्वयिनि वर्तते। कथम्? अयं ज्ञानवान् वस्तुतत्त्वात् इत्यत्र साध्यसिद्धिविरोधिनी या उपस्थितिः सा कीदृशी? ज्ञानं न रूपवद्वृत्ति बहिरिन्द्रियाप्रत्यक्षत्वात् रूपादिवत्। पूर्वं ज्ञानवत्त्वं साध्यं तत्साध्यसिद्धिविरोधिन्युपस्थितिरियं भवत्येवेति कृत्वा नाव्याप्तिः। अत्र मूललक्षणे आशङ्कते - **नन्वि**ति टीका। शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यः श्रावणत्वात् इत्यत्र परामर्शद्वयं परस्परं साध्यविरोध्युपस्थापनसमर्थम् [280 B], यथा एकोऽनित्यत्वव्याप्यकृतकत्ववान् अयम् अपरो नित्यत्वव्याप्यश्रावणत्ववान् अयमिति परामर्शद्वयेऽनुमितिर्न जायते परस्परपरामर्शाभ्यां परस्परकार्यप्रतिबन्धात्। एवं सति तस्मिन्नेवानित्यत्वव्याप्यकृतकत्ववान् अयमिति परामर्शे सति नित्यत्वविरुद्धजन्यत्वमपि ज्ञातम्, तत्र जन्यत्वे हेतौ अतिव्याप्तिः। तत्तु सत्प्रतिपक्षरूपं न भवति। कुतो न भवति? यतो जन्यत्वं हेतुर्नित्यत्वविरुद्धत्वेनैव ज्ञातोऽतः कृतकत्वेन सह श्रावणत्वादिवत् सत्प्रतिपक्षो न भवति। यतोऽयं नित्यत्वविरुद्धत्वेनैव ज्ञातः ततोऽयं विरुद्धत्वात् अलक्ष्य एव। तत्र जन्यत्वे विरुद्धत्वेन ज्ञायमानेऽतिव्याप्तिरित्यर्थः। ननु जन्यत्वं हेतुर्विरुद्धत्वेन ज्ञायमानो दुर्बलः, कृतकत्वं हेतुस्तु व्याप्तिपक्षधर्मतया ज्ञायमानत्वात् अधिकबल इति समानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वमेव नास्ति, कुतस्तत्रातिव्याप्तिस्तत्र लक्षणाभावादित्यत आह - **नित्यत्वरूपे**ति टीका। तथा च समानत्वं नाम निर्णयाजनकत्वम्। एवं च सति स्वशब्देन जन्यत्वम्, तस्य यत् साध्यं नित्यत्वम्। यथा ह्रदपक्षके वह्न्यनुमाने धूमवत्त्वं हेतुः स्वरूपासिद्धः तथा शब्दपक्षकनित्यत्वानुमाने जन्यत्वं हेतुर्विरुद्धः, तस्य विरोधि यदनित्यत्वं तदुपस्थापनसमर्था या बलोपस्थितिर्यथाऽनित्यत्वव्याप्यकृतकत्ववान् अयमिति रूपा सा समाना भवति निर्णयाजनकत्वात्। यद्यपि जन्यत्वहेतुना निर्णयजनिका जन्यत्वस्य विरुद्धत्वेन ज्ञातत्वात् तथापि नित्यत्वव्याप्यत्वेन ज्ञातं यत् श्रावणत्वं तेन प्रतिरुद्धत्वात् निर्णयाजनिका भवतीति

लक्षणं तत्र गतम्, तेन विरुद्धेऽतिव्याप्तिः। शङ्कते - **न चेति**। जन्यत्वे या विरुद्धोपस्थितिः सा वस्तुगत्या साध्याभावव्याप्त्युपस्थितिलक्षणा बलोपस्थितिर्भवति। यतः साध्याभावव्याप्तो विरुद्ध इति तथापि तस्या विरुद्धत्वोपस्थितेर्बलोपस्थितित्वेन न प्रतिबन्धकता। जन्यत्वेन या नित्यत्वानुमितिः कर्तव्या तत्र तस्या न प्रतिबन्धकता किन्तु सहचारनिश्चयविरोधित्वेनैवेत्यत एव विरुद्धत्वज्ञानेन सहचारज्ञानमेव विघट्यतेऽतो जन्यत्वे नातिव्याप्तिः बलोपस्थितित्वेन प्रतिबन्धकत्वाभावादित्याशङ्कार्थः। दूषयति - **एवं हीति** मूलम्। तर्हि साध्यविरोध्युपस्थापनपदं व्यर्थम्। कथम् ? धूमो वह्निव्याप्यो नीलविशेषवत्त्वात्, तदनन्तरं धूमो न व्याप्तपक्षधर्मः इयं याऽनुमितिर्जाता तया पूर्वहेतुः प्रतिरुद्धकार्यलिङ्गो भवति, अत्र प्रतियोग्यंशे व्याप्तिपक्षधर्मतयोर्ज्ञातत्वात् बलोपस्थितिरप्यस्ति, तत्प्रतिबद्धकार्यलिङ्गेऽतिव्याप्तिवारणार्थं साध्यविरोध्युपस्थापनपदं दत्तम्, ततो न व्याप्तपक्षधर्मः इतीयं या व्याप्तिपक्षधर्मतोपस्थितिस्तस्या बलोपस्थितित्वेन न प्रतिबन्धकता किन्तु ग्राह्याभावनिश्चयत्वेन, पूर्वानुमाने ग्राह्ये व्याप्तपक्षधर्मत्वं न व्याप्तपक्षधर्म इत्यनेन तदभावोऽवगाह्यते, तथा च साध्यविरोध्युपस्थापनपदं [281 A] व्यर्थमित्याशङ्कार्थः। एतदेवाह - **पर्वतवृत्तित्वादाविति** टीका। अत्र धूमो व्याप्तपक्षधर्मः पर्वतवृत्तित्वात्। नीलविशेषस्थाने पर्वतवृत्तित्वमुक्तम्। तथा च तत्रातिव्याप्तिर्नास्ति। कथम्? यतस्तत्र बलोपस्थितित्वेन प्रतिबन्धकता नास्ति, तर्हि न व्याप्तिपक्षधर्म इत्युपस्थितेः केन रूपेण प्रतिबन्धकत्वमित्यत आह - **ग्राह्याभावनिश्चयत्वेनेति** टीका। तथा च न व्याप्तिपक्षधर्म इत्येतस्या उपस्थितेर्न बलोपस्थितित्वेन प्रतिबन्धकत्वं किन्तु ग्राह्याभावनिश्चितत्वेन, ततस्तत्प्रतिरुद्धे पर्वतवृत्तित्वादौ आदिपदान्नीलविशेषादौ च नातिव्याप्तिः, ततस्तद्वारणार्थं साध्यविरोध्युपस्थापनपदं व्यर्थमेवेति पूर्वपक्षसंक्षेपः। अत्राहुरिति **पक्षधरमिश्रा** इति शेषः। अत्र लक्षणे यानि पदानि दत्तानि तानि सर्वाण्यपि असम्भववारकाणि। तदेव दर्शयति - **बलोपस्थितित्वेनेति** टीका। यत्र प्रतिरुद्धकार्यलिङ्गत्वमित्युच्यमाने बाधे व्याप्तिस्तेनापि बाध्यो यो हेतुस्तस्य कार्यमनुमितिलक्षणं प्रतिरुध्यते एव, तद्वारणार्थं **बलोपस्थितीति**। बाधे बलोपस्थितित्वेन प्रतिबन्धकत्वं नास्ति किन्तु साध्याभावत्वेनैव। बलोपस्थित्या प्रतिबद्धकार्यलिङ्गत्वमित्युक्ते पुनरप्यसम्भवो यतः सत्प्रतिपक्षेऽपि बलोपस्थितित्वेनापि प्रतिबन्धकत्वं नास्ति स्वबलोपस्थितित्वेन प्रतिबन्धकत्वाभावात्। अन्यथा वह्निमान् धूमात् इत्यत्र वह्निव्याप्यधूमवान् अयमित्येव आकारिका या बलोपस्थितिः तस्या अपि स्वानुमितौ प्रतिबन्धकत्वं स्यात्। अतः साध्यविरोधीत्युपस्थितिविशेषणम्। तथा च साध्यसिद्धिविरोधिनी या उपस्थितिः अन्वयव्यतिरेकिसाध्याभावोपस्थितिः केवलान्वयिनि तु साध्ये पक्षवृत्तित्वाभावोपस्थितिः यथाऽभिधेयत्वं पक्षवृत्ति न भवति इति पक्षेऽभिधेयत्वे या पक्षवृत्तित्वाभावोपस्थितिः सा साध्यसिद्धिविरोध्युपस्थितिर्भवत्येव। अन्यथा केवलान्वय्यनुमाने सत्प्रतिपक्षता कथं स्यात्। तथाहि - शब्दोऽभिधेयः प्रमेयत्वात् अत्र सत्प्रतिपक्षकरणे साध्याभावानुमानं द्वितीयं यद्यपि न सम्भवति साध्यं

पक्षीकृत्य साध्यपक्षकं सत्[प्रति]पक्षानुमानं सम्भवत्येव यथा अभिधेयत्वं शब्दावृत्ति रूपवृत्तित्वात् रूपत्ववत् इति । केवलान्वयिनि सत्प्रतिपक्षः सम्भवति । यथा पर्वतो वह्निमान् धूमात् इत्यत्र यथा पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् अयं सत्प्रतिपक्षस्तथा वह्निः पर्वतावृत्तिः पाषाणवद्वृत्तित्वात् ह्रदत्ववत् इत्यपि साध्यपक्षक-सत्प्रतिपक्षानुमानं सम्भवति । तथा केवलान्वय्यपि साध्यपक्षकसत्प्रतिपक्षः सम्भवत्येव । एवं साध्य-सिद्धिविरोध्युपस्थितिजननसमर्था या बलोपस्थितिस्तयो(या) प्रतिरुद्धकार्यलिङ्गत्वं सत्प्रतिपक्षलक्षणम्। नन्वेता-दृशी विवक्षा किमर्थं कर्तव्या इत्यत आह - **केवलान्वयी**ति टीका । अनया विवक्षया केवलान्वयी सत्प्रति-पक्षोऽपि सङ्गृहीतो [281 B] भवति इत्यर्थः । एतदेव विवृणोति - **ननु साध्याभावे**ति टीका । तथा च साध्य-सिद्धिविरोध्युपस्थितिजननसमर्थबलोपस्थितित्वेनैव प्रतिबन्धकत्वं वक्तव्यम्, न तु साध्याभावसाधकत्वेनेति । **दोषे**ति । केवलान्वयिसत्प्रतिपक्षो न स्यादित्यर्थः । तथा च साध्यसिद्धिविरोधिनी या उपस्थितिरभिधेयत्वं न शब्दवृत्ति इत्येवंरूपा साध्यसिद्धिविरोधिनी उपस्थितिः तज्जननसमर्थत्वं हेतोर्वर्तत एवेति तत्सङ्ग्रहः । अथ समानपदस्य कृत्यमाह - **साध्यविरोधी**ति टीका । साध्यसिद्धेर्विरोधिनी या उपस्थितिस्तज्जननस्वरूपयोग्यत्वं हीनबलोपस्थितावपि वर्तते । यतः साध्यसिद्धिविरोध्युपस्थितिजनकतावच्छेदकं किम् ?, व्याप्तिपक्षधर्मतोप-स्थितित्वम्, तच्च हीनबलोपस्थितावपि वर्तते एवेति । तया हीनबलोपस्थित्या कदापि अनुमितिरूपकार्यस्य प्रतिरोधो न क्रियते इति कृत्वा साध्यसिद्धिविरोध्युपस्थितिजनकबलोपस्थितित्वमपि न प्रतिबन्धकतावच्छेदक-मित्यसम्भव इत्यर्थः । अयमर्थः - साध्यसिद्धिविरोध्युपस्थितिजननसमर्थबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं सत्प्रतिपक्षत्वं वक्तव्यम्, इदं लक्षणमसम्भवग्रस्तम्, कुतः ?, साध्यसिद्धिविरोध्युपस्थितिजननसमर्थबलोप-स्थितित्वेन यदि प्रतिबन्धकता स्यात् तदा तया प्रतिरुद्धकार्यलिङ्गत्वं सत्प्रतिपक्षलक्षणं वक्तव्यम्, तच्च न सम्भवति । कथम् ? साध्यसिद्धिविरोध्युपस्थापनसमर्थबलोपस्थितित्वे[न] प्रतिबन्धकत्वं नास्ति हीनबलो-पस्थितावपि तथात्वं वर्तते इति कृत्वा तत्त्वं न प्रतिबन्धकतावच्छेदकमित्यसम्भव इत्यर्थः । एतदेवाह - **असम्भवतादवस्थ्येने**ति टीका । तथा च लक्षणस्यार्थ एव न सम्भवति इत्यसम्भवग्रस्तं लक्षणमित्यर्थः । अत आह - **समानपदमि**ति टीका । तथा च यद्यपि तादृशबलोपस्थितित्वेन प्रतिबन्धकता नास्ति तथापि समान-बलोपस्थितित्वेन प्रतिबन्धकता तिष्ठत्येवेति नासम्भवग्रस्तं लक्षणमित्यर्थः । अथ हीनबलोपस्थितौ तु समानत्वं कथं नास्तीत्यत आह - **समानत्वं चे**ति । तथा च प्रतिबन्धकस्य प्रतिबध्यापेक्षया समानत्वं नाम वैलक्षण्येना-निश्चीयमानत्वं ततः किमित्यत आह - **न च हीनबले**ति टीका । हीनबलोपस्थितौ प्रतिबध्यापेक्षया प्रति-बन्ध[क]स्यानिर्धार्यमाणत्वं नास्ति किन्तु वैलक्षण्यवत्तया निर्धार्यमाणत्वमेव, एतदेवाह - **तदस्ती**ति टीका । **एवं चे**ति । साध्यविरोधीत्यादिके विशेषणे दत्ते सति बाधसामग्र्यादावप्यतिव्याप्तिरेव नास्ति यतो बाधसामग्री समान-

बलोपस्थितिरेव न भवति। यतो बाधसामग्र्यां वैलक्षण्यवत्तयाऽनिर्धार्यमाणत्वं नास्ति किन्तु निर्धार्यमाणत्वमेवेति न तत्रातिव्याप्तिः। **चिन्त्यमिति मिश्रमते** दूषणमाह - यत् त्वयोक्तं बलोपस्थितित्वेन प्रतिबन्धकता नास्ति स्व-बलोपस्थितेरपि स्वानुमितेः प्रतिबन्धकता [282 A] स्यादित्यत उक्तं साध्यविरोध्युपस्थापनसमर्थेति पदमित्यादि। असम्भववारणार्थं पूर्वोक्तानि सर्वाणि विशेषणानि दत्तानि तथाप्यसम्भवस्तदवस्थ एवेत्याह - **तादृशेति** टीका। साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थितित्वमपि न प्रतिबन्धकतावच्छेदकम्, वक्ष्यमाणयुक्त्याऽसम्भवस्त-दवस्थ एवेति। कुत इत्यत आह - **यत्रेति**। यत्रोभयोर्हेत्वोः समूहालम्बनरूपः परामर्शो जातो यथा वह्निव्याप्य-धूमवान् अयं वह्न्यभावव्याप्यपाषाणवान् अयमित्युभयसामग्रीसमवधाने सति उभयपरामर्शो जातस्तत्रोभय-परामर्शकाले यत्र चोभयत्र बाधावतारो दोषाज्जातो यथाऽयं पर्वतो वह्निवह्न्यभावोभयाभाववान् इत्युभयत्र बाधावतारेणोभयोर्हीनबलत्वेन सत्प्रतिपक्षत्वं नास्ति। तत्र साध्यविरोध्युपस्थापनसमर्थबलोपस्थितित्वं वर्तते। यतः सा व्याप्तिपक्षधर्मतोपस्थितिर्वर्तते, तस्यां च साध्यविरोध्युपस्थापनसमर्थबलोपस्थितित्वमप्यस्ति। ननु तस्याः समानत्वमपि नास्तीत्यत आह - **तस्या अपी**ति टीका। उभयत्र बाधावतारे सति या व्याप्तिपक्षधर्मोप-स्थिति[स्त]स्या इत्यर्थः। **प्रतिबध्ये**ति टीका। तथा च तस्याः परस्परवैलक्षण्यवत्तयाऽनिर्धार्यमाणत्वेन समान-त्वात् तया परस्परबलोपस्थित्या परस्परप्रतिबन्धस्तु न क्रियते परं साध्यविरोध्युपस्थापनसमर्थबलोपस्थितित्वं तच्च वर्तते एवेति साध्यविरोध्युपस्थापनसमर्थबलोपस्थितिर्भवति परं तया बलोपस्थित्या प्रतिबन्धो न क्रियते इति कृत्वा साध्यविरोध्युपस्थापनसमर्थबलोपस्थितित्वमपि नानुमितिप्रतिबन्धकतावच्छेदकमिति कृत्वाऽसम्भव एव। अत्राशङ्कते - **न चे**ति टीका। तथा च यत्र बाधावतारो जातस्ताभ्यामपि बलोपस्थितिभ्यां परस्परप्रतिबन्धः क्रियते एवेति तदानीमपि सत्प्रतिपक्षत्वमिष्टमेवेति साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थितित्वं प्रतिबन्ध-कतावच्छेदकं भवत्येवेति नासम्भव इत्याशङ्कार्थः। दूषयति - **अपसिद्धान्तादि**ति टीका। यत्रोभयत्र बाधाव-तारस्तत्र सत्प्रतिपक्षत्वाङ्गीकारादपसिद्धान्त इत्यर्थः। ननु युक्तिसहत्वे किमपसिद्धान्तेनेत्यत आह - **बाधादेरि**ति टीका। यतस्तत्र बाध एव प्रतिबन्धकः परं सा समानबलोपस्थितिः प्रतिबन्धिका न भवति। ननु बाधसमानबलोप-स्थित्योरुभयोरपि प्रतिबन्धकत्वमस्तु इत्यत आह - **बाधितेनापि** इति टीका। यदि बाधे विद्यमानेऽपि समान-बलोपस्थितेः प्रतिबन्धकत्वं तदा पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पाषाणवत्त्वात् इत्यत्रापि यदा पाषाणवत्त्वे हेतौ यदि वह्न्यभावांशे बाधावतारो जातस्तदा तयाऽप्युपस्थित्याऽपरानुमितेर्वह्न्यनुमितेः प्रतिबन्धः स्यात्। अत्राशङ्कते - **न चे**ति। तथा च बाधितेऽपि सत्प्रतिपक्षत्वमिश्र(ष्ट)मेव। दूषयति - **आभासान्तरे** इति। असिद्धादौ विद्यमानेऽपि सत्प्रतिपक्षत्वं स्यात् [282 B] समानबलत्वस्य तत्राति(पि) विद्यमानत्वात्। दूषणा-न्तरम् - **किञ्चे**ति टीका। समानबलोपस्थितित्वमात्रं न प्रतिबन्धकम्। तत्त्वेन प्रतिबन्धकत्वेऽधिकबलोपस्थिते(तेः)

प्रतिबन्धकत्वं न स्यात्, किं तर्हि बलोपस्थितौ प्रतिबन्धकतावच्छेदकमित्यत आह - **अन्यूनबलत्वमिति** टीका। अत्र युगपदुपस्थितेरित्यन्तो ग्रन्थो शुद्धः पुस्तकान्तरे द्रष्टव्यः। स्वमतमाह - **व्याप्तीति**। व्याप्तिपक्षधर्मतारूपं बलं तत् केनापि येन केनापि रूपेण विषयतया यादृशोपस्थितौ अवच्छेदकं तादृश्या उपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं विवक्षितम्। अथ क्रमेण पदानां व्यावृत्त्य(वर्त्य)म् उक्तदोषनिराकरणमप्याह - **तथा चेति** टीका। प्रथमं साध्यविरोध्युपस्थापनपदस्य कृत्यं कृतम्। तदेवात्र कृत्यम् - तथाहि धूमो व्याप्तिपक्षधर्मः पर्वतवृत्तित्वात् इत्येकमनुमानम् धूमो न व्याप्तिपक्षधर्मः धूमत्वात् इति द्वितीयम्, तथा च यत्र द्वितीयेनाधिकसहकारणवशादनुमितिः कृता तस्यामनुमितौ व्याप्तिपक्षधर्मतारूपं बलं विषयतया जातमेव। अथवा टीकाभिप्रायेण द्वितीयमनुमानं प्रथममेवानुमानं कर्तव्यम्, तथा धूमो न व्याप्तिपक्षधर्मः, हेतुः स एव तदनन्तरं धूमो व्याप्तिपक्षधर्म इति द्वितीयमनुमानम्, तथा च द्वितीयानुमाने सहकारिवशात् यत्रानुमितिर्जाता तत्र द्वितीयानुमितिः पूर्वस्यानुमितेर्बाधरूपा भवति ग्राह्याभावरूपत्वात्, पूर्वानुमितौ ग्राह्यो व्याप्तिपक्षधर्मताऽभावः तदभावस्तु व्याप्तिपक्षधर्मत्वम्, द्वितीयानुमितौ विषयः स एव व्याप्तिपक्षधर्मतोपस्थितिर्भवति, तया प्रतिरुद्धकार्ये पर्वतवृत्तित्वादौ अतिव्याप्तिस्तत्रापि सत्प्रतिपक्षलक्षणं गतम् इति अतिव्याप्तिवारणार्थं साध्यविरोधीति पदम्। तथा च सा साध्यविरोध्युपस्थितिरेव न तु साध्यविरोध्युपस्थितिजननसमर्था। न हि उपस्थितौ उपस्थितिजननयोग्यत्वम्, न हि घटेन घटो जन्यते इति। अथ पूर्वोक्तविरुद्धत्वेन ज्ञाते जन्यत्वे याऽतिव्याप्तिस्तां निराकरोति - **अनित्यत्वेति** टीका। तथा च नित्यत्वविरुद्धत्वेन ज्ञाते जन्यत्वे बलोपस्थितेः प्रतिबन्धकत्वं बलोपस्थितित्वेन नास्ति किन्तु विरुद्धोपस्थितित्वेनेति। अत्रैवोपोद्वलकमाह - **तस्या** इति। विरुद्धत्वोपस्थितेः सहचारग्रहप्रतिबन्धद्वाराऽन्यत्र व्याप्तिधीप्रतिबन्धकत्वस्य क्लृप्तत्वात् विरुद्धत्वोपस्थितित्वेन रूपेण प्रतिबन्धकत्वं न तु व्याप्तिपक्षधर्मतोपस्थितित्वेनेत्यर्थः। समाधानान्तरमाह - **लिङ्गं चेति**। अथवा व्याप्तिपक्षधर्मताप्रतिरुद्धकार्यलिङ्गत्वमित्यत्र लिङ्गपदं व्याप्तिपक्षधर्मतया ज्ञातत्वपरं कर्तव्यम्। तथा च नित्यत्वविरुद्धत्वेन ज्ञाते जन्यत्वे नित्यत्वव्याप्तिपक्षधर्मतोपस्थितिरेव नास्तीति कृत्वाऽतिव्याप्तिर्नास्तीति भावः। लिङ्गपदस्य व्याप्तिपक्षधर्मतया ज्ञातत्वपरत्वेऽनुकूलमाह - **अत एवेति**। यत एव लिङ्गपदं व्याप्तिपक्षधर्मतया ज्ञातत्वपरम् अत एव आत्मनि विरुद्धे मनसि व्यभिचारिणि नातिव्याप्तिः। कुतः ? यतस्तत्रात्मनि मनसि वा व्याप्तिपक्षधर्मतया ज्ञातत्वमेव नास्ति। यथा वह्निमान् धूमात् वह्न्यभाववान् पाषाणवत्त्वात् इत्यत्र पाषाणरूपसत्प्रतिपक्षेण [283 A] वह्न्यनुमितिलक्षणकार्यस्य प्रतिबन्धः क्रियते। यथा वह्न्यनुमितिलक्षणं कार्यं यथा धूमस्य हेतोस्तथाऽऽत्ममनसोरपि कार्यं भवति वह्न्यनुमितिः, ज्ञानमात्रे तयोः कारणत्वात्। तथा च यथा प्रतरुद्धकार्यत्वं धूमे तथा आत्ममनसोरपि वर्तते, धूमस्य सत्प्रतिपक्षत्वात् सत्प्रतिपक्षलक्षणमात्मनि मनसि चातिव्याप्तम्, तयोर्हेतुत्वाभावादेव सत्प्रतिपक्षत्वम्, तथा च लिङ्गपदं यदि व्याप्तिपक्षधर्मतया ज्ञातत्वपरं कृतं तदा तत्र आत्म-

मनसोरप्यतिव्याप्तिर्नास्तीत्यर्थः। अत्राशङ्कते - **न चेति** टीका। साध्यपदं स्वसाध्यपरं कर्तव्यम्, अन्यथाऽन्यसाध्यविरोध्युपस्थापनसमर्थबलोपस्थितेः प्रतिबन्धकत्वमेव नास्ति। यथा पाषाणवत्त्वस्य हेतोः स्वसाध्यं भवति वह्न्यभावः, तद्विरोधी भवति वह्निः, तदुपस्थापनसमर्थबलोपस्थितिर्वह्निव्याप्यधूमवांश्चायमितिरूपा इत्थमेव वह्न्यभावानुमितौ प्रतिबन्धिका, न तु अनित्यत्वव्याप्यकृतकत्ववान् अयमित्यादिरूपा। ततः साध्यसिद्धिविरुद्धोपस्थापनसमर्थबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वम् आत्ममनसोर्नास्ति, आत्ममनसोः पक्षधर्मत्वमेव नास्ति अवृत्तित्वात् तयोरिति भावः। समाधत्ते - **साध्यं हीति**। साध्यं नाम ज्ञाप्यं न तु जन्यम्, यथा धूमस्य ज्ञाप्यो वह्निस्तथाऽऽत्मादेरपि ज्ञाप्यः सम्भवति तज्ज्ञाने आत्मादेरपि कारणत्वात् इति कृत्वा मूललक्षणं स्वयं समर्थितम्। अथ मूले उत्तरं द्वितीयं लक्षणं योजयितुम् आभासं ददाति - **नन्विति** टीका। अत्र बलं किम् - सपक्षसत्त्वं विपक्षासत्त्वं वा? आद्ये आह - **व्यतिरेकीति** टीका। तथा च व्यतिरेकिणि सपक्षा(क्ष)सत्त्वाभावात् व्यतिरेकी सत्प्रतिपक्षो न स्यात्। द्वितीयमाह - **अन्त्ये** इति। यदि विपक्षासत्त्वं तदा केवलान्वयिनि अव्याप्तिः, तत्र विपक्षस्याप्रसिद्धत्वात् तदभावो ज्ञातुमशक्य इत्यर्थः। **बलं चेतीति** टीका। बलं तु न सपक्षसत्त्वं तथा विपक्षासत्त्वं पूर्वदोषात्, परं व्याप्तिपक्षतारूपं बलम्। ननु व्याप्तिरप्येका नास्तीत्यत आह - **सा चेति** टीका। तत उभयोरपि व्याप्तिपक्षतारूपं बलमपेक्षितं तत्रास्तीति भावः। द्वितीयलक्षणं व्याचष्टे - **विरोधीति**। विरोधिबोधकं यत् प्रमाणं तदन्यत् यद् गमकतौपयिकरूपवत्तया ज्ञायमानलिङ्गत्वम्। यथा वह्निमान् धूमात् वह्न्यभाववान् पाषाणवत्त्वात्, अत्र विरोधिशब्देन स्वसाध्यविरोधि, तद्बोधकं यत्र किमपि नास्ति उभयोः परस्परापेक्षयाऽधिकबलं किमपि नास्ति, तदन्यत् यद् गमकतौपयिकरूपवत्तया ज्ञायमानलिङ्गत्वम् इदमुभयोरपि वर्तते इति अत्र सत्यं तस्य कृत्यमाह - **अत्रापीति** टीका। यत्र वह्न्यभावसाधके वह्निसाधकापेक्षया अधिकबलोपस्थितिर्जाता तत्राधिकबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गं हीनबलं वह्निसाधकं तत्रातिव्याप्तिवारणार्थं विरोधिबोधकान्येति। तथा च तत्र हीनबले विरोधिबोधकं [283 B] प्रमाणमपि तिष्ठतीति विरोधिबोधकान्यत्वं नास्ति इति कृत्वा नातिव्याप्तिः। ननु विरोधिबोधकान्येति कस्य विशेषणमित्यत आह - **गमकतौपयिकेति**। तथा च विरोधिबोधकान्यत् यत् गमकतौपयिकं रूपमित्यर्थः। ननु तथापि सत्प्रतिपक्षेऽतिव्याप्तिः विरोधिबोधकस्य प्रतिहेत्वन्तरस्य विद्यमानत्वात् इत्यत आह - **बोधकत्वमिति** टीका। बोधकत्वं न(? तु) स्वरूपयोग्यत्वं विरोध(धि)बोधकस्य स्वरूपयोग्यस्य विद्यमानत्वात्। यथा वह्निमान् धूमात् वह्न्यभाववान् पाषाणवत्त्वात् इत्यत्र परस्परं सत्प्रतिपक्षता वर्तते, अत्र पाषाणवत्त्वं हेतुः सत्प्रतिपक्षो भवति। तत्र विरोधिबोधकान्यत् यत् गमकतौपयिकं रूपं प्रतिहेतुगतं धूमत्वरूपहेतुगतं तदेव विराधिबोधकान्यन्न भवति। यतो वह्नेर्विरोधि साध्यं वह्न्यभावः, तद्गमकतौपयिकं वर्तत एव, तथा चोभयोर्हेत्वोः परस्परं विरोधिबोधकत्वात् विरोधिबोधकान्यगमकतौपयिकरूपवत्तया ज्ञायमानत्वं नास्ति इति सत्प्रतिपक्षलक्षणं परस्परमव्याप्तम्।

अतोऽत्र विरोधिबोधकशब्देन विरोधिबोधफलोपहितत्वं विवक्षितम्, तथा च **सत्प्रतिपक्षौ** यद्यपि परस्परं विरोधिबोधजनने स्वरूपयोग्यौ भवतः परं फलोपहितौ न भवतः, परस्परं सत्प्रतिपक्षाभ्यामनुमितिप्रतिबन्धात् विरोध्यनुमितिर्न क्रियते इति कृत्वा विरोधिबोधफलोपहितान्यत्वं वर्तते एव, तेनासम्भवदोषो नास्तीत्यर्थः। नन्विदं तथापि केवलान्वयिनि सत्प्रतिपक्षे यद्यपि साध्यविरोधी नास्ति अव्याप्तं तत्र साध्यविरोधिनोऽप्रसिद्धेरित्यत आह - **तदर्थोऽपी**ति टीका। तथा च विरोधी यो बोधस्तदुपहितान्यत्वम्। ततः केवलान्वयिनि सत्प्रतिपक्षे यद्यपि साध्यविरोधी नास्ति अभिधेयत्वाभावस्याप्रसिद्धेः, परं विरोधिबोधस्तु वर्तते, साध्ये पक्षवृत्तित्वाभावविषयको विरोधिबोधस्तिष्ठत्येवेति नाव्याप्तिः। नन्वत्र गमकतौपयिकं रूपं किमित्यत आह - **व्याप्तिपक्षधर्मते**ति टीका। ननु तथापि पूर्वोक्तरीत्या आत्ममनसोरतिव्याप्तिरित्यत आह - **अत्रापी**ति। तथा च लिङ्गपदं व्याप्तिपक्षधर्मतया ज्ञातत्वपरम् आत्मादेस्तु व्याप्तिपक्षधर्मतया ज्ञातत्वं नास्ति अवृत्तित्वात् तदभावः। मतान्तरं दूषयति - **यत् त्वि**ति टीका। विरोधीत्यत्र लिङ्गपदं यद्यपि नास्त्येव यदि चक्षुरादिकमपि अनुमाने सत्प्रतिपक्षो भवति, यथा अवह्निमान् धूमात् इति अनुमानं चक्षुःप्रवृत्तं वह्न्यभावज्ञापनार्थमिति चक्षुः **सत्प्रतिपक्षं** भवति परं तत्र लक्षणा-व्याप्तिर्भविष्यति चक्षुषो लिङ्गत्वाभावात् इति कृत्वा चक्षुषोऽपि **सत्प्रतिपक्ष**त्वसङ्ग्रहार्थं लिङ्गपदमत्र लक्षणे नोक्तमित्यर्थः। एतत् व्याख्यानं [284 A] दूषयति - **तन्ने**ति टीका। यद्यपि चक्षुःसङ्ग्रहार्थं लिङ्गपदं त्यक्तं तथापि लिङ्गपदे त्यक्तेऽपि चक्षुषि लक्षणं न वर्तते। कथम्? चक्षुषि गमकतौपयिकतया ज्ञायमानत्वमेव नास्ति। चक्षुः ज्ञातं सदेव न प्रतिबन्धकमिति तत्राव्याप्तिस्तदवस्थैवेति तत्परिहारः। अत्रैवानुकूलमाह - **अग्रे** इति टीका। तथा चाग्रे **मूलकारेण** तन्मतं दूष्यमेव, तेन चक्षुषाऽनुमानं सत्प्रतिपक्षो न भवत्येवेति **मूलकारा**भिधानात्। ततस्तस्य अलक्ष्यत्वात् नाव्याप्तिस्तत्रेति भावः। ननु एकदा निरन्तरयोर्वेति मूलमनुपपन्नम्। यत्रैकदा समूहालम्बनरूपो-भयपरामर्शोत्पत्तिः यथा धूमपाषाणौ वह्निवह्न्यभावव्याप्यौ इति समूहालम्बनरूपः परामर्शस्तत्राव्यवधानेन क्रमिकत्वं कथं स्यात् एकदैवोभयपरामर्शसत्त्वादित्यत आह - **एकदे**ति टीका। तथा च नात्राव्यवस्थितो विकल्पः किन्तु व्यवस्थित एव, तथा च क्वचिद् एकदा परामर्शयोरुत्पत्तिः क्वचित् क्रमेणेति व्यवस्था ज्ञेया। अत्राशङ्कते - **न चे**ति। यत्र क्रमिकस्थले प्रथमं वह्निव्याप्यधूमवांश्चायमिति परामर्श उत्पन्नस्तदनन्तरं द्वितीयपरामर्शो वह्न्यभावव्याप्यपाषाणवत्त्ववान् अयमिति यदा उत्पद्यते तदा तस्मिन् काले पूर्वेण परामर्शेन वह्न्यनुमितिः कुतो नोत्पद्यते तदानीं विरोधिपरामर्शस्य पूर्वमभावात् वह्न्यनुमितिः स्यादित्याशङ्कार्थः। समाधत्ते - **विरोधि-परामर्शे**ति। तथा च विरोधिपरामर्शो यद्यपि न प्रतिबन्धकस्तथापि तत्सामग्री प्रतिबन्धिकाऽस्त्येव, विरोधि-परामर्शकारणीभूतव्याप्त्यादिज्ञानादिसत्त्वात् न वह्न्यनुमितिरित्यर्थः। समाधानान्तरमाह - **अग्रिमे**ति टीका। तथा च प्रतिबन्धकाभावः कार्यभूतः कारणं तेन विरोधिपरामर्शोत्पत्तिकाले विरोधिपरामर्शस्यैव विद्यमानत्वात्।

यथा दाहोत्पत्तिकाले मणिमन्त्राद्यभावोऽपेक्षितः तद्वत् वह्न्यभावव्याप्यपाषाणवान् अयमिति परामर्शस्यानुमितिकाल एवाभावोऽपेक्षितः तदानीं परामर्शस्यैव विद्यमानत्वात् ।

अथ वस्तुनोऽद्वयात्मकत्वात् व्याप्तिपक्षधर्मताभङ्ग एकत्रावश्यक इति स एव दोषः । न च तयोर्विरोधभङ्गेऽप्युपपत्तेर्न व्याप्त्यादिभङ्गनियम इति वाच्यम् । अविरोधेऽप्यनुमित्यविरोधात् विरोधे तु व्याप्त्यादिभङ्गनियमादिति चेत्, न, प्रतिरुद्धत्वज्ञानानन्तरं व्याप्त्यादिभङ्गज्ञानमित्युपजीव्यत्वेन व्यभिचारवदस्यापि दोषत्वात् । ननु साध्यतदभावयोरिव तद्व्याप्यत्वेनावधारितयोर्विरोधादेकत्र न निश्चयः किन्तु संशयः, निर्णये वान्यतरव्याप्तिसंशय इति व्याप्यत्वासिद्धिरिति चेत्, न, उभयोरेकत्र निश्चयानन्तरमन्यतरव्याप्तिसंशय इत्युपजीव्यत्वेनास्य भिन्नत्वात् दूषकताबीजं तु समबलविरोधिसामग्रीप्रतिबन्धेन निर्णयाजनकत्वम्, न तु व्याप्तिपक्षधर्मताविरह एव सद्धेतोरपि सत्प्रतिपक्षत्वात्, एकत्र व्याप्तिभङ्गज्ञानद्वारा वास्य दूषकत्वम्, चक्षुरादेश्च नानुमानेन प्रतिरोधः तदुपस्थितावपि फलदर्शनेन तस्याधिकबलत्वात् । नन्वेवं वादिवाक्यमात्रस्य प्रतिरोधकत्वेनानुमानमात्रोच्छेदः । न च विरोधिवाक्यस्य न्यूनबलत्वे लक्षणायोगः समबलत्वे प्रतिरोध एव अधिकबलत्वे नरशिरःशौचानुमानवत् तेन बाध एवेति वाच्यम् । अगृह्यमाणविशेषदशायां प्रतिवादिवाक्येन सर्वानुमानप्रतिरोधापत्तेः, अनुमानात् पूर्वं पश्चाद् वा अनुमानान्तरेण तस्य न्यूनाधिकबलत्वानिरूपणात् निरूपणे वानुमानवैयर्थ्यात् मैवम् । विरोधिवाक्यमात्रस्य समबलत्वाभावात्, उक्तं हि व्याप्तिपक्षधर्मते बलमिति । प्रत्यक्षादेर्लिङ्गभावेनैवानुमानप्रतिरोधः कथायां तदुपन्यासानर्हत्वात् । यत्तु विरोधिव्याप्यद्वयस्यासाधारणत्वात् संशयजनकत्वं दूषकताबीजमिति तन्न । एकैकं हि सत्प्रतिपक्षं न तु विशिष्टम् एकैकं च न संशायकमित्यनुमितिद्वयस्य प्रामाण्यग्राहकाप्रवृत्तिर्दूषकताबीजमित्यन्ये, तन्न, परस्परप्रतिबन्धेनानुमितेरेवानुत्पत्तेः । रत्नकोषकारस्तु सत्प्रतिपक्षाभ्यां प्रत्येकं स्वसाध्यानुतिः संशयरूपा जन्यते विरुद्धोभयज्ञानसामग्र्याः संशयजनकत्वात् संशयद्वारा अस्य दूषकत्वम् । न च संशयरूपा नानुमितिः बाधस्येव विरोध्युपस्थितेर-

**नुमितिसामग्रीविघटकत्वेनावधारणात् अन्यथा बाधेऽप्यनुमित्यापत्तेरिति वाच्यम् । अधिकबलतया बाधेन प्रतिबन्धात् तुल्यबलत्वादनुमितिः स्यादेव सामग्रीसत्त्वात् । साध्याभावबोधस्य च तत्र प्रतिबन्धकत्वं न तु तद्बोधकस्य चक्षुरादेः । प्रत्येकं निर्णायकत्वेनावधारितात् कथं संशय इति चेत्, न, प्रत्येकाद्धि ज्ञानमुत्पद्यमानमर्थात् संशयो न तु प्रत्येकं संशयजनकत्वमिति मेने, तन्न । साध्यतदभावयोर्विरोधेन यथैकज्ञानस्यापरधीप्रतिबन्धकत्वं तथा साध्याभावव्याप्यवत्त्वस्यापि साध्यविरोधित्वात् तद्बुद्धेरपि साध्यधीप्रतिबन्धकत्वात् विरोधिज्ञानत्वस्य प्रतिबन्धकत्वे तन्त्रत्वात् ।**

अथ मूलव्याख्या। मूले आशङ्कते - **अथेति**। एकं वस्तु पर्वताख्यं वह्निमत् वह्न्यभाववच्च न सम्भवति। ततोऽवश्यं वह्निव्याप्यपक्षधर्मतावत् स्थास्यति वह्न्यभावव्याप्यपाषाणवत्त्ववत् वा स्थास्यति न तूभयं विरोधात् इति युक्त्या उभयोर्मध्ये एकत्र व्याप्तिपक्षधर्मताभङ्गोऽवश्यं वक्तव्यः, तथा चान्यतरव्याप्तिपक्षधर्मताभङ्गः स एव दूषणं प्रतिबन्धकं भवतु न तु सत्प्रतिपक्षः एषा बुद्धिर्वादिप्रतिवादिमध्यस्थानां सम्भवति। मध्ये शङ्कते - **न चेति** मूलम्। यदा परस्परं साध्ययोर्विरोधो न ज्ञातः परस्परं हेत्वोर्वा विरोधो न ज्ञातस्तदानीं व्याप्तिपक्षधर्मताभङ्ग-ज्ञानाभावात् सत्प्रतिपक्ष एव दूषणमित्याशङ्कार्थः [284 B]। समाधत्ते - **अविरोधेति** मूलम्। यदि प्रस्परं साध्य-योर्हेत्वोर्वाऽविरोधस्तदाऽनुमितिरेव भवतु, उभाभ्यां समूहालम्बनरूपा अनुमितिः कर्तव्या, कुतः सत्प्रतिपक्षः ? यदि तयोर्विरोधस्तदा व्याप्त्यादिभङ्गनियम आवश्यकस्तदापि सत्प्रतिपक्षो न भवति समानबलत्वाभावात्। अयं भावः - उभयोरविरोधेऽनुमित्यापत्तिः, विरोधे व्याप्त्यादिभङ्गनियमात् सत्प्रतिपक्ष एव न भवेदित्यर्थः। समाधत्ते - **प्रतिरुद्धेति** । पूर्वं प्रतिरुद्धत्वज्ञानं सत्प्रतिपक्षज्ञानं तदनन्तरं व्याप्त्यादिभङ्गज्ञानं जायते इति सत्प्रतिपक्षस्य व्याप्त्यादिभङ्गज्ञाने उपजीव्यत्वात् सत्प्रतिपक्षो दोषः । अयं भावः - पूर्वं सत्प्रति[पक्ष]स्तेनानुमितिप्रतिबन्धः, पश्चात् सत्प्रतिपक्षज्ञानानन्तरं व्याप्त्यादिभङ्गोऽत्रावश्यकः इति ज्ञाने सत्प्रतिपक्षस्य तदनन्तरभावित्वात् तस्येति सत्प्रतिपक्षः सिद्ध एवेत्यर्थः। अत्र दृष्टान्तमाह - **व्यभिचारवदिति**। यथा व्यभिचारे विद्यमाने व्याप्त्यादिभङ्ग-ज्ञानमावश्यकं तथा च व्याप्त्यादिभङ्गज्ञाने यथा व्यभिचार उपजीव्यः तद्वत् व्याप्त्यादिभङ्गज्ञाने सत्प्रतिपक्षोऽप्युप-जीव्यत्वात् दूषणमित्यर्थः। अत्र शङ्कते - **नन्विति**। यथा साध्यतदभावज्ञानमेकत्र विरुद्धं साध्यवति ज्ञाते साध्या-भाववज्ज्ञानासम्भवात्, एवं साध्यव्याप्यवज्ज्ञाने सति साध्याभावव्याप्यवज्ज्ञानमपि न सम्भवति, तथा च विरोधात् उभयोः साध्यव्याप्यसाध्याभावव्याप्ययोरेकत्र निश्चय एव न सम्भवति किन्तु संशय एव, यदि हेत्वो-र्निश्चयस्तदोभयत्र व्याप्तिज्ञानं न सम्भवति। अयमर्थः - यदि साध्यव्याप्यनिश्चयस्तदा साध्याभावव्याप्यनिश्चयो

न सम्भवति, यदि साध्याभावव्याप्यनिश्चयस्तदा साध्यव्याप्यनिश्चयो न सम्भवति, यदि चोभयसाधकहेत्वोर्निश्चयस्तदा *नोभयत्र व्याप्तिज्ञानं किन्त्वेकत्रावश्यं व्याप्तिसंशयो भवति तदा च व्याप्तिसंशयात् व्याप्यत्वासिद्धिरेव* दोषो न तु सत्प्रतिपक्ष इत्याशङ्कार्थः। समाधत्ते - **उभयोरिति**। उभयोः साध्यसाध्याभावयोः साध्ययोः व्याप्ययोरेकत्र पक्षे भ्रमादविरोधज्ञानदशायां ज्ञाने जाते सति सत्प्रतिपक्षत्वं पश्चात् विरोधस्फुरणदशायां व्याप्तिसंशयस्तेन व्याप्तिसंशये सत्प्रतिपक्षस्योपजीव्यत्वात् पृथग् हेत्वाभासत्वं तथा व्याप्यत्वासिद्धावुपजीव्यत्वात् सत्प्रतिपक्षत्वम्। अथ सत्प्रतिपक्षयोः किं दूषकताबीजमित्यत आह - **समबलेति**। सत्प्रतिपक्षयोर्द्वयोः समबला या सामग्री यथा वह्निव्याप्यधूमवत्त्वज्ञानं वह्न्यभावव्याप्यपाषाणवत्त्वज्ञानं चेति रूपा तया परस्परप्रतिबन्धेन यत् निर्णयाजनकं तदेव दूषकताबीजम्। परमतं दूषयति - **न तु व्याप्तिपक्षधर्मताविरह** [285 A] इति। तथा सति यदि वस्तुगत्या व्याप्तिपक्षधर्मताविरहश्चेदत्र दूषकताबीजं स्यात् तदा सद्धेतोः सत्प्रतिपक्षत्वं न स्यात् अत्र व्याप्त्यादिभङ्गोपस्थितिर्नास्ति। व्याप्तिभङ्गज्ञानद्वाराऽप्यस्य दूषकत्वं निराकरोति - **एकत्रेति** मूलम्। तथा च यदि व्याप्तिभङ्गज्ञानद्वाराऽस्य दूषकत्वं तदा व्याप्तिभङ्गज्ञानेऽपि सत्प्रतिपक्षस्योपजीव्यत्वात् दूषकत्वं वक्तव्यम्। तत आवश्यकत्वात् स एव दोषोऽस्तु किं व्याप्त्यादिभङ्गज्ञानेनेत्यर्थः। ननु विरोधिव्याप्त्यादिसामग्रीसमवधानवशात् यदि सत्प्रतिपक्षस्य दूषकत्वं तदा चक्षुरादौ सत्प्रतिपक्षे दूषकताबीजाभावात् सत्प्रतिपक्षत्वं न स्यादित्यत आह - **चक्षुरादेश्चेति** मूलम्। चक्षुरादिकमनुमाने सत्प्रतिपक्षो न भवत्येव किन्तु हेत्वोरेव सत्प्रतिपक्षत्वं न तु चक्षुरनुमानयोः। कुत इत्यत आह - **तदुपस्थितावपीति** मूलम्। अनुमानोपस्थितावपि चक्षुरादेः सकाशात् फलदर्शनेनानुमानापेक्षया चक्षुरिन्द्रियस्याधिकबलत्वात् नानुमानं चक्षुषि सत्प्रति[पक्षः] श्वैत्यव्याप्यशङ्खत्वदर्शने विद्यमानेऽपि चक्षुषा श्वैत्याभावज्ञानोदयात्। अत्राशङ्कते - **नन्वेवमिति** मूलम्। तथा च वादस्थले सत्प्रतिपक्ष एव सर्वत्र स्यात् न तु कुत्राप्यनुमितिः स्यात् वादिवाक्यस्य प्रतिरोधस्य विद्यमानत्वात्। अत्राशङ्कते - **न चेति** मूलम्। विरोधिवाक्यं प्रतिवादिवाक्यम्, तच्च यदि न्यूनबलं तदा तत्र लक्षणमेव नास्ति समानबलयोरेव सत्प्रतिपक्षत्वात्, यदि प्रतिवादिवाक्यस्य समानबलत्वं तदा स प्रतिरोधः सत्प्रतिपक्ष एवेति इष्टापत्ति, यदि तस्याधिकबलत्वं तदा नरः(र)-*शिरःशौचानुमानवत् शब्देनानुमानस्यैव बाधः प्रबलत्वात् न तु अनुमानेन शब्दस्यापि बाधः शब्दस्य प्रबलत्वात्* यथा नरशिरः शुचि प्राण्यङ्गत्वात् इति अनुमानं यथाऽधिकबलेन शब्देन बाध्यते तथा प्रतिरोधकं वादिवाक्यं चेदधिकबलं तदा तेनानुमानस्य बाध एव भविष्यति न तु सत्प्रतिपक्षः। दूषयति - **अगृह्यमाणेति**। यत्रानुमानापेक्षया शब्दे विशेषो गृहीतो नास्ति तदा प्रतिवादिवाक्येन सर्वस्याप्यनुमानस्य प्रतिरोधापत्तेः। एतदेव विवृणोति - **अनुमानेति**। अनुमानात् पूर्वं पश्चात् वा न्यूनाधिकत्वबलानिरूपणात् तथा चानुमानेऽपि शब्दः सत्प्रतिपक्षः *स्यादेव। यदि चानुमानापेक्षया शब्दे न्यूनबलत्वमधिकबलत्वमवगतं तदाऽनुमानमेव व्यर्थं शब्देन* प्रतिरोधा-

भावादनुमानस्यैवासम्भवात्। सिद्धान्ती सत्प्रतिपक्षं समर्थयति - **मैवमिति**। **विरोधिवाक्यस्येति**। विरोधिवाक्येन सहानुमानस्य सत्प्रतिपक्षोऽसम्भावित एव समबलत्वाभावात्। समबलत्वं कथं नास्तीत्यत आह - **उक्तं हीति**। **व्याप्तीति**। न हि वादिवाक्यरूपे शब्दे व्याप्तिपक्षधर्मतारूपं बलं तिष्ठति, तथा च व्याप्तिपक्षतारूपं बलं शब्दे नास्तीति न स सत्प्रतिपक्षः। [285 B] व्याप्तिपक्षधर्मताबलं हि अनुमाने एवास्तीति। ननु यत्र व्याप्तिपक्षधर्मतारूपं बलं नास्ति तत्र न सत्प्रतिपक्षता, तदा प्रत्यक्षादेः सत्प्रतिपक्षत्वं न स्यादित्यत आह - **प्रत्यक्षादेरिति**। यत्रापि प्रत्यक्षेण सत्प्रतिपक्षः तत्रापि तस्य लिङ्गभावेनैव सत्प्रतिपक्षः। यथा अयं घटज्ञानाभाववान् व्यासक्तत्वात् अयं घटज्ञानवान् घटसन्निकृष्टचक्षुर्व(ष्म)त्त्वात् इत्यत्र चक्षुर्लिङ्गविधया सत्प्रतिपक्षः न तु चक्षुःस्वरूपेण। कुत इत्यत आह - **कथायामिति** मूलम्। न हि चक्षुषः स्वरूपसतो व्याप्तिपक्षधर्मताशून्यस्योपन्यासः कर्तुं शक्यः। अत एवोक्तं चक्षुरनुमाने स्वरूपेण सत्प्रतिपक्षो न भवति, यदि च भवति तदा लिङ्गविधया इति भावः। सत्प्रतिपक्षस्थापकं मतान्तरं दूषयति - **यत् त्विति** मूलम्। तथा च विरोधिव्याप्यद्वयं यथा वह्निमान् धूमात् वह्न्यभाववान् पाषाणवत्त्वात् इति द्वयं यत् वर्तते तत् असाधारणं वर्तते। तथाहि इदं यत् द्वयं धूमवत्त्वपाषाणवत्त्वरूपं द्वयं समुदितमसाधारणं भवति। उभयं सपक्षात् व्यावृत्तं विपक्षाच्च व्यावृत्तम्। धूमस्य सपक्षो महानसम्, पाषाणवत्त्वस्य सपक्षो ह्रदः। न च महानसह्रदयोरुभयं वर्तते इति ततोऽसाधारणे संशयजनकत्वं दूषकताबीजम्, तदेवात्र दूषकताबीजमिति। **असाधारणे एवेति**। द्वित्वावच्छिन्नपक्षमात्रवृत्तित्वात् इदं द्वयमसाधारणम्। दूषयति - **तन्नेति** मूलम्। **एकैकमिति** मूलम्। न हि द्वित्वावच्छिन्नं सत्प्रतिपक्षः किन्तु एकैकमेव सत्प्रतिपक्ष इति नासाधारण्यमेकैकस्य सपक्षव्यावृत्तत्वाभावात् इत्यर्थः। मतान्तरमाह - **अनुमितिद्वयस्येति** मूलम्। तथा च पाषाणवत्त्वेन या वह्न्यभावानुमितिर्जनिता धूमवत्त्वेन च या वह्न्यनुमितिर्जनिता इत्यनुमितिद्वयस्य प्रामाण्यग्राहकमानस्याप्रवृत्तिर्यतस्तत्रेदं प्रमाणमिदं चे(च) [ने]ति निर्णयः कर्तुं न शक्यते इत्यनुमितिद्वयस्य प्रामाण्यग्राहकमानाप्रवृत्तिरेवं सत्प्रतिपक्षे दूषकताबीजमित्यर्थः। दूषयति - **तन्नेति** मूलम्। **परस्परप्रतिबन्धेनेति** मूलम्। परस्परानुमितिप्रतिबन्धेनानुमितिरेव नोत्पद्यते कुतस्तदनन्तरभाविप्रामाण्यग्राहकाप्रवृत्तिः। यदि अनुमितिरुत्पन्ना स्यात् तदा तत्र प्रामाण्यग्राहकाप्रवृत्तिर्वक्तव्या, सैव न जातेति कुतस्तत्प्रामाण्याग्राहकत्वमित्यर्थः। सत्प्रतिपक्षे दूषकताबीजं **रत्नकोषकारो**क्तमन्यत् य(त्) दूषयितुमाह - **सत्प्रतिपक्षाभ्यामिति**। तथा चोभाभ्यां सत्प्रतिपक्षाभ्यां प्रत्येकं स्वसाध्यानुमितिः संशयरूपा पूर्वं जन्यते, तथा वह्निमान् वह्न्यभाववान् वेति संशयरूपानुमितिर्जन्यते। कुत इत्यत आह - **विरुद्धेति** मूलम्। विरुद्धोभयज्ञानसामग्र्योः स्थाणुत्वपुरुषत्वोभयज्ञानसामग्र्योः संशयजनकत्वस्य दृष्टत्वात्। एतावान् परं विशेषो यतस्तत्र विरुद्धोभयज्ञानसामग्री प्रत्यक्षरूपा प्रकृते तु आनुमानिकीति। तथा चोक्तरूपसंशयद्वाराऽस्य दूषकत्वं सिद्धम्, संशयजनकत्वमेव दूषकताबीजम्। अत्र शङ्कते - **न चेति**। अनुमितिस्तु संशयरूपैव न भवति।

यथा बाधोऽनुमितौ प्रतिबन्धकः [286 A] तथा साध्याभावसाधिका या सामग्री साऽप्यनुमितौ प्रतिबन्धिका, अतोऽनुमितिरेव न भवति। यदि विरोधिसामग्र्यां विद्यमानायामनुमितिर्जायते तदा बाधेऽप्यनुमितिः स्यादित्याशङ्कार्थः। दूषयति - **अधिकबले**ति। बाधेऽधिकबलवत्तयाऽनुमितिप्रति[बन्धो] भवतु नाम, सत्प्रतिपक्षे तु तुल्यबलतयोभाभ्यां हेतुभ्यां प्रत्येकमनुमितैः(तिः) संशयरूपा स्यादेवेति। अनुमितिप्रतिबन्धस्तु अधिकबलो(ले)-नैव क्रियते। **सामग्रीसत्त्वात्** इति। साध्या(ध्य)साध्याभावोभयरूपसामग्रीसत्त्वात् अनुमितिरुभयसाध्यविषयिणी स्यादेव। अत्र शङ्कते - **साध्याभावबोधस्ये**ति मूलम्। तथा च साध्याभावबोधस्यानुमितौ प्रतिबन्धकत्वं न तु तद्बोधकस्य चक्षुरादेः, तथा च निर्णायकत्वेन साध्यसाध्याभावनिर्णायकत्वेनावधारितं यत् विरुद्धव्याप्तिद्वयं तस्मात् संशयरूपा अनुमितिः कथं स्यादित्याशङ्कार्थः। समाधत्ते - **प्रत्येके**ति मूलम्। प्रत्येकात् साध्यव्याप्यात् वह्निव्याप्यात् साध्याभावव्याप्यात् वह्न्यभावव्याप्यात् च जायमानं यत् वह्नितदभावोभयज्ञानं तच्चार्थात् संशय एव, न तु प्रत्येकं ज्ञा(जा)यमानं ज्ञानं संशयः, किन्तु उभयसामग्रीसमावेशात् जायमानं समूहालम्बनवत् अर्थात् संशयः, न तु एकस्मात् संशयः, यथा वह्निवह्न्यभावोभयविषयकं तत्तत्सामग्रीसमाजात् जायमानं ज्ञानं संशयः। नीलघटपदार्थः समाजः, यथा नीलसामग्र्या नीलम्, घटश्च घटसामग्र्या, एतदुभयमार्थसमाजसिद्धं नीलघटो भवति उभाभ्यां सामग्रीभ्यां जायमानं ज्ञानं यथा। यथा घटपटोभयज्ञानं समूहालम्बनं तद्वत् अत्र उभाभ्यां सामग्रीभ्यां जायमानं वह्निवह्न्यभावज्ञानसामग्रीसमाजात् जायमानं वह्निवह्न्यभावोभयावगाहि यत् ज्ञानं स एव संशयः न तु एकस्मात् संशयः एतदुक्तं भवति। उभाभ्यां सामग्रीभ्यां मिलित्वा [साध्य]साध्याभावोभयावगाहिनी याऽनुमिति-(स्तद्)रूपमेकं यत् ज्ञानं जायते स एव संशयः, न त्वन्यः। तथा च सत्प्रतिपक्षे या संशयरूपा अनुमितिः सैव दूषकताबीजम्, निर्णयरूपानुमित्यजननमेव दूषकताबीजम्। दूषयति - **तन्ने**ति मूलम्। **साध्ये**ति मूलम्। यथा साध्यज्ञाने साध्याभावव्याप्यज्ञानं प्रतिबन्धकम्। कुतः ? साध्यसाध्याभावयोर्विरोधात्। तथा साध्यसाध्याभाव-व्याप्ययोः साध्याभावसाध्यव्याप्ययोरपि परस्परविरोधित्वात्। **तद्बुद्धे**रिति। साध्याभावव्याप्यबुद्धेः साध्यधी-प्रतिबन्धकत्वम्। एवं साध्यव्याप्यज्ञानस्य साध्याभावधीप्रतिबन्धकत्वम्। एवं च परस्परप्रतिबन्धात् संशयरूपं ज्ञानं न जायते एव, साध्यव्याप्यज्ञानसाध्याभावव्याप्यज्ञानयोः परस्परप्रतिबन्धकत्वात् उभयजन्यं ज्ञानं संशयरूपं न जायते एव। ननु साध्याभावज्ञानं साध्यज्ञाने प्रतिबन्धकं साध्याभावव्याप्यज्ञानं तु साध्यज्ञाने प्रतिबन्धकमेव न भवति ग्राह्याभावानवगाहित्वादित्यत आह - **विरोधिज्ञानत्वस्य चे**ति मूलम्। यथा ग्राह्याभावानवग्राहित्वेऽपि [286 B] विरोधिज्ञानत्वेन प्रतिबन्धकता, सा च साध्याभावावगाहिज्ञानवत् साध्य(ध्या)भावव्याप्यज्ञानस्यापि वर्तत इति साध्यज्ञाने साध्याभावव्याप्यज्ञानं प्रतिबन्धकं भवत्येव। तस्मान्न संशयरूपा अनुमिति(तिः)। फलितोऽर्थः।

अथ टीका। स्वपरसाधारणत्वादिति फक्किकां व्याचष्टे - **तथा चे**ति टीका। ततः किं सिद्धमित्यत आह- **तथा चे**ति टीका। अन्यस्य हेत्वाभासान्तरस्य यथाऽनुमितिप्रतिबन्धकत्वात् उद्भावनं तथा सत्प्रतिपक्षस्याप्यनुमितिप्रतिबन्धकत्वात् उद्भावनं न विरुद्धमिति भावः। प्रतिरुद्धत्वेति ग्रन्थस्य व्याख्यानम् - **विरोधी**ति। ननूभयविरोधिपरामर्शात् परस्परानुमितिप्रतिरोधे सति प्रतिरुद्धत्वज्ञानं जायते न तु प्रतिरुद्धत्वज्ञानात् प्रतिरुद्धत्वज्ञानमित्यतो व्याचष्टे - **विरोधी**ति टीका। विरोधिनौ यौ परामर्शौ उभयपरामर्शौ तयोर्विषयीभवत् यत् प्रतिसाधनज्ञानं प्रतिहेतुज्ञानं यथा वह्निव्याप्यधूमवत्त्वज्ञानं वह्न्यभावव्याप्यपाषाणवत्त्वज्ञानं [च] तदनन्तं व्याप्त्यादिभङ्गज्ञानं जायते, तदेव प्रतिरुद्धत्वज्ञानमित्यर्थः। एतद्व्याख्यानस्य बीजमुद्घाटयति - **प्रतिरुद्धत्वज्ञानस्ये**ति टीका। स्पष्टोऽर्थः। **उभयोरेकत्रे**ति व्याचष्टे। अत्र पूर्वपक्षिणा प्रथमत उक्तम् - साध्यसाध्याभावयोर्यथा विरोधस्तथा साध्यव्याप्यसाध्याभावव्याप्ययोरपि परस्परं विरोधस्तिष्ठति, तथा च साध्यसाध्याभावयोर्यथा एकत्र ज्ञानं न सम्भवति तद्वत् साध्यव्याप्यसाध्याभावव्याप्ययोरप्येकत्र ज्ञानं न सम्भवतीति नायं सत्प्रतिपक्षः इत्येकं दूषणम्, द्वितीयं तु भवतु वा निश्चयः तथापि तत्र व्याप्त्यादिभङ्ग आवश्यक इति व्याप्यत्वासिद्धिरेवेति। तत्र मूलकृता द्वितीयदूषणस्यैव उद्धारः कृतो न तु प्रथमदूषणस्येति। तत्र प्रथमदूषणं शङ्कते - **नन्वि**ति। तथा च विरोधात् साध्यव्याप्यसाध्याभावव्याप्ययोः परस्परविरोधात् एकत्र निश्चय एव न सम्भवतीति कथं सत्प्रतिपक्ष इत्याशङ्कार्थः। समाधत्ते - **हेत्वोरि**ति टीका। यदा परस्परं हेतो(त्वो)र्विरोधस्य परिस्फूर्तिरेव न जाता साध्यसाध्याभावयोर्विरोधश्च स्फुरितः तद्व्याप्ययोर्विरोधो न स्फुरितः तदानीमुभयहेत्वोर्ज्ञाने सति तत्र साध्यसाध्याभावनिरूपितव्याप्तिज्ञानसम्भवे उभयपरामर्शसम्भवात् सत्प्रतिपक्षः सम्भवत्येव। ननु साध्य[साध्याभाव]योर्विरोधस्फूर्तौ हेत्वोर्विरोधोऽवश्यं परिस्फुरत्येवेत्यत आह - **न ही**ति। न हि साध्य[साध्याभाव]विरोध एव हेत्वोर्विरोधः, तथा च साध्य[साध्याभाव]विरोधे ज्ञातेऽपि भिन्नसामग्रीकत्वात् [साध्य]साध्याभावसाधकहेत्वोर्विरोधज्ञानं न सम्भवत्येव। समाधानान्तरमाह - **उभये**ति टीका। तथा चोभयपरामर्शानन्तरं साध्यसाध्याभावयोर्विरोधप्रतिसन्धानं जातं पूर्वं न जातं तदा सत्प्रतिपक्षावतार इत्यर्थः। सत्प्रतिपक्षस्थापनान्तरमाह - **किञ्चे**ति टीका। इयं फक्किका पुस्तकान्तरे दृष्ट्वा व्याख्येया। उत्तरग्रन्थयोजनार्थमाभासं ददाति - **नन्वि**ति। सद्धेतुर्धूमरूपः कथं सत्प्रतिपक्षः ?, हेत्वाभासताप्रयोजकस्य [287 A] व्याप्त्यादिविरहस्य तत्राभावात्। तथा च यदि व्याप्त्यादिविरहाभावेऽपि सत्प्रतिपक्षत्वं स्यात् तदा सर्वदा धूमः सत्प्रतिपक्षितः स्यादित्याभासार्थः। दूषकताबीजं व्याचष्टे - हेत्वाभासताप्रयोजकं दूषकताबीजं येन कृत्वा हेतोर्हेत्वाभासत्वं भवतीत्यर्थः। **अयमि**ति। हेतुः विरोधिपरामर्शविषयीभवन् अयं धूमरूपो हेतुर्न निर्णयं जनयति, यथा वह्निवह्न्यभावव्याप्यधूमपाषाणवान् अयमिति विरोधिपरामर्शविषयीभवन् अयं हेतुर्न निर्णयजनक इत्यर्थः। तथा च निर्णयाजनकत्वात् सद्धेतोरपि हेत्वाभासत्वं न तु व्याप्त्याद्यभावात्, तथा च

धूमरूपसद्धेतोरपि सत्प्रतिपक्षत्वमित्यर्थः । **अत एवेति** टीका । यतो विरोधिपरामर्शः कादाचित्कोऽत एव न सर्वदा हेत्वाभासत्वमित्यर्थः । ननु हेतोर्निर्णयाजनकत्वज्ञानं नानुमितिप्रतिबन्धकं तद्दूषकताबीजं कथं स्यादित्यत आह - **न त्विति** टीका । वस्तुगत्या निर्णयाजनकत्वं दूषकताबीजं न त्वनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकं व्यभिचारादिवत् । कुत इत्यत आह - **निर्णयाजनकत्वस्येति** टीका । यथा व्यभिचारज्ञानेनानुमितिप्रतिबन्धः क्रियते तत्रानुमित्यजनकत्वज्ञानं न प्रतिबन्धकं किन्तु व्यभिचारादिज्ञानमेव, तद्वत् अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वं च प्रतिहेतुद्वयमेव । ननु अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकं प्रतिहेतुद्वयं तथा च एकस्य हेतोरपरत्र हेतावभावात् तद्वत्त्वं हेत्वाभासलक्षणं कथं स्यादित्यत आह - **तद्वत्त्वं चेति** टीका । तथैवानुमितिलक्षणे उक्तम् - **अन्यतरेति** टीका । तथा च येन कृत्वा व्याप्त्यादिभङ्गज्ञानमन्यतरस्मिन् भवति तत्र चोपजीव्यं यत् विरोधिव्याप्त्यादिकं तदेव दूषकताबीजं न तु व्याप्त्यादिभङ्गज्ञानमिति सम्पूर्णप्रघट्टकार्थः । बोध्यमिति ग्रन्थपर्यन्तम् । चक्षुषादेश्चेत्युत्तरग्रन्थं योजयति - **नन्विति** । तथा च चक्षुरादौ लिङ्गत्वाभावात् उभयोर्लक्षणयोरव्याप्तिरित्याशङ्कार्थः । ननु चक्षुरादेश्च यदि न सत्प्रतिपक्षत्वं तदाऽयं घटज्ञानवान् चक्षुर्व(ष्म)त्त्वात् इत्यत्र चक्षुषः सत्प्रतिपक्षत्वं न स्यात् इत्यत आह - **तस्येति** टीका । चक्षुरिन्द्रियं यदि सत्प्रतिपक्षस्तदा व्याप्तिपुरस्कारेणैव यथा यत्र चक्षुस्तत्र चाक्षुषज्ञानमिति व्याप्तिपुरस्कारेण सत्प्रतिपक्षत्वं भवति । ननु शब्दे व्याप्तिपक्षधर्मताऽभावात् समानबलत्वं नास्ति, तदभावात् कथं मूलकृतोक्तं शब्दे समानबलत्वे प्रतिरोध एवेत्यत आह - **व्याप्त्यादीति** टीका । तथा चात्र व्याप्त्यादिरूपबलमभिप्रेत्यैतन्नोक्तं किन्तु व्याप्त्याद्यतिरिक्ताकाङ्क्षायोग्यतादिकं बलम् । **अधिकबलेति** टीका । शब्दस्याधिकबलत्वं चेज्ज्ञातं तदाऽनुमानस्यैव बाधेऽनुमानं व्यर्थमित्यर्थः [287 B] । **तादृशेति** टीका । व्याप्तिपक्षधर्मतारूपं बलमित्यर्थः । ननु व्याप्तिपक्षधर्मतारूपबलाभावेऽपि अप्रामाण्यशङ्काशून्यं वादिवाक्यजन्यं ज्ञानं तज्जनकत्वात् शब्दस्येति स्वयमेव शब्दो बलवान् कथं तस्य व्याप्तिपक्षधर्मतारूपबलान्तरस्यापेक्षेत्यत आह - **प्रतिवादिवाक्यस्येति** टीका । प्रतिवादिवाक्यजन्यं तु ज्ञानमप्रामाण्यशङ्काकवलितमिति न तुल्यबलमिति भावः । प्रत्यक्षादिरिति ग्रन्थं योजयति - **नन्विति** । सत्प्रतिपक्षे यदि सर्वत्र व्याप्तिपक्षधर्मतारूपं बलं विवक्षितं तदा प्रत्यक्षस्य वादे उपन्यासो न स्यात् इत्याभासार्थः । **प्रत्यक्षादिति** टीका । तथा च वादकथायां यः प्रत्यक्षादेरुपन्यासः स लिङ्गभावेनैव, यथा केनचिदनुमानं कृतं भूतलं घटाभाववत् घटवत्तयाऽनुपलभ्यमानत्वात् इत्यनु[माने] वादिना कृते प्रतिवादी वदति भूतलं घटवत् घटवत्त्वप्रकारकप्रत्यक्षात् इति लिङ्गविधया प्रत्यक्षस्योपन्यासः न तु प्रत्यक्षस्यालिङ्गभावेनोपन्यासोऽस्ति । **परप्रमामिति** टीका । यस्मिन् प्रमाणे उपन्यस्ते परस्य प्रमा जायते तदेव प्रमाणमुपन्यसनीयम्, तत् प्रमाणं शब्दो वाऽनुमानं वा, न च प्रत्यक्षं परप्रमाणजनकं भवतीति प्रत्यक्षं स्वरूपेण न निरूपणीयम् । ननु प्रत्यक्षस्य परप्रमाजनकत्वाभावात्

सत्प्रतिपक्षत्वं तदा मास्तु प्रत्यक्षस्य, शब्दस्य तु कुतो न भवति सत्प्रतिपक्षत्वं तस्य तु परप्रमाजनकत्वमस्तीत्यत आह - **शब्दस्य तथात्वेऽपी**ति टीका। परप्रमाजनकत्वेऽपीत्यर्थः। तथा च शब्दस्य परप्रमाजनकत्वेऽपि वादि-वाक्यजन्यज्ञानस्याप्रामाण्यशङ्काकवलितत्वेन तज्ज्ञानजनकः शब्दो न तुल्यबलतया सत्प्रतिपक्ष इत्यर्थः[१]। **प्रत्येकमि**ति टीका। तथा च सत्प्रतिपक्षत्वं प्रत्येके वर्तते साध्यतदभावसाधकयोः, असाधारण्यं तु प्रत्येके नास्ति किन्तु समुदितेऽस्ति, समुदिते तु सत्प्रतिपक्षत्वं नास्ति, तथा च यत्रासाधारण्यं तत्र सत्प्रतिपक्षत्वं नास्ति यत्र च सत्प्रतिपक्षत्वं तत्रासाधारण्यं नास्तीति असाधारणविधया सत्प्रतिपक्षस्य दूषकत्वं नास्तीत्यर्थः। **रत्नकोष-कार**मतं दूषयितुमाह - **साध्यतदभावयो**रिति। मूलं व्याचष्टे - **साध्ये**ति। यथा साध्यज्ञानस्य साध्याभावज्ञाने प्रतिबन्धकत्वम् अथ च साध्याभावज्ञानस्य साध्यज्ञाने प्रतिबन्धकत्वं तद्वत् [साध्यव्याप्यज्ञानमपि साध्याभाव-ज्ञानप्रतिबन्धकम् अथ च] साध्याभावव्याप्यज्ञानमपि साध्यज्ञानप्रतिबन्धकम्। तथा चानयोः परस्परप्रतिबन्ध-कत्वात् परस्परप्रतिबन्धकत्वस्य विद्यमानत्वात् न साध्यसाध्याभावविषयिणी संशयरूपा अनुमितिरिति मूलार्थः। ननु साध्यज्ञाने साध्याभावज्ञानं यत् बाधज्ञानं तत् प्रतिबन्धकमेव [न भवति] यथा शङ्खो न श्वेतः किन्तु पीत इति चाक्षुषज्ञाने भ्रमरूपे विद्यमानेऽपि शङ्खः श्वेत इति अनमितेरुदयात् शङ्खः श्वेतः शङ्खत्वात् इत्यनुमानात्। ततः साध्याभावज्ञानं [288 A] साध्यज्ञाने प्रतिबन्धकमेव न भवति किन्तु साध्याभावज्ञाने यः प्रमात्वग्रहः स एव साध्यज्ञाने प्रतिबन्धकः। तथा च शङ्खः पीत इति ज्ञानं साध्यम्, श्वेतज्ञानं तस्याभावज्ञाने पीतज्ञाने प्रमात्वग्रहाभावात् पीतज्ञानं श्वेतज्ञाने प्रतिबन्धकं न भवतीति साध्याभावज्ञानं प्रतिबन्धकमेव न भवति इत्यत आह - साध्याभाव एव बाधो न तु साध्याभावप्रमा। ननु साध्याभावज्ञानस्य प्रतिबन्धकत्वमेव नास्ति पूर्वोक्तदोषात् इत्यत आह - **अप्रामाण्यशङ्के**ति टीका। तथा चाप्रामाण्यशङ्काशून्यं साध्याभावज्ञानं प्रतिबन्धकम्, तेन यत् पीतज्ञानं तत् अप्रामाण्यशङ्काशून्यं न भवतीति कृत्वा तन्न प्रतिबन्धकम्। तथा च **चिन्तामणिकार**मते साध्याभावप्रमा बाधः, **प्राचीनानां मते** अप्रामाण्यशङ्काशून्यं साध्याभावज्ञानं बाधः। न च प्रमात्वमप्रामाण्यशङ्काशून्यत्वं चैकमिति वाच्यम्, प्रमात्वग्रहो भावरूपोऽप्रामाण्यशङ्काशून्यत्वमभावघटितमिति भेदः। तथा च यथाऽप्रामाण्यशङ्काशून्यं साध्याभावज्ञानं बाधस्तथा साध्याभावव्याप्यज्ञानमपि प्रतिबन्धकमित्यर्थः। अत्राशङ्कते - **नन्वि**ति टीका। **रत्नकोषकारः** शङ्कते - **विरुद्धनिश्चये**ति। यथा स्थाणुत्वपुरुषत्वनिश्चियसामग्र्याः प्रत्यक्षस्थले संशयजनकत्वं तद्वत् अत्रापि साध्यज्ञानसामग्रीसाध्याभावज्ञानसामग्र्योरवश्यं संशयजनकत्वकल्पनात् तत्संशयरूपानुमितिर्जन्यत एव। सिद्धान्ती शङ्कते - **न चे**ति टीका। विशेषादर्शनसहिता या निश्चयसामग्री सा एव संशयजनिका, प्रकृते तु विशेषदर्शनं साध्यव्याप्यज्ञानं साध्याभावव्याप्यज्ञानं चास्तीति न तत्र संशयरूपानुमितिजनकत्वमित्याशङ्कार्थः।

१. शब्दस्तुल्यबलाभावात् न सत्प्रतिपक्ष इत्यर्थः इत्याशयः। प्रतौ टिप्पणी।

इदं दूषयति - **एकमात्रे**ति टीका। यत्रैकमात्रकोटिकविशेषदर्शनं तत्रैव संशयो न भवति, यत्र चोभयकोटिविशेषदर्शनं तत्रावश्यं संशयजनकत्वमेव। तत उभयकोटिकविशेषदर्शने विद्यमानेऽपि संशयो भवत्येव। स्वमते उपष्टम्भकमाह - **अन्यथे**ति टीका। यदि उभयकोटिविशेषदर्शनं संशयजनकं न भवति तदा स्थाण्वादावुभयकोटिविशेषदर्शने विद्यमाने संशयो न स्यादित्यर्थः। अत्र शङ्कते - **नन्वि**ति। विरुद्धा या प्रत्यक्षसामग्री यथा स्थाणुत्वव्याप्यवक्रकोटरादिमान् अयमिति रूपा पुरुषत्वव्याप्यकरादिमान् अयमिति रूपा वा(या) प्रत्यक्षा सामग्री तस्या एव संशयजनकत्वम्। ननु सामग्र्यां प्रत्यक्षत्वविशेषणं गौरवग्रस्तमित्यत आह - **अन्यच्चे**ति टीका। विरुद्धस्मृतिसामग्रीतः संशयरूपानुमित्यापत्तेः, यथा घटसंस्कार उद्बुद्धः घटाभावविषयकः संस्कारोऽप्युद्बुद्धः इति विरुद्धस्मृतिसामग्रीसत्त्वात् तत्रापि संशयारूपा स्मृतिः स्यात्। न [288 B] चेष्टापत्तिः, स्मृतेः संशयरूपत्वं कस्यापि मते नास्तीति भावः। दूषणान्तरमाह - **विरुद्धे**ति टीका। तथा च विरुद्धार्थकशब्दस्थले शाब्दः संशयः स्यात्, यथा एकेनोक्तम् शब्दो नित्यः अपरेणोक्तम् शब्दोऽनित्य इति शब्दश्रवणानन्तरं मध्यस्थस्य शाब्दोऽपि संशयः स्यात्। समाधत्ते -**एतन्मते** इति टीका। तथा चेष्टापत्तिः एतन्मते विरुद्धसामग्रीतः संशयोऽपि शाब्दो भवतु स्मृतिरपि संशयरूपा भवतु। अत्राशङ्कते - **नन्वि**ति टीका। यथा शाब्दः संशयः तथा संशयरूपा स्मृतिरप्यङ्गीक्रियते तदा संशयादपि स्थाणुत्वपुरुषत्वोभयविषयकात् संस्कारः स्यात्। स च न सम्भवति। सन्दिग्धार्थात् कुत्रापि संस्कारो नोत्पद्यते, संशयरूपज्ञानात् स्मरणं कुत्रापि नोत्पद्यते। ततः संशयस्य संस्कारजनकत्वं सर्ववादिनिषिद्धम्, तच्च **रत्नकोषकार**मते स्यात् यतस्तेन विरुद्धसामग्रीतः संशयोऽङ्गीक्रियते इत्याशङ्कार्थः। दूषयति - **एतावते**ति टीका। विरुद्धानुभवसामग्रीत्वेन संशयजनकत्वमस्तु न तु विरुद्धप्रत्यक्षसामग्रीत्वेन। तथा च विरुद्धानुभवसामग्री वर्तते सत्प्रतिपक्षस्थले इति कृत्वाऽत्रापि संशयरूपा अनुमितिः स्यादेव। अनुभवत्वापेक्षया प्रत्यक्षत्वस्य गौरवग्रस्तत्वात् न विरुद्धप्रत्यक्षसामग्रीत्वेन विरुद्धसामग्र्याः संशयजनकत्वम्। अत्र सिद्धान्ती आशङ्कते - **नन्वि**ति टीका। प्रत्यक्षे विषये यत् साध्याभावज्ञानं तत् साध्याभावप्रत्यक्षत्वेन प्रतिबन्धकं साध्यज्ञाने, अनुमितौ तु बाधः साध्याभावज्ञानत्वेनैव, तेन साध्याभावज्ञानस्य प्रतिबन्धकत्वं कल्प(ल्प्य)मानेऽभावप्रवेशं त्यक्त्वा साध्याधिकरणानधिकरणज्ञानत्वेन प्रतिबन्धकत्वसम्भवात् साध्याधिकरणानधिकरणज्ञानत्वं साध्याभावज्ञानेऽप्यस्ति इतिकृत्वा साध्याभावव्याप्यज्ञानमपि साध्यज्ञाने प्रतिबन्धकमस्तु। तथा च साध्याभावव्याप्यज्ञाने विद्यमाने साध्यसंशयरूपाऽनुमितिः कथं स्यात्? यतः साध्याभावव्याप्यज्ञानं तत्र प्रतिबन्धकमस्तीति संशयरूपाऽनुमितिः कथं स्यादित्याशङ्कार्थः। दूषयति - **जलह्रद** इति टीका। जलह्रदो वह्निमान् धूमात् इत्यत्र यदि साध्याधिकरणानधिकरणज्ञानत्वेन प्रतिबन्धकत्वं तदा जलह्रद इत्यत्र साध्यो वह्निः, तदधिकरणं महानसः, तदनधिकरणं ह्रदत्वम्, तज्ज्ञाने तस्य ज्ञाने विद्यमाने भ्रमरूपाप्यनुमितिर्न स्यात्। साध्याधिकरणा-

नधिकरणज्ञानत्वं ह्रदत्वज्ञानं वर्तत एवेति ह्रदेऽपि भ्रमरूपाप्यनुमितिर्न स्यात्। सा च वर्तते। एतदेव विवृणोति - **साध्याभावे**ति। उक्तार्थमत्राशङ्कते - **न चे**ति टीका। **न** हि वस्तुतः साध्याधिकरणानधिकरणं तद(द्)ज्ञानं प्रतिबन्धकं यतो वस्तुगत्या साध्याधिकरणानाधिकरणत्वज्ञाने ह्रदत्वज्ञानेऽपि भ्रमरूपाऽनुमितिर्जायते एव। किन्तु साध्याभावव्याप्यत्वज्ञानमेवानुमितिप्रतिबन्धकम्। ह्रदत्वं तु साध्याभावव्याप्यत्वेन ज्ञातमेव नास्ति, येन च न ज्ञातं तस्यैवानुमिति, येन च ज्ञातं [289 A] साध्य(ध्या)भावव्याप्यत्वेन तस्यानुमितिर्न भवति, सत्प्रतिपक्षे तु साध्याभावव्याप्यत्वज्ञानं वर्तते इति कृत्वा संशयरूपाऽनुमितिर्भवत्येवेत्यर्थः। दूषयति - **भवत्वि**ति टीका। तथा च साध्याभावव्याप्यज्ञानत्वेन प्रतिबन्धकत्वं कुत्रापि क्लृप्तं नास्ति। ततस्तेन रूपेण प्रतिबन्धकत्वं कुत्रापि क्लृप्तं नास्ति। यदि च साध्याभावव्याप्यज्ञानं प्रतिबन्धकं स्यात् तदा दूषणमाह - **किञ्चे**ति। यथा स्थाणुत्वाभावव्याप-(प्य)करादिमान् अयमिति ज्ञाने विद्यमाने आप्तेनोक्तम् अयं स्थाणुरेव तदा स्थाणुत्वज्ञानं न स्यात् स्थाणुत्वाभाव-व्याप्यज्ञानस्य प्रतिबन्धकस्य विद्यमानत्वात् साध्याभावव्याप्यज्ञानस्य विद्यमानत्वात्। न चेष्टापत्तिः साध्याभाव-व्याप्यज्ञाने विद्यमाने आप्तवाक्यात् साध्यज्ञानं न जायत एवेति न चेष्टापत्तिरित्यस्यार्थः। दूषयति - **योग्यते**ति टीका। आप्तवाक्ये आकाङ्क्षायोग्यतासत्तिज्ञानं चेत् वर्तते तदाऽवश्यं तस्माच्छाब्दज्ञानोत्पत्तिः, ततः साध्याभावव्याप्यज्ञानं प्रतिबन्धकमेव न भवति, ततः साध्यज्ञानं जायत एवेति संशयरूपाऽनुमितिर्भविष्यतीत्यर्थः। सिद्धान्ती शङ्कते - **नन्वि**ति टीका। प्रत्यक्षस्थले या स्थाणुत्वपुरुषत्वकोटिस्मृतिः सा कोटिस्मृतिर्न निश्चयत्वावच्छिन्ना सामग्री किन्तु सा ज्ञानमात्रस्यैव सामग्री कोटिस्मृतेः विशेषणज्ञानत्वेन कारणत्वात्। यतः स्थाणुर्वेति संशये विशेष्यः पुरोवर्ती अयम् इति रूपः तत्र स्थाणुत्वपुरुषत्वरूपकोट्योर्विशेषणीभूय भासमानत्वम्, तेन विशेषणज्ञानस्य विशिष्टज्ञानं प्रत्येव कारणत्वम्। तथा च सा ज्ञानमात्रस्य विशिष्टज्ञानमात्रस्यैव सामग्रीति कृत्वा सा यदा साध्याभावव्याप्य-ज्ञानादिकं प्रतिबन्धकं नास्ति तदा साध्यनिश्चयरूपं ज्ञानं जनयति यदि च तदस्ति तदा संशयरूपं स्थाणुर्वापुरुषो वेति ज्ञानं जनयति। तथा च सैव सामग्री कोटिस्मरणात्मिका यदा निश्चयं जनयति तदा निश्चयसामग्री यदा चान्यत् विरोधिज्ञानादिकं वर्तते तदा संशयमेव जनयति। ततः प्रकृते किमायातमित्यत आह - **व्याप्ति(प्य)दर्शनं त्वि**ति टीका। व्याप्यदर्शनं तु निश्चयसामग्री अवधारणात्मिका। पुरुषत्वव्याप(प्य)करादिदर्शनवत् वह्निव्याप्यधूमत्वज्ञानं निश्चयसामग्र्येव, सा न संशयजनिका। ततः सत्प्रतिपक्षस्थले संशयरूपाऽनुमितिर्न भवत्येवेत्याशङ्कार्थः। समा-धत्ते - **अवधारणात्मकमि**ति। तथा चावधारणात्मकत्वं निश्चयात्मकत्वं च। **गौरवात्** [इति]। अवधारणात्मकत्वे गौरवं निश्चयात्मकत्वे च व्यभिचारः। कथम्? यथा उभयव्याप्यदर्शनात् संशयस्य जायमानत्वात् न निश्चयत्वं कार्यतावच्छेदकं किन्तु व्याप्यदर्शनजन्यत्वं कार्यतावच्छेदकम्। व्याप्यदर्शनजन्यतावच्छेदकं तु अनुमितित्वमेव, तच्च संशयरूपायामप्यनुमितौ तिष्ठतीति। एतदेवाह - **अनुमितित्वं चे**ति टीका। अनुमितित्वं च संशयरूपाया-

मप्यनुमितौ तिष्ठतीति ताभ्यामुभयव्याप्यदर्शनाभ्यां जनिता [289 B] संशयरूपाऽनुमितिरेका कथं न भवेदिति। **रत्नकोषकार**मते कश्चिद् दूषणं ददाति - **यत् त्विति**। यदि साध्याभावव्याप्यवत्त्वबुद्धिः साध्यानुमितिं प्रतिबध्नाति [तदा] संशयरूपाऽनुमितिर्नास्तीत्यत्र साधकमाह - **अन्यथेति**। तथा च अथ शुक्ति(क्त)त्वव्याप्यशङ्खत्ववान् अयम् इति व्याप्यदर्शनं चेत् पीतत्वानुमितिप्रतिबन्धकं न, तदा तस्मिन् विद्यमानेऽपि तत्त्वानुमितिः स्यात्। तथा च साध्याव्यापकत्वे (साध्याभाव) व्याप्यज्ञानं चत(चेत्) आ(अ)नुमितिप्रतिबन्धकां(कं) मतिं(तर्हि) कथं संशयानुमितिरित्यत्र। अथ साध्याभावव्याप्यबुद्धेः प्रतिबन्धकत्वेऽनुभु(भ)वसिद्धदृष्टान्तमाह - **प्रत्यक्ष एवेति**। दूषयति - **शङ्ख इति**। पीतत्वाभावबुद्धिः(द्धेः) पीतत्वानुमितिप्रतिबन्धकत्वं कीदृशम् ? - पीतत्वव्याप्यपरामर्शदशायां तदभावदशायां वा ? नाद्य इत्याह - **संशयरूपापीति**। नान्त्य इत्याह - **तदेति** साध्यतदभावनिश्चयः। अथ मूले **रत्नकोषकारा**भिप्रायो यथा - सत्प्रतिपक्षस्थले साध्यव्याप्यपरामर्शः साध्याभावव्याप्यपरामर्शश्च भवति। ताभ्यामुभयसामग्रीभ्यां जायमानं ज्ञानमुभयानुमितिसंशयरूपं भवति, यथा शब्दोऽनित्यत्वव्याप्यकृतकत्ववान् नित्यत्व(व्याप्य) श्रोत्रग्राह्यत्ववान् अयम् इत्युभयपरामर्शाभ्यां शब्दे नित्यत्वानित्यत्वोभयरूपाऽनुमितिर्जायमानाऽर्थात् संशय एव। ननु प्रत्येकं संशयः यथा एकस्मादुभयदर्शना[त्] स्थाणुर्वा पुरुषो वेति संशयः तथा प्रकृते नेत्यर्थः। दूषयति - **तन्नेति**। अत्र साध्येत्यारभ्य तन्त्रत्वादिति पर्यन्तम्। अयमर्थः - यथा साध्यज्ञानं साध्याभावज्ञाने प्रतिबन्धकम् साध्याभावज्ञानं वा साध्यज्ञाने प्रतिबन्धकम् तथा साध्यव्याप्यज्ञानमपि साध्याभावज्ञाने प्रतिबन्धकम् एवं साध्याभावव्याप्यज्ञानमपि साध्यज्ञाने प्रतिबन्धकमिति परस्परप्रतिबन्धकत्वात् नैकमपि ज्ञानमनुमितिरूपमिति कथमुभयानुमितिरूपः संशय इत्यर्थः। एतावता **रत्नकोषकार**मतं दूषितम्।[१]

**निबन्धे तु हेत्वाभासानां फलद्वारकं लक्षणम्। अनैकान्तिकानामन्वयात् व्यतिरेकात् वा कोट्युपस्थापकतया संशयः फलम्, विरुद्धस्य साध्यविपरीतस्य ज्ञानम्, अपक्षधर्मोऽपि विरुद्धोऽन्यत्र विपरीतज्ञानसमर्थ एव, बाधेऽन्यतोविपरीतज्ञानं न तु हेत्वभिमतादेः, घटो नित्यः कार्यत्वादिति विरुद्धे बाधसङ्करेऽप्यदोषः, असिद्धे अनैकान्तिकादिचतुष्टयज्ञानान्यालिङ्गत्वज्ञानम्, बाधे पक्षधर्महेतौ व्याप्तिबाधः। प्रकरणसमे तु न व्याप्तिपक्षधर्मताबाधः फलं नाप्यलिङ्गत्वज्ञानं व्याप्त्यादिबुद्धिसत्त्वात्, नापि विपरीतबुद्धिः स्वसाध्यविपरीतेनानियमात्, नापि संशयः प्रत्येकं कोटिद्वयानुपनयात्,**

---

१. अतः परं केवलं मूलव्याख्याऽस्ति किन्तु टीकाव्याख्या नास्ति।

**किन्तु 'कथमत्र तत्त्वनिर्णयः' इति जिज्ञासा फलम्, तथा च प्रकृतसाध्यहेत्वोः किं तत्त्वमिति जिज्ञासाजनिका व्याप्तिपक्षधर्मतोपस्थितिः प्रकरणसमः। न हि अनुपस्थिते प्रतिपक्षे एकस्मात् जिज्ञासा किन्तु निर्णय एव। अथ ज्ञातुमिच्छा जिज्ञासा सा च ज्ञानेष्टसाधनताज्ञानात् संशयात् वेति कथं तेन विना विरोधिसाधनज्ञानमात्रादिति चेत्, न, असति प्रतिपक्षे न जिज्ञासा सति तु सा इति अन्वयव्यतिरेकाभ्यां प्रकरणसमस्यापि जिज्ञासाजनकत्वात्। न चानैकान्तिकातिव्याप्तिः, तत्र हि संशयद्वारा साध्ये जिज्ञासा अत्र तु हेतुसमीचीनत्वे इति।**

**निबन्धे त्विति**। **पञ्चाध्यायीमध्ये** प्रथमाध्याये टीकोपरि **निबन्धः उदयनाचार्य**कृतः। तत्र हेत्वाभासानां फलद्वारकं लक्षणं फलघटितम्। यथाऽनुमानस्य लक्षणमनुमितिर्यस्य फलं तदनुमानं तद्वत् सर्वेषां हेत्वाभासानां फलदारकं लक्षणम्। यथाऽनैकान्तिकस्य लक्षणम् अन्वयाद् वा व्यतिरेकाद् वा संशयः फलम्। यथा पर्वतो धूमवान् वह्नेः इत्यत्र वह्निहेतुर्धूमवत्यपि वर्तमानो धूमाभाववत्यपि वर्तमानः तथा च धूमवति वर्तमानो धूमं साधयति धूमाभाववति वर्तमानो धूमाभावं च साधयति। एवं शब्दो नित्यः शब्दत्वात् अत्र शब्दत्वं नित्या-दपि व्यावत्तम् अनित्यादपि व्यावृत्तम्, ततः शब्दत्वं नित्यत्वं वा साधयिष्यति अनित्यत्वं वा साधयिष्यति। असाधारणे उक्तरूपः संशयः फलम्। अनुपसंहारिणि [290 A] तु अनुपसंहारित्वज्ञानादेव साध्यसाध्या-भावविषयकः संशयः फलमित्यनैकान्तिके। विरुद्धस्य तु साध्यविपरीतनिश्चयः फलम्। तत्फलको विरुद्ध इति विरुद्धलक्षणम्। ननु घटोऽश्वो गोत्वात् इत्यत्र गोत्वस्य घटेऽपक्षधर्मत्वेन कथमश्वत्वाभावानुमानम्। तथा चापक्षधर्मे विरुद्धे साध्याभावानुमितिजनकत्वं लक्षणमव्याप्तमित्यत आह - **अपक्षधर्मे**ति मूलम्। तथा च न हि प्रकृतपक्षे साध्यनिपरीतानुमितिफलकत्वं विरुद्धत्वम्। तथा च गोत्वेन यद्यपि घटे अश्वत्वाभावानुमितिर्न क्रियते अपक्षधर्मत्वात् तथापि गोव्यक्तौ अश्वत्वाभावानुमितिः क्रियत एवेति विरुद्धस्य साध्यविपरीतनिश्चयरूपं फलम्। अथ **निबन्धकारो** बाधलक्षणमाह - **बाध** इति मूलम्। विरुद्धे तु तस्मादेव हेतोर्विपरीतज्ञानम्, बाधेऽन्यतो विपरीतज्ञानम्, यथा वह्निरनुष्णः कृतकत्वात् इत्यत्र कृतकत्वहेतुः, हेतुव्यतिरिक्तं यत् प्रत्यक्षं तेनानुष्णत्वाभाव उष्णत्वं तस्य ज्ञानं कृतम्, इति अन्यतो विपरीतज्ञानं बाधस्य फलम्। **निबन्धकारः** सत्प्रतिपक्षस्य फलमाह - **प्रकरणसमे**ति। सत्प्रतिपक्षे व्याप्तिपक्षधर्मताबाधः फलं न भवति, उभयोर्हेत्वोः व्याप्तिपक्षधर्मताज्ञाने विद्यमाने एव सत्प्रतिपक्षसम्भवात्। **नापी**ति। अलिङ्गत्वज्ञानमपि सत्प्रतिपक्षस्य फलं न

भवति। कुतो न भवतीत्याह - **व्याप्त्यादी**ति। अलिङ्गत्वज्ञानं तदैव भवति यदि व्याप्त्यादिबुद्धिर्न भवतीति भावः। **विपरीते**ति। साध्यभावबुद्धिरित्यर्थः। कुत इत्यत आह - **स्वसाध्ये**ति। तथा च साध्याभावानुमितिः सत्प्रतिपक्षे न सम्भवति, तथा च हेतुना साध्याभावानुमितिः कर्तव्या सत्प्रतिपक्षे सा न सम्भवति प्रथमहेतौ साध्यव्याप्यवत्तानुमितेर्विद्यमानत्वात्। स्वशब्देन प्रकृतहेतोः साध्यं यथा कृतकत्वस्या(स्य) हेतोरनित्यत्वं साध्यं तद्विपरीतेन तद्विपरीतसाधकेन हेतुनाऽनियमात् नियमेन साध्याभावानुमानासम्भवात् इत्यर्थः साध्य-व्याप्यवत्ताबुद्धेर्विद्यमानत्वादिति भावः। **नापी**ति। सत्प्रतिपक्षस्य संशयः फलमित्यपि न। **प्रत्येक**मिति। यथा उच्चत्वज्ञानेनोभयकोट्युपस्थापनात् संशयः क्रियते तथा एकेन पूर्वेण अग्रिमेण वा हेतुना कोटिद्वयं नोपस्थाप्यते यथा एकस्य साध्योपस्थापनसामर्थ्यं द्वितीयस्य साध्याभावोपस्थापनसामर्थ्यमिति संशयो न फलमिति भावः। तर्हि सत्प्रतिपक्षस्य किं फलमित्यत आह - **जिज्ञासा फल**मिति। जिज्ञासा यथा कथमत्र तत्त्वनिर्णयः। उभयोर्हेत्वोर्मध्ये किं तत्त्वमिति जिज्ञासा सत्प्रतिपक्षस्य फलमित्यर्थः। ततः सत्प्रतिपक्षस्य किं लक्षणमित्यत आह - **तथा चे**ति। जिज्ञासाजनिका या व्याप्तिपक्षधर्मतोपस्थितिस्तज्जनके यो हेतुः स प्रकरणसमः। जिज्ञासास्वरूपमाह - **प्रकृते**ति। प्रकृते ये साध्ये तयोर्यौ हेतू तयोर्हेत्वोः किं तत्त्वमिति जिज्ञासा। यथा कृतकत्वशब्दत्वयोर्मध्ये किं तत्त्वमिति जिज्ञासा सा एव फलम्। इदं लक्षणं [290 B] सद्धेतौ नातिव्याप्तमित्याह - **न ही**ति। यदा द्वितीयो विरोधी हेतुर्नोपस्थितस्तदा एकस्मा[त्] जिज्ञासा उक्तरूपा भवतीति न हि। यदा तु विरोधी नोपस्थिति(त)स्तदा एकस्मान्निर्णय एव भवतीति भावः। अत्राशङ्कते - **अथे**ति। **सा चे**ति। तथा च जिज्ञासा ज्ञानेष्टसाधनताज्ञानात्। यथा इदं श्लोकज्ञानं ममेष्टसाधनमिति ज्ञानात् श्लोके जिज्ञासा जायते तद्वत् प्रकृते ज्ञानेष्टसाधनताज्ञानादेव जिज्ञासा वक्तव्या न तु सत्प्रतिपक्षात्। **तेने**ति। इष्टसाधनताज्ञानेन संशयेन वा विना जिज्ञासा कथं स्यात् तथा च सत्प्रतिपक्षा[त्] जिज्ञासा न भवति, कथं तद्गर्भं लक्षणमित्याशङ्कार्थः। **असती**ति। तथा च यथा ज्ञानेष्टसाधनताज्ञानात् जिज्ञासा जायते संशयाद् वा जायते तद्वत् सत्प्रतिपक्षस्थले सत्प्रतिपक्षा[त्] जिज्ञासा जायते अनुभवसिद्धान्वयव्यतिरेकयोर्नियामकत्वा-दित्यर्थः। शङ्कते - **न चे**ति। अनैकान्तिकेऽपि जिज्ञासा जायते इति अनैकान्तिकेऽतिव्याप्तिः। समाधत्ते - **तत्र ही**ति। तथा चानैकान्तिकात् आदौ अन्वयात् व्यतिरेकाद् वा संशयः तद्द्वारा जिज्ञासा जायते। यथा धूमवान् वह्नि(ह्ने)रिति साधारणस्य धूमवति धूमाभाववत्यपि विद्यमानत्वात् धूमसंशयजनकत्वमेवमसाधारण-स्थले उभयव्यावृत्तत्वात् संशयजनकत्वं संशयद्वारा च जिज्ञासाजनकत्वम्। **अत्रे**ति। सत्प्रतिपक्षे संशय-द्वारा न जिज्ञासा किन्तु हेतुसमीचीनत्वज्ञानद्वारा इति ततो भेदः। इति निबन्धस्थं फलद्वारकं हेत्वाभासानां लक्षणं निरूपितम्।

**ननु परामर्शयोरेकदा अनुत्पादात् कथं प्रतिरोधः ? क्रमोत्पन्नयोरेकदा सत्त्वादिति चेत्, न, एकानन्तरमपरहेतुव्याप्तिपक्षधर्मताज्ञानाभ्यामग्रिमव्याप्तिविशिष्टज्ञानोत्पत्तिकाले पूर्वपरामर्शनाशात् । न चोभयहेतुव्याप्तिपक्षधर्मताज्ञानानां परस्पराप्रतिबन्धात् परामर्शोत्पाद इति वाच्यम्, व्याप्त्यादिज्ञानचतुष्टयस्य यौगपद्याभावात् ।**

सत्प्रतिपक्षे शङ्कते - **नन्विति** । यदा कृतकत्वे व्याप्तिपक्षधर्मताज्ञानानन्तरं शब्दत्वे व्याप्तिज्ञानम्, तदनन्तरं पक्षधर्मताज्ञानं च, तथा च शब्दत्वे हेतौ पक्षधर्मताज्ञानकाले कृतकत्वे व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य विनष्टत्वात् कथं सत्प्रतिपक्षावतारो नष्टस्य प्रतिरोधाभावात् इत्याशङ्कार्थः । मध्ये शङ्कते - **क्रमेति** मूलम् । यथा एकघटज्ञानोत्तरं पटज्ञानकाले घटज्ञानमपि वर्तते पटज्ञानमपि वर्तते । तथा च क्रमोत्पन्नयोरपि घटपटज्ञानयोरेकदा सत्त्वं तद्वत् उभयोः क्रमोत्पन्नयोः परामर्शयोरेकदा सत्त्वं स्यादेवेति कथं सत्प्रतिपक्षता नेत्याशङ्कार्थः । **एकेति** । तथा चादौ कृतकत्वे व्याप्तिज्ञानम्, तदनन्तरं कृतकत्वे एव पक्षधर्मताज्ञानम्, तथा च कृतकत्वे यत् व्याप्तिज्ञानं तत् पक्षधर्मताज्ञानेन स्वस्थितिक्षणे विनाश्यते । एवं शब्दत्वे व्याप्तिज्ञानेन कृतकत्वनिष्ठं पक्षधर्मताज्ञानं विनाश्यते । एवं शब्दत्वनिष्ठपक्षधर्मताज्ञानेन शब्दत्वनिष्ठं व्याप्तिज्ञानं नाश्यते । इति उत्तरोत्तरविशिष्टज्ञानोत्पत्तिकाले पूर्वपूर्वज्ञानानां विनाशात् एकपरामर्शोत्पत्त्यनन्तरमपरपरामर्शोत्पत्तिकाले पूर्वपरामर्शस्य विनाशान्न सत्प्रतिपक्षावतार इत्याशङ्कार्थः । आशयमविद्वान् शङ्कते - **न चेति** । तथा च साध्यसाध्याभावज्ञानयोर्विरोधो वर्तते इति कृत्वा [291 A] तयोरेकदाऽनुत्पादः तन्निश्चयसामग्र्योः परस्परप्रतिबन्धकत्वात् । प्रकृते उभयहेतुव्याप्तिपक्षधर्मताज्ञानानां परस्परप्रतिबन्धकत्वाभावात् उभयव्याप्तिपक्षधर्मताज्ञानरूपयोः परामर्शयोरेकदा सत्त्वं स्यादेवेति शङ्कार्थः । आशयमविद्वान् दूषयति - **व्याप्त्यादीति** । तथा चादौ एकस्मिन् हेतौ व्याप्तिज्ञानम्, तदनन्तरं तत्र पक्षधर्मताज्ञानम्, तदनन्तरं द्वितीयहेतौ प्रथमं व्याप्तिज्ञानम्, तदनन्तरं तत्र पक्षधर्मताज्ञानमिति यत् ज्ञानचतुष्टयं तत् एकदा न सम्भवति । ततः कथं तयोः सत्प्रतिपक्षावतारः एकस्य नष्टत्वात् ।

**यत्तु व्याप्तिद्वयसंस्कारोद्बोधकहेतुद्वयज्ञानयोः परस्परप्रतिबन्धात् नोभयव्याप्तिस्मृतिरिति दूषकताबीजमिति । तन्न, व्याप्तिस्मृतिं विना सत्प्रतिपक्षाभावात् वादिभ्यां व्याप्त्युद्भावनाच्चेति । मैवम् । हेतुद्वयसमूहालम्बनात् युगपदुभयव्याप्तिस्मृतौ उभयपरामर्शरूपं ज्ञानमुत्पद्यते ।**

अत्र मतान्तरसमाधानमाशङ्क्य दूषयितुमाह - **यत् त्विति** । तथा च एतन्मतहार्दं यथा पूर्वं कृतकत्वे

व्याप्तिज्ञानम्, तदनन्तरं कृतकत्वे पक्षधर्मताज्ञानम्, तदनन्तरं शब्दत्वे व्याप्तिपक्षधर्मताज्ञानम्, तदनन्तरमुभाभ्यामनुभवाभ्यामुभौ संस्कारौ उत्पादितौ, ताभ्यां च संस्काराभ्यां परस्परप्रतिबन्धात् नोभयव्याप्तिस्मृतिरित्येव सत्प्रतिपक्षे दूषकताबीजम् । इदं मतं दूषयति - **तन्नेति** । यदि उभयसंस्काराभ्यां परस्परप्रतिबन्धात् उभयस्मृतिर्नास्ति तदा सत्प्रतिपक्षावतार एव कथं स्यात्, उभयव्याप्तिज्ञाने एव सत्प्रतिपक्षावतारः । यदि च सत्प्रतिपक्षे व्याप्तिस्मरणं नास्ति तदा परस्परं व्याप्तिभ्यां परस्परप्रतिरोधकहेत्वोर्यद्व्याप्त्यभावोपन्यासः क्रियते स न स्यात्, व्याप्तिज्ञानाभावात् व्याप्त्यभावज्ञानं कुतो भवति ?, तथा च व्याप्तिस्मरणमवश्यमेषितव्यम् व्याप्तिस्मरणाभावोऽत्र दूषकताबीजं नेत्यर्थः । तथा च सत्प्रतिपक्षस्थले दूषकताबीजाभावान्न सत्प्रतिपक्षो हेत्वाभास इति पूर्वपक्षार्थः । **हेतुद्वयेति** । आदौ उभयोर्व्याप्त्योः स्मरणं जातं हेतुद्वयसमूहालम्बनपरामर्शात् तदनन्तरमुभयव्याप्तिस्मरणरूपे विशेषणज्ञाने जाते तदा चोभयव्याप्तिसमूहालम्बनस्मरणरूपविशेषणज्ञानेन वह्निवह्न्यभावव्याप्यवान् अयम् इति एकपरामर्शरूपं ज्ञानमुत्पद्यते समूहालम्बनरूपोभयपरामर्शसत्त्वात् इति ।

**अत एकदा विरुद्धकार्यद्वयकारणात् नैकमपि कार्यमुत्पद्यते, तादृशपरामर्शश्च स्वार्थानुमाने प्रत्यक्षादितः, परस्य तु वाद्युपन्यस्तन्यायोत्थापितप्रमाणावतारात् । अस्य च केवलान्वयिन्यपि सम्भवः, घटोऽभिधेयः प्रमेयत्वात् इत्यत्राभिधेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगिजात्यन्यत्वे सति घटमात्रवृत्त्यन्यधर्मत्वात् घटान्योन्याभाववत् पटरूपवच्च, घटनिष्ठात्यन्ताभावोऽभिधेयत्वप्रतियोगिकः घटवृत्तिनित्याभावत्वात् घटनिष्ठान्योन्याभाववदिति विशेषादर्शनदशायाम्, न च पक्षैक्यमपि तन्त्रम्, विरोधस्यैव दूषकत्वेऽधिकस्य व्यर्थत्वादिति ।**

उपसंहरति - **अत** इति । यत उभयसमूहालम्बनरूपपरामर्शो वर्ततेऽतो विरुद्धकार्यद्वयकारणात् एकमपि कार्यं न जायते इति सत्प्रतिपक्षो दूषणम् । स्वार्थानुमानपरार्थानुमानस्थले विषयव्यवस्थामाह - **तादृशेति** । तादृशं(शः) यत् वह्निवह्न्यभावव्याप्यवानयं पर्वत इति समूहालम्बनरूपः परामर्शः स्वार्थानुमानस्थले प्रत्यक्षात् यथा युगपदुभयपक्षधर्मेन्द्रियसन्निकर्षे सति उभयविशेषणज्ञाने सति चैत्रमैत्रौ दण्डिकुण्डलिनौ इति यत् साध्यसाध्याभावोभयव्याप्यवान् इति समूहालम्बनरूपपरामर्शः प्रत्यक्षाज्जायते । परार्थानुमाने विषयव्यवस्थामाह - **परस्येति** । तथा च परार्थानुमाने वाद्युपन्यस्तन्यायोत्थापितमेकं यत् प्रमाणम् द्वाभ्यां वादिभ्यां प्रत्येकमुपन्यस्तं यत् प्रमाणम् तस्मात् प्रमाणात् समूहालम्बनरूपः परामर्शो जायते इति शब्दप्रमाणात् परामर्शो जायते इति ।

ननु केवलान्वयिनि सत्प्रतिपक्षः कथं स्यात् [291 B] साध्याभावाप्रसिद्धेरित्यत आह - **घट** इति। सत्प्रतिपक्षमाह - **अभिधेयत्वमिति**। अभिधेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगिजात्यन्यत्वे सति घटमात्रवृत्त्यन्यधर्मत्वात्। अत्र सत्तायां व्यभिचारवारणाय जात्यन्यत्वे सतीति। कम्बुग्रीवत्वे व्यभिचारवारणाय घटमात्रवृत्त्यन्यधर्मत्वादिति। दृष्टान्तो घटान्योन्याभावो जात्यन्यो भवति घटमात्रवृत्त्यन्यधर्मश्च भवतीति घटनिष्ठात्यन्ताभावप्रतियोग्यपि भवति। न हि घटे घटान्योन्याभावः। अत्यन्ताभावपक्षकमनुमानमाह - **घटनिष्ठेत्यादि**। अभिधेयत्वं प्रतियोगि यस्य। घटनिष्ठान्योन्याभावव[दि]ति। तथा च यत्र यत्र घटनिष्ठात्यन्ताभावत्वं तत्र तत्र अभिधेयत्वप्रतियोगिकत्वम्, यथा घटनिष्ठाभिधेयत्वान्योन्याभावः। ननु अभिधेयत्वे घटनिष्ठात्यन्ताभावप्रतियोगित्वं नास्त्येव बाधात् द्वितीयस्याव्याप्यत्वात्। यथा यत्र घटनिष्ठात्यन्ताभावत्वं तत्राभिधेयत्वप्रतियोगित्वम् एवं नास्ति पटात्यन्ताभावे व्यभिचारादित्यत आह - **विशेषेति**। न हि वस्तुगत्या व्याप्तिपक्षधर्मतावत्त्वं व्याप्तिपक्षधर्मताप्रमा वाऽपेक्षिता किन्तु व्याप्तिपक्षधर्मतयोर्ज्ञानमात्रम्, तच्च विशेषादर्शनदशायां वर्तत एवेति सत्प्रतिपक्षो भवत्येवेति। **न चेति**। ननु हि एकस्मिन् पक्षे विरोधिहेतुद्वयोपस्थापने सत्प्रतिपक्षः। प्रकृते च पक्षैक्याभावात् कथं सत्प्रतिपक्षतेत्यत आह - **न च पक्षैक्यमिति**। तथा च सत्प्रतिपक्षे विरोध एव दूषकताबीजम्, न तु पक्षैक्यमपीति। समाप्तः सत्प्रतिपक्षग्रन्थः।

## । समाप्तं सत्प्रतिपक्षनिरूपणम् ।

## हेत्वाभासप्रकरणे असिद्धिः

**असिद्धिस्तु न व्याप्तिपक्षधर्मताविरहः, प्रत्येकमननुगमात्। अथ प्रत्येकाभावेऽनुगतो व्याप्तिपक्षधर्मताविशिष्टाभावोऽसिद्धिः, यद्यपि विशिष्टस्यान्यत्वे प्रत्येकाभावाव्याप्तिर-पसिद्धान्तश्च अनन्यत्वे प्रत्येकाभाव एव स इत्यननुगमः तथापि विशेषणावच्छिन्न-प्रतियोगिको विशेष्याभावो विशेषणविशेष्यसम्बन्धाभावो वा विशिष्टाभावोऽनुगत इति चेत्। न, विशिष्टाभावाज्ञानेऽपि व्याप्त्यादिप्रत्येकाभावज्ञाने उद्भावने चानुमिति-प्रतिबन्धो वादिनिवृत्तिश्चेति तत्प्रत्येकाभावाव्याप्तिः, अन्यथा तेषां हेत्वाभासान्तर-तापत्तेः।**

यथाक्रममसिद्धिमाह - **असिद्धिरिति**। तथा च व्याप्तिविरहो वाऽसिद्धिः पक्षधर्मताविरहो वाऽसिद्धिः। दूषयति - तथा च ह्रदो वह्निमान् धूमात् इत्यत्र स्वरूपासिद्धे व्याप्तिविरहो नास्ति तत्राव्याप्तिः स्यात्, पक्ष-धर्मताविरहश्च व्यर्थविशेषणे नीलधूमत्वादित्यत्र व्याप्यत्वासिद्धे नास्तीति परस्परमसत्त्वादननुगमः। अत्राशङ्कते-**अथेति**। यथा दण्डविशिष्टदेवदत्ताभावः तद्वत् व्याप्तिविशिष्टपक्षधर्मताभावो विशिष्टाभावोऽसिद्धिः। **यद्यपीति**। विशिष्टम् अतिरिक्तं वा प्रत्येकातिरिक्तं वा ? अतिरिक्तपक्षे विशिष्टाभाव एवासिद्धिर्जाता। प्रत्येकाभावो यः स्वरूपासिद्धो वा व्याप्यत्वासिद्धो वा तत्र तु लक्षणं न वर्तत एवेति। विशिष्टस्यातिरिक्तत्वे दूषणान्तरमाह - **अपसिद्धान्तश्चेति**। **न्यायमते** विशिष्टमतिरिक्तं नास्तीति भावः। अनतिरिक्तत्वे दूषणमाह - **अनन्यत्व** इति। यदि प्रत्येकाभाव एव विशिष्टाभावः पर्यवसन्नः तदा दूषणमाह - **अननुगम** इति। व्याप्त्यभावः पक्षधर्मताभावे नास्ति, पक्षधर्मताभावो व्याप्त्यभावे नास्तीति भावः। समाधत्ते - **तथापीति**। विशेषणावच्छिन्नप्रतियोगिक-विशेष्याभाव एव विशिष्टाभावः। **नवीनमतेनाह** - **विशेषणविशेष्येति**। तथा च प्रथमपक्षे दण्डावच्छिन्न-देवदत्ताभावो विशिष्टाभावः। द्वितीयपक्षे दण्डदेवदत्तोभयसम्बन्धाभावो विशिष्टाभावस्तव दि(इ)त्यर्थः। [292 A] तथा च यथा दण्डावच्छिन्नदेवदत्ताभावः तदुभयसम्बन्धाभावो वा। अयं विशिष्टाभावो विशेषणा-भावविशेष्या[भाव]तत्सम्बन्धाभावेषु त्रिष्वपि अनुगत इति न पूर्वोक्ताननुगमो दोषः इत्यर्थः। दूषयति - **विशिष्टेति**। तथा च एतादृशविशिष्टाभावज्ञानं नास्ति प्रत्येकाभावज्ञानं च वर्तते तदुद्भावनं वर्तते, तदानीं चानुमितिप्रतिबन्धो जायते इति कृत्वा [अ]भावरूपासिद्धावव्याप्तिः। न च यत्र प्रत्येकाभावस्तिष्ठति तत्रायं विशेषणावच्छिन्नविशेष्यप्रतियोगिकाभावत्वं तदुभयसम्बन्धप्रतियोगिकाभावो वा तिष्ठत्येवेति वाच्यम्। तथापि

विशेषणावच्छिन्नविशेष्यप्रतियोगिकाभावत्वं तदुभयसम्बन्धप्रतियोगिकाभावत्वं वा प्रत्येकाभावे नास्तीत्यव्याप्तिः। ननु प्रत्येकाभावो नासिद्धिरित्यत आह - **अन्यथेति**। **तेषामिति**। प्रत्येकाभावानां व्याप्त्यभावपक्षधर्मताभावतत्सम्बन्धाभावानां हेत्वाभासान्तरतापत्तिः तज्ज्ञानस्य प्रतिबन्धकत्वात्। [अन्]यथा यदि असिद्धिमध्येऽन्तर्भावो नास्ति तदा इत्यर्थः।

**न च विशिष्टाभावधीद्वारा प्रत्येकाभावो दोषो न तु स्वत इति वाच्यम्, प्रत्येकाभावस्य स्वत एव दोषत्वसम्भवात्। वस्तुतो विशिष्टाभावो दोष एव न, प्रत्येकस्य समर्थत्वे तेनैवान्यथासिद्धेर्व्यर्थविशेषणत्वात्।**

अत्राशङ्कते - **न चेति**। तथा च व्याप्त्यादिप्रत्येकाभावज्ञानस्य स्वतो दूषकत्वं नास्ति किन्तु तेन यदा विशिष्टाभावोत्थापनं क्रियते तदा एव दूषकत्वम्, तथा च विशिष्टाभावज्ञानद्वारैव दूषकत्वं न तु स्वातन्त्र्येणेति, हेत्वाभासान्तरतापत्ति(त्ते)रित्यर्थः। दूषयति - **प्रत्येकाभावस्येति**। तथा च प्रत्येकाभावः स्वत एव दूषणम्, न तु विशिष्टाभावज्ञापनद्वारा दूषकत्वमित्यर्थः। विपरीतमाह - **वस्तुत इति**। तथा च विशिष्टाभावो दूषणमेव न। यत्रापि विशिष्टाभावो दूषणं तत्रापि प्रत्येकाभाव एव दूषणं न तु विशिष्टाभावत्वेन। प्रत्येकाभावेनैव दूषकतायां विशिष्टाभावस्यान्यथासिद्धेः। **व्यर्थेति**। तथा च व्याप्त्यवच्छिन्नपक्षधर्मताभावो विशिष्टाभाव इत्यत्र लाघवात् व्याप्त्यभाव एव दूषणमस्तु, लाघवादधिकं व्यर्थमित्यर्थः।

**प्रत्येकाभावमज्ञात्वा न विशिष्टाभावज्ञानमित्युपजीव्यत्वात् विशिष्टाभावानुद्भावनेऽपि प्रत्येकोद्भावने वादिनिवृत्तेश्च। अत एव व्याप्तिपक्षधर्मताविशिष्टज्ञानविषयाभावत्वं प्रत्येकाभावानुगतमसिद्धत्वम्।**

दूषणान्तरमाह - **प्रत्येकाभावेति**। तथा च प्रत्येकाभावमज्ञात्वा न विशिष्टाभावज्ञानं जायते इति प्रत्येकाभावज्ञानमेव दूषणम्, न तु विशिष्टाभावज्ञानम्। प्रत्येकाभावस्य विशिष्टाभावज्ञाने उपजीव्यत्वात् दूषकत्वमित्यर्थः। दूषणान्तरमाह - **विशिष्टाभावानुद्भावनेति**। व्याप्त्यभावोद्भावने पक्षधर्मताऽभावोद्भावने चेति प्रत्येकाभावोद्भावने वादिनिवृत्तेर्जायमानत्वात् प्रत्येकाभाव एव दूषणं न विशिष्टाभाव इत्यर्थः। मतान्तरेणासिद्धिलक्षणं दूषयति - अत एवेति निरस्तमित्यनेनान्वयः। **व्याप्तीति**। त्रयाणामनुगमार्थमसिद्धलक्षणमाह-व्याप्तिपक्षधर्मतयोः यत् विशिष्टज्ञानं वह्निव्याप्यधूमवान् अयम् इति रूपं तद्विषयस्य योऽभाव(वः) [त]त्त्वम्, एतच्च व्याप्त्यभावादिषु त्रिष्वप्यनुगतं यतस्त्रयाणामपि व्याप्तिपक्षधर्मतापक्षतावच्छेदकानां त्रयाणां व्याप्तिपक्षधर्मताविशिष्टज्ञानविषयत्वात् तदभावत्वं त्रिष्वप्यभावेषु वर्तते इत्यनुगतं लक्षणम्।

**व्यभिचारादावसिद्धत्वेऽप्युपजीव्यत्वेन प्राथम्यात् तदुद्भावने वादिनिवृत्तेश्च स स्वत एव दूषकः। तत्र व्याप्त्यसिद्ध्यर्थमुपाधौ तूद्भाविते विप्रतिपद्यतेऽपि, तस्य दुरूहत्वात् व्यभिचारेणैव तदुन्नयनाच्च। यदि च व्यभिचारादिकमज्ञात्वाऽप्यसिद्धिबुद्धिः तथापि उपधेयसङ्करेऽप्युपाधेरसङ्कर एवेति निरस्तम्।**

नन्विदं लक्षणं व्यभिचारादावपि तिष्ठतीति व्यभिचारोऽप्यसिद्धेऽन्तर्भूतः स्यादित्यत आह - **व्यभिचारादावपीति**। तथा च [292 B] व्यभिचारादिकम् असिद्धौ उपजीव्यत्वात् पृथग् दूषणम्, ततोऽसिद्धे नान्तर्भूत इत्यर्थः। व्यभिचारस्य स्वतो दूषकत्वमप्याह - **तदुद्भावने** इति। यदाऽसिद्धो न ज्ञातो व्यभिचारमात्रमेव ज्ञातं तदापि तेनापि वादिनिवृत्ते स्वतो हेत्वाभासत्वं तस्य। अथ व्यभिचारस्य व्याप्त्याद्यसिद्धोपजीव्यतामाह - **तत्रेति**। यतो व्यभिचारेण तदुन्नयनात् असिद्ध्युन्नयनात् तथा चासिद्ध्युन्नयने व्यभिचारस्योपजीव्यत्वात् पृथग् दूषणत्वम्। व्यभिचारेण कथमसिद्ध्युन्नयनमित्यत आह - **व्याप्त्यसिद्ध्यर्थमिति**। तथा चोपाध्यभावो व्याप्तिः, तत उपाधिना व्याप्त्यभावानुमानं कर्तव्यम् यथाऽयमनो(नौ)पाधिकत्वरूपव्याप्त्यभाववान् सोपाधिकत्वात्। यद्यपि उपाध्यभावो व्याप्तिस्तदभाव उपाधिरेव तथा च हेतुसाध्ययोरविशेषात् कथमनुमानम् तथापि सोपाधिकत्वं हेतुरुपाध्यभावत्वं तु साध्यतावच्छेदकं तथा च घटत्वघटाभावाभावत्वयोरिव प्रकारभेदात् साध्यसाधनभाव इत्याहुः। तथा चोपाधिना यत्र व्याप्त्यभावानुमानं तत्र विप्रतिपद्यते। उपाधिना व्याप्त्यभावानुमानं सत् शीघ्रं न भवतीत्यर्थः। शीघ्रं कुतो न भवतीत्यत आह - **तस्येति**। तस्योपाधित्वस्य दुरूहत्वात् साध्यव्यापकत्वसाधनाव्यापकत्वरूपनानापदार्थज्ञानाधीनज्ञानत्वात् इति अस्याः(स्य) उपाध्यपेक्षया व्यभिचारस्य शीघ्रप्रातीतिकत्वात् व्यभिचारापेक्षयोपाधेर्विलम्बप्र(प्रा)तीतिकत्वात् इत्यर्थः। ननु व्यभिचारस्य न सर्वत्र व्याप्त्यभावज्ञानोपजीव्यत्वम्, तेन विनापि [१]व्याप्त्यभावज्ञानात् इत्यत आह - व्यभिचारज्ञानं विनापि स्वरूपासिद्ध्यादिज्ञानसम्भवात्। **यदि चेति**। तथा च व्यभिचारस्य व्याप्त्यभाव एवान्तर्भावोऽस्तु किं पृथग् हेत्वाभासत्वेन इत्यत आह - **तथापीति**। **तथापि उपधेयेति**। उपधेयशब्देन आश्रय एकस्तथाप्युपाधेर्दूषकताप्रयोजकस्य भेदात्, यथा एक एवात्मा कर्ता भवति कर्म भवति करणं च भवति। अत्रोपधेयं कर्तृकर्मकरणं चैकं तथापि कर्तृत्वकर्मत्वकरणत्वादयो ये उपाधयस्ते तु भिन्ना भिन्ना एवेत्यर्थः। तद्वत् यद्यपि असिद्धो व्यभिचारश्च एक एव तथापि उपाधेरसङ्कर एव। असिद्धत्वं दूषकताबीजं भिन्नं व्यभिचारत्वं च भिन्नमिति उपाधेरसङ्कर इत्यर्थः।

---

१. आप्तवाक्यादिना। प्रतौ टिप्पणी।

**व्यर्थविशेषणत्वादेव । एतेन व्याप्तिपक्षधर्मतान्यतराभावोऽसिद्धिरिति प्रत्युक्तम् अन्यतरत्वाज्ञानेऽपि प्रत्येकाभावस्य दोषत्वात् व्यर्थविशेषणत्वाच्च । यत् तु व्याप्तिपक्ष-धर्मताप्रमितिविरह आश्रयासिद्ध्याद्यनुगतोऽसिद्धिः, तत्प्रमितिसत्त्वे तत्रानुमितिप्रमि-त्यापत्तेरिति । तदपि व्यर्थविशेषणत्वात् तदज्ञानेऽपि प्रत्येकज्ञानस्य दोषत्वाच्च निरस्तम् ।**

इदं मतं दूषयति - **व्यर्थविशेषणत्वादिति** । व्याप्तिविशिष्टपक्षधर्मताज्ञानविषयत्वाभावापेक्षया लाघवात् व्याप्त्यभावो वा पक्षधर्मताऽभावो वा [उद्भावनीयः], विशिष्टाभावः किमथ(र्थ)मुद्भावनीयो गौरवात् । मतान्तरं दूषयति - **एतेनेति** । व्यर्थविशेषणत्वादेवेत्यर्थः । व्याप्तिपक्षधर्मताऽन्यतराभावोऽसिद्धिः । इदं दूषयति - **अन्यतरत्वेति** । अन्यतरत्वापेक्षया प्रत्येकाभाव एव दूषणमस्तु लाघवादित्यर्थः । मतान्तरं दूषयति - **यत् त्विति** । व्याप्तिपक्षधर्मतयोर्या प्रमितिस्तद्विरहोऽसिद्धिराश्रयासिद्ध्यनुगतस्तथा च यत्राश्रयासिद्धिः स्वरूपा-सिद्धिर्वा तत्र व्याप्तेर्वा पक्षधर्मताया वा प्रमितिविरहः । अत्रैव तर्कमाह - **तदिति** । व्याप्तेः [293 A] पक्ष-धर्मताया वा यदि आश्रयासिद्ध्यादौ प्रमितिस्तदाऽनुमित्यापत्तिः, ततस्तत्प्रमित्यभावात् लक्षणं सुस्थम् । दूषयति - **तदपीति** । **व्यर्थविशेषणेति** । तथा च विशिष्टाभावापेक्षया प्रत्येकाभाव एव लाघवात् दूषणमस्तु इत्यर्थः । तदेव विवृणोति - **तदज्ञानेऽपीति** । तदज्ञाने विशिष्टाभावाज्ञाने सत्यपि प्रत्येकज्ञानादप्यनुमिति-प्रतिबन्धात् प्रत्येकाभाव एव दूषणम् । व्यर्थविशेषणत्वादेवेदं निरस्तमित्यर्थः ।

**वस्तुतस्तु प्रकृतहेतुव्याप्तिपक्षधर्मतावैशिष्ट्यस्य तत्प्रमितेश्चाप्रसिद्ध्या तदभावो ज्ञातुमुद्भावयितुं चाशक्य एव । यत्किञ्चिद्व्याप्तिपक्षधर्मताविशिष्टप्रमितिविरहः सद्धेतु-साधारणः स्वप्रमितिविरहो यत्किञ्चित्प्रमितिविरहो वा सद्धेतावपि सकलतत्प्रमिति-विरहो दुर्निरूपः व्याप्त्यभावादेव तद्ग्रहे स एव दोष उपजीव्यत्वात् । यदि च प्रमिति-विरहः स्वरूपसन्नेव दोषः कारणाभावत्वात् तदा व्याप्त्यादिभ्रमादनुमितिर्न स्यात् न स्याच्च हेत्वाभासता ज्ञानगर्भतल्लक्षणाभावात् ।**

व्याप्तिपक्षधर्मताप्रमितिविरहश्चेत् असिद्धिस्तदा दूषणमाह - **वस्तुत** इति । तथा च प्रकृतपक्षकप्रकृतसाध्य-कप्रकृतहेतुकव्याप्तिपक्षधर्मताप्रमितिविरहोऽसिद्धिः यत्किञ्चित्पक्षकेत्यादि वा ? नाद्य इत्याह - **तदभाव** इति । तथा च ह्रदो वह्निमान् धूमात् इत्यत्र स्वरूपासिद्धे प्रकृतपक्षकप्रकृतहेतुकव्याप्तिपक्षधर्मताप्रमितिरप्रसिद्धा यतो ह्रदे धूमस्य पक्षधर्मताप्रमितिरप्रसिद्धा । द्वितीये त्वाह - **यत्किञ्चिदिति** । तथा च वह्निमान् धूमात्..... इत्यत्रा-

नित्यत्वनिरूपितकृतकत्वनिष्ठा या व्याप्तिपक्षधर्मताप्रमितिस्तदभावो वर्तत एवेति सोऽप्यसिद्धः स्यादित्यर्थः। ननु प्रकृतेति विशेषणं न देयं किन्तु स्वेत्यादिविशेषणं देयम्। स्वपक्षकेत्यादिकं विशेषणं देयमित्यत आह - **स्वेति**। तथा च स्वसाध्यकव्याप्तिपक्षधर्मताप्रमितिः स्वरूपासिद्धादावप्रसिद्धा। यत्किञ्चित्पक्षे आह - **सद्धेताविति**। ननु सकलव्याप्तिपक्षधर्मताप्रमितिविरह एवास्तु इत्यत आह - **सकलेति**। तथा च सकलप्रमितिविरहः केनापि ज्ञातुं न शक्यते इति तदाऽसिद्धिर्दूषणमेव न स्यात्, असिद्धेर्ज्ञातुमशक्य एवेति। दूषणान्तरमाह- **व्याप्त्यभावादिति**। तथा च विशिष्टाभावापेक्षया व्याप्त्यभावो वा पक्षधर्मताभावो वा उपजीव्यत्वात् दूषणमस्तु। दूषणान्तरमाह - **यदीति**। व्याप्तिपक्षधर्मताप्रमितिविरहः स्वरूपसत् वा दूषणं तस्य ज्ञानं नापेक्षितम्, अथवा ज्ञातो दूषणम्? प्रथमे आह - **कारणाभावत्वादिति**। व्याप्तिपक्षधर्मताज्ञानमनुमितिकारणम्, तदभावः कारणाभाव एव जातः, स च ज्ञातः प्रतिबन्धको न भवति किन्तु स्वरूपसन्नेव। ततः किमित्यत आह - **व्याप्त्यादीति**। व्याप्त्यादिभ्रमादनुमितिर्न स्यात्। यत्र वस्तुगत्या ह्रदो वह्निमान् धूमात् इत्यत्र व्याप्तिपक्षधर्मताविरहो वर्तते तत्र व्याप्त्यादिभ्रमात् ह्रदे याऽनुमितिर्जायते सा न स्यात्। यतस्तत्र व्याप्तिपक्षधर्मताप्रमितिविरहो वस्तुगत्या प्रतिबन्धको वर्ततेऽनुमितिर्न स्यात्। 'वस्तुतः' पदं भ्रमाज्जायते सा न स्यात्। दूषणान्तरमाह - **न स्याच्चेति**। यदि असिद्धिः स्वरूपसती अज्ञाता दूषणं तस्या(दा)ऽसिद्धो हेत्वाभासो न [293 B] स्यात्। यतः स एव हेत्वाभासो यस्य ज्ञानमनुमितिप्रतिबन्धकम्, स्वरूसतोऽसिद्धस्य प्रतिबन्धकत्वेन तज्ज्ञानस्य प्रतिबन्धकत्वाभावात्।

**एतेन व्याप्तिप्रमितिपक्षधर्मताप्रमितिविरहान्यतरत्वमसिद्धिः, अन्यतरत्वं च तदन्यान्यत्वम्, तेनोभयविरहेऽपि नाव्याप्तिरिति निरस्तम्। व्यर्थविशेषणादेव। स्यादेतत् व्याप्तिपक्षधर्मताभ्यां निश्चयः सिद्धिः तदभावोऽसिद्धिः, अत एवाव्याप्तेऽपक्षधर्मे च तदारोपरूपा सिद्धिरित्यनुमितिः न तु व्याप्तपक्षधर्मादपि तदनिश्चये।**

मतान्तरं दूषयति - **एतेनेति**। तथा च व्याप्तिप्रमितिः पक्षधर्मताप्रमितिश्च अनयोर्यो विरहो तदन्यतरत्वमसिद्धिः, तदभावश्च सिद्धिः, एतावता सिद्ध्यसिद्ध्योर्विवरणं कृतम्। **अत एवेति**। यत एव व्याप्तिपक्षधर्मता-[प्रमिति]विरहान्यतरत्वमसिद्धिरत एवेत्यर्थः। अत्र व्याप्तिपक्षधर्मताप्रमितिविरह इत्यत्र प्रमितिपदं निश्चयमात्रपरम्। तथा च व्याप्तिपक्षधर्मतोभयनिश्चयविरहान्यतरत्वमसिद्धत्वम्, तदभावः सिद्धिः, अत एव। यतस्तदभावः सिद्धिरत एवाव्याप्तेऽपक्षधर्मे च [आ]रोपरूपा व्याप्त्यारोपपक्षधर्मता[रोप]रूपा सिद्धिस्तिष्ठति असिद्ध्यभावरूपा सिद्धिस्तिष्ठति। अत एव तत्र तदनुमितिर्जायते। तथा च व्याप्तिपक्षधर्मतानिश्चयविरहान्यतरत्वम् असिद्धिः,

तथा सिद्धौ सत्यामनुमितिमुक्त्वा सिद्ध्यभावेऽनुमितिर्नास्तीति तत्र हेत्वाभासोऽसिद्धिरेवेत्याह - **न त्विति**। तथा च यत्र वस्तुगत्या व्याप्तिः पक्षधर्मता च वर्तते व्याप्तिपक्षधर्मतानिश्चयश्च नास्ति तत्र योऽनुमित्यभावः सो हेत्वाभासोऽसिद्धस्तदधीन एव व्याप्तिपक्षधर्मतानिश्चय[विरह]रूपाया असिद्धेर्विद्यमानत्वात्।

**न चैवं हेतोरप्याभासत्वं तदाभासस्यापि हेतुत्वं स्यात्। दशाविशेष इष्टत्वात्। सेयं स्वरूपसती दूषिका कारणाभावत्वात्। न च व्याप्त्यादिप्रत्येकनिश्चयाभाव एव दूषक आवश्यकत्वात् इति वाच्यम्। विशिष्टनिश्चयस्य हेतुत्वे तदभावस्य कार्यानुत्पादक-त्वादिति। मैवम्। एवं सव्यभिचारादेरप्यत्रैवान्तर्भावप्रसङ्गात्।**

अत्राशङ्कते - **न चेति**। तथा च यदि व्याप्तिपक्षधर्मतानिश्चयविरहोऽसिद्धिस्तदा सद्धेतौ यदा व्याप्ति-पक्षधर्मतानिश्चयो नास्ति तदा तस्य हेतोर्हेत्वाभासत्वं स्यात्। यदा हेत्वाभासेऽपि व्याप्तिपक्षधर्मतानिश्चयो भ्रमरूपोऽस्ति तदा तस्य सद्धेतुत्वं स्यात्। समाधत्ते - **दशेति**। दशाविशेषे सद्धेतुरप्याभासः आभासोऽपि सद्धेतुरेवेति भावः। ननु व्याप्तिपक्षधर्मतानिश्चयोऽनुमितिकारणम्, तदभावः कारणाभावत्वेन स्वरूपसन्नेव कारणं स्यादित्यत आह - **सेयमिति**। तथा चैवमिष्टापत्तिः। असिद्धिः स्वरूपसत्ये[व] दूषणं कारणाभावत्वा-दिति भावः। अत्राशङ्कते - **न चेति**। तथा च व्याप्तिपक्षधर्मतोभयनिश्चयाभावापेक्षया प्रत्येकनिश्चयाभाव(वः) दूषणमस्तु आवश्यकत्वात् इत्यर्थः। समाधत्ते - **विशिष्टनिश्चयस्येति**। तथा च व्याप्तिपक्षधर्मतोभयनिश्चयः कारणम्, तदभावस्यैव कार्यानुत्पादकत्वात्। तथा च यस्य फलोपधानं कार्यं तदभाव एव कार्यानुत्पादकः। विशिष्टनिश्चय एव कारणम्, ततस्तदभाव एव हेत्वाभासत्वेन दूषक इत्यर्थः। एतेनेत्यारभ्य कार्यानुत्पादकत्वा-दित्येतत्पर्यन्तं मतमुक्तम्। तद् दूषयति - **मैवमिति**। **एवमिति**। यदि व्याप्तिपक्षधर्मतानिश्चयाभावोऽसिद्धिस्तदा सव्यभिचारोऽप्यत्रैवान्तर्भूतः स्यात् तत्रापि [294 A] व्याप्तिपक्षधर्मतानिश्चयाभावसत्त्वात्।

**असिद्धेः स्वरूपसत्या एव दोषत्वे स्वज्ञानार्थं व्यभिचाराद्यनुद्भावनात्। यदि च तस्मात् सिद्धिर्नोपपद्यत इति तस्योपजीव्यत्वं तदा आश्रयासिद्ध्यादिज्ञानात् सिद्धिर्नेति स एव पृथग् दोषः स्यात्। असिद्धिश्च ज्ञाता परस्योद्भाव्येति स्वज्ञानार्थमुद्भावितासिद्धि-निर्वाहार्थं चाश्रयासिद्ध्यादिज्ञानमावश्यकम्। किञ्च, कथं हेतुतदाभासविवेकः ?, सिद्धौ द्वयोरपि हेतुत्वात् असिद्धौ तदाभासत्वात् व्यभिचारादेः सद्धेतौ सिद्धिमखण्ड-यतश्च हेत्वाभासत्वाभावात्।**

ननु व्यभिचारज्ञानेनासिद्धेर्ज्ञानं क्रियते इति कृत्वा असिद्धिज्ञप्तौ उपजीव्यो व्यभिचार इति स स्वातन्त्र्येण दूषणं स्यात् इत्यत आह - **असिद्धेरि**ति। तथा यदि असिद्धिर्ज्ञाता प्रतिबन्धिका स्यात् तदा तज्ज्ञाने व्यभिचारज्ञानमुपजीव्यं स्यात्। सा च ज्ञाता प्रतिबन्धिका न भवत्येव स्वरूपसत्यास्तस्याः प्रतिबन्धकत्वात्। तथा चासिद्धिज्ञानार्थं व्यभिचाराद्यनुद्भाव्यत्वात् व्यभिचारस्यासिद्धे नोपजीव्यत्वम्, तथा च व्यभिचारोऽप्यसिद्धमध्य एवान्तर्भूतः स्यादिति भावः। ननु व्यभिचारस्यासिद्धज्ञप्तावनुपजीव्यत्वेऽप्युत्पत्तावुपजीव्यत्वात् स्वातन्त्र्येण पृथग् हेत्वाभासत्वं स्यादेवेत्यत आह - **यदि चे**ति। तथा च यदि असिद्ध्युत्पत्तौ व्यभिचार[स्य] उपजीव्यत्वात् पृथग् दूषणं तदा आश्रयासिद्धिस्वरूपासिद्ध्योरप्यसिद्ध्युत्पत्तौ उपजीव्यत्वात् पृथग् हेत्वाभासत्वं स्यात् तथा च हेत्वाभासाधिक्यापत्तिः। दूषणान्तरमाह व्यभिचारस्यासिद्ध्युपजीव्यत्वे एव - **किञ्चे**ति। तथा च सद्धेतुरसद्धेतुरिति विभागो न स्यात्। कथं न स्यादित्यत आह - **सिद्धावि**ति। यदा उभयोर्व्याप्तिपक्षधर्मतानिश्चयो वर्तते तदा उभावपि सद्धेतू, स चोभय(योः) नास्ति चेत् तदा उभावपि असद्धेतू। ननु यत्र वस्तुगत्या व्यभिचारादयो विद्यन्ते सोऽसद्धेतुः यत्र च वस्तुगत्या व्यभिचारादयो न विद्यन्ते स सद्धेतुरिति विषयविभागावधारणात् सद्धेतुत्वासद्धेतुत्वविभागो भविष्यति इत्यत आह - **व्यभिचारादेरि**ति। तथा च व्यभिचारिणि व्याप्तिपक्षधर्मतानिश्चयो भ्रमरूपो यदा वर्तते तस्यां दशायां वस्तुगत्या व्यभिचारे विद्यमानेऽपि न हेत्वाभासत्वम्। कुतः ? यतस्तस्य व्यभिचारस्य सिद्धिखण्डनद्वाराऽनुमितिप्रतिबन्धः क्रियते तदा हेत्वाभासत्वं स्यात्। तदेतद्व्यभिचारेण वस्तुगत्या विद्यमानेन व्याप्तिपक्षधर्मतानिश्चयरूपा या सिद्धिस्तत्खण्डनद्वाराऽनुमितिप्रतिबन्धो न क्रियते इति कृत्वा तदा न हेत्वाभासत्वमित्यर्थः। मूले सद्धेताविति पदं वर्तते। तत् सिद्धिदशायामेवेति परं कर्तव्यम्। अन्यथा सद्धेतौ व्यभिचारो नास्तीत्यसङ्गतिः स्यादिति भावः।

**अथ सुषुप्तौ जागरेऽपि व्याप्तिपक्षधर्मतासत्त्वे तदनिश्चयेऽनुमित्यनुत्पादो हेत्वाभासप्रयोज्यः सव्यभिचारादौ तथावधारणात् इति असिद्धिरज्ञातापि हेत्वाभासः। न चैवं हेत्वाभासाधिक्यं क्लृप्तान्तर्भावो वा, तेन रूपेण व्याप्त्यसिद्ध्यादेरेव संग्रहादिति चेत्, न, एवं सव्यभिचारादिरप्यसिद्धिः स्यात् इत्युक्तत्वात्, उपजीवनात् भेदे आश्रयासिद्ध्यादिरपि पृथक् स्यात्। सुषुप्त्यादौ अनुमित्यभावः, कारणाभावात् कार्यानुत्पादो हि, न प्रतिबन्धकमात्रात् किन्तु कारणाभावादपि असति अपि प्रतिबन्धके वह्न्यभावेन दाहानुत्पत्तेः।**

शङ्कते - **अथेति**। तथा चानुमित्यनुत्पादो यः स हेत्वाभासाधीनः। जागरे सुषुप्तौ वा वस्तुगत्या व्याप्ति-पक्षधर्मतयोर्विद्यमानत्वेऽपि व्याप्तिपक्षधर्मतानिश्चयाभावात् अनुमितिर्नोत्पद्यते इति कृत्वा व्याप्तिपक्षधर्मता-निश्चयाभाव एवासिद्धिः। ततोऽनुमित्यनुत्पादो हेत्वाभासाधीन इत्यत्र दृष्टान्तमाह - **सव्यभिचारादाविति**। तथा च यथा व्यभिचारज्ञाने विद्यमानेऽनुमितिर्न जायते तद्वत् व्याप्तिपक्षधर्मतानिश्चयाभावे विद्यमानेऽनुमितिर्न जायत एवेति [294 B] व्याप्तिपक्षधर्मतानिश्चयाभावोऽपि हेत्वाभास एव। अनुमितिप्रतिबन्धकत्वे समानेऽपि व्यभिचारापेक्षयाऽयमेवास्य विशेषः इत्याह - **अज्ञाताऽपीति**। असिद्धिरज्ञाता एव हेत्वाभासो यतो व्याप्तिपक्ष-धर्मतानिश्चयाभाव एवापेक्षितः, स एव चासिद्धिरिति भावः। ननु यदि व्याप्तिपक्षधर्मतानिश्चयाभावोऽसिद्धिस्तदा एका, [?अन्यथा] आश्रयासिद्ध्यादित्रयम्, तथा च हेत्वाभासाधिक्यं स्यात् इत्याशयेन शङ्कते - **न चैवमिति**। समाधत्ते - **क्लृप्तेति**। तथा चाश्रयासिद्धिचादीनामपि व्याप्तिपक्षधर्मतानिश्चया[भाव]त्वेनासिद्धे एवान्तर्भाव इति भावः। इदं दूषयति - **एवमिति**। यदि व्याप्तिपक्षधर्मतानिश्चयाभावत्वेनाश्रयासिद्ध्यादीनामसिद्धेऽन्तर्भाव-स्तदा व्यभिचारादेरपि व्याप्तिपक्षधर्मतानिश्चयाभावत्वेनासिद्धे एवान्तर्भावः स्यात्। ननु व्यभिचारस्यासिद्ध्युत्पत्तौ उपजीव्यत्वात् पृथग् हेत्वाभासत्वमित्यत आह - **उपजीवनादिति**। यदि असिद्ध्युपजीवनात् व्यभिचारस्य पृथग् हेत्वाभासत्वं तदाऽऽश्रयासिद्ध्यादीनामप्यसिद्ध्युपजीवनात् पृथग् हेत्वाभासत्वं स्यात् इत्यर्थः। सुषुप्तौ इति यत् पूर्वमुक्तं तत् दूषयति - **सुषुप्त्यादाविति**। तथा च सुषुप्त्यादौ योऽनुमित्यभावः स [न] हेत्वाभासाधीनः किन्तु व्याप्तिपक्षधर्मताज्ञानरूपकारणाभावात्। न हि यावान् कार्यानुत्पादः स प्रतिबन्धकमात्रात् किन्तु कार-णाभावादपि, अन्यथा अत्र बाधकमाह - **असत्यपीति**। तथा च यदा प्रतिबन्धकं किमपि नास्ति तदानीं व-ह्न्यभावे दाहो नास्ति, स दाहानुत्पादः प्रतिबन्धकान्न प्रतिबन्धकस्य तत्रासत्त्वात् किन्तु वह्निरूपकारणाभावादेव।

**अथानुमित्यनुत्पादो हेत्वाभासप्रयुक्त एवेति चेत्, तर्हि अनुमितौ मनोयोगादिरपि न हेतुः। हेत्वाभासादेवानुमित्यनुत्पादे तद्व्यतिरेकेणानुमित्यनुत्पादाभावात् सिद्धिरेव तद्धेतुत्वे चरमकारणमेव हेतुः स्यात्।**

अत्राशङ्कते - **अथेति**। तथा चानुमित्यनुत्पादो हेत्वाभासाधीनः। सुषुप्तौ योऽनुमित्यनुत्पादः सो हेत्वा-भासाधीन एवेति। अन्यस्य हेत्वाभासान्तरस्य तत्राभावादसिद्धिरेवोक्तरूपा हेत्वाभास इति। इदं दूषयति - **तर्हीति**। तदा आत्ममनःसंयोगादीनामप्यनुमितौ कारणत्वं न स्यात्। असिद्धिरूपहेत्वाभासादेव तत्रानुमित्य-नुत्पादे आत्ममनःसंयोगादीनामपि कारणत्वं न स्यात्। उपसंहरति - **सिद्धेरेवेति**। तथा च सिद्धेर्व्याप्तिपक्षधर्मता-निश्चय एव कारणं स्यात् न त्वन्यत्। तदभाव एवासिद्धिर्हेत्वाभासः। तथा च चरमकारणं तदेव कारणं सिद्धि-

कारणम्, तदभाव एव हेत्वाभासः इत्येव स्यात् न त्वन्यत् कारणं हेत्वाभासान्तरं वा इत्यर्थः।

**अन्ये तु गमकतौपयिकप्रतिद्वन्द्विव्याप्तिपक्षधर्मताविरहतन्नियतयोरन्यतरत्वं हेत्वाभासत्वम् । तत्राधिकबलसमानबलौ बाधप्रतिरोधौ प्रतिद्वन्द्विनौ व्याप्तिपक्षधर्मताविरहश्चासिद्धिः, तन्नियतौ च सव्यभिचारविरुद्धौ । न चानयोरप्यसिद्ध्यन्तर्भावः, व्याप्तिविरहनियतत्वेन ज्ञातयोः स्वातन्त्र्येणैव दूषकत्वात् भ्रमे विशेषदर्शनस्येवेति ।**

मतान्तरेणासिद्धेर्लक्षणमाह - **अन्ये त्विति** । **गमकतेति** । गमकतायामुपयोगि यत् रूपम् अबाधितत्वम् असत्प्रतिपक्षत्वं तद्विरोधिनौ बाधसत्प्रतिपक्षौ, व्याप्तिपक्षधर्मताविरहश्च इत्यनेनासिद्धः सङ्गृहीतः, तन्नियता व्याप्तिपक्षधर्मताविरहनियता व्यभिचारविरुद्धादयः तावदन्यतरत्वं हेत्वाभासत्वम् । इदमेव हेत्वाभाससामान्यलक्षणम् । तदेव विवृणोति - **तत्रेति** । अधिकबलसमबलौ यौ बाधप्रतिरोधौ तौ गमकतोपयोगरूपविरोधिनौ [295 A] एतावता द्वयोर्हेत्वाभासमध्ये सङ्ग्रहो जातः । अथाऽसिद्धिसङ्ग्रहमाह - **व्याप्तिपक्षधर्मताविरहश्चेति** । इदमसिद्धेर्लक्षणम्, व्याप्तिपक्षधर्मताविरहपदेनैवासिद्धेस्त्रिरूपायाः सङ्ग्रहः । अथ व्यभिचारविरुद्धयोः सङ्ग्रहमाह - **तन्नियतौ चेति** । तत्पदेन व्याप्तिपक्षधर्मताविरहः, तन्नियतौ व्यभिचारविरुद्धौ तयोरप्यनेन सङ्ग्रहः । शङ्कते - **न चेति** । अनयोर्व्यभिचारविरुद्धयोरित्यर्थः । अनयोरपि व्याप्तिपक्षधर्मताविरहो वर्तत एवेति । समाधत्ते - **व्याप्तिविरहनियतत्वेनेति** । तथा चानयोर्व्याप्तिविरहनियतत्वेन ज्ञातयोः स्वातन्त्र्येणैव प्रतिबन्धकत्वम् । अत्र दृष्टान्तमाह - **भ्रम** इति । यथा रजतभ्रमे रजतत्वाभावज्ञानमपि प्रतिबन्धकं रजतत्वाभावव्याप्यज्ञानमपि प्रतिबन्धकं तद्वत् व्याप्तिपक्षधर्मताविरहोऽपि प्रतिबन्धकः तन्नियतौ व्यभिचारविरुद्धावपि प्रतिबन्धकौ । एतावता असिद्धस्य भिन्नं लक्षणमुक्तम्, हेत्वाभासानां च सामान्यलक्षणमुक्तम् ।

**तन्न, अत्रापि व्याप्तिपक्षधर्मताविरह एवासिद्धिः पर्यवस्यति, तत्र चोक्तमेव अन्यतरत्वं च न लक्षणं व्यर्थविशेषणत्वात् हेत्वाभासान्तरबहिष्कृतस्य व्याप्तिपक्षधर्मतानिश्चयविरोधिनो रूपस्य विवक्षितत्वात् तच्चाश्रयासिद्ध्यादिकमेवेति ।**

इदं मतं दूषयति - **तन्नेति** । **अत्रापि** तन्मते । **उक्तमेवेति** । अनेन प्रत्येकाभाव एव दूषणमस्तु इत्यर्थः । **अन्यतरत्वमिति** । बाधसत्प्रतिपक्षव्याप्तिपक्षधर्मताविरहव्यभिचारविरुद्धान्यतरत्वम्, इदमपि हेत्वाभाससामान्यलक्षणं न भवतीति । कथमित्यत आह - **व्यर्थेति** । सर्वत्र लक्षणे यत् अन्यतरत्वं तत् भागासिद्धिवारकम् । यदि अन्यतरत्वं विशेषणं न दीयते तदाऽसिद्धत्वादिकं लक्षणं जातम्, तच्चान्यत्र भागे विरुद्धादौ असिद्धमिति

कृत्वाऽन्यतरत्वं भागासिद्धिवारकं विशेषणं तच्च व्यर्थमेव । भागासिद्धिवारकं विशेषणं व्यर्थं व्याप्तिग्रहानुपयोगित्वात् । व्यभिचारवारकमेव विशेषणं सार्थकं यतो व्याप्तिभङ्गो व्यभिचारेणैव भवति न तु भागासिद्ध्या भागासिद्धेऽपि व्याप्तिसत्त्वात् यथा ह्रदो वह्निमान् धूमात् इत्यत्र स्वरूपासिद्धेऽपि व्याप्तिसत्त्वात् । किञ्च दूषणान्तरमाह - **हेत्वाभासेति** । हेत्वाभाससामान्यलक्षणस्य किं प्रयोजनम् ?, हेत्वाभासान्तरे यौ बाधसत्प्रतिपक्षौ तद्व्यावृत्तमसिद्धस्य लक्षणं कर्तव्यम्, तच्च व्याप्तिपक्षधर्मतानिश्चयविरोधिरूपम्, तत् आश्रयासिद्ध्यादिकमेवेति पूर्वपक्षः । तथा चायं पूर्वपक्षार्थः । तथा च व्याप्तिपक्षधर्मताप्रमितिविरहरूपविशिष्टाभाव(वा)पेक्षया लाघवात् आश्रयासिद्ध्यादिकमेव प्रत्येकं दूषणमस्तु इति प्रघट्टकार्थः ।

**उच्यते । आश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिश्च प्रत्येकमेव दोषः प्रत्येकस्य ज्ञानात् उद्भावनात् चानुमितिप्रतिबन्धात्, न तु विशिष्टाभावः परामर्शविषयाभावो वा व्यर्थविशेषणत्वात् तस्य ज्ञानमुद्भावनं विनाप्यनुमितिप्रतिबन्धात् । अनुभवसिद्धे हि लक्षणम्, न तु लक्षणानुरोधेनानुभवकल्पना । परामर्शविषयाभावत्वेनानुगतेन त्रयाणामसिद्धत्वेन सङ्ग्रहो महर्षिणा कृत इति न विभागविरोधो हेत्वाभासाधिक्यं वा ।**

**उच्यते** इति । सिद्धान्तिना इति शेषः । आश्रयासिद्ध्यादित्रिकस्य प्रत्येकदोषत्वे इष्टापत्तिमाह - **प्रत्येकमिति** । एतदर्थे उपोद्बलकमाह - **प्रत्येकस्येति** । तथा च न विशिष्टाभावो दूषणं किन्तु आश्रयासिद्ध्यादिकं प्रत्येकमेव दूषणम् । **न त्विति** । परामर्शविषयाभावलक्षणा याऽसिद्धिः सा दूषणं न भवति । परामर्शो नाम व्याप्तिपक्षधर्मता ज्ञानम्, तद्विषयाभाव इति तदपेक्षया व्याप्त्यभावः पक्षधर्मताभावश्च, इति लाघवात् प्रत्येकं दूषणमस्तु, न त्वधिकं व्यर्थत्वात् इत्यर्थः । अत्रैव साधकमाह - **तस्येति** । तस्य [295 B] विशिष्टाभावस्य ज्ञानम् उद्भावनं विनाऽपि अनुमितिं प्रतिबध्नाति । यथाऽयं व्याप्तिपक्षधर्मताज्ञानविषयाभाव इति उद्भावनं विनापि अयमपक्षधर्मः अयमव्याप्तो हेतुः इति एतादृशज्ञानात् अनुमितिप्रतिबन्धात् प्रत्येकाभाव एव दूषणम् । ननु व्याप्तिपक्षधर्मताप्रती(मि)त्यभावोऽसिद्धिरित्येतल्लक्षणानुरोधेन विशिष्टाभाव एव दूषणं न तु प्रत्येकाभावो दूषणमित्यत आह - **अनुभवसिद्ध** इति । तथा च यादृशो दूषकतायामनुभवस्तादृशमेव लक्षणं कर्तव्यम् । अनुभवश्च प्रत्येकाभावज्ञानेनानुमितिप्रतिबन्धात् प्रत्येकाभाव एव दूषणम्, परं लक्षणानुरोधेन प्रतिबन्धकत्वकल्पनेत्येवं नास्ति । ननु तर्हि इदमाश्रयासिद्ध्यादित्रयं ते सव्यभिचारविरुद्धादयस्त्र(श्च) य इति कृत्वा सप्त हेत्वाभासाः स्युरित्यत आह - **परामर्शविषयाभावत्वेनेति** । तथा च **महर्षिणा** परामर्शविषयाभावत्वेनोपाधिना त्रयाणामसिद्धत्वेन सङ्ग्रहः कृतः इति न विभागाधिक्यमित्यर्थः ।

**अत एव ये व्याप्तिविरहपक्षधर्मताविरहरूपाः ते असिद्धिभेदमध्यमध्यासते, तदन्ये च यथायथं व्यभिचारादयः इति सिद्धान्तप्रवादोऽपि। न चैवं साक्षात् प्रतिबन्धकत्वेन बाधप्रतिरोधयोर्व्याप्तिविरहलिङ्गत्वेन सव्यभिचारविरुद्धयोरपि सङ्ग्रहे विभाग-व्याघातः, स्वतन्त्राभिप्रायस्य निषेद्धुमशक्यत्वात्।**

अत्रैव साधकमाह - **अत एवेति**। ये व्याप्तिपक्षधर्मताविरहरूपाः आश्रयासिद्ध्यादयस्त्रयस्तेऽसिद्ध एव, तदन्ये च ये साक्षात् व्याप्तिपक्षधर्मताविरहरूपा न भवन्ति अथ चानुमितिप्रतिबन्धकास्ते व्यभिचाराद्यन्तर्भूताः। ननु परामर्शविषयाभावत्वेनाश्रयासिद्ध्यादीनां सङ्ग्रहस्तदा साक्षात् प्रतिबन्धकत्वेनोपाधिना बाधसत्प्रतिपक्षयो-रेकत्वेन सङ्ग्रहः स्यात् इत्याशङ्कते - **न चैवमिति**। आभास एव व्याख्यातं(तः)। व्यभिचारिविरुद्धयोरप्ये-कत्वसङ्ग्राहकमाह - **व्याप्तिविरहलिङ्गत्वेनेति**। व्याप्तिविरहलिङ्गत्वं व्यभिचारेऽपि वर्तते विरुद्धे च वर्तते इत्य-नयोरप्येकत्वं स्यात् इति शङ्कार्थः। समाधत्ते - **स्वतन्त्रेति**। तथा च **महर्षेरेवं** विभागकरणे तदिच्छैव नियामिका, अन्यथाऽदृष्टत्वरूपजात्यभावेऽपि अदृष्टत्वेनोपाधिना धर्माधर्मयोरेक एव विभागः कुतो न कृतः इत्यर्थः।

**अन्यथा शास्त्रे परिभाषोच्छेदापत्तेः। व्यभिचारादेरप्येवंरूपसत्त्वेऽप्युपजीव्यत्वेन पृथक्त्वम् उपधेयसङ्करेऽप्युपाधेरसङ्करात्। ननु आश्रयाप्रसिद्ध्या कथमाश्रया-सिद्धिरुद्भाव्या। न च शशीयतया गवि शृङ्गनिषेधवत् व्योमकमलमिति वाच्यम्। शशशृङ्गनिषेधो न गवि इत्युक्तत्वादिति चेत् व्योमकमलमिति निश्चितानन्वयत्वेना-पार्थकम्। आश्रयविशेषणासिद्ध्या आश्रयासिद्धिरसङ्कीर्णा। व्याप्तिविरहस्तु व्यर्थ-विशेषणादौ। तदुक्तम् एकामसिद्धिं परिहरतो द्वितीयापत्तेरिति।**

**अन्यथेति**। यदि विभागकर्तुरिच्छा चेन्नियामिका न भवति शास्त्रे नाना परिभाषा न स्युरिति भावः। ननु परामर्शविषयाभावत्वेन चेदसिद्धव्यवहारस्तदा एवं रूपं व्यभिचारेऽपि वर्तते सोऽप्यसिद्धः स्यादित्यत आह - **व्यभिचारादेरिति**। यद्यपि अनेन रूपेण व्यभिचारस्यासिद्धत्वं तथापि व्यभिचारस्य असिद्ध्युपजीव्यत्वेन स्वातन्त्र्येणानुमितिप्रतिबन्धकत्वेन च पृथक्त्वम्। ततः किमित्यत आह - **उपधेयेति**। नानारूपसमावेशात् उपधेयं धर्मी एकः तथापि उपाधीनां धर्माणां भिन्नत्वादसङ्कर इत्यर्थः। अथाश्रयासिद्धौ शङ्कते - **नन्विति**। यथा गगनारविन्दं सुरभि इत्यत्र गगनारविन्दरूपाश्रयोऽप्रसिद्धस्तस्याश्रयस्याप्रसिद्ध्याऽऽश्रयासिद्धिः कथमु-द्भावनीया? मध्ये शङ्कते - **न चेति**। यथा व्याधिकरणधर्मावच्छिन्नप्रतियोगिकाभावमादाय शशीयतया शृङ्ग-स्य निषेधः शृङ्गस्य शशीयत्वं व्यधिकरणो धर्मः तद्वत् व्योमीयतया कमलस्य निषेधः, इयमेवाश्रयासिद्धिरुद्भा-

व्या। इदं दूषयति - **शशेति**। न हि शशीयत्वेन रूपेण शृङ्गस्य निषेधः प्रयुक्तोऽस्ति [296 A] व्यधिकरण-धर्मावच्छिन्नप्रतियोगिकाभावस्य प्रागेव दूषितत्वात्। समाधत्ते - **व्योमकमलमिति**। व्योमकमलं नास्तीति नोद्भाव्यते, इदमपार्थकत्वेन प्रथगेव निग्रहस्थानत्वेनाभिधानात्। यथा निश्चितानन्वयपदजातमपार्थकमिति व्योमोपादानकं कमलमित्यन्वयो नास्तीति अन्वयाभावादपार्थकमेवेदं तर्हि आश्रयासिद्धिः कथमुद्भावनीयेत्यत आह - **आश्रयेति**। आश्रये धर्मिणि विशेषणमसिद्धमिति आश्रयासिद्धिः। यथा काञ्चनमयः पर्वतो वह्निमान् इति काञ्चनमयत्वं विशेषणमसिद्धम्, पर्वते काञ्चनमयत्वं नास्तीति आश्रयविशेषणासिद्ध्या आश्रयासिद्धिः, एवं व्योमकमलमित्यत्र कमले व्योमीयत्वाभावरूपविशेषणाभावादाश्रयासिद्धिः। स्वरूपासिद्धं स्पष्टत्वात् उपेक्ष्य व्याप्यत्वासिद्धिं निरूपयति - **व्याप्तिविरह** इति। तथा च नीलधूमादौ व्यर्थविशेषणे व्याप्यत्वा-सिद्धिस्तदुक्तम् - एकामसिद्धिं परिहरत इति सम्मतिः, तथा च केनापि उक्तम् - इदं वह्निमत् नीलधूमात् इत्यत्र वादिना स्वरूपासिद्धिरुद्भाविता एतस्य ह्रदस्य जलमयत्वात् तत्र नीलधूमो नास्तीति स्वरूपासिद्धिः तदा प्रतिवादिनोक्तम् - मया जलोपरिवर्ती देशः पर्वतादिः पक्षीकृतः तदा नीलधूमात् इत्युक्ते व्याप्यत्वासिद्धिः तत एकामसिद्धिं परिहरतो द्वितीयापत्तिरिति।

**उपाधिस्तु न व्याप्तिविरहः वह्निव्यापकधूमाव्यापकधर्मस्याप्रसिद्ध्या धूमे तद्विरहा-सिद्धेः, किन्तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वं व्याप्तिः, साध्यव्यापकसाधनाव्यापकश्च धर्मान्तरं न तु तद्विरहः अपि तु तन्नियतः।**

अथ मतान्तरं दूषयितुमाह - **उपाधिरिति**। केषाञ्चिद् मते स उपाधिरेव व्याप्यत्वासिद्ध इति तद् दूषयति - **वह्निव्यापक** इति। तथा च अनौपाधिकत्वं व्याप्तिरिति पक्षे तदभाव उपाधिर्व्याप्यत्वासिद्धो वक्तव्यः। तत्रानौपाधिकत्वं किं नाम ? वह्निव्यापकधूमाव्यापकधर्माभावो यदि अनौपाधिकत्वं तदा दूषणमाह - **धूमे** इति। धूमे तादृशधर्माप्रसिद्ध्या तद्विरहरूपं यत् अनौपाधिकत्वं तत् न स्यादित्यर्थः किन्तु अनौपाधिकत्व-मन्यदेव वक्तव्यमित्याह - **किन्त्विति**। अनौपाधिकत्वं तु यावत्स्वव्यभिचारि[व्यभिचारि]साध्यसामानाधि-करण्यं यथा स्वशब्देन साधनं ततो धूमो येषां यावतां व्यभिचारी तावतां वह्निरूपं साध्यमपि व्यभिचारि तादृशसाध्यसामानाधिकरण्यं धूमेऽस्तीति। व्यभिचारिणि वह्नौ तु इदं लक्षणं नास्ति, वह्निर्यावतां व्यभिचारी तावतां धूमरूपं साध्यं न व्यभिचारि, वह्निरयोगोलके आर्द्रेन्धनस्य व्यभिचारी अस्ति धूमस्तु आर्द्रेन्धनव्यभिचारी नास्ति इति न तत्र व्याप्तिः तथा चैतादृशानौपाधिकत्वलक्षणा या व्याप्तिः तदभावस्तु नोपाधिरित्याह - **साध्येति**। तथा च स्वेत्यादिका या व्याप्तिरनौपाधिकत्वलक्षणा तदभावो भिन्नः उपाधिस्तु भिन्नः तथा

चानौपाधिकत्वलक्षणा या व्याप्तिः तस्या विरहो भिन्नः । अथ साध्यव्यापकसाधनाव्यापकरूपो यो धर्म उपाधिः स भिन्न इति कृत्वा व्याप्तिविरह उपाधिर्न भवति । ननु तर्हि उपाधिना अनौपाधिकत्वाभावानुमानं न स्यात् । यथा इदं व्याप्तिविरहवत् सोपाधिकत्वात् इत्यत आह - **अपि त्विति** । तथा च यत्रोपाधिस्तत्र व्याप्तिविरह [296 B] इति तन्नियतत्वं वर्तते न तु व्याप्तिविरहरूपवत्त्वमित्यर्थः ।

**न चैवमुपजीव्यत्वेन उपाधिर्हेत्वाभासान्तरम्, उपजीव्यत्वेऽपि स्वतोऽदूषकत्वेन तदर्थं परमुखवीक्षकत्वात् । न हि साध्यव्यापकाव्याप्यत्वमनुमितिविरोधि किन्तु व्यभिचारोन्नयनेन स्वव्यतिरेकेण सत्प्रतिपक्षतया वा । तदाह उपाधाववश्यं व्यभिचार उपाधेरेव व्यभिचारशङ्केति । अप्रयोजकान्यथासिद्धौ च सोपाधी नासिद्धौ[१] । प्रतिकूलतर्कानुकूलतर्काभावौ उपजीव्यत्वे सति स्वतो दूषकौ अपि न हेत्वाभासौ, स्वरूपसतोरेव प्रतिबन्धकत्वात् इति उक्तम् ।**

अत्राशङ्कते - **न चेति** । तथा च व्याप्तिविरहोन्नायकतया उपाधेर्व्याप्त्यसिद्धौ उपजीव्यत्वात् उपाधेर्हेत्वाभासत्वं स्यात् इत्याशङ्कते - **न चैवमिति** । दूषयति - **उपजीव्यत्वेऽपीति** । यतः स्वतो यो दूषकः स एव हेत्वाभासः, उपाधेस्तु व्यभिचारोन्नयनरूपपरमुखनिरीक्षकत्वात् न हेत्वाभासत्वम्, तेदेवाह - **न हीति** । साध्यव्यापकाव्याप्यत्वं नाम साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधिरूपं व्याप्तिविरहोन्नयनद्वारा एव दूषणम्, परं स्वतो नास्ति । तर्हि कथं दूषणमित्यत आह - **किन्त्विति** । तथा च यदा व्याप्तिविरहव्यभिचारा-(रो)न्नयनं सत्प्रतिपक्षोत्थापनं वा करोति तदैव उपाधिर्दूषणं न तु स्वत इत्यर्थः । अत्र स्मृतिमाह - **उपाधाविति** । ननु अप्रयोजकान्यथासिद्धरूपौ असिद्धौ कुतो नोदाहृतौ इत्यत आह - **अप्रयोजकेति** । अप्रयोजकः सोपाधिरेव । पर्वतः वह्निमान् पाषाणात् अयमप्रयोजको हेतुः, पाषाणं प्रति वह्निः प्रयोजको न भवति, अयमप्रयोजकः अथ च पाषाण(णः) वह्नि(ह्निं) विनापि अन्यस्मात् सिद्ध इति अन्यथासिद्ध इत्यर्थः । ननु प्रतिकूलतर्कः अनुकूलतर्काभावश्च इतीमौ द्वौ उपाधेरुपजीव्यौ स्वतो दूषकौ च कुतो नोद्दिष्टौ, यथाऽऽद्यः वह्निरस्तु धूमो मास्तु इत्युक्ते धूमाभावे वह्निर्न स्यादिति । अत्रानुकूलतर्को नास्ति इत्ययमनुकूलतर्काभावः प्रतिकूलतर्कश्च । यदि धूमवान् स्यात् तदा अर्द्रेन्धनमपि स्यात्, न हि व्यापकेन विना व्याप्यं तिष्ठति इति प्रतिकूलतर्कः इत्येतौ द्वौ उपाधेरुपजीव्यौ अपि स्वतो दूषकौ अपि न हेत्वाभासौ । कुत इत्यत आह - **स्वरूपसतोरिति** । तथा चैतयोर्ज्ञानं न प्रतिबन्धकमिति कृत्वा नैतौ हेत्वाभासौ । हेत्वाभासानां तु ज्ञानमेव प्रतिबन्धकमिति । इति असिद्धो गतः ।

---

१. 'सर्वत्र प्रथमाद्विवचनम्' इति रहस्ये मथुरानाथः ।

## हेत्वाभासप्रकरणे बाधः

**बाधो न साध्याभाववत्पक्षकत्वं पक्षवृत्त्यभावप्रतियोगिसाध्यकत्वं वा, पक्षे साध्याभावज्ञानमात्रस्य प्रमात्वज्ञानं विना अधिकबलत्वाज्ञानेन बाधाभावादिति वक्ष्यते।**

अथ **प्राचीन**कृतं बाधलक्षणं दूषयति - **बाध** इति। तथा च साध्याभाववान् पक्षो यस्य स बाधो बाधितो हेतुरिति यावत्। **पक्षे**ति। पक्षवृत्तिर्योऽभावस्तस्य प्रतियोगि यत् साध्यं तत्कत्वं हेतोः यथा ह्रदो वह्निमान् धूमात् इत्यत्र ह्रदवृत्त्यभावप्रतियोगि साध्यं वह्निस्तत्कत्वं बाध इत्यर्थः। इदं लक्षणद्वयमपि दूषयति - **साध्याभावज्ञाने**ति। अनयोस्तदा हेत्वाभासत्वं स्यात् यदि अनयोर्ज्ञानं प्रतिबन्धकमस्ति, यदा अनयोर्ज्ञाने प्रमात्वज्ञानं नास्ति तदानीमधिकबलत्वाभावात् न बाध इति वक्ष्यते। अतो लक्षणद्वयं पूर्वकृतमनुपपन्नमित्यर्थः।

**अत एव साध्याभाववत्पक्षवृत्तित्वमपि न असिद्धिसङ्कीर्णबाधाव्याप्तेश्च किन्तु साध्याभाववत्त्वप्रमाविषयपक्षकत्वं प्रमितसाध्याभाववत्पक्षकत्वं पक्षनिष्ठप्रमाविषयत्वप्रकाराभावप्रतियोगिसाध्यकत्वं वेति विवक्षितविवेकेन साध्याभावादिप्रमैव दोषः।**

मतान्तरं दूषयति - **अत एवे**ति। यतः प्रमात्वज्ञानं विना साध्याभावज्ञानमात्रस्य प्रतिबन्धकत्वं नास्ति अत एवेत्यर्थः। **साध्ये**ति। साध्याभाववान् यः पक्षः तद्वृत्तित्वं हेतोर्बाधः। पूर्वोक्तदूषणादेवेदमपि निरस्तमित्यर्थः। अत्रैव दूषणान्तरमाह - **असिद्धी**ति। यथा ह्रदो वह्निमान् धूमात् इत्यत्र साध्याभाव[व]त्पक्षवृत्तित्वं धूमस्य नास्ति इति कृत्वा धूमो बाधितो न स्यात् इत्यव्याप्तिः, वस्तुगत्या बाधितो वर्तते स न स्यादिति भावः। बाधलक्षणे सिद्धान्तमाह - **किन्त्वि**ति। साध्याभाववत्त्वस्य या प्रमा तद्विषयो यः [297 A] पक्षः तत्कत्वम् तथा च ह्रदे यद्यपि धूमो नास्ति तथापि साध्याभाववत्त्वप्रकारकप्रमाविषयत्वं तु वर्तते इति कृत्वा बाधितोऽपि भवति असिद्धोऽपि भवति। बाधस्य लक्षणान्तरमाह - **प्रमिते**ति। प्रमितो यः साध्याभावस्तद्वान् पक्षो यस्य तत्कत्वं हेतोरित्यर्थः। अथ **प्राचीनानां मते** घटोऽयम् इत्यत्र ज्ञानस्वरूपघटस्वरूपातिरिक्त एको विषयतापदार्थस्तिष्ठतीति तद्घटितं लक्षणमाह - **पक्षनिष्ठे**ति। तथा च पक्षनिष्ठा या प्रमाविषयता तस्यां प्रकारो योऽभावः तस्य प्रतियोगि यत् साध्यं तत्कत्वम्। यथा ह्रदो वह्निमान् धूमात् इत्यत्र ह्रदे वह्निर्नास्तीति प्रमा जायते, अत्र वह्न्यभावप्रकारिका या प्रमा तद्विषयता ह्रदरूपपक्षनिष्ठा भवति, अतो ह्रदनिष्ठा या प्रमाविषयता वह्न्यभावप्रकारकप्रमाविषयता तस्यां विषयतायां वह्नेरभावः प्रकारो भवति। अभावस्य प्रतियोगी वह्निर्भवति, स वह्निः साध्यं धूमस्य भवतीत्यत्र विषयत्वप्रकारादीनां त्रयाणामुपाधीनां ज्ञानं प्रतिबन्धकं न

भवतीति यद्विषयकं ज्ञानं प्रतिबन्धकं तदेव निःकृष्टमाह - **विवक्षितविवेकेनेति**। वस्तुगत्या विचार्यमाणे साध्याभावप्रमाया एव दोषो बाध इत्यर्थः।

**सा च प्रमात्वेन ज्ञाता न स्वरूपसती हेत्वाभासत्वात्। प्रमात्वज्ञानं विना अधिकबलत्वाभावेनादोषत्वात् अप्रमायामपि प्रमात्वज्ञानेऽनुमितिप्रतिबन्धाच्च। अथ साध्याभाववति पक्षे हेतोः सत्त्वज्ञाने व्यभिचारः, तदज्ञानेऽसिद्धिः, संशययोग्यत्वाभावेन पक्षत्वाभावादाश्रयासिद्धिश्च।**

साध्याभावप्रमाया हेत्वाभासत्वमुपपादयति - **सा चेति**। साध्याभावप्रमा प्रमात्वेन ज्ञाता एव दोषः, न तु स्वरूपसती दोषः। कुत इत्यत आह - **हेत्वाभासत्वादिति**। उपष्टम्भकान्तरमाह - **प्रमात्वज्ञानेति**। यदि साध्याभावप्रमायां प्रमात्वं ज्ञायते तदैव हेतौ साध्यव्याप्यत्वज्ञानापेक्षया साध्याभावप्रमायां बलं भवति अन्यथा साध्यव्याप्यत्वज्ञानेनानुमितिरेव स्यादिति कृत्वा अधिकबलार्थं साध्याभावप्रमायां प्रमात्वज्ञानमपेक्षितव्यमेवेति भावः। अन्यथा बाधमाह - **अप्रमायामिति**। यदि प्रमा प्रमात्वेन ज्ञाता प्रतिबन्धिका तदाऽप्रमाया अपि प्रमात्वेन ज्ञानेऽनुमितिप्रतिबन्धो न स्यादित्यर्थः। वस्तुतः साध्याभावप्रमाया अभावात्। अथ बाधस्य पृथग्हेत्वाभासत्वखण्डनार्थं पूर्वपक्षमाह - **अथेति**। साध्याभाववति पक्षे हेतोर्ज्ञानं वर्तते न वा ? आद्ये बाधो व्यभिचार एव स्यात्। अन्त्ये त्वाह - **तदिति**। यदि तत्र हेतुज्ञानं नास्ति तदाऽज्ञातासिद्धिरेव दूषणम्, यदा पक्षे हेतुर्न ज्ञायते तदाऽज्ञातासिद्धिः स्वरूपसती दूषणम्। दूषणान्तरमाह - **संशयेति**। तथा च साध्यसन्देहविषयः पक्षः, साध्याभावप्रमा चेद् वर्तते तदा साध्यसन्देह एव नास्ति कुतः पक्षत्वम्, ततः पक्षत्वाभावादेवाश्रयासिद्धत्वमेवेति न पृथग्बाधः।

**न च पक्षभिन्ने व्यभिचारो दोषः व्यर्थविशेषणत्वात् सर्वोपसंहारप्रवृत्तव्याप्तेः साध्याभाववति साधनमित्यवगमादेव भङ्गात्। न चैवं सन्दिग्धसाध्यदृष्टान्ते सन्दिग्धानैकान्तिकवत्पक्षे व्यभिचारसंशयात् अनुमानमात्रोच्छेद इति, पक्षे साध्यसन्देहोऽनुमानाङ्गमिति। व्याप्तस्य पक्षधर्मताज्ञानात् अनुमित्युत्पादेन संशयनिवृत्तेः, अन्यथा विशेषदर्शनस्य संशयविरोधिता भज्येत।**

अथ व्यभिचारात् बाधस्यासङ्करं शङ्कते - **न चेति**। तथा च [297 B] पक्षातिरिक्ते साध्याभाववति हेतुसत्त्वं व्यभिचारः, पक्षे साध्याभाववति हेतुसत्त्वं बाध एव इत्यर्थः। दूषयति - **व्यर्थेति**। पक्षातिरिक्तत्वं

विशेषणं व्यर्थं लाघवात्। न तु पक्षातिरिक्तत्वं गौरवात्। अत्रैव उपष्टम्भकमाह - **सर्वेति**। साध्याभाववद्वृत्ति साधनम्। एतादृश्या व्याप्तेः यो यो धूमवान् स वह्निमान् इति सर्वाधिकरणकोदाहरणप्रतिपाद्यायाः साध्याभाववति साधनमित्यनेनैव व्याप्तेर्भङ्गः, न तु पक्षातिरिक्तविशेषणेनेत्यर्थः। व्यभिचारे पक्षातिरिक्तत्वं विशेषणमावश्यक-मित्याशङ्कते - **न चैवमिति**। तथा च यदि कथञ्चित् साध्याभाववति हेतुसत्त्वं व्यभिचारस्तज्ज्ञानमात्रं प्रति-बन्धकं तदा पक्षतुल्ये सन्दिग्धानैकान्तिकवत् व्यभिचारसन्देहवत्पक्षेऽपि व्यभिचारसन्देहस्यानुमितिप्रति-बन्धकत्वेऽनु[मान]मात्रोच्छेदप्रसङ्गात्। प्रत्युत पक्षे साध्यसन्देहोऽनुमानाङ्गमिति। ततः साध्याभाववति पक्षे हेतुसत्त्वज्ञानं व्यभिचारो न भवति किन्तु स बाध एव इति भावः। पूर्वपक्षी दूषयति - **व्याप्तस्येति**। तथा च साध्याभाववति हेतुसत्त्वमात्रमेव व्यभिचारः तज्ज्ञानत्वेनैव प्रतिबन्धकं पक्षीयमपि व्यभिचारज्ञानं प्रतिबन्धकं भवत्येव। अनुमित्युच्छेदस्तु न भवति व्याप्तिपक्षधर्मताज्ञानात् पक्षीयव्यभिचारज्ञाननिरासेऽनुमित्युत्पा-दस्यावश्यकत्वात्। यदि व्याप्तिपक्षधर्मताज्ञानात् संशयनिवृत्तिर्न भवति तदा बाधकमाह - **अन्यथेति**। तथा च विशेषदर्शनस्य संशयविरोधितैव भज्येत, प्रकृते विशेषदर्शनं व्याप्यज्ञानमेवेत्यर्थः। तथा च साध्याभाववति पक्षे हेतुज्ञानमपि व्यभिचारः न तु बाधः पृथक्।

**न च पक्षे साध्याभावं प्रतीत्य व्यभिचारज्ञानमिति उपजीव्यत्वात् बाधः पृथक्। पक्षे साध्याभावप्रतीतिरेव हि साध्याभावहेत्वोः सम्बन्धोल्लेखिनीत्येकवित्तिवेद्यत्वेन नोपजीव्यत्वम्, अन्यथा बाधदशायां पक्षे हेतोरज्ञानादसिद्धिरेव। न चोद्भावित-व्यभिचारनिर्वाहाय बाधोद्भावनमावश्यकमित्युपजीव्यत्वम्, व्यभिचारोद्भावने परकथन्तानावश्यकत्वात् तत्त्वे वा तन्निर्वाह्यमेव दूषणं क्लृप्तत्वात्।**

अथ व्यभिचारज्ञाने बाधस्योपजीव्यत्वात् बाधः पृथग् इत्याशङ्कते - **न चेति**। तथा चादौ पक्षे साध्याभावप्रतीतिः, तदनन्तरं ज्ञाते साध्याभावे साध्याभाववति हेतुसत्त्वमिति व्यभिचारबुद्धिः, तथा च व्यभिचारे बाधः उपजीव्यः व्यभिचार उपजीवकः इति तयोर्भेदः। इदं दूषयति - **पक्षेति**। यदि साध्याभाव-प्रतीत्यनन्तरं व्यभिचारबुद्धिस्तदा व्यभिचारे बाध उपजीव्य इति नास्ति किन्तु या एव साध्याभावबुद्धिः सैव हेतुसाध्याभावसम्बन्धोल्लेखिनीत्येकवित्तिवेद्यत्वात् साध्याभावप्रतीतिरेव हेतुविषयिणी जाता इति कृत्वा एकवित्तिवेद्यत्वं साध्याभावहेत्वोर्नोपजीव्योपजीवकभावः। ननु वादिना उद्भावितो यो व्यभिचारस्तन्निर्वाहार्थमेव बाधः पूर्वमुद्भावनीय इति कृत्वा व्यभिचारनिर्वाहकत्वेन बाधः पृथग् इत्यत आह - **व्यभिचारेति**। न हि सर्वत्र व्यभिचारोद्भावने कथं व्यभिचार इति व्यभिचारकथन्ता आवश्यिकीति येन तन्निर्वाहार्थं बाधः [298 A]

पृथग् हेत्वाभासः कर्तव्यः । आवश्यकत्वेऽप्याह - **तत्त्वे** वेति । तथा च निर्वाह्यो व्यभिचार एव दूषणं न तु निर्वाहको बाध इत्यर्थः ।

**वह्निरुष्णः कृतक इत्युद्भावनात् वह्निरुष्ण इत्युद्भावने लाघवमिति बाधः पृथगिति कश्चित् । तन्न, पक्षे साध्याभावप्रमा स्वार्थानुमाने यदि न दोषः तदा परं प्रत्यपि न स्यात् अविशेषात् इति तदुद्भावनस्य दूरनिरस्तत्वात् ।**

बाधव्यभिचारयोरसङ्करमाशङ्कते - **वह्निरिति** । वह्निरनुष्णः कृतकत्वात् इत्यत्र वह्निरुष्णः कृतक इति व्यभिचारोद्भावनापेक्षया वह्निरुष्ण इति बाधोद्भावने लाघवम् इति बाधः पृथगित्यर्थः । दूषयति - **पक्षेति** । **स्वार्थेति** । स्वार्थानुमाने या साध्याभावप्रमा सा हेतुविषयिण्येव । यदि साध्याभाववति हेतुर्न ज्ञातस्तदाऽसिद्धिः, साध्याभाववति हेतुज्ञाने व्यभिचारज्ञानमेव, तथा च स्वार्थानुमाने बाधो न दूषणम् । यदि च स्वार्थानुमाने बाधो न दूषणं तदा परार्थानुमाने हेतुविषयकव्यभिचारोद्भावने गौरवेऽपि व्यभिचार एव दूषणं न तु बाधः । एतदेवाह - **तदुद्भावनस्येति** । एतावतोक्तम् बाधो व्यभिचारात् पृथग् हेत्वाभासो न भवति इत्युक्तम् ।

**अथोपनीतकाञ्चनमयत्वविशिष्टवह्न्यनुमितेः सल्लिङ्गजन्यायाः आभासत्वं हेत्वाभासाधीनम् । न चानुमितेः पूर्वं तत्र व्यभिचारज्ञानं विशिष्टस्याप्रसिद्ध्या तदभावस्याज्ञानात्, अत एव पक्षासिद्धिरपि न ।**

अथ एकदेशिमतेन बाधासङ्करमाशङ्कते - **अथेति** । तथा च यदा वह्निमान् इत्यनुमितिर्न जायते तदाऽनुमितेः पूर्वत्वं(पूर्वं) काञ्चनमयत्वं व[ह्नेः] न या(आ)दौ ज्ञातमस्ति । तद्विशेषणं यदा उपनयवशात् वह्न्यंशे भासते यथा पर्वतः काञ्चनमयो वह्निस्तद्वान् इयं याऽनुमितिः सा [तदा] आभासरूपाऽप्रमारूपा भवति, अनुमितेश्चाभासत्वं हेत्वाभासाधीनम्, न चैतस्मिन् अनुमाने कश्चिदन्यो हेत्वाभासोऽस्ति हेतोः सद्धेतुत्वात् यतो धूमस्य वह्निव्याप्यत्वं पक्षधर्मत्वं चेति, तेन व्यभिचारविरुद्धासिद्धा निवारिताः, सत्प्रतिपक्षोऽपि नास्ति विरुद्धहेत्वन्तरानुपस्थितेः, अतः काञ्चनमयत्वविशिष्टवह्न्यभावरूपो बाध एव हेत्वाभासः । व्यभिचारप्रसङ्गमत्र निराकरोति - **न चेति** । व्यभिचारज्ञानं नाम काञ्चनमयत्वविशिष्टवह्न्यभाववति हेतोः सत्त्वम्, न च काञ्चनमयत्वविशिष्टवह्निः पूर्वं ज्ञातोऽस्ति येन कृत्वा तदभाववति हेतुसत्त्वज्ञानरूपं व्यभिचारज्ञानं स्यात् । असिद्धिरप्यत्र नास्तीत्याह - **अत एवेति** । साध्यस्य वह्नेः पक्षे सन्दिग्धत्वात् पर्वतत्वावच्छिन्नपर्वतस्य च विद्यमानत्वात् नाश्रयासिद्धिः ।

**अतः काञ्चनमयवह्न्यभावरूपात् बाधात् तत्राभासत्वम् । व्यधिकरणप्रकारावच्छिन्नप्रतियोगिकश्चात्र अभाव इति चेत्, न, वस्तुतो व्यभिचारस्यापि तत्र सत्त्वात् । ज्ञानं च तस्य बाधस्येवानुमित्यनन्तरमेव । किञ्च वह्नौ काञ्चनमयत्वस्यानुमितावेव भाने काञ्चनमयवह्निमान् इति अनुमितिर्न स्यात् विशिष्टस्य पूर्वमज्ञानात् वह्नौ काञ्चनमयत्वांशेऽनुमितेराभासत्वं वह्नौ लिङ्गस्यासिद्धेः व्यभिचाराच्च ।**

उपसंहरति - **अत** इति। ननु काञ्चनमयत्वं विशेषणं प्रतियोगितावच्छेदकं वह्नौ अवर्तमानं कथं भवति ?, प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः इत्यत आह - **व्यधिकरणेति**। तथा चैतादृश(शा)भाववादिमतेनायं बाध इत्यर्थः । इदं मतं दूषयति - **वस्तुत** इति। पूर्वोक्तस्य बाधस्य न व्यभिचारापेक्षया वस्तुसङ्करो नास्ति, वस्तुतो व्यभिचारस्य विद्यमानत्वात्। यथा काञ्चनमयत्वविशिष्टवह्न्यभाववति पर्वते धूमस्य विद्यमानत्वात् इति कृत्वा [298 B] तत्र व्यभिचार एव। ज्ञानासङ्करोऽपि नास्तीत्याह - **ज्ञानं चेति**। तथा च काञ्चनमयेत्याद्युक्तवह्न्यनुमित्यनन्तरं यथा बाधावतरणं तथा तदनन्तरं व्यभिचारज्ञान[म]पि तत्र सम्भवतीति। दूषणान्तरं भेदो(दे)ऽऽह - **किञ्चेति**। तथा चानुमितेः पूर्वं काञ्चनमयत्वे तत्र ज्ञानं न च। यदि काञ्चनमयत्वविशिष्टो वह्निर्न ज्ञातस्तदा काञ्चनमयत्वा(त्व)वह्निविशेषणकाऽनुमितिर्न स्यादित्याह - **विशिष्टस्येति**। यदि पूर्वं ज्ञातस्तदा काञ्चनमयत्वविशिष्टवह्न्यभाववति हेतुज्ञानं व्यभिचारज्ञानमेवेति न बाधोऽत्रेत्यर्थः। दूषणान्तरमाह - **वह्नाविति**। तथा च वह्नौ काञ्चनमयत्वांशे यत् आभासत्वं बाधाधीनमित्युक्तं तन्न सम्भवति। कथम् ? वह्नौ या काञ्चनमयत्वानुमितिः सा लिङ्गं धूमरूपं वह्नौ नास्त्येव पर्वते विद्यमानत्वात् धूमस्येति कृता(त्वा) स्वरूपासिद्ध [ए]वेत्यर्थः। अथ काञ्चनमयत्वांशे धूमस्य व्यभिचारात् व्यभिचारोऽपीत्याह - **व्यभिचाराच्चेति**। काञ्चनमयत्वाभाववति पर्वते धूमस्य विद्यमानत्वात् व्यभिचार इति भावः ।

**न चानुमितेर्विषयाभावाधीनमप्रमात्वम्, किन्तु हेत्वाभासाधीनम् । यस्य हि ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः । न च साध्याभावो ज्ञातः प्रतिबन्धक इति न स हेत्वाभासः । वस्तुतस्तु उपनीतस्यानुमितौ भाने मानाभावः प्रत्यभिज्ञादौ च प्रतीतिबलेन तत्कल्पनम् ।**

पूर्वोक्तमनुमितेराभासत्वं हेत्वाभासाधीनमिति यदुक्तं तत् दूषयति - **न चेति**। तथा चानुमितेर्यत् आभासत्वं तत् विषयाभावाधीनम्, विषयश्च काञ्चनमयत्वं तदभावाधीनम्, न तु सर्वत्र हेत्वाभासाधीनम्। दूषणान्तरमाह

- **यस्य हीति**। यस्य ज्ञानं स्वतोऽनुमितिप्रतिबन्धकं स हेत्वाभासः, न च साध्याभावो ज्ञातः प्रतिबन्धको यतः साध्याभावज्ञानस्य प्रमात्वाग्रहदशायाम् अनुमितिप्रतिबन्धाभावात्। दूषणान्तरमाह - **वस्तुत** इति। तथा चानुमितौ ज्ञानान्तरोपनीतभानमेव नास्ति कुत उपनीतकाञ्चनमयत्वविशिष्टवह्निभानमिति। ननु अनुमितौ उपनीतज्ञानाभावे प्रत्यक्षेऽपि उपनीतभानं न स्यात् इत्यत आह - **प्रत्यभिज्ञानादाविति**। तथा च प्रत्यक्षे यत् उपनीतभानं तत् प्रत्यभिज्ञादौ प्रतीतिबलेन कल्प्यते। अन्यथा तु पूर्वज्ञानोपनीततत्तायाः प्रत्यभिज्ञानेऽभाने द(त)त्तेद(न्)ताविशिष्टयोरभेदग्राहकप्रमाणाभावादभेदः कुत्रापि न सिद्ध्येत्। यथा सोऽयं देवदत्तः इत्यत्र स इति तत्ता पूर्वं कुण्डली दृष्ट इति कृत्वा कुण्डलं तत्ता तदंशे उपनयः स्मरणमेव सन्निकर्षः। अयमिति अत्र इदन्ता दण्ड एव, तदंशे लौकिकदण्डचक्षुषोः सन्निकर्षः। तथा च लौकिकालौकिकचक्षुःसंयोगोपनयरूपसन्निकर्षाभ्यां तत्तेदन्ताविशिष्टाभेदावगाहि, तदेव दण्डविशिष्टकुण्डलविशिष्टाभेदावगाहि, सोऽयमित्याकारकं दण्डविशिष्टकु॰ड लविशिष्टाभेदावगाहि प्रत्यभिज्ञानमनुभवसिद्धं तादृशप्रतीतिबलादेवोपनीतायास्तत्ताया भानं प्रत्यक्षेऽस्य क्रियते प्रमाणबलात्, अनुमितौ तु उपनीतभाने प्रमाणमेव नास्तीत्यर्थः।

**अन्यथा पूर्वोपस्थितसकलपदार्थभाने यथार्थानुमित्युच्छेदः। अपि चैवं परार्थानुमानेऽप्युपनीतभाने बाधितोऽर्थ उपनीतोऽयं मम भात इत्युद्भावनादेव विजयेत वादी। उद्देश्यानुमितेरप्रतिबन्धान्न तत्र बाधो दोष इति चेत्, तुल्यं स्वार्थानुमानेऽपि।**

अथानुमितावुपनीतभाने बाधकमाह - **अन्यथेति**। यदि अनुमितावप्युपनीतमपि भासते तदा ये ये पूर्वमुपस्थिताः पर्वतावृत्तयो धर्मा वह्न्यवृत्तयो धर्मा जलत्वपाषाणत्वादयस्तेषामप्युपनीताना(नां) पर्वते वह्नौ उद्भावने [299 A] यथार्थानुमित्युच्छेदः स्यात् इत्यर्थः। नन्विदं प्रत्यक्षेऽपि तुल्यम्, पूर्वमुपनीताः सहस्रशः पदार्था घटत्वपटत्वादयस्ते देवदत्तादिप्रत्यक्षे चेत् भासन्ते तदा प्रत्यक्षमपि उच्छिद्यते देवदत्तादावसन्नपि भासत इति। यदि तेषामसंसर्गाग्रहः प्रतिबन्धकः तथा चोपनीता घटत्वादयः पदार्थास्ते देवदत्ते न भासन्ते। असंसर्गो नाम सम्बन्धाभावः, स एव प्रतिबन्धक इति यदि तदाऽनुमितावपि उपनीतानां सर्वेषां भानं न सम्भवति इति अत्राप्यसंसर्गाग्रहस्य प्रतिबन्धकत्वादित्यस्वरसादाह - **अपि चैवमिति**। तथा च यदि अनुमितावप्युपनीतभानं स्वीक्रियते तदा परार्थानुमाने बाधितोऽप्यर्थोऽनुमितौ भात इति वादी विजयेत। अत्र शङ्कते - **उद्देश्येति**। यद्यपि उपनीता अर्थाः सहस्रशोऽनुमितौ भातास्तथापि उद्देश्यं यत् साध्यं तदंशे तु बाधो नास्तीति कृत्वा न परार्थानुमितौ बाधो दोष इति शङ्कार्थः। **तुल्यमिति**। तथा च स्वार्थानुमाने वह्निसाध्यके उद्देश्यवह्न्यंशे तु बाधः कोऽपि नास्ति इति स्वार्थानुमानेऽपि न कोऽपि दोषः।

**अत एव यत्र सामान्यतोदृष्टानुमानमेवेतरबाधसहायं विशेषानुमापकं तत्र बाधकानामाभासत्वे सिद्धे तत्प्रयुक्तं सामान्यतोदृष्टस्याप्याभासत्वमिति बाधस्यासाङ्कर्यात्। न च यदि विशेषविप्रतिपत्तौ सामान्यप्रतिज्ञा तदा अर्थान्तरं सामान्यविप्रतिपत्तौ तु नेतरबाधकापेक्षेति वाच्यम्।**

प्रकारान्तरेण व्यभिचारात् बाधाऽसङ्करमाशङ्कते - **अत एवेति**। इच्छा द्रव्याश्रिता गुणत्वात् इदमेव विशेषद्रव्यस्यात्मनोऽनुमापकम्। तत्र कथं विशेषानुमापकम्? पृथिव्यादिषु इतरेषु इच्छाया बाधावतारो जातो यथा इच्छा पृथिव्यादिषु तु न तिष्ठति इति कृत्वा पृथिव्यादीतरबाधसहायं सत् आत्मरूपविशेषस्यानुमापकमित्यनुमानस्थितिः। अत्र यथा पृथिव्यादिषु बाधो गृहीतः तद्वत् आत्मन्यपि बाधो दैवात् भ्रमरूपो गृहीतस्तदनन्तरम्, आत्मादिषु बाधसह(हा)यात् तदनन्तरम् इच्छा द्रव्याश्रिता इत्येवमनुमितिः आकाशपक्षे एव जाता आकाशे बाधावतारस्याभावात्। तत्र इच्छाया बाधकानि आभासरूपाणि यतो वस्तुगत्या पृथिव्याद्यात्मपर्यन्तेषु आकाशं विहाय बाधो गृहीतः, आत्मनि तु इच्छाबाधो भ्रमरूपः। तत् कस्मात्? हेत्वाभासात्। कुतः? तदोच्यते बाधादेव, इति बाधः सिद्धः। अत्र व्यभिचारादिकं तु नास्त्येव यतो यत्र गुणत्वं तत्र द्रव्याश्रितत्वमिति प्रतीतेर्व्याप्तेः सत्त्वात्। अत्र शङ्कते - **न चेति**। इतरबाधसहायं सत् विशेषानुमापकमित्यस्य कोऽर्थः? यदि सामान्ये प्रतिज्ञा यथा इच्छा द्रव्याश्रिता द्रव्याश्रितत्वमात्रं चेदुद्देश्यं तदा सामान्यविप्रतिपत्तौ नेतरबाधकापेक्षा। सामाने(न्ये) यदि जिज्ञासा तदा इतरबाधस्य का वाऽपेक्षा। यदि विशेषे जिज्ञासा तदा सामान्यविप्रतिपत्तौ अर्थान्तरम्। यतो विशेषे जिज्ञासा सामान्ये च प्रतिज्ञा तदाऽर्थान्तरं तस्मादितरबाधसहायं सत् यत्र विशेषानुमापकं तत्र बाधकानामाभासत्वे सामान्यतोदृष्टस्याभासत्वं बाधाधीनमिति कथं स्यादिति शङ्कार्थः।

**स्वार्थानुमान एवैवं बाधासङ्करस्योक्तत्वादित्यपास्तम्। अनुमित्यप्रतिबन्धेन तत्र बाधस्यादोषत्वात्। ननु पक्षे साध्याभावग्रहवत् साध्याभावव्याप्यग्रहोऽपि दूषको विरोधित्वाविशेषात् तथा च साध्याभावसम्बन्धो व्यभिचारः साध्याभावव्याप्यसामानाधिकरण्यं बाधः साध्याभावव्याप्यं च वह्नित्वादिकमेवेति चेत्, न, पक्षे हि साध्याभावे ज्ञायमाने ज्ञाते वा यदि साध्याभावव्याप्यसामानाधिकरण्यबुद्धिस्तदा व्यभिचार एव।**

समाधत्ते - **स्वार्थेति**। मया यो बाधासङ्कर उक्तः स परार्थानुमाने न, यदि परार्थानुमाने उक्तः स्यात् तदा-

ऽर्थान्तरत्वादिकमुद्भावनीयं स्यात्। अत [299 B] एवेत्यारभ्य अपास्तमित्येतत्पर्यन्तमन्वयः। यत्र बाधकानामाभासत्वेनानुमितिराभासरूपा तत्रानुमितेर्बाधाधीनमेवाभासत्वम्। इदं दूषयति - **अनुमित्यप्रतिबन्धेने**ति। यत्रानुमितेराभासत्वं द्रव्याश्रिता इत्यादौ बाधाधीनं यदि तत्र बाधो वर्तते तदा तत्रानुमितिरेव कथं स्यात्, प्रतिबन्धके सति आभासरूपाऽप्यनुमितिः कथं स्यात्। यदि चानुमितिर्जायते तदा स बाधो हेत्वाभास एव न भवेदित्यर्थः। प्रकारान्तरेण व्यभिचारात् बाधासङ्करमाशङ्कते - **नन्वि**ति। पक्षे यथा साध्याभावसम्बन्धग्रहो दूषकस्तद्वत् साध्याभावस्य व्याप्योऽस्ति तत्सम्बन्धग्रहोऽपि दूषकः, यथा ह्रदे वह्न्यभावसम्बन्धग्रहोऽनुमितिप्रतिबन्धस्तथा वह्न्यभावव्याप्यं ह्रदत्वं तत्सम्बन्धग्रहोऽपि दूषकः। व्यभिचारबाधयोर्भेदमुपपादयति - **तथा चे**ति। साध्याभावसम्बन्धो हेतुमति पक्षे व्यभिचारः, साध्याभावव्याप्यसामानाधिकरण्यं च बाधः। तत्किमित्यत आह - **वह्नित्वादिकमेवे**ति। यथा वह्निरनुष्णः कृतकत्वात् इत्यत्र अनुष्णत्वाभावव्याप्यं च वह्नित्वं तत्सम्बन्धग्रहो वह्नित्वसम्बन्धग्रहो बाधः। इदं दूषयति - **पक्षे**ति। तथा च पक्षे साध्य(ध्या)भावे ज्ञायमाने यदि साध्याभावव्याप्यसामानाधिकरण्यबुद्धिर्बाधः तदा स व्यभिचार एव।

**अथ पक्षे साध्याभावबुद्धिं विनैव सा तर्हि हेतुसाध्याभावव्याप्ययोरगृह्यमाणविशेषयोः सत्प्रतिपक्षत्वम्। अथ तुल्यबलेन सत्प्रतिपक्षोऽधिकबलेन बाध इति चेत्, न, गमकतौपयिकरूपसाकल्यं हि बलं तच्च द्वयोर्ज्ञातमिति कथं न सत्प्रतिपक्षत्वं गमकताबहिर्भूतं च न बलम्।**

**अथे**ति। यदि साध्याभावव्याप्यसामानाधिकरण्य[बुद्धिः साध्याभाव]बुद्धिं वेमै(विनै)व जायते तदा साध्याभावस्य वस्तुगत्या यत् व्याप्यं तद्बुद्धिरपि वर्तते साध्यव्याप्यबुद्धिरपि वर्तते तदा सत्प्रतिपक्ष एव स्यात्। तदेवाह - हेतुसाध्याभावव्याप्ययोः अगृह्यमाणवि[शे]षयोर्द्वयोर्मध्ये कुत्रापि व्याप्तिपक्षधर्मतारूपो विशेषः गृहीतो नास्ति इति कृत्वा सत्प्रतिपक्षत्वमेवं स्यात्। अत्राशङ्कते - **अथे**ति। तथा च तुल्यबलत्वं साध्यव्याप्यसाध्याभावव्याप्ययोस्तुला(ल्य)बलत्वं तदा सत्प्रतिपक्ष एव, यदि च साध्याभावव्याप्यस्याधिकबलत्वं तदा बाध एवेति भेद इति शङ्कार्थः। दूषयति - **गमकतौपयिके**ति। बलं च गमकतौपयिकसाकल्यम्, बलं व्याप्तिपक्षधर्मतादिसाकल्यम्, तच्च बलं द्वयोर्हेतुसाध्याभावव्याप्ययोस्तुल्यमेव ज्ञातमिति परमेकत्र बलमपरत्र दौर्बल्यमिति ज्ञानं नास्ति तदा सत्प्रतिपक्षत्वं कथं न भवतीत्यर्थः। न तु गमकताबहिर्भूतमेव बलं वक्तव्यमित्यत आह - **गमकते**ति। गमकतापदेन व्याप्तिपक्षधर्मतारूपं बलम्, तद्व्यतिरिक्तं चानुमाने बलमेव न भवतीति तुल्यबलत्वात् सत्प्रतिपक्षत्वमेवेत्यर्थः।

**अथ साध्याभावव्याप्यबुद्धेरनन्यथासिद्धत्वं बलं तदा ततः साधनवति पक्षे साध्याभावानुमितावनैकान्तिकत्वमेव। पक्षे साध्याभावग्रहवदिति यदुक्तं तदप्यसिद्धं तस्य दोषत्वानभ्युपगमात्, अन्यथा हेत्वाभासान्तरतापत्तिः। अथ हेतुतः साध्यसिद्धिसम्भावनायां व्यभिचारासिद्धेः बाधेन हेतोरसाधकत्वे सिद्धे व्यभिचारसिद्धिरिति उपजीव्यत्वात् बाधः पृथक्, अन्यथा हेतोरसाधकत्वे सिद्धे साध्यसिद्धिसम्भावनाविरहात् व्यभिचारबुद्धिः तस्यां च सत्यां हेतोरसाधकत्वधीरित्यन्योन्याश्रय इति चेत्। न। साध्यसिद्ध्युन्मुखहेतुज्ञानस्य प्रमितसाध्याभावसहचरितहेतुविषयत्वेन व्यभिचारज्ञानतयाऽदूषकत्वात्।**

अथेति। **अनन्यथासिद्धत्वमिति**। साध्याभावव्याप्यबुद्धेरनन्यथासिद्धत्वमप्रामाण्यशङ्काशून्यत्वं तदेव बलम्। इदं दूषयति - **तदा** इति। साध्याभावव्याप्यबुद्धेस्तदाऽनन्यथासिद्धत्वं चेत् बलं तेन च बलेन हेतुमति पक्षे चेत् साध्याभावानुमितिः कृता तदा साध्याभाववति हेतुसत्त्वात् व्यभिचार एव जातो न तु बाधः। प्रकारान्तरेण [300 A] बाधासङ्करमाशङ्कते - **अथेति**। तथा च हेतुतः साध्यसिद्धिसम्भावनायां यदा तदा व्यभिचारबुद्धिरेव साध्य(ध्या)भावसामानाधिकरण्यं(ण्य)लक्षणा नेति। तथा च बाधेनायं हेतुरसाधकः बाधितत्वात् इत्यनेनासाधकत्वे सिद्धे साध्यसिद्धिसम्भावनाविरहात् व्यभिचारबुद्धिः। तथा च व्यभिचारो(रे) उपजीव्यत्वात् बाधः पृथक्। यदि व्यभिचारे बाधो नोपजीव्यस्तदा बाधकमाह - **अन्यथेति**। यदि हेतौ(तो)रसाधकत्वसिद्धिस्तदा हेतुतः साध्यसिद्धिसम्भावनाविरहः, साध्यसिद्धिसम्भावनाविरहे च व्यभिचारबुद्धिः, व्यभिचारबुद्धौ चासाधकत्वबुद्धिः इति अन्योन्याश्रयः। तथा च साध्यसिद्धिसम्भावनाविरहो यः स व्यभिचारप्रयुक्ता(क्तो)ऽसाधकत्वात् न वक्तव्यः अन्योन्याश्रयभयात् किन्तु बाधतत्त्वप्रयुक्त(क्तः), ततो बाधस्य व्यभिचारे उपजीव्यत्वात् पृथक्त्वम्। इदं दूषयति - **साध्यसिद्धीति**। तथा च व्यभिचारे नोपजीव्यो बाधः यथा साध्यसिद्धिसन्मुखं हेतुज्ञानम् तदेव हेतुज्ञानं प्रमितसाध्याभावसहचरितहेतुविषयकं सत् व्यभिचारविज्ञानतया दूषकम्। परमादौ बाधः, तदनन्तरं हेतोरसाधकत्वज्ञानम्, तदनन्तरं साध्यसिद्धिसम्भावनाविरहः, ततो व्यभिचारबुद्धिः इति पूर्वोक्ता प्रणालीकल्पना व्यर्था एवेत्यर्थः।

**तथापि व्यभिचारे साध्याभावप्रमा तन्त्रं तां विना तदभावादिति सैव दोष इति चेत्। सत्यम्, किन्तु साध्याभावप्रमा व्यभिचारज्ञानत्वेन दूषिका क्लृप्तत्वात् न तु स्वतन्त्रा।**

**अत एव पक्षे साध्याभावज्ञानत्वेन प्रतिबन्धकत्वं न तु साध्याभावसमानाधिकरणसाधनज्ञानत्वेनेति प्रत्युक्तम् तस्य लघुत्वेऽप्यक्लृप्तत्वात् ।**

पुनः शङ्कते - **तथापीति** । यदि साध्यसिद्ध्युन्मुखं हेतुज्ञानं प्रमितसाध्याभावसहचरितहेतुविषयकं सत् व्यभिचारज्ञानं तदा साध्याभावप्रमा व्यभिचारज्ञानात् पूर्वमावश्यकी यतो व्यभिचारज्ञानं प्रमितसाध्याभावसहचरितहेतुविषयकम् अतः साध्याभावप्रमा बाधे उपजीव्यत्वात् पृथग् हेत्वाभासः इत्याशङ्कार्थः । दूषयति - **सत्यमिति** । तथा च पूर्वं साध्याभावप्रमा तदनन्तरं साध्यसिद्ध्युन्मुखं हेतुज्ञानं प्रमितसाध्याभावसहचरितहेतुविषयम् इत्ययं क्रमः किमर्थम् ?, येनोपजीव्यत्वात् बाधः पृथक् स्यात् किन्तु या साध्याभावप्रमा सैव साध्यसिद्धिसन्मुखहेतुविषयिणी सति(ती) व्यभिचारज्ञानत्वेन दोषः तथा च साध्याभावप्रमा व्यभिचारज्ञानत्वेनैव दोषः न तु बाधत्वेनेत्यर्थः । मतान्तरमाशङ्क्य दूषयति - **अत एवेति** । साध्याभावसमानाधिकरणो यो हेतुः तज्ज्ञानत्वेन वा प्रतिबन्धकत्वं किं वा साध्याभावज्ञानत्वेन वा ? लाघवात् साध्याभावज्ञानत्वे[न] प्रतिबन्धकत्वम् । इदं दूषयति - **लघुत्वेऽपीति** । तथा च साध्याभावसमानाधिकरणहेतुज्ञानापेक्षया साध्याभावज्ञानस्य लघुत्वेऽपि इदं क्लृप्तं नास्तीति न हेत्वाभासत्वम् ।

**अथ प्रत्यक्षादौ प्रमामात्रं प्रति स्वातन्त्र्येण बाधो दोषत्वेन क्लृप्त इत्यनुमितावपि स एव दोष इति चेत् । न तर्हि हेत्वाभासः, अनुमित्यसाधारणदोषस्य तत्त्वात् मनोयोगाभाववत् स्वरूपसत् एव प्रतिबन्धकत्वात् हेतुत्वाभिमतावृत्तित्वेनासाधकतालिङ्गत्वाभावाच्च । बाधितपक्षकत्वं लिङ्गमिति चेत्, न, अन्यत्र तथा दूषकत्वाकल्पनात् ।**

बाधस्य व्यभिचारात् भेदसाधनार्थं मतान्तरमाशङ्कते - **अथेति** । तथा च भूतले घटाभावज्ञाने विद्यमाने घटप्रमा न जायते इति कृत्वा प्रत्यक्षे घटाभावज्ञानरूपबाधस्य प्रतिबन्धकत्वेन क्लृप्तत्वात् बाधः पृथग् हेत्वाभासः । बाधस्य प्रमामात्रे प्रतिबन्धकत्वात् अनुमितावपि प्रतिबन्धकत्वम् । इदं दूषयति - **न तर्हीति** । तर्हि बाधो हेत्वाभास एव न भवति । कुत इति अत आह - **अनुमितीति** । तथा चानुमितौ योऽसाधारणो [300 B] दोषः स एव हेत्वाभासः, अयं तु प्रत्यक्षादावपि प्रतिबन्धक इति । दूषणान्तरमाह - **मन** इति । तथा चात्ममनोयोगाभावो यथा स्वरूपसत् प्रतिबन्धकः न ज्ञात इति अस्यापि हेत्वाभासत्वं न स्यात्, हेत्वाभासत्वं तु ज्ञायमानस्यैवेति । दूषणान्तरमाह - **हेतुत्वेति** । तथा च पक्षे एव साध्याभावरूपबाधस्य विद्यमानत्वात् हेत्ववृत्तित्वेन हेतोरसाध[क]ता साधनं न स्यात् । यथाऽयं हेतुरसाधको बाधितत्वात् इत्यत्र बाधितत्वं हेतौ नास्ति, साध्याभावरूपस्य बाधस्य हेताववृत्तित्वात् । तस्मात् बाधः स्वतन्त्रो हेत्वाभासो न भवति इति पूर्वपक्षः ।

**उच्यते। पक्षे साध्याभावनिश्चयः साध्याभावज्ञानप्रमात्वनिश्चयात्, ज्ञानमात्रादर्थ-निश्चये प्रामाण्यग्रहवैयर्थ्यम्, अप्रमात्वेन ज्ञातादर्थनिश्चयप्रसङ्गश्च। तथा च उपजीव्य-त्वेनाधिकबलत्वेन वा पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चये सव्यभिचारः नान्यथा इत्युभयथापि साध्याभावनिश्चयाधीनव्यभिचारज्ञानात् पूर्वं ज्ञातं साध्याभावज्ञान-प्रमात्वमेव दोष उपजीव्यत्वात्। यदि च पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चयो नानु-मितिविरोधी तदा व्याप्तिपक्षधर्मतया हेतुज्ञानं विशेषदर्शनत्वेन पक्षे साध्याभावज्ञानं परिभूय साध्यं साधयेदेव पर्वते धूम इव वह्निम्।**

अथ बाधसाधनार्थं सिद्धान्तमाह - **उच्यते** इति। **पक्षे** इति। यः पक्षे साध्याभावनिश्चयः स साध्याभावज्ञाने प्रमात्वनिश्चयादेव भवति यथा घटोऽयमति ज्ञानं जातं प्रमा वाऽप्रमा वेति संशये अर्थनिश्चयो न जायते इति कृत्वा तत्र प्रमात्वनिश्चयोऽपेक्षितः। प्रमात्वनिश्चयानपेक्षणे बाधकमाह - **ज्ञानमात्रादिति**। यदि ज्ञानमात्रादर्थ-निश्चयस्तदा प्रामाण्यग्रहवैयर्थ्यं स्यात्। **अप्रमात्वेनेति**। यदि ज्ञानमात्रमर्थनिश्चायकं तदाऽप्रमात्वेन ज्ञानात् अर्थनिश्चयः स्यात्। ततः किमित्यत आह - **तथा चेति**। तथा च साध्याभावज्ञानस्यानुमितिप्रतिबन्धार्थं प्रमात्वग्रहः साध्याभावज्ञाने उपजीव्यः अथ च साध्यव्याप्यज्ञानापेक्षया हेतुज्ञानापेक्षया साध्याभावज्ञानस्य बलमधिकमपि प्रमात्वग्रह एवाधिकं बलम्।तथा च साध्याभावज्ञानस्य प्रमात्वनिश्चये जाते सति व्यभिचारो भवतीति कृत्वा व्यभिचारे साध्याभाव[ज्ञानस्य] प्रमात्वं(त्व)ज्ञानमुपजीव्यमिति बाधः पृथग् हेत्वाभासः। उपसंहरति - **उभयथापीति**। व्यभिचारे उपजीव्यत्वेन साध्यव्याप्यहेतुज्ञानापेक्षया प्रमात्वज्ञानमधिकबल-मित्युभयथापीत्यर्थः। तथा च साध्याभावज्ञाने प्रमात्वग्रहः सव्यभिचारे उपजीव्यत्वात् बाधः पृथगिति। अथ साध्याभावज्ञानस्य साध्याभावघटितव्यभिचारज्ञानस्य साध्यव्याप्यज्ञानापेक्षया बलमाह - **यदि चेति**। **पक्षे** इति। सुबोधः। **तदेति**। साध्य(ध्या)भावज्ञानं साध्याभावघटितव्यभिचारज्ञानं वा परिभूय साध्यव्याप्यज्ञानं विशेषदर्शनत्वेन साध्यं साधयेदेवेत्यर्थः। तथा च हेतुज्ञानापेक्षया साध्याभावज्ञाने प्रमात्वरूपं बलम्।

**न च साध्याभावबुद्धिरेवागृह्यमाणविशेषा सत्प्रतिपक्षवत् प्रतिबन्धिकेति वाच्यम्। रजते नेदं रजतमिति ज्ञानेऽपि विशेषदर्शनेन रजतत्वस्य शङ्खे पीतत्वज्ञाने शुक्लत्वस्य चानुमानात् वादिवाक्येन पक्षे साध्याभावज्ञानात् अनुमानमात्रोच्छेदप्रसङ्गाच्च।**

ननु साध्याभावज्ञाने प्रमात्वग्रहलक्षणस्याधिकबलस्य प्रयोजनं किम्?, साध्य(ध्या)भावज्ञानमेव हेतुज्ञाना-

पेक्षयाऽगृह्यमाणविशेषं सत् अनुमितिप्रतिबन्धकं भविष्यति सत्प्रतिपक्षवत् इत्याशयेन शङ्कते - **न चेति**। समाधत्ते - **रजतेनेति**। तथा च रजते प्रथमतो नेदं रजतमिति ज्ञानं जातं पश्चात् रजतत्वव्याप्यज्ञानं चेत् जातं तदा अथ च शङ्खे पीतत्वज्ञाने भ्रमरूपे विद्यमाने श्वैत्यव्याप्यशङ्खत्ववान् अयम् इति प्रत्यक्षे विशेषदर्शने रजतत्वस्य शुक्लत्वस्य चानुमानात् शुक्लत्वाभावज्ञानं रजतत्वाभावज्ञानं परिभूयैव विशेषदर्शनेन रजतत्व-व्याप्यतथाविधरजतोज्ज्वलरूपवत्त्वेन [301 A] रजतप्रत्यक्षं श्वैत्यव्याप्यशङ्खत्वेन च श्वैत्यानुमानात्(नम्)। तस्मात् साध्यव्याप्यज्ञानापेक्षया साध्य(ध्या)भावज्ञाने प्रमात्वरूपं बलं वक्तव्यमेमे(वे)ति। दृष्टान्तान्तरमप्याह - **वादीति**। तथा च यदि साध्याभावज्ञानमात्रमनुमितौ प्रतिबन्धकं तदा वादिवाक्यात् साध्याभावज्ञानं जातं तदाऽनुमितिप्रतिबन्धात् अनुमानमात्रोच्छेदप्रसङ्ग स्यात्। तस्मात् साध्याभावज्ञाने प्रमात्वग्रहो बलम्, तथा च पूर्वं साध्याभावप्रमात्वज्ञानं भवति तदैव व्यभिचार इति साध्याभावप्रमात्वरूपो बाधो व्यभिचारे उप[जीव्यः], अन्यथा साध्यव्याप्यहेतुज्ञानं साध्याभावज्ञानं परिभूय साध्यानुमितिमेव कुर्यादिति भावः।

**अथ पक्षे साध्याभावप्रमैव साध्याभावहेतुविषया व्यभिचारज्ञानत्वेन दोषः न तु तस्याः प्रमात्वज्ञानमपीति चेत्, तर्हि प्रमायाः अप्रमात्वज्ञाने भ्रान्तानुमितिर्न स्यात् न स्याच्च पक्षे साध्याभावज्ञानप्रमात्वभ्रमादनुमितिप्रतिबन्धः। ननु उपजीव्यत्वेऽप्यत्र साध्याभावप्रमेति ज्ञानं न स्वतो दूषकं किन्तु क्लृप्तत्वात् पक्षे साध्याभावनिश्चयं कुर्वत् व्यभिचारज्ञानद्वारा इति चेत्। न।**

अथ व्यभिचारात् बाधस्याभेदमाशङ्कते - **अथेति**। साध्याभावप्रमैव हेतुविषयिणी सती व्यभिचारज्ञानत्वेन दोषोऽस्तु, त्वयोच्यते - साध्याभावज्ञानस्य प्रमात्वेन ग्रहः प्रतिबन्धकः किमर्थं, तथा च व(बा)धोऽपि व्यभिचार एवेत्याशङ्कार्थः। समाधत्ते - **तर्हीति**। तथा च साध्याभावप्रमायाम् अप्रमात्वज्ञाने जाते सति या भ्रमरूपाऽनुमितिर्जायते सा न स्यात्। इदं साध्याभाववति हेतुज्ञानमप्रमा इति ज्ञाने विद्यमानेऽयोगोलकादौ वह्निना या भ्रमरूपाऽनुमितिः सा न स्यात् यतः साध्याभावज्ञाने प्रमात्वग्रहो नोपजीव्यः किन्तु शुद्धा या साध्याभावप्रमा सैव हेतुविषयकत्वेन हेतुविषयिणी व्यभिचारज्ञानत्वेनैव प्रतिबन्धिका स्यात् इति तत्र अप्रमात्वग्रहे विद्यमानेऽनुमितिर्जायते सा न स्यादिति भावः। शङ्कते - **नन्विति**। साध्याभावप्रमाया ज्ञानं स्वतो न दूषकम्। कुत इत्यत आह - **किन्त्विति**। व्यभिचारज्ञानं प्रतिबन्धकत्वेन क्लृप्तं वर्तते इति कृत्वा साध्याभावनिश्चयं कुर्वत् बाधज्ञानं व्यभिचारज्ञानत्वेनैव प्रतिबन्धकं न तु बाधत्वेन, ततो बाधो व्यभिचार एवेत्यर्थः।

**अत्र साध्याभावप्रमेति ज्ञानात् नियमतः साध्यज्ञानानुदयात् तस्यैव प्रतिबन्धकत्वात् शब्दादौ तथा दर्शनात्, साध्याभावप्रमाविषयवृत्तित्वस्य हेतुवृत्तित्वादसाधकत्वेन साध्याभावप्रमाया हेत्वाभासत्वम्, साधारण्येऽपि ज्ञायमानं सत् यदनुमितिं प्रतिबध्नाति तस्यैव हेत्वाभासत्वम् ।**

समाधत्ते - **अत्रेति** । यथा च ममात्र ह्रदे वह्न्यभावप्रमा वर्तते इति ज्ञाने सति साध्यज्ञानं नोदेति अत ईदृशानुभवा[नु]रोधात् ईदृशं ज्ञानं प्रतिबन्धकम् । **शब्द** इति । यथा नदीतीरे पञ्च फलानि न सन्ति इत्यत्र एतादृशशाब्दज्ञाने विद्यमाने नदीतीरे पञ्चफलानुमितिर्न जायते इत्यर्थः । अथ बाधस्यासाधकतासाधनार्थं हेतुवृत्तित्वमपि साधयति - **साध्येति** । अयं हेतुरसाधकः साध्याभावप्रमाविषयवृत्तित्वात्, साध्याभावप्रमाविषयवृत्तित्वं धर्मो हेतुवृत्तिर्भवति इति कृत्वा असाधकता, [अ]साधकत्वेन भवति बाधो हेत्वाभासः, पूर्वं यत् दूषणमुक्तं यथा बाधः साध्याभावरूपः स च पक्ष एव वर्तते हेतौ नास्तीति तस्यापि हेतुवृत्तित्वोपपादना[त्] दूषणमुद्धृतम् । अथानुमित्यसाधारणदोषत्वाभावात् हेत्वाभासत्वं नास्ति प्रत्यक्षेऽपि तस्य प्रतिबन्धकत्वात् इति पूर्वोक्तं दूषणं निरस्यति- **साधारण्येऽपीति** । यद्यपि बाधः प्रत्यक्षेऽपि प्रतिबन्ध[क]ः तथापि ज्ञायमानं सत् यत् अनुमितिं प्रतिबध्नाति तत् च प्रकृते वर्तते इति साधारणत्वेऽपि तस्यानेन रूपेण हेत्वाभासत्वं स्यादित्यर्थः ।

**न च साध्याभावप्रमा अत्रेति निश्चयदशायां पक्षे साध्याभावहेत्वोर्ज्ञानात् व्यभिचार इति वाच्यम् । प्रमात्वज्ञानस्य साध्याभावनिश्चयहेतुत्वेन तद्दशायां तदभावात् । पक्षधर्मताबलेन प्रसिद्धं बाधान्न सिध्यति इति बाधः पृथक् । प्रसिद्धवह्न्यभाववति पक्षे व्यभिचारान्न तत्सिद्धिरिति चेत्, तर्हि अप्रसिद्धवह्न्यभाववति सपक्षे व्यभिचारात् तमपि न साधयेत् तदज्ञानात् तत्साधनेऽनुमितिरप्रमा स्यात् ।**

अत्राशङ्कते - **न चेति** । तथा च [301 B] साध्याभावप्रमा इति यदा निश्चयो वर्तते तदा साध्याभाववति हेतुज्ञानं वर्तते एवेति साध्याभावप्रमाया व्यभिचारज्ञानत्वेनैव प्रतिबन्धकता स्यादित्याशङ्कार्थः । समाधत्ते - **प्रमात्वेति** । यदि साध्याभावज्ञाने प्रमात्वनिश्चयस्तदैव साध्याभावज्ञानस्य साध्याभावनिश्चयरूपत्वं साध्याभावनिश्चयरूपत्वे च व्यभिचारस्तथा च साध्याभावज्ञाने प्रमात्वज्ञानकाले हेतोरुपस्थितिरेव नास्ति कथं व्यभिचारज्ञानत्वेन प्रतिबन्धकत्वमित्यर्थः । अथ **चिन्तामणिकारः** स्वरहस्यमाह - **प्रसिद्धमिति** । प्रसिद्धं बाधान्न सिध्यति । यथा पर्वतो वह्निमान् धूमात् इत्यत्र यत्र धूमस्तत्र वह्निरिति व्याप्तिज्ञाने विद्यमाने धूमे च पक्षधर्मत्वे

विद्यमाने पक्षवृत्तिना धूमेनाप्रसिद्धवह्निवत् प्रसिद्धो महानसीयवह्निः कुतो न साध्यते इति। तस्मात् महानसीयः प्रसिद्धो वह्निर्बाधादेव न सिध्यति तथा च महानसीयवह्निः पर्वते नास्तीति तस्य तत्र बाध एव हेत्वाभासः। अत्राशङ्कते - **प्रसिद्धेति**। तथा च महानसीयवह्न्यभाववति पर्वते धूमस्य विद्यमानत्वात् व्यभिचारादेव न सिध्यतीति किं बाधेनेति शङ्कार्थः। दूषयति - **तर्हीति**। यदि धूमो महानसीयवह्न्यभाववति वर्तमानो महानसीयवह्निं न साधयति पर्वतीयवह्न्यभाववति महानसे धूमस्य विद्यमानत्वात् पर्वतीयवह्नेरपि सिद्धिर्न स्यात् व्यभिचारात् तज्ज्ञानादिति। महानसीयवह्न्यभावे विद्यमाने धूमस्य सत्त्वेऽन्यथोक्तप्रकारेण वा यद् व्यभिचारज्ञानं तन्न दोषाय तज्ज्ञाने विद्यमानेऽप्यनुमितेर्जायमानत्वात् इत्यर्थः।

**अथ पक्षवृत्तेरन्य एव धूमादिः सपक्षे, तर्हि गोत्व-पृथिवीत्व-द्रव्यत्वादेरप्रसिद्ध-सास्नाद्यनुमानं न स्यात् सास्नादिप्रत्येकव्यभिचारात्। यदि च साध्यतावच्छेदकसास्ना-त्वादिसामान्यावच्छिन्नप्रतियोगिताकाभाववति न गोत्वादिकमिति न व्यभिचारः, तर्हि धूमेऽप्येवंव्यभिचाराभावात् साध्यतावच्छेदकेन प्रकारेणाप्रसिद्धमिव प्रसिद्धमपि साध्यं धूमगोत्वादिकं साधयेत् यदि बाधो न दोष इति वयम्।**

शङ्कते - **अथेति**। तथा च पर्वतीयधूमस्य महानसीयवह्न्यभाववति विद्यमानत्वात् महानसीयवह्निना सह व्यभिचारात् धूमोऽपि महानसीयवह्निमेव न साधयति। पर्वतीयवह्निना सह पर्वतीयधूमस्य व्यभिचार एव नास्तीति पर्वतीयवह्निसिद्धिरप्रत्यूहैवेत्यर्थः। समाधत्ते - **तर्हीति**। इयं सास्नादिमती गोत्वात् मदीयगोवत्, अत्र गोत्वं पक्षसपक्षसाधारण एक एव हेतुः, तथा च दृष्टान्ते या सास्नादिव्यक्तिस्तदभाववति पक्षे हेतोर्विद्यमानत्वात् व्यभिचारः स्यात्। ततो गोत्वादिना सास्नानुमानं न स्यात्, एवं पृथिवीत्वेन हेतुना गन्धानुमानं द्रव्यत्वेन च संयोगानुमानं न स्यात् गन्धाभाववति घटादौ पृथिवीत्वस्य विद्यमानत्वात् एवं घटसंयोगाभाववति पटे द्रव्य-त्वस्य विद्यमानत्वात्। **अप्रसिद्धेति**। अप्रसिद्धं नाम पक्षीयसाध्यसाधनानुमानं न स्यात्। सास्नादि(दी)त्युप-लक्षणं गन्धसंयोगादिरपि प्रत्येकं व्यभिचारात्। शङ्कते - **यदीति**। यदि साध्यतावच्छेदकावच्छिन्नसाध्याभाववति हेतोः सत्त्वं व्यभिचारः, एवं सति गोत्वादिकं यद्यपि तत्तत्सास्नाभाववति विद्यते तथापि सास्नात्वावच्छिन्न-सास्नाभाववति तु गोत्वं न वर्तत इति कृत्वा न व्यभिचार इति। तदा धूमस्यापि वह्नित्वावच्छिन्नवह्न्यभाववति अवर्तमानत्वात् न व्यभिचार इति, तथा च धूमे वह्निव्यभिचारो [302 A] नास्ति पक्षधर्मता तु वर्तते, एवं च सति महानसीयवह्निः पर्वते न साध्यते धूमेन, तत्र किं नियामकमतस्तत्र नियामको बाध एवेत्यर्थः। अत्र **मिश्राः** - महानसीयवह्नेः पर्वतेऽनुमितिः केन रूपेणापाद्यते ? यदि वह्नित्वेन रूपेण तदा महानसीयोऽपि

वह्निर्वह्नित्वेन रूपेण तत्र भासते एवेति इष्टापत्तिः । अथ महानसीयवह्नित्वेन रूपेण तदा तेन रूपेण व्याप्तिज्ञानमपि नास्ति यथा यत्र धूमस्तत्र महानसीयो वह्निरिति व्याप्तिर्नास्ति इति कृत्वा महानसीयवह्नित्वेन साध्यसिद्धिर्न भवतीति बाधावतार इति । अत्र **शिरोमणिः** समादधाति **मणिकारमतम्** । यदि वह्नित्वेन रूपेण धूमे वह्नि-व्याप्तिज्ञानं तदा तस्मात् व्याप्तिविशिष्टपक्षधर्मताज्ञानात् महानसीयवह्नित्वेन रूपेण महानसीयवह्नेः सिद्धिः कुतो न भवति ?, न च महानसीयवह्नित्वेन रूपेण धूमे व्याप्त्यग्रहात् इति वाच्यम् । महानसीयवह्नित्वेन रूपेण व्याप्तिज्ञानाभावेऽपि लाघवाख्यतर्कात् महानसीयवह्नित्वेन रूपेण महानसीयवह्निसिद्धिः कुतो न भवति । लाघवं यथा - पर्वतेऽक्लृप्तो वा वह्निः कल्पनीयः किं वा क्लृप्तः ?, महानसीयवह्निरेव कल्पनीय इति लाघ-वाख्यतर्कात् महानसीयवह्निरपि सिध्यत्येव । अन्यथा ईश्वरानुमाने लाघवाख्यतर्कसहकारात् एकः कर्ता न सिध्येत् । सकर्तृकत्वेनैव रूपेण व्याप्तिज्ञाने विद्यमाने लाघवाख्यतर्कसहकारादेक एव कर्ता यथा सिध्यति तद्वत् वह्नित्वेन रूपेण वह्निव्याप्तिज्ञानात् लाघवाख्यतर्कसहकारात् महानसीयवह्निरपि कुतो न सिध्यतीति । बाधादेव न सिध्यतीति सुष्ठूक्तं प्रसिद्धं बाधान्न सिध्यतीति ।

**साध्याभाववन्मात्रसहचारो न व्यभिचारः साध्यप्रागभावध्वंसवद्वृत्तित्वेन व्यभिचा-रितया पृथिवीत्वादिना गन्धादेः द्रव्यत्वादिना गुणस्यानुमानभङ्गप्रसङ्गात्, किन्तु साध्यात्यन्ताभाववद्गामित्वम् एवं च स्वप्रागभावध्वंसावच्छिन्नतदाश्रये तत्प्रतियोगि-साधने पक्षे व्यभिचारो नेति बाधो दूषणम् ।**

मतान्तरेण बाधं स्थापयति - **साध्याभावेति** । साध्याभाववन्मात्रवृत्तित्वं न व्यभिचारः । तथा च पृथिवीत्वेन गन्धानुमानं न स्यात् । गन्धप्रागभाववति पृथिवीत्वस्य विद्यमानत्वात् एवं गुणप्रागभाववति द्रव्यत्वस्य विद्यमानत्वात् पृथिवीत्वादिर्हेतुर्व्यभिचारी स्यात् । तर्हि को व्यभिचार इत्यत आह - **साध्येति** । तथा च साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वं हि व्यभिचारः । तथा च गन्धवत्त्वावच्छिन्नगन्धाभाव-वद्वृत्तित्वं पृथिवीत्वस्य नास्ति इति कृत्वा न व्यभिचार इत्यर्थः । ततः किमित्यत आह - **एवमिति** । एवं सति गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वात् इत्यत्र पृथिवीत्वेन गन्धप्रागभावावच्छिन्ने घटे गन्धप्रागभावावच्छेदेन घटे गन्धानुमितिः कुतो न भवति व्यभिचाराभावात् । अतो गन्धप्रागभावकाले गन्धानुमितिर्बाधादेव न भवतीति बाधः पृथग् हेत्वाभास इति ।

**अथावच्छेद्ये सिद्धसाधनम्, अवच्छेदके हेत्वसिद्धिः, विशिष्टं च नान्यत् इति चेत् तर्हि प्रागभावध्वंसप्रतियोगिनोरेकवृत्तित्वेनैकसमयतापि स्यात् ।**

अत्राशङ्कते - **अथेति**। घटः पक्ष(क्षः), गन्धप्रागभावकालोऽवच्छेदकः पक्षतावच्छेदकः। अत्रावच्छेद्ये पक्षे वा गन्धानुमितिरापाद्यते किं वा पक्षतावच्छेदके गन्धप्रागभावकाले वा गन्धानुमितिरापाद्यते। आद्ये यदि घटे गन्धानुमितिरापाद्यते तदा सिद्धसाधनम्, घटस्योत्पत्त्युत्तरक्षणे घटे गन्धानुमितिर्जायते एव। अवच्छेदके गन्धप्रागभावकाले यदि गन्धानुमितिरापाद्यते तदा हेत्वसिद्धिरित्यर्थः। न च गन्धप्रागभावविशिष्टे घटे गन्धानुमितिरापाद्यते इत्यत आह [302 B] - **विशिष्टं चेति**। तथा च विशिष्टस्यातिरिक्तत्वाभावात् नानुमितिः। समाधत्ते - **तर्हीति**। एवं चेद्यदि त्वया गन्धप्रागभावकालावच्छिन्ने घटे गन्धो वर्तते एवेतीष्टापत्तिरुच्यते तदा गन्धप्रागभावकालावच्छिन्ने घटे गन्धो वर्तते इति कृत्वा यदि अनुमितिर्भवति तदा गन्धध्वंसावच्छिन्नेऽपि काले गन्धो वर्तते एवेति तत्राप्यनुमितिः स्यात् तथा च गन्धप्रागभावध्वंसगन्धयोरेककालता स्यादित्यर्थः।

**अथ यत्समयावच्छेदेन तत्र प्रागभावः प्रध्वंसो वा न तत्समयावच्छेदेन प्रतियोगीति चेत् तर्हि तदवच्छेदेन प्रतियोगिसाधने न सिद्धसाधनं किन्तु बाध एव, अन्यथा [१]अन्योन्याभावात्यन्ताभावयोरप्यव्याप्यवृत्तित्वभङ्गः एकवृत्तित्वात् अवच्छेदकभेदेन वृतिरिहापि तुल्या तत्र देशभेदोऽवच्छेकोऽत्र तु समयभेद इति। असिद्धेरपि बाध एवोपजीव्यः।**

अत्राशङ्कते - **अथेति**। तथा च गन्धप्रागभावकालावच्छेदेन घटे गन्धो नास्ति एवं ध्वंसप्रतियोगिकालावच्छेदेन प्रागभावोऽपि नास्ति इति नैककालतेत्याशङ्कार्थः। **समाधत्ते - तर्हीति**। तर्हि यादृशगन्धप्रागभावकालावच्छेदेन गन्धो न वर्तते तादृशकालावच्छेदेन गन्धसाधनं तु नास्ति किन्तु गन्धानुमितिर्न जायते बाधादेव तथा च गन्धप्रागभावगन्धयोरेकत्र घटे विद्यमानत्वेऽपि एककालावच्छेदेन विरोधात् भिन्नकालावच्छेदेन तूभयोरेकत्र सत्त्वात् न सिद्धसाधनं किन्तु बाध एवेत्यर्थः। अत्र दृष्टान्तमाह - **अन्योन्येति**। अन्योन्याभावात्यन्ताभावयोः, यथा कपिसंयोगवदन्योन्याभावः कपिसंयोगात्यन्ताभावश्च अनयोर्द्वयोः कपिसंयोगेन सह एकदेशावच्छेदेन शाखाद्यवच्छेदेन विरोधेऽपि भिन्नभिन्नावच्छेदेन एकत्र वृक्षे सत्त्वं वर्तत एव यथाऽग्रे वृक्षः कपिसंयोगवान् मूले कपिसंयोगवान् न भवति, स एव वृक्षः संयोगवान् स एव च संयोगवद्भिन्नः, तथा च एकदेशावच्छेदेन विरोधेऽपि अवच्छेदकभेदेनाविरोधः, एवं सति संयागवति वृक्षे यदि संयोगवदन्योन्याभावो न वर्तते तदा तस्याव्याप्यवृत्तित्वं प्राचां मते न स्यादित्यर्थः। इयान् परं विशेषः प्रागभावस्थले इत्याह - **तत्र देशभेद** इति।

---

१. भावात्यन्ताभावयोरिति पाठः, भावस्य संयोगादेः तदत्यन्ताभावस्य चेत्यर्थः, अन्योन्यात्यन्ताभावयोरिति पाठस्तु प्रामादिकः इति मथुरानाथरहस्यटीकायाम्।

कपिसंयोगात्यन्ताभावान्योन्याभावस्थले देशभेदः शाखादिरवच्छेदकोऽत्र तु कालभेदः । ननु तथापि गन्धप्रागभावज्ञाने विद्यमाने साध्यसन्देहघटिता पक्षतैव नास्ति यतो गन्धप्रागभावरूपावच्छेदकस्य निश्चयात् गन्धप्रागभावे विद्यमाने गन्धस्य सन्देहाभावात् आश्रयासिद्धिरेव न तु बाध इत्यत आह - **असिद्धेरिति**। तथा बाधेन पक्षता विघटयते इति कृत्वा आश्रयासिद्धिः, अतो बाध आश्रयासिद्धेरुपजीव्यत्वात् पृथक् इत्यर्थः ।

**न चैवमुपजीव्यत्वात् बाधवत् सिद्धसाधनमपि पृथक्, उपजीव्यत्वेऽपि स्वतोऽदूषकत्वात्। न हि साध्यज्ञानं तद्बुद्धिविरोधि, धारवाहिकज्ञानोदयात्। नाप्यनुमितिविरोधि अनुमित्सया प्रत्यक्षसिद्धेऽप्यनुमानदर्शनात्, तदुक्तं प्रत्यक्षदृष्टमप्यनुमानेन बुभुत्सन्ते तर्करसिका इति श्रवणानन्तरं मननदर्शनाच्च ।**

अत्राशङ्कते - **न चेति**। बाधस्य पक्षताविघटनद्वारा आश्रयासिद्धौ चेदुपजीव्यत्वं तदा सिद्धसाधनस्यापि पक्षताविघटनद्वारा आश्रयासिद्धेरुपजीव्यत्वात् पृथग् हेत्वाभासत्वं स्यात्, सिद्धसाधनं तु वस्तुगत्या न हेत्वाभास उपाधिवत् इत्याशङ्कार्थः । समाधत्ते - **उपजीव्यत्वेऽपीति**। उपजीव्यत्वेऽपि उपाधिवत् स्वतस्तस्य दूषकत्वं नास्ति। तदेवाह - **न हीति**। **तद्बुद्धीति**। सिद्धसाधनं साध्यबुद्धिमात्रविरोधि [303 A] न भवति। साध्यप्रत्यक्षानन्तरं वह्निरूपसाध्यप्रत्यक्षानन्तरमपि वह्निप्रत्यक्षं जायत एव, धारावाहिकं तत्। **नापीति**। अनुमितावपि विरोधि न भवति, यथा एकवारमनुमितौ जातायामपि सिषाधयिषया पुनरप्यनुमितिर्जायते। **प्रत्यक्षदृष्टमिति**। प्रत्यक्षदृष्टेऽपि करिणि अनुमित्सया अनुमितिर्जायत एवेति। निश्चिते न्यायो न प्रवर्तते इति तु सिषाधयिषातिरिक्तस्थले ज्ञेयम् । **श्रवणानन्तरमिति** । आत्मा इतरभिन्न इति श्रवणानन्तरं शाब्दज्ञाने जातेऽपि अनुमित्सया मननरूपा अनुमितिर्जायत एवेति सिद्धसाधनं नानुमितिप्रतिबन्धकम्।

**तस्मात् सिद्धिमात्रार्थिनः सिद्धौ न तदिच्छा, सिद्धिविशेषार्थिनः सा अस्तीति तस्यानुमितिरेव, एवं च सिषाधयिषितपक्षविघटनद्वारा सिद्धसाधनं दूषणं न स्वतः। नन्वभावधीरपि न भावधीप्रतिबन्धिका, नेदं रजतमिति भ्रमानन्तरं रजतनिश्चयात्।**

**तस्मादिति**। वह्निज्ञानमात्रे यस्येच्छा तस्य वह्निज्ञानानन्तरं वह्निज्ञाने इच्छा न जायते किन्तु वह्निज्ञानविशेषेऽनुमित्यादौ इच्छा जायत एवेति। ततः किमित्यत आह - **एवं चेति**। तथा च सिद्धसाधनं नानुमितिमात्रे स्वतः प्रतिबन्धकं किन्तु सिषाधयिषितसाध्यघटितपक्षताविघटनद्वारा परमुखनिरीक्षकतया प्रतिबन्धकमिति न सिद्धसाधनं हेत्वाभासः । अथ बाधस्य हेत्वाभासत्वे शङ्कते - **नन्विति**। तथा च बाधोऽपि न प्रतिबन्धकः। कुतः ? नेदं रजतमिति भ्रमररूपबाधानन्तरम् इदं रजतमिति निश्चयोदयात्।

**न चाभावप्रमा तथा अपीतः शङ्ख इति प्रमापयत एव पीतोऽयमिति भ्रमदर्शनादिति चेत्, न, विरोधिज्ञानं हि प्रतिबन्धकं, प्रत्यक्षभ्रमस्य च प्रत्यक्षप्रमा विरोधिनी, सा च शङ्खादौ दोषात् नास्त्येव, अनुमितौ तु अभावप्रमामात्रमेव विरोधीति कथमभाव-प्रमायां भावानुमितिरिति। स चायं दशविधः।**

मध्ये शङ्कते - **न चेति**। तथा ऽ(न) चाभावत्व(प्र)म(मा)रूपो बाधः प्रतिबन्धकः। दूषयति - **अपीते-ति**। यथाऽपीतो नाम श्वेतः शङ्ख इति [1]प्रमायामपि पीतः शङ्ख इति भ्रमोदयात् यद्यपि अनुमितिरूपो बाधस्तिष्ठति तथापि पीतभ्रमो जायत इति बाधज्ञानं प्रतिबन्धकं न भवतीति। समाधत्ते - **विरोधिज्ञानं हीति**। विरोधिज्ञानं प्रतिबन्धकम्, न च पीतः शङ्खः इति प्रत्यक्षस्य अनुमानि(न)[रूपं] श्वैत्यज्ञानम् अपीतत्वज्ञानं प्रतिबन्धकं किन्तु प्रत्यक्षमेव, तथा च यदिन्द्रियजन्यो भ्रमस्तदिन्द्रियजन्यं प्रत्यक्षमेव भ्रमविरोधि। ननु ग्राह्य-प्रत्यक्षे ग्राह्याभावप्रत्यक्षं विरोधि, अनुमितावपि प्रत्यक्षन्यायेन ग्राह्याभावप्रत्यक्षमेव विरोधि वक्तव्यम् न त्वनुमितिः, तथा च बाधविषयकं ज्ञानमात्रं न प्रतिबन्धकमिति कृत्वा स हेत्वाभासो न स्यादित्यत आह - **अनुमितौ** इति। अनुमितौ प्रमात्वेन ज्ञातं साध्याभावज्ञानमात्रमेव प्रतिबन्धकम्, तथा च साध्याभावज्ञानमात्र-स्यानुमितौ प्रतिबन्धकत्वात् बाधो हेत्वाभासः, स दशविधः।

**धर्मिग्राहकमानबाधितं घटो व्यापकः सत्त्वात् इति प्रत्यक्षेण, परमाणवः सावयवा मूर्तत्वात् इति अनुमानेन, मेरुः पाषणमयः पर्वतत्वात् इति सुवर्णमयत्वबोधकागमेन। साध्यप्रतियोगिग्राहकबाधितं वह्निरनुष्णः कृतकत्वात् इति प्रत्यक्षेण, शब्दोऽश्रावणो गुणत्वात् इति अनुमानेन, गवयत्वं गवयपदाप्रवृत्तिनिमित्तं जातित्वात् इति उपमानेन। साध्यग्राहकबाधितं शुचि नरशिरःकपालं प्राण्यङ्गत्वात् इति अत्रागमेन। हेतुग्राहक-बाधितं जलानिलौ उष्णौ पृथिवीतो विपरीतस्पर्शवत्त्वात् तेजोवत् इति प्रत्यक्षेण, मनो विभु [2]ज्ञानासमवाय्याधारत्वात् इति अनुमानेन, राजसूयं बाह्मणकर्तव्यं स्वर्गसाध-नत्वात् अग्निष्टोमवत् इति राजसूयकर्तव्यताबोधकागमेन इति।**

---

१. अनुमानरूपायाम्। प्रतौ टिप्पणी। २. ज्ञानसमवाय्याधारत्वात् इति मुद्रितपुस्तके।

[धर्मिग्राहकमानबाधितं त्रयम् ।] **घट** इति। येन प्रत्यक्षेण घटो गृहीतस्तेनाव्यापक एव गृहीतः इति धर्मिग्राहकं यत् प्रत्यक्षं तद्बाधितसाध्यकः । [धर्मिग्राहकप्रत्यक्षबाधितम्] ।१। धर्मिग्राहकानुमानबाधितमाह - **परमाणव** इति । येन प्रमाणेन परमाणवः सिद्धास्तेन प्रमाणेन निरवयवा एव सिद्धाः, परमाणूनामपि सावयवत्वे मेरुसर्षपयोस्तुल्यत्वापत्तिः ।२। धर्मिग्राहकागमबाधितमाह - **मेरुरि**ति। आगमेन मेरुः सुवर्णमय एव सिद्धः ।३। [साध्यप्रतियोगिग्राहकमानबाधितं त्रयम् ।] **साध्ये**ति। साध्यस्य यत् प्रतियोगि तद्ग्राहकेण बाधितम्। **अनुष्ण** इति । अनुष्णत्वं साध्यम्, तस्य प्रतियोगि उष्णत्वम्, तस्य ग्राहकं यत् प्रत्यक्षं तेन साध्यं बाधितम् ।४। प्रतियोगिग्राहकानुमानबाधितमाह - **शब्द** इति । अश्रावणत्वस्य प्रतियोगि श्रावणत्वम् [303 B], तद्ग्राहकानुमानबाधितं यथा शब्दः श्रावणः अन्येन्द्रियाग्राह्यत्वे सति साक्षात्कारविषयत्वात् शब्दत्ववत् ।५। प्रतियोगिग्राहकोपमानबाधितमाह - **गवयत्वमि**ति । गवयपदप्रवृत्तिनिमित्तत्वाभावस्य प्रतियोगि गवयपदप्रवृत्तिनिमित्तम्, तद्ग्राहकमुपमानं यथा गवयपदवाच्योऽयं पिण्डस्तेन गवयत्वमेव गवयपदप्रवृत्तिनिमित्तं गृहीतम् ।६। साध्यग्राहकबाधितमाह - **शुची**ति। अशुचित्वग्राहक आगमस्तेनागमेन नरकपाले शुचित्वं बाधितम् ।७। [हेतुग्राहकबाधितं त्रयम् ।] हेतुग्राहकप्रत्यक्षबाधितमाह - **जलानिले**ति। अत्र हेतुः पृथिवीतो विपरीतः स्पर्शो हेतुः, तद्ग्राहकमनुष्णस्पर्शशीतस्पर्शग्राहकेणोष्णत्वग्राहकं बाध्यते ।८। हेतुग्राहकानुमानबाधितमाह - **मन** इति । ज्ञानस्यासमवाय्यथोऽऽत्ममनःसंयोगस्तदाधारत्वात् एकदा पञ्चज्ञानानुदयः स चात्ममनःसंयोगाभावनिमित्तक इति कृत्वा आत्मनो व्यापकत्वात् द्वितीयं यत् सम्बन्धि तद् अव्यापकं कल्पनीयमिति हेतुग्राहकानुमानबाधितम् ।९। हेतुग्राहकागमबाधितमाह - **राजसूयमि**ति । राजसूयस्य स्वर्गा(र्ग)साधनताबोधको य आगमस्तेन ब्राह्मणकर्तव्यता बाध्यते तत्र राजपदश्रवणादेव क्षत्रियकर्तव्यता ।१०। इति बाधग्रन्थः समाप्तः ।

। वा० [= वाचक] **गुणरत्नेना**तीवप्रयासेन **सुखबोधिका** निर्मिता ।

अतिप्रयासेन मया विनिर्मिता **सु[ख]बोधिका टिप्पनिका** मुदैषा ।

**चिन्तामणौ** ग्रन्थमणौ निशम्य **श्रीरामकृष्णा**ख्यमुखारविन्दात् ॥१॥

## ॥ समाप्तः अनुमानखण्डः बाधान्तः सुखबोधिकासहितः ॥

# सुखबोधिकागतानां ग्रन्थ-ग्रन्थकारादिनाम्नां सूचिः


अक्षपाद ४८७

आचार्य १४, १६, १८०, १८१, १८३, १८६, ३१०, ३१३

उदयनाचार्य १३, १६९, १७७, ३०९, ४०२, ५६२

उपाध्याय (यज्ञपति) ४६, ४८, ५६, १८५, १९२-१९४, ३५०, ३५३, ३७६, ३७८, ३७९

कथकसम्प्रदाय ४९०

**कुसुमाञ्जलि** ३०९

**कुसुमाञ्जलिप्रकाश** २१

गङ्गेश ३५०

गुणरत्न ५९८

चार्वाक ७, १३, ७४, ३१०

**चिन्तामणि** १८३, ५९८

चिन्तामणिकार ३२६, ३९६, ४०२, ५५८

जीर्णमत १८६

**जैमिनीयसूत्र** ३५१, ३५६

निबन्धकार (उदयनाचार्य) ५६२

नैयायिक ५, ७, ९, १०, १०४-१०७, १०९-११३, ११५, ११६, १२५, १२९, १३१, १३२, २०३, २८४, २८५, २८८, २९०, २९१, २९५, २९७, ३०१, ३०३-३०६, ३०९, ३१२, ४६१, ४७८

नैयायिकैकदेशिमत २५५

न्यायमत १०४, १०८, १६६, २७१, २७९, ५६७

न्यासकार ३७७

पक्षधरमिश्र ४, १०१, १०३, १३४, १८३, ४८५

**पञ्चाध्यायी (न्यायसूत्र)** ५६२

**पदार्थखण्डन** ५१४

*पाणिनि* ३५०, ३५१

**पाणिनिसूत्र** ३७८

पूर्वमीमांसकमत २९८

प्राभाकर २७८, २८०, २८२, २८४, २८६, २८८, २९१, २९५, ३००, ३०३, ३०६, ३०९, ३१२, ३८६, ४७८

प्राभाकरैकदेशिन् ३०८

बौद्ध ३१५

बौद्धमत ३१६

भवभूति ३७१

भाट्ट २७८

भास्कर ३४०

मणिकार ५९, १८३, ३७८, ५९४

मणिकृन्मत ३७५, ४२०

महर्षि (अक्षपाद) ४४८, ५७६, ५७७

**मालतीमाधव** ३७१

मिश्र (पक्षधर) १३५, १५६, १८३, २३४, ३१७, ३१८, ४७९, ४८५, ४९०, ४९१

मीमांसक २८, १०४, १०६, १०७, १११, ११२, ११५, ११६, ११८, १२१, १२३, १२५, १२७, १४१, १६०, २०३, २९७, ३००, ३०२-३०५, ३१०, ३१५, ३६२

मीमांसकैकदेशिन् २९८

यज्ञपति ३६, १८३, ३५०, ३७८

रत्नकोषकार २८-३०, ५५४, ५५८, ५६१

**लीलावती** १७७

वाचस्पतिमिश्र ३८०

वार्तिककार (उद्योतकर) ४२७

**वैशेषिकसूत्र** २३०

शबरस्वामी २०३

शिरोमणि ५९४

श्रीरामकृष्ण ५९८

**सुखबोधिका** ५९८

NAGIN J. SHAH, a renowned Sanskritist and eminent scholar of Indian philosophy, has edited the present work. His first work *Akalaṅka's Criticism of Dharmakīrti's Philosophy*—a Study, published in 1966, was widely acclaimed by scholars all over the world. At present he has several brilliant works to his credit. The following are the works in English: *Essays in Indian Philosophy, Samantabhadra's Āptamīmāṃsā—Critique of an Authority, A Study of Jayanta Bhaṭṭa's Nyāyamañjarī*—a *Mature Sanskrit Work on Indian Logic* (in three parts). And the following works are in Gujarati: *Sāṅkhya-Yoga, Nyāya-Vaiśeṣika, Bhāratīya Tattvajñāna, Śāṅkara Vedānta—Avidyā, Bauddha Dharma-Darśana*. He has also given an excellent English translation of Muni Nyayavijayaji's voluminous important Gujarati work *Jaina-Darśana* (English title: *Jaina Philosophy and Religion*). Moreover, he has edited, from the old original manuscripts, the unpublished *Nyāyamañjarī-Granthibhaṅga*. Again he has edited (1) *Jaina Theory of Multiple Facets of Reality and Truth*, (2) V.R. Gandhi's *Religion and Philosophy of Jainas* and (3) Āc. Hemacandra's *Pramāṇamīmāṁsā—A Critique of Organ of Knowledge, A Work on Jaina Logic* (Sanskrit Text in Roman Script with English Translation, Pt. Sukhlalji's Extensive Introduction and Philosophical Notes).

## BHOGILAL LEHERCHAND INSTITUTE OF INDOLOGY PUBLICATIONS

1. **Studies in Sanskrit Sahitya Sastra** *—V.M. Kulkarni*
2. **Pancasutrakam of Cirantanacarya** *—Muni Shri Jambuvijayaji*
3. **Jaina Bhasa Darsana** (in Hindi) *—Sagarmal Jain*
4. **Some Aspects of the Rasa Theory** *—V.M. Kulkarni*
5. **The Gahakosa of Hala** (Part II) *—V.M. Patwardhan*
6. **Prakrit Verses in Sanskrit Works on Poetics** (Vol. I) *—V.M. Kulkarni*
7. **Prakrit Verses in Sanskrit Works on Poetics** (Vol. II) *—V.M. Kulkarni*
8. **Apabhramsa Language and Literature** *—H.C. Bhayani*
9. **Mahabharata Based Plays and Epics** (in Gujarati) *—Prof. S.M. Pamdya*
10. **Santinathacarita** (Prakrit) *—Sh. Devachandra Suri*
11. **Arhat Parsva and Dharanendra Nexus** *—M.A. Dhakey*
12. **Jain Philosophy and Religion** —Tr. *Dr. Nagin J. Shah*
13. **Jaina Theory of Multiple Facets of Reality and Truth** *(Anekantavada)—Nagin J. Shah*
14. **Patan-Jain-Dhatu-Pratima-Lekh-Sangrah** *—Pt. Laxmanbhai H. Bhojak*
15. **Pātañjalayoga Evaṁ Jainayoga Kā Tulanātmaka Adhyayana—** *Dr. Aruna Anand*
16. **Jaina Uddharaṇa Kośa—** *Dr. Kamalesh Kumar Jain*
17. **Gaṅgeśa's Tattvacintāmaṇi with a Commentry *Sukhabodhikā Ṭippanikā* by *Vācaka Guṇaratna*—**Ed. *Nagin J. Shah*

**MOTILAL BANARSIDASS PUBLISHERS PVT. LTD.**

Delhi (INDIA)

E-mail: mlbd@vsnl.com
Website: www.mlbd.com

Rs. 995 Code: 20304

ISBN 81-208-2030-4

9788120820302